विषयानुक्रमणी

पृष्टाङ्कः

I भूमिका i—xvii

II विषयानुक्रमणी xix—xxv

अवतरणिका

1 'अथ समवायितया' इति मूलं न संगतमित्याक्षेपः, तस्य उपाध्यायमतानुसारेण परिहारश्च 1

2 प्रमेयसाध्यकस्थले गगनत्वाद्यवच्छिन्नप्रमेयसामान्याभावानुसरणस्य सार्थक्यनिरूपणम् 11

3 'अथ समवायितया' इति मूलस्य कूटघटितलक्षणाभिप्रायकत्वसमर्थनम् 18

4 समवायितया वाच्यत्वाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसमर्थनम् 23

5 प्रमेयसाध्यकस्थले साध्याभावप्रसिद्ध्युपपादनम् 34

प्रथमस्वलक्षणम्

6 प्रथमस्वलक्षणस्य लक्ष्ये समन्वयप्रदर्शनादि 48

7 हेतुसामानाधिकरण्यविशेषणवैयर्थ्यशङ्कापरिहारौ 56

8 यावत्पदव्यावृत्तिप्रदर्शनम् 59

9 अत एव भूतत्वमूर्तत्वेत्यादिदीधितिग्रन्थस्यावतरणम् 63

10 'परे तु' मतानुसारेण तद्ग्रन्थस्यावतरणं, तन्मतखण्डनं च 71

11 साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका इति विशेषणस्य प्रयोजनवर्णनम् 76

12 साध्यवत्तायां साध्यतावच्छेदकसंबन्धनिवेशनम् 81

13 संबन्धसामान्येन यत्किञ्चित्संबन्धेन वा साध्यवत्तानिवेशे, साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वनिवेशे च दोषकथनम् 88

पृष्ठाङ्कः

14 साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वस्थाने भेदघटितसाध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकत्वं निवेशयितुं न शक्यमिति निरूपणम् 92

15 कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावानां केषांचिन्मतेन लक्षणघटकत्वोपपादनम् 104

16 दैशिकविशेषणतासंबन्धस्य क्वापि व्यापकताघटकत्वं न स्याद् इत्याक्षेपः 113

17 तत्समाधानम् 117

18 उक्तदोषानवकाशत्वसमर्थनम् 121

19 प्रतियोगितायाः व्यापकताघटकत्वेनाभिमतेन संबन्धेन वृत्तिमन्निष्ठत्वनिवेशः 125

20 'येन संबन्धेन' इत्यादिदीधितिविवरणम् 129

21 'एवं दलान्तरेऽपि' इतिदीधितिग्रन्थावतारः 136

22 'संबन्धैक्यविवक्षया' इति दीधितौ मतभेदोन्यासः 144

23 व्यधिकरणधर्मावच्छिन्नाभावस्य संबन्धावच्छिन्नप्रतियोगिताकत्वसमर्थनम् 150

24 रूपादीति दीधितिग्रन्थावतारः 159

25 सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावस्य अत्यन्ताभावात्मकतया दोषमाशङ्क्य निरसनम् 164

26 अत्यन्ताभावस्य ध्वंसात्यन्ताभावधर्मितेरता इति मते दोषः 170

27 महाकाले प्रलयावच्छेदेन वर्तमानतया प्रतियोगिसामानाधिकरण्यमस्तीति प्रतिपादनम् 178

28 गोसाध्यकस्थलेऽतिव्याप्तिवारणं न संभवतीति स्फुटीकरणम् 182

29 स्ववैशिष्ट्यविशेषणप्रयोजनवर्णनदीधितिविवरणम् 187

30 स्वयं लघुलक्षणकथनम् 193

31 जलादीतिग्रन्थावतारः 195

पृष्ठाङ्कः

द्वितीयस्वलक्षणम्

32 द्वितीयलक्षणावतारः 205

33 लक्षणघटकपदप्रयोजनम् 201

34 व्यापकतावच्छेदकरूपे भाववृत्तित्वविशेषणम् 245

35 शेषमिति दीधितेरर्थवर्णनम् 254

चक्रवर्तिलक्षणम्

36 चक्रवर्तिलक्षणम्; तत्समन्वयश्च 259

37 तत्र मतान्तरोपन्यासः 263

38 'संयोगिभिन्नं प्रमेयत्वात्' इत्यत्रातिव्याप्तिनिरासप्रकारः 269

39 तत्र मतान्तरोपन्यासः 272

40 हेत्वधिकरणवृत्तित्वे संबन्धविशेषनिवेशनम् 274

41 साध्याभावपदप्रयोजनम् 286

42 प्रतियोगितायां संबन्धविशेषनिवेशः 288

43 प्रतियोगितावच्छेदकतायां संबन्धविशेषनिवेशः 288

44 चक्रवर्तिद्वितीयलक्षणावतरणं तत्प्रपञ्चश्च 289

45 प्रतियोगिव्यधिकरणत्वपरिष्कारः 293

46 'सामानाधिकरण्येन' इत्यस्य वैयर्थ्यशङ्का 295

47 केषांचिन्मतेन सामानाधिकरण्यदलसार्थक्यम् 297

48 परेषां मतेन सामानाधिकरण्येनेत्यस्य सार्थक्यम् 303

49 स्वमतेन 'सामानाधिकरण्येन' इत्यस्य सार्थक्यम् 313

50 अन्येषां मतेन 'सामानाधिकरण्येन' इत्यस्य सार्थक्यम् 318

51 व्याप्तेरव्यभिचारिसंबन्धरूपत्वोपपादनम् 328

52 अव्यभिचारिसंबन्धपदेन चक्रवर्त्युक्तव्याप्तेः लाभप्रकारोपपादनम् 331

53 अवच्छेदकत्वपरिष्कारः 334

54 'संयोगी सत्त्वात्' इत्यत्रातिव्याप्तिवारणप्रकारः 339

55 पारिभाषिकावच्छेदकत्वनिवेशनेन परिष्कारः 340

पृष्टाङ्कः

प्रगल्भलक्षणम्

56 प्रगल्भप्रथमलक्षणम् 350

57 प्रगल्भद्वितीयलक्षणम् 359

58 प्रगल्भलक्षणद्वयदूषणम् 364

विशारदलक्षणम्

59 लक्षणसमन्वयप्रदर्शनं यन्निष्ठत्वप्रयोजनकथनं च 368

60 विषयितायां साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वस्य प्रयोजनकथनम् 371

61 साध्याभावपदप्रयोजनकथनम् 378

62 हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टे प्रतिबन्धकतावच्छेदकविषयितापर्याप्त्यभावनिवेशापेक्षायां बीजकथनम् 381

63 प्रकृतानुमितिसामान्यविवक्षायाः प्रयोजनम् 383

64 स्वरूपसंबन्धरूपावच्छेदकत्वनिवेशनम् 385

65 सद्धेताव्याप्त्याशङ्कापरिहारौ 390

66 साध्यतावच्छेदकविशेषितस्याभावस्य निवेशो न संभवतीत्याक्षेपः 392

67 उक्ताक्षेपसमाधानम् 398

68 व्यभिचारिण्यतिव्याप्तिशङ्कासमाधानम् 404

69 विशारदलक्षणदूषणम् 405

मिश्रलक्षणम्

70 मिश्रोक्तप्रथमलक्षणस्य समन्वयादिप्रदर्शनम् 409

71 सजातीयत्वपरिष्कारः 414

72 साध्याभावपरिष्कारः 420

73 साध्याभावे व्याप्यवृत्तित्वनिवेशप्रयोजनम् 427

74 साध्याभावे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिवेशनम् 432

		पृष्ठाङ्कः
75	प्रतियोगितावच्छेदकावच्छिन्नत्वस्य प्रयोजनम्	435
76	केवलान्वयिसाध्यकस्थले प्रतियोगितावच्छेदकावच्छिन्न-वैयधिकरण्यं दुर्घटमित्याक्षेपः	439
77	तस्य केषांचिन्मतेन परिहारः	442
78	केषांचिन्मतस्य खण्डनम्	448
79	मतान्तरेण प्रतियोगिवैयधिकरण्यपरिष्करणपूर्वकं तस्य केवलान्वयिनि सुघटत्वोपपादनम्	451
80	व्याप्यवृत्तित्वादिविशेषणस्य प्रयोजनकथनम्	463
81	'अव्याप्यवृत्तेर्वा' इत्यादिदीधितिग्रन्थस्य तात्पर्यकथनम्	467
82	तद्वद्वृत्तित्वाभावपरिष्कारः	471
83	साध्याभाववद्वृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्व-निवेशप्रयोजनकथनम्	478
84	मिश्रोक्तद्वितीयलक्षणस्यावतारिका	487
85	लक्षणसमन्वयादिप्रदर्शनम्	488
86	व्यापकत्वपरिष्कारः	501
87	व्याप्यवृत्तित्वस्य प्रयोजनं परिष्कारश्च	509
88	यथाश्रुतमिश्रलक्षणदूषणम्	518
89	मिश्रोक्ततृतीयलक्षणपरिष्कारः	522

कूटाघटितलक्षणम्

90	कूटाघटितलक्षणावतरणम्	530
91	लक्षणे यावत्तद्वृत्तिमद्वृत्तित्वयोः प्रयोजनम्	532
92	हेतुतावच्छेदकसंबन्धेन वृत्तिमत्त्वनिवेशनम्	535
93	साध्याभावपरिष्कारः	537
94	तद्वद्वृत्तित्वाभावपरिष्कारः	540
95	साध्याभावस्य तत्तद्व्यक्तित्वेन निवेशनम्	546
96	वृत्तिमद्वृत्तित्वविशेषणवैयर्थ्यशङ्का तत्परिहारश्च	549
97	भेदकूटात्मकव्यापकत्वपुरस्कारेण व्यापकत्वनिवेशप्रकारः	551
98	कल्पान्तरेण तद्वद्वृत्तित्वाभावस्य परिष्कारः	553
99	गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेऽतिव्याप्तिशङ्का	558

		पृष्ठाङ्कः
100	गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमतावलम्बनम्	573
101	गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वमतेन लक्षणपरिष्कारः	584
102	प्रतियोगितायां साध्याभाववद्वृत्तित्वत्वव्याप्यत्वादिनिवेश-प्रयोजनम्	595
103	कूटाघटितकूटघटितलक्षणयोर्विशेषस्य कथनम्	597

कूटघटितलक्षणम्

104	कूटघटितलक्षणे दलप्रयोजनप्रतिपादनम्	601
105	समुदायपदप्रयोजनविचारः	602
106	मतान्तरेण समुदायपदप्रयोजनकथनम्	618
107	साध्याभावे साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिता-कत्वविशेषणप्रयोजनकथनम्	617
108	साध्याभावे साध्यतावच्छेदकसमनियतप्रतियोगिताकत्व-निवेशनम्	624
109	घटत्वेन वाच्यत्वाभावस्य साध्यतावच्छेदकसमनियतप्रति-योगिताकत्वोपपादनम्	628
110	उभयत्वावच्छिन्नसाध्यकस्थले प्रतियोगितायाः साध्यता-वच्छेदकव्याप्यत्वोपपादनम्	634
111	'रूपध्वंसवान् रूपात्' इत्यत्रातिव्याप्तिशङ्कातत्परिहारौ	641
112	प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते तस्याः साध्यता-वच्छेदकसमनैयत्योपपादनम्	646
113	साध्यतावच्छेदकव्याप्यत्वदलप्रयोजनविचारः	156
114	साध्यतावच्छेदकव्यापकत्वदलप्रयोजनविचारः	655
115	साध्याभाववत्तायां साध्यवत्ताग्रहविरोधितानियामकसंबन्ध-निवेशनम्	658
116	साध्याभाववत्तायां दैशिकविशेषणतासंबन्धनिवेशनं, भावानामपि तेन संबन्धेन वृत्तेः उपपादनं च	666
117	कूटघटितलक्षणदूषणप्रारम्भः। तत्र 'द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वात्' इत्यत्रातिव्याप्त्युपपादनम्	672
118	'इदं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यत्राति-व्याप्त्युपपादनम्	672

क्रमाङ्कः		पृष्ठाङ्कः
119	रूपसामान्याभावसाध्यकसद्धेतावव्याप्त्युद्भावनम्	675
120	संभवदेकाधिकरण्यकसाध्याभावसमुदायाधिकरणविवक्षायामपि स्थलान्तरेऽतिव्याप्त्युपपादनम्	675
121	यावतामैकाधिकरण्यं संभवतीति विवक्षायामपि 'रूपाभाववान् वायुत्वात्' इत्यत्राव्याप्तिः इत्युपपादनम्	690
122	'यावतामैकाधिकरण्यं संभवति' इत्यस्य परिष्कारपूर्वकं 'किं च' इति ग्रन्थस्यावतरणम्	694
123	हेतुतावच्छेदकसंबन्धेन साध्याभाववद्वृत्तित्वनिवेशस्य प्रयोजनकथनम्। तथा निवेशे 'सत्तावान् जातेः' इत्यादौ अव्याप्ति-प्रसञ्जनम्	702
124	साध्याभावे साधनसमानाधिकरणत्वविशेषणान्न पूर्वोक्तदोषा इत्याक्षेपः	706
125	साध्याभावे साधनसमानाधिकरणत्वविशेषणे 'सत्तावान् जातेः' इत्यत्र अव्याप्तिवारणमशक्यमित्याक्षेपः	718
126	तादृशाक्षेपसमाधानम्	720
127	साधनसमानाधिकरणत्वविशेषणे स्थलान्तरयोरप्यव्याप्त्यतिव्याप्त्योरभाव इति निरूपणम्	730
128	साधनसमानाधिकरणत्वविशेषणेऽपि स्थलविशेषेऽतिव्याप्त्या लक्षणस्य दुष्टतोपपादनम्	736
129	पूर्वोक्तसकलदोषवारकपरिष्कारप्रदर्शनपूर्वकं 'किंच' इत्यादिदीधित्यवतरणम्	738
130	मतान्तरेण 'किंच' इत्यादिदीधितिग्रन्थावतरणम्	743
131	'महाकालान्यो घटात्' इत्यत्रातिव्याप्त्युपपादनम्	751

पुच्छलक्षणम्

132	पुच्छलक्षणावतरणम्	763
133	साध्यतावच्छेदकेत्यादिविशेषणप्रयोजनम्	768
134	व्याप्यवृत्तित्वविशेषणप्रयोजनविचारः	772
135	स्वसमानाधिकरणत्वनिवेशप्रयोजनविचारः	875

		पृष्ठाङ्क
136	समुदायाधिकरणवृत्तित्वादिप्रयोजनम्	780
137	सामानाधिकरण्यस्य व्याप्यवृत्तित्वमते पुच्छलक्षणपरिष्कारः	786
	व्यधिकरणधर्मावच्छिन्नाभावखण्डनम्	
138	'प्रतियोग्यवृत्तिश्च' इत्यादिमणिग्रन्थलभ्यानुमानशोधनम्	789
139	प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावज्ञानं प्रति हेतुत्वव्यवस्थापनम्	798
140	मिश्रानुसारिव्याख्याने अनुपपत्तिशङ्का	801
141	मिश्रानुसारिव्याख्याने अनुपपत्तिशङ्कायाः समाधानम्	805
142	प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमिति निरूपणम्	809
143	विशेषणतावच्छेदकप्रकारकज्ञानस्य विशिष्टवैशिष्ट्यधी-हेतुत्वनिरूपणम्	812
144	अभावबुद्धेर्विशिष्टवैशिष्ट्यावगाहित्वसमर्थनम्	816
145	प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्व-धीरिति नियमखण्डनम्	822
146	प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावधीहेतुत्व-खण्डनपूर्वकं व्यधिकरणधर्मावच्छिन्नाभावसाधनम्	825
147	मिश्रोक्तव्यधिकरणधर्मावच्छिन्नाभावनिराकरणप्रकारस्य खण्डनपूर्वकं तादृशाभावस्थापनम्	831

॥ श्रीरस्तु ॥

॥ चतुर्दशलक्षणी ॥

तत्त्वचिन्तामणिः

अथ 'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः; व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयित्वात्। न चैवं घट एव व्यभिचारः। साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वं हि व्यभिचारः। न च वाच्यत्वाभावस्तादृशो घट इति चेत्, तर्हि तादृशसाध्याभावसामानाधिकरण्याभावो व्याप्तिः। तथा चाप्रसिद्धिः।

गादाधरी

(१) 'अथ समवायितया' इति मूलं न संगतमित्याक्षेपः, तस्य उपाध्यायमतानुसारेण परिहारश्च।

अथ **'समवायितया'** इति **मूलं** व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगम एव संगच्छते। तादृशाभावाभ्युपगमे सर्वत्र तादृशाभाववति हेतोर्वृत्तेरसंभवः। **साध्याभाववद्वृत्तित्वस्य तादृशाभावम्** आदाय लक्षणसंगमने सर्वत्र व्यभिचारिण्यतिव्याप्तिरिति **लक्षणपरिष्कारासंभवेन सौन्दलमतम् अवलम्ब्य** लक्षणकर्तुः **ईदृशाशङ्का** न संगच्छत इति चेत्—

अत्र **उपाध्यायानुयायिनः**—केवलान्वयिनि साध्याभावाप्रसिद्धिनिबन्धनस्य दोषस्य उद्भावितत्वात् साध्याभावस्य कथंचित् प्रसिद्धत्वात् लक्षणस्य निर्दोषता इत्यभिमानेन इयमाशङ्का। तादृशाभिमानमेव निराकरिष्यति अग्रे तर्हि इति ग्रन्थेन। व्यधिकरणधर्मावच्छिन्नाभावोपगमेऽपि यथा व्यभिचारलक्षणे साध्यतावच्छेदकावच्छिन्नसाध्याभावो निवेश्यते, तथा व्याप्ति-

लक्षणेऽपि **तादृशसाध्याभाव एव** निवेश्यः। **अन्यथा** असंभवस्य अतिव्याप्तेर्वा प्रसक्तेः, व्याप्तेः अव्यभिचाररूपतानुपपत्तेश्च इति **पुनः अप्रसिद्धिनिबन्धना** अव्याप्तिः केवलान्वयिस्थल इति हि तदर्थः।

न च - एवं तत्तद्वन्हित्वावच्छिन्नाभावव्यावर्तकसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपेण साध्याभावस्य निवेशनीयतया वाच्यत्वत्वावच्छिन्नसाध्यकस्थले **समवायित्वावच्छिन्नतदभावस्य** अतादृशत्वात् तादृशा**भावप्रसिद्धिः** अनुपयोगिनीति कथमियमाशङ्का ? **साध्यप्रतियोगिकाभावमात्र**निवेशाभिमानस्य आशङ्काबीजत्वे केवलान्वयिसाध्यकस्थले व्यासज्यवृत्तिरूपावच्छिन्नप्रतियोगिताकस्य विशिष्टाभावरूपस्य च **तादृशाभावस्य** प्रसिद्धिसंभवेन **सौन्दलमता**वलम्बनस्य निर्बीजत्वापातात् - इति **वाच्यम्**।

महानसीयवन्हित्वाद्यवच्छिन्नाभाववारणाय साध्यतावच्छेदकापर्याप्तस्वसमानाधिकरणधर्मनिष्ठावच्छेदकताकप्रतियोगिता - भिन्नप्रतियोगिताकाभाव एव निवेश्य इत्यभिमानेन आशङ्कासङ्गतेः। प्रमेयत्वादिना प्रमेयमात्रं यत्र साध्यतावच्छेदकम्, तत्र प्रमेयत्वादिविशिष्टप्रमेयापर्याप्तं तदविशेषितघटत्वादिनिष्ठमेव अवच्छेदकत्वं प्रसिद्धम्। स्वसमानाधिकरणवृत्तितादृशावच्छेदकतानिरूपकप्रतियोगिताभिन्नं च व्यधिकरणधर्मावच्छिन्नप्रतियोगितामात्रमेव। यत्र यादृशं साध्यतावच्छेदकं विशिष्टमविशिष्टं वा तत्र तदनवच्छिन्नत्वसमानाधिकरणधर्मावच्छिन्नत्वोभयाभाववत्प्रतियोगितानिवेशाभिप्रायको वा अयं ग्रन्थः— इत्याहुः॥

॥ चतुर्दशलक्षणीगादाधरीव्याख्यानं विवरणम्॥

श्रीवेंकटाचलाधीशं लक्ष्म्यालिङ्गितवक्षसम्।
आश्रितानां कल्पतरुं संश्रये करुणानिधिम्॥

न्यायवेदान्तमीमंसानिष्णातं गुणसागरम् ।
अनूचानं कृष्णताताननामानं पितरं भजे ॥

श्रीशैलवंशतिलकं सदाचारगुणोज्ज्वलम् ।
वश्यन्यायादिशास्त्रं तं देवनाथं गुरुं श्रये ॥

व्यधिकरणमणिव्याख्या दीधितिरिति या शिरोमणेः ख्याता ।
विवृणोम्यस्या व्याख्यां गदाधरकृतां सुबोधपदगुम्फैः ॥

इतः प्राक् पञ्चलक्षण्यां 'ननु अनुमितिहेतुव्याप्तिज्ञाने का-व्याप्तिः' इत्याशङ्क्य 'न तावदव्यभिचरितत्वम्, तद्धि न साध्या-भाववदवृत्तित्वम्' इत्यादिना साध्याभाववदवृत्तित्वादीनां पञ्चानाम् अव्यभिचारपदार्थानां व्याप्तित्वं 'केवलान्वयिन्यभावात्' इति ग्रन्थेन निराकृतम् । केवलान्वयिसाध्यकसद्धेतौ 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ वाच्यत्वरूपसाध्यस्य सर्वत्र वर्तमानतया वाच्यत्वाभावरूपस्य साध्याभावस्य वा वाच्यत्ववद्भेदरूपस्य साध्यवदन्योन्याभावस्य वा अप्रसिद्धतया साध्याभाव-साध्यवदन्यो-न्याभावघटितानां व्याप्तित्वं न संभवतीति तदाशयः ।

अत्र **सौन्दलोपाध्यायाः** वदन्ति - अत्यन्ताभावो द्विविधः । व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः, समानाधिकरणधर्मा-वच्छिन्नप्रतियोगिताकश्चेति । प्रतियोगिताश्रयावृत्तिधर्मव-च्छिन्नप्रतियोगिताकः अभावः व्यधिकरणधर्मावच्छिन्नाभावः । यथा 'घटत्वेन पटो नास्ति' इति प्रतीतिसिद्धः प्रतियोगिता-श्रयपटावृत्तिघटत्वावच्छिन्नप्रतियोगिताकः अत्यन्ताभावः । प्रति-योगिताश्रयवृत्तिधर्मावच्छिन्नप्रतियोगिताकः अत्यन्ताभावः समा-नाधिकरणधर्मावच्छिन्नाभावः । यथा 'घटो नास्ति' इति प्रती-तिसिद्धः प्रतियोगिताश्रयघटवृत्तिघटत्वावच्छिन्नप्रतियोगिताको-ऽत्यन्ताभावः । 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ वाच्यत्वनिष्ठ-वाच्यत्वत्वरूपसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य

अप्रसिद्धत्वेऽपि वाच्यत्वावृत्तिसमवायित्वरूपव्यधिकरणधर्मावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकस्य 'समवायितया वाच्यत्वं नास्ति' इति प्रतीतिसिद्धस्य अत्यन्ताभावस्य घटादिषु सर्वत्र प्रसिद्धतया साध्याभावाप्रसिद्धिनिबन्धनः अव्याप्तिरूपः दोषः नास्ति - इति। तन्मतमवलम्ब्य 'अथ इदं वाच्यं ज्ञेयत्वात्' इत्यत्र इत्यादिः मणिग्रन्थः प्रवृत्तः।

मणौ घट एव प्रसिद्ध [पृ.1] इति। समानाधिकरणधर्मावच्छिन्नाभावः प्रतियोगिशून्य एव भवति। व्यधिकरणधर्मावच्छिन्नाभावस्तु प्रतियोगिमत्यपि वर्तते। अतः तस्य केवलान्वयित्वम् इति सूचनार्थं **घट एव** इत्युक्तम्।

गादाधर्यां **अथ समवायितयेति** [पृ.1] मूलम् इत्यादि। 'साध्याभाववदवृत्तित्वम्' इति लक्षणे यो दोषः पूर्वं प्रदर्शितः तत्परिहारप्रदर्शनार्थं 'अथ' इत्यादिः मणिग्रन्थः प्रवृत्त इति वक्तव्यम्। पूर्वं साध्याभावाप्रसिद्धिनिबन्धनस्य अव्याप्तिरूपदोषस्य प्रदर्शितत्वात् तत्परिहारः अनेन आक्षेपग्रन्थेन यदि लभ्येत तदा अस्य ग्रन्थस्य सङ्गतिः भवेत्। वस्तुतः दोषपरिहारः न लभ्यते। तथा हि - व्यधिकरणधर्मावच्छिन्नाभावम् अङ्गीकृत्य 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ साध्याभावप्रसिद्धेरुपपादने सर्वत्र सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववति हेतोः वृत्तित्वात् असंभवः। 'वन्हिमान् धूमात्' इत्यादौ साध्याभावपदेन घटत्वेन वन्ह्यभावस्य ग्रहणे तद्वति पर्वते धूमस्य सत्त्वात् धूमे साध्याभाववद्वृत्तित्वाभावो नास्ति। एवं 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ समवायितया वाच्यत्वाभाववति घटादौ ज्ञेयत्वस्य वृत्तेः साध्याभाववद्वृत्तित्वाभावः नास्तीति लक्षणस्य असंभवः। यदि तु 'साध्याभाववद्वृत्तित्वाभावः' इत्यनेनापि व्यधिकरणधर्मावच्छिन्नाभाव एव गृह्यते, सद्धेतौ व्यधिकरणधर्मावच्छिन्न-

साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन रूपेण सत्त्वेऽपि घटत्वेन रूपेण असत्त्वात् घटत्वेन साध्याभाववद्वृत्तित्वाभावमादाय लक्षणसङ्गमनम् इत्युच्यते, तदा 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि अतिव्याप्तिः। तत्र धूमाभाववद्वृत्तित्वस्य धूमाभाववद्वृत्तित्वत्वेन वह्नौ सत्त्वेऽपि घटत्वेन तादृशवृत्तित्वविरहात्। अतः लक्षणस्य अतिव्याप्त्यसंभवादिदोषपरिहारासंभवेन **सौन्दलमतमवलम्ब्य** दोषपरिहारार्थं प्रवृत्तोऽयम् आक्षेपग्रन्थः न सङ्गच्छत इति भावः।

'व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगम एव' इति 'एव'-कारेण समानाधिकरणधर्मावच्छिन्नाभावाभ्युपगमः व्यवच्छिद्यते। तदभ्युपगमे समवायितया वाच्यत्वाभावस्य लक्षणाघटकत्वात्। **तादृशाभावाभ्युपगम** [पृ.1] इति। व्यधिकरणधर्मावच्छिन्नाभावाङ्गीकारे इत्यर्थः। **साध्याभाववद्वृत्तित्वस्य तादृशाभावमिति** [पृ.1]। साध्याभाववद्वृत्तित्वनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावम् इत्यर्थः। **लक्षणपरिष्कारासंभवेनेति** [पृ.1]। लक्षणस्य निर्दोषत्वासंभवेनेत्यर्थः। **'अवलम्ब्य'** [पृ.1] इतिल्यबन्तस्य आशङ्कायामन्वयः। **ईदृशाशङ्केति** [पृ.1]। साध्याभावः प्रसिद्ध इत्याशङ्केत्यर्थः।

अत्र उपाध्यायानुयायिन [पृ.1] इत्यादि। 'अथ' इत्यादि आक्षेपग्रन्थसाङ्गत्यम् **उपाध्यायानुयायिन** एवं प्रतिपादयन्ति— 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ साध्याभावाप्रसिद्धिनिमित्तकस्य अव्याप्तिरूपदोषस्य पूर्वमुद्भावितत्वात् साध्याभावस्य प्रसिद्धिसंपादने तदप्रसिद्धिरूपस्य निमित्तस्याभावात् तन्निमित्तकः अव्याप्तिरूपः दोषोऽपि न भवति इत्यभिमानेन 'अथ' इत्यादिः आशङ्काग्रन्थः प्रवृत्तः। तादृशः अभिमानः न युज्यते। अप्रसिद्धिपरिहारेऽपि दोषस्य वारयितुम् अशक्यत्वात् इति 'तर्हि' इत्यादिग्रन्थेन वक्ष्यति। तस्य ग्रन्थस्य निर्दोषत्वाभिमाननिरास-

परस्य अयमाशयः—व्यधिकरणधर्मावच्छिन्नाभावाङ्गीकारेऽपि प्रकृते नोपयोगः। व्यभिचाराभावः अव्यभिचारपदार्थः। व्यभिचारश्च साध्याभाववद्वृत्तित्वम्। तत्र साध्याभावपदेन साध्यनिष्ठप्रतियोगिताकाभावमात्रविवक्षणे 'वन्हिमान् धूमात्' इत्यादौ साध्याभावपदेन घटत्वेन वन्ह्यभावं गृहीत्वा तद्वत्पर्वतादिवृत्तित्वस्य धूमे सत्त्वेन धूमस्य व्यभिचारित्वापत्तिः। अतः व्यभिचारशरीरप्रविष्टसाध्याभावपदेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकोऽभावः विवक्षणीयः। विवक्षणे च घटत्वेन वन्ह्यभावस्य साध्यतावच्छेदकवन्हित्वावच्छिन्नप्रतियोगिताकत्वविरहात् स न लक्षणघटकः। किन्तु वन्हित्वावच्छिन्नवन्ह्यभाव एव व्यभिचारलक्षणघटकः। तद्वद्ह्रदादिवृत्तित्वं धूमस्य नास्तीति न धूमस्य व्यभिचारित्वापत्तिः। एवञ्च व्यभिचारशरीरे साध्यतावच्छेदकावच्छिन्न-साध्याभावनिवेशे व्यभिचाराभावरूपव्याप्तिशरीरेऽपि साध्यतावच्छदकावच्छिन्नसाध्याभाव एव निवेशनीयः। अन्यथा व्याप्तेः व्यभिचाराभावरूपत्वानुपपत्तेः। किञ्च व्यप्तिशरीरे साध्यनिष्ठप्रतियोगिताकाभावमात्रस्य निवेशे सर्वत्र सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्याभावमादाय तद्वति हेतोर्वृत्त्या असंभवः। साध्याभाववद्वृत्तित्वाभावपदेनापि व्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावमादाय असंभववारणे 'धूमवान् वह्नेः' इत्यादौ व्याभिचारिणि घटत्वेन निर्धूमवृत्तित्वाभावमादाय पूर्वोक्तरीत्या अतिव्याप्तिः। तस्मात् व्याप्तिशरीरेऽपि साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावस्यैव निवेशनीयतया 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ समवायित्वेन वाच्यत्वाभावस्य प्रसिद्धत्वेऽपि तस्य समवायित्वावच्छिन्नप्रतियोगिताकस्य वाच्यत्वत्वरूपसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेण व्याप्तिलक्षणाघटकतया वाच्यत्वत्वावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकाभावस्य च अप्रसिद्ध्या तन्निबन्धनाव्याप्तिः केवलान्वयिस्थले तदवस्थेति।

तादृशसाध्याभाव एवेति [पृ.2]। साध्यतावच्छेदकावच्छिन्न-साध्याभाव इत्यर्थः। **अन्यथेति** [पृ.2]। साध्यतावच्छेदकावच्छिन्नसाध्याभावमनिवेश्य साध्यनिष्ठप्रतियोगिताकाभावमात्र-निवेशे इत्यर्थः। **पुनः** इति [पृ.2]। **सौन्दलमतावलम्बनेऽपीत्यर्थः।**

न च एवमित्यादि [पृ.2]। महानसीयवन्ह्याद्यभावमादाय तद्वत्पर्वतादिवृत्तित्वस्यैव धूमे सत्वेन अव्याप्तिः स्यात् इति तद्वारणाय व्याप्तिशरीरप्रविष्टसाध्याभावपदेन साध्यतावच्छेदका-वच्छिन्नप्रतियोगिताकाभाव एव विवक्षणीयः। समवायितया वाच्यत्वाभावस्तु वाच्यत्वत्वावच्छिन्नप्रतियोगिताको न भवतीति तस्य लक्षणाघटकतया समवायित्वावच्छिन्नवाच्यत्वाभावस्य प्रसिद्धिः प्रकृतानुपयोगिनीति कथं तादृशाभावमादाय दोषपरि-हारशङ्का। यदि तु साध्यप्रतियोगिकाभाव एव व्याप्तिलक्षणे प्रविष्टः इत्यभिमानेन समवायितया वाच्यत्वाभावस्यापि वाच्य-त्वरूपसाध्यप्रतियोगिकतया साध्याभावप्रसिद्धिशङ्का इत्युच्यते, तर्हि 'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र वाच्यत्वघटोभयत्वरूपसमा-नाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यापि वाच्यत्वरूप-साध्यप्रतियोगिकतया, पूर्वक्षणवृत्तित्वविशिष्टवाच्यत्वाभावस्यापि साध्यप्रतियोगिकतया तादृशाभावप्रसिद्धिप्रदर्शनेन साध्याभावा-प्रसिद्धिशङ्कायाः परिहारसंभवात् **सौन्दलसंमतव्यधिकरणधर्मा-**वच्छिन्नाभावं प्रदर्श्य साध्याभावप्रसिद्धिसंपादनं निर्बीजम् इति शङ्कितुराशयः।

तत्तद्वन्हित्वावच्छिन्नेति [पृ.2]। महानसीयवन्हित्वाद्यवच्छिन्ना-भावव्यावर्तकं यत् साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वं तेन रूपेण इत्यर्थः। अत्र च साध्यतावच्छेदकावच्छिन्नप्रति-योगिताकत्वं साध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रतियोगिता-निरूपकत्वम्। पर्याप्त्यनिवेशे महानसीयत्ववन्हित्वोभयपर्याप्ता-

वच्छेदकताकप्रतियोगिताकस्य महानसीयवन्ह्यभावस्यापि 'अधिकं तु प्रविष्टं चेत् न तद्धान्यै' इति न्यायेन वन्हित्वनिष्ठावच्छेदकताकप्रतियोगिताकत्वात् तद्व्यावृत्त्यसंभवात् । **समवायित्वावच्छिन्नतदभावस्येति** [पृ.2]। समवायित्वावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकाभावस्येत्यर्थः। **अतादृशत्वादिति** [पृ.2] । साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहात् इत्यर्थः । **तादृशाभावप्रसिद्धिरिति** [पृ.2] । समवायित्वावच्छिन्नवाच्यत्वाभावप्रसिद्धिरित्यर्थः । **साध्यप्रतियोगिकाभावमात्रेति** [पृ.2] । 'मात्र' शब्देन साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशव्यवच्छेदः । **तादृशाभावस्येति** [पृ.2] । साध्यप्रतियोगिकाभावस्येत्यर्थः ।

समाधत्ते–**महानसीयवन्हित्वाद्यवच्छिन्नेत्यादिना** [पृ.2]। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशेऽपि महानसीयवन्ह्यभावस्यापि वन्हित्वावच्छिन्नप्रतियोगिताकतया व्यावृत्तिर्न संभवति । अतः साध्यतावच्छेदकेतरधर्मानवच्छिन्नप्रतियोगिताकः अभावः साध्याभावपदेन विवक्षणीयः । महानसीयवन्ह्यभावस्य साध्यतावच्छेदकवन्हित्वेतरमहानसीयत्वावच्छिन्नप्रतियोगिताकतया तस्य व्यावृत्तिः । एवं विवक्षणेऽपि 'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र समवायितया वाच्यत्वाभावस्य वाच्यत्वत्वेतरसमवायित्वावच्छिन्नप्रतियोगिताकतया लक्षणघटकता न निर्वहति । तदर्थं धर्मे स्वसमानाधिकरणत्वं विशेषणं देयम् ।

समवायित्वस्य साध्यतावच्छेदकेतरत्वेऽपि समानाधिकरणत्वं नास्तीति साध्यतावच्छेदकेतरसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताक एव समवायितया वाच्यत्वाभाव इति अस्य लक्षणघटकत्वम् । साध्यतावच्छेदकेतरसमानाधिकरणधर्मानवच्छिन्नत्वं नाम साध्यतावच्छेदकेतरस्वसमानाधिकरणधर्मनिष्ठावच्छेदकताकप्रतियोगिताभिन्नत्वम् । तथा च साध्यतावच्छेदकेतरस्वसमानाधि-

करणधर्मनिष्ठावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगिताक: अभावः साध्याभावपदेन विवक्षित इति फलितम्। एवमपि प्रमेयवत्साध्यकस्थले 'प्रमेयवद्वान् ज्ञेयत्वात्' इत्यत्र सद्धेतौ साध्यतावच्छेदकप्रमेयेतरस्य अप्रसिद्धया अव्याप्तिः। अतः धर्मे साध्यतावच्छेदकेतरत्वं परित्यज्य धर्मनिष्ठायाम् अवच्छेदकतायां साध्यतावच्छेदकापर्याप्तत्वं निवेशनीयम्। तथा च साध्यतावच्छेदकापर्याप्तस्वसमानाधिकरणधर्मनिष्ठावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगिताकाभाववदवृत्तित्वं व्याप्तिः। 'वह्निमान् धूमात्' इत्यादौ महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः स्वसमानाधिकरणमहानसीयत्ववह्नित्वनिष्ठत्वं साध्यतावच्छेदकवह्नित्वापर्याप्तत्वं चास्तीति सा प्रतियोगिता साध्यतावच्छेदकापर्याप्तस्वसमानाधिकरणधर्मनिष्ठावच्छेदकताका भवति, न तु तादृशावच्छेदकताक-प्रतियोगिताभिन्नेति महानसीयवह्न्यभावो न लक्षणघटक: अतस्तमादाय नाव्याप्तिः। समवायितया वाच्यत्वाभावीयप्रतियोगितावच्छेदकतायाः समवायित्वनिष्ठायाः साध्यतावच्छेदकवाच्यत्वत्वापर्याप्तत्वेऽपि स्वसमानाधिकरणधर्मनिष्ठत्वं नास्ति। समवायित्वस्य प्रतियोगिताव्यधिकरणतया तन्निष्ठावच्छेदकतायाः स्वसमानाधिकरणधर्मनिष्ठित्वविरहात्।

अतः स्वपदेन घटत्वेन घटाभावीयप्रतियोगिता ग्राह्या। तन्निरूपितावच्छेदकतायाः स्वसमानाधिकरणघटत्वनिष्ठत्वात् साध्यतावच्छेदकवाच्यत्वत्वापर्याप्तत्वाच्च। तथा च घटाद्यभावीयप्रतियोगिता साध्यतावच्छेदकापर्याप्तस्वसमानाधिकरणधर्मनिष्ठावच्छेदकताकप्रतियोगिता; तद्भिन्नप्रतियोगिताक: समवायितया वाच्यत्वाभाव इति तस्य लक्षणघटकत्वम्। प्रमेयवत्साध्यकस्थले साध्यतावच्छेदकं प्रमेयत्वविशिष्टप्रमेयम्। तदपर्याप्ता स्वसमानाधिकरणधर्मनिष्ठा अवच्छेदकता घटत्वादिनिष्ठा

निरवच्छिन्ना घटाद्यभावीयप्रतियोगितावच्छेदकता। तन्निरूपक-प्रतियोगिता घटाद्यभावीयप्रतियोगिता। तद्भिन्नप्रतियोगिताकः अभावः व्यधिकरणधर्मावच्छिन्नाभावः घटत्वादिना पटाद्यभावः सर्वोऽपि। अतः न अप्रसिद्धिनिबन्धनो दोष इत्यभिमानेन 'अथ समवायितया' इति आशङ्का इति भावः।

प्रमेयमात्रमिति [पृ.2]। प्रमेयसामान्यमित्यर्थः। **तद-विशेषितेति** [पृ.2]। प्रमेयत्वाविशिष्टघटत्वादिनिष्ठमित्यर्थः। **प्रतियोगितामात्रमेवेति** [पृ.2]। प्रतियोगितासामान्यमित्यर्थः। लाघवादाह - **यत्र यादृशमिति** [पृ.2]। तथा च व्याप्तिघटकसाध्याभावपदेन साध्यतावच्छेदकानवच्छिन्नत्व-स्वसमानाधिकरणधर्मावच्छिन्नत्वोभयाभाववत्प्रतियोगिताकः अभावः विवक्षितः। महानसीयवह्न्यभावीयप्रतियोगितायां साध्यता-वच्छेदकपर्याप्तावच्छेदकताकान्यत्वरूपं साध्यतावच्छेदकानवच्छिन्न-त्वं प्रतियोगितासमानाधिकरणमहानसीयवह्नित्वावच्छिन्नत्वं च उभयमस्तीति तादृशोभयाभाववत्त्वविरहात् महानसीयवन्ह्य-भावः न लक्षणघटकः। अतः तमादाय नाव्याप्तिः। वाच्यत्व-साध्यकस्थले समवायितया वाच्यत्वाभावः लक्षणघटकः। तदीय-प्रतियोगितायां साध्यतावच्छेदकवाच्यत्वत्वानवच्छिन्नत्वसत्त्वेऽपि स्वसमानाधिकरणधर्मावच्छिन्नत्वविरहेण तदभावप्रयुक्तस्य उभया-भावस्य सत्त्वात्। अतो न साध्याभावाप्रसिद्धिः। प्रमेयवत्साध्य-कस्थले प्रमेयत्वविशिष्टप्रमेयरूपसाध्यतावच्छेदकानवच्छिन्नत्वं घटत्वेन पटाभावीयप्रतियोगितायाम् अस्ति। अथापि स्वसमा-नाधिकरणधर्मावच्छिन्नत्वाभावात् तत्प्रयुक्तोभयाभाववत्प्रतियोगि-ताकत्वं व्यधिकरणधर्मावच्छिन्नाभावे घटत्वादिना पटाद्यभावे-ऽस्तीति तत्रापि नाप्रसिद्धिरिति भावः।

गादाधरी

(२) प्रमेयसाध्यकस्थले गगनत्वाद्यवच्छिन्नप्रमेयसामान्याभावानुसरणस्य सार्थक्य-निरूपणम् ।

न च - एवं प्रमेयत्वावच्छिन्नसाध्यकस्थलेऽपि **व्यधिकरण-धर्मावच्छिन्नाभावमादायैव** लक्षणसमन्वयसंभवात् **दीधितिकृता** तत्र गगनत्वघटत्वपटत्वोभयाद्यवच्छिन्नप्रमेयसामान्याभावपर्यन्ता-नुसरणप्रयासो व्यर्थ इति - वाच्यम् । **महानसीयवह्नित्वाद्य-वच्छिन्नाभाववारणाय** साध्यतावच्छेदकसमनियतप्रतियोगिताकः **साध्यतावच्छेदकापर्याप्तसाध्यनिष्ठधर्मवृत्त्यवच्छेदकताकान्य-प्रतियोगिताको** वा अभावः निवेश्यः । तदभिप्रायेणैव तैः तथाविधाभावानुसरणात् ।

न च - घटत्वपटत्वोभयावच्छिन्नाभावप्रतियोगितावच्छेद-कता साध्यवृत्तिधर्मनिष्ठैव; घटत्वपटत्वयोः प्रत्येकं साध्यनिष्ठ-त्वात् इति कथमसौ लक्षणघटक इति - वाच्यम् । **'साध्यवृत्ति-धर्मनिष्ठ'** इत्यनेन यत्पर्याप्त्यधिकरणधर्मविशिष्टाधिकरणं साध्यवत् तत्त्वस्य विवक्षिततया घटत्वपटत्वोभयपर्याप्तावच्छेद-कताया अन्यत्वप्रतियोगिकोटौ अनन्तर्भावात् ।

विवरणम्

न च एवमिति [पृ.11] । प्रमेयत्वावच्छिन्नसाध्यकस्थले 'प्रमेयवान् ज्ञेयत्वात्' इत्यादौ साध्याभावाप्रसिद्धिमाशङ्क्य गगनत्वेन प्रमेयसामान्याभावः, घटत्वपटत्वोभाभ्यां प्रमेयसामान्या-भावो वा तत्र प्रसिध्यति इति उपरिष्टात् दीधितिकृतः वक्ष्यन्ति ।

साध्याभावपदेन साध्यतावच्छेदकानवच्छिन्नत्व - समानाधि-करणधर्मावच्छिन्नत्वोभयाभाववत्प्रतियोगिताकाभावविवक्षणे

प्रमेयसाध्यकस्थलेऽपि घटत्वादिना पटाद्यभावस्य यस्य कस्यापि व्यधिकरणधर्मावच्छिन्नाभावस्य साध्याभावपदेन उपादानं संभवति। तदभावप्रतियोगितायां समानाधिकरणधर्मावच्छिन्न-त्वविरहेण तत्प्रयुक्तोभयाभाववत्प्रतियोगिताकत्वस्य घटत्वादिना पटाद्यभावे सत्त्वात्। तथा च घटत्वादिना पटाद्यभावमादायैव लक्षणसमन्वयसंभवात् तत्र अभावान्तरानुसरणप्रयासः दीधिति-कृतां विफल इति भावः।

'न च एवम्' [पृ.11] इत्यत्र **'एवं'** शब्दस्य साध्याभावपदेन उपाध्यायमतरीत्या परिष्कृताभावविवक्षायाम् इत्यर्थः। **स्थलेऽपि** [पृ.11] इति 'अपि' शब्देन 'इदं वाच्यं ज्ञेयत्वात्' इति स्थलस्य प्रमेयवत्साध्यकस्थलस्य च समुच्चयः।

महानसीयवन्हित्वाद्यवच्छिन्नाभाववारणाय [पृ.11] इति। 'साध्याभाववदवृत्तित्वम्' इति लक्षणे साध्याभावपदेन अन्यादृशो-ऽभावः विवक्षित इति दीधितिकृतां मनसि वर्तते। तदनुसारेण तु प्रमेयसाध्यकस्थले घटत्वादिना पटाद्यभावस्य लक्षणघटकता न संभवतीति तैः अभावान्तरानुसरणं कृतम्। तथा हि— साध्यनिष्ठप्रतियोगिताकाभावमात्रविवक्षणे महानसीयवह्न्याद्य-भावमादाय अव्याप्तिर्भवति। साध्यतावच्छेदकावच्छिन्नप्रतियो-गिताकाभावविवक्षणे केवलान्वयिसाध्यकस्थले समवायितया वाच्यत्वाभावस्य लक्षणघटकत्वं न संभवति। अतः दोषद्वय-परिहाराय साध्याभावपदेन साध्यतावच्छेदकसमनियतप्रतियोगि-ताकः अभावः विवक्षणीयः। प्रतियोगितायां साध्यतावच्छेदक-समनियतत्वं साध्यतावच्छेदकव्याप्यत्वे सति साध्यतावच्छेदक-व्यापकत्वम्।

'वन्हिमान् धूमात्' इत्यादौ महानसीयवह्न्यभावीय-प्रतियोगितायां वन्हित्वव्याप्यत्वसत्त्वेऽपि वन्हित्वव्यापकत्वं

नास्ति। वन्हित्वाधिकरणे पर्वतीयवह्नौ महानसीयवह्न्यभावीयप्रतियोगिताया अभावात्। अतः साध्यतावच्छेदकसमनियतप्रतियोगिताकः महानसीयवह्न्यभावो न भवति। किन्तु वन्हित्वावच्छिन्नाभाव एव इति नाव्याप्तिः।

'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ समवायितया वाच्यत्वाभावीयप्रतियोगितायां वाच्यत्वनिष्ठायां वाच्यत्वत्वव्याप्यत्वव्यापकत्वयोः सद्भावात् साध्यतावच्छेदकसमनियतप्रतियोगिताकः अभावः समवायितया वाच्यत्वाभावो भवतीति तस्य लक्षणघटकत्वम्।

प्रमेयत्वावच्छिन्नसाध्यकस्थले घटत्वेन पटाभावीयप्रतियोगितायाः पटमात्रवृत्तित्वेन प्रमेयत्वव्यापकत्वाभावात् प्रमेयत्वसमनियतप्रतियोगिताकः घटत्वादिना पटाद्यभावो न भवतीति आलोच्य गगनत्वादिना प्रमेयसामान्याभावानुधावनम्। तदीयप्रतियोगितायाः प्रमेयसामान्यनिष्ठत्वेन प्रमेयत्वसमनियतत्वमस्तीति लक्षणघटकता इति दीधितिकृतामाशयः।

ननु साध्याभावपदेन साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावविवक्षणेऽपि 'वन्हिमान् धूमात्' इत्यादौ तार्णातार्णवह्न्युभयाभावस्यापि वन्हित्वसमनियतप्रतियोगिताकत्वमस्ति। वन्हित्वं हि तार्णे अतार्णे च वन्हावस्ति। तादृशोभयाभावीयप्रतियोगितापि तत्रैवास्ति। तथा च तादृशोभयाभावमादाय तद्वति पर्वते धूमस्य वृत्तेः अव्याप्तिः प्राप्नोति। एवं 'समवेतवान् जातेः' इत्यत्र सद्धेतौ समवेतत्वसमनियतप्रतियोगिताकाभावः एतद्रूपान्यत्वविशिष्टसमवेताभावः। तद्वति एतद्रूपे हेतोर्वृत्त्या अव्याप्तिः। तद्वारणाय साध्यतावच्छेदकसमनियतवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकाभावविवक्षणे गौरवम् इत्यतः पक्षान्तरमाह – **साध्यतावच्छेदकापर्याप्तेति** [पृ.11]। साध्यता-

वच्छेदकापर्याप्ता साध्यनिष्ठधर्मवृत्तिश्च या अवच्छेदकता तन्निरूपकप्रतियोगिताभिन्नप्रतियोगिताकाभावः साध्याभावपदेन विवक्षणीयः ।

'वन्हिमान् धूमात्' इत्यादौ महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता महानसीयत्ववन्हित्वोभयपर्याप्ता । न तु साध्यतावच्छेदकमात्रपर्याप्ता । अतः सा साध्यतावच्छेदकापर्याप्ता भवति । एवं साध्यवन्हिनिष्ठो यो धर्मः महानसीयत्वं वन्हित्वं च, तद्वृत्तिश्च सा अवच्छेदकता । अतः महानसीयवह्न्यभावीयप्रतियोगिता साध्यतावच्छेदकापर्याप्तसाध्यनिष्ठधर्मवृत्त्यवच्छेदकताका, न तु तादृशावच्छेदकताकप्रतियोगिताभिन्नेति तादृशप्रतियोगिताभिन्नप्रतियोगिताकः न महानसीयवह्न्यभाव इति तमादाय नाव्याप्तिः ।

वाच्यत्वसाध्यकस्थले समवायितया वाच्यत्वाभावीयप्रतियोगितावच्छेदकता समवायित्वनिष्ठा यद्यपि वाच्यत्वत्वरूपसाध्यतावच्छेदकापर्याप्ता, तथापि साध्यनिष्ठधर्मवृत्तिर्न भवति । समवायित्वस्य साध्यवाच्यत्वनिष्ठत्वाभावात् । अतः अवच्छेदकतापदेन पूर्वक्षणवृत्तित्वविशिष्टवाच्यत्वाभावीयप्रतियोगितावच्छेदकता पूर्वक्षणवृत्तित्वविशिष्टवाच्यत्वत्वनिष्ठा ग्राह्या । तस्याः वाच्यत्वत्वापर्याप्तत्वात् वाच्यत्वनिष्ठधर्मवृत्तित्वाच्च । तादृशावच्छेदकताकप्रतियोगिता विशिष्टवाच्यत्वाभावीयप्रतियोगिता । तद्भिन्नप्रतियोगिताकाभावः समवायितया वाच्यत्वाभाव इति तस्य लक्षणघटकत्वम् ।

प्रमेयत्वावच्छिन्नसाध्यकस्थले घटत्वेन पटाभावस्य न लक्षणघटकत्वम् । तदीयप्रतियोगितावच्छेदकतायाः घटत्वनिष्ठायाः प्रमेयत्वरूपसाध्यतावच्छेदकापर्याप्तत्वात् । घटात्मकप्रमेयरूपसाध्यनिष्ठघटत्वरूपधर्मवृत्तित्वाच्च तादृशावच्छेदकताक-

प्रतियोगिताभिन्नत्वं घटत्वेन पटाभावीयप्रतियोगितायां नास्ति । अतः तद्भिन्नप्रतियोगिताकाभावपदेन घटत्वेन पटाभावस्य ग्रहीतुमशक्यतया गगनत्वादिना प्रमेयसामान्याभावानुधावनम् इति भावः ।

यद्यपि प्रमेयत्वावच्छिन्नसाध्यकस्थले गगनत्वेन प्रमेयसामान्याभावस्य लक्षणघटकत्वं न संभवति, तदीयप्रतियोगितावच्छेदकतायाः गगनत्वनिष्ठायाः प्रमेयत्वापर्याप्तत्वात् प्रमेयनिष्ठगगनत्ववृत्तित्वाच्च, साध्यतावच्छेदकापर्याप्त-साध्यनिष्ठ-धर्मवृत्त्यवच्छेदकताकप्रतियोगिताकत्वस्यैव गगनत्वेन प्रमेयसामान्याभावे सत्वात् तद्भिन्नप्रतियोगिताकत्वविरहात्, तथापि घटत्वपटत्वाभ्यां प्रमेयसामान्याभावस्य लक्षणघटकत्वं संभवति । उभयपर्याप्तायाः प्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकप्रमेयत्वापर्याप्तत्वेऽपि साध्यनिष्ठधर्मवृत्तित्वविरहात् । न हि घटत्वपटत्वोभयं कस्मिंश्चित् प्रमेये वर्तते । अतः अवच्छेदकतापदेन घटत्वपटत्वोभाभ्यां प्रमेयसामान्याभावीयप्रतियोगितावच्छेदकता ग्रहीतुं न शक्यते । किन्तु घटत्वादिना पटाद्यभावीयप्रतियोगितावच्छेदकतैव ग्रहीतुं शक्यते । तादृशावच्छेदकताक-प्रतियोगिताभिन्नप्रतियोगिताकत्वं घटत्वपटत्वाभ्यां प्रमेयसामान्याभावेऽस्तीति स लक्षणघटक इत्याशयः ।

तत्र शङ्कते - **न च घटत्वपटत्वोभयेति** [पृ.11]। घटत्वपटत्वोभयावच्छिन्न - प्रमेयसामान्याभावीयप्रतियोगितावच्छेदकतापि साध्यनिष्ठधर्मवृत्तिरेव । घटत्वपटत्वयोः सम्भूय एकप्रमेयवृत्तित्वाभावेऽपि घटत्वं घटरूपप्रमेयनिष्ठम्, पटत्वं पटरूपप्रमेयनिष्ठम् इत्येवं प्रत्येकं घटत्वपटत्वयोः साध्यनिष्ठत्वात् । तथा च साध्यनिष्ठघटत्वपटत्ववृत्ति - साध्यतावच्छेदकापर्याप्तावच्छेदकताकप्रतियोगिताकत्वमेव घटत्वपटत्वाभ्यां प्रमेय-

सामान्याभावे वर्तते। न तु तद्भिन्नप्रतियोगिताकत्वमिति कथमसौ अभावः लक्षणघटक इति शङ्कितुराशयः।

तत्र समाधत्ते—साध्यवृत्तिधर्मनिष्ठेत्यादिना [पृ.11]। यत्पदम् अवच्छेदकतापरम्। तथा च यादृशावच्छेदकतापर्याप्त्यधिकरणीभूतो यो धर्मः तादृशधर्मविशिष्टः यः पदार्थः तादृशपदार्थाधिकरणं साध्याधिकरणं भवति, तादृशी या साध्यतावच्छेदकापर्याप्ता अवच्छेदकता, तन्निरूपकप्रतियोगिताभिन्नप्रतियोगिताकाभावः साध्याभावपदेन विवक्षितः।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मः महानसीयत्ववह्नित्वोभयम्। तद्विशिष्टः पदार्थः महानसीयवह्निः। तदधिकरणं साध्याधिकरणं महानसं भवति। तादृशी साध्यतावच्छेदकापर्याप्ता च अवच्छेदकता महानसीयत्ववह्नित्वोभयपर्याप्तावच्छेदकता। तन्निरूपकप्रतियोगिताक एव महानसीयवह्न्यभावः न तु तन्निरूपकप्रतियोगिताभिन्नप्रतियोगिताक इति तस्य लक्षणाघटकतया न तमादाय अव्याप्तिः।

यद्यपि 'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र यादृशावच्छेदकतापदेन समवायितया वाच्यत्वाभावीयप्रतियोगितावच्छेदकतापि ग्रहीतुं शक्यते, तादृशावच्छेदकतापर्याप्त्यधिकरणसमवायित्वविशिष्टघटादिरूपपदार्थाधिकरणत्वस्य साध्याधिकरण - वाच्यत्वाधिकरणे भूतले सत्त्वात्, तादृशसमवायित्वनिष्ठावच्छेदकताया वाच्यत्वत्वापर्याप्तत्वाच्च तादृशावच्छेदकताकप्रतियोगिताकत्वस्यैव समवायितया वाच्यत्वाभावे सत्त्वेन तादृशावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगिताकः न 'समवायितया वाच्यत्वाभाव इति नासौ लक्षणघटक', तथापि वाच्यत्वसाध्यकस्थलेऽपि घटत्वपटत्वाभ्यां वाच्यत्वाभावः लक्षणघटक इति ध्येयम्।

प्रमेयत्वावच्छिन्नसाध्यकस्थले घटत्वपटत्वाभ्यां प्रमेयसामान्याभावो लक्षणघटकः। यादृशावच्छेदकतापदेन तादृशाभावीयप्रतियोगितावच्छेदकता ग्रहीतुं न शक्यते। तदवच्छेदकतापर्याप्त्यधिकरणघटत्वपटत्वोभयविशिष्टपदार्थस्याप्रसिद्धेः। किन्तु घटाद्यभावीयप्रतियोगितावच्छेदकतैव ग्राह्या। तत्पर्याप्त्यधिकरणघटत्वविशिष्टघटाधिकरणत्वस्य साध्याधिकरणे भूतले सत्त्वात्। साध्यतावच्छेदकप्रमेयत्वापर्याप्ततादृशावच्छेदकताकप्रतियोगिता घटत्वेन घटाभावीयप्रतियोगिता। तद्भिन्नप्रतियोगिताकः घटत्वपटत्वाभ्यां प्रमेयसामान्याभावः।

अत्र यादृशावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टं साध्यं भवति, तादृशी या साध्यतावच्छेदकापर्याप्तावच्छेदकता तन्निरूपकप्रतियोगिताभिन्नप्रतियोगिताकाभावविवक्षणे प्रमेयसाध्यकस्थले गगनत्वेन प्रमेयसामान्याभावस्य लक्षणघटकत्वं न स्यात्। गगनत्वनिष्ठावच्छेदकतापर्याप्त्यधिकरणधर्मः गगनत्वम्। तद्विशिष्टं साध्यं प्रमेयं भवति। तादृशो गगनत्वनिष्ठा अवच्छेदकता साध्यतावच्छेदकप्रमेयत्वापर्याप्ता च भवतीति तादृशावच्छेदकताकप्रतियोगिताक एव गगनत्वेन प्रमेयसामान्याभावः। तथा च तस्य लक्षणाघटकतया अग्रे दीधितौ तस्य लक्षणघटकत्वप्रदर्शनं विरुध्यते। अतः **'यत्पर्याप्त्यधिकरणधर्मविशिष्टं साध्यम्'** इत्युपेक्ष्य **'यत्पर्याप्त्यधिकरणधर्मविशिष्टाधिकरणं साध्यवत्'** [पृ.11] इत्युक्तम्। तथा सति यादृशावच्छेदकतापदेन गगनत्वेन प्रमेयसामान्याभावीयगगनत्वनिष्ठप्रतियोगितावच्छेदकता ग्रहीतुं न शक्यते, तत्पर्याप्त्यधिकरणगगनत्वविशिष्टगगनाधिकरणत्वस्य अप्रसिद्धेः। अतः घटाद्यभावीयप्रतियोगितावच्छेदकतैव ग्राह्या इति गगनत्वेन प्रमेयसामान्याभावस्य लक्षणघटकत्वनिर्वाह इति भावः॥

वस्तुतस्तु साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकल्प एव गगनत्वेन प्रमेयसामान्याभावकथनम्, न तु द्वितीयकल्पे इति पूर्वमुक्तत्वात् 'यत्पर्याप्त्यधिकरणधर्मविशिष्टं साध्यम्' इत्यपि निवेशयितुं शक्यत इति केचित्।

गादाधरी

(३) अथ 'समवायितया' इति मूलस्य कूटघटितलक्षणाभिप्रायकत्वसमर्थनम्।

वस्तुतः वृत्तिमद्वृत्तयो यावन्तः साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावाः तद्वत्त्वमेव 'साध्याभाववदवृत्तित्वम्' इत्यस्यार्थ इत्यभिप्रायकतया 'अथ' इत्यादिग्रन्थः सार्वभौमैर्व्याख्यातः। दीधितिकृतामपि तादृशग्रन्थस्य एतदभिप्रायकत्वमेव अनुमतम्। **कूटघटितलक्षणस्य** स्वयमग्रे दूषणीयत्वेऽपि आपाततः संभवदुक्तिकतयैव शङ्कितुरभिप्रायविषयत्वौचित्यात् व्यधिकरणधर्मावच्छिन्नाभाववादिमते निर्दोषस्यापि लक्षणस्य संभवेन तदुपेक्ष्य सदोषं कूटघटितलक्षणमवलम्ब्य 'प्रतियोग्यवृत्तिश्च' इत्याद्यवतारणमनुचितमित्यभिप्रेत्यैव च अग्रे **तल्लक्षणमाक्षेप्यम्** इति न सन्दर्भविरोधः।

'यत्समानाधिकरणा' इत्यादि लक्षणाभिप्रायकता च अत्र न युज्यते। तादृशव्याप्तेः साध्याभाववदवृत्तित्वरूपत्वाप्रसक्तेः उक्तलक्षणपरिष्कारासंभवात्। **व्यभिचारशरीरे** च साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशावश्यकतां प्रदर्श्य केवलान्वयिसाध्यकसाधारणसाध्याभाववदवृत्तित्वरूपव्याप्तेः अव्यभिचाररूपता न संभवतीत्यभिधानेन साध्याभाववद्वृत्तित्वाभावस्य व्याप्तित्वे निराकृते च साध्याभाववदवृत्तित्वपदार्थस्य व्याप्तित्वानभ्युपगमेऽपि न क्षतिरित्याशयेन 'यत्' इत्यादि निर्दोषलक्षणमवलम्ब्य 'प्रतियोगी'त्यादेः स्वयमवतरणीयत्वात्।

न च - साध्यतावच्छेदकसमनियतप्रतियोगिताकाभाव-कूटवद्वृत्तित्वस्य व्यभिचारत्वसंभवात् उक्तव्याप्तेरव्यभिचाररूपत्वम् अक्षतमेव इति - वाच्यम् । तस्य व्यभिचारपदार्थत्वे 'न चैवम्' इत्यादिदर्शितायाः ज्ञेयत्वे वाच्यत्वव्यभिचारित्वव्यवहारापत्तेः दुर्वारत्वात्, तस्यापि व्यधिकरणधर्मावच्छिन्नतादृशाभाववद्वृत्तित्वेन उक्तलक्षणवत्वात् इति सर्वमनाकुलम् ।

एवं च कूटघटितलक्षणाभिप्रायेणैव प्रमेयसाध्यकस्थले उक्ताभावानुधावनं ग्रन्थकृतां सफलम्, घटत्वावच्छिन्नपटाद्यभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहात् इति ध्येयम् ।

विवरणम्

ननु यत्पर्याप्त्यधिकरणविशिष्टं साध्यं तादृशी या साध्यतावच्छेदकापर्याप्तावच्छेदकता तन्निरूपकप्रतियोगिताभिन्नप्रतियोगिताकाभावविलक्षणे वाच्यत्वसाध्यकस्थले समवायितया वाच्यत्वाभावः लक्षणघटकः । समवायितया वाच्यत्वाभावीयप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणसमवायित्वविशिष्टत्वस्य वाच्यत्वेऽभावात् यादृशावच्छेदकतापदेन अवच्छेदकतान्तरस्यैव ग्राह्यत्वात् । परन्तु यादृशावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टाधिकरणं साध्यवत्, तादृशी या साध्यतावच्छेदकापर्याप्तावच्छेदकता तन्निरूपकप्रतियोगिताभिन्नप्रतियोगिताकाभावविलक्षणकल्पे समवायितया वाच्यत्वाभावः न लक्षणघटकः । समवायित्वविशिष्टघटाद्यधिकरणत्वस्य साध्यवति भूतले सत्त्वेन यादृशावच्छेदकतापदेन समवायितया वाच्यत्वाभावीयसमवायित्वनिष्ठप्रतियोगितावच्छेदकताया अपि ग्रहीतुं शक्यत्वात् तादृशावच्छेदकताकप्रतियोगिताकत्वस्यैव समवायितया वाच्यत्वाभावे सत्वात् । तथा च वाच्यत्वसाध्यकस्थले समवायितया वाच्यत्वा-

भावस्य लक्षणघटकत्वप्रदर्शकमणिग्रन्थविरोध इत्यत आह- **वस्तुत इत्यादिना** [पृ.17]।

अथ समवायितया इति मणिग्रन्थः कूटघटितलक्षणाभिप्रायेण प्रवृत्तः। 'साध्याभाववदवृत्तित्वम्' इत्यस्य 'वृत्तिमद्वृत्तयः यावन्तः साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावाः तद्वत्त्वम्' अर्थ इति सार्वभौमैः व्याख्यातम्। तदभिप्रायेणैव 'अथ' इत्यादिग्रन्थः प्रवृत्तः इत्यपि तैरुक्तम्।

दीधितिकृतामपि 'अथ' इत्यादिग्रन्थस्य कूटघटितलक्षणाभिप्रायेण प्रवृत्तत्वमेव संमतम्। तथा सति 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ समवायितया वाच्यत्वाभावस्य लक्षणघटकत्वम्, 'वन्हिमान् धूमात्' इत्यादौ तत्तद्वह्न्यभावस्य वारणं च संभवति। प्रमेयसाध्यकस्थले घटत्वेन पटाभावस्य प्रमेयत्वसमनियतप्रतियोगिताकत्वाभावात् लक्षणाघटकतया गगनत्वादिना प्रमेयसामान्याभावानुधावनं सङ्गच्छते।

ननु 'अथ' इत्यादिग्रन्थस्य यदि कूटघटितलक्षणाभिप्रायकत्वं दीधितिकारस्यापि संमतम्, तदा अग्रे तल्लक्षणदूषणं न सङ्गच्छते। स्वासंमतलक्षणस्यैव दूषणीयत्वात्। अतः सन्दर्भविरोध इत्यत आह **कूटघटितलक्षणस्येति** [पृ.18]। दुष्टस्यापि लक्षणस्य शङ्कितुः अभिप्रायविषयत्वे बाधकाभावः। एवञ्च 'अथ' इत्यादिग्रन्थस्य अगत्या कूटघटितलक्षणाभिप्रायकत्वेऽपि तस्य लक्षणस्य व्यधिकरणधर्मावच्छिन्नाभावखण्डनपरः यः 'प्रतियोग्यवृत्तिश्च' इत्यादिग्रन्थः तदवतारकत्वं न संभवति। दुष्टत्वेन निराकृतस्य व्यधिकरणधर्मावच्छिन्नाभावखण्डनेन पुनर्निराकरणस्य व्यर्थत्वात्। तथा च 'अथ' इत्यादिग्रन्थस्य कूटघटितलक्षणाभिप्रायकत्वं स्वसंमतम्। तत्तु न दूषितम्। किन्तु तस्य 'प्रतियोग्य-

वृत्तिश्च' इति ग्रन्थावतारकत्वमेव स्वानभिमतम् इति तस्य लक्षणस्य दूषणे न सन्दर्भविरोध इति भावः। **तल्लक्षणमाक्षेप्यमिति** [पृ.18]। कूटघटितलक्षणं दूषणीयम् इत्यर्थः।

ननु 'अथ समवायितया' इत्यादिग्रन्थस्य निर्दुष्टं यत् 'यत्समानाधिकरणाः' इत्यादि स्वलक्षणं तदभिप्रायकत्वमस्तु। किं सदोषलक्षणाभिप्रायकत्वसंमत्या इत्यत आह - **यत्समानाधिकरणा** इत्यादीति [पृ.18]। साध्याभाववदवृत्तित्वरूपलक्षणकर्तुरेव पूर्वप्रदर्शितसाध्याभावाप्रसिद्धिनिराकरणार्थं 'अथ' इत्यादिशङ्का। सा शङ्का परिष्कृतसाध्याभाववदवृत्तित्वलक्षणमवलंब्यैव भवितुमर्हति। 'यत्समानाधिकरणा' इत्यादिलक्षणं तु न साध्याभाववदवृत्तित्वस्य परिष्काररूपम्। कूटघटितलक्षणं तु साध्याभाववदवृत्तित्वपरिष्काररूपम्। अतः तदवलम्बनेन साध्याभावप्रसिद्धिशङ्का युज्यते। अतः 'अथ' इत्यादिग्रन्थस्य 'यत्समानाधिकरणा' इत्यादि स्वलक्षणाभिप्रायकत्वं न संभवति इति भावः।

ननु कथं तर्हि 'यत्समानाधिकरणा' इति लक्षणस्य 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थावतारकत्वम्। 'च' कारेण 'अथ' इत्यादिशङ्काभिप्रेतलक्षण एव दूषणस्य समुच्चेयत्वात् इत्यत आह - **व्यभिचारशरीरे च** [पृ.18] इत्यादिना। सद्धेतौ व्यभिचारलक्षणातिव्याप्तिवारणाय व्यभिचारशरीरे साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य अवश्यं निवेशनीयतया व्यभिचाराभावरूपव्याप्तिशरीरेऽपि साध्यतावच्छेदकावच्छिन्नसाध्याभाव एव निवेशनीयः। अन्यथा असंभवस्य अतिव्याप्तेर्वा प्रसक्तेः, व्याप्तेः अव्यभिचाररूपतानुपपत्तेश्च। तथा च केवलान्वयिसाध्यकस्थले अप्रसिद्धिनिबन्धनाव्याप्तिः तदवस्थेति कथनेन साध्याभाववदवृत्तित्वस्य व्याप्तित्वं निराकृतम्। तस्य व्याप्तित्वे निराकृते च

साध्याभाववदवृत्तित्वपदार्थस्य व्याप्तित्वानभ्युपगमेऽपि न क्षतिः। व्याप्त्यन्तरमवलम्ब्य केवलान्वयिसाध्यकस्थले साध्याभावप्रसिद्धेः लक्षणसङ्क्रमनस्य च संभवात् इत्याशयेन 'यत्समानाधिकरणा' इत्यादि निर्दोषं लक्षणमवलम्ब्य व्यधिकरणधर्मावच्छिन्नाभाववादिना कृतस्य आक्षेपस्य समाधानार्थं 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थः प्रवृत्तः। तथा च स्वलक्षणस्य 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थावतारकत्वे न कोऽपि विरोध इति भावः।

न च साध्यतावच्छेदकसमनियतेति [पृ.18]। साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटवद्वृत्तित्वं व्यभिचारः। तदभावः अव्यभिचारः। तथा च कूटघटितव्याप्तेः अव्यभिचाररूपत्वं संभवतीति व्याप्तेः अव्यभिचाररूपता न संभवतीति कथं मणिग्रन्थाल्लभ्यत इति शङ्का।

समाधानं तु - साध्याभाववद्वृत्तित्वस्य व्यभिचारपदार्थत्वे ज्ञेयत्वे वाच्यत्वव्यभिचारित्वं मणौ 'न चैवम्' इत्यादिना प्रदर्शितम्। तत् साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटवद्वृत्तित्वस्य व्यभिचारपदार्थत्वेऽपि तुल्यम्। वाच्यत्वत्वसमनियतप्रतियोगिताकाः ये अभावाः समवायित्वेन वाच्यत्वाभावघटत्वेन वाच्यत्वाभावादयः तत्कूटाधिकरणघटादिवृत्तित्वस्य ज्ञेयत्वे सद्भावात्। तथा च तस्य व्यभिचाररूपत्वे निराकृते तदभावस्य अव्यभिचाररूपत्वं व्याप्तित्वं च निराकृतमेव। अतः तदभिप्रायकत्वं 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थस्य न संभवतीति।

दीधितिः

समवायितया इति। **वाच्यत्वं यथा न समवायि, तथा अग्रे वक्ष्यते। घटादिसमवायितयेत्यर्थ** इत्यप्याहुः।

गादाधरी

(४) समवायितया वाच्यत्वाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्व-समर्थनम् ।

ननु वाच्यत्वं पदशक्तिः । सा च तत्तत्पदबोद्धव्यत्व-प्रकारिका भगवदिच्छैव, न तु पदार्थान्तरम्, अपसिद्धान्तत्वात् । तथा च समवायित्वं समवायप्रतियोगित्वरूपं तदनुयोगित्वरूपं वा भवतु, उभयथैव वाच्यत्ववृत्तीति **तेन रूपेण तदभावस्य** कथं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम् ?

न च - **भगवदिच्छाया** वाच्यत्वपदार्थत्वे पटादेः घटादि-पदावाच्यत्वानुपपत्तिः । घटादाविव पटादावपि घटादिपद-बोद्धव्यत्वप्रकारिकाया भगवदिच्छायाः विषयतासंबन्धेन सत्त्वात् तदिच्छाया एकत्वात् - इति वाच्यम् । **यद्धर्म्यंशे यस्य प्रकारता** तस्यैव धर्मिणो विशेष्यतासंबन्धेन तद्धर्मप्रकारकत्वविशिष्टव-त्त्वोपगमात्, पटादेः घटादिपदबोध्यतया भगवदिच्छया अनव-गाहनात्, तत्र विशेष्यतासंबन्धेन तद्बोध्यत्वप्रकारकत्वविशिष्ट-भगवदिच्छाविरहेण तदवाच्यत्वोपपत्तेः ।

न च - एवं **विशिष्टेच्छाया** वाच्यत्वरूपत्वे विशेषणांशे समवायित्वाभावात् **तेन रूपेण विशिष्टाभावस्य** व्यधिकरणधर्मा-वच्छिन्नप्रतियोगिताकत्वम् अव्याहतमेव - इति वाच्यम् । **यतो विशिष्टाभावप्रतियोगिता** न विशेषणान्तर्भावेण पर्याप्ता, अपि तु विशेष्यांशमात्रे । **अवच्छिद्यते** पुनः इयं विशेषणेन प्रति-योगितायाः अव्यासज्यवृत्तित्वात् । तथा च विशेष्यवृत्तेः समवायि-त्वस्य कथं प्रतियोगिताव्यधिकरणत्वम् इति ।

न च प्रतियोगितायाः व्यासज्यवृत्तित्वानुपगमे सर्वत्र 'घटत्वेन घटपटोभयं नास्ति' इति प्रतीतिः कथम् उपपद्यताम् ?

घटादिमति **प्रतियोगितावच्छेदकविशिष्टप्रतियोगिसत्त्वेन तद्विषयाभावात्** इति **अभावविशेषीयप्रतियोगित्वम्** अवश्यमेव व्यासज्यवृत्त्युपेयम्। तथा सति तत्र प्रतियोगितापर्याप्त्यधिकरणस्य उभयत्वावच्छिन्नस्य प्रतियोगितावच्छेदकघटत्वादिविशिष्टत्वासंभवात्। **यद्धर्मावच्छिन्ने** प्रतियोगितायाः पर्याप्तिः प्रतियोगितावच्छेदकविशिष्टस्य तदवच्छिन्नस्यैव अभावविरोधितया न तादृशाभावस्य सार्वत्रिकत्वानुपपत्तिः इति - वाच्यम्। **प्रतियोगिताया अव्यासज्यवृत्तित्वेऽपि** तत्र **एकधर्मावच्छिन्नापर्याप्तिरूपविरोधशालिनोः** घटत्व - घटपटोभयत्वयोः प्रतियोगितावच्छेदकत्वस्य व्यासज्यवृत्तित्वोपगमात् तादृशाभावस्य विरुद्धघटत्वपटत्वाद्युभयावच्छिन्नाभाववत् केवलान्वयित्वोपपत्तेः।

यद्यपि 'घटपटौ न स्तः' इत्यादिप्रतीतिविषयसमानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमपि घटत्वाद्यन्तर्भावेण पर्याप्तम्, तथापि तत्र द्वित्वधर्मितावच्छेदकतापन्नस्यैव घटत्वादेः अवच्छेदकता प्रतीयते, अत्र स्वातन्त्र्येणापि इति भेदः।

आस्तां वा उभयाभावप्रतियोगितायाः गत्यन्तराभावात् व्यासज्यवृत्तित्वम्। तथापि विशिष्टाभावप्रतियोगितायाः तथात्वमप्रामाणिकमेव। **दण्डिपुरुषाविमति** 'पुरुषत्वेन दण्डविशिष्टो नास्ति' इत्यादिप्रतीतेरसिद्धेः इत्यत आह **दीधितौ - वाच्यत्वं यथेति** [पृ.22]। **तथाग्रे वक्ष्यत** इति।

अयमाशयः—वाच्यत्वं शक्तिविषयत्वम्, न तु शक्तिः। धातुनैव शक्तिप्रतिपादनात् प्रत्ययस्य निरर्थकतापतेः। विषयत्वं च पदार्थान्तरम् इति प्राचीननैयायिकैकदेशसिद्धान्तः। तस्य च समवायो न संबन्धः। अपि तु स्वरूपमेव इति समवायितया वाच्यत्वपदार्थाभावः व्यधिकरणधर्मावच्छिन्नाभाव एव इति एकदेशमतानुयायितया मणिकारलेखनसंगतिरिति।

घटादिसमवायितयेति [पृ.22]। तथा च वाच्यत्वपदस्य भगवदिच्छापरत्वेऽपि नासंगतिरिति भावः। **यथाश्रुतपरतयैवो-पपत्तेः** समवायिपदस्य विशेषपरतया व्याख्यानमनुचितम् इति **'आहुः'** [पृ.22] इत्यनेन अस्वरसः सूचितः।

विवरणम्

दीधितौ वाच्यत्वं यथा न समवायीति [पृ.22]। वाच्यत्वं यदि पदशक्तिः तदा शक्तेः भगवदिच्छारूपतया अस्यां समवायित्वस्य सद्भावेन समवायित्वं कथं व्यधिकरणधर्म इत्याशङ्क्य वाच्यत्वं न पदशक्तिः, किन्तु पदशक्तिविषयत्वम्। 'वच' धातुनैव पदशक्तेः लाभात् 'ण्यत्' प्रत्ययस्य विषयार्थकताया वक्तव्यतया 'त्व'प्रत्ययान्तेन पदशक्तिविषयत्वस्यैव अभिधानात्। विषयत्वे तु समवायित्वं नास्तीति समवायितया पदशक्तिविषयत्वरूपवाच्यत्वाभावः व्यधिकरणधर्मावच्छिन्नाभाव इत्याशयः।

एतम् आशयं स्पष्टीकर्तुं दीधितिं विस्तरेण अवतारयति **गादाधर्याम्-ननु वाच्यत्वं पदशक्तिरित्यादिना** [पृ.23]। वाच्यत्वं नाम पदशक्तिः। शक्तिश्च मीमांसकमत इव न पदार्थान्तरम्। किन्तु तत्तत्पदजन्यबोधविषयत्वप्रकारिका ईश्वरेच्छैव पदशक्तिः। ईश्वरेच्छायाः समवायसंबन्धेन ईश्वरे सत्वात् समवायप्रतियोगित्वम् ईश्वरेच्छायामस्ति। एवम् ईश्वरेच्छायाम् इच्छात्वजातेः गुणत्वजातेर्वा समवायसंबन्धेन सत्त्वात् समवायानुयोगित्वम् ईश्वरेच्छायामस्ति। तथा च समवायितया वाच्यत्वाभावप्रतियोगिनि ईश्वरेच्छारूपवाच्यत्वे समवायप्रतियोगित्वरूपस्य समवायानुयोगित्वरूपस्य च समवायित्वस्य सद्भावात् समवायित्वं न प्रतियोग्यवृत्तिः धर्मः। तथा च समवायितया वाच्यत्वाभावः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः न भवितुमर्हति। प्रतियोग्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव व्यधिकरणधर्मा-

वच्छिन्नाभावरूपत्वात् । तथा च समवायित्वेन रूपेण वाच्यत्वस्य सर्वत्र सद्भावात् तदभावाप्रसिद्धिरिति आशङ्का ।

तेन रूपेण तदभावस्येति [पृ.23] । समवायित्वेन रूपेण वाच्यत्वाभावस्येत्यर्थः । **न च भगवदिच्छाया इति** [पृ.23] । घटपदबोद्धव्यत्वप्रकारकभगवदिच्छा विशेष्यतासंबन्धेन यत्र वर्तते, तस्य घटपदवाच्यत्वम् इति स्वीकारे सर्वविषयिण्याम् एकस्याम् ईश्वरेच्छायां घटादीनां सर्वेषां विशेष्यत्वात् । घटपदबोद्धव्यत्वप्रकारकभगवदिच्छायाः विशेष्यतासंबन्धेन पटेऽपि सत्त्वात् पटस्यापि घटपदवाच्यत्वापत्तिः । तथा च इच्छायाः वाच्यत्वपदार्थत्वं न संभवतीति भावः । अत्र 'घटादिपदवाच्यत्वापत्तिः' इत्यनुक्त्वा घटादिपदावाच्यत्वानुपपत्तिरित्युक्तेः तात्पर्यं गुरुमुखात् श्रोतव्यम् ।

विशेष्यतासंबन्धेन तत्पदजन्यबोधविषयत्वप्रकारकत्वविशिष्टभगवदिच्छावत्त्वं तत्पदवाच्यतायां प्रयोजकम् । 'घटः घटपदजन्यबोधविषयो भवतु', 'पटः पटपदजन्यबोधविषयो भवतु' इत्याद्याकारकसमहालम्बनेच्छायां घटांशे घटपदजन्यबोधविषयत्वं प्रकारः । अतः घटपदजन्यबोधविषयत्वप्रकारकत्वविशिष्टभगवदिच्छा विशेष्यतासंबन्धेन घट एवास्ति इति घटस्य घटपदवाच्यत्वं पटस्य घटपदावाच्यत्वं च उपपद्यते । सर्वविशेष्यकभगवदिच्छायां विशेष्यतासंबन्धेन घटपदबोद्धव्यत्वप्रकारकत्वविशिष्टेच्छावत्त्वं पटे कुतो नास्ति इति शङ्कायाम् उक्तम् - **यद्धर्म्यंशे यस्य प्रकारता इति** [पृ.23] । 'अयं घटः' इति ज्ञाने घटांशे घटत्वस्य प्रकारता । अतः घटत्वप्रकारकत्वविशिष्टज्ञानं विशेष्यतासंबन्धेन घटे वर्तते । तथैव भगवदिच्छायां घटांशे घटपदजन्यबोधविषयत्वस्य प्रकारत्वात् घटस्यैव विशेष्यता-

संबन्धेन घटपदजन्यबोधविषयत्वप्रकारकत्वविशिष्टेच्छावत्त्वम्, न तु पटस्येति पटस्य घटपदावाच्यत्वोपपत्तिरिति भावः।

न चैवं विशिष्टेच्छाया इति [पृ.23]। तत्तत्पदजन्यबोधविषयत्वप्रकारकत्वविशिष्टभगवदिच्छैव वाच्यत्वमिति स्वीकारे विशेष्यभूतेच्छायां समवायित्वसत्त्वेऽपि विशेषणे तत्तत्पदजन्यबोधविषयत्वे समवायित्वं नास्ति। अतः विशिष्टाभावीयप्रतियोगितायाः विशेषणविशेष्योभयपर्याप्तत्वात् वाच्यत्वाभावस्य विशिष्टाभावरूपतया तत्प्रतियोगितापर्याप्त्यधिकरणविशेषण समवायित्वविरहात् प्रतियोगितापर्याप्त्यधिकरणावृत्तित्वरूपं व्यधिकरणत्वं समवायित्वे वर्तते। तथा च समवायितया वाच्यत्वाभावः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक इति शङ्काग्रन्थभावः।

तेन रूपेण विशिष्टाभावस्येति [पृ.23]। समवायित्वेन रूपेण तत्तत्पदजन्यबोधविषयत्वप्रकारकत्वविशिष्टभगवदिच्छाभावस्य इत्यर्थः। समाधत्ते - **यतो विशिष्टाभावप्रतियोगितेति** [पृ.23]। विशिष्टाभावीयप्रतियोगिता विशेष्य एव पर्याप्ता न तु विशेषणेऽपि। किन्तु विशेष्यनिष्ठा विशिष्टाभावीयप्रतीयोगिता विशेषणावच्छिन्ना भवति। तथा च प्रतियोगितापर्याप्त्यधिकरणे विशेष्ये भगवदिच्छारूपे समवायित्वस्य वृत्तेः समवायित्वं न प्रतियोगिताव्यधिकरणम्। अतः समवायितया वाच्यत्वाभावः न व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक इति भावः।

अवच्छिद्यते पुनरियमिति [पृ.23]। इयं प्रतियोगिता विशेषणावच्छिन्नेत्यर्थः। पुनः शङ्कते—**न च प्रतियोगिताया इति** [पृ.23]। प्रतियोगितायाः व्यासज्यवृत्तित्वम् अवश्यमङ्गीकरणीयम्। अन्यथा घटत्वेन घटपटोभयाभावस्य केवलान्वयित्वं

न स्यात् । घटवति पटवति उभयवति च प्रदेशे 'घटत्वेन घटपटोभयं नास्ति' इति प्रतीतिर्वर्तते । सुतरां तच्छून्ये । अनेन घटत्वेन घटपटोभयाभावस्य केवलान्वयित्वं सिद्ध्यति । प्रतियोगितायाः अव्यासज्यवृत्तित्वे प्रतियोगितावच्छेदकविशिष्टप्रतियोगिताश्रयस्य अभावविरोधित्वात् घटत्वविशिष्टघपटोभयाभावीयप्रतियोगिताश्रयघटवति भूतले घटत्वेन घटपटोभयाभावः न स्यात् । विरोधिसद्भावात् । तथा च घटवति भूतले विषयाभावात् घटत्वेन घटपटोभयं नास्तीति प्रतीतिः न स्यात् । अतः प्रतियोगितायां व्यासज्यवृत्तित्वमङ्गीकरणीयम् । तदङ्गीकारे च प्रतियोगितावच्छेदकविशिष्टं प्रतियोगितापर्याप्त्यधिकरणं अभावस्य विरोधि । घटत्वेन घटपटोभयाभावीयप्रतियोगितापर्याप्त्यधिकरणं घटपटोभयं घटत्वरूपप्रतियोगितावच्छेदकविशिष्टं न भवतीति प्रतियोगितावच्छेकविशिष्टप्रतियोगितापर्याप्त्यधिकरणरूपविरोध्यभावात् घटत्वेन घटपटोभयाभावस्य सार्वत्रिकत्वम् उपपद्यते । एवञ्च विशिष्टाभावीयप्रतियोगिताया अपि व्यासज्यवृत्तित्वात् प्रतियोगितापर्याप्त्यधिकरणं विशेषणविशेष्योभयम् । उभयत्र समवायित्वविरहात् समवायितया वाच्यत्वाभावः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक इति शङ्कितुः अभिप्रायः ।

प्रतियोगितावच्छेदकविशिष्टप्रतियोगिसत्त्वेनेति [पृ.24] । घटत्वविशिष्टघटरूपविरोधिसत्त्वेनेत्यर्थः । **तद्विषयाभावादिति** [पृ.24] । 'घटत्वेन घटपटोभयं नास्ति' इति प्रतीतिविषयः यः 'घटत्वेन घटपटोभयाभावः' तस्य स्थातुमशक्यत्वात् इत्यर्थः ।

अभावविशेषीयप्रतियोगित्वमिति [पृ.24] । उभयाभावप्रतियोगित्वं विशिष्टाभावप्रतियोगित्वं चेत्यर्थः । न तु अभाव-

सामान्यप्रतियोगित्वम् इति । वन्ह्याद्यभावीयप्रतियोगिताया अव्यासज्यवृत्तित्वे बाधकाभावात् ।

ननु घटपटोभयस्य घटत्वविशिष्टत्वासंभवेऽपि प्रतियोगितापर्याप्त्यधिकरणस्य उभयस्य प्रत्येकानतिरिक्ततया प्रत्येकस्य घटस्य प्रतियोगितापर्याप्त्यधिकरणस्य घटत्वविशिष्टतया घटत्वविशिष्टघटवति भूतले विरोधिसद्भावात् कथं घटत्वेन घटपटोभयाभावः भवेत् इत्याशङ्क्याह - **यद्धर्मावच्छिन्न इति** [पृ.24] । उभयत्वावच्छिन्ने प्रतियोगितापर्याप्तेः प्रतियोगितापर्याप्त्यधिकरणस्य उभयत्वावच्छिन्नस्य घटत्वविशिष्टत्वाभावात् घटत्वविशिष्टोभयत्वावच्छिन्नरूपविरोध्यप्रसिद्ध्या घटत्वेन घटपटोभयाभावः घटवति भवितुमर्हति। एवञ्च प्रतियोगितापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नपर्याप्तिकप्रतियोगितावच्छेदकविशिष्टप्रतियोग्यधिकरणता अभावस्य विरोधिनी । प्रकृते प्रतियोगितापर्याप्त्यनुयोगितावच्छेदकं उभयत्वम् । तदवच्छिन्ने पर्याप्तं प्रतियोगितावच्छेदकं घटत्वं न भवति । अतः तादृशप्रतियोगितावच्छेदकस्य अप्रसिद्ध्या तद्विशिष्टप्रतियोग्यधिकरणतारूपविरोध्यभावात् घटत्वेन घटपटोभयाभावस्य केवलान्वयित्वमिति भावः ।

समाधत्ते - **प्रतियोगिताया अव्यासज्यवृत्तित्वेऽपि** [पृ.24] इत्यादिना । प्रतियोगिता न व्यासज्यवृत्तिः, किन्तु प्रत्येकवृत्तिरेव। परन्तु प्रतियोगितावच्छेदकता व्यासज्यवृत्तिः । प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टः प्रतियोगिताश्रयः अभावस्य विरोधी । 'घटत्वेन घटपटोभयं नास्ति' इति प्रतीतौ घटत्वे घटपटोभयत्वे च प्रतियोगितावच्छेदकत्वं भासते। अतः प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं घटत्वं घटपटोभयत्वं च । तद्विशिष्टः प्रतियोगिताश्रयः अप्रसिद्धः। विरुद्धोभयधर्मविशिष्टत्वस्य एकस्मिन् असंभवात् । तथा च विरुद्धघटत्वपटत्वोभयविशिष्टस्य प्रति-

योगिनः अप्रसिद्धया यथा वा घटत्वपटत्वाभ्यां प्रमेयसामान्याभावः केवलान्वयी, तथा घटत्वेन घटपटाभयाभावोऽपि केवलान्वयी। कथं घटत्वघटपटोभयत्वयोः विरुद्धत्वम्? एकधर्म्यवृत्तित्वरूपविरोधासंभवात्। घटत्व-घटपटोभयत्वयोः घटरूपे एकस्मिन् धर्मिणि वृत्तेः इत्याशङ्कायामुक्तम्-**एकधर्मावच्छिन्नापर्याप्तिरूपविरोधशालिनोरिति** [पृ.24]। घटत्वं घटत्वावच्छिन्ने पर्याप्तम्। घटपटोभयत्वं घटपटोभयत्वावच्छिन्ने पर्याप्तम्। अतः घटत्व - घटपटोभयत्वयोः भिन्नभिन्नधर्मावच्छिन्नपर्याप्तयोः एकधर्मावच्छिन्नापर्याप्तिरूपः विरोधोऽस्तीति तदुभयधर्मावच्छिन्नप्रतियोगिताकाभावस्य विरुद्धघटत्वपटत्वावच्छिन्नाभाववत् केवलान्वयित्वम् इति भावः। एवञ्च प्रतियोगितायाः अव्यासज्यवृत्तित्वात् विशिष्टाभावप्रतियोगिताश्रयवृत्तेः समवायित्वस्य प्रतियोगिताव्यधिकरणत्वविरहात् समवायितया वाच्यत्वाभावः न व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक इति प्रकृतमवशिष्यते।

तत्र शङ्कते - **यद्यपि 'घटपटौ न स्त'** [पृ.24] इत्यादिना। प्रतियोगितायाः अव्यासज्यवृत्तित्वं प्रतियोगितावच्छेदकतायाः व्यासज्यवृत्तित्वं च स्वीकृत्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगिना साकं अभावस्य विरोध इत्यङ्गीकृत्य घटत्वेन घटपटोभयाभावस्य केवलान्वयित्वोपपादने 'घटपटौ न स्तः' इति प्रतीतिसिद्धस्य घटपटोभयत्वरूपासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यापि केवलान्वयित्वं स्यात्। तथा हि - 'घटपटौ न स्तः' इति प्रतीत्या केवलोभयत्वे प्रतियोगितावच्छेदकत्वं नावगाह्यते। तथा सति यत्किञ्चिदुभयवति - कुड्यकुसूलोभयवति भूतले घटपटोभयं नास्ति इति प्रतीतिः न स्यात्। उभयत्वरूपप्रतियोगितावच्छेदकविशिष्टस्य कुड्यकुसूलोभयरूपस्य विरोधिनः सद्भावात्। एवं केवलघटत्वस्य केवल-

पटत्वस्य च प्रतियोगितावच्छेदकत्वं नावगाह्यते। केवलघटवति केवलपटवति च भूतले 'घटपटौ न स्तः' इति प्रतीत्यनुपपत्तेः। किन्तु घटपटोभयत्वे घटत्वे पटत्वे च त्रिष्वपि प्रतियोगितावच्छेदकत्वं अवगाह्यते। त्रयाणां च एकधर्मावच्छिन्नापर्याप्तत्वरूपविरोधशालित्वात् विरुद्धघटत्वपटत्वावच्छिन्नप्रमेयसामान्याभाववत् 'घटपटौ न स्तः' इति प्रतीतिसिद्धघटपटोभयत्वावच्छिन्नाभावस्यापि केवलान्वयित्वप्रसङ्ग इत्याशङ्का। समाधानं तु तथापीत्यादिना उक्तम्।

'घटत्वेन घटपटोभयं नास्ति' इत्यत्र प्रतियोगिविशेषणतानापन्ने स्वतन्त्रे घटत्वेऽपि प्रतियोगितावच्छेदकत्वं भासते। 'घटपटौ न स्तः' इति प्रतीतौ तु प्रतियोगिविशेषणतानापन्ने घटत्वे प्रतियोगितावच्छेदकत्वं न भासत इति विशेषः। एतावता कस्याश्चित् प्रतीतेः सार्वत्रिकत्वं कस्याश्चित् असार्वत्रिकत्वं च कथम् उपपादितं भवति इति चेत् - श्रूयताम्। 'घटत्वेन घटपटोभयं नास्ति' इति प्रतीतौ धर्मिविशेषणतानापन्ने घटत्वे धर्मिविशेषणतापन्ने घटत्वे धर्मिविशेषणतापन्ने पटत्वे उभयत्वे च चतुर्षु प्रतियोगितावच्छेदकत्वं भासते। 'घटपटोभयं नास्ति' इति प्रतीतौ तु धर्मिविशेषणतापन्नघटत्वपटत्वयोः उभयत्वे च त्रिषु प्रतियोगितावच्छेदकत्वं भासते। प्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकाधेयतानिरूपिताधिकरणत्वेन साकम् अभावस्य विरोधः। 'घटत्वेन घटपटोभयं नास्ति' इति प्रतीतिसिद्धाभावनिरूपितप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकं चतुष्ट्वम्। चतुष्ट्वविशिष्टचतुर्षु प्रतियोगितावच्छेदकतायाः पर्याप्तेः। तादृशचतुष्ट्वावच्छिन्नपर्याप्तिकानुयोगिताकावच्छेदकताकाधेयत्वमप्रसिद्धम्। 'भूतलं घटत्वेन घटपटोभयवत्' इति प्रतीतिविरहात्। तथा च तादृशाधेयतानिरूपिताधिकरणत्वरूपविरोध्यप्रसिद्धेः

घटत्वेन घटपटोभयाभावस्य केवलान्वयित्वम् । 'घटपटोभयं नास्ति' इति प्रतीतिसिद्धाभावीयप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकं त्रित्वम् । त्रित्वविशिष्टेषु घटत्वपटत्वोभयत्वेषु प्रतियोगितावच्छेदकतायाः पर्याप्तेः तादृशत्रित्वावच्छिन्नपर्याप्तिकावच्छेदकताकाधेयता 'भूतलं घटपटोभयवत्' इति प्रतीतिसिद्धभूतलनिष्ठाधिकरणतानिरूपित - घटपटोभयनिष्ठ-घटत्वपटत्वोभयत्व - एतत्त्रितयावच्छिन्नाधेयता तन्निरूपिताधिकरणता घटपटोभयाधिकरणे भूतलेऽस्ति । तत्र तादृशाधिकरणतारूपविरोधिसद्भावात् घटपटोभयाभावः न स्थातुमर्हति इति तस्य न केवलान्वयित्वम् इति भावः ।

प्रतियोग्यंशे प्रकारीभूतस्य धर्मस्य न प्रतियोगितावच्छेदकत्वम् इति मते त्वाह - **आस्तां वा इति** [पृ.24] । एतेषाम् अयमाशयः- उभयाभावीयप्रतियोगिता व्यासज्यवृत्तिः । पूर्वोक्तरीत्या प्रतियोगितावच्छेदकविशिष्टप्रतियोगितापर्याप्त्यधिकरणेन साकम् अभावस्य विरोधः । 'घटत्वेन घटपटोभयं नास्ति' इत्यत्र प्रतियोगितापर्याप्त्यधिकरणं उभयत्वावच्छिन्नं प्रतियोगितावच्छेदकघटत्वविशिष्टं न भवतीति विरोध्यभावात् तादृशाभावस्य केवलान्वयित्वम् । 'घटपटोभयं नास्ति' इति प्रतीतिसिद्धस्य घटपटोभयाभावस्य तु न केवलान्वयित्वम्। प्रतियोगितापर्याप्त्यधिकरणस्य घटपटोभयस्य उभयत्वरूपप्रतियोगितावच्छेदकविशिष्टस्य भूतले सत्त्वेन विरोधिसद्भावात् । परं तु विशिष्टाभावप्रतियोगितायाः न व्यासज्यवृत्तित्वं प्रमाणाभावात् ।

ननु विशिष्टाभावप्रतियोगिताया अपि व्यासज्यवृत्तित्वमङ्गीकरणीयम् । अन्यथा दण्डिपुरुषवति भूतले 'पुरुषत्वेन दण्डविशिष्टो नास्ति' इति प्रतीतेरनुपपत्तेः । प्रतियोगिताश्रयस्य विशेष्यस्य पुरुषस्य पुरुषत्वरूपप्रतियोगितावच्छेदकविशिष्टस्य

विरोधिनः सद्भावात् । विशिष्टाभावीयप्रतियोगितायाः व्यासज्यवृत्तित्वे तु प्रतियोगितापर्याप्त्यधिकरणस्य दण्डपुरुषोभयस्य पुरुषत्वविशिष्टत्वाभावेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगितापर्याप्त्यधिकरणरूपविरोध्यभावेन पुरुषत्वेन दण्डविशिष्टो नास्तीति प्रतीतिरुपपद्यते इत्याशङ्क्य तादृशप्रतीतिमेव निराकरोति - **दण्डिपुरुषादिमतीति** [पृ.24] । तथा च विशिष्टाभावीयप्रतियोगितायाः अव्यासज्यवृत्तित्वात् विशेष्यमात्रे पर्याप्तता । विशेष्यभगवदिच्छायां समवायित्वसत्त्वेन कथं समवायितया वाच्यत्वाभावः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः इति प्रधानः आक्षेपः । तत्समाधानं **'वाच्यत्वं यथा न समवायि'** इत्यादिना दीधितावुक्तम् [पृ.22]। तदेव स्पष्टीकरोति **अयमाशय** [पृ.24] इत्यादिना ।

दीधितौ **घटादिसमवायितया इति** [पृ.22] । घटानुयोगिकसमवायप्रतियोगित्वेनेत्यर्थः । तथा च वाच्यत्वपदस्य भगवदिच्छापरत्वेऽपि भगवदिच्छायां घटानुयोगिकसमवायप्रतियोगित्वविरहात् समवायितया वाच्यत्वाभावः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक इति भावः । गादाधर्यां **यथाश्रुतपरतयेति** [पृ.25] । समवायिपदस्य प्रतियोगित्वानुयोगित्वान्यतरसंबन्धेन समवायवत्त्वरूपयथाश्रुतार्थपरत्वेऽपि समवायितया वाच्यत्वाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वस्य उपपादितत्वात् घटसमवायिरूपविशेषपरतया व्याख्यानम् अनुचितम् इति भावः ।

दीधितिः

प्रमेयसाध्यके च भावत्वेन अभावानाम्, **अभावत्वेन** भावानां वह्नित्वेन निर्वह्नौ **अवृत्तिमात्र**वृत्तिगगनत्वादिना विरुद्धघटत्वपटत्वाभ्यां च **प्रमेयमात्रस्याभावः** सुलभः ।

।। इति व्यधिकरणधर्मावच्छिन्नाभावावतरणम् ।।

गादाधरी

(५) प्रमेयसाध्यकस्थले साध्याभावप्रसिद्ध्युपपादनम्

ननु वाच्यत्वादिसाध्यकस्थले समवायित्वरूपव्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धेः संभवेऽपि प्रमेयत्वादिना प्रमेयसामान्यसाध्यकस्थले साध्याभावाप्रसिद्धिर्दुर्वारैव। प्रमेयसामान्यावृत्तिधर्मस्य अप्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि तस्य असंभवात् इत्यत आह - **प्रमेयसाध्यके चेति। भावत्वेनेति। अभावत्वेनेति।** अभावानां भावानाम् इति उभयत्रैव अभाव इत्यग्रिमस्य संबन्धः। **अभावत्वभावत्वाभ्यां** भावाभावयोः अभावौ समनियततया अभिन्नौ इति तत्प्रतियोगितात्वेन प्रमेयत्वादिसमनैयत्यम् इत्येतादृशाभावोऽपि **कूटघटनया** परिष्करणीयसाध्याभाववदवृत्तित्वरूपप्रथमलक्षणघटको भविष्यतीत्यभिप्रायः।

न च-'यदभावीयप्रतियोगितात्वेन साध्यतावच्छेदकसमनैयत्यम्' इति विवक्षणे वाच्यत्वादिसाध्यके वह्न्यादिसाध्यके च **तादृशाभावाप्रसिद्धिः। निखिलव्यधिकरण**धर्मावच्छिन्नाभावानां समनियतत्वेन अभिन्नतया घटादेरपि **तथाविधवाच्यत्वाभाव**प्रतियोगित्वात्, किंचिद्विशिष्टस्वाभावादेरपि वन्ह्याद्यभावप्रतियोगित्वात् इति तत्तत्प्रतियोगितात्वेन समनैयत्यं विवक्षणीयमिति कथम् **उक्ताभावस्य** लक्षणघटकता इति-वाच्यम्। **समनैयत्यशरीरे** व्यापकतायाः तदभावप्रतियोगितात्वावच्छिन्नाया व्याप्यतायाश्च विशेषरूपावच्छिन्नायाः निवेशनेन अनुपपत्त्यभावात्।

ननु साध्यनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकता चेत् समनैयत्यशरीरे निवेश्यते, तदा व्यधिकरणधर्मावच्छिन्नयोः भावाभाववृत्तिप्रतियोगित्वयोः द्वयोरेव प्रत्येकं प्रमेयनिष्ठान्योन्याभावप्रतियोगितावच्छेदकतया नोक्ताभावस्य साध्यता-

वच्छेदकसमनियतप्रतियोगिताकत्वम् इत्यतः अभावान्तरमाह - **वन्हित्वेनेति। प्रमेयमात्रस्य अभाव** इत्यग्रेतनेन अन्वयः। **'वन्हित्वेन प्रमेयं नास्ति'** इति प्रतीत्या प्रमेयसामान्य एव वन्हित्वावच्छिन्नप्रतियोगित्वावगाहनात् प्रमेयत्वव्यापिकैव तादृशाभावीयवन्हित्वावच्छिन्नप्रतियोगितेति भावः।

यदि च तत्र 'वन्हिर्नास्ति' इति प्रतीतिसिद्धवन्हिमात्रनिष्ठप्रतियोगितैव प्रमेयत्वसामानाधिकरण्येन भासत इत्युपेयते - युक्तं चैतत्। अन्यथा प्रमेयसामान्यस्यैव तत्प्रतियोगितया भानोपगमे 'वन्हिः नास्ति' इत्यादावपि तादृशप्रतीतिसिद्धनिखिलप्रमेयनिष्ठप्रतियोगिताया वन्हित्वादिविशेषितप्रतियोगिवृत्तित्वेन भानोपगमसंभवात् समानाधिकरणधर्मावच्छिन्नवन्हित्वादिसमनियतप्रतियोगित्वाप्रसिद्ध्या वन्हिभिन्नत्वादिना वन्ह्याद्यभावीयवन्हिमात्रनिष्ठप्रतियोगितामादाय 'वन्हिमान् प्रमेयत्वात्' इत्यादौ अतिव्याप्त्यापत्तेः इत्युच्यते - तदा तादृशाभावस्य नोक्तरूपता इत्याशङ्क्य अभावान्तरम् अनुसरति - **अवृत्तिमात्रेति। 'गगनं नास्ति' इत्यत्र गगनत्वसामानाधिकरण्येन** या गगनत्वावच्छिन्नप्रतियोगिता प्रतीयते सैव 'गगनत्वेन गगनभिन्नं नास्ति' इत्यादौ **गगनभिन्नत्वसामानाधिकरण्येन** प्रतियते। अवच्छेदकैक्ये असति बाधके प्रतियोगिताया अप्यैक्यस्वीकारात्। गगनभिन्ननिष्ठप्रतियोगिताया गगनवृत्तित्वेऽपि गगनत्वरूपप्रतियोगितावच्छेदकविशिष्टप्रतियोगिनः अवृत्तित्वेन गगनत्वेन गगनभिन्नाभावस्य केवलान्वयित्वोपपत्ते। **वन्हित्वाद्यवच्छिन्नघटादिनिष्ठप्रतियोगितायाश्च वन्हिनिष्ठतादृशप्रतियोगित्वाभेदे** वन्ह्यादिमति वन्हित्वादिना घटाद्यभावसत्त्वानुपपत्त्या उक्तरीत्या एकप्रतियोगितापत्त्यसंभवः। एवं च गगनत्वावच्छिन्नैव प्रमेयत्वसमनियतप्रतियोगिता प्रसिद्ध्यति इति भावः। उक्तविशेषलाभायैव अवृत्तिमात्रवृत्तित्वकीर्तनम्।

ननु एवमपि यत्र विषयितासंबन्धेन प्रमेयसामान्यं साध्यम् ईश्वरज्ञानत्वादिकं हेतुः तत्र, 'सत्तावान् जातेः' इत्यादौ साध्याभावकूटवति हेतुतावच्छेदकसंबन्धेन वृत्त्यप्रसिद्धया अव्याप्तेर्वारणाय उपादेयसाधनसामानाधिकरण्यरूपविशेषणाक्रान्तसाध्यतावच्छेदकसमनियतसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धिः। **गगनादेरपि** विषयितासंबन्धेन ईश्वरज्ञानादिसंबद्धत्वात् तादृशसंबन्धेन गगनत्वादिना प्रमेयसामान्याभावस्य साधनसामानाधिकरण्यासंभवात् इत्यतः अभावान्तरमाह - **विरुद्धेति। येन संबन्धेन** घटत्वपटत्वाद्योर्विरोधः, तत्संबन्धावच्छिन्न - तदुभयनिष्ठप्रतियोगितावच्छेदकताकप्रमेयसामान्याभाव इत्यर्थः। **प्रतियोगितावच्छेदकतावच्छेदको**भयत्वविशिष्टघटत्वपटत्वाद्यवच्छिन्नप्रतियोगिनोऽप्रसिद्धया विरोधिविरहेण अभावस्य केवलान्वयिता इत्यवधेयम्।

इदमुपलक्षणम् - व्यधिकरणधर्मावच्छिन्नाभाववादिनां प्रतियोगितावच्छेदकतावच्छेदकरूपेण इव तादृशसंबन्धेनापि अवच्छेदकस्य वृत्तिमत्ताया अवच्छेदकतायामतन्त्रत्वात् समवायादिसंबन्धेन गगनाद्यवच्छिन्नप्रमेयसामान्याभावस्यापि सौलभ्यं बोध्यम्। अत्यन्ताभावस्येव अन्योन्याभावस्यापि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वोपगमात् प्रमेयसामान्यस्य यत्र तादात्म्येन साध्यता तत्र घटत्वपटत्वाभ्यां समवायेन गगनादिना वा प्रमेयसामान्यभेदो लक्षणघटकः। प्रतियोगितावच्छेदकावृत्तिसमवायित्वाद्यवच्छिन्नप्रमेयत्वादिना प्रमेयसामान्यभेदो वा तथा इत्यवधेयम्।

।। इति व्यधिकरणधर्मावच्छिन्नाभावावतरणम् ।।

विवरणम्

प्रमेयसाध्यके चेति दीधितिमवतारयति - **ननु वाच्यत्वादिसाध्यकस्थले** [पृ.34] इत्यादिना। 'इदं वाच्यं ज्ञेयत्वात्'

इत्यादौ समवायित्वरूपो यो व्यधिकरणधर्मः तदवच्छिन्न-वाच्यत्वनिष्ठप्रतियोगिताकाभावप्रसिद्धेः संभवेऽपि प्रमेयत्वेन रूपेण प्रमेयसामान्यसाध्यकस्थले 'प्रमेयवान् ज्ञेयत्वात्' इत्यादौ साध्याभावाप्रसिद्धिः दुर्वारा । प्रमेयत्वेन प्रमेयसामान्याभावस्तु अप्रसिद्ध एव । प्रमेयसामान्यरूपप्रतियोग्यवृत्तिधर्मस्य अप्रसिद्ध्या सर्वेषामपि धर्माणां प्रमेयवृत्तित्वात् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि साध्याभावस्यासंभवः इत्याशङ्क्य तत्र साध्याभावप्रसिद्धिं संपादयति दीधितिकृत् इति भावः ।

अयं दीधितिग्रन्थोऽपि कूटघटितलक्षणाभिप्रायेण प्रवृत्तः । तत्र लक्षणे साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावो निविष्टः । प्रमेयसाध्यके साध्यतावच्छेदकं प्रमेयत्वम् । तत्समनियतत्वं भावत्वेन अभावाभावीयप्रतियोगितायां नास्ति । तस्याः प्रतियोगितायाः अभावमात्रवृत्तित्वेन प्रमेयत्वस्य च भावाभावोभयवृत्तित्वेन प्रमेयत्वव्यापकत्वविरहात् । एवम् अभावत्वेन भावाभावीयप्रतियोगितायां भावमात्रनिष्ठायां भावाभावसाधारणप्रमेयत्वव्यापकत्वं नास्ति । तथा च भावत्वेन अभावाभावो वा अभावत्वेन भावाभावो वा कथं लक्षणघटकः ? कथं च तमादाय साध्याभावप्रसिद्धिः इत्यत आह - **अभावत्वभावत्वाभ्याम्** [पृ.34] इति । यत्र यत्र अभावत्वेन भावाभावः सर्वस्मिन् जगति, तत्र सर्वत्र भावत्वेन अभावाभावोऽपि वर्तते । उभयोरप्यभावयोः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयोः केवलान्वयित्वात् । समनियतानां च अभावानाम् ऐक्यमिति स्वीकारात् भावत्वेन अभावाभाव - अभावत्वेन भावाभावौ अभिन्नौ । अतः आभावत्वेन भावाभावस्य यथा भावः प्रतियोगी तथा अभावोऽपि । एवं भावत्वेन अभावाभावस्य यथा अभावः प्रतियोगी तथा भावोऽपि । एवञ्च अभयोरप्यभावयोः प्रतियोगिता भावे अभावे च वर्तते ।

प्रमेयत्वमपि तत्रैव वर्तते इति प्रमेयत्वसमनियतप्रतियोगिताकत्वं तयोरभावयोरस्तीति लक्षणघटकत्वमिति भावः। **कूटघटनयेति** [पृ.34]। समुदायार्थककूटपदप्रवेशेनेत्यर्थः।

न च यदभावीयप्रतियोगितात्वेनेति [पृ.34]। लक्षणघटकत्वेनाभिमताभावप्रतियोगितायाः किं तदभावप्रतियोगितात्वेन सामान्यरूपेण साध्यतावच्छेदकसमनियतत्वं विवक्षितम्, आहोस्वित् तत्तत्प्रतियोगितात्वेन विशेषरूपेण साध्यतावच्छेदकसमनियतत्वं विवक्षितम्। आद्ये वाच्यत्वादिसाध्यकस्थले व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितायां साध्यतावच्छेदकसमनियतत्वं न स्यात्। सर्वेषामपि व्यधिकरणधर्मावच्छिन्नाभावानां केवलान्वयित्वेन समनियततया एकत्वात् समवायितया वाच्यत्वाभाव - घटत्वेन पटाभावयोः अभिन्नत्वात् समवायितया वाच्यत्वाभावस्य वाच्यत्ववत् पटादिकमपि प्रतियोगि। अतः समवायितया वाच्यत्वाभावीयप्रतियोगितात्वं वाच्यत्वनिष्ठप्रतियोगितायाम् इव पटनिष्ठप्रतियोगितायामप्यस्ति। तथा च समवायितया वाच्यत्वाभावीयप्रतियोगितात्वेन रूपेण प्रतियोगितायाः पटादिष्वपि सत्त्वात् तत्र च वाच्यत्वत्वविरहात् वाच्यत्वत्वव्याप्यत्वं प्रतियोगितायां नास्तीति समवायितया वाच्यत्वाभावस्य लक्षणघटकत्वानुपपत्तिः।

एवं 'वन्हिमान् धूमात्' इत्यादौ वन्हित्वेन वन्ह्यभावप्रतियोगित्वं यथा वन्हौ वर्तते, तथा पूर्वक्षणवृत्तित्वविशिष्टवन्ह्यभावाभावेऽपि वर्तते। सर्वेषामप्यभावानां पूर्वक्षणवृत्तित्वविशिष्टस्वाभावस्यापि प्रतियोगित्वात्। तथा च वन्ह्यभावीयप्रतियोगितात्वेन रूपेण वन्ह्यभावप्रतियोगिता पूर्वक्षणवृत्तित्वविशिष्टस्वाभावेऽस्ति। तत्र वन्हित्वरूपं साध्यतावच्छेदकं नास्ति इति प्रतियोगितायां वन्हित्वव्याप्यत्वविरहात् वह्नित्वसमनियतप्रति-

योगिताकः वह्नित्वेन वह्न्यभावो न भवति इति तस्य लक्षणघटकत्वानुपपत्तिः ।

द्वितीये वाच्यत्वनिष्ठप्रतियोगितात्वेन विशेषरूपेण प्रतियोगितायाः वाच्यत्व एव सत्त्वात् तत्र च वाच्यत्वत्वरूपसाध्यतावच्छेदकस्य सत्त्वात् समवायितया वाच्यत्वाभावः वाच्यत्वत्वसमनियतप्रतियोगिताकः । एवं वह्निनिष्ठप्रतियोगितात्वेन विशेषरूपेण प्रतियोगितायाः वह्नावेव सत्त्वात् वह्नित्वेन वह्न्यभावः वह्नित्वसमनियतप्रतियोगिताक इति न पूर्वोक्तदोषः । तथापि प्रमेयसाध्यकस्थले भावनिष्ठप्रतियोगितात्वेन अभावनिष्ठप्रतियोगितात्वेन च विशेषरूपेण प्रतियोगितायाः प्रमेयत्वव्यापकत्वविरहात् भावत्वेन अभावाभाव-अभावत्वेन भावाभावयोः लक्षणघटकत्वं न निर्वहतीति 'न च' इत्यादि शङ्काग्रन्थस्य तात्पर्यम् । **तादृशाभावाप्रसिद्धिरिति** [पृ.34] । साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावाप्रसिद्धिरित्यर्थः । **निखिलव्यधिकरणेति** [पृ.34] । सर्वेषां व्यधिकरणधर्मावच्छिन्नाभावानाम् इत्यर्थः । **तथाविधवाच्यत्वाभावेति** [पृ.34] । समवायितया वाच्यत्वाभावेत्यर्थः । **उक्ताभावस्येति** [पृ.34] । भावत्वेन अभावाभावस्य अभावत्वेन भावाभावस्य चेत्यर्थः ।

समाधत्ते - **समनैयत्यशरीर इति** [पृ.34] । साध्यतावच्छेदकसमनैयत्यशरिरप्रविष्टं साध्यतावच्छेदकव्यापकत्वं तदभावीयप्रतियोगितात्वरूपसामान्यधर्मावच्छिन्नम् । साध्यतावच्छेदकव्याप्यत्वं च तत्तत्प्रतियोगितात्वरूपविशेषधर्मावच्छिन्नम् । एवञ्च साध्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकतदभावीयप्रतियोगितात्ववत्त्वं साध्यतावच्छेदकव्यापकत्वम् । तत्तत्प्रतियोगितात्वावच्छिन्नसमानाधिकरणात्यन्ताभावाप्रतियोगि साध्यतावच्छेदकत्वं साध्यतावच्छेदकव्याप्यत्वम् ।

प्रमेयसाध्यकस्थले साध्यतावच्छेदकप्रमेयत्वाधिकरणे भावे अभावनिष्ठप्रतियोगिता नास्ति इति प्रतीतिसिद्धस्य अभावनिष्ठप्रतियोगितात्वावच्छिन्नाभावस्य सत्त्वेऽपि भावत्वेन अभावाभावीयप्रतियोगिता नास्तीति प्रतीतिसिद्धः तदभावीयप्रतियोगितात्वरूपसामान्यधर्मावच्छिन्नाभावः नास्ति। तादृशसामान्यधर्मावच्छिन्नायाः भावनिष्ठप्रतियोगितायाः तत्र सत्त्वात्। तथा च प्रमेयत्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदक - तदभावीयप्रतियोगितात्वरूपसामान्यधर्मवत्त्वरूप-प्रमयत्वव्यापकत्वस्य प्रतियोगितायां सत्त्वात् भावत्वेन अभावाभावादेः लक्षणघटकत्वनिर्वाहः।

'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र वाच्यत्वनिष्ठप्रतियोगितात्वरूपविशेषधर्मावच्छिन्नप्रतियोगित्वाधिकरणे वाच्यत्वे वाच्यत्वत्वस्य सत्त्वात् विशेषधर्मावच्छिन्नव्यापकसाध्यतावच्छेदककत्वरूपं साध्यतावच्छेदकव्याप्यत्वं वाच्यत्वनिष्ठप्रतियोगितायामस्ति इति समवायितया वाच्यत्वाभावस्य लक्षणघटकत्वम् इति भावः।

ननु साध्यनिष्ठेत्यादि [पृ.34]। साध्यतावच्छेदकसमनियतत्वं साध्यतावच्छेदकव्यापकत्वे सति साध्यतावच्छेदकव्याप्यत्वम्। साध्यतावच्छेदकव्यापकत्वं च न अत्यन्ताभावघटितम्। किन्तु अन्योन्याभावघटितम्। साध्यतावच्छेदकवन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं निवेश्यते। तथा च साध्यतावच्छेदकप्रमेयत्वाधिकरणे अभावे 'अभावत्वेन भावाभावीयप्रतियोगितावान् न' इति भेदस्य, प्रमेयत्वाधिकरणे भावे 'भावत्वेन अभावाभावीयप्रतियोगितावान् न' इति भेदस्य च सत्वेन प्रत्येकं निरुक्तभावद्वयप्रतियोगितयोः साध्यतावच्छेदकवन्निष्ठभेदप्रतियोगितावच्छेदकत्वमेव अस्तीति न कापि प्रतियोगिता साध्यतावच्छेदक - प्रमेयत्व-व्यापिका इति तादृशाभावयोः लक्षणाघटकतया प्रमेयसाध्यकस्थले साध्याभावाप्रसिद्धिरित्याशङ्क्य अभावान्तरं प्रदर्शयति इत्यर्थः।

वह्नित्वेन प्रमेयं नास्तीत्यादि [पृ.35]। 'वह्नित्वेन प्रमेयं नास्ति' इति प्रतीत्या वह्नित्वावच्छिन्नप्रमेयसामान्यनिष्ठ-प्रतियोगिताकाभावः विषयीक्रियते। तथा च तादृशाभावप्रति-योगिता प्रमेयसामान्यनिष्ठा। प्रमेयत्वं च प्रमेयसामान्यनिष्ठम् इति प्रमेयत्वरूपसाध्यतावच्छेदकसमनियतप्रतियोगिताकत्वं वह्नित्वेन प्रमेयसामान्याभावस्यास्तीति तस्य लक्षणघटकत्वम् इति भावः।

यदि चेति [पृ.35]। यत्र यत्र 'वह्निर्नास्ति' इति प्रतीतिः तत्रैव 'वह्नित्वेन प्रमेयं नास्ति' इति प्रतीतिरपि भवति। तथा च वह्नित्वेन वह्न्यभावस्य वह्नित्वेन प्रमेयसामान्याभावस्य च समनियततया ऐक्यात् वह्नित्वरूपप्रतियोगितावच्छेदकस्य ऐक्याच्च असति बाधके अवच्छेदकैक्ये अभावैक्ये च प्रतियोगिताया अपि ऐक्यात् उभयत्रापि एकैव प्रतियोगिता भासत इत्यङ्गीकरणीयम्। तत्र 'वह्निर्नास्ति' इति प्रतीतिसिद्धवह्निमात्रनिष्ठप्रतियोगितैव 'वह्नित्वेन प्रमेयं नास्ति' इत्यत्र प्रमेयनिष्ठतया भासत इत्यङ्गी-कारो युक्तो वा 'वह्नित्वेन प्रमेयं नास्ति' इति प्रतीतिसिद्ध-प्रमेयसामान्यनिष्ठप्रतियोगितैव 'वह्निर्नास्ति' इत्यत्र वह्निवृत्तितया भासत इत्यङ्गीकारो युक्तो वा इति सन्देहे वह्निमात्रवृत्तिप्रति-योगितैव उभयत्र भासत इत्यङ्गीकार एव युक्तः। अन्यथा प्रमेयसामान्यनिष्ठप्रतियोगितैव वह्निवृत्तितया भासत इति स्वीकारे कूटघटितलक्षणस्य 'वह्निमान् प्रमेयत्वात्' इत्यत्र अतिव्याप्तिः स्यात्। वह्नित्वसमनियतप्रतियोगिताकाभावपदेन वह्नित्वेन वन्ह्यभावं गृहीत्वा तद्घटितकूटाधिकरणनिर्वह्नि-वृत्तित्वमेव प्रमेयत्वेऽस्ति न तु तदभाव इति हि अतिव्याप्तिः वारणीया। 'वह्निर्नास्ति' इति प्रतीतिसिद्धाभावीयप्रतियोगिता यदि प्रमेयसामान्यनिष्ठा स्यात् तर्हि तस्याः प्रतियोगितायाः वह्नित्वव्याप्यत्वं नास्ति इति वह्नित्वसमनियतप्रतियोगिताकः

वह्नित्वेन वह्न्यभावो न स्यात्। किन्तु वह्निभिन्नत्वेन वह्न्यभाव एव स्यात्। वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगितायाः वह्निमात्र-निष्ठत्वात् वह्नित्वसमनियतत्वमस्ति। न हि तत्रापि वह्निभिन्न-त्वेन वह्न्यभाव - वह्निभिन्नत्वेन प्रमेयसामान्याभावयोः ऐक्य-माश्रित्य प्रतियोगितायाः प्रमेयसामान्यनिष्ठत्वं वक्तुं शक्यम्। वह्निभिन्नत्वेन वह्न्यभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगि-ताकस्य केवलान्वयित्वेन सार्वत्रिकत्वात् वह्निभिन्नत्वेन प्रमेय-सामान्याभावस्य वह्निभिन्नघटादिमति असत्त्वेन सार्वत्रिकत्व-विरहात्। तथा च 'वह्निमान् प्रमेयत्वात्' इत्यत्र वह्निभिन्नत्वेन वह्न्यभाव एव लक्षणघटकः। तद्घटितकूटाधिकरणं जगत् तद्वृत्तित्वाभावोऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिरिति तद्वत्त्वस्य हेतौ सत्त्वात् अतिव्याप्तिः स्यात्। अतः वह्निमात्रवृत्तिप्रतियोगितैव 'वह्नित्वेन प्रमेयं नास्ति' इत्यत्रापि प्रमेयत्वसमानाधिकरणतया भासते इत्येव अङ्गी-करणीयम्। तादृशाभावीयप्रतियोगिता च वह्निमात्रवृत्तिः वह्नितदितरसाधारणप्रमेयत्वव्यापिका न भवतीति वह्नित्वेन प्रमेयसामान्याभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताक-त्वविरहेण लक्षणाघटकतया पुनः साध्याभावाप्रसिद्धिः इत्याशङ्क्य गगनत्वेन प्रमेयसामान्याभावानुसरणम् इति भावः।

गगनं नास्तीत्यत्रेत्यादि [पृ.35]। 'गगनं नास्ति' इति प्रतीतिसिद्धः गगनत्वरूपसमानाधिकरणधर्मावच्छिन्नगगनाभावः केवलान्वयी। गगनस्य अवृत्तिपदार्थत्वेन कुत्राप्यवृत्तेः तदभावस्य सर्वत्र सत्त्वात्। एवं 'गगनत्वेन गगनभिन्नं नास्ति' इति प्रतीतिसिद्धः गगनत्वरूपव्यधिकरणधर्मावच्छिन्न - गगनभिन्ना-भावोऽपि केवलान्वयी। गगनभिन्नस्य घटादेः गगनत्वेन रूपेण कुत्राप्यवृत्तेः। तथा च तादृशप्रतीतिसिद्धयोः अभावयोः

समनियतत्वेन ऐक्यात् गगनत्वरूपस्य प्रतियोगितावच्छेदकस्य च ऐक्यात् असति बाधके अभावैक्ये अवच्छेदकैक्ये च प्रतियोगितायाः ऐक्यमिति न्यायात् उभयत्रापि एकैव प्रतियोगिता गगनवृत्तितया गगनभिन्नवृत्तितया च प्रतीयत इति वक्तव्यम् । तथा च गगनत्वेन गगनाभावीयप्रतियोगिता गगनत्वेन गगनभिन्नाभावीयप्रतियोगिता च गगन-गगनभिन्नोभयवृत्तिः । प्रमेयत्वमपि तदुभयवृत्तिः, प्रमेयस्य गगन-तद्भिन्नरूपेण द्विविधत्वात् । अतः प्रमेयत्वसमनियतप्रतियोगिताकः गगनत्वेन गगनाभावो वा गगनत्वेन गगनभिन्नाभावो वा भवितुमर्हति । अतः तमादाय प्रमेयसाध्यकस्थले साध्याभावप्रसिद्धिः संपादनीया ।

न च वह्नित्वेन वह्न्यभावस्य वह्नित्वेन वह्निभिन्नाभावस्य च प्रतियोगितायाः वह्नित्वरूपावच्छेदकैक्येन ऐक्यात् वह्नित्वेन वन्ह्यभावमादाय कुतः साध्याभावप्रसिद्धिः न संभवतीति वाच्यम् । वह्नित्वेन वन्ह्यभावीयप्रतियोगितायाः वह्नित्वेन वह्निभिन्नाभावीयप्रतियोगितायाश्च ऐक्यस्वीकारे प्रतियोगितावच्छेदकविशिष्टप्रतियोगिताश्रयेण साकं अभावस्य विरोधात् वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्ट - प्रतियोगिताश्रय - वह्निमति भूतले वह्नित्वेन वह्निभिन्नं नास्तीति प्रतीतेरनुपपत्तेः। तस्मात् वह्नित्वेन वन्ह्यभावीयप्रतियोगिता वह्निमात्रनिष्ठा अन्या। वह्नित्वेन वह्निभिन्नाभावीयप्रतियोगिता वह्निभिन्नमात्रनिष्ठा अन्या । तयोश्च प्रतियोगितयोः प्रमेयत्वव्यापकत्वं न संभवतीति तत्प्रतियोगिताकाभावमादाय साध्याभावप्रसिद्धिः न संभवति। न चैवं गगनत्वेन गगनाभाव-गगनत्वेन गगनभिन्नाभावप्रतियोगितयोः भेदः आपादयितुं शक्यते । गगनत्वरूपप्रतियोगितावच्छेदकविशिष्टस्य गगनरूपस्य प्रतियोगिनः कुत्राप्यसत्त्वेन गगनवति गगनत्वेन गगनभिन्नाभावसत्त्वानुपपत्तिरूपस्य प्रतियोगित्वाभेदबाधकस्य विरहात् । एवञ्च

गगनत्वावच्छिन्ना प्रतियोगिता प्रमेयत्वसमनियता इति प्रमेयसाध्यकस्थले गगनत्वेन गगनाभाव - गगनत्वेन गगनभिन्नाभावौ लक्षणघटकाविति भावः। एतत्सूचनायैव दीधितौ **'अवृत्तिमात्रवृत्ति'** इति विशेषणं गगनत्वस्य उक्तम्। दीधितौ **'प्रमेयमात्रस्य अभावः'** इत्यस्य प्रमेयत्वसमनियतप्रतियोगिताकाभाव इत्यर्थः। अतः 'गगनत्वेन प्रमेयं नास्ति' इति प्रतीतिसिद्धाभाव एव ग्राह्यः।

गगनत्वसामानाधिकरण्येनेति [पृ.35]। गगनवृत्तित्वेनेत्यर्थः। **गगनभिन्नत्वसामानाधिकरण्येनेति** [पृ.35]। गगनभिन्नवृत्तित्वेनेत्यर्थः। वह्नित्वावच्छिन्नप्रतियोगितायाः निखिलप्रमेयवृत्तित्वे बाधकमाह - **वह्नित्वाद्यवच्छिन्नेति** [पृ.35]। घटादिपदं वह्निभिन्नपरम्। **वह्निनिष्ठतादृशप्रतियोगित्वाभेदे इति** [पृ.35] वह्निनिष्ठवह्नित्वावच्छिन्नप्रतियोगित्वाभेदे इत्यर्थः।

नन्वेवमपीत्यादि [पृ.36]। 'ईश्वरज्ञानं विषयितासंबन्धेन प्रमेयसामान्यवत् ईश्वरज्ञानत्वात्' इत्यत्र सद्धेतौ साध्याभावाप्रसिद्धिः। तथा हि - साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावाः यावन्तः वृत्तिमद्वृत्तयः तद्वत्त्वमिति कूटघटितलक्षणे साध्याभावकूटवद्वृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशयिष्यति। तथा निवेशे 'सत्तावान् जातेः' इत्यत्र सद्धेतौ सत्तात्वेन सत्ताभाव - घटत्वेन सत्ताभावोभयघटितकूटाधिकरणं सामान्यादिकम्। तन्निरूपितहेतुतावच्छेदक - समवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धया अव्याप्तिः। तद्वारणाय साध्यतावच्छेदक-समनियतप्रतियोगिताकाभावे साधनसामानाधिकरण्यं विशेषणं देयम्। तद्विशेषणे दत्ते सत्तात्वेन सत्ताभावः समानाधिकरणधर्मावच्छिन्नसाध्याभावः ग्रहीतुं न शक्यते। तस्य साधनसामानाधिकरण्यविरहात्। जातिमति द्रव्यादौ अवृत्तेः। किन्तु 'घटत्वेन सत्ताभावः', 'पटत्वेन सत्ताभावः'

इत्येवं व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव ग्राह्यः। तस्य साधनवति वृत्तेः। साधनसमानाधिकरणत्वात्। तादृशाभाव-कूटाधिकरणं च जगदेव भवति तन्निरूपितवृत्तित्वाभावः घटत्वेन जगत्समवेतत्वाभावः, जगत्समवेतत्वं च प्रसिद्धमिति तादृशाभावमादाय लक्षणसमन्वयः। एवं साध्यतावच्छेदकसम-नियतप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वमपि निवेशनीयम्। अन्यथा 'समवायेन वह्निमान्, पर्वतवह्न्यवयव-संयोगात्' इत्यत्र व्यभिचारिणि समवायसंबन्धावच्छिन्नवन्ह्यभाव-संयोगसंबन्धावच्छिन्नवह्न्यभावयोर्द्वयोरपि प्रत्येकं साधनसमानाधि-करणत्वेन लक्षणघटकतया तद्द्वयाधिकरणं पर्वतः वन्ह्यवयवो वा न भवतीति ह्रदादिकमेव। तद्वृत्तित्वाभावस्य पर्वतवन्ह्यवयव-संयोगे सत्वात् अतिव्याप्तिः। प्रतियोगितायां साध्यतावच्छेदक-संबन्धावच्छिन्नत्वनिवेशे तु समवायसंबन्धावच्छिन्नवह्न्यभाव एव लक्षणघटकः। तदधिकरणं पर्वतोऽपि। तद्वृत्तित्वमेव पर्वत - वह्न्यवयव - संयोगेऽस्ति इति नातिव्याप्तिः। एवं च साधनसमानाधिकरणसाध्यतावच्छेदकसमनियतसाध्यतावच्छेदक-संबन्धावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावाः यावन्तः वृत्तिमद्वृत्तयः तद्वत्त्वं कूटघटितलक्षणम्। विषयिता-संबन्धेन प्रमेयसामान्यसाध्यकस्थले विषयितासंबन्धावच्छिन्न-प्रमेयसामान्यनिष्ठप्रतियोगिताकाभाव एव साध्यतावच्छेदक-संबन्धावच्छिन्नप्रतियोगिताकः। स तु साधनसमानाधिकरणो न भवति। ईश्वरज्ञानत्वरूपसाधनाधिकरणे ईश्वरज्ञाने विषयिता-संबन्धेन प्रमेयसामान्यस्य सत्त्वात् तत्संबन्धावच्छिन्न-प्रमेयसामान्याभावस्य अवृत्तेः। तथा च साधनसामानाधिकरण्य-रूपविशेषणविशिष्टः साध्याभावः अत्र अप्रसिद्ध इत्याशङ्क्य अभावान्तरमनुसरतीति भावः।

तत्रेत्यस्य अप्रसिद्धिरित्यत्र अन्वयः। 'सत्तावान् जातेः' इत्यादौ साध्याभावकूटवति हेतुतावच्छेदकसंबन्धेन वृत्यप्रसिद्धि-प्रयुक्तायाः अव्याप्तेः वारणाय उपादेयं यत् साधनसामानाधिकरण्यरूपं विशेषणं तद्विशिष्टस्य साध्यतावच्छेदकसमनियत-साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य अप्रसिद्धिः इत्यन्वयः। तत्र गगनत्वेन प्रमेयसामान्याभावस्य प्रसिद्धिरित्याशङ्क्याह **गगनादेरपीति** [पृ.36]।

ननु कालिकसंबन्धेन घटत्वपटत्वयोः काले सत्वेन तयोः विरोधाभावात् घटत्वपटत्वाभ्यां कालरूपस्य प्रमेयस्य संभवात् कथं घटत्वपटत्वाभ्यां प्रमेयसामान्याभावः प्रसिध्यतीत्यत आह - **येन संबन्धेनेति** [पृ.36]। यद्यपि कालिकसंबन्धेन वा विषयिता-संबन्धेन वा घटत्वपटत्वयोः नास्ति विरोधः, तथापि समवाय-संबन्धेन घटत्वपटत्वयोः एकाधिकरणवृत्तित्वाभावात् विरोधो वर्तते। अतः समवायसंबन्धावच्छिन्नघटत्वपटत्वोभयनिष्ठा-वच्छेदकताक-प्रमेयसामान्यनिष्ठप्रतियोगिताकोऽभावः प्रमेयसाध्य-कस्थले साध्यतावच्छेदकसमनियतप्रतियोगिताक इत्यर्थः।

ननु प्रतियोगितावच्छेदकविशिष्टप्रतियोगिना साकं अभावस्य विरोधात् घटत्वविशिष्टघटवति पटत्वविशिष्टपटवति च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनः सत्त्वेन कथं घटत्व-पटत्वाभ्यां प्रमेयाभावः तत्र स्थातुं शक्नोति इत्याशङ्क्याह - **प्रतियोगितावच्छेदकतावच्छेदकेति** [पृ.36]। प्रतियोगितावच्छेद-कतापर्याप्त्यधिकरणधर्मविशिष्टप्रतियोगितावच्छेदकावच्छिन्नप्रति-योगिना साकमेव अभावस्य विरोधः। प्रकृते घटत्वपटत्वोभयस्मिन् प्रतियोगितावच्छेदकतायाः पर्याप्तेः उभयत्वं प्रतियोगितावच्छेद-कतापर्याप्त्यधिकरणधर्मः। तद्विशिष्टघटत्वपटत्वोभयावच्छिन्न-

प्रतियोगी तु अप्रसिद्धः । अतः विरोधिविरहेण घटत्वपटत्वाभ्यां प्रमेयसामान्याभावस्य केवलान्वयित्वमिति भावः ।

दीधित्यनुक्ताभावान्तरमादायापि साध्याभावप्रसिद्धिं संपादयति **इदमुपलक्षणम् इत्यादिना** [पृ.36] । 'समवायसंबन्धेन गगनेन प्रमेयसामान्यं नास्तीति प्रतीतिसिद्धः समवायसंबन्धावच्छिन्न - गगननिष्ठावच्छेदकताकप्रमेयसामान्यनिष्ठ - प्रतियोगिताकाभावः प्रमेयसाध्यकस्थले लक्षणघटकः । यथा घटत्वपटत्वयोः प्रत्येकरूपेण वृत्तिमत्त्वेऽपि प्रतियोगितावच्छेदकतावच्छेदकोभयत्वरूपेण घटत्वपटत्वयोः वृत्तिमत्त्वविरहात् उभयत्वावच्छिन्नघटत्वपटत्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावः अङ्गीकृतः, तथा प्रतियोगितावच्छेदकतावच्छेदकसमवायसंबन्धेन गगनस्य वृत्तिमत्त्वविरहेऽपि तत्संबन्धावच्छिन्नगगननिष्ठावच्छेदकताकप्रतियोगिताकाभावः संभवतीति भावः ।

समवायसंबन्धेन गगनस्य कुत्राप्यवृत्तेः कथं वा गगनस्य अवच्छेदकत्वम् इत्याशङ्कायाम् अवच्छेदकस्य अवच्छेदकतावच्छेदकसंबन्धेन वृत्तिमत्त्वम् अवच्छेदकतायां न प्रयोजकम् । तत्र दृष्टान्तः अवच्छेदकतावच्छेदकरूपेण अवच्छेदकस्य वृत्तिमत्त्वं यथा अवच्छेदकतायां न प्रयोजकम् इति ।

तादात्म्येन प्रमेयसामान्यसाध्यकस्थले तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकः अभाव एव ग्राह्यः । स च प्रमेयसामान्यभेदरूपः अप्रसिद्ध इत्याशङ्क्य तत्रापि घटत्वपटत्वाभ्यां प्रमेयसामान्यभेदः, समवायेन गगनेन प्रमेयसामान्यभेदः, समवायित्वेन प्रमेयत्वेन प्रमेयसामान्यभेदो वा लक्षणघटकः । आद्यः उभयत्वावच्छिन्नघटत्वपटत्वनिष्ठावच्छेदकताकप्रतियोगिताकः । द्वितीयः समवायसंबन्धावच्छिन्नगगननिष्ठावच्छेदकताकप्रतियोगिताकः ।

तृतीयः समवायित्वावच्छिन्नप्रमेयत्वनिष्ठावच्छेदकताकप्रतियोगिताक इति विशेषः ।

॥ इति व्यधिकरणधर्मावच्छिन्नाभावावतरणम् ॥

दीधितिः ।

ननु पारिभाषिकमेव अव्यभिचरितत्वम् । तथा हि - यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणाः तत्त्वम् ।

गादाधरी

(६) प्रथमस्वलक्षणस्य लक्ष्ये समन्वयप्रदर्शनादि ।

ननु व्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धावपि व्यभिचाराभावरूपव्याप्तौ साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य घटकतया अप्रसिद्धिनिबन्धनाव्याप्तेः दुरुद्धरतयैव वादिनो निवृत्तेः व्यधिकरणधर्मावच्छिन्नाभावखण्डनपरग्रन्थानुत्थितिरित्यतः तादृशग्रन्थमवतारयति - **नन्वित्यादिना । पारिभाषिकमिति । तान्त्रिकसंकेतरूपपरिभाषया** व्याप्तिप्रतिपादकम्, न तु योगेनेत्यर्थः । **अव्यभिचरितत्वम्** - अव्यभिचरितत्वपदम् । अथ वा **पारिभाषिकमव्यभिचरितत्वम्** - परिभाषया अव्यभिचरितत्वपदप्रतिपाद्यम्, व्याप्यत्वमिति शेषः । न तु योगेन तत्पदलभ्यमित्यर्थः । तथा च व्यभिचारघटकसाध्यतावच्छेदकावच्छिन्नसाध्याभावस्य व्याप्तिघटकत्वविरहेऽपि न क्षतिरिति भावः ।

यदिति । यत्पदं यद्धर्मावच्छिन्नपरम्, अग्रे तत्पदमपि तद्धर्मावच्छिन्नपरम् । स च धर्मो हेतुतावच्छेदकोभूतधूमत्वादिः सद्धेतुस्थले हेतुतावच्छेदकावच्छिन्नसमानाधिकरण - साध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणाक्रान्तो व्यधिकरणधर्मावच्छिन्न-

प्रतियोगिताको घटत्वादिना वह्न्यभावादिरेव, तस्य च प्रतियोगिसामानाधिकरण्यम् **आवश्यकमिति** लक्षणसमन्वयः ।

व्यभिचारिणि - व्यभिचारनिरूपकाधिकरणीभूतहेत्वधिकरणे साध्यतावच्छेदकेत्यादिविशेषणाक्रान्तः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावादिरपि, तस्य च प्रतियोगिसामानाधिकरण्याभावात्, **तादृशाभावस्य** प्रतियोग्यधिकरणे कालिकसंबन्धेन वृत्तावपि विवक्षणोयस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यस्य विरहात् नातिव्याप्तिः । **'अयम् आत्मा ज्ञानात्'** इत्यादौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावादिकमादाय अव्याप्तेर्वारणाय हेतुसामानाधिकरण्यमभावविशेषणम् । **अभाववृत्तौ** संबन्धभेदानिवेशेन 'वह्निमान् धूमात्' इत्यादौ वह्नित्वादिना वह्न्याद्यभावस्य प्रतियोगिमति पर्वतादौ कालिकसंबन्धेन वृत्तेः लक्षणसमन्वयसंभवात् न तत्राव्याप्तेर्वारणं तत्फलमिति ध्येयम् ।

'अयम् आत्मा पृथिव्याद्यष्टद्रव्यातिरिक्तत्वे सति द्रव्यत्वात्' इत्यादौ द्रव्यत्वसमानाधिकरणात्मत्वत्वाद्यवच्छिन्नात्मत्वाद्यभावानां प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिः । अतः हेतुसामानाधिकरण्यघटकहेतौ हेतुतावच्छेदकविशिष्टत्वनिवेशः ।

यद्यपि 'अयम् आत्मा ज्ञानात्' इत्यादौ समानाधिकरणधर्मावच्छिन्नाभावमादाय अव्याप्तिः, अभावे साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यविशेषणेनापि वारयितुं शक्यते । 'धूमवान् वन्हेः' इत्यादौ धूमादिसमानाधिकरणस्य धूमाद्यभावस्य प्रतियोगिसामानाधिकरण्यावश्यकत्वेऽपि स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यस्यैव विवक्षणोयतया अयोगोलकान्तर्भावेण तादृशाभावस्य अतथात्वात् नातिव्याप्तिः; स्वविशिष्टहेत्वधिकरणेत्यत्र यत्पदेनैव हेतोरुपादेयतया 'तत्त्वम्'

इत्यत्र तत्पदेन तस्यैव परामर्शात् व्याप्तेः हेतुनिष्ठत्वोपपत्तिः इति; **तथापि** 'कपिसंयोगाभाववान् जातित्वात्' इत्यादौ साध्यसमानाधिकरणस्य कपिसंयोगाद्यात्मकाभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या 'सत्तावान् आत्मत्वात्' इत्यादौ सत्ताधिकरणकाले कालिकसंबन्धेन वर्तमानस्य सत्ताभावस्य तदप्रसिद्ध्या अव्याप्तिर्दुर्वारैवेति हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यमेवोपात्तम् ।

विवरणम्

ननु व्यधिकरणधर्मावच्छिन्नेत्यादि [पृ.48] । 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभावाप्रसिद्धावपि व्यभिचाराभावरूपव्याप्तौ साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य अवश्यं निवेशनीयतया तादृशसाध्याभावाप्रसिद्धिरूपदोषस्य उक्तत्वात् तावतैव वादिनः निवृत्तेः 'प्रतियोग्यवृत्तिश्च' इत्यादिना व्यधिकरणधर्मावच्छिन्नाभावखण्डनपूर्वकं दोषान्तरकथनं किमर्थमित्याशङ्कायां खण्डनपरग्रन्थम् अवतारयति - **नन्वित्यादिना** [पृ.48] । 'पारिभाषिकमेव' इति 'एव'कारेण न व्यभिचारः अव्यभिचार इति योगशक्त्या अव्यभिचरितपदप्रतिपाद्यत्वं व्यवच्छिद्यते । पारिभाषिकशब्दस्य द्वेधा व्याख्यानं करोति - **तान्त्रिकसङ्केतेत्यादिना** [पृ.49] । आद्यव्याख्याने 'अव्यभिचरितत्वम्' इत्यस्य अव्यभिचरितत्वपदमित्यर्थः । 'पारिभाषिकम्' इत्यस्य परिभाषया प्रतिपादकमित्यर्थः । व्याप्तिप्रतिपादकमिति प्रकरणसिद्धम् । परिभाषा नाम तान्त्रिकसङ्केतः । तान्त्रिकाः शास्त्रकाराः । द्वितीयव्याख्याने 'पारिभाषिकमव्यभिचरितत्वम्' इति पदसमुदायस्य परिभाषया अव्यभिचरितत्वपदप्रतिपाद्यमित्यर्थः । व्याप्यत्वमिति विशेष्यम् अध्याहार्यम् । आद्यव्याख्याने 'एव'कारेण योगशक्त्या प्रतिपादकत्वं व्यवच्छिद्यते । द्वितीयव्याख्याने योगशक्त्या प्रतिपाद्यत्वं व्यवच्छिद्यते ।

'यत्समानाधिकरणाः' इत्यादि दीधितिः। अत्र यत्समानाधिकरणसाध्यव्यापकतावच्छेदकप्रतियोगिताकयावदभावे प्रतियोगिसामानाधिकरण्यं विधीयते। यत्पदं यद्धर्मावच्छिन्नपरम्। अग्रे तत्पदमपि तद्धर्मावच्छिन्नपरम्। यद्धर्मपदेन हेतुतावच्छेदकधर्मः ग्राह्यः। तथा च यद्धर्मावच्छिन्नाधिकरणवृत्तयः साध्यतावच्छेदकावच्छिन्नस्य व्यापकतावच्छेदिका या प्रतियोगिता तन्निरूपकाः यावन्तोऽभावाः स्वप्रतियोग्यधिकरणवृत्तयः तद्धर्मावच्छिन्नत्वं व्याप्तिः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका इत्यस्य साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकप्रतियोगिताका इत्यर्थः। 'पर्वतो वह्निमान् धूमात्' इत्यत्र यद्धर्मः धूमत्वम्। तदवच्छिन्नस्य धूमस्य अधिकरणे पर्वतादौ वर्तमानाः अभावाः 'घटत्वेन वह्न्यभावः,' 'पटत्वेन वह्न्यभावः' इत्यादयः व्यधिकरणधर्मावच्छिन्नसाध्याभावाः, न तु वह्नित्वेन वह्न्यभावः। तस्य हेत्वधिकरणपर्वताद्यवृत्तित्वात्। घटत्वेन वह्न्यभावश्च वह्नित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकः। वह्नित्वावच्छिन्नाधिकरणे सर्वत्र घटत्वेन वह्न्यभावीयप्रतियोगिताविशिष्टस्य वह्नेः सत्त्वात्। घटत्वेन वह्न्यभावीयप्रतियोगिताविशिष्टस्य अभावः न भवति। किन्तु घटत्वेन घटाभावीयप्रतियोगिताविशिष्टस्य घटस्य अभावः। तत्प्रतियोगी घटाभावीयप्रतियोगिताविशिष्टघटः। तत्प्रतियोगितावच्छेदिका घटाभावीयघटनिष्ठप्रतियोगिता। तत्प्रतियोगितानवच्छेदिका घटत्वेन वह्न्यभावीय - वह्निनिष्ठप्रतियोगिता। तन्निरूपकाभावः घटत्वेन वह्न्यभावः। एवं पटत्वादिना वह्न्यभावश्च। तादृशाभावश्च वह्निरूपप्रतियोग्यधिकरणे पर्वतादौ वर्तते। व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयित्वात् इति लक्षणसमन्वयः।

'इदं वाच्यम् ज्ञेयत्वात्' इत्यादौ ज्ञेयत्वरूपहेत्वधिकरणे घटादौ वर्तमानः वाच्यत्वरूपसाध्यव्यापकतावच्छेदकप्रतियोगिताकः समवायित्वेन वाच्यत्वाभावः घटत्वेन वाच्यत्वाभाव इत्यादिः। तादृशाभावश्च वाच्यत्वात्मकप्रतियोग्यधिकरणे वर्तत इति लक्षणसमन्वयः । 'धूमवान् वह्नेः' इत्यत्र वह्निरूपहेत्वधिकरणायोगोलके वर्तमानः यावदन्तर्गतः धूमत्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकः धूमत्वेन धूमाभावोऽपि । स च प्रतियोगिसमानाधिकरणः न भवति । धूमरूपप्रतियोग्यधिकरणे पर्वतादौ अवर्तमानत्वात् । अतः नातिव्याप्तिः । तदाह - **यत्पदं यद्धर्मावच्छिन्नपरम्** [पृ.48] इत्यादिना । **आवश्यकमिति** [पृ.49] । व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयित्वात् इति भावः ।

ननु 'धूमवान् वन्हेः' इत्यादौ यावदन्तर्गतस्य धूमत्वेन धूमाभावस्यापि प्रतियोग्यधिकरणे पर्वतादौ कालिकसंबन्धेन वृत्तित्वात् प्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिः। तदाह - **तादृशाभावस्येति** [पृ.49] । स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यं विवक्षणीयमिति वक्ष्यति । स्वपदं लक्षणघटकाभावपरम् । धूमत्वेन धूमाभावविशिष्टयावद्धेत्वधिकरणान्तर्गतं अयोगोलकमपि । तदन्तर्भावेण धूमाभावस्य प्रतियोगिसामानाधिकरण्यं नास्ति । अयोगोलके धूमरूपप्रतियोगिनः विरहात् । अतः नातिव्याप्तिरिति भावः । अभावे हेतुसामानाधिकरण्यविशेषणस्य प्रयोजनमाह - **अयमात्मा ज्ञानात्** [पृ.49] । **इत्यादिना** ।

'यत्समानाधिकरणाः' इति विशेषणानुपादाने 'साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाः यावन्तोऽभावाः प्रतियोगिसमानाधिकरणाः' इत्येतावन्मात्रोक्तौ 'अयमात्मा ज्ञानात्' इत्यादौ सद्धेतौ आत्मत्वत्वंरूपसाध्यतावच्छेदकावच्छिन्न-

व्यापकतावच्छेदकप्रतियोगिताकयावदभावान्तर्गतः आत्मत्वत्वेन आत्मत्वाभावोऽपि । तस्य च प्रतियोगिसामानाधिकरण्यं नास्ति । प्रतियोगिनः आत्मत्वस्य अधिकरणे आत्मनि आत्मत्वाभावस्य अवृत्तेः इत्यव्याप्तिः । तद्वारणाय हेतुसामानाधिकरण्यम् अभावविशेषणम् । तद्विशेषणे दत्ते आत्मत्वत्वेन आत्मत्वाभावः न लक्षणघटकः । तस्य ज्ञानरूपहेत्वधिकरणे आत्मनि अवृत्तेः । किन्तु घटत्वेन आत्मत्वाभाव एव लक्षणघटकः । तस्य च केवलान्वयितया प्रतियोग्यधिकरणवृत्तित्वमस्तीति नाव्याप्तिः ।

ननु हेतुसामानाधिकरण्यविशेषणानुपादाने 'वह्निमान् धूमात्' इत्यादावपि अव्याप्तिः संभवति । वह्नित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावान्तर्गतस्य वह्नित्वेन वह्न्यभावस्य वह्निरूपप्रतियोग्यधिकरणे पर्वतादौ अवृत्तेः प्रतियोगिसामानाधिकरण्यविरहात् । तथा च प्रसिद्धस्थले अव्याप्तिकथनमुपेक्ष्य 'अयमात्मा ज्ञानात्' इत्यादौ अव्याप्तिकथनमयुक्तम् इत्यत आह - **अभाववृत्ताविति** [पृ.49] । अभावनिष्ठायां प्रतियोग्यधिकरणनिरूपितवृत्तितायां संबन्धविशेषावच्छिन्नत्वं प्रयोजनविरहात् न निवेश्यते । तथा च वह्नित्वेन वह्न्यभावस्यापि वह्न्यधिकरणपर्वतादिनिरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वसत्त्वात् प्रतियोगिसामानाधिकरण्यमस्तीति लक्षणसमन्वयसंभवात् 'वह्निमान् धूमात्' इति स्थलमुपेक्षितमिति भावः ।

हेतुतावच्छेदकावच्छिन्नत्वनिवेशस्य प्रयोजनमाह - **अयमात्मा इत्यादिना** [पृ. 49] । 'यद्धर्मावच्छिन्नसमानाधिकरणाः' इत्यनुक्त्वा 'यत्समानाधिकरणाः' इत्येतावन्मात्रोक्तौ 'अयमात्मा पृथिव्याद्यष्टद्रव्यातिरिक्तत्वे सति द्रव्यत्वात्' इत्यादिसद्धेतौ अव्याप्तिः । अत्र आत्मत्वं साध्यम् । पृथिव्याद्यष्टद्रव्यातिरिक्तत्व-

विशिष्टद्रव्यत्वं हेतुः। यत्पदेन विशिष्टशुद्धयोरनतिरेकात् शुद्धद्रव्यत्वस्यापि ग्रहीतुं शक्यतया तदधिकरणे पृथिव्यादौ आत्मत्वत्वेन आत्मत्वाभावस्यापि वर्तमानतया यावदभावान्तर्गतस्य तस्य प्रतियोगिसामानाधिकरण्यं नास्ति। आत्मत्वाधिकरणे आत्मनि आत्मत्वाभावस्य कालिकसंबन्धेनापि अवृत्तेः। नित्येषु कालिकायोगात्। अतः अव्याप्तिः। तद्वारणाय हेतौ हेतुतावच्छेदकावच्छिन्नत्वनिवेशः। तन्निवेशे पृथिव्याद्यष्टद्रव्यातिरिक्तत्वविशिष्टद्रव्यत्वत्वावच्छिन्नाधिकरणमात्मैव। तद्वृत्तयः यावन्तोऽभावाः इत्यनेन आत्मत्वत्वेन आत्मत्वाभावः न ग्रहीतुं शक्यते। तस्य आत्मनि केनापि संबन्धेन अवृत्तेः। किन्तु व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः घटत्वादिना आत्मत्वाभाव एव ग्राह्यः। तस्य च आत्मत्वरूपप्रतियोग्यधिकरणवृत्तित्वमस्तीति नाव्याप्तिः।

ननु हेतुतावच्छेदकावच्छिन्नहेतुसामानाधिकरण्यस्थाने साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यमेव अभावे विशेषणं दीयताम्। साध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक प्रतियोगिताकाः यावन्तोऽभावाः प्रतियोगिसमानाधिकरणाः तत्त्वम् इत्येव व्याप्तिरस्तु। तावतापि 'अयमात्मा ज्ञानात्' इत्यादौ समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य आत्मत्वत्वेन आत्मत्वाभावस्य आत्मत्वरूपसाध्याधिकरणात्मवृत्तित्वाभावेन लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य घटत्वादिना आत्मत्वाभावस्यैव लक्षणघटकतया तस्य च प्रतियोगिसामानाधिकरण्यसत्त्वात् नाव्याप्तिः। साध्ये साध्यतावच्छेदकावच्छिन्नत्वनिवेशात् 'अयम् अष्टद्रव्यातिरिक्तद्रव्यत्ववान् आत्मत्वात्' इत्यत्र शुद्धद्रव्यत्वाधिकरणपृथिव्यादिवृत्ति-

यावदभावान्तर्गतस्य आत्मत्वत्वेन आत्मत्वाभावस्य प्रतियोगिसामानाधिकरण्यविरहात् प्रसक्तायाः अव्याप्तेः नावकाशः ।

ननु हेतुसामानाधिकरण्यस्थाने साध्यसामानाधिकरण्यनिवेशे व्याप्तेः हेतुनिष्ठत्वं कथम् ? यत्तत्पदाभ्यां साध्यस्यैव ग्राह्यत्वात् इति चेन्न - स्वविशिष्टहेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यस्य अवश्यं निवेशनीयतया तत्र हेतुपदस्थाने यत्पदस्य निवेशेन व्याप्तेः हेतुनिष्ठत्वोपपत्तेः । तथा च साध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाः यावन्तोऽभावाः स्वविशिष्टयावत् यदधिकरणान्तर्भावेण प्रतियोगिसमानाधिकरणाः तत्त्वं व्याप्तिः ।

न च साध्यसामानाधिकरण्यनिवेशे किं लाघवम् इति वाच्यम् । अनुगमे लाघवात् । तथाहि - साध्यतावच्छेदकविशिष्टाः यावन्तोऽभावाः यदधिकरणान्तर्भावेण प्रतियोगिसमानाधिकरणाः तत्त्वं व्याप्तिः । अभावे साध्यतावच्छेदकवैशिष्ट्यं च स्वावच्छिन्नसामानाधिकरण्य - स्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वोभयसंबन्धेन । हेतुसामानाधिकरण्यनिवेशे तु एवमनुगमो न संभवति इत्याशयेन शङ्कते - **यद्यपीत्यादिना** [पृ.49] ।

समाधत्ते - **तथापीत्यादिना** [पृ.50] । 'अयं कपिसंयोगाभाववान् जातित्वात्' इति सद्धेतुः । जातित्वाधिकरणे जातौ कपिसयोगाभावस्य सत्त्वात् । अत्र 'साध्यसमानाधिकरणाः यावन्तोऽभावाः' इत्यनेन कपिसंयोगात्मकः कपिसंयोगाभावत्वेन कपिसंयोगाभावाभावोऽपि ग्रहीतुं शक्यते । कपिसंयोगस्य कपिसंयोगाभावरूपसाध्याधिकरणवृक्षवृत्तित्वात् । तथा च यावदभावपदेन कपिसंयोगात्मकाभावस्यापि ग्रहणे तद्विशिष्टं हेत्वधिकरणमप्रसिद्धम् । हेत्वधिकरणजातेः कपिसंयोगविशिष्टत्वाभावात् । नित्येषु कालिकायोगात् नित्यायां जातौ कालिकसंबन्धेनापि कपिसंयोगवैशिष्ट्या-

संभवात् । तथा च स्वविशिष्टहेत्वधिकरणाप्रसिद्धया अव्याप्तिः । यदि तु प्रतियोगिवैयधिकरण्याघटितव्यापकतावच्छेदकत्वं निवेश्यते, तदा कपिसंयोगात्मकाभावस्य लक्षणघटकत्वं न संभवति । साध्यवति - कपिसंयोगाभाववति वृक्षे कपिसंयोगात्मकाभावीय-प्रतियोगिताविशिष्टस्य कपिसंयोगाभावस्य अभावः अस्तीति साध्यवन्निष्ठतादृशाभावप्रतियोगितावच्छेदकत्वस्यैव कपिसंयोगा-त्मकाभावीयप्रतियोगितायां सत्त्वेन साध्यव्यापकतावच्छेदकत्व-विरहात् । किन्तु घटत्वादिना कपिसंयोगाभावाभाव एव लक्षण-घटकः । तद्विशिष्टं हेत्वधिकरणं प्रसिद्धमेवेति नाव्याप्तिरित्युच्यते, तदा साध्यसामानाधिकरण्यनिवेशे 'सत्तावान् आत्मत्वात्' इत्यादौ अव्याप्तिः । साध्याधिकरणे - सत्ताधिकरणे काले कालिकसंबन्धेन वर्तमानस्य सत्तात्वेन सत्ताभावस्यापि यावदन्तर्गततया तद्विशि-ष्टस्य हेत्वधिकरणस्य अप्रसिद्धया अव्याप्तिः । हेत्वधिकरणस्य आत्मनः केनापि संबन्धेन सत्तात्वावच्छिन्नसत्ताभावविशिष्टत्वा-भावात् इति अव्याप्तिः । अतः साध्यतावच्छेदकावच्छिन्नसाध्य-सामानाधिकरण्यमुपेक्ष्य हेतुतावच्छेदकावच्छिन्नहेतुसामानाधिकरण्यं निवेशितम् । तन्निवेशे 'सत्तावान् आत्मत्वात्' इत्यादौ हेत्वधि-करणे आत्मनि सत्तात्वेन सत्ताभावः न वर्तत इति हेतुसमानाधि-करणाभावपदेन सत्तात्वेन सत्ताभावो न ग्राह्यः । किन्तु घटत्वेन सत्ताभाव एव ग्राह्यः । तद्विशिष्टं हेत्वधिकरणम् आत्मा प्रसिध्यति इति न स्वविशिष्टहेत्वधिकरणाप्रसिद्धिप्रयुक्ता अव्या-प्तिरिति भावः ।

गादाधरी

(७) हेतुसामानाधिकरण्यविशेषणवैयर्थ्यशङ्कापरिहारौ ।

यत्तु - 'अयमात्मा ज्ञानात्' इत्यादौ आत्मत्वत्वादिना आत्मत्वादेरभावस्य लक्षणघटकत्वेऽपि नाव्याप्तिः । तस्यापि

प्रतियोग्यधिकरणीभूते आत्मादौ एकज्ञानविषयत्व - स्वाश्रयाश्रयत्वादिरूपपरम्परासंबन्धेन वर्तमानतया प्रतियोगिसमानाधिकरणत्वात् इति सामानाधिकरण्यान्तविशेषणम् अनर्थकमिति, तन्न। एकज्ञानविषयत्वादिना विशिष्टबुद्धौ प्रमाणाभावेन तेषां संसर्गत्वाभावात्।

न च - **एवमपि** 'यदभावो व्यभिचारविरोधी' त्युपाधिलक्षणे 'इहोपाधिः', 'नेहोपाधिः' इति प्रतीतिव्यवहारानुरोधेन अव्याप्यत्वस्य संबन्धताया ग्रन्थकृतैव स्वीकृतत्वात् तेन संबन्धेनैव आत्मवृत्तेः आत्मत्वाभावस्य प्रतियोगिसामानाधिकरण्यमक्षतमेव इति - वाच्यम्। अव्याप्यत्वादेः संबन्धतायां विवादेन यदभावपदस्य यदव्याप्यत्वाद्यभावपरतामभ्युपगम्यापि ग्रन्थकृता तादृशलक्षणव्याख्यानात् तत्संबन्धताया अप्रामाणिकत्वाभिप्रायेणैव अत्र 'यत्समानाधिकरणा' इत्युपादानात्।

विवरणम्

यत्तु इत्यादि [पृ.56]। 'अयम् आत्मा ज्ञानात्' इत्यादौ यावदभावान्तर्गतस्य आत्मत्वत्वेन आत्मत्वाभावस्य प्रतियोगिसामानाधिकरण्यं नास्तीति अव्याप्तिः। तद्वारणाय अभावे हेतुसामानाधिकरण्यं विशेषणं देयम् इति पूर्वमुक्तम्।

अत्र केचिदाहुः - आत्मत्वत्वेन आत्मत्वाभावस्यापि प्रतियोगिसामानाधिकरण्यमस्ति। प्रतियोगिनः आत्मत्वस्य अधिकरणे आत्मनि एकज्ञानविषयत्वसंबन्धेन आत्मत्वाभावस्य सत्त्वात्। 'आत्मत्वं नास्ति' इति ज्ञाने 'त्व'प्रत्ययप्रकृत्यर्थतया आत्मनः, एवम् आत्मत्वाभावस्य उभयोः विषयत्वात्। एवमात्मनि स्वाश्रयाश्रयत्वसंबन्धेन आत्मत्वाभावः वर्तते। स्वं - आत्मत्वाभावः। तदाश्रयः - आत्मत्वम्। न हि आत्मत्वे आत्मत्वमस्ति।

आत्मत्वाभावाश्रयात्मत्वाश्रयत्वं आत्मन्यस्तीति आत्मनि आत्मत्वाभावः स्वाश्रयाश्रयत्वरूपपरंपरासंबन्धेन वर्तते । तथा च समानाधिकरणधर्मावच्छिन्नाभावस्य आत्मत्वत्वेन आत्मत्वाभावस्य ग्रहणेऽपि तस्य प्रतियोगिसामानाधिकरण्यसत्त्वात् अव्याप्तिविरहेण तद्वारणफलकं हेतुसामानाधिकरण्यविशेषणं व्यर्थमिति तन्मतम् अनूद्य निराकरोति । विशिष्टबुद्धिनियामकत्वमेव संसर्गत्वम् । एकज्ञानविषयत्वस्वाश्रयाश्रयत्वसंबन्धेन विशिष्टबुद्धौ प्रमाणाभावात् तेषां विशिष्टबुद्धिनियामकत्वरूपं संबन्धत्वमेव नास्ति । अतः तेन संबन्धेन प्रतियोगिसामानाधिकरण्यं वक्तुमशक्यम् । विशिष्टबुद्धिनियामकसंबन्धेन तु आत्मत्वाभावस्य प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिः भवति । तद्वारकतया हेतुसामानाधिकरण्यविशेषणं सार्थकमेवेति भावः ।

न चैवमपीत्यादि [पृ.57] । यदभावो व्यभिचारविरोधी तत्त्वम् उपाधेर्लक्षणमिति उपाधिलक्षणं मणिकारः उपाधिप्रकरणे वक्ष्यति । 'यदभाव' इत्यस्य यन्निष्ठाव्याप्यत्वसंबन्धावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः । 'व्यभिचारविरोधी' इत्यस्य व्यभिचाराभावव्याप्य इत्यर्थः । 'पर्वतो धूमवान् वह्नेः' इत्यत्र आर्द्रेन्धनसंयोगः उपाधिः । स उपाधिः अव्याप्यत्वसंबन्धेन वह्नौ वर्तते । अव्याप्यत्वं नाम तदभाववद्वृत्तित्वरूपो व्यभिचारः । अत एव वह्नेः धूमव्यभिचारित्वम् अनुमीयते । 'वह्निः धूमव्यभिचारी अव्याप्यत्वसंबन्धेन आर्द्रेन्धनवत्त्वात्' इति । सद्धेतौ तु अव्याप्यत्वसंबन्धेन उपाधिर्नास्ति । अत एव साध्यव्यभिचारोऽपि नास्ति । अतः अव्याप्यत्वसंबन्धावच्छिन्नोपाध्यभावः व्यभिचाराभावव्याप्यः इति उपाधौ लक्षणसमन्वयः ।

'इह हेतौ उपाधिः', 'नेह हेतौ उपाधिः' इति प्रतीत्यनुसारेण व्यवहारानुसारेण च अव्याप्यत्वरूपः संबन्धः सिध्यति

इति ग्रन्थकारैरेव उक्तम् । तेन संबन्धेन आत्मत्ववत्वेन आत्मत्वाभावस्य प्रतियोग्यधिकरणवृत्तित्वमस्ति । आत्मत्वाधिकरणे आत्मनि आत्मत्वाभावः स्वाभाववत्संबद्धत्वरूपाव्याप्यत्वसंबन्धेन वर्तते । स्वम् - आत्मत्वाभावः । स्वाभावः - आत्मत्वाभावाभावः । तद्वान् आत्मा । तत्संबद्धत्वं तादात्म्यसंबन्धेन आत्मनः अस्तीत्यनेन संबन्धेन आत्मत्वाभावस्य प्रतियोग्यधिकरणवृत्तित्वात् लक्षणसमन्वयेन अव्याप्त्यप्रसक्त्या हेतुसामानाधिकरण्यविशेषणं व्यर्थमिति शङ्का ।

समाधानं तु - अव्याप्यत्वस्य संबन्धत्वं सविवादम् । अत एव मणिस्थयदभावपदस्य यदव्याप्यत्वाभावः इति व्याख्यानं दीधितिकारैः कृतम् । अतः तेन संबन्धेन प्रतियोगिसामानाधिकरण्यं सविवादम् । किञ्च यदि अव्याप्यत्वं संबन्धः स्यात् तर्हि अव्याप्त्यप्रसक्त्या 'यत्समानाधिकरणाः' इति विशेषणं नोपाददीत । तद्विशेषणोपादानादेव अव्याप्यत्वस्य संबन्धत्वम् अप्रामाणिकमिति दीधितिकृतामाशय इति ।

दीधितिः

सर्वत्र वाच्यत्वाद्यभावस्य **तथात्वात्** यावत्त्वोपादानम् ।

गादाधरी

(८) यावत्पदव्यावृत्तिप्रदर्शनम्

यावत्पदासत्त्वे साध्यतावच्छेदकेत्यादिविशेषणस्य व्यावृत्तिः न संगच्छते । यत्किञ्चिदभावमादायैव लक्षणसमन्वयसंभवात् । अतः चरमोक्तस्यापि तत्पदस्य व्यावृत्तिं प्रथमतो दर्शयति - **सर्वत्रेति** । **तथात्वात्** - प्रतियोगिसमानाधिकरणत्वात् । तथा च यावत्पदादाने व्यभिचारिमात्रे एव अतिव्याप्तिरिति भावः ।

यद्यपि व्यभिचारिस्थल एव दोषस्य कथनीयतया सर्वत्र **तादृशाभावस्य तथात्वकथनम्** असंगतम्। तथापि यावत्पदानुपादाने अतिव्याप्तिरेव नाव्याप्तिः इत्येतत्सूचनाय सर्वत्रेत्युक्तम्।

अथवा सर्वत्र - सर्वाधिकरणावच्छेदेन। तथा च विवक्षणीयस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यस्य सत्त्वं सूचितम्।

विवरणम्

'सर्वत्र वाच्यत्वाद्यभावस्य' [पृ.59] इति दीधितौ यावत्पदोपादानस्य प्रयोजनमुक्तम्। तत्र काचिदाशङ्का जायते- 'यत्समानाधिकरणाः' इत्यादिलक्षणे 'यत्समानाधिकरणा' इति विशेषणस्य प्रयोजनकथनानन्तरं तदनन्तरं विद्यमानस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वरूपस्य द्वितीयविशेषणस्य प्रयोजनकथनमेव युक्तम्। न तु तत्परित्यज्य तदनन्तरं विद्यमानस्य यावत्त्वरूपतृतीयविशेषणस्य प्रयोजनकथनम् इति।

तत्समाधानं वदन् दीधितिम् अवतारयति **यावत्पदासत्त्वे इत्यादिना** [पृ.59]। 'साध्यतावच्छेदके' त्यादिद्वितीयविशेषणस्य प्रयोजनं यावत्वरूपतृतीयविशेषणे सत्येव भवति। अतः यावत्त्वस्य प्रथमतः प्रयोजनकथनम्। तथा हि - 'साध्यतावच्छेदके' त्यादि द्वितीयविशेषणानुपदाने 'वह्निमान् धूमात्' इत्यादौ अव्याप्तिः। साधनसमानाधिकरणाभावपदेन धूमाधिकरणपर्वतवृत्तेः गोत्वाभावस्यापि ग्रहीतुं शक्यतया तस्य यावद्धेत्वधिकरणपर्वतान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति। पर्वते गोत्वरूपप्रतियोगिविरहात्। तथा च गोत्वाभावमादाय प्रसक्तायाः अव्याप्तेर्वारणाय साध्यतावच्छेदकेत्यादिविशेषणम्।

गोत्वाभावस्य तु वह्नित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वं नास्ति । वह्नित्वावच्छिन्नवन्ह्यधिकरणे पर्वतादौ गोत्वाभावीयप्रतियोगिताविशिष्टस्य गोत्वस्यासत्त्वात् । अतः गोत्वाभावो न लक्षणघटकः । किन्तु घटत्वेन वह्न्यभाव एव । तस्य प्रतियोगिसामानाधिकरण्यसत्त्वात् नाव्याप्तिः इति द्वितीयविशेषणस्य प्रयोजनम् । यावत्पदासत्त्वे इदं प्रयोजनं न संभवति । 'यत्समानाधिकरणः यःकश्चिदभावः प्रतियोगिसमानाधिकरणः' इत्येव यावत्पदासत्त्वे लक्षणम् । तत्र तु हेत्वधिकरणपर्वतवृत्ति घटत्वेन वह्न्यभावं यत्किञ्चिदभावपदेन गृहीत्वा तस्य प्रतियोगिसामानाधिकरण्यसत्त्वात् लक्षणसमन्वयसंभवात् । यावत्पदे सति तु गोत्वाभावस्यापि यावदन्तर्गतत्वात् तस्य प्रतियोगिसामानाधिकरण्यविरहात् प्रसक्तायाः अव्याप्तेः वारकतया 'साध्यतावच्छेदके' त्यादि द्वितीयविशेषणसार्थक्यं भवति । अतः आदौ 'साध्यतावच्छेदके' त्यादिविशेषणस्य प्रयोजनमनुक्त्वा तत्सार्थक्यापादकस्य यावत्त्वविशेषणस्य प्रथमतः प्रयोजनं प्रदर्शयति इति भावः ।

यावत्पदासत्त्वे 'यत्समानाधिकरणः यः अभावः प्रतियोगिसमानाधिकरणः तत्त्वम्' इति लक्षणम् । तथा सति व्यभिचारिसामान्येऽतिव्याप्तिः । 'धूमवान् वह्नेः' इत्यादौ समवायित्वेन वाच्यत्वाभावस्य हेतुसमानाधिकरणस्य वाच्यत्वरूपप्रतियोग्यधिकरणघटादिवृत्तितया प्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिः । तद्वारणाय यावत्पदम् । तदुपादाने धूमत्वेन धूमाभावस्यापि हेतुसमानाधिकरणयावदन्तर्गततया तस्य प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः ।

यद्यपीत्यादि [पृ.60] । व्यभिचारिणि वाच्यत्वाद्यभावस्य तथात्वात् इति वक्तव्ये सर्वत्रेति किमर्थमुक्तम् । सर्वत्रे-

त्यनेन हि सद्धेतौ असद्धेतौ च समवायितया वाच्यत्वाभावस्य प्रतियोगिसामानाधिकरण्यं लभ्यते। अत्र सद्धेतौ प्रतियोगिसामानाधिकरण्यं न दोषावहम्। अतः सद्धेतुमन्तर्भाव्य सर्वत्रेति किमर्थमुक्तमिति शङ्कायां सद्धेतौ वाच्यत्वाभावस्य प्रतियोगिसामानाधिकरण्यसत्त्वेन लक्षणगमनात् नाव्याप्तिः। व्यभिचारिणि वाच्यत्वाभावस्य प्रतियोगिसमानाधिकरणत्वात् लक्षणसत्त्वेनातिव्याप्तिः। तथा च यावत्त्वानुपादाने अतिव्याप्तिरेव दोषः, न तु अव्याप्तिरिति सूचनाय सर्वत्रेत्युक्तमिति भावः।

तादृशाभावस्येति [पृ.60]। समवायितया वाच्यत्वाद्यभावस्येत्यर्थः। **तथात्वकथनमिति** [पृ.60]। प्रतियोगिसामानाधिकरण्यकथनम् इत्यर्थः।

"**सर्वत्र**" पदे अवच्छेदकत्वार्थकसप्तम्यङ्गीकारेण तत्सार्थक्यमाह - **अथ वेत्यादिना** [पृ.60]। 'सर्वत्र' त्यस्य सर्वाधिकरणावच्छेदेनेत्यर्थः। विवक्षणीयस्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण इति यावत्। 'धूमवान् वह्नेः' इत्यादौ धूमत्वेन धूमाभावस्य यद्यपि यावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति, अयोगोलके धूमरूपप्रतियोगिविरहात्। समवायितया वाच्यत्वाभावस्य तु अयोगोलके वाच्यत्वरूपप्रतियोगिनः स्वस्य च सत्त्वेन विवक्षणीयं स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिः इति सूचनार्थं **सर्वत्रे**त्युक्तम्।

दीधितिः

अत एव 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यादौ **द्वित्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि भूतत्वमनोऽन्यत्वाभावस्य अतथात्वात्** नातिप्रसङ्गः।

गादाधरी

(९) अत एव भूतत्वमूर्तत्वेत्यादिदीधितिग्रन्थस्यावतरणम् ।

ननु यावत्पदानुपादाने साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वं परित्यज्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेनैव अभावो विशेषणीयः। तद्व्याप्यत्वं च स्वव्यापकतत्कत्वम् । अतो नानवस्था । 'वह्निमान् धूमात्' इत्यादौ तत्तद्वह्न्याद्यभावानां साध्यतावच्छेदकव्याप्यप्रतियोगिताकानां यथाविवक्षणीयसामानाधिकरण्यविरहेऽपि घटत्वादिना वह्न्याद्यभावमादायैव लक्षणसङ्गतिः । इत्थं च 'धूमवान् वह्नेः' इत्यादौ वाच्यत्वाद्यभावमादाय नातिव्याप्तिसंभवः । तस्य धूमत्वाद्यव्याप्यप्रतियोगिताकत्वेन लक्षणघटकताविरहात् ।

एवं सति हेतुसमानाधिकरणत्वविशेषणमनर्थकमिति चेत्, तदपि तर्हि त्यज्यताम् इत्याशङ्कापरिहाराय तथाविधाभावनिवेशनेऽपि यत्र अतिव्याप्तिः तत्र यावत्पदस्य व्यावृत्तिमाह - **अत एवेति** [पृ.62] ।

अत एव - यावत्पदोपादानादेव । **द्वित्वावच्छिन्नाभावस्य** [पृ.62] - भूतत्वमूर्तत्वोभयत्वावच्छिन्नाभावस्य । **प्रतियोगिसामानाधिकरण्येऽपि** [पृ.62] - मनसि अभावविशिष्टहेत्वधिकरणे मूर्तत्वरूपप्रतियोगिसामानाधिकरण्येऽपि । तथा च यावत्पदानुपादाने साध्यतावच्छेदकव्याप्यप्रतियोगिताकतादृशोभयाभावस्यैव प्रतियोगिसमानाधिकरणतया अतिव्याप्तिः स्यादिति भावः ।

यावत्पदसत्त्वे यादृशाभावमादाय अतिव्याप्तिवारणं तादृशाभावं दर्शयति - **भूतत्वमनोऽन्यत्वाभावस्येति** [पृ.62] । भूतत्वाभावस्य मनोऽन्यत्वाभावस्य चेत्यर्थः । **अतथात्वात्** [पृ.62] - प्रतियोगिव्यसमानाधिकरणत्वात् । **यावत्पदे दत्ते** साध्यता-

वच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशने 'वन्हिमान् धूमात्' इत्यादौ तादृशयावदन्तर्गतमहानसीयवह्न्याद्यभावमादाय अव्याप्तिः स्यात् इति यथोक्तविशेषणस्यैवोपादेयतया तादृशाभावयोरपि लक्षणघटकत्वात् इति भावः ।

भूतत्वस्य बहिरिन्द्रियग्राह्यविशेषगुणात्मकतया प्रतियोगिस्वरूपाणां तन्निष्ठप्रतियोगितानां चालिनीन्यायेन उत्पत्तिकालावच्छेदेन वा साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया भूतत्वाभावस्य न साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमित्याशयेन अखण्डव्याप्यवृत्तिमनोभेदाभावानुधावनम् ।

उक्तरीत्या 'अत एव' इत्यादिग्रन्थावतारात् प्रथमतो वाच्यत्वाभावमादाय सर्वत्रैव व्यभिचारिणि अतिव्याप्तेर्दर्शितत्वात् साध्याभावमादाय व्यभिचारिविशेषे अतिव्याप्तिप्रदर्शनं सन्दर्भविरुद्धमित्याशङ्कानवकाशः ।

केचित्तु - यावत्पदानुपादाने वाच्यत्वादेरुदासीनपदार्थस्याभावमादाय व्यभिचारिसामान्ये अतिव्याप्तिर्विश्राम्यतु । साध्याभावमादायापि क्वचिदतिव्याप्तिः स्यात् । सा च यावत्पदोपादानात् न भवतीत्यभिप्रायकतया न सन्दर्भविरुद्धमिति - आहुः ।

विवरणम्

ननु यावत्पदानुपादाने व्यभिचारिसामान्ये समवायितया वाच्यत्वाभावमादाय अतिव्याप्तेरुक्तत्वात् तेनैव व्यभिचारिविशेषे 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यत्रापि अतिव्याप्तेः लाभात् पुनः साध्याभावमादाय तत्र व्यभिचारिविशेषे अतिव्याप्तिप्रदर्शनमयुक्तम् इत्याशङ्क्य व्यभिचारिविशेषे अतिव्याप्तिप्रदर्शनस्य साङ्गत्यं यथा स्यात् तथा अवतार्य व्याख्यानं करोति - **ननु यावत्पदानुपादाने** [पृ.63] इत्यादिना । यावत्पदानुपादाने व्यभिचारि-

मात्रे वाच्यत्वाद्यभावमादाय प्रसक्ता अतिव्याप्तिः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिकत्वस्थाने साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशेनैव वारयितुं शक्यते। न च 'वह्निमान् धूमात्' इत्यादौ वह्नित्वव्याप्यप्रतियोगिताकस्य महानसीयवह्न्यभावस्य यावद्धेत्वधिकरणपर्वतान्तर्भावेण महानसीयवह्निरूपप्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिरिति वाच्यम्। यावत्पदस्य अभावात् वह्नित्वव्याप्यप्रतियोगिताकं घटत्वेन वह्न्यभावमादायैव लक्षणसमन्वयसंभवात्।

'धूमवान् वह्नेः' इत्यादौ समवायितया वाच्यत्वाभावस्य धूमत्वव्याप्यप्रतियोगिताकत्वविरहात्; समवायितया वाच्यत्वाभावीयप्रतियोगितायाः वाच्यत्वे सत्त्वेन तत्र धूमत्वविरहात् स्वव्यापकतत्कत्वरूपसाध्यतावच्छेदकव्याप्यत्वविरहात् तस्य लक्षणाघटकत्वात् धूमत्वेन धूमाभावस्य लक्षणघटकत्वेऽपि तस्य यावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः।

ननु साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशे व्याप्यत्वस्य व्याप्त्याश्रयत्वरूपत्वेन व्याप्तेश्च यत्समानाधिकरणाः इत्यादिरूपत्वेन तत्रापि व्याप्यत्वप्रवेशात् अनवस्थेति चेत्, न। व्याप्त्यघटितस्य स्वव्यापकतत्कत्वस्यैव साध्यतावच्छेदकव्याप्यत्वरूपस्य प्रकृतलक्षणे प्रवेशात्।

न च - यावत्पदमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकः कश्चिदभावः प्रतियोगिसमानाधिकरण इति निवेशे 'अयम् आत्मा ज्ञानात्' इत्यादौ आत्मत्वत्वव्याप्यप्रतियोगिताकं 'घटत्वेन आत्मत्वाभावम्' आदाय लक्षणसमन्वयसंभवात् हेतुसमानाधिकरणत्वरूपं अभावविशेषणं व्यर्थम् इति - वाच्यम्।

इष्टापत्तेः इत्याशङ्क्य यावत्पदमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशेऽपि 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिवारणेऽपि 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यत्र अतिव्याप्तिः। तद्वारणाय **यावत्पदोपादानम्** इति भावः।

'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इति हेतुः व्यभिचारी। भूतत्वमूर्तत्वोभयाभाववति मनसि मूर्तत्वसत्त्वात्। अत्र हेत्वधिकरणे मनसि वर्तमानः साध्यतावच्छेदकव्याप्यप्रतियोगिताकः अभावः भूतत्वमूर्तत्वोभयाभावः। तस्य यावद्धेत्वधिकरणमनोऽन्तर्भावेण प्रतियोगिसामानाधिकरण्यमस्ति। भूतत्वमूर्तत्वोभयाभावस्य उभयं प्रतियोगि। उभयस्य प्रत्येकम् अनतिरेकात् मूर्तत्वमपि प्रतियोगि। तच्च मनसि वर्तते। एवं भूतत्वमूर्तत्वोभयाभावोऽपि वर्तत इति प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिः। तद्वारणाय यावत्पदोपादानम्। तदुपादाने हेतुसमानाधिकरणयावदभावान्तर्गतः भूतत्वाभावः मनोऽन्यत्वाभावश्च। तयोः मनोऽन्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति। प्रतियोगिनः भूतत्वस्य मनोऽन्यत्वस्य च मनसि अभावात्। अतो नातिव्याप्तिरिति भावः।

ननु यावत्पदे दत्ते भूतत्वाभावस्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेन लक्षणघटकत्वेऽपि मनोऽन्यत्वाभावस्य भूतत्वमूर्तत्वोभयत्वरूपसाध्यतावच्छेदकशून्ये मनोऽन्यत्वे वर्तमाना या प्रतियोगिता तन्निरूपकत्वेन साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वविरहात् कथं लक्षणघटकत्वम् इत्यत आह-**यावत्पदे दत्ते** [पृ.63] इति। यावत्पददानात् पूर्वं साध्यतावच्छेदकव्याप्य प्रतियोगिताकत्वं निवेशयितुं शक्यम्। यावत्पददानानन्तरं तु तन्निवेशयितुम् अशक्यम्। तथा सति 'वह्निमान् धूमात्' इत्यादौ वह्नित्वव्याप्यप्रतियोगिताकयावदभावान्तर्गतस्य महानसीयवह्न्य-

भावस्य स्वविशिष्टयावद्धेत्वधिकरणपर्वतान्तर्भावेण प्रतियोगि-सामानाधिकरण्यविरहात् अव्याप्तिप्रसङ्गात्। अतः यावत्पद-दानानन्तरं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रति-योगिताकत्वमेव अभावविशेषणं दातव्यम्। महानसीयवह्न्य-भावीयप्रतियोगितायाः न वह्नित्वावच्छिन्नव्यापकतावच्छेदकत्वम्। वह्निमति पर्वते महानसीयवह्न्यभावीयप्रतियोगिताविशिष्टस्य महानसीयवह्नेः असत्त्वात्। अतः महानसीयवह्न्यभावस्य लक्षणाघटकतया न तमादाय अव्याप्तिः। 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यादौ साध्यवति पृथिव्यादिचतुष्टये भूतत्वाभावीय-प्रतियोगिताविशिष्टस्य भूतत्वस्य मनोऽन्यत्वाभावीयप्रतियोगिता-विशिष्टस्य मनोऽन्यत्वस्य च सत्त्वेन भूतत्वाभावमनोऽन्यत्वा-भावयोरपि भूतत्वमूर्तत्वोभयत्वावच्छिन्नव्यापकतावच्छेदकप्रति-योगिताकतया लक्षणघटकत्वोपपत्तिरिति भावः।

भूतत्वाभावं परित्यज्य मनोऽन्यत्वाभावानुधावने कारणमाह-भूतत्वस्येति [पृ.64]। भूतत्वं नाम बहिरिन्द्रियग्राह्यविशेषगुण-स्वरूपम्। भूतत्वाभावः बहिरिन्द्रियग्राह्यविशेषगुणाभावः। अभावीयप्रतियोगिता प्रतियोगिस्वरूपा। अतः भूतत्वाभावीय-प्रतियोगिता बहिरिन्द्रियग्राह्यविशेषगुणभेदेन भिन्ना। तथा च साध्यवति पृथिव्यादौ शब्दादिरूपविशेषगुणाभावस्य सत्त्वात् चालि-नीन्यायेन विशेषगुणात्मिकानां प्रतियोगितानां साध्यवन्निष्ठाभाव-प्रतियोगितावच्छेदकत्वमेव अस्ति। एवं साध्यवति पृथिव्यादौ उत्पत्तिकालावच्छेदेन भूतत्वाभावीयप्रतियोगिताविशिष्टानां विशेषगुणानाम् अभावस्य सत्त्वात् तत्प्रतियोगितावच्छेदकत्वमेव भूतत्वनिष्ठप्रतियोगितायामस्ति। तथा च साध्यवन्निष्ठाभाव-प्रतियोगितानवच्छेदकप्रतियोगिताकत्वाभावात् भूतत्वाभावस्य न लक्षणघटकत्वम् इत्यालोच्य मनोऽन्यत्वाभावस्य अनुसरणम्।

साध्यवति पृथिव्यादौ विद्यमानः अभावः न मनोऽन्यत्वाभावीयप्रतियोगिताविशिष्टाभावः। तत्प्रतियोगिताविशिष्टस्य मनोऽन्यत्वस्यैव तत्र सत्त्वात्। किन्तु घटाद्यभावीयप्रतियोगिताविशिष्टाभावः। तत्प्रतियोगितावच्छेदकं घटाद्यभावीयप्रतियोगित्वम्। तत्प्रतियोगितानवच्छेदकं मनोऽन्यत्वनिष्ठं प्रतियोगित्वम्। तन्निरूपकत्वं मनोऽन्यत्वाभावेऽस्तीति स लक्षणघटकः। तस्य च यावद्धेत्वधिकरणमनोऽन्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति मनोऽन्यत्वरूपप्रतियोगिविरहात् इति नातिव्याप्तिरिति भावः।

अत्र आवश्यकत्वात् कृष्णंभट्टीये स्थितः विचारः तथैव लिख्यते—

"अत्रेदं चिन्त्यम्-साध्यतावच्छेदकव्याप्यप्रतियोगिताकाभावनिवेशस्याभिप्रेतत्वे यावत्पदे दत्ते भूतत्वमनोन्यत्वाद्यभावमादाय अतिव्याप्तिवारणे तु दीधितिकृतां मनोऽन्यत्वाभावलेखनासङ्गतिः। तस्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वाभावात्। न च साध्यतावच्छेदकव्याप्यप्रतियोगिताकयावदभावनिवेशे 'वह्निमान् धूमात्' इत्यादौ महानसीयवह्न्याद्यभावमादाय अव्याप्तिवारणाय यथोक्तविशेषणस्य आवश्यकतया तादृशाभावयोः न लक्षणघटकत्वानुपपत्तिरिति वाच्यम्। तथा सति 'तादृशाभावयोः लक्षणघटकत्वात्' इत्यनेन तादृशाभावद्वयस्य लक्षणघटकत्वसमर्थनासंगतेः। भूतत्वाभावस्य प्रागपि लक्षणघटकत्वात्। न च भूतत्वाभावस्य प्राक् लक्षणघटकत्वेऽपि मनोऽन्यत्वाभावस्यापि लक्षणघटकत्वार्थं तथाभिधानमिति वाच्यम्। अत एवेत्यादिना यावत्पदव्यावृत्त्यभिधाने यावदन्तर्गतभूतत्वाभावमादायैव अतिव्याप्तिनिराससंभवे 'वह्निमान् धूमात्' इत्यादौ महानसीयवह्न्यभावमादाय अव्याप्तिवारणाय यथोक्तविशेषणे

मनोऽन्यत्वाभावस्य लक्षणघटकत्वं संपाद्य तादृशाभावमादाय अतिव्याप्तिवारणप्रयासस्य निष्फलतया तद्ग्रन्थस्य एतदर्थातात्पर्यकत्वात् इति ।

अत्राहुः - यथोक्तविशेषणविशेषितयावदभावघटितलक्षणे यावत्त्वानुपादाने वाच्यत्वाभावमादाय दत्ताया अतिव्याप्तेः वारणार्थं यावत्त्वनिवेशविद्वेषिणा यथोक्तविशेषणं परित्यज्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वमादृतम् । तत्र चोभयत्वावच्छिन्नसाध्यकेऽतिव्याप्तिरिति यावत्त्वनिवेशः । तथा च साध्यतावच्छेदकव्याप्यप्रतियोगिताकयावदभावान्तर्गतं भूतत्वाभावमादायैव नातिव्याप्तिः । एवं च मनोऽन्यत्वाभावलेखनं यथोक्तविशेषणप्रवेशस्य निर्बीजत्वेऽसंगतं स्यादित्यतो महानसोयवह्न्याद्यभावमादाय अव्याप्तिः प्रदर्शिता । अथ यथोक्तविशेषणप्रवेशेऽपि भूतत्वाभावमादाय उभयसाध्यके अतिव्याप्तिवारणसंभवात् मनोऽन्यत्वाभावलेखनासंगतिरित्याशङ्कापरिहाराय भूतत्वस्येत्यादिना तदभावस्य यथोक्तविशेषणशून्यत्वस्य संपादनीयत्वेन तत्संगतेरिति ।

एवं च 'तादृशाभावयोरपि लक्षणघटकत्वात्' इत्यस्य भूतत्वमनोऽन्यत्वाभावयोः साध्यतावच्छेदकव्याप्यप्रतियोगिताकाभाव - यथोक्ताभाव - घटितलक्षणयोः क्रमेण लक्षणघटकत्वात् इत्यर्थः ।"

उक्तरीत्या साध्यतावच्छेदकव्याप्य - प्रतियोगिताकयत्किञ्चिदभावनिवेशं कृत्वा यावत्पदासत्त्वे यथोक्तविशेषणसत्त्वे सन्दर्भविरोधं परिहरतां मतम् आह - **केचित्तु** [पृ.64] इति । यावत्पदासत्त्वे व्यभिचारिसामान्ये समवायितया वाच्यत्वादेः उदासीनपदार्थस्य अभावमादाय अतिव्याप्तिः पूर्वमुक्ता । क्वचिद्व्यभिचारिणि साध्यमात्रप्रतियोगिकाभावमादायापि अतिव्याप्तिः

स्यात् । यथा 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यत्र साध्यमात्र-प्रतियोगिकं भूतत्वमूर्तत्वोभयाभावमादाय अतिव्याप्तिः सा च अतिव्याप्तिः यावत्पदोपादानेन परिहृता भवतातीत्याशयेन 'अत एव' इत्यादिग्रन्थः अवतीर्ण इति भावः ।

ननु यावत्पदानुपादाने 'वह्निधूमोभयवान् वह्नेः' इत्यत्र व्यभिचारिण्यपि अतिव्याप्तिः संभवति । वह्निधूमोभयत्व व्याप्यप्रतियोगिताकस्य वह्निधूमोभयाभावस्य यावद्धेत्वधिकरणा-योगोळकान्तर्भावेण वह्निरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् । यावत्पदे उपात्ते तु धूमाभावस्यापि यावदन्तर्गततया तस्य प्रति-योगिसामानाधिकरण्यविरहात् नातिव्याप्तिः । अतः तत्स्थल-मुपेक्ष्य 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इति स्थलानुधावनं किमर्थमिति चेत्—

उच्यते । वह्निधूमोभयं परस्परं व्याप्यव्यापकभावापन्नम् । वह्नेः व्यापकत्वात् धूमस्य व्याप्यत्वात् । भूतत्वमूर्तत्वोभयं तु परस्परव्यभिचारिभावापन्नम् । भूतत्वं विहाय मूर्तत्वस्य मनसि, मूर्तत्वं विहाय भूतत्वस्य आकाशे सत्त्वात् । तथा च 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यत्र साध्यैकदेशे मूर्तत्वे यथा अतिव्याप्तिः तथा 'भूतत्वमूर्तत्वोभयवान् भूतत्वात्' इत्यत्रापि साध्यैकदेशे भूतत्वे अतिव्याप्तिः । हेत्वधिकरणाकाशान्तर्भावेण उभयाभावस्य भूतत्वरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् । याव-त्पदे दत्ते तु मूर्तत्वाभाव - आकाशान्यत्वाभावादेः प्रतियोगि-सामानाधिकरण्यविरहान्नातिव्याप्तिः । वह्निधूमोभयसाध्यकस्थले तु साध्यान्तर्गतवह्नावेव अतिव्याप्तिः । तस्य साध्यव्यभिचारि-त्वात् न तु धूमेऽतिव्याप्तिः । तस्य साध्यव्याप्तिमत्त्वेन सद्धेतु-त्वात् । एतादृशविशेषव्युत्पादनार्थमेव वह्निधूमोभयसाध्यकस्थ-लोपेक्षा ।

गादाधरी

(१०) परे तु मतानुसारेण तद्ग्रन्थस्य अवतारणम्, तन्मतखण्डनं च ।

परे तु - ननु साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताकयावदभावनिवेशेनैव उपपत्तेः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावनिवेशनमफलम् । तादृशप्रतियोगिताकत्वविशेषणव्यावर्तनीयस्य तत्तद्वह्न्याद्यभावस्य वह्नित्वव्यापकप्रतियोगिताकत्वाभावेन उक्तविशेषणेनापि व्यावर्तनसंभवात्, अत आह - **अत एवेति** [पृ.62] । यत एव साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावे यावत्त्वमुपात्तम्, न तु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावे, तत एवेत्यर्थः ।

भूतत्वेति [पृ.62] । साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यादौ भूतत्वाभावमनोऽन्यत्वाभावप्रतियोगिताया **उभयत्वाव्यापकत्वेन** उभयत्वावच्छिन्नाभावादेरेव लक्षणघटकतया अतिव्याप्तिः स्यात् । यथोक्तविशेषणाक्रान्ताभावनिवेशे च भूतत्वमनोऽन्यत्वाद्यभावानामपि लक्षणघटकतया नातिव्याप्तिरिति भावः ।

न च - साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशेऽपि हेतुसमानाधिकरणस्य मनोभिन्नभेदस्य प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः । साध्यतावच्छेदकव्यापकताया लक्षणे निवेशे तादृशव्यापकताघटकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशासंभवात्, प्रतियोगितावच्छेदकसंबन्धेन तत्सामानाधिकरण्यस्य विवक्षणीयत्वादिति - वाच्यम् ।

प्रतियोगितावच्छेदकसंबन्धेन तत्सामानाधिकरण्यनिवेशेऽपि 'वह्निमान् धूमात्' इत्यादौ हेतुसमानाधिकरणस्य वह्नित्वव्यापक-

प्रतियोगिताकस्य पर्वतभिन्नभेदस्य प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यं पर्वतान्तर्भावेण नास्तीत्यव्याप्त्या-पत्त्या तेन संबन्धेन प्रतियोगिसामानाधिकरण्यस्य निवेशासंभवात् साध्यतावच्छेदकसंबन्धेनैव प्रतियोगिसामानाधिकरण्यम् अगत्या वाच्यम्। तथा च मनोभिन्नभेदस्य तेन संबन्धेन मूर्तत्वादि-रूपप्रतियोगिसामानाधिकरण्यमक्षतमेवेति अतिव्याप्तेः। साध्यता-वच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे वक्ष्यमाण-स्थलान्तरेऽप्यतिव्याप्तिः स्यादिति तु नास्माकं दोष इत्यभिप्राय इति व्याचक्रुः।

तत्तु न समीचीनतया प्रतिभाति। साध्यतावच्छेदकेत्यादि विशेषणव्यावृत्तेः पश्चाद्वक्ष्यमाणतया तदुत्तरमेव साध्यतावच्छेदका-वच्छिन्नेत्यादिविशेषणस्थले साध्यतावच्छेदकव्यापकप्रतियोगिता-कत्वविशेषणं किं नोपात्तमित्याकाङ्क्षोदयात् आदावेव तादृश-विशेषणपरित्यागबीजकथनस्य असंगतत्वात् इति।

विवरणम्

जगदीशतर्कालङ्कारकृतम् 'अत एव' इत्यादिदीधितेः सावतरणं व्याख्यानम् अनुवदति - **परे तु** [पृ.71] **इत्यादिना।** 'साध्यतावच्छेदकव्यापकप्रतियोगिताकाः यावन्तोऽभावाः' इति निवेशेनैव दोषवारणसंभवात् 'साध्यतावच्छेदकावच्छिन्नव्यापकता-वच्छेदकप्रतियोगिताकाः यावन्तोऽभावाः' इति निवेशनमफलं गौरवात्। तथा हि - 'वह्निमान् धूमात्' इत्यादौ महानसीय-वह्न्यभावस्य साध्यतावच्छेदकवह्नित्वव्यापकप्रतियोगिताकत्वं नास्ति। वह्नित्ववति पर्वतीयवह्नौ महानसीयवह्न्यभावीय-प्रतियोगितायाः विरहेण तत्प्रतियोगितायाः वह्नित्वव्यापकत्वा-भावात्। तथा च महानसीयवह्न्यभावस्य लक्षणाघटकतया तमादाय नाव्याप्तिः। 'धूमवान् वह्नेः' इत्यादौ समवायितया

वाच्यत्वाभावस्य धूमत्वव्यापकप्रतियोगिताकत्वं नास्ति, वाच्यत्वाभावीयप्रतियोगितायाः वाच्यत्व एव सत्त्वेन धूमत्ववति धूमे असत्त्वात्। तथा च समवायितया वाच्यत्वाभावस्य लक्षणाघटकतया तमादायापि नातिव्याप्तिरित्याशङ्क्य आह-अत एवेति [पृ.62]। साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावे यावत्त्वमनुपादाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावे यावत्त्वनिवेशादेव इत्यर्थः। तथा च साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावनिवेशे 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यत्र अतिव्याप्तिः। भूतत्वमूर्तत्वोभयत्वव्यापकप्रतियोगिता तदुभयनिष्ठप्रतियोगिता। तन्निरूपकाभावः भूतत्वमूर्तत्वोभयत्वावच्छिन्नप्रतियोगिताकाभावः। तस्य च हेत्वधिकरणमनोऽन्तर्भावेण मूर्तत्वरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावनिवेशे तु पूर्वोक्तरीत्या भूतत्वाभावमनोऽन्यत्वाभावयोरपि लक्षणघटकतया तयोश्च हेत्वधिकरणमनोऽन्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति। मनसि भूतत्वमनोऽन्यत्वयोः अभावादिति नातिव्याप्तिः।

ननु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशेऽपि 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यत्र अतिव्याप्तिर्वारयितुं शक्यते। किमिति गुरुतरविशेषणोपादानेन। तथा हि - हेत्वधिकरणे मनसि वर्तमानः मनोभिन्नभेदः 'मनः मनोभिन्नं न' इति प्रतीतिसिद्धः। स च साध्यतावच्छेदकभूतत्वमूर्तत्वोभयत्वव्यापकप्रतियोगिताकः। मनोभिन्नभेदीयप्रतियोगिता मनोभिन्ननिष्ठा। भूतत्वमूर्तत्वोभयत्वं भूतत्वमूर्तत्वोभयनिष्ठम्। तदुभयं मनोभिन्नमेवेति मनोभिन्ननिष्ठा प्रतियोगिता उभयत्वव्यापिका। तन्निरूपकः मनोभिन्नभेदः। तस्य यावद्धेत्वधिकरणमनोऽन्तर्भावेण

प्रतियोगिसामानाधिकरण्यं नास्ति । मनसि मनोभिन्नस्य मनोभिन्नभेदप्रतियोगिनः मूर्तत्वस्य सत्त्वेऽपि तस्य समवायसंबन्धेनैव सत्त्वेन प्रतियोगितावच्छेदकतादात्म्यसंबन्धेन असत्त्वात् विवक्षणीयस्य प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यस्य विरहात् नातिव्याप्तिः। यद्यपि व्यापकताघटकसंबन्धेन प्रतियोगिसामानाधिकरण्यमेव विवक्षिष्यति, तथापि साध्यतावच्छेदकावच्छिन्न - व्यापकतावच्छेदकप्रतियोगिताकाभावनिवेश एव सा विवक्षा। साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे तु तथा विवक्षितुं न शक्यते। प्रतियोगितायाः स्वरूपसंबन्धेनैव व्यापकत्वात् 'वह्निमान् धूमात्' इत्यादौ घटत्वेन वह्न्याद्यभावस्य व्यापकताघटकस्वरूपसंबन्धेन पर्वतादेः वह्निरूपप्रतियोगिमत्त्वविरहेण तेन संबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्त्यापत्तेः। तथा च प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वनिवेशपक्षे प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यस्यैव निवेशनीयतया मनोभिन्नभेदस्य तादृशतादात्म्यसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् न अतिव्याप्तिरिति चेत्—

न। प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशेऽपि 'वह्निमान् धूमात्' इत्यादौ हेत्वधिकरणपर्वतवृत्तेः वह्नित्वव्यापकप्रतियोगिताकस्य यावदभावान्तर्गतस्य पर्वतभिन्नभेदस्य प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिः स्यात्। तथा हि - साध्यतावच्छेदकं वह्नित्वं यत्रास्ति वह्नौ तत्र पर्वतभिन्नभेदीया प्रतियोगिता अस्ति। वह्नेरपि पर्वतभिन्नत्वात्। अतः पर्वतभिन्नभेदोऽपि साध्यतावच्छेदकव्यापकप्रतियोगिताकः। तस्य प्रतियोगितावच्छेदकतादात्म्यसंबन्धेन प्रतियोगिसामानाधिकरण्यं नास्ति। यावद्धेत्वधिकरणपर्वतादौ प्रतियोगिनः पर्वतभिन्नस्य वह्न्यादेः संयोगसंबन्धेन सत्त्वेऽपि प्रतियोगितावच्छेदक-

तादात्म्यसंबन्धेन अभावात् । तथा च अव्याप्त्यापत्त्या प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यं न विवक्षितुं शक्यम् । किन्तु साध्यतावच्छेदकसंबन्धेनैव प्रतियोगिसामानाधिकरण्यं वाच्यम् । पर्वतभिन्नभेदस्य प्रतियोगी पर्वतभिन्नः वह्निः । तत्सामानाधिकरण्यं साध्यतावच्छेदकसंयोगसंबन्धेन अस्तीति नाव्याप्तिः । एवञ्च 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यत्र यावदभावपदेन मनोभिन्नभेदस्य ग्रहणेऽपि साध्यतावच्छेदकस्वरूपसंबन्धेन समवायसंबन्धेन वा मनोभिन्नमूर्तत्वसामानाधिकरण्यमस्ति इति अतिव्याप्तिः दुर्वारा ।

न च - साध्यतावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशेऽपि अभावसाध्यकव्यभिचारिणि 'घटत्वाभाववान् मेयत्वात्' इत्यादौ अतिव्याप्तिः । हेतुसमानाधिकरणस्य घटत्वात्मकस्य साध्याभावस्य साध्यतावच्छेदकस्वरूपसंबन्धेन यावद्धेत्वधिकरणघटान्तर्भावेण पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् इति - वाच्यम् । साध्यतावच्छेदकव्याप्यप्रतियोगिताकयत्किञ्चिदभावनिवेशपक्षेऽपि अस्य दोषस्य सत्वात् इति 'परे तु' इत्यादि तर्कालङ्कारानुवादग्रन्थसारार्थः ।

उभयत्वाव्यापकत्वेनेति [पृ.71] । उभयत्ववति मूर्तत्वे भूतत्वाभावीयप्रतियोगिताया असत्त्वात् । भूतत्वे मूर्तत्वे च मनोऽन्यत्वाभावीयप्रतियोगिताया असत्त्वात् इति भावः । **यथोक्तविशेषणाक्रान्तेति** [पृ.76] । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वरूपविशेषणविशिष्टेत्यर्थः ।

तर्कालङ्कारमतं खण्डयति - **तत्तु न समीचीनतया प्रतिभातीति** [पृ.72] । यावत्त्वविशेषणप्रयोजनकथनावसरे साध्यता-

वच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वस्थाने साध्यतावच्छेदकव्यापकत्वमेव निवेश्यताम् इत्याकाङ्क्षाया अनुदयात् इदानीं तथानिवेशनप्रयोजनकथनस्य असङ्गतत्वात्। 'साध्यतावच्छेदके' त्यादि विशेषणप्रयोजनं पश्चाद्वक्ष्यति। तदानीमेव एतादृशाकाङ्क्षायाः तत्परिहारस्य च कथनं संगतम्, न तु प्रकृते इति भावः।

दीधितिः

साधनसमानाधिकरणगोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य वा अतथात्वात् 'साध्यतावच्छेदके' त्यादि।

गादाधरी

[११] साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका इति विशेषणस्य प्रयोजनवर्णनम्।

गोत्वाद्यभावस्येति [पृ. 76] प्रतियोग्यसामानाधिकरण्यादित्यर्थकेन अतथात्वादित्यनेनान्वयः। तथा च साध्यतावच्छेदकेत्याद्युपादाने असंभव इति भावः। **यद्यपि गोत्वाभावादेरपि** पूर्वक्षणवृत्तित्वादिविशिष्टस्वाभावरूप-प्रतियोगि-सामानाधिकरण्यं पर्वतादावप्यस्ति, तथापि व्यापकताया लक्षणाघटकत्वे साध्यतावच्छेदकसंबन्धेन **भावरूपप्रतियोगि**सामानाधिकरण्यं 'धूमवान् वह्नेः' इत्यादौ धूमाभावादेः पूर्वक्षणवृत्तित्वादिविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादाय अतिव्याप्तेर्वारणाय अवश्यं विवक्षणीयम्। तथा चायमसंभव इति भावः। **साध्यप्रतियोगिकाभावनिवेशेऽपि** गोत्वाद्यभावमादाय असंभवस्य वारणसंभवात् **तत्तत्साध्यव्यक्त्यभावस्येति** [पृ. 76]। अस्य च 'नानाव्यक्तिसाध्यके' इत्यादिः। तथा च साध्याभावनिवेशेऽपि 'वह्निमान् धूमात्' इत्यादौ अव्याप्तिः स्यादिति भावः। **साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वं** च साध्यतावच्छेदकावच्छिन्न-

साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वम् । 'गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः' इत्यादौ **विशिष्टसत्ताव्यापकतावच्छेदिकाया** अपि द्रव्यत्वाद्यभावीयप्रतियोगिताया न **साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वम्** । सत्तावति गुणादौ **तादृशप्रतियोगित्वावच्छिन्नाभावसत्त्वात्** ।

अतो विशिष्टसत्ताद्यभाव एव लक्षणघटकः । तस्य च गुणादौ सत्तादिरूपप्रतियोगिसमानाधिकरणत्वात् अतिव्याप्तिः । अतः साध्यतावच्छेदकावच्छिन्नत्वोपादानम् । तथा च सति द्रव्यत्वाभावप्रतियोगिताया अपि विशिष्टसत्तात्वाद्यवच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकतया तादृशाभावानां च गुणादौ **अतथात्वात्** नातिव्याप्तिः । यत्किञ्चिद्रूपावच्छिन्नसाध्यवत्तानिवेशे च 'सत्तावान् जातेः' इत्यादौ **विशिष्टसत्ताव्यापकतावच्छेदकप्रतियोगिताकद्रव्यत्वाभावादिकमादाय** अव्याप्तिर्बोध्या ।

विवरणम्

दीधितौ साध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणस्य प्रयोजनमाह - **साधनसमानाधिकरणेत्यादिना** [पृ॰ 76] । 'यत्समानाधिकरणाः यावन्तोऽभावाः प्रतियोगिसमानाधिकरणाः तत्त्वम् व्याप्तिः' इत्युक्तौ 'वह्निमान् धूमात्' इत्यादौ गोत्वाभावस्यापि धूमाधिकरणपर्वतादिवृत्तित्वेन यत्समानाधिकरणयावदभावान्तर्गततया तस्य यावद्धेत्वधिकरणपर्वतान्तर्भावेण गोत्वरूप-प्रतियोगिविरहात् प्रतियोगिसामानाधिकरण्यं नास्तीति असंभवः । तद्वारणाय साध्यतावच्छेदकेत्यादि विशेषणम् । गोत्वाभावीयप्रतियोगिताविशिष्टस्य गोत्वस्य वह्नित्वावच्छिन्नव्यापकत्वविरहात् वह्नित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकः न गोत्वाभावः, किन्तु घटत्वेन वह्न्यभावः । तस्य प्रतियोगिसामानाधिकरण्यसत्त्वात् नासंभव इति भावः ।

यद्यपि गोत्वाभावादेरपीति [पृ.76]। साध्यतावच्छेदके-त्यादिविशेषणानुपादाने गोत्वाभावस्य लक्षणघटकत्वेऽपि नासंभवः। गोत्वाभावस्य यथा गोत्वं प्रतियोगि तथा पूर्वक्षणवृत्तित्वविशिष्ट-स्वाभावोऽपि प्रतियोगी। स च पर्वते वर्तते गोत्वाभावोऽपि वर्तत इति पर्वतान्तर्भावेण प्रतियोगिसामानाधिकरण्यसत्त्वात् इति शङ्का।

समाधानं तु - साध्यतावच्छेदकावच्छिन्नेति विशेषणानु-पादाने व्यापकताघटकसंबन्धेन प्रतियोगिसामानाधिकरण्यं न निवेश्यते। तथा निवेशे 'धूमवान् वह्नेः' इत्यादौ यावदन्तर्गतस्य धूमाभावस्य पूर्वक्षणवृत्तित्वविशिष्ट-स्वाभावनिष्ठव्यापकतावच्छे-दकस्वरूपसंबन्धेन अयोगोलकान्तर्भावेण पूर्वक्षणवृत्तित्वविशिष्ट-स्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्त्यापत्तेः। किन्तु साध्यतावच्छेदकसंबन्धेनैव प्रतियोगिसामानाधिकरण्यं निवेश्यते। साध्यतावच्छेदकसंयोगसंबन्धेन पूर्वक्षणवृत्तित्व-विशिष्टस्वाभावरूपप्रतियोग्यभावात् धूमाभावस्य तेन संबन्धेन प्रतियोगिसामानाधिकरण्याभावात् नातिव्याप्तिः। एवञ्च गोत्वाभावस्य प्रतियोगी पूर्वक्षणवृत्तित्वविशिष्टस्वाभावः साध्य-तावच्छेदकसंयोगसंबन्धेन पर्वतादौ नास्तीति तेन संबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् असंभवः। तद्वारणाय सा-ध्यतावच्छेदकावच्छिन्नेत्यादि विशेषणमावश्यकमिति।

भावरूपप्रतियोगीति [पृ.76]। 'घटत्वाभाववान् मेयत्वात्' इत्यादौ व्यभिचारिणि घटत्वात्मकस्य साध्याभावस्य यावद्धेत्वधि-करणघटान्तर्भावेण साध्यतावच्छेदकस्वरूपसंबन्धेन पूर्वक्षणवृत्ति-त्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् अति-व्याप्तिः। तद्वारणाय प्रतियोगिनि भावरूपत्वनिवेशः। न च तन्निवेशेनैव 'धूमवान् वह्नेः' इत्यादौ पूर्वक्षणवृत्तित्वविशिष्ट-

स्वाभावस्य भावरूपत्वविरहात् तत्सामानाधिकरण्यमादाय अतिव्याप्तेरप्रसक्त्या साध्यतावच्छेदकसंबन्धेनेति व्यर्थमिति वाच्यम् । धूमाभावस्य भावरूपः प्रतियोगी धूमः । स कालिकसंबन्धेन अयोगोलके वर्तते । अतः कालिकसंबन्धेन भावरूपप्रतियोगिसामानाधिकरण्यमादाय 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धेनेत्यस्यापि अवश्यं निवेशनीयत्वात् ।

साध्यप्रतियोगिकेति [पृ. 76] । 'वह्निमान् धूमात्' इत्यादौ गोत्वाभावमादाय प्रसक्तः असंभवः अभावे साध्यप्रतियोगिकत्वं निवेश्यापि वारयितुं शक्यते । गोत्वाभावस्य वह्निप्रतियोगिकत्वविरहात् । अतः साध्यतावच्छेदकावच्छिन्नेत्यादि गुरुतरविशेषणम् अनर्थकमिति आशङ्क्य 'वह्निमान् धूमात्' इत्यादौ तत्तद्वह्न्यभावस्यापि साध्यप्रतियोगिकतया तस्य यावद्धेत्वधिकरणान्तर्भाविण प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिः । तद्वारणाय साध्यतावच्छेदकावच्छिन्नेत्यादि विशेषणमिति भावः ।

साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वं परिष्कर्तुम् आरभते **साध्यतावच्छेदकावच्छिन्नेत्यादि** [पृ.76] । साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वं सध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वम् ।

अत्र साध्यतावच्छेदकावच्छिन्नेत्यनुपादाने साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकाः यावन्तोऽभावाः प्रतियोगिसमानाधिकरणाः इत्युक्तौ 'गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः' इत्यत्र अतिव्याप्तिः । तत्र हि गुणकर्मान्यत्वविशिष्टसत्ताव्यापकं द्रव्यत्वाभावीयप्रतियोगिताविशिष्टं द्रव्यत्वम् । व्यापकतावच्छेदकं द्रव्यत्वनिष्ठं प्रतियोगित्वम् । तन्निरूपकाभावः द्रव्यत्वत्वेन द्रव्यत्वाभावः । तस्य यावद्धेत्वधिकरण-

गुणान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति । गुणे द्रव्यत्व-रूपप्रतियोगिविरहात् इति अतिव्याप्तिः वारणीया । साध्यतावच्छेदकावच्छिन्नेत्यनुपादाने तु विशिष्टशुद्धयोरनतिरेकात् साध्य-पदेन शुद्धसत्तापि ग्रहीतुं शक्यते । तद्वद्गुणनिष्ठः यः अत्यन्ताभावः द्रव्यत्वाभावीयप्रतियोगिताविशिष्टस्य द्रव्यत्वस्याभावः । तत्प्रतियोगितावच्छेदिकैव द्रव्यत्वाभावीयप्रतियोगिता इति साध्य-वन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकः द्रव्यत्वाभावो न भवतीति स न लक्षणघटकः । किन्तु विशिष्टसत्ताभाव एव । विशिष्टशुद्धयोरनतिरिक्तत्वात् साध्याधिकरणे गुणे सत्तायाः वर्तमानत्वेन विशिष्टसत्ताभावीयप्रतियोगितावान् नास्तीति प्रतीतिसिद्धाभावः धर्तुं न शक्यत इति अभावान्तरं धृत्वा विशिष्ट-सत्ताभावीयप्रतियोगितायाः साध्यवन्निष्ठाभावप्रतियोगितान-वच्छेदकत्वात् । विशिष्टसत्ताभावस्य तु यावद्धेत्वधिकरणगुणान्त-र्भावेण सत्तारूपप्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिः स्यात् । तद्वारणाय साध्यतावच्छेदकावच्छिन्नेति निवेशः । तन्निवेशे च विशिष्टसत्तात्वरूपसाध्यतावच्छेदकावच्छिन्नाधिकरणं द्रव्यमेव । तत्र 'द्रव्यत्वाभावीयप्रतियोगितावान् नास्ति' इत्याकारकाभावस्य असत्त्वेन 'गुणत्वाभावीयप्रतियोगितावान् नास्ति' इत्यभाव एव साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठोऽभावः । तत्प्रतियोगितावच्छेदिका गुणत्वाभावीयप्रतियोगिता । तत्प्रतियोगितानवच्छेदिका द्रव्यत्वाभावीयप्रतियोगिता । तन्नि-रूपकः द्रव्यत्वत्वेन द्रव्यत्वाभावः । तस्य यावद्धेत्वधिकरण-गुणान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति इति नाति-व्याप्तिः ।

न च यत्किञ्चिद्रूपावच्छिन्नसाध्यव्यापकतावच्छेदकप्रति-योगिताकत्वनिवेशेऽपि यत्किञ्चिद्रूपपदेन विशिष्टसत्तात्वं गृहीत्वा

पूर्वोक्तरीत्या 'विशिष्टसत्तावान् जातेः' इत्यत्र अतिव्याप्तेः वारयितुं शक्यतया साध्यतावच्छेदकावच्छिन्नेति व्यर्थमिति वाच्यम्। तथा निवेशे 'सत्तावान् जातेः' इत्यत्र सद्धेतौ यत्किञ्चिद्रूपपदेन सत्तारूपसाध्यनिष्ठं गुणकर्मान्यत्वविशिष्टसत्तात्वं गृहीत्वा तदवच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावपदेन द्रव्यत्वत्वेन द्रव्यत्वाभावं गृहीत्वा तस्य हेत्वधिकरणगुणान्तर्भावेण प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्त्यापत्तेः। अतः साध्यतावच्छेदकावच्छिन्नत्वमेव निवेशनीयम्। तन्निवेशे 'सत्तावान् जातेः' इत्यत्र साध्यतावच्छेदकं सत्तात्वम्। तदवच्छिन्नसत्तावति गुणे वर्तमानस्य 'द्रव्यत्वाभावीयप्रतियोगितावान् नास्ति' इति प्रतीतिसिद्धाभावस्य प्रतियोगितावच्छेदिकैव द्रव्यत्वाभावीयप्रतियोगिता इति द्रव्यत्वाभावस्य साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वविरहेण लक्षणाघटकतया न तमादाय अव्याप्तिः। घटत्वेन सत्ताभावमादाय लक्षणसमन्वय इति भावः।

विशिष्टसत्ताव्यापकतावच्छेदिकाया [पृ.77] इति। विशिष्टसत्तात्वावच्छिन्नव्यापकतावच्छेदिकाया इत्यर्थः। **साध्यवन्निष्ठाभावेति** [पृ. 77]। सत्तावन्निष्ठाभावेत्यर्थः। **तादृशप्रतियोगित्वावच्छिन्नाभावसत्त्वात्** [पृ.77] इति। द्रव्यत्वाभावीयप्रतियोगिताविशिष्टाभावसत्त्वात् इत्यर्थः। **अतथात्वादिति** [पृ.77]। प्रतियोग्यसमानाधिकरणत्वात् इत्यर्थः। **विशिष्टसत्ताव्यापकतेति** [पृ.77]। विशिष्टसत्तात्वावच्छिन्नव्यापकतेत्यर्थः।

गादाधरी

(१२) साध्यवत्तायां साध्यतावच्छेदकसंबन्धनिवेशनम्.

साध्यवत्त्वं च साध्यतावच्छेदकसंबन्धेन बोध्यम्। अन्यथा 'धूमवान् वह्नेः' इत्यादौ **धूमाभावायोगोलकान्यत्वाभावादि-**

प्रतियोगितायाः कालिकविशेषणता-विषयितादिसंबन्धेन धूमाधिकरणकालज्ञानादौ संयोगादिसंबन्धेन **स्वावच्छिन्नाभावसत्त्वात् न केनापि संबन्धेन व्यापकतावच्छेदकत्वम्** इति केवलान्वयिवाच्यत्वादिनिष्ठप्रतियोगितैव स्वरूपादिसंबन्धघटितव्यापकतावच्छेदिका स्यात् इति अतिव्याप्तिः ।

न च - संबन्धसामान्येन धूमादिमन्निष्ठो योऽभावः तदीयविषयतासंबन्धावच्छिन्नप्रतियोगितानवच्छेदिका या **प्रमानिष्ठ**-प्रतियोगिता तन्निरूपकप्रमाभावस्य च न **विवक्षणीय**साध्यतावच्छेदकसंबन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकयावत्संबन्धेन स्वविशिष्टयावद्धेत्वधिकरणे प्रतियोगिसामानाधिकरण्यम्, साध्यतावच्छेदकसंयोगादिसंबन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकतायां संयोगादिसंबन्धावच्छिन्नधूमादिप्रकारतानिरूपितविशेष्यतासंबन्धस्यापि **घटकतया** तेन संबन्धेन अयोगोलकादौ प्रतियोगिनोऽसत्त्वात् इति-वाच्यम् । **यतो** विषयताया विषयतात्वेनैव संबन्धता प्रामाणिकी, न तु तथाविधविशेष्यतात्वेनेति ।

परं तु एतादृशदिशा समवायेन ज्ञानादिसाध्यकद्रव्यत्वादिहेतावेव अतिव्याप्तिवारणं संभवति । तत्र ज्ञानाभावस्य संबन्धसामान्येन साध्यनिष्ठव्याप्यतानिरूपितविषयतासंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य, साध्यतावच्छेदकसंबन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकताघटकयावत्संबन्धान्तर्गतसमवायेन घटादौ प्रतियोगिसामानाधिकरण्यविरहादिति ।

न च - संबन्धसामान्येन धूमादिमन्निष्ठो योऽभावः तदीयसंबन्धसामान्यावच्छिन्नप्रतियोगितायां धूमाद्यभावीयसंबन्धसामान्यावच्छिन्नप्रतियोगित्वमप्यनवच्छेदकम् । संयोगत्वाद्य-

वच्छिन्नसंयोगादिसंबन्धेन धूमादेः यत्किंचित्संबन्धेन धूमादिमति अभावसत्त्वेऽपि संबन्धत्वरूपव्यापकधर्मावच्छिन्नसंयोगादिसंबन्धावच्छिन्नप्रतियोगिताकतदभावासत्त्वात् । तथा च धूमाद्यभावस्यापि लक्षणघटकतया तस्य **साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यनिष्ठ-व्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकसंयोगत्वाद्यवच्छिन्नसंयोगादिसंबन्धेन** प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरिति - वाच्यम् ।

संबन्धत्वेन संबन्धानाम् अभावप्रतियोगितावच्छेदकसंबन्धत्वे मानाभावात् तेन रूपेण संबन्धानां व्यापकताघटकत्वासंभवात् ।

विवरणम्

व्यापकताघटकसाध्यवत्तायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशयति - **साध्यवत्त्वं चेति** [पृ. 81] । साध्यवत्तायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशे 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिः । तत्र हि धूमाभावम् अयोगोलकान्यत्वाभावं वा यावदभावपदेन गृहीत्वा अतिव्याप्तिः वारणीया । साध्यतावच्छेदकसंबन्धानिवेशे तयोः लक्षणघटकत्वं न स्यात् । कालिकसंबन्धेन धूमाधिकरणे काले, विषयितासंबन्धेन धूमाधिकरणे धूमविषयकज्ञाने च धूमाभावीयप्रतियोगिताविशिष्टस्य धूमस्य संयोगसंबन्धेन अभावसत्त्वात् तत्प्रतियोगितावच्छेदिका एव धूमनिष्ठा प्रतियोगिता । एवं कालिकसंबन्धेन धूमाधिकरणे अयोगोलके अयोगोलकान्यत्वाभावस्य सत्त्वात् तत्प्रतियोगितावच्छेदिकैव अयोगोलकान्यत्वनिष्ठा प्रतियोगिता । अतः धूमाभावायोगोलकान्यत्वाभावयोः साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वाभावात् लक्षणघटकत्वं न स्यात् । किन्तु समवायितया वाच्यत्वाभाव एव लक्षणघटकः । संबन्धसामान्येन धूमवति कालज्ञानादौ सर्वत्रैव समवायितया वाच्यत्वाभावीय-

प्रतियोगिताविशिष्टस्य वाच्यत्वस्य स्वरूपसंबन्धेन सत्त्वात् वाच्यत्वनिष्ठा प्रतियोगिता साध्यव्यापकतावच्छेदिका। तन्निरूपकः समवायितया वाच्यत्वाभाव इति तस्य प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिः। साध्यतावच्छेदकसंबन्धेन साध्यवत्त्वनिवेशे तु संयोगसंबन्धेन धूमाधिकरणे पर्वतादौ धूमाभावीयप्रतियोगिताविशिष्टस्य सत्त्वात् धूमाभावीयप्रतियोगिता साध्यव्यापकतावच्छेदिका। तन्निरूपकः धूमाभावोऽपीति तस्य प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरिति भावः।

धूमाभावायोगोलकान्यत्वाभावादिप्रतियोगितायाः [पृ.81] इत्यस्य **न केनापि संबन्धेन व्यापकतावच्छेदकत्वम्** [पृ.82] इत्यनेन अन्वयः। **स्वावच्छिन्नाभावसत्त्वादिति** [पृ.82]। प्रतियोगिताविशिष्टाभावसत्त्वात् इत्यर्थः।

शङ्कते—**न च संबन्धसामान्येन** [पृ.82] इत्यादिना। साध्यतावच्छेदकसंबन्धेन साध्यवत्त्वमनिवेश्य संबन्धसामान्येन साध्यवत्त्वनिवेशेऽपि 'धूमवान् वह्नेः' इत्यादौ नातिव्याप्तिः। संबन्धसामान्येन धूमादिमति पर्वतकालज्ञानादौ सर्वत्रापि विषयतासंबन्धेन प्रमायाः सत्त्वात् विषयतासंबन्धावच्छिन्नप्रमाभावीयप्रतियोगिताविशिष्टनिष्ठप्रतियोगिताकाभावः साध्यवन्निष्ठो न भवति। अतः साध्यवन्निष्ठम् अभावान्तरं - गगनाद्यभावम् आदाय तत्प्रतियोगितानवच्छेदकप्रमानिष्ठप्रतियोगिताकः अभावः 'घटत्वेन प्रमा नास्ति' इति प्रतीतिसिद्धः व्यधिकरणधर्मावच्छिन्नाभावः लक्षणघटकः। तस्य च प्रतियोगिसामानाधिकरण्यं नास्ति। प्रतियोगिसामानाधिकरण्यं साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिताविशिष्टनिष्ठव्यापकताघटकयावत्संबन्धेन विवक्षिष्यति। तादृशयावत्संबन्धान्तर्गतः संयोगसंबन्धावच्छिन्नधूमनिष्ठप्रकारतानिरूपित - विशेष्यताख्यः संबन्धोऽपि। संयोगसंबन्धेन धूमः यत्र वर्तते पर्वतादौ,

तत्र 'पर्वतो धूमवान्' इत्याद्याकारकप्रमायाः धूमनिष्ठप्रकारतानिरूपित - विशेष्यतासंबन्धेन सत्त्वात् संयोगसंबन्धावच्छिन्नधूमनिष्ठव्याप्यतानिरूपितव्यापकतावच्छेदकसंबन्धः संयोगसंबन्धावच्छिन्नधूमनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धः । तेन संबन्धेन लक्षणघटकप्रमाभावप्रतियोगिप्रमा यावद्धेत्वधिकरणान्तर्गतायोगोलके नास्ति । अयोगोलके प्रमायाः विषयतासंबन्धेन सत्त्वेऽपि 'अयोगोलकं संयोगसंबन्धेन धूमवत्' इति प्रमाविरहेण संयोगसंबन्धावच्छिन्नधूमनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन प्रमायाः अभावात् । तथा च एतादृशसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः । अतः साध्यतावच्छेदकसंबन्धनिवेशनं मास्तु इति भावः ।

संबन्धसामान्येन [पृ.82] इत्यस्य **धूमादिमति** [पृ.82] अन्वयः । **विवक्षणीयेति** [पृ.82] । साध्यतावच्छेदकसंबन्धेन साध्यं प्रति लक्षणघटकाभावीयप्रतियोगिताविशिष्टं येन येन संबन्धेन व्यापकम्, तेन तेन संबन्धेन प्रतियोगिसामानाधिकरण्यं विवक्षणीयम् । तत् घटत्वेन प्रमाभावस्य नास्ति इत्यर्थः । **घटकतयेति** [पृ.82] । अवच्छेदकतयेत्यर्थः ।

समाधत्ते - **यत इति** [पृ.82] । विषयतायाः विषयतात्वेन रूपेणैव संबन्धत्वं प्रामाणिकम् । न तु धूमनिष्ठप्रकारतानिरूपितविशेष्यतात्वेन विशेषरूपेण संबन्धत्वम् । अतः प्रमायाः विषयतासंबन्धेनैव व्यापकत्वमिति व्यापकताघटकसंबन्धः विषयतैव । तेन संबन्धेन प्रमारूपप्रतियोगिनः अयोगोलके सत्त्वात् घटत्वेन प्रमाभावस्य विवक्षणीयव्यापकताघटकसंबन्धेन प्रतियोगिसामानाधिकरण्यमप्यस्तीति अतिव्याप्तिर्दुर्वारा । तद्वारणाय साध्यवत्तायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयमेवेति भावः ।

साध्यतावच्छेदकसंबन्धानिवेशे व्यभिचारिमात्रे नातिव्याप्तिः। किन्तु 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिविशेष एव अतिव्याप्तिः। क्वचिद्व्यभिचारिणि साध्यतावच्छेदकसंबन्धेनेति अनुक्तावपि नातिव्याप्तिरित्याह-**परन्तु** [पृ.82] इत्यादिना। 'आत्मा समवायेन ज्ञानवान् द्रव्यत्वात्' इत्यत्र समवायेन ज्ञानाभाववति घटादौ द्रव्यत्वसत्त्वात् अयं हेतुः व्यभिचारी। अत्र संबन्धसामान्येन ज्ञानरूपसाध्यवति घटादौ विषयतासंबन्धेन ज्ञानस्य सत्त्वात् ज्ञानाभावीयप्रतियोगिताविशिष्टं ज्ञानं साध्यव्यापकम्। साध्यव्यापकतावच्छेदकप्रतियोगिताकः अभावः घटत्वेन ज्ञानाभावः। तस्य यावद्धेत्वधिकरणघटाद्यन्तर्भावेण विषयतासंबन्धेन ज्ञानरूपप्रतियोगिसामानाधिकरण्यसत्त्वेऽपि विवक्षणीयसंबन्धेन प्रतियोगिसामानाधिकरण्यं नास्ति। साध्यतावच्छेदकसमवायसंबन्धेन ज्ञानं प्रति विषयतासंबन्धेन ज्ञानं यथा व्यापकम्, तथा समवायसंबन्धेनापि ज्ञानं व्यापकम्। आत्मनि विषयतासंबन्धेन समवायसंबन्धेन च ज्ञानसत्त्वात्। अतः समवायसंबन्धावच्छिन्नज्ञाननिष्ठव्याप्यतानिरूपित - स्वप्रतियोगिनिष्ठव्यापकतावच्छेदकयावत्संबन्धान्तर्गतः समवायोऽपि। तेन संबन्धेन हेत्वधिकरणे घटादौ ज्ञानस्याभावात् लक्षणघटकस्य घटत्वेन ज्ञानाभावस्य विवक्षणीयसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरिति भावः।

पुनः साध्यतावच्छेदकसंबन्धेनेत्यस्य वैयर्थ्यमाशङ्कते - **न च संबन्धसामान्येनेत्यादिना** [पृ.82]। संबन्धसामान्येन धूमादिमति कालज्ञानादौ 'धूमाभावीयप्रतियोगितावान् संयोगसंबन्धेन नास्ति' इति प्रतीतिसिद्धाभावसत्त्वेऽपि 'संबन्धेन धूमाभावीयप्रतियोगितावान् नास्ति' इति प्रतीतिसिद्धः अभावः न भवति। धूमाभावीयप्रतियोगितावतः धूमस्य संबन्धत्व-

विशिष्टकालिकसंबन्धेन विषयतासंबन्धेन वा कालज्ञानादौ सत्त्वात् ।

एतदुक्तं भवति - संयोगत्वविशिष्टसंयोगसंबन्धेन प्रतियोगिताविशिष्टस्य धूमस्य अभावः कालज्ञानादौ अस्ति । न तु संबन्धत्वविशिष्टसंबन्धेन । संबन्धत्वविशिष्टसंबन्धेन गगनाभावीयप्रतियोगिताविशिष्टाभावः भवितुमर्हति । तदीयसंबन्धत्वविशिष्टसंबन्धावच्छिन्नप्रतियोगितायाम् अवच्छेदिका गगनाभावीयप्रतियोगिता । तादृशसंबन्धावच्छिन्नप्रतियोगितानवच्छेदिका धूमाभावीयप्रतियोगिता । तन्निरूपकाभावः धूमत्वेन धूमाभावः । तस्य च विवक्षणीयसंयोगसंबन्धावच्छिन्नधूमनिष्ठव्याप्यतानिरूपितव्यापकताघटकयावत्संबन्धान्तर्गतसंयोगत्वावच्छिन्नसंयोगसंबन्धेन प्रतियोगिसामानाधिकरण्यं नास्ति । यावद्धेत्वधिकरणे अयोगोलके संयोगत्वावच्छिन्नसंयोगसंबन्धेन धूमरूपप्रतियोगिविरहात् । तथा चातिव्याप्त्यप्रसक्त्या साध्यतावच्छेदकसंबन्धेनेति व्यर्थमित्याशयः ।

संयोगत्वाद्यवच्छिन्नसंयोगादिसंबन्धेनेति [पृ.83] । यत्किञ्चित्संबन्धेन धूमादिमति धूमनिष्ठसंयोगत्वविशिष्टसंयोगसंबन्धावच्छिन्नधूमनिष्ठप्रतियोगिताकाभावस्य सत्त्वेऽपि संबन्धत्वरूपः यः व्यापकधर्मः तद्विशिष्टसंबन्धावच्छिन्नधूमनिष्ठप्रतियोगिताकाभावस्य असत्त्वादित्यर्थः । **साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यनिष्ठेति** [पृ.90] । संयोगसंबन्धेन धूमवति पर्वतादौ संयोगत्वविशिष्टसंयोगसंबन्धेन धूमस्य सत्त्वात् संयोगसंबन्धावच्छिन्नधूमनिष्ठव्याप्यतानिरूपिता धूमनिष्ठा व्यापकता संयोगत्वविशिष्टसंयोगसंबन्धावच्छिन्ना भवति । अतः संयोगत्वविशिष्टसंयोगसंबन्धः व्यापकताघटकसंबन्ध इति भावः ।

समाधत्ते - **संबन्धत्वेन संबन्धानाम्** [पृ.90] **इति**। संबन्धानां विशेषरूपेणैव अभावप्रतियोगितावच्छेदकत्वम्। 'संयोगेन नास्ति,' 'समवायेन नास्ति' इत्येव प्रतीतेः। न तु संबन्धत्वेन सामान्यरूपेण अभावप्रतियोगितावच्छेदकत्वम्; 'संबन्धेन घटो नास्ति' इत्यादिप्रतीतिविरहात्। तथा च संबन्धत्वविशिष्टसंबन्धस्य व्यापकताघटकत्वासंभवात् तत्संबन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वमादाय धूमाभावस्य लक्षणघटकत्वं दुर्वचम्। किन्तु पूर्वोक्तरीत्या समवायितया वाच्यत्वाभावस्यैव लक्षणघटकत्वात् तमादाय अतिव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं साध्यवत्तायां निवेशनीयमेवेति भावः। एवञ्च साध्यतावच्छेदकावच्छिन्न-साध्यतावच्छेदकसंबन्धावच्छिन्न - साध्यनिष्ठाधेयतानिरूपिताधिकरणतावन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वम् साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वम् इति सिद्धम्॥

गादाधरी

(१३) संबन्धसामान्येन यत्किञ्चित्संबन्धेन वा साध्यवत्तानिवेशे साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वनिवेशे च दोषकथनम्।

वस्तुतस्तु प्रतियोगिसामानाधिकरण्यशरीरे व्यापकतायाः स्वातन्त्र्येण निवेशस्य प्रतिक्षेप्यत्वात् 'ज्ञानवान् द्रव्यत्वात्' इत्यादौ अतिव्याप्तिरस्त्येव। **वस्तुतस्तु** संयोगसमवायादिसाधारणानुगतसंबन्धत्वस्य कथंचित् सुवचत्वेऽपि तेन रूपेण संयोगादीनां संबन्धतया भानस्य निर्युक्तिकतया व्यापकताशरीरे लाघवानुरोधात् साध्यप्रकारेण अधिकरणनिवेशे साध्यसंबन्धोऽपि विशिष्य संसर्गतया निवेश्यः। तथा च विशिष्य साध्यतावच्छेदकसंबन्धनिवेशनमावश्यकमिति ध्येयम्। यत्किंचित्संबन्धेन साध्यवत्ताया व्यापकताघटकत्वे तु- 'वह्निमान् धूमात्' इत्यादौ

विषयितासंबन्धेन साध्यं प्रति गुणत्वाद्यभावप्रतियोगिताया अपि व्यापकतावच्छेदकतया तादृशाभावस्य लक्षणघटकत्वे तस्य च पर्वतादौ प्रतियोगिसामानाधिकरण्यविरहात् असंभवो बोध्य इति साध्यतावच्छेदकसंबन्ध एव संसर्गतया विशिष्य निवेश्यः।

साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वनिवेशे सर्वस्यैव साध्यवन्निष्ठद्वित्वाद्यवच्छिन्नाभावप्रतियोगितया तादृशाभावाप्रतियोगिनोऽप्रसिद्धिरित्यतोऽवच्छेदकगर्भता। **तादृशाभावप्रतियोगितानवच्छेदकत्वं च** तादृशप्रतियोगितायां समानाधिकरणं सत् यदवच्छेदकं तदन्यत्वम्; अन्यथा **व्यतिरेकिप्रतियोगितामात्रस्यैव** व्यधिकरणधर्मतया साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया विरुद्धघटत्वपटत्वोभयाद्यवच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावस्यैव लक्षणघटकत्वेन व्यभिचारिण्यतिव्याप्तिप्रसङ्गात्।

विवरणम्

साध्यतावच्छेदकसंबन्धेन साध्यवत्त्वं न निवेश्यम्, किन्तु संबन्धसामान्येनैव इत्यत्रैव समाधानान्तरमाह - **वस्तुतस्तु इति** [पृ. 88]। प्रतियोगिसामानाधिकरण्यशरीरे व्यापकतायाः संबन्धघटकतया पृथङ्निवेशः पश्चात् निराकरिष्यते। साध्यतावच्छेदकसंबन्धेन स्वप्रतियोगिताविशिष्टस्य येन येन संबन्धेन व्यापकत्वं तदवच्छेदकप्रतियोगिताकयावदभावानां तेन तेन संबन्धेन प्रतियोगिसामानाधिकरण्यमिति सकृदेव व्यापकताया निवेश इति वक्ष्यते। अत्र साध्यतावच्छेदकसंबन्धेनेत्यनुक्तौ 'ज्ञानवान् द्रव्यत्वात्' इत्यादावपि अतिव्याप्तिरस्ति। संबन्धसामान्येन ज्ञानं प्रति विषयतासंबन्धेनैव ज्ञानस्य व्यापकतया तत्संबन्धावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकस्य हेतुसमानाधिकरणस्य घटत्वेन ज्ञानाभावस्य तेन विषयतासंबन्धेन घटान्तर्भावेण ज्ञानरूपप्रति-

योगिसामानाधिकरण्यसद्भावात् अतिव्याप्तिः। तद्वारणाय साध्यतावच्छेदकसंबन्धेनेति निवेशनीयम्। तथा सति समवाय-संबन्धेन ज्ञानं प्रति समवायसंबन्धेनापि ज्ञानस्य व्यापकतया तेन संबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः। संबन्धसामान्येन साध्यवत्त्वं निवेशयितुमेव अशक्यम् इत्याह—**वस्तुतस्तु** [पृ. 88] **इति**। साध्यव्यापकताशरीरे 'साध्यवान्' इति साध्यप्रकारेण अधिकरणस्य निवेशे साध्यस्य संबन्धोऽपि निवेशनीयः। स च संबन्धः संबन्धत्वेन सामान्यरूपेण निवेशयितुं न शक्यते। संबन्धत्वस्य दुर्वचत्वात्। विशिष्टबुद्धिनियामकत्वं संबन्धत्वमिति वा अखण्डोपाधिः संबन्धत्वमिति वा सुवचत्वेऽपि तेन रूपेण संयोगादीनां भानस्य निर्युक्तिकतया संयोगत्वादिना विशिष्यैव संबन्धो निवेशनीयः। तत्र यत्किंचित्संबन्धविशेषेण साध्यवत्तायाः निवेशे 'पर्वतो वह्निमान् धूमात्' इत्यादौ विषयिता-संबन्धेन साध्यवति ज्ञाने गुणत्वाभावीयप्रतियोगिताविशिष्टस्य गुणत्वस्य सत्त्वेन गुणत्वाभावीयप्रतियोगिताया अपि साध्यव्याप-कतावच्छेदकतया तन्निरूपकगुणत्वाभावस्यापि लक्षणघटकत्वेन तस्य हेत्वधिकरणपर्वतादौ प्रतियोगिसामानाधिकरण्यं गुणत्व-रूपप्रतियोगिविरहेण नास्तीत्यसंभवः स्यात्। तद्वारणाय साध्यता-वच्छेदकसंबन्ध एव विशिष्य निवेशनीय इति भावः।

ननु साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वमेव यावद-भावे विशेषणमस्तु। किं साध्यवन्निष्ठाभावप्रतियोगितान-वच्छेदकप्रतियोगिताकत्वनिवेशनेन इत्यत आह—**साध्यवन्निष्ठेति** [पृ. 89]। साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वरूपसाध्य-व्यापकप्रतियोगिकत्वनिवेशे अप्रसिद्धिः। वह्निमति पर्वतादौ वह्निघटोभयाभावस्य सत्त्वेन तत्प्रतियोगित्वस्यैव वह्नौ सत्त्वात् साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वस्य घटत्वेन वह्न्यभावा-

दावसंभवात् । अतः साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वनिवेशः ।

ननु तथा निवेशेऽपि 'धूमवान् वह्नेः इत्यादावतिव्याप्तिः । साध्यवन्नि-धूमवति पर्वतादौ वर्तमानः यः अभावः धूमाभावप्रतियोगित्वेन घटाभावः, तत्प्रतियोगितावच्छेदकमेव धूमाभावप्रतियोगित्वम् । एवं रीत्या सर्वासामपि व्यतिरेकिप्रतियोगितानां किंचिन्निष्ठाभावप्रतियोगिप्रतियोगितानां व्यधिकरणधर्मतया साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेन घटत्वपटत्वाभ्यां प्रमेयाभावीयप्रतियोगितैव साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदिका । प्रमेयसामान्याभावीयप्रतियोगित्वस्य केवलान्वयितया तेन रूपेण कस्याप्यभावस्य असंभवात् । तथा च विरुद्धघटत्वपटत्वाभ्यां प्रमेयसामान्याभावस्यैव लक्षणघटकतया तस्य प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिरित्यत आह-**तादृशाभावप्रतियोगितानवच्छेदकत्वं चेति** [पृ.89] । तथा च साध्यवन्निष्ठाभावप्रतियोगितायां समानाधिकरणं सत् यत् अवच्छेदकं तद्भिन्नत्वमेव व्यापकतावच्छेदकत्वम् । 'धूमवान् वह्नेः' इत्यादौ धूमवन्निष्ठाभावपदेन धूमाभावप्रतियोगित्वेन घटाभावस्य ग्रहणे तत्प्रतियोगितायां घटनिष्ठायां धूमाभावप्रतियोगित्वं व्यधिकरणं सदेव अवच्छेदकं भवति, न तु समानाधिकरणं सत् । अतः साध्यवन्निष्ठाभावपदेन घटाभावप्रतियोगित्वेन घटाभावो ग्राह्यः । तत्प्रतियोगितायां समानाधिकरणं सत् अवच्छेदकं घटाभावप्रतियोगित्वम् । तदन्यत् धूमाभावप्रतियोगित्वम् । तन्निरूपकः अभावः धूमत्वेन धूमाभावोऽपि । तस्य प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरिति भावः ।

व्यतिरेकिप्रतियोगितामात्रस्यैवेति [पृ.89] । अत्यन्ताभावप्रतियोगिनी प्रतियोगिता व्यतिरेकिप्रतियोगिता । यथा

धूमाभावप्रतियोगिता घटनिष्ठात्यन्ताभावप्रतियोगिनी । घटनिष्ठः यः अत्यन्ताभावः धूमाभावीयप्रतियोगितायाः अभावः, तस्याः धूमनिष्ठत्वात् । तत्प्रतियोगिनी धूमाभावप्रतियोगिता । अत्यन्ताभावाप्रतियोगिनी प्रतियोगिता केवलान्वयिनी प्रतियोगिता । यथा घटत्वपटत्वाभ्यां प्रमेयसामान्याभावीयप्रतियोगिता । सा हि सर्वेषु प्रमेयेषु वर्तते ।

गादाधरी

(१४) साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वस्थाने भेदघटितसाध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकत्वं निवेशयितुं न शक्यम् इति निरुपणम् ।

यत्तु — साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकत्वनिवेशेनैव **सर्वसामञ्जस्ये** निरुक्तव्यापकतावच्छेदकप्रतियोगिताकत्वनिवेशनमफलम्; 'वह्निमान् धूमात्' इत्यादौ घटत्वादिना वह्न्यभावप्रतियोगिनां वह्न्यादीनां चालिनीन्यायेन साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसम्भवात्, व्यभिचारिणि **व्यभिचारनिरूपकाधिकरणभेदाभावमादायैव** अतिव्याप्तिवारणसंभवाच्च ।

न च - साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वापेक्षया तादृशविशेषणस्य न लघुशरीरतेति-वाच्यम् ।

व्यापकतावच्छेदकताघटकाभावप्रतियोगितावच्छेदकतायां स्वरूपसंन्धावच्छिन्नत्वस्य अधिकस्य निवेशनीयतया **एतन्मते तदनिवेशेन** लाघवात् । **तन्मते तदनिवेशे** सर्वासामेव प्रतियोगितानां साध्यवन्निष्ठो यो विषयितादिसंबन्धेन **स्वावच्छिन्नस्य** अभावः तत्प्रतियोगितावच्छेदकतया व्यापकतावच्छेदकप्रतियोगि-

तायाः एव अप्रसिद्ध्यापत्तेः। भेदप्रतियोगितावच्छेदकतायां व्यापकताघटकसंबन्धावच्छिन्नत्वस्य एतन्मते निवेशवत् भवन्मतेऽपि अभावप्रतियोगितायां तन्निवेशस्य आवश्यकतया तदंशे साम्यात् - इति;

तदसत्। यतः अनवच्छेदकप्रतियोगिकत्वम् अनवच्छेदकनिष्ठप्रतियोगितानिरूपकत्वम्। प्रतियोगितायां तन्निष्ठत्वं च स्वरूपसंबन्धेन वाच्यम्। अन्यथा 'वह्निमान् धूमात्' इत्यादावपि विषयतासंबन्धेन साध्यव्यापके 'प्रमेयम्' इत्याकारकविश्वविषयकज्ञाने विषयितासंबन्धेन जलत्वाद्यभावप्रतियोगितायाः वृत्तेः तादृशाभावस्य लक्षणघटकत्वापातात्।

विषयिताया वृत्त्यनियामकतया एतद्दोषानवकाश इति चेत्, एवमपि 'एतद्वह्निमान् एतद्धूमात्', 'तद्रूपवान् तद्रसात्' इत्यादौ जलत्वाद्यभावप्रतियोगितायाः कालिकसंबन्धेन साध्यव्यापकसाध्यतत्समानाधिकरणकर्मादौ वर्तमानतया लक्षणघटकत्वापातः। तथा च व्यापकनिरूपितवृत्तौ स्वरूपसंबन्धावच्छिन्नत्वनिवेशस्य एतन्मतेऽप्यावश्यकतया न लाघवावकाशः, विपरीतमेव गौरवमाधेयत्वांशनिवेशाधिक्येनेति।

न च-व्यापकनिष्ठप्रतियोगिताकत्वेनाभावो न निवेशनीयः, येनोक्तगौरवं स्यात्। अपि तु अनुयोगितासंबन्धेन व्यापकविशेषित एव। तत्र च व्यापकतावच्छेदकप्रतियोगिताकत्वेन अभावनिवेशापेक्षया लाघवम् अक्षतमेवेति-वाच्यम्।

प्रतियोगिविशेषणतापन्नधर्मावच्छिन्ननिरूपितत्वानवच्छिन्नानुयोगितायाः अभावांशे प्रतियोगिसंबन्धतया भाने पटादिमति घटत्वावच्छिन्नाभावविषयिण्या 'द्रव्यं नास्ति' इत्याकारकप्रतीतेरापत्तेः। तदवच्छिन्ननिरूपितानुयोगिताया एव संसर्गतया भानो-

पगमात् । व्यापकत्वावच्छिन्नविशेषिताभावस्य लक्षणे निवेशे व्यापकत्वावच्छिन्ननिरूपितानुयोगितायाः संबन्धविधया निवेशनीयतया सद्धेतौ हेतुसमानाधिकरणसाध्यव्यापकत्वावच्छिन्नसाध्याभावस्य संबन्धविशेषावच्छिन्नप्रतियोगिताकस्य कथंचित् प्रसिद्ध्या लक्षणसमन्वयेऽपि व्यभिचारिण्यतिव्याप्तिः । व्यभिचारनिरूपकाधिकरणेऽपि **कस्यचित्** साध्यव्यापकस्य वृत्तेः, व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वानुपपत्तेश्च ।

एवम् अनवच्छेदकपदेन अवच्छेदकतापर्याप्त्यनधिकरणत्वम् अवश्यं वाच्यम् । **अन्यथा** द्रव्यत्वाभावादेरपि वह्निमन्निष्ठपूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्ववद्भेदप्रतियोगितावच्छेदकद्रव्यत्वप्रतियोगिकत्वात् लक्षणाघटकत्वापत्तेः । **तथा च** घटत्वावच्छिन्नघटाभावादेरपि लक्षणघटकत्वापत्तिः । वह्निमन्निष्ठभेदप्रतियोगितावच्छेदकताया **घटत्वविशिष्टपर्याप्ततया** शुद्धघटस्य तत्पर्याप्त्यनधिकरणत्वात् ।

विवरणम्

साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वस्थाने भेदघटितसाध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकत्वं निवेशयतां मतमाह - **यत्तु इत्यादिना** [पृ.92] । **तथा च** यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकाः यावन्तोऽभावाः स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसमानाधिकरणाः तत्त्वमिति लक्षणम् । 'वह्निमान् धूमात्' इत्यादौ वह्निमन्निष्ठः भेदः घटवद्भेदः । तत्प्रतियोगितावच्छेदकः घटः । तत्प्रतियोगितानवच्छेदकः वह्निः । तत्प्रतियोगिकाः यावन्तोऽभावाः 'घटत्वेन वह्न्यभावः', पटत्वेन वह्न्यभावः' इत्यादयः । तेषां प्रतियोगिसामानाधिकरण्यमस्तीति लक्षणसमन्वयः ।

न च साध्यवति पर्वते महानसीयवह्निमद्भेदस्य सत्त्वात् तत्प्रतियोगितावच्छेदकः महानसीयवह्निः। एवं साध्यवति महानसे पर्वतीयवह्निमद्भेदस्य सत्त्वात् तत्प्रतियोगितावच्छेदकः पर्वतीयवह्निः इत्येवं सर्वेषां वह्नीनां साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वात् तादृशभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वं घटत्वादिना वह्न्यभावस्य नास्तीति कथमसौ लक्षणघटक इति वाच्यम्। तर्हि घटत्वादिना द्रव्यत्वाभावमादाय लक्षणसमन्वयसंभवात्। वह्निमति पर्वतादौ द्रव्यत्ववद्भेदस्य असत्त्वात् साध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकं द्रव्यत्वम्। तत्प्रतियोगिकत्वं घटत्वेन द्रव्यत्वाभावेऽस्तीति तस्य लक्षणघटकता।

'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि धूमस्य चालिनीन्यायेन साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेन धूमत्वेन धूमाभावस्य साध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वविरहेण लक्षणाघटकत्वेऽपि अयोगोलकान्यत्वाभावस्य लक्षणघटकतया तमादाय अतिव्याप्तिः वारणीया। तथा हि - साध्यधूमवति पर्वतादौ विद्यमानः भेदः न अयोगोलकान्यत्ववद्भेदः। पर्वतादौ अयोगोलकान्यत्वसत्त्वात्। किन्तु घटादिमद्भेदः। तत्प्रतियोगितावच्छेदकं घटादिकम्। तत्प्रतियोगितानवच्छेदकं अयोगोलकान्यत्वम्। तत्प्रतियोगिकः अभावः अयोगोलकान्यत्वाभावः। तस्य यावद्धेत्वधिकरणायोगोलकान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति। अयोगोलकान्यत्वरूपप्रतियोगिविरहात्। अतो नातिव्याप्तिः।

न च अस्मिन्पक्षे लाघवं न दृश्यत इति वाच्यम्। अत्यन्ताभावघटितव्यापकतावच्छेदकत्वनिवेशपक्षे व्यापकताघटकाभावप्रतियोगितावच्छेदकतायां स्वरूपसंबन्धावच्छिन्नत्वं निवेशनीयम्। साध्यवन्निष्ठात्यन्ताभावप्रतियोगितानिरूपितस्वरूपसंब-

न्धावच्छिन्नावच्छेदकताशून्यप्रतियोगिताकत्वं साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वम् इति यावत् । तत्र प्रतियोगितावच्छेदकतायां स्वरूपसंबन्धावच्छिन्नत्वानिवेशे व्यापकतावच्छेदकप्रतियोगितायाः अप्रसिद्धिः । तथा हि - 'वन्हिमान् धूमात्' इत्यादौ साध्यवति पर्वतादौ यः अत्यन्ताभावः विषयितासंबन्धेन वह्न्यभावीयप्रतियोगिताविशिष्टस्य ज्ञानस्य संयोगसंबन्धेन अभावः, एवं विषयितासंबन्धेन द्रव्यत्वाभावीयप्रतियोगिताविशिष्टस्य ज्ञानस्य समवायसंबन्धेन अभावः तदीयप्रतियोगितायां ज्ञाननिष्ठायां विषयितासंबन्धेन अवच्छेदकत्वमेव वह्न्यभावीयप्रतियोगितायां द्रव्यत्वाभावीयप्रतियोगितायां च अस्तीति अनवच्छेदकप्रतियोगितायाः अप्रसिद्ध्या असंभवः स्यात् । अवच्छेदकतायां स्वरूपसंबन्धावच्छिन्नत्वनिवेशे तु साध्यवति पर्वतादौ स्वरूपसंबन्धेन द्रव्यत्वाभावीयप्रतियोगिताविशिष्टस्य द्रव्यत्वस्य समवायसंबन्धेन अभावः नास्ति । एवं स्वरूपसंबन्धेन वह्न्यभावीयप्रतियोगिताविशिष्टस्य वह्नेः संयोगसंबन्धेन अभावः नास्ति । किन्तु स्वरूपसंबन्धेन घटाभावीयप्रतियोगिताविशिष्टस्य घटादेः अभाव एव वर्तते । तन्निरूपितघटादिनिष्ठप्रतियोगितायां स्वरूपसंबन्धेन अवच्छेदकं घटाभावीयप्रतियोगिता । अनवच्छेदकं द्रव्यत्वाभावीयप्रतियोगिता वह्न्यभावीयप्रतियोगिता च । तन्निरूपकोऽभावः घटत्वेन द्रव्यत्वाभावः, घटत्वेन वह्न्यभावो वा । तमादाय समन्वयात् न अप्रसिद्धिः ।

किञ्च अत्यन्ताभावघटितव्यापकतानिवेशे साध्यवन्निष्ठात्यन्ताभावप्रतियोगितायां व्यापकताघटकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा साध्यवति पर्वतादौ द्रव्यत्वाभावीयप्रतियोगिताविशिष्टस्य द्रव्यत्वस्य संयोगसंबन्धेनाभावमादाय तत्प्रतियोगितावच्छेदकत्वस्यैव द्रव्यत्वाभावीयप्रतियोगितायां सत्त्वेन व्यापकतावच्छेदकप्रतियोगितायाः अप्रसिद्ध्यापत्तेः ।

व्यापकताघटकसंबन्धावच्छिन्नत्वनिवेशे तु येन संबन्धेन व्यापकत्वं संभवति, तत्संबन्धावच्छिन्नत्वमेव प्रतियोगितायां निवेशनीयम् इति लभ्यते। द्रव्यत्वाभावीयप्रतियोगिताविशिष्टस्य द्रव्यत्वस्य समवायसंबन्धेनैव वह्निव्यापकत्वं संभवति। अतः समवाय-संबन्धः व्यापकताघटकसंबन्धः। तदवच्छिन्नप्रतियोगितावच्छेदकत्वं द्रव्यत्वाभावीयप्रतियोगितायां नास्ति। साध्यवति पर्वतादौ द्रव्यत्वाभावीयप्रतियोगिताविशिष्टस्य द्रव्यत्वस्य समवायसंबन्धेन अभावासत्त्वात्। तथा च प्रतियोगितायां व्यापकताघटकसंबन्धा-वच्छिन्नत्वं प्रतियोगितावच्छेदकतायां स्वरूपसंबन्धावच्छिन्नत्वं च निवेशनीयमिति गौरवम्। भेदघटितव्यापकतानिवेशपक्षे यद्यपि भेदप्रतियोगितावच्छेदकतायां व्यापकताघटकसंबन्धावच्छिन्नत्वं निवेशनीयम्, अन्यथा साध्यवन्निष्ठः भेदः इत्यनेन विषयितासंबन्धेन द्रव्यत्ववज्ज्ञानभेदं गृहीत्वा तत्प्रतियोगितावच्छेदकत्वस्यैव द्रव्यत्वे सत्त्वेन साध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकस्य प्रति-योगिनः अप्रसिद्ध्या असंभवापत्तेः। तथापि भेदप्रतियोगितायां संबन्धविशेषावच्छिन्नत्वं न निवेशनीयम्। भेदत्वस्य अखण्डो-पाधिरूपत्वेन तत्र संबन्धविशेषस्य अनावश्यकत्वात्। तथा च साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठात्यन्ताभावीयव्यापकता-घटकसंबन्धावच्छिन्नप्रतियोगितानिरूपितस्वरूपसंबन्धावच्छिन्ना-वच्छेदकताशून्यप्रतियोगिताकत्वम् अत्यन्ताभावघटितव्यापकता-वच्छेदकप्रतियोगिताकत्वम्। तत्र स्थलद्वये संबन्धनिवेशेन गौरवम्। साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगिता-निरूपितव्यापकताघटकसंबन्धावच्छिन्नावच्छेदकताशून्यप्रतियोगि-कत्वं अन्योन्याभावघटितसाध्यव्यापकप्रतियोगिकत्वम्। तत्र एकत्रैव संबन्धनिवेशेन लाघवमिति 'यत्तु' काराणामाशयः।

साध्यतावच्छेदकावच्छिन्नेति [पृ.92]। साध्यतावच्छेद-कावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्व-

रूपस्य साध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकत्वस्य निवेशनैवेत्यर्थः। **सर्वसामञ्जस्ये इति** [पृ. 92]। सर्वदोषवारणसंभवे इत्यर्थः। **निरुक्तेति** [पृ. 92]। साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वनिवेशनम् इत्यर्थः। **व्यभिचारनिरूपकेति** [पृ. 92]। 'धूमवान् वह्नेः' इत्यत्र व्यभिचारनिरूपकाधिकरणम् अयोगोलकम्। तद्भेदाभावः अयोगोलकान्यत्वाभावः। **एतन्मते इति** [पृ. 92]। भेदघटितव्यापकतानिवेशिमते इत्यर्थः। **तदनिवेशनेति** [पृ. 92]। स्वरूपसंबन्धावच्छिन्नत्वानिवेशनेत्यर्थः। **तन्मते तदनिवेशे** [पृ. 92] इति। अत्यन्ताभावघटितव्यापकतानिवेशिनां मते प्रतियोगितावच्छेदकतायां स्वरूपसंबन्धावच्छिन्नत्वानिवेशेत्यर्थः। **स्वावच्छिन्नस्य** [पृ. 92] - प्रतियोगिताविशिष्टस्य।

तन्मतं खण्डयति - **तदसदित्यादिना** [पृ. 93]। साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वं नाम तादृशानवच्छेदकनिष्ठप्रतियोगितानिरूपकत्वम्। तत्र अनवच्छेदकनिष्ठत्वं प्रतियोगितायां स्वरूपसंबन्धेन वाच्यम्। अन्यथा 'वह्निमान् धूमात्' इत्यादौ द्रव्यत्वं यथा वह्निव्यापकम्, तथा 'प्रमेयम्' इत्याकारकं विश्वविषयकज्ञानं विषयतासंबन्धेन व्यापकम्। यत्र यत्र वह्निः वर्तते पर्वतमहानसादौ तत्र सर्वत्र 'प्रमेयम्' इत्याकारकज्ञानस्य विषयतासंबन्धेन सत्त्वात्। अतः साध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकं 'प्रमेयम्' इत्याकारकज्ञानम्। तन्निष्ठा प्रतियोगिता जलत्वाभावीयप्रतियोगिता तस्या अपि प्रमेयत्वेन 'प्रमेयम्' इति ज्ञाने विषयत्वात् तादृशज्ञाने विषयितासंबन्धेन जलत्वाभावीयप्रतियोगिता वर्तते। तथा च अनवच्छेदकनिष्ठप्रतियोगितानिरूपकः अभावः जलत्वत्वेन जलत्वाभावः। स च हेतुसमानाधिकरणः। हेत्वधिकरणे पर्वतादौ सत्त्वात्। तस्य यावदन्तर्गतस्य स्वविशिष्टयावद्धेत्वधिकरण-

पर्वताद्यन्तर्भावेण जलत्वरूपप्रतियोगिविरहात् प्रतियोगिसामानाधिकरण्यं नास्तीत्यव्याप्तिः ।

न च - विषयितासंबन्धस्य वृत्त्यनियामकतया तत्संबन्धावच्छिन्नवृत्तित्वं जलत्वाभावीयप्रतियोगितायां नास्तीति अनवच्छेदकनिष्ठप्रतियोगिताकाभावपदेन जलत्वाभावः न ग्रहीतुं शक्यत इति - वाच्यम् । एवमपि एकव्यक्तिसाध्यके 'एतद्वह्निमान् एतद्धूमात्', 'एतद्रूपवान् एतद्रसात्' इत्यादिसद्धेतौ एतद्वन्हिमन्निष्ठभेदप्रतियोगितानवच्छेदकः एतद्वह्निः तन्निष्ठा प्रतियोगिता जलत्वाभावीयप्रतियोगितापि । तस्याः कालिकसंबन्धेन एतद्वह्निनिष्ठत्वात् । तन्निरूपकः अभावः जलत्वाभावोऽपि । तस्य प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिः ।

जन्यमात्रं कालोपाधिः इति मते एतद्वन्हिनिष्ठत्वं कालिकसंबन्धेन जलत्वाभावीयप्रतियोगितायामस्तीति पूर्वोक्तदोषसंभवेऽपि क्रियामात्रं कालोपाधिरिति मते न दोष इति यद्यालोच्यते, तदापि पूर्वोक्तस्थले एव एतद्वह्निव्यापकः एतद्वह्निसमानाधिकरणक्रियापि आधारतासंबन्धेन भवति । कालिकसंबन्धेन तन्निष्ठा प्रतियोगिता जलत्वाभावीयप्रतियोगिता । तन्निरूपकाभावस्य जलत्वाभावस्य प्रतियोगिसामानाधिकरण्यं नास्तीति अव्याप्तिः । तद्वारणाय अनवच्छेदकनिष्ठत्वं स्वरूपसंबन्धेनेति वक्तव्यम् । 'प्रमेयम्' इत्याकारकज्ञाने जलत्वाभावीयप्रतियोगिता विषयितासंबन्धेन वर्तते । न तु स्वरूपसंबन्धेन । तादृशज्ञाने स्वरूपसंबन्धेन विद्यमाना प्रतियोगिता तु घटत्वरूपव्यधिकरणधर्मावच्छिन्ना तादृशज्ञाननिष्ठा प्रतियोगिता तन्निरूपकः अभावः 'घटत्वेन प्रमेयम् इत्याकारकज्ञानं नास्ति' इति प्रतीतिसिद्धोऽभावः । तस्य प्रतियोगिसामानाधिकरण्यमस्तीति नाव्याप्तिः । एवं 'एतद्वह्निमान् एतद्धूमात्' इत्यत्र साध्यव्यापके एतद्वह्नौ

एतद्वह्निसमानाधिकरणक्रियायां च जलत्वाभावीयप्रतियोगितायाः कालिकसंबन्धेन वृत्तित्वेऽपि स्वरूपसंबन्धेन वृत्तित्वं नास्ति । अतः एतद्वह्नौ स्वरूपसंबन्धेन वर्तमाना या प्रतियोगिता एतद्वन्ह्यभावीय-प्रतियोगिता तन्निरूपकः हेतुसमानाधिकरणः अभावः घटत्वेन एतद्वह्न्यभावः । तस्य प्रतियोगिसामानाधिकरण्यमस्ति । एवं स्वरूपसंबन्धेन एतद्वन्हिसमानाधिकरणक्रियानिष्ठप्रतियोगिताका-भावः घटत्वेन तादृशक्रियाभावः । तस्य प्रतियोगिसामानाधिकरण्य-मस्ति इति नाव्याप्तिः । एवञ्च साध्यतावच्छेदकावच्छिन्नसाध्यवन्नि-ष्ठभेदप्रतियोगितानवच्छेदकनिरूपित - स्वरूपसंबन्धावच्छिन्नवृत्ति - तावत् प्रतियोगितानिरूपकत्वं 'यत्तु' कारमते निवेशनीयम् । तत्र च भेदप्रतियोगितावच्छेदकतायां व्यापकताघटकसंबन्धावच्छिन्नत्वस्य पूर्वं निवेशितत्वात् प्रतियोगितायां च स्वरूपसंबन्धावच्छिन्नाधे-यत्वनिवेशात् संबन्धद्वयनिवेशप्रयुक्तगौरवं समानमेव । प्रतियोगि-तायाम् आधेयत्वनिवेशनं भेदघटितव्यापकताकल्पेऽधिकम् । अत्यन्ताभावघटितव्यापकतावच्छेदकत्वनिवेशपक्षे प्रतियोगितायां साध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वमेव निवेशनी-यम् । न तु अनवच्छेदकनिष्ठत्वम् इति लाघवम् । अतः 'यत्तु'-कारमतम् अयुक्तमिति भावः ।

यत्किञ्चिद्विषयकत्वे साध्यव्यापकत्वं ज्ञानस्य न संभवतीति आलोच्य **विश्वविषयके** [पृ. 93] **त्युक्तम्** । **साध्यव्यापकसाध्येति** [पृ.93] । साध्यव्यापके साध्ये, साध्यव्यापके साध्यसमानाधि-करणकर्मादौ चेत्यर्थः ।

न च व्यापकनिष्ठेत्यादि [पृ.93] । साध्यव्यापकनिष्ठ-प्रतियोगिताकः अभावः इति न निवेश्यते, किन्तु अनुयोगिता-संबन्धेन साध्यव्यापकविशिष्टः अभाव इति निवेश्यते । तथा च यत्समानाधिकरणाः अनुयोगितासंबन्धेन साध्यवन्निष्ठभेदप्रति-

योगितानवच्छेदकविशिष्टाः यावन्तोऽभावाः प्रतियोगिसमानाधिकरणाः तत्त्वमिति लक्षणम्। 'वह्निमान् धूमात्' इत्यादौ वह्निमन्निष्ठभेदप्रतियोगितानवच्छेदकं द्रव्यत्वम्। अनुयोगितासंबन्धेन तद्विशिष्टोऽभावः घटत्वेन द्रव्यत्वाभावः। द्रव्यत्वाभावः द्रव्यत्वस्य अनुयोगी भवति। अतः अनुयोगितासंबन्धेन द्रव्यत्वविशिष्टः घटत्वेन द्रव्यत्वाभावः। तस्य प्रतियोगिसामानाधिकरण्यमस्तीति लक्षणसमन्वयः। 'धूमवान् वह्नेः' इत्यादौ अयोगोलकान्यत्वाभावमादाय अतिव्याप्तिः वारणीया। तथा च अत्यन्ताभावघटितव्यापकतानिवेशपक्षे साध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वेन अभावो निवेशनीयः। तत्र प्रतियोगितात्वेन प्रतियोगितानिवेशात् गौरवम्। भेदघटितव्यापकतापक्षे तु साध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकविशिष्टत्वेन अभावो निवेशनीयः। तच्छरीरे प्रतियोगितात्वेन प्रतियोगितायां अनिवेशात् लाघवम्।

न च - अत्यन्ताभावनिवेशकल्पेऽपि प्रतियोगितात्वेन प्रतियोगिताम् अनिवेश्य साध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकं यत् निरूपकतासंबन्धेन तद्विशिष्टत्वेनैव अभावो निवेशनीयः। तथा च न गौरवम् इति - वाच्यम्।

एवमपि व्यापकताशरीरप्रविष्टप्रतियोगितायां व्यापकताघटकसंबन्धावच्छिन्नत्वस्य च प्रतियोगितावच्छेदकतायां स्वरूपसंबन्धावच्छिन्नत्वस्य च निवेशनीयतया गौरवम्। भेदघटितकल्पे तु भेदप्रतियोगितावच्छेदकतायां व्यापकताघटकसंबन्धावच्छिन्नत्वनिवेशेऽपि अनवच्छेदकनिष्ठत्वेन प्रतियोगितायाः अनिवेशात् स्वरूपसंबन्धावच्छिन्नत्वानिवेशप्रयुक्तं लाघवमस्तीति शङ्काग्रन्थस्य तात्पर्यम्।

येनोक्तगौरवमिति [पृ.93]। अनवच्छेदकनिष्ठत्वे स्वरूपसंबन्धावच्छिन्नत्वनिवेशप्रयुक्तं गौरवमित्यर्थः।

समाधत्ते - **प्रतियोगिविशेषणतापन्नेत्यादिना** [पृ. 93]। अभावस्य प्रतियोगिनश्च मध्ये प्रतियोगिविशेषणतापन्नधर्मावच्छिन्ननिरूपितत्वविशिष्टानुयोगितैव संबन्धतया भासते, न तु तादृशनिरूपितत्वाविशेषितानुयोगिता। तथा सति पटवति भूतले घटत्वावच्छिन्ननिरूपितानुयोगितासंबन्धेन घटरूपद्रव्यविशिष्टस्य अभावस्य सत्त्वात् 'द्रव्यं नास्ति' इति प्रतीत्यापत्तेः। विषयस्याबाधात्। प्रतियोगिविशेषणतापन्नधर्मावच्छिन्ननिरूपितत्वविशिष्टानुयोगितैव संबन्ध इति स्वीकारे तु 'द्रव्यं नास्ति' इत्यत्र प्रतियोगिविशेषणतापन्नधर्मः द्रव्यत्वम्। तदवच्छिन्ननिरूपितानुयोगितासंबन्धेन द्रव्यविशिष्टः द्रव्यसामान्याभाव एव तादृशप्रतीतिविषयः। स तु पटवति भूतले नास्तीति न तादृशप्रतीत्यापत्तिः। प्रकृते साध्यव्यापकविशिष्टः अभाव इति निवेशे प्रतियोगिव्यापकः प्रतियोगिविशेषणतापन्नधर्मः साध्यव्यापकत्वम्। तदवच्छिन्ननिरूपितानुयोगितासंबन्धेन व्यापकविशिष्टः अभावः 'साध्यव्यापकं नास्ति' इति प्रतीतिसिद्धः अभाव एव लक्षणे निवेशनीयः स्यात्। तथा सति सद्धेतौ 'वह्निमान् धूमात्' इत्यादौ 'साध्यव्यापकं नास्ती'ति प्रतीतिसिद्धः हेतुसमानाधिकरणः अभावः अप्रसिद्धः स्यात्। हेत्वधिकरणे पर्वतादौ साध्यव्यापकस्य द्रव्यत्वादेः सत्त्वात्। यदि तु साध्यव्यापकस्य द्रव्यत्वादेः संयोगसंबन्धेनाभावः हेतुसमानाधिकरणः भवतीति नाप्रसिद्धिरित्युच्यते, अथ वा साध्यव्यापकस्य द्रव्यत्वादेः तादात्म्यसंबन्धावच्छिन्नाभावस्य हेत्वधिकरणपर्वतादिवृत्तितया नाप्रसिद्धिरित्युच्यते, तदा 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि अतिव्याप्तिः। तत्रापि संबन्धविशेषावच्छिन्नप्रतियोगिताकस्य साध्यव्यापकत्वावच्छिन्नाभावस्य हेत्वधिकरणायोगोलकान्तर्भावेण प्रतियोगिसामानाधिकरण्यसत्त्वात्। अयोगोलके साध्यव्यापकस्य भेदादेः सत्त्वात्।

किञ्च व्यधिकरणधर्मावच्छिन्नाभावस्य घटत्वादिना वह्न्याद्यभावस्य समवायितया वाच्यत्वाभावस्य च लक्षणघटकत्वं न स्यात्। तस्य साध्यव्यापकत्वावच्छिन्ननिरूपितानुयोगितासंबन्धेन व्यापकविशिष्टत्वाभावात् व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वाभावे प्रतियोग्यवृत्तिश्चेति ग्रन्थानुत्थितिः स्यात् इति भावः। **अभावांशे प्रतियोगिसंबन्धतया** [पृ.93] इति। अभावानुयोगिकप्रतियोगिप्रतियोगिकसंबन्धतया इत्यर्थः। **तदवच्छिन्नेति** [पृ.93]। प्रतियोगिविशेषणतापन्नधर्मावच्छिन्नेत्यर्थः। **कस्यचिदिति** [पृ.94]। भेदादेरित्यर्थः। भेदस्यापि धूमव्यापकत्वात्।

किञ्चिदवच्छिन्नप्रतियोगिताकत्वसंबन्धेन व्यापकविशिष्टः अभाव एव निवेश्यते, न तु व्यापकत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन व्यापकविशिष्टोऽभावः इत्युक्तावपि दोषमाह - **एवमनवच्छेदकपदेनेति** [पृ.94]। भेदघटितव्यापकप्रतियोगिकत्वनिवेशपक्षे साध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकपदेन साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वं विवक्षणीयम्। अन्यथा सद्धेतौ तादृशभेदप्रतियोगितानवच्छेदकस्य अप्रसिद्ध्यापत्तेः।

तथ हि - साध्यवन्निष्ठः वह्निमन्निष्ठः यः भेदः पूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्ववद्भेदः। तत्प्रतियोगितावच्छेदकं पूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्वम्। विशिष्टशुद्धयोरनतिरेकात् शुद्धद्रव्यत्वमपि प्रतियोगितावच्छेदकम्। तथा च साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकद्रव्यत्वादिप्रतियोगिकत्वमेव घटत्वेन द्रव्यत्वाभावादेः वर्तते। न तु तादृशभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वमिति साध्यव्यापकप्रतियोगिकाभावाप्रसिद्धिः। पर्याप्तिनिवेशे तु साध्यवन्निष्ठः यः पूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्ववद्भेदः तत्प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं पूर्वक्षणवृत्तित्वावच्छिन्नं द्रव्यत्वम्।

तत्पर्याप्त्यनधिकरणं शुद्धद्रव्यत्वमिति तत्प्रतियोगिकस्य घटत्वेन द्रव्यत्वाभावस्य लक्षणघटकत्वोपपत्तिः । तथा च पर्याप्तिनिवेशे 'वन्हिमान् धूमात्' इत्यादौ घटत्वेन घटाभावस्यापि लक्षणघटकत्वापत्तिः। वन्हिमन्निष्ठो यो भेदः घटत्वविशिष्टघटवद्भेदः । तत्प्रतियोगितावच्छेदकत्वं घटत्वविशिष्टघटे पर्याप्तम्। अतः तत्प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं घटत्वविशिष्टघटः। पर्याप्त्यनधिकरणं शुद्धघटः । तत्प्रतियोगिकत्वं घटत्वेन घटाभावे वर्तते । यावदन्तर्गतस्य तस्य हेत्वधिकरणपर्वतान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति इति लक्षणस्य असंभव इति भावः ।

अन्यथेति [पृ.94] । पर्याप्त्यनिवेशे इत्यर्थः **तथाचेति** [पृ.94] । पर्याप्तिनिवेशे इत्यर्थः । **घटत्वविशिष्टपर्याप्ततया** [पृ.94] **इति** । अत्रेदं चिन्त्यम् - पूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्वम् शुद्धद्रव्यत्वमिति द्रव्यत्वे भेदः वक्तुं शक्यते । द्रव्यत्वात् पृथग्भूतत्वात् विशेषणस्य पूर्वक्षणवृत्तित्वस्य । घटत्वविशिष्टघटः शुद्धघट इति कथं विवेकः । घटत्वं विहाय शुद्धघटस्य असंभवादिति ।

न्यायरत्नकारास्तु - घटत्वपटोभयत्वावच्छेदेन प्रतियोगितावच्छेदकतायाः पर्याप्तिः, घटत्वावच्छेदेन पर्याप्त्यनधिकरणत्वम् इति वदन्ति ।

गादाधरी

(१५) कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावानां केषांचिन्मतेन लक्षणघटकत्वोपपादनम् ॥

अथ निरुक्तव्यापकतावच्छेदकताया निवेशे कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावानां लक्षणघटकत्वानुपपत्तिः । **कपिसंयोगाभावादिनिष्ठतत्प्रतियोगितानां साध्य-**

वह्निष्ठकपिसंयोगाद्यात्मकाभावप्रतियोगित्वावच्छेदकत्वाद् इत्यग्रिमग्रन्थविरोधः ।

न च - व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणसत्त्वात् साध्यवह्निष्ठकपिसंयोगाद्यात्मकाभावस्य न व्यापकतालक्षणघटकता इति - वाच्यम् । प्रकृतव्यापकतायां तादृशविशेषणप्रवेशस्य निष्प्रयोजनकत्वात् ।

अत्र केचित् - व्यापकतालक्षणे अभावे प्रतियोगिवैयधिकरण्यनिवेशनमावश्यकम् । अन्यथा अभावे संबन्धसामान्येन साध्यवन्निष्ठत्वनिवेशे 'कालपरिमाणवान् द्रव्यत्वात्' इत्यादौ **व्यतिरेकितावच्छेदकप्रतियोगितामात्रस्यैव** कालिकसंबन्धेन साध्यवद्वृत्तिः यः **स्वावच्छिन्नाभावः** तत्प्रतियोगितावच्छेदकतया वाच्यत्वादिनिष्ठप्रतियोगिताया एव व्यापकतावच्छेदकतया अतिव्याप्त्यापत्तेः । दैशिकविशेषणतासंबन्धेन तन्निष्ठत्वनिवेशे भावस्य तेन संबन्धेन वृत्तेरप्रामाणिकतया 'वह्निमान् धूमात्' इत्यादौ पर्वतत्वाद्यभावनिष्ठप्रतियोगिताया अपि व्यापकतावच्छेदकतापत्त्या पर्वतत्वाद्यात्मकाभावस्यापि लक्षणघटकत्वापातात् । हेतुसामानाधिकरण्यघटकाभावीयवृत्तावपि **तादृशसंबन्धावच्छिन्नत्वनिवेशे** नानास्थाने तादृशसंबन्धनिवेशेन प्रतियोगितानवच्छेदकत्वमित्यत्र च **व्यधिकरणधर्मावच्छिन्ना**भावीयप्रतियोगितावच्छेदकतावारणाय **सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वनिवेशेन च गौरवात्** अभावे प्रतियोगिवैयधिकरण्यनिवेशनमेवोचितम् । व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणतयैव तमादाय दोषासंभवात् । एतन्मते अवच्छेदकतायां सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्य अनिवेशात् अभावीयवृत्तौ संबन्धभेदानिवेशाच्च लाघवम् ।

प्रतियोगिवैयधिकरण्यं च न प्रतियोगिसमानाधिकरण-भिन्नत्वम्। तथा सति तद्वह्निसंयोगाद्यभावस्य प्रतियोगि-समानाधिकरणतया अभावान्तरमादाय तद्वह्निसंयोगादिनिष्ठ-प्रतियोगिताया अपि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकतापत्त्या तदभावमादाय अव्याप्त्यापत्तेः। किन्तु प्रतियोग्यनधिकरण-वृत्तित्वम्। तथा च **प्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठा-भावेत्यभावान्तार्थनिष्कर्षः**॥

विवरणम्

अथेति [पृ.104]। अत्यन्ताभावघटितव्यापकतावच्छेदक-ताया निवेशे 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र सद्धेतौ कपिसंयोगात्मकः यः साध्याभावः कपिसंयोगाभावाभावः तस्य लक्षणघटकत्वानुपपत्तिः। साध्यवति कपिसंयोगाभाववति वृक्षे वर्तते यः अभावः कपिसंयोगात्मकः कपिसंयोगाभावाभावीय-प्रतियोगितावदभावः। वृक्षे कपिसंयोगाभावस्य कपिसंयोगस्य च अवच्छेदकभेदेन सत्त्वात्। तत्प्रतियोगितावच्छेदकं कपिसंयोगा-भावनिष्ठं कपिसंयोगाभावाभावीयं प्रतियोगित्वम्। तन्निरूपकः कपिसंयोगात्मकः अभावः। तथा च साध्यवन्निष्ठात्यन्ताभावप्रति-योगितावच्छेदकप्रतियोगिताकत्वमेव कपिसंयोगाभावत्वेन कपि-संयोगाभावाभावे वर्तते। न तु साध्यवन्निष्ठात्यन्ताभावप्रति-योगितानवच्छेदकप्रतियोगिताकत्वमिति कपिसंयोगात्मकस्य अभावस्य लक्षणघटकत्वानुपपत्तिः।

न च - तस्य लक्षणघटकत्वं मास्तु। अभावान्तरमादाय लक्षणसमन्वयसंभवात् इति - वाच्यम्। अग्रे स्वविशिष्टपद-प्रयोजनकथनावसरे दीधितौ कपिसंयोगात्मकाभावमादाय अव्याप्तिकथनात् तस्य लक्षणघटकतायाः संपादनीयत्वात्। अन्यथा दीधितिविरोधापत्तेः।

न च - साध्यवन्निष्ठात्यन्ताभावे प्रतियोगिव्यधिकरणेति विशेषणसद्भावात् साध्यवन्निष्ठाभावपदेन कपिसंयोगात्मकः अभावः ग्रहीतुं न शक्यते। तस्य कपिसंयोगाभावरूपप्रतियोगिसमानाधिकरणत्वात्; किन्तु घटाद्यभावः। तत्प्रतियोगितानवच्छेदकप्रतियोगिताकत्वं कपिसंयोगात्मकाभावेऽस्तीति तस्य लक्षणघटकत्वोपपत्तिः इति - वाच्यम्। साध्यवन्निष्ठात्यन्ताभावे प्रयोजनविरहेण प्रतियोगिवैयधिकरण्यानिवेशात्। तथा च कपिसंयोगात्मकाभावस्य लक्षणाघटकतया अग्रिमदीधितिग्रन्थविरोध इति 'अथ' इत्यादिना आक्षेपः।

निरुक्तव्यापकतेति [पृ.104]। अत्यन्ताभावघटितव्यापकतेत्यर्थः। **कपिसंयोगाभावादिनिष्ठेति** [पृ.104]। कपिसंयोगाभावादिनिष्ठानां कपिसंयोगाद्यात्मकाभावीयप्रतियोगितानामित्यर्थः।

उक्ताक्षेपे समाधानं वदतां केषाञ्चिन्मतमाह—**अत्र केचिदित्यादिना** [पृ.104]। व्यापकताशरीरप्रविष्टे साध्यवन्निष्ठाभावे प्रतियोगिवैयधिकरण्यमवश्यं निवेशनीयम्। अन्यथा अभावे साध्यवन्निष्ठत्वं संबन्धसामान्येन निवेश्यते चेत् 'कालपरिमाणवान् द्रव्यत्वात्' इत्यादौ व्यभिचारिणि अतिव्याप्तिः। कालपरिमाणाभाववति घटादौ द्रव्यत्वसत्त्वात् अयं हेतुः व्यभिचारी। अत्र कालपरिमाणत्वेन कालपरिमाणाभावमादाय अतिव्याप्तिः वारणीया। परन्तु स अभावः लक्षणघटको न भवति। साध्यवति काले कालपरिमाणाभावीयप्रतियोगितावतः कालपरिमाणस्य अभावः कालिकसंबन्धेन वर्तते। तत्प्रतियोगितावच्छेदिकैव कालपरिमाणनिष्ठा कालपरिमाणाभावीया प्रतियोगिता। तत्प्रतियोगितानवच्छेदिका तु समवायितया वाच्यत्वाभावीया वाच्यत्वनिष्ठप्रतियोगितैव। साध्यवति काले वाच्यत्वनिष्ठप्रतियोगितावतः

वाच्यत्वस्य अभावः कालिकसंबन्धेनापि नास्ति । अतः साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकः अभावः समवायितया वाच्यत्वाभाव एव । तस्य प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिः । दैशिकविशेषणतासंबन्धेन साध्यवन्निष्ठत्वनिवेशे यद्यपीयमतिव्याप्तिः वारयितुं शक्यते - कालपरिमाणाभावीयप्रतियोगितावतः कालपरिमाणस्य अभावः साध्यवति काले कालिकसंबन्धेन वर्तते, न तु स्वरूपसंबन्धेन । स्वरूपसंबन्धेन कालवृत्तिः अभावस्तु घटाद्यभावीयप्रतियोगितावदभावः । तत्प्रतियोगितावच्छेदिका घटाद्यभावीयप्रतियोगिता । तत्प्रतियोगितानवच्छेदिका कालपरिमाणनिष्ठा प्रतियोगिता । तन्निरूपकः अभावः कालपरिमाणत्वेन कालपरिमाणाभावोऽपि । तस्य यावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्तीति नातिव्याप्तिः, तथापि स्वरूपसंबन्धेन साध्यवन्निष्ठत्वनिवेशे 'वह्निमान् धूमात्' इत्यादौ हेतुसमानाधिकरणयावदभावान्तर्गतस्य पर्वतत्वात्मकस्य पर्वतत्वाभावाभावस्य यावद्धेत्वधिकरणपर्वतान्तर्भावेण पर्वतत्वाभावात्मकप्रतियोगिसामानाधिकरण्याभावात् अव्याप्तिः । पर्वतत्वात्मकाभावस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वमप्यस्ति । साध्यवति पर्वते स्वरूपसंबन्धेन पर्वतत्वात्मकाभावः न वर्तते । भावपदार्थस्य स्वरूपसंबन्धेन वृत्तेः अप्रामाणिकत्वात् । अतः साध्यवन्निरूपितस्वरूपसंबन्धावच्छिन्नवृत्तितावान् अभावः घटाद्यभावीयप्रतियोगितावदभावः । तत्प्रतियोगितावच्छेदिका घटादिनिष्ठा प्रतियोगिता । तत्प्रतियोगितानवच्छेदिका पर्वतत्वाभावनिष्ठा प्रतियोगिता । तन्निरूपकः अभावः पर्वतत्वाभावाभावोऽपीति ।

न च हेत्वधिकरणनिरूपितवृत्तित्वेऽपि स्वरूपसंबन्धावच्छिन्नत्वं निवेशनीयम् । पर्वतत्वात्मकस्य अभावस्य हेत्वधिकरणे पर्वते समवायसंबन्धेन वृत्तावपि स्वरूपसंबन्धेन अवृत्तेः

तस्य लक्षणघटकत्वाभावात् कथं तमादाय अव्याप्तिः इति वाच्यम् । 'कालपरिमाणवान् द्रव्यत्वात्' इत्यत्र प्रसक्तायाः अतिव्याप्तेः वारणाय साध्यवन्निष्ठत्वे स्वरूपसंबन्धावच्छिन्नत्व-निवेशे 'वह्निमान् धूमात्' इत्यादौ पर्वतत्वात्मकाभावमादाय अव्याप्तिः प्रसक्ता । तद्वारणाय हेत्वधिकरणवृत्तित्वेऽपि स्वरूप-संबन्धावच्छिन्नत्वनिवेशे अनेकस्थले स्वरूपसंबन्धावच्छिन्नत्व-निवेशेन गौरवम् । किञ्च साध्यवन्निष्ठाभावपदेन 'धूमवान् वह्नेः' इत्यादौ धूमाभावप्रतियोगित्वेन घटाभावमादाय तत्प्रतियोगि-तायां व्यधिकरणतया धूमाभावीयप्रतियोगित्वस्य अवच्छेदकत्वात् घटत्वपटत्वाभ्यां प्रमेयाभावस्यैव साध्यवन्निष्ठाभावप्रतियोगितान-वच्छेदकप्रतियोगिताकतया तस्य च अभावस्य प्रतियोगिसमा-नाधिकरणत्वात् अतिव्याप्तिः प्रसजति । तद्वारणाय साध्य-वन्निष्ठाभावप्रतियोगितायां यत् सामानाधिकरण्येन अवच्छेदकं तद्भिन्नत्वं साध्यव्यापकतावच्छेदकत्वमिति विवक्षणीयमिति गौरवम् । तदपेक्षया साध्यवन्निष्ठाभावे प्रतियोगिवैयधिकरण्य-निवेशे नानास्थले स्वरूपसंबन्धावच्छिन्नत्वं न निवेशनीयम् । प्रतियोगितासामानाधिकरण्येन अवच्छेदकभिन्नत्वमपि न निवेश-नीयम् इति लाघवम् । तथा हि - 'कालपरिमाणवान् द्रव्यत्वात्' इत्यादौ साध्यवन्निष्ठः प्रतियोगिव्यधिकरणः अभावः कालपरि-माणाभावीयप्रतियोगितावदभावो न भवति । काले प्रतियोगिनः कालपरिमाणस्यापि सत्त्वेन तस्य अभावस्य प्रतियोगिसमा-नाधिकरणत्वात् । किन्तु घटाद्यभावीयप्रतियोगितावदभावः । तत्प्रतियोगितानवच्छेदकप्रतियोगिताकत्वं कालपरिमाणाभावे-ऽस्तीति यावदन्तर्गतस्य तस्य प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः । 'वह्निमान् धूमात्' इत्यादौ साध्यवन्निष्ठः प्रतियोगिव्यधिकरणः अभावः पर्वतत्वात्मकाभावीयप्रतियोगि-तावदभावः । पर्वते तत्प्रतियोगिनः पर्वतत्वाभावस्य असत्त्वात् ।

तादृशाभावप्रतियोगितावच्छेदिका पर्वतत्वाभावनिष्ठा प्रतियोगिता। तदनवच्छेदकप्रतियोगिताकः पर्वतत्वाभावाभावो न भवतीति तस्य लक्षणाघटकतया न तमादाय अव्याप्तिः । 'धूमवान् वह्नेः' इत्यादौ साध्यवन्निष्ठस्य धूमाभावप्रतियोगित्वेन घटाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य केवलान्वयितया प्रतियोगिमत्यपि सत्त्वेन प्रतियोगिव्यधिकरणत्वाभावात् साध्यवन्निष्ठाभावपदेन धूमाभावप्रतियोगित्वेन घटाभावो न ग्रहीतुं शक्यते। किन्तु घटाभावप्रतियोगित्वेन घटाभाव एव । तत्प्रतियोगितानवच्छेदकत्वं धूमाभावीयप्रतियोगितायाम् अस्तीति तन्निरूपकस्य धूमत्वेन धूमाभावस्यापि यावदन्तर्गततया तस्य प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः । एवञ्च साध्यवन्निष्ठाभावे लाघवात् प्रतियोगिवैयधिकरण्यं निवेशनीयमिति स्थिते 'कपिसंयोगाभाववान् मेयत्वात्' इत्यादौ कपिसंयोगात्मकाभावस्य प्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणसाध्यवन्निष्ठाभावपदेन घटाद्यभावं गृहीत्वा तत्प्रतियोगितानवच्छेदकप्रतियोगिताकत्वं कपिसंयोगाभावाभावेऽस्तीति तस्य लक्षणघटकत्वं संपादनीयम् इति भावः ।

व्यतिरेकितावच्छेदकप्रतियोगितामात्रस्यैवेति [पृ. 105] । अत्यन्ताभावप्रतियोगितावच्छेदकप्रतियोगितासामान्यस्येत्यर्थः । यादृशप्रतियोगिताविशिष्टस्य अत्यन्ताभावः संभवति, सा प्रतियोगिता अत्यन्ताभावप्रतियोगितावच्छेदिका । **स्वावच्छिन्नाभाव** [पृ.105] इति । कालपरिमाणादिनिष्ठप्रतियोगिताविशिष्टस्य अभाव इत्यर्थः । **तादृशसंबन्धावच्छिन्नत्वेति** [पृ.105] । दैशिकविशेषणतासंबन्धावच्छिन्नत्वेत्यर्थः । **नानास्थाने** [पृ.105] इति । साध्यवन्निरूपितवृत्तित्वे हेत्वधिकरणानिरूपितवृत्तित्वे च दैशिकविशेषणतासंबन्धावच्छिन्नत्वनिवेशनेत्यर्थः । **व्यधिकरणधर्मावच्छिन्नेति** [पृ.105] । धूमाभावप्रतियोगित्वरूपव्यधिकरणधर्मा-

वच्छिन्नघटनिष्ठप्रतियोगिताकः यः अभावः तत्प्रतियोगितावच्छेदकत्वमेव धूमाभावीयप्रतियोगितायामस्तीति रीत्या प्रसक्तायाः अतिव्याप्तेः वारणाय इत्यर्थः ।

सामानाधिकरण्यप्रत्यासत्यवच्छिन्नत्वनिवेशनेति [पृ.105] । प्रतियोगितासामानाधिकरण्यविशिष्टस्वरूपसंबन्धावच्छिन्नत्वं साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतायां निवेशनीयम् । धूमाभावप्रतियोगित्वेन घटाभावीयप्रतियोगितायां धूमाभावप्रतियोगित्वस्य स्वरूपसंबन्धेन अवच्छेदकत्वेऽपि प्रतियोगिसामानाधिकरण्यविशिष्टस्वरूपसंबन्धेन अवच्छेदकत्वं नास्ति । धूमाभावप्रतियोगित्वे घटाभावीयप्रतियोगितासामानाधिकरण्यविरहात् इति भावः ।

प्रतियोगिवैयधिकरण्यं चेति [पृ.106] । प्रतियोग्यधिकरणवृत्तिभिन्नत्वं न प्रतियोगिवैयधिकरण्यम् । तथा सति 'वह्निमान् धूमात्' इत्यादौ महानसीयवह्निसंयोगाभावस्य लक्षणघटकत्वापत्तिः । वह्निमति पर्वते विद्यमानस्य महानसीयवह्निसंयोगाभावस्य प्रतियोग्यधिकरणे महानसे अव्याप्यवृत्तित्वेन वर्तमानतया प्रतियोग्यधिकरणवृत्तिभिन्नः साध्यवन्निष्ठाभावः न महानसीयवह्निसंयोगाभावीयप्रतियोगितावदभावः, किन्तु घटाद्यभावीयप्रतियोगितावदभावः । तत्प्रतियोगितानवच्छेदकमहानसीयवह्निसंयोगनिष्ठप्रतियोगिताकस्य महानसीयवन्हिसंयोगत्वेन महानसीयवह्निसंयोगाभावस्य यावद्धेत्वधिकरणपर्वतान्तर्भावेण महानसीयवह्निसंयोगरूपप्रतियोगिसामानाधिकरण्यं नास्ति इति अव्याप्तिः । अतः प्रतियोग्यनधिकरणवृत्तित्वमेव प्रतियोगिव्यधिकरणत्वम् ।

स्वप्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावेति अभावान्तार्थनिष्कर्ष इति [पृ.106] । स्वपदेन महानसीयवह्निसंयोगा-

भावीयप्रतियोगितावदभावः ग्रहीतुं शक्यः। तत्प्रतियोगिनः महानसीयवह्निसंयोगस्य अनधिकरणं साध्यवत्पर्वतः भवति। तद्वृत्त्यभावः महानसीयवह्निसंयोगाभावीयप्रतियोगितावदभावः। तत्प्रतियोगितावच्छेदकप्रतियोगिताकत्वमेव महानसीयवह्निसंयोगाभावेऽस्तीति तस्य लक्षणाघटकतया न तमादाय अव्याप्तिरितिभावः।

ननु प्रतियोग्यनधिकरणवृत्तिः साध्यवन्निष्ठः इति अभावे पृथक् विशेषणद्वयमस्तु। तावतापि महानसीयवह्निसंयोगाभावस्य प्रतियोग्यनधिकरणपर्वतवृत्तितया साध्यवद्वृत्तितया च व्यापकताघटकाभावपदेन उपादातुं शक्यतया तत्प्रतियोगितावच्छेदकप्रतियोगिताकत्वमेव महानसीयवह्निसंयोगाभावेऽस्तीति तस्य लक्षणाघटकत्वात् इत्याशङ्क्य तथा सति 'महानसीयवह्निसंयोगवान् धूमात्' इत्यत्र व्यभिचारिणि अतिव्याप्तिः। तत्रापि उक्तरीत्या महानसीयवह्निसंयोगाभावस्य लक्षणाघटकत्वापत्तेः। अतः स्वप्रतियोग्यनधिकरणसाध्यवन्निष्ठाभावेति निष्कर्षः करणीय इत्यभिप्रायेण आह - तथा चेति [पृ॰106]। महानसीयवह्निसंयोगसाध्यकव्यभिचारिणि साध्यवतः महानसस्य महानसीयवह्निसंयोगरूपप्रतियोग्यनधिकरणत्वं नास्तीति साध्यवन्निष्ठाभावपदेन महानसीयवह्निसंयोगाभावीयप्रतियोगितावदभावः ग्रहीतुं न शक्यते। किन्तु अभावान्तरमेवेति तत्र साध्याभावस्य लक्षणघटकत्वनिर्वाहः। 'वह्निमान् धूमात्' इत्यादौ साध्यवतः पर्वतस्य महानसीयवह्निसंयोगानधिकरणत्वमस्तीति साध्यवन्निष्ठाभावपदेन महानसीयवह्निसंयोगाभावस्यापि ग्रहीतुं शक्यतया तत्प्रतियोगितानवच्छेदकप्रतियोगिताकः न महानसीयवह्निसंयोगाभावः किन्तु घटत्वेन वह्न्यभाव एव इति नाव्याप्तिरिति भावः।

गादाधरी

(१६) दैशिकविशेषणतासंबन्धस्य क्वापि व्यापकताघटकत्वं न स्यात् इत्याक्षेपः।

अत्र च व्यापकताघटकत्वेन अभिमतो यः संबन्धः तेन प्रतियोग्यनधिकरणत्वं वाच्यम् । तेन कालपरिमाणादिसाध्यकस्थले संबन्धसामान्येन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्धावपि न क्षतिः। 'काल: सर्ववान् कालपरिमाणात्' इत्यादौ साध्यतावच्छेदक-कालिकसंबन्धेन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्धया तादृशसंबन्धस्य **व्यापकताघटकत्वासंभवेऽपि** न क्षतिः । तत्र समवायादिसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकं घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसंभवात् ।

अथैवं दैशिकविशेषणतासंबन्धस्य क्वापि व्यापकताघटकत्वं न स्यात् । सर्वस्यैव अभावस्य पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिनः तेन संबन्धेन साध्यवति वृत्तेः, तेन संबन्धेन स्वप्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावाप्रसिद्धेः ।

न च - तादृशसंबन्धस्य व्यापकत्वाघटकत्वेऽपि क्षतिविरहः। सामान्यादिमात्रवृत्तिसाध्यकस्थलेऽपि **विषयतासंबन्धघटितव्याप**कतावच्छेदकप्रतियोगिताकसाध्यवत्त्वादिप्रकारकप्रमाभावमादायैव उपपत्तिसंभवात् इति - वाच्यम् ।

तादृशसंबन्धस्य अतथात्वे तेन संबन्धेन कपिसंयोगाभावादिसाध्यकप्रमेयत्वादिहेतुकस्थले तन्निष्ठकपिसंयोगाद्यात्मकाभावीयप्रतियोगिताया व्यापकतावच्छेदकतानुपपत्त्या अग्रिमग्रन्थासङ्गतिस्तादवस्थ्यमिति चेत्—

विवरणम्

अत्र च व्यापकताघटकत्वेनेति [पृ.113] । स्वप्रतियोग्यनधिकरणसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकप्रतियोगि

ताकत्वं साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वम् इति पूर्वमुक्तम् । स्वप्रतियोग्यनधिकरणत्वं च स्वप्रतियोग्यधिकरणभिन्नत्वम् । तत्र स्वप्रतियोग्यधिकरणत्वं व्यापकताघटकत्वेनाभिमतो यः संबन्धः तत्संबन्धावच्छिन्नत्वेन विवक्षणीयम् । अन्यथा संबन्धसामान्येन स्वप्रतियोग्यधिकरणत्वविवक्षायां 'समवायेन कालपरिमाणवान् कालत्वात्' इत्यत्र सद्धेतौ अव्याप्तिः । स्वपदेन साध्यवन्निष्ठस्य घटाद्यभावस्य ग्रहणे तत्प्रतियोगिनां घटादीनां कालिकसंबन्धेन अधिकरणमेव साध्यवान् कालो भवतीति संबन्धसामान्येन स्वप्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्ध्या अव्याप्तिः । व्यापकताघटकसंबन्धेन स्वप्रतियोग्यधिकरणत्वनिवेशे तु समवायसंबन्धस्यैव व्यापकताघटकत्वात् तेन संबन्धेन घटाद्यभावप्रतियोगिघटादेः अधिकरणं कपालादिकं प्रसिद्धमेव । तद्भिन्नश्च साध्यवान् कालः । तद्वृत्त्यभावप्रतियोगिताकं घटत्वेन कालपरिमाणाभावमादाय लक्षणसमन्वयात् नाव्याप्तिरिति भावः । **न क्षतिरिति** [पृ.113] । नाव्याप्तिरित्यर्थः ।

ननु लाघवेन साध्यतावच्छेदकसंबन्धावच्छिन्नत्वमेव स्वप्रतियोग्यधिकरणतायां निवेश्यताम् । तावतापि समवायसंबन्धेन कालपरिमाणसाध्यकस्थले साध्यतावच्छेदकसमवायसंबन्धेन स्वप्रतियोग्यधिकरणप्रसिद्ध्या अव्याप्तिवारणसंभवात् इत्यत आह - **कालः सर्ववान् इति** [पृ.113] । अत्र कालिकसंबन्धेन सर्वं साध्यम् । समवायसंबन्धेन कालपरिमाणं हेतुः । अत्र साध्यवन्निष्ठाभावपदेन घटाद्यभावो ग्राह्यः । तत्प्रतियोगिनां सर्वेषां घटादीनां साध्यतावच्छेदककालिकसंबन्धेन अधिकरणमेव साध्यवान् कालो भवतीति साध्यतावच्छेदकसंबन्धेन स्वप्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्ध्या अव्याप्तिः। अतः साध्यतावच्छेदकसंबन्धेन प्रतियोग्यधिकरणत्वं न निवेशनीयम् । किन्तु व्यापकताघटकसंबन्धेनैव तन्निवेशनीयम् । तन्निवेशे तु कालिकसंबन्धेन

साध्यतावच्छेदकसर्वत्वावच्छिन्नं प्रति समवायसंबन्धेन द्रव्यत्वस्य व्यापकतया व्यापकताघटकसमवायसंबन्धेन घटाद्यभावीयप्रतियोग्यनधिकरणसाध्यवन्निष्ठाभावः घटाद्यभावीयप्रतियोगितावदभावः। न तु द्रव्यत्वाभावीयप्रतियोगितावदभावः। द्रव्यत्वस्य तत्र समवायेन सत्त्वात्। अतः द्रव्यत्वनिष्ठा प्रतियोगिता साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदिका। तन्निरूपकं घटत्वेन द्रव्यत्वाभावमादाय तस्य प्रतियोगिसामानाधिकरण्यमस्तीति लक्षणसमन्वयः। तथा च व्यापकताघटकसंबन्धावच्छिन्नस्वप्रतियोगिनिष्ठाधेयतानिरुपिताधिकरणतावद्भिन्नसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकप्रतियोगिताकाः यावन्तोऽभावाः इत्यादि लक्षणम्।

व्यापकताघटकत्वासंभवेऽपीति [पृ.113]। व्यापकताघटकं यत् स्वप्रतियोग्यनधिकरणत्वं तच्छरीरे प्रवेशासंभवेऽपीत्यर्थः। अत्र कालिकसंबन्धेन घटादेः साध्यत्वे तेन संबन्धेन साध्यवतः भूतलादेः तेन संबन्धेन तदसमानकालीनयत्किञ्चिद्व्यक्त्यनधिकरणतया तद्व्यक्त्यभावं साध्यवन्निष्ठाभावपदेन गृहीत्वा लक्षणसमन्वयसंभवात् अव्याप्तिर्न संगच्छते। अतः सर्वसाध्यकानुसरणम्।

अथैवमिति [पृ.113]। व्यापकताघटकसंबन्धेन स्वप्रतियोग्यनधिकरणत्वनिवेशे 'सत्ताभाववान् जात्यभावात्' इत्यादौ अभावसाध्यकसद्धेतौ सत्ताभावनिष्ठप्रतियोगिताकं घटत्वेन सत्ताभावाभावं गृहीत्वैव लक्षणसमन्वयो वक्तव्यः। तत्र प्रतियोगिताविशिष्टस्य सत्ताभावस्य देशिकविशेषणतासंबन्धेनैव साध्यव्यापकत्वमिति स्वरूपसंबन्ध एव व्यापकताघटकसंबन्धः। तेन संबन्धेन स्वप्रतियोग्यनधिकरणं साध्याधिकरणं न भवति। स्वपदेन यो योऽभावः गृह्यते तस्य सर्वस्यापि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावोऽपि प्रतियोगी। स्वरूपसंबन्धेन तादृशप्रतियोग्यधिकरणमेव

साध्याधिकरणमिति स्वप्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्धया अव्याप्तिः ।

न च 'सत्ताभाववान् जात्यभावात्' इत्यत्र स्वरूपसंबन्धस्य व्यापकताघटकत्वविरहेऽपि न क्षतिः । साध्यतावच्छेदकावच्छिन्नं सत्ताभावं प्रति विषयतासंबन्धेन सत्ताभावप्रमायाः व्यापकत्वमस्ति । यत्र यत्र सत्ताभावः सामान्यादौ तत्र तत्र 'सामान्यादिकं सत्ताभाववत्' इत्याकारिका सत्ताभावप्रकारकप्रमा विषयतासंबन्धेन वर्तते । अतः विषयतासंबन्धः तत्र साध्यव्यापकताघटकसंबन्धः । तेन संबन्धेन घटाद्यभावप्रतियोगिघटाद्यनधिकरण-साध्याधिकरणसामान्यादिवृत्तिघटाद्यभावप्रतियोगितानवच्छेदकसत्ताभावप्रकारकप्रमानिष्ठप्रतियोगिताकः यः 'घटत्वेन सत्ताभावप्रकारकप्रमा नास्ति' इति प्रतीतिसिद्धोऽभावः तस्य यावद्धेत्वधिकरणसामान्याद्यन्तर्भावेण तादृशप्रमारूपप्रतियोगिसामानाधिकरण्यसत्त्वात् नाव्याप्तिः इति वाच्यम् । तथा सत्यपि 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र कपिसंयोगात्मकाभावस्य लक्षणघटकत्वं न स्यात् । कपिसंयोगात्मकाभावीयप्रतियोगिताविशिष्टस्य कपिसंयोगाभावस्य स्वरूपसंबन्धेनैव साध्यव्यापकतायाः सत्त्वात् व्यापकताघटकसंबन्धः स्वरूपसंबन्धः । तेन संबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोग्यधिकरणत्वमेव साध्यवतः अस्तीति स्वप्रतियोग्यनधिकरणसाध्याधिकरणघटितव्यापकतावच्छेदकत्वं कपिसंयोगात्मकाभावीयप्रतियोगितायां नोपपद्यत इति तस्य लक्षणघटकत्वप्रदर्शकदीधितिग्रन्थासाङ्गत्यापत्तेरिति आक्षेपग्रन्थस्य भावः ।

सामान्यादिमात्रवृत्तीति [पृ.113] । सत्ताभावः सामान्यादिमात्रवृत्ति साध्यम् । तत्साध्यकस्थलं 'सत्ताभाववान् जात्यभावात्' इति । **विषयतासंबन्धेति** [पृ.113] । विषयतासंबन्धावच्छिन्ना

व्यापकता सत्ताभावप्रकारकप्रमानिष्ठा व्यापकता । तदवच्छेदक-प्रतियोगिता तादृशप्रमानिष्ठैव प्रतियोगिता । तन्निरूपकः सत्ताभावप्रकारकप्रमाभावः । सोऽपि घटत्वादिरूपव्यधिकरण-धर्मावच्छिन्नप्रतियोगिताकः, तस्यैव हेतुसमानाधिकरणत्वात् । **तादृशसंबन्धस्येति** [पृ.113] । दैशिकविशेषणतासंबन्धस्येत्यर्थः ।

गादाधरी

(१७) तत्समाधानम्

न । **लाघवानुरोधेन** येन येन संबन्धेन यादृशप्रतियोगिता-वच्छेदकविशिष्टानधिकरणं साध्यवत् तादृशप्रतियोगितान-वच्छेदकत्वमेव तादृशसंबन्धघटितव्यापकतावच्छेदकत्वम् इति वक्तव्यम् । इत्थं च कपिसंयोगाभावादिसाध्यकस्थले तन्निष्ठ-प्रतियोगितावच्छिन्नप्रतियोगिता नोक्तयादृशपदेनोपादातुं शक्यते । तादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वस्य साध्यवत्यसंभवात् । किन्तु घटत्वाद्यभावनिष्ठप्रतियोगितैव । दैशिकविशेषणतया तदवच्छेदकावच्छिन्नानधिकरणत्वस्य साध्य-वति घटादौ सत्त्वात् तदनवच्छेदकत्वं च कपिसंयोगाभावादिनिष्ठ-प्रतियोगितायाः इति कपिसंयोगादेः दैशिकविशेषणताघटित-व्यापकतावच्छेदकप्रतियोगिताकत्वनिर्वाहः **समनियताभावैक्यमते** घटाद्यभावानामपि घटत्वादिना प्रमेयसामान्याभावाभिन्नतया प्रमेयमात्रप्रतियोगिकत्वेन प्रतियोग्यनधिकरणीभूतसाध्यवतोऽ-प्रसिद्धिः । अतः प्रतियोगितावदनधिकरणत्वं विहाय प्रतियोगिता वच्छेदकविशिष्टानधिकरणत्वनिवेशः ।

न च - घटाद्यभावानां प्रमेयमात्रप्रतियोगिकत्वेऽपि तदीय-घटादिमात्रवृत्तिप्रतियोगितावदनधिकरणत्वमादाय व्यापकता-लक्षणसामञ्जस्यम् इति - वाच्यम् । तादृशाभावानामभेदे 'घटो नास्ति' इत्यादि प्रतीतीनामपि घटत्वादिविशेषितघटादिवृत्तित्वेन

यावत्प्रमेयनिष्ठप्रतियोगितावगाहित्वसंभवात् घटादिमात्रवृत्ति-प्रतियोगिताया अप्रामाणिकत्वात् ।

समनियताभावानामभेदानभ्युपगन्तृमतेऽपि साध्याभावादि-प्रतियोगितया साध्यवदवृत्तिपदार्थाभावस्य प्रतियोगितामादाय तादृशप्रतियोगितानां व्यापकतानवच्छेदकत्वापत्तिवारणाय प्रति-योगितावच्छेदकविशिष्टानधिकरणत्वनिवेशनमावश्यकम् ।

विवरणम्

अत्र उक्ताक्षेपं समाधत्ते - **न, लाघवानुरोधेन इत्यादिना** [पृ.117] । येन येन संबन्धेन यादृशप्रतियोगितावच्छेदक-विशिष्टानधिकरणं साध्यवत् तादृशप्रतियोगितानवच्छेदकप्रति-योगिताकाः यत्समानाधिकरणाः यावन्तोऽभावाः प्रतियोगि-समानाधिकरणाः तत्त्वम् इति लक्षणम् । 'वन्हिमान् धूमात्' इत्यादौ यादृशप्रतियोगितापदेन 'घटाभावीयप्रतियोगितावान् नास्ति' इति प्रतीतिसिद्धाभावीया घटनिष्ठा घटाभावीयप्रति-योगित्वावच्छिन्ना प्रतियोगिता ग्राह्या । यादृशप्रतियोगिता-वच्छेदकं घटाभावीयप्रतियोगित्वम् । तदवच्छिन्नः घटः । संयोगसंबन्धेन तदनधिकरणं साध्यवान् पर्वतः । तादृशप्रति-योगिता घटाभावीयप्रतियोगित्वावच्छिन्ना प्रतियोगिता । तदन-वच्छेदकं वह्न्यभावीयप्रतियोगिता । तन्निरूपकाभावः घटत्वेन वह्न्यभावः इति तस्य लक्षणघटकत्वम् । यादृशप्रतियोगितापदेन वह्न्यभावीयप्रतियोगित्वावच्छिन्ना वह्निनिष्ठा प्रतियोगिता ग्रहीतुं न शक्यते । तदवच्छेदकप्रतियोगिताविशिष्टस्य वह्नेः अधिकरणमेव साध्यवद्भवतीति ।

'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र यादृशप्रतियोगिता-पदेन कपिसंयोगात्मकाभावीयप्रतियोगित्वावच्छिन्ना कपिसंयोगा-

भावनिष्ठा प्रतियोगिता ग्रहीतुं न शक्यते । तदवच्छेदकप्रतियोगिताविशिष्टस्य कपिसंयोगाभावस्य साध्यवति स्वरूपसंबन्धेन वर्तमानतया प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वस्य साध्यवति असंभवात् । किं तु यादृशप्रतियोगितापदेन घटत्वाद्यभावनिष्ठा घटत्वाद्यात्मकाभावीयप्रतियोगित्वावच्छिन्ना प्रतियोगिता ग्राह्या । स्वरूपसंबन्धेन तदवच्छेदकप्रतियोगिताविशिष्टघटत्वाभावानधिकरणत्वस्य साध्यवति घटे सत्त्वात् अग्रे तादृशप्रतियोगितापदेन घटत्वाद्यभावनिष्ठप्रतियोगितैव ग्राह्या । तदनवच्छेदकप्रतियोगिताकत्वं कपिसंयोगाभावाभावे कपिसंयोगात्मकेऽस्तीति तस्य लक्षणघटकत्वनिर्वाहः ।

यादृशप्रतियोगितावदनधिकरणत्वं विहाय यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशस्य प्रयोजनमाह—**समनियताभावैक्यमते इति** [पृ.117] । येन संबन्धेन यादृशप्रतियोगितावदनधिकरणं साध्यवत् तादृशप्रतियोगितानवच्छेदकप्रतियोगिताकाः यावन्तोऽभावाः इत्युक्तौ प्रतियोग्यनधिकरणसाध्यवतः अप्रसिद्धिः । 'वह्निमान् धूमात्' इत्यादौ यादृशप्रतियोगितापदेन घटत्वेन घटाभावीयप्रतियोगितां गृहीत्वा तद्वद्घटानधिकरणत्वं साध्यवति पर्वतेऽस्तीति वक्तव्यम् । समनियताभावैक्यमते घटत्वेन घटाभावस्य घटत्वेन प्रमेयसामान्याभावस्य च समनियतत्वेन अभिन्नतया घटत्वेन घटाभावस्य प्रमेयसामान्यमपि प्रतियोगि । अतः घटत्वेन घटाभावीयप्रतियोगिताश्रयप्रमेयसामान्यानधिकरणत्वाप्रसिद्ध्या लक्षणस्य असंभवः । अतः यादृशप्रतियोगितावदनधिकरणत्वं विहाय यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वनिवेशः । तन्निवेशे यादृशप्रतियोगितापदेन घटाभावीया घटमात्रवृत्तिः या घटत्वावच्छिन्ना प्रतियोगिता सा ग्राह्या । यादृशप्रतियोगितावच्छेदकं घटत्वम् । तदवच्छिन्नघटानधिकरणत्वं साध्यवति अस्तीति नाप्रसिद्धिः इति भावः ।

न च घटाद्यभावानामिति [पृ.117] । घटत्वेनघटाभाव-घटत्वेन प्रमेयसामान्याभावयोः ऐक्येऽपि तदीयप्रतियोगिता भिन्ना। घटमात्रनिष्ठा एका प्रतियोगिता, प्रमेयमात्रनिष्ठा एका प्रतियोगिता चेति । तत्र प्रमेयमात्रनिष्ठ 'प्रतियोगितावदनधिकरणत्वस्य अप्रसिद्धावपि यादृशप्रतियोगितापदेन घटमात्रनिष्ठां प्रतियोगितां गृहीत्वा तद्वद्घटानधिकरणत्वस्य साध्यवति सत्त्वेन अप्रसिद्धिविरहात् अग्रे तादृशप्रतियोगितानवच्छेदकवह्न्यादिनिष्ठप्रतियोगिताकाभावमादाय समन्वयसंभवात् यादृशप्रतियोगितावदनधिकरणत्वमेव साध्यवति निवेश्यताम् । किं यादृशप्रतियोगितावच्छेदकत्वविशिष्टानधिकरणत्वनिवेशेन इति शङ्का । समाधानं तु—

असति बाधके अभावैक्ये अवच्छेदकैक्ये प्रतियोगितायाः अपि ऐक्यम् इति स्वीकारात् 'घटत्वेन प्रमेयं नास्ति' इत्यत्र घटत्वावच्छिन्ना प्रमेयसामान्यनिष्ठा या प्रतियोगिता भासते सैव 'घटत्वेन घटो नास्ति' इत्यत्रापि घटवृत्तितया भासत इति स्वीकारात् प्रमेयसामान्यवृत्तिप्रतियोगितातिरिक्तायाः घटमात्रवृत्तिप्रतियोगितायाः अप्रामाणिकत्वात् । तथा च घटत्वेन घटाभावीयप्रतियोगितावत् प्रमेयसामान्यम् । तदनधिकरणत्वाप्रसिद्ध्या असंभवः । तद्वारणाय यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं निवेशनीयम् । तन्निवेशे प्रतियोगितावच्छेदकघटत्वविशिष्टघटानधिकरणत्वं साध्यवति अस्तीति नाप्रसिद्धिरिति भावः ।

समनियताभावानाम् अभेदाङ्गीकर्तृमते उक्तप्रयोजनं संगच्छते । तदनङ्गीकर्तृमते तु न संगच्छत इत्याशङ्क्य तन्मतेऽपि प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशस्य प्रयोजनमाह-**समनियताभावानामिति** [पृ.118] । तथा च यादृशप्रतियोगितावदनधिकरणं साध्यवत् इत्युक्तौ यादृशप्रतियोगितापदेन वह्न्य-

भावप्रतियोगित्वेन घटो नास्ति' इति प्रतीतिसिद्धाभावीया घटनिष्ठा वह्न्यभावप्रतियोगित्वावच्छिन्ना प्रतियोगिता गृह्यते। प्रतियोगितावतः घटस्य अनधिकरणं साध्यवत् पर्वतादिकं भवति। तादृशप्रतियोगितायां घटनिष्ठायाम् अवच्छेदकमेव वह्न्यभावप्रतियोगित्वम् इति तादृशप्रतियोगितानवच्छेदकत्वरूपव्यापकतावच्छेदकत्वं वह्न्यभावप्रतियोगितायां नास्तीति वह्न्यभावादेः लक्षणघटकत्वं न स्यात् । तस्य लक्षणघटकत्वसंपादनाय प्रतियोगितावदनधिकरणत्वं परित्यज्य प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं निवेशितम्। तन्निवेशे तादृशप्रतियोगितापदेन वह्न्यभावप्रतियोगित्वावच्छिन्नघटनिष्ठप्रतियोगितायाः ग्रहेऽपि यादृशप्रतियोगितावच्छेदकं वह्न्यभावप्रतियोगित्वम्, तद्विशिष्टः वह्निः तदधिकरणत्वमेव साध्यवति वर्तते, न तु तदनधिकरणत्वमिति यादृशप्रतियोगितापदेन वह्न्यभावप्रतियोगित्वावच्छिन्ना घटनिष्ठा प्रतियोगिता ग्रहीतुं न शक्यते । किन्तु घटाभावीयप्रतियोगित्वावच्छिन्ना घटनिष्ठा प्रतियोगितैव। तादृशप्रतियोगितानवच्छेदकत्वं वह्न्यभावप्रतियोगित्वेऽस्तीति तस्य व्यापकतावच्छेदकत्वोपपत्तिरिति भावः ।

साध्याभावादिप्रतियोगितया इति [पृ.118]। साध्यवदवृत्तिः पदार्थः घटादिः । तस्य वह्न्यभावप्रतियोगित्वेन रूपेण अभावः 'वह्न्यभावप्रतियोगित्वेन घटो नास्ति' इति प्रतीतिसिद्धः। तदीयप्रतियोगितामादायेत्यर्थः ।

गादाधरी

(१८) उक्तदोषानवकाशत्वसमर्थनम् ।

अथ द्रव्यत्वाद्यभावीयद्रव्यत्वादिनिष्ठप्रतियोगितानामपि संयोगादिव्यधिकरणसंबन्धघटितव्यापकतावच्छेदकतापत्तिः ।

संयोगादिना **तादृशप्रतियोगितात्मक**प्रतियोगितावच्छेदक-विशिष्टाधिकरणाप्रसिद्ध्या यादृशप्रतियोगितेत्यत्र **तादृशप्रति-योगितावच्छिन्नायाः** प्रतियोगिताया उपादातुमशक्यतया **प्रतियोगि-त्वान्तरमुपादाय तत्रान**वच्छेदकत्वान्तसत्त्वात् । तथा च यावद्व्या-पकताघटकसंबन्धान्तर्गतसंयोगादिना द्रव्यत्वाद्यभावस्य प्रति-योगिसामानाधिकरण्यासंभवात् असंभवः ।

न च - संयोगादिना द्रव्यत्वाद्यभावस्य **स्वसमनियत**-घटत्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावाभिन्नतया संयोगादिना वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् नासंभव इति - वाच्यम् । एवमपि 'सत्तावान् जातेः' इत्यादौ **हेत्वधिकरणा-वच्छेदेन तादृशाभावानां** संयोगेन प्रतियोगिसामानाधिकरण्या-संभवेन अव्याप्तेर्दुर्वारत्वात् ।

मैवम्—व्यापकताघटकत्वेन अभिमतः यः संबन्धः तेन संबन्धेन वृत्तिमन्निष्ठत्वेन प्रतियोगिताया विशेषणीयत्वाद् द्रव्यत्वादेः संयोगादिना अवृत्तितया उक्तदोषानवकाश इति **आहुः** ।

विवरणम्

अथ द्रव्यत्वाद्यभावीयेत्यादि [पृ.121] । येन संबन्धेन यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणं साध्यवत् तादृशप्रति-योगितानवच्छेदकप्रतियोगिताकत्वमेव तत्संबन्धघटितव्यापकता-वच्छेदकप्रतियोगिताकत्वमिति परिष्कारे कृते 'पर्वतो वह्निमान् धूमात्' इत्यादौ द्रव्यत्वनिष्ठद्रव्यत्वाभावीयप्रतियोगितायाः संयोगसंबन्धघटितव्यापकतावच्छेदकत्वप्रसङ्गः । द्रव्यत्वाभावीय-प्रतियोगित्वावच्छिन्ना या द्रव्यत्वनिष्ठा प्रतियोगिता सा यादृशप्रतियोगितापदेन गृह्यते चेत् तदवच्छेदकप्रतियोगिता-

विशिष्टस्य द्रव्यत्वस्य संयोगसंबन्धेन अधिकरणमप्रसिद्धमिति यादृशप्रतियोगितापदेन सा न ग्राह्या। किन्तु घटाभावीयप्रतियोगित्वावच्छिन्ना घटनिष्ठा प्रतियोगिता ग्राह्या। तदवच्छेदकप्रतियोगिताविशिष्टस्य घटस्य संयोगसंबन्धेन अधिकरणं भूतलम्। अनधिकरणं साध्यवान् पर्वतः इति तादृशप्रतियोगितायाः अवच्छेदिका घटाभावीयप्रतियोगिता। अनवच्छेदिका द्रव्यत्वाभावीयप्रतियोगिता। तन्निरूपकः संयोगसंबन्धावच्छिन्नद्रव्यत्वाभावोऽपि। तस्य च यावद्धेत्वधिकरणपर्वते व्यापकताघटकसंयोगसंबन्धेन द्रव्यत्वरूपप्रतियोगिविरहात् प्रतियोगिसामानाधिकरण्यं नास्तीति असंभवः।

न च-संयोगसंबन्धेन द्रव्यत्वाभावस्य घटत्वेन वह्न्यभावस्य च केवलान्वयित्वेन समनियततया अभिन्नत्वात् संयोगेन द्रव्यत्वाभावस्य वह्निरपि प्रतियोगी। स च व्यापकताघटकसंयोगसंबन्धेन पर्वतेऽस्तीति संयोगेन द्रव्यत्वाभावस्य वह्निरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् न असंभव इति-वाच्यम्। एवमपि 'सत्तावान् जातेः' इत्यादौ संयोगसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य संयोगसंबन्धेन सत्ताभावस्य यावद्धेत्वधिकरणगुणान्तर्भावेण व्यापकताघटकसंयोगसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तेः दुर्वारत्वात्। न हि गुणे संयोगसंबन्धेन किमपि वर्तत इति 'अथ' [पृ.121] इत्यादिना आक्षेपः।

तस्य समाधानं तु 'मैवम्' [पृ.122] इत्यादिना प्रदर्शितम्। साध्यव्यापकतावच्छेदकप्रतियोगितायां व्यापकताघटकसंबन्धेन वृत्तिमन्निष्ठत्वं निवेश्यते। संयोगसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकत्वं पूर्वोक्तरीत्या यद्यपि संयोगेन द्रव्यत्वाभावे वर्तते, तथापि तदीयद्रव्यत्वनिष्ठप्रतियोगितायां व्यापकताघटकसंयोगसंबन्धेन वृत्तिमन्निष्ठत्वं नास्ति। द्रव्यत्वस्य संयोगसंबन्धेन कुत्राप्यवृत्तेः

द्रव्यत्वनिष्ठा प्रतियोगिता संयोगसंबन्धेन वृत्तिमन्निष्ठा न भवति। अतः संयोगसंबन्धावच्छिन्नद्रव्यत्वाभावः न लक्षणघटकः। किन्तु संयोगसंबन्धेन वृत्तिमद्वन्हिनिष्ठप्रतियोगिताकः घटत्वेन वह्न्यभाव एव लक्षणघटकः। तस्य च प्रतियोगिसामानाधिकरण्यसत्त्वात् नाव्याप्तिः इति। तथा च येन येन संबन्धेन यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणं साध्यवत् तादृशप्रतियोगितानवच्छेदिका तेन संबन्धेन वृत्तिमन्निष्ठा या प्रतियोगिता तन्निरूपकः अभावः साध्यव्यापकतावच्छेदकप्रतियोगिताकाभाव इति निष्कर्षः।

तादृशप्रतियोगितात्मकेति [पृ.122]। द्रव्यत्वाभावीयप्रतियोगितात्मकं यत् प्रतियोगितावच्छेदकं तद्विशिष्टस्य द्रव्यत्वस्य संयोगसंबन्धेन अधिकरणाप्रसिद्धेः इत्यर्थः। **तादृशप्रतियोगितावच्छिन्नाया इति** [पृ.122]। द्रव्यत्वाभावीयप्रतियोगितावच्छिन्नायाः द्रव्यत्वनिष्ठायाः प्रतियोगितायाः इत्यर्थः। **प्रतियोगित्वान्तरमिति** [पृ.122]। घटाद्यभावीयप्रतियोगित्वावच्छिन्नं प्रतियोगित्वमित्यर्थः। **तत्रेति** [पृ.122]। द्रव्यत्वनिष्ठप्रतियोगितायाम् इत्यर्थः। यावद्व्यापकताघटकसंबन्धान्तर्गतसंयोगादिना इत्यस्य प्रतियोगिसामानाधिकरण्यघटकप्रतियोगिमत्त्वेऽन्वयः। **स्वसमनियतेति** [पृ.122]। संयोगेन द्रव्यत्वाभावसमनियतः यः घटत्वेन वह्न्यभावः तदभिन्नतया इत्यर्थः। **हेत्वधिकरणावच्छेदेनेति** [पृ.122]। यावद्धेत्वधिकरणान्तर्गतगुणाद्यन्तर्भावेणेत्यर्थः। **तादृशाभावानामिति** [पृ.122]। संयोगसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकानां संयोगेन सत्ताद्यभावानामित्यर्थः।

अत्र 'आहुः' [पृ.122] इत्यस्वरसोद्भावनम्। स च साध्यव्यापकत्वे प्रतियोगिवैयधिकरण्यं न निवेशनीयम्। न चैवम् उक्तरीत्या स्वरूपसंबन्धेन साध्यवद्वृत्तित्वस्य अवश्यं निवेशनीय-

तया पर्वतत्वात्मकाभावमादाय 'वह्निमान् धूमात्' इत्यादौ अव्याप्त्यापत्तिः इति वाच्यम्। प्रतियोगितावच्छेदकभेदेन अभावभेदाङ्गीकारात्। पर्वतत्वाभावनिष्ठप्रतियोगित्वावच्छिन्नाभावस्य पर्वतत्वानात्मकस्य स्वरूपसंबन्धेनैव साध्यवद्वृत्तित्वात्। पर्वतत्वात्मकाभावस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वविरहेण लक्षणाघटकतया अव्याप्त्यप्रसक्तेरिति।

गादाधरी

(१९) प्रतियोगितायाः व्यापकताघटकत्वेन अभिमतेन संबन्धेन वृत्तिमन्निष्ठत्वनिवेशः।

वस्तुतस्तु - लघुरूपसमनियतगुरुधर्मस्य अनवच्छेदकत्वे घटाद्यभावप्रतियोगिताया अपि वह्न्यादिव्यापकतावच्छेदकत्वापत्तिः। तादृशप्रतियोगिताविशिष्टघटाद्यभावीयप्रतियोगितायां लाघवेन घटत्वादेरेव अवच्छेदकतया घटाद्यभावीयप्रतियोगितानां तदनवच्छेदकत्वात्।

न च प्रतियोगितायाः तदभावीयप्रतियोगितात्वेन अवच्छेदकतायां गौरवेऽपि स्वरूपतोऽवच्छेदकत्वे अविशेषः। प्रतियोगितायाः स्वरूपतो भानाभावेन तेन रूपेण अवच्छेदकताया अपि असंभवात् इति पारिभाषिकमवच्छेदकत्वं व्यापकतावच्छेदकताशरीरे निवेशनीयम्। तथा च साध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मः तदवच्छिन्नाभाववदसंबद्धस्वविशिष्टसामान्यकत्वं फलतः साध्यवद्यत्किञ्चिद्व्यक्त्यसंबद्धस्वविशिष्टसामान्यकं यद्यत्स्वं तत्तदन्यत्वमेव व्यापकतावच्छेदकत्वम्। तथा च कपिसंयोगाद्यात्मकाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वम् **अनायासेनैव** निर्वहति। यतः कपिसंयोगाद्यभावनिष्ठप्रतियोगिताविशिष्टस्य सर्वत्रैव साध्यवति वृत्तेः

तस्याः स्वपदेन उपादातुमशक्यत्वात् तादृशं स्वं **धर्मान्तरमेव।** तदन्यत्वं च तादृशप्रतियोगितायामक्षतमिति।

असंबद्धत्वशरीरे च व्यापकताघटकत्वेन अभिमतो यः संबन्धः स एव निवेशनीयः। द्रव्यत्वादिनिष्ठप्रतियोगित्वं च संयोगादिसंबन्धेन साध्यवदसंबद्धस्वविशिष्टसामान्यकमेव। अतो न संयोगघटितव्यापकत्वावच्छेदकत्वं तस्येति नोक्तदोषावकाश इति दिक्।

विवरणम्

अत्यन्ताभावघटितव्यापकतावच्छेदकतायाः निवेशे 'कपिसंयोगाभाववात् मेयत्वात्' इत्यत्र कपिसंयोगात्मकाभावस्य लक्षणघटकत्वानुपपत्तौ आशङ्कितायां 'अत्र केचित्' इत्यादिना व्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्य आवश्यकतां प्रदर्श्य कपिसंयोगात्मकाभावस्य लक्षणघटकत्वमुपपादयतां मतमुपन्यस्य 'आहुः' इति तन्मते अस्वारस्यं सूचितम्। इदानीं स्वमतानुसारेण आशङ्कायाः समाधानं वक्तुमारभते—**वस्तुतस्तु** [पृ.125] इत्यादिना।

लघुधर्मस्य अवच्छेदकत्वे संभवति लघुधर्मसमनियतस्य गुरुधर्मस्य नावच्छेदकत्वम् इति सिद्धान्तः। तथा च 'वह्निमान् धूमात्' इत्यादौ 'साध्यवन्निष्ठाभावः' इत्यनेन घटाभावीयप्रतियोगिताविशिष्टाभावस्य ग्रहणे तदीयप्रतियोगितायां घटनिष्ठायां लघुनः घटत्वस्यैव अवच्छेदकत्वम्, न तु घटत्वसमनियतस्य घटाभावीयप्रतियोगित्वस्य। घटत्वापेक्षया तस्य गुरुत्वात्। तथा च साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं घटाभावीयप्रतियोगितायामस्तीति तन्निरूपकस्य घटत्वेन घटाभावस्यापि साध्यव्यापकतावच्छेदकप्रतियोगिताकतया लक्षणघटकत्वापत्तिः। तस्य

लक्षणघटकत्वे च यावद्धेत्वधिकरणपर्वतान्तर्भावेण तस्य घटरूपप्रतियोगिसामानाधिकरण्यविरहात् असंभवः।

न च - घटनिष्ठायाः प्रतियोगितायाः घटाभावीयप्रतियोगितात्वेन अवच्छेदकतायां गौरवेऽपि स्वरूपतः अवच्छेदकत्वे न गौरवम् इति - वाच्यम्। जात्यखण्डोपाध्यतिरिक्तस्य प्रतियोगित्वस्य स्वरूपतः भानाभावेन तदभावीयप्रतियोगितात्वेनैव अवच्छेदकतायाः वक्तव्यतया गौरवात्। तथा च घटाभावस्य लक्षणघटकत्वमादाय असंभववारणार्थं व्यापकताशरीरप्रविष्टं अवच्छेदकत्वं न स्वरूपसंबन्धविशेषः। किंतु पारिभाषिकम्। तच्च साध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मः तदवच्छिन्नाभाववदसंबद्धस्वविशिष्टसामान्यकत्वमेव साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वम्। अत्रापि साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नाभाववान् साध्यवानेव भवति। अतः साध्यवद्यत्किञ्चिद्व्यक्त्यसंबद्धस्वविशिष्टसामान्यकं यद्यत् स्वं तत्त्वम् अवच्छेदकत्वं पर्यवसितम्। तत्तदन्यत्वं व्यापकतावच्छेदकत्वम्। स्वपदेन घटाभावीयप्रतियोगिता ग्राह्या। तद्विशिष्टस्य घटस्य साध्यवत्पर्वतासंबद्धत्वात्। न तु स्वपदेन वह्न्यभावीयप्रतियोगिता ग्राह्या। तद्विशिष्टस्य वह्नेः साध्यवत्संबद्धत्वात्। तथा च साध्यवद्यत्किञ्चिद्व्यक्त्यसंबद्धस्वविशिष्टसामान्यकं यद्यत्स्वं घटाभावीयप्रतियोगित्वादिकमेव। तत्तदन्यत्वं वह्न्यभावीयप्रतियोगितायामस्तीति तस्याः साध्यव्यापकतावच्छेदकत्वम्। तन्निरूपकं घटत्वेन वह्न्यभावमादाय लक्षणसमन्वयः। घटाभावीयप्रतियोगितायाः गुरुभूताया अपि स्वपदेन तस्याः ग्रहीतुं शक्यतया तत्त्वरूपं पारिभाषिकावच्छेदकत्वं तस्यामस्तीति न अनवच्छेदकत्वरूपं व्यापकतावच्छेदकत्वम्। 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र स्वपदेन कपिसंयोगात्मकाभावीयप्रतियोगिता ग्रहीतुं न शक्यते। तद्विशिष्टस्य कपिसंयोगाभावस्य साध्यकपि-

संयोगाभाववद्वृक्षादिसंबद्धत्वेन तदसंबद्धत्वविरहात् । किन्तु घटाभावादिनिष्ठा प्रतियोगितैव स्वपदेन ग्राह्या । तद्विशिष्टस्य घटाभावस्य कपिसंयोगाभाववद्घटाधिकरणभूतलव्यक्त्यसंबद्धत्वात् । घटाभावनिष्ठप्रतियोगिताभिन्नत्वं च कपिसंयोगाभावनिष्ठायां प्रतियोगितायामस्तीति तस्याः साध्यव्यापकतावच्छेदकतया तन्निरूपकस्य कपिसंयोगात्मकाभावस्य लक्षणघटकत्वोपपत्तिः । असंबद्धत्वशरीरे व्यापकताघटकत्वेन अभिमतो यः संबन्धः स एव निवेशनीयः । द्रव्यत्वादिनिष्ठप्रतियोगिताविशिष्टस्य द्रव्यत्वादेः संयोगसंबन्धेन साध्यवदसंबद्धत्वात् साध्यवदसंबद्धस्वविशिष्टसामान्यकमेव द्रव्यत्वनिष्ठं प्रतियोगित्वम्, न तु तदन्यदिति द्रव्यत्वनिष्ठप्रतियोगितायाः न संयोगसंबन्धघटितव्यापकतावच्छेदकतापत्तिः । तत्र यत्किञ्चित्पदानुपादाने साध्यवत्संबद्धत्वसामान्याभावः यदि निवेश्यते तदा 'वह्निमान् धूमात्' इत्यादौ महानसीयवह्न्यभावीयप्रतियोगिताविशिष्टस्य महानसीयवह्नेः वह्निमन्महानससंबद्धत्वेन साध्यवत्संबद्धत्वसामान्याभावविरहेण साध्यवत्संबद्धत्वसामान्याभाववत्स्वविशिष्टसामान्यकत्वरूपम् अवच्छेदकत्वं महानसीयवह्न्यभावीयप्रतियोगितायां नास्तीति तस्याः साध्यव्यापकतावच्छेदकत्वापत्या तन्निरूपकस्य महानसीयवह्न्यभावस्यापि लक्षणघटकत्वेन यावदन्तर्गतस्य तस्य पर्वतान्तर्भावेण प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिः स्यात् । तद्वारणाय साध्यवद्यत्किञ्चिद्व्यक्त्यसंबद्धेत्युक्तम् । महानसीयवह्न्यभावीयप्रतियोगिताविशिष्टस्य महानसीयवह्नेः साध्यवद्यत्किञ्चिद्व्यक्तिपर्वतासंबद्धत्वमस्तीति तादृशयत्किञ्चिद्व्यक्त्यसंबद्धस्वविशिष्टसामान्यकमेव महानसीयवह्न्यभावीयं प्रतियोगित्वं न तदन्यदिति न तस्य व्यापकतावच्छेदकत्वापत्तिः ।

सामान्यपदानुपादाने 'धूमवान् वह्नेः' इत्यत्र धूमाभावीयप्रतियोगिताविशिष्टस्य पर्वतीयधूमस्य साध्यवन्महानसव्यक्त्य-

संबद्धतया धूमाभावीयप्रतियोगितायाः पारिभाषिकावच्छेदकत्वे सति व्यापकतावच्छेदकत्वं न स्यात् । अतः सामान्यपदम् ।

वस्तुतस्तु धूमाभावस्य लक्षणाघटकत्वेऽपि अयोगोलकान्यत्वाभावमादाय अतिव्याप्तिवारणसंभवात् सामान्यपदं व्यर्थमेव । तथा च साध्यवद्यत्किञ्चिद्व्यक्त्यनुयोगिकव्यापकताघटकसंबन्धप्रतियोगित्वाभाववत्स्वविशिष्टसामान्यकं यद्यत्स्वं तत्तदन्यप्रतियोगिताकत्वं साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वमित्युक्तं भवति । तथा च व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यानिवेशेऽपि न कोऽपि दोष इति **वस्तुतस्तु** इत्यादि ग्रन्थतात्पर्यार्थः ।

अनायासेनैवेति [पृ.125]। प्रतियोगिवैयधिकरण्यानिवेशेनैव इत्यर्थः । **धर्मान्तरमेवेति** [पृ.126] । घटाद्यभावनिष्ठं प्रतियोगित्वम् इत्यर्थः ।

॥ **दीधितिः** ॥

येन संबन्धेन हेतुः तेनैव संबन्धेन तदधिकरणत्वं बोध्यम् । तेन आत्मत्वे साध्ये समवायेन हेतोः ज्ञानस्य विषयतयाधिकरणे घटादौ वर्तमानस्य साध्याभावस्य अतथात्वेऽपि न क्षतिः ।

गादाधरी

(२०) येन संबन्धेनेत्यादिदीधितिविवरणम् ।

येन संबन्धेन हेतुरिति । व्याप्यतावच्छेदकत्वेन अभिमतो यः संबन्ध इत्यर्थः । **बोध्यमित्यस्य** हेतुसामानाधिकरण्यघटकमित्यादिः । **तेन** - तादृशसंबन्धविवक्षणेन । **आत्मत्वे साध्ये इति** । 'अयमात्मा ज्ञानात्' इत्यादावित्यर्थः । **साध्याभावस्य** - साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य । **अतथात्वेऽपि** - **स्वविशिष्टस्य** हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणस्य अप्रसिद्ध्या विवक्षणीयप्रतियोगिसामानाधिकरण्यविरहेऽपि । **न क्षतिः**— नाव्याप्तिः ।

'वन्हिमान् धूमात्' इत्यादौ धूमावयवादिवृत्तेः वन्हित्वाद्यवच्छिन्नाद्यभावस्य स्वविशिष्टं यत् हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणं तदवच्छेदेन प्रतियोगिसामानाधिकरण्यं संभवत्येव। तथाविधहेत्वधिकरणपर्वतादेः जन्यमात्रस्य कालोपाधितया कालिकसंबन्धेन तादृशाभावविशिष्टत्वात् तदन्तर्भावेन तेन संबन्धेन तादृशप्रतियोगिसामानाधिकरण्यस्यापि सत्त्वाच्च अभाववैशिष्ट्यादौ संबन्धविशेषानिवेशात् इत्यभिप्रायेण नित्यमात्रवृत्तिहेतुकस्थलानुधावनम्।

अथ वन्हिव्यापकस्य चरमक्रियाभावस्य योऽभावः चरमक्रियात्मकः तस्य कालिकसंबन्धेन हेत्वधिकरणे महाकाले वर्तमानस्य न विवक्षणीयप्रतियोगिसामानाधिकरण्यसम्भवः तद्विशिष्टस्य हेतुतावच्छेदकसंयोगेन धूमाधिकरणस्य अप्रसिद्धेः, धूमाधिकरणपर्वतादेः तदसमानकालीनतया तत्र कालिकसंबन्धेनापि तद्वैशिष्ट्यासंभवादिति आत्मत्वसाध्यकपर्यन्तानुधावनमफलम्।

न च-वृत्त्यनियामकसंयोगेन धूमसंबन्धिपरमाणावेव चरमक्रियावैशिष्ट्यस्य प्रसिद्ध्या तत्र चरमक्रियाभावरूपप्रतियोगिनोऽपि सत्त्वात् संभवत्येव विवक्षणीयप्रतियोगिसामानाधिकरण्यम्। तादात्म्यसंबन्धावच्छिन्नहेतुकस्थलानुरोधेन हेत्वधिकरणावच्छेदेनत्यत्र हेतुसंबन्धित्वमात्रस्यैव विवक्षितत्वात् इति—वाच्यम्। यादृशपरमाणौ कदापि धूमसंयोगो नासीत् तदीयचरमक्रियात्मकाभाववैशिष्ट्यस्य हेतुसंबन्धिन्यसत्त्वेन तमादायैव अव्याप्तिसंभवात् इति चेत्, न। **महाकालस्यैव** वृत्त्यनियामकसंयोगसंबन्धेन हेतुसंबन्धितया तत्र कालिकसंबन्धेन चरमक्रियात्मकाभाववैशिष्ट्यस्य दैशिकविशेषणतया तदभावस्यापि सत्त्वेन विवक्षणीयप्रतियोगिसामानाधिकरण्यसंभवात्, **वृत्त्यनियामकसंयोगस्यापि** संयोगत्वेन हेतुतावच्छेदकसंबन्धत्वात्।

न च तथापि वृत्तिनियामकसंयोगेन धूमहेतुकस्थले अव्याप्तिरस्त्येव - इति वाच्यम् । **तेन रूपेण** संबन्धतायां मानाभावात्, कालस्यावृत्तितया कालधूमसंयोगस्य कालनिष्ठधूमाधेयत्वानियामकत्वेऽपि धूमस्य तेन संबन्धेन कालवृत्तित्वमस्त्येव इत्यस्यापि सुवचत्वाच्च । **'वह्निमान् धूमात्'** इत्यादौ साध्याभावमादाय नाव्याप्तिसंभवः; किन्तु चरमक्रियाद्यात्मकमभावमादायैव इत्यव्याप्तेः **स्फुटतर**प्रतिपत्यर्थम् आत्मत्वादिसाध्यकस्थलानुधावनस्य सार्थकत्वाच्चेति ।

विवरणम्

दीधितौ येन संबन्धेन हेतुरित्यादि [पृ.129] । 'यत्समानाधिकरणा' इत्यत्र हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणत्वं निवेशनीयम् । हेतुः येन संबन्धेन साध्यव्याप्यो भवति स संबन्धः हेतुतावच्छेदकसंबन्धः व्याप्यतावच्छेदकसंबन्ध इत्यपि कथ्यते । तादृशसंबन्धानिवेशे समवायेन आत्मत्वे साध्ये समवायेन ज्ञानस्य हेतुत्वे 'अयम् आत्मा ज्ञानात्' इत्यत्र सद्धेतौ अव्याप्तिः । अत्र हेतुः ज्ञानम् । तस्य समवायसंबन्धेनाधिकरणम् आत्मा । विषयतासंबन्धेनाधिकरणं घटादिकमपि । घटादौ च आत्मत्वत्वेन आत्मत्वाभावोऽपि वर्तते । तस्य च प्रतियोगिसामानाधिकरण्यं नास्ति, आत्मनि आत्मत्वाभावविरहात् इति अव्याप्तिः । हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणत्वनिवेशे तु समवायसंबन्धेन ज्ञानाधिकरणमात्मैव । तद्वृत्तिः घटत्वेन आत्मत्वाभाव एव । तस्य प्रतियोगिसामानाधिकरण्यसत्वात् नाव्याप्तिरिति भावः ।

गादाधर्यां व्याप्यतावच्छेदकत्वेनेति [पृ.129] । येन संबन्धेन हेतुरिति दीधितेः यत्संबन्धावच्छिन्नहेतुतावान् इत्यर्थः । हेतुत्वं च व्याप्यत्वम् इत्याशयेन एवं व्याख्यातम् । 'यत्समानाधिकरणाः' इत्यत्रापि हेत्वधिकरणत्वं घटकम् । विवक्षणीयप्रतियोगिसामानाधिकरण्येऽपि हेत्वधिकरणत्वं घटकम् । प्रकृतदीधितिग्रन्थः यत्सामाना-

धिकरण्यघटकहेत्वधिकरणत्वे संबन्धविशेषनिवेशप्रयोजनप्रदर्शकः। न तु प्रतियोगिसामानाधिकरण्यघटकहेत्वधिकरणत्वे संबन्धविशेषनिवेशप्रयोजनप्रदर्शकः। तस्य पश्चाद्वक्ष्यमाणत्वात् इति स्पष्टीकरणाय आह—**बोध्यम्** [पृ.129] इत्यस्य इति।

व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य प्रतियोगिसमानाधिकरणत्वात् अव्याप्त्यप्रसक्तेः आह - **गादाधर्यां साध्याभावस्येति** [पृ.129]। **स्वविशिष्टस्येति** [पृ.129]। आत्मत्वत्वेन आत्मत्वाभावविशिष्टस्य समवायसंबन्धेन हेत्वधिकरणस्य आत्मनः अप्रसिद्धया स्वविशिष्टहेतुतावच्छेदकसंबन्धेन हेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिरिति भावः।

ननु हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणत्वानिवेशे 'वह्निमान् धूमात्' इत्यादावपि समवायसंबन्धेन धूमाधिकरणधूमावयववृत्तेः वह्नित्वावच्छिन्नवह्न्यभावस्य स्वविशिष्टं यत् संयोगसंबन्धेन हेत्वधिकरणं तदप्रसिद्धया तद्घटितप्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिसंभवात् आत्मत्वसाध्यकस्थलानुधावनं किमर्थमित्यत आह—**वह्निमान् धूमात् इत्यादाविति** [पृ.130]। विवक्षणीयं यत् स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यं तत्र स्ववैशिष्ट्ये संबन्धविशेषः न निवेश्यते, प्रयोजनविरहात्। तथा च वह्नित्वेन वह्न्यभावस्य ग्रहणेऽपि कालिकसंबन्धेन तद्विशिष्टः धूमाधिकरणपर्वतादिः भवत्येव। जन्यमात्रस्य कालोपाधित्वमते जन्यस्य पर्वतादेः कालिकसंबन्धेन सर्वाधारत्वात्। तथा च वह्न्यभावविशिष्टपर्वते वह्निः संयोगसंबन्धेन, वह्न्यभावः कालिकसंबन्धेन अस्तीति विवक्षणीयप्रतियोगिसामानाधिकरण्यसद्भावात् अव्याप्तेरप्रसक्त्या आत्मत्वसाध्यकस्थलानुधावनम्। तत्र तु समवायेन हेत्वधिकरणभूतः आत्मा कालिकसंबन्धेनापि आत्मत्वत्वावच्छिन्न-आत्मत्वाभाव-

विशिष्टो न भवति। नित्येषु कालिकायोगात्। तथा च स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या अव्याप्तिः। तद्वारणाय 'यत्समानाधिकरणाः' इत्यत्र यत्पदार्थहेत्वधिकरणत्वं हेतुतावच्छेदकसंबन्धेन विवक्षणीयम् इति भावः। तथा च यद्रूपावच्छिन्नहेतुतावच्छेदकसंबन्धावच्छिन्नयन्निष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तयः 'यत्समानाधिकरणा' इत्यस्य अर्थः।

हेत्वधिकरणत्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशे 'वन्हिमान् धूमात्' इत्यादावपि अव्याप्तिः भवति। अतः स्थलान्तरानुधावनं व्यर्थमित्याशङ्कते **अथ वह्निव्यापकस्येत्यादिना** [पृ.130]। यत्र यत्र वह्निः पर्वतादौ तत्र चरमक्रियाभावः वर्तते। अतः वह्निव्यापकः चरमक्रियाभावः। चरमक्रियाभावनिष्ठा प्रतियोगिता वह्निव्यापकतावच्छेदिका। तन्निरूपकः अभावः चरमक्रियाभावत्वेन चरमक्रियाभावाभावः चरमक्रियात्मकः। स च कालिकसंबन्धेन हेतोः धूमस्य अधिकरणे महाकाले कालिकसंबन्धेन वर्तत इति यावदभावान्तर्गतः। तस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यं न संभवति। तच्छरीरे हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणत्वस्य निवेशयिष्यमाणतया संयोगसंबन्धेन धूमाधिकरणस्य पर्वतस्य स्वपदग्राह्यचरमक्रियाविशिष्टत्वाभावात्। स्वविशिष्टहेत्वधिकरणाप्रसिद्धेः।

न च पर्वतस्य कालिकसंबन्धेन चरमक्रियाविशिष्टत्वम् अस्ति इति वाच्यम्। जन्यमात्रस्य कालोपाधितामतेऽपि कालिकसंबन्धेन स्वसमानकालिकपदार्थाधिकरणत्वमेव जन्यस्य स्वीक्रियते। पर्वताद्यसमानकालीना या चरमक्रिया तद्विशिष्टत्वं कालिकसंबन्धेनापि पर्वतादेर्न संभवति। तथा च चरमक्रियात्मकमभावमादाय स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या अव्याप्तेः 'वह्नि-

मान् धूमात्' इत्यादावपि संभवात् आत्मत्वसाध्यकस्थलानु-धावनम् अफलम् इति भावः ।

न च वृत्त्यनियामकसंयोगेनेति [पृ.130] । प्रतियोगिसामानाधिकरण्यशरीरप्रविष्टहेत्वधिकरणपदेन धूमसंयुक्तः परमाणुः गृह्यते । स च चरमक्रियाविशिष्टः भवति । तत्र कालान्तरावच्छेदेन चरमक्रियाभावः कालान्तरावच्छेदेन चरमक्रिया च वर्तत इति स्वविशिष्टधूमसंयुक्तपरमाण्वन्तर्भावेण चरमक्रियात्मकाभावस्य प्रतियोगिसामानाधिकरण्यसत्त्वात् नाव्याप्तिः । अतः स्थलान्तरानुधावनम् ।

ननु धूमस्य परमाणोश्च यः संयोगः तस्य वृत्त्यनियामकतया तेन संबन्धेन धूमाधिकरणं परमाणुर्न भवतीति कथं परमाणुं गृहीत्वा प्रतियोगिसामानाधिकरण्योपपादनम् इति वाच्यम् । तादात्म्यसंबन्धावच्छिन्नहेतुकस्थले वृत्त्यनियामकतादात्म्यसंबन्धेन हेत्वधिकरणाप्रसिद्ध्या अव्याप्तेर्वारणाय विवक्षणीयप्रतियोगिसामानाधिकरण्यघटकहेत्वधिकरणपदेन हेतुसंबन्धिन एव विवक्षितत्वात् । परमाणोरपि वृत्त्यनियामकसंयोगसंबन्धेन धूमसंबन्धित्वात् इति भावः ।

यादृशपरमाणौ कदापि धूमसंयोगो नासीत् तादृशपरमाणुनिष्ठा या चरमक्रिया तदात्मकस्य अभावस्यापि हेत्वधिकरणमहाकालवृत्तितया यावदभावान्तर्गतत्वेन तस्य स्वविशिष्टधूमसंयुक्ताप्रसिद्ध्या अव्याप्तिः । धूमासंयुक्तपरमाणुनिष्ठायाः चरमक्रियायाः धूमसंयुक्ते परमाणौ असत्त्वात् । तथा च तादृशाभावामादाय स्वविशिष्टहेत्वधिकरणाप्रसिद्धिनिबन्धनः दोषः 'वन्हिमान् धूमात्' इत्यादावपि संभवतीति तत्स्थलोपेक्षा नोचिता इति आक्षेपः ।

समाधत्ते—**महाकालस्यैवेति** [पृ.130]। महाकालस्य विभुत्वात् विभुत्वस्य सर्वमूर्तद्रव्यसंयोगित्वरूपत्वात् धूमसंयोगोऽपि महाकालेऽस्तीति वक्तव्यम्। परन्तु महाकालधूमयोः संयोगः वृत्त्यनियामकः। तथापि संयोगसंबन्धेन धूमसंबन्धी महाकालः। तदन्तर्भावेण चरमक्रिया तदभावश्च वर्तत इति प्रतियोगिसामानाधिकरण्यसत्त्वात् लक्षणसमन्वयसंभवेन स्थलान्तरानुधावनम् इति भावः।

ननु वृत्तिनियामकसंबन्धस्यैव व्याप्यतावच्छेदकत्वात् वृत्यनियामकसंयोगस्य हेतुतावच्छेदकसंबन्धत्वमेव नास्ति इत्यत आह—**वृत्यनियामकसंयोगस्यापीति** [पृ.131]। **न च तथापीति** [पृ. 131]। वृत्तिनियामकसंयोगेन धूमस्य हेतुत्वस्थले तेन संबन्धेन धूमसंबन्धी महाकालो न भवतीति महाकालान्तर्भावेण प्रतियोगिसामानाधिकरण्यस्य अनुपयोगात् अव्याप्तिरस्त्येवेति भावः। **तेन रूपेणेति** [पृ.131]। वृत्तिनियामकसंयोगत्वेन रूपेण संयोगस्य संबन्धत्वम् अप्रामाणिकम्। किन्तु संयोगत्वेन रूपेणैव संयोगस्य संबन्धत्वम्। तथा च हेतुतावच्छेदकसंबन्धः संयोगत्वावच्छिन्नसंयोगः। वृत्यनियामकसंयोगस्यापि संयोगत्वेन रूपेण हेतुतावच्छेदकसंबन्धत्वात् तेन संबन्धेन धूमसंयुक्तं महाकालं गृहीत्वा तदवच्छेदेन चरमक्रियात्मकाभावस्य प्रतियोगिसामानाधिकरण्यसंभवात् नाव्याप्तिः।

किञ्च महाकालधूमयोः यः संयोगः सः महाकालनिष्ठं यत् धूमनिरूपिताधेयत्वम् तन्नियामकः न भवति। 'धूमे संयोगेन महाकालः' इति प्रतीत्यभावात्। परन्तु धूमनिष्ठं यत् महाकालनिरूपितम् आधेयत्वं तन्नियामकः भवति धूममहाकालसंयोगः। 'महाकाले संयोगेन धूमः' इति प्रतीतेः। तथा च धूमनिष्ठवृत्तिनियामकसंयोगसंबन्धेन हेतुतावच्छेदकेन संबन्धी महाकालः।

तदवच्छेदेन चरमक्रियात्मकाभावस्य पूर्वोक्तरीत्या प्रतियोगिसामानाधिकरण्यसत्त्वात् न 'वह्निमान् धूमात्' इत्यादावव्याप्तिः।

किञ्च 'वह्निमान् धूमात्' इत्यादौ साध्याभावमादाय न अव्याप्तिः। किन्तु साध्याभावानात्मकं चरमक्रियात्मकम् अभावमादायैव अव्याप्तिः। 'अयम् आत्मा ज्ञानात्' इत्यादौ तु साध्याभावम् आत्मत्वत्वेन आत्मत्वाभावमादायापि अव्याप्तिः इति स्फुटीकरणार्थं वह्निसाध्यकस्थलमुपेक्ष्य आत्मत्वसाध्यकस्थलानुधावनमिति भावः।

वृत्त्यनियामकत्व - वृत्तिनियामकत्वयोः एकत्र संयोगे अनुपपत्तिः इति यद्यालोच्यते, तदाप्याह - **वह्निमान् धूमात् इत्यादाविति** [पृ.131]। **'स्फुटतरे'** [पृ.131] त्युपादानात् साध्याभावातिरिक्ताभावगवेषणे प्रयासाभावः सूचितः।

दीधितिः

एवं दलान्तरेऽपि संबन्धभेदनिबन्धनो दोषः संबन्धैक्यविवक्षया निरसनीयः।

गादाधरी

(२१) एवं दलान्तरेऽपीतिदीधितिग्रन्थावतारः

ननु 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यादौ हेतुसमानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावानामेव स्वविशिष्टहेत्वधिकरणमहाकाले कालिकसंबन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिः।

न च - तादात्म्येन ज्ञानव्यापकस्य आत्मनोऽभाव एव न काले प्रतियोगिसमानाधिकरणः, आत्मनोऽवृत्तितया काले कालिकसंबन्धेन अवृत्तेरिति - वाच्यम्। **आत्मनः कालावृत्तित्वे** कालवृत्तित्वघटितकारणत्वाद्यनुपपत्त्या तदुपगमस्य आवश्यकत्वात्।

नित्यद्रव्याणां कालावृत्तित्वेऽपि 'महाकालभिन्नो द्रव्यत्वात्', 'ईश्वरज्ञानभिन्नं गुणत्वात्' इत्यादावतिव्याप्तिः। **वृत्तिमतामेव** ज्ञानभेदव्यापकतया तदभावानां यावतामेव महाकालेश्वरज्ञानादौ कालिकविशेषणताविषयितासंबन्धघटितप्रतियोगिसामानाधिकरण्य-सत्त्वात् इति अत आह - **एवं दलान्तरेऽपीति** [पृ.136]।

दलान्तरे - प्रतियोगिसामानाधिकरण्यघटकप्रतियोगि-मत्त्वादले। **संबन्धभेदनिबन्धनो दोषः** - कालिकादिसंबन्धमादायाति-व्याप्तिरूपः। **संबन्धैक्यविवक्षया** — व्यापकताघटकसंबन्धप्रति-योगिमत्ताघटकसंबन्धयोरैक्यविवक्षया। तथा च 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्', 'महाकालभिन्नो द्रव्यत्वात्' इत्यादौ **साध्यतावच्छेदकसंबन्धावच्छिन्न**साध्यनिष्ठव्याप्यतानिरूपितव्याप-कताघटकसमवायदैशिकविशेषणतादिसंबन्धेन ज्ञानाभावमहाकाल-भेदाभावादिप्रतियोगिनां कालादौ अवृतेः नातिव्याप्तिरिति भावः।

अत्र च येन येन संबन्धेन स्वप्रतियोगित्वावच्छिन्नस्य साध्यतावच्छेदकावच्छिन्नव्यापकता तेन तेन संबन्धेन प्रतियोगि-सामानाधिकरण्यमभावस्य विवक्षणीयम्। अन्यथा 'इदं नित्य-ज्ञानम्, नित्यत्वे सति सविषयकत्वात्' इत्यादौ हेतुसमानाधि-करणनित्यज्ञानत्वाद्यभावस्य प्रतियोगिनः साध्यं प्रति विषयिता-संबन्धेनापि व्यापकतया तेन संबन्धेन हेत्वधिकरणेश्वरेच्छाकृत्योः प्रतियोगिसामानाधिकरण्येन अतिव्याप्तिः। 'येन येन' इत्युक्तौ च तथाविधसमवायादिसंबन्धेन अतथात्वान्नातिव्याप्तिः।

अत्र च साध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपितस्वप्रति-योगित्वावच्छिन्नव्यापकताघटकसंबन्धत्वेन तादृशसंबन्धस्य प्रति-योगिसामानाधिकरण्यशरीरे न **स्वातन्त्र्येण** निवेशः। तथा सति अभावे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिता-

कत्वविशेषणवैयर्थ्यात् । न हि तादृशविशेषणानुपादाने गोत्वाद्य-भावमादाय असंभवः संभवति । गोत्वाद्यभावानामपि हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनिष्ठव्यापकताघटकदै-शिकविशेषणतासंबन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वात् । 'धूम-वान् वह्नेः' इत्यादौ धूमाद्यभावस्य अयोगोलके पूर्वक्षणादिवृत्तित्व-विशिष्टस्वाभावात्मकप्रतियोगिसामानाधिकरण्येऽपि यावद्व्याप-कताघटकसंबन्धान्तर्गतसंयोगादिना प्रतियोगिसामानाधिकरण्यविर-हात् । 'घटत्वाभाववान् मेयत्वात्' इत्यादौ घटत्वाद्यात्मका-भावस्य तादृशप्रतियोगिसामानाधिकरण्येऽपि **विशेष्यतासंबन्ध-घटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य घटावृत्तेः** घटत्वा-भावादिप्रमायाः तादृशसंबन्धेन अभावस्य यावद्व्यापकताघटक-संबन्धान्तर्गततादृशसंबन्धेन घटे प्रतियोगिसामानाधिकरण्यविरहात् अतिव्याप्त्यनवकाशात् । **अपि तु साध्यतावच्छेदकावच्छिन्नव्या-प्यतानिरूपितयद्यत्संबन्धघटितव्यापकतावच्छेदकप्रतियोगिताका ये ये अभावाः** तेन तेन संबन्धेन प्रतियोगिसमानाधिकरणा इत्येवं क्रमेणैव निवेशात् व्यापकतायाः एकदैव लक्षणे प्रवेश इति ।

विवरणम्

एवं दलान्तरेऽपि इति ग्रन्थम् अवतारयति - **ननु ज्ञानवान्** [पृ.136] इत्यादिना । 'आत्मा समवायसंबन्धेन ज्ञानवान्, आत्म-महाकालान्यतरत्वात्' इत्ययं हेतुः व्यभिचारी । समवायसंबन्धेन ज्ञानाभाववति महाकाले आत्ममहाकालान्यतरत्वस्य सत्त्वात् । तत्र हेत्वधिकरणे महाकाले वर्तमानः समवायसंबन्धेन ज्ञानत्वेन ज्ञाना-भावः । स च साध्यतावच्छेदकज्ञानत्वावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताकः । समवायसंबन्धेन ज्ञानं प्रति ज्ञानाभावीयप्रतियोगि-ताविशिष्टस्य ज्ञानस्य व्यापकत्वात् । तथा च यत्समानाधिकरणे-त्यादिविशेषणाक्रान्तः अभावः समवायेन ज्ञानत्वेन ज्ञानाभावः ।

तद्विशिष्टम् आत्ममहाकालान्यत्वरूपहेत्वधिकरणं महाकाल एव। न तु आत्मा। तस्य ज्ञानाभावविशिष्टत्वासंभवात्। महाकालस्य तु समवायसंबन्धावच्छिन्नज्ञानाभावविशिष्टत्वात्। तथा च स्वविशिष्टहेत्वधिकरणमहाकाले कालिकसंबन्धेन ज्ञानस्य, स्वरूपसंबन्धेन ज्ञानाभावस्य च सत्त्वात् प्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिरिति भावः।

न च तादात्म्येनेति [पृ.136]। उक्तस्थले ज्ञानव्यापकं यथा ज्ञानं तथा आत्मापि। समवायेन ज्ञानवति आत्मनि तादात्म्यसंबन्धेन आत्मनः संबन्धित्वात्। अतः आत्माभावीयप्रतियोगिताविशिष्टस्य आत्मनः तादात्म्यसंबन्धेन ज्ञानव्यापकत्वात् ज्ञानव्यापकतावच्छेदिका प्रतियोगिता आत्मनिष्ठा प्रतियोगिता। तन्निरूपकोऽभावः आत्मत्वेन आत्माभावोऽपि। तस्य स्वविशिष्टकालान्तर्भावेण आत्मरूपप्रतियोगिसामानाधिकरण्यं नास्ति। आत्मनः अवृत्तिपदार्थतया काले कालिकसंबन्धेनापि अवृत्तेः। तथा च नातिव्याप्तिरिति भावः।

आत्मनः कालावृत्तित्वे इति [पृ.136]। आत्मनः कालातिरिक्तपदार्थे एव वृत्तिः नाङ्गीक्रियते। कालिकसंबन्धेन कालवृत्तित्वं तु आत्मनः अवश्यमङ्गीकरणीयम्। अन्यथा आत्मनः ज्ञानसमवायिकारणत्वानुपपत्तेः। ज्ञानकारणत्वस्य ज्ञानाव्यहितप्राक्कालवृत्तित्वरूपत्वात्। तथा च आत्मत्वेन आत्माभावस्य ग्रहणेऽपि तत्प्रतियोगिनः आत्मनः कालिकसंबन्धेन कालवृत्तितया कालान्तर्भावेण आत्माभावस्य प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिर्दुर्वारा इति भावः।

ननु कारणत्वं न कार्याव्यवहितप्राक्कालवृत्तित्वम्। किंतु कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणः यः अभावः तदप्रतियोगित्वमेव कारणत्वम्। ईदृशं कारणत्वं तु आत्मनः

कालावृत्तित्वेऽपि संभवतीति आशङ्क्य **कारणत्वादीति** आदिपद-मुपात्तम् । 'आदि'पदेन परमार्थसत्त्वं गृह्यते । परमार्थसत्त्वं च कालवृत्तित्वरूपम् इत्याशयः ।

आत्मनः अवृत्तित्वप्रवादानुरोधेनाह - **नित्यद्रव्याणां कालावृत्तित्वे** इति [पृ.137] । तथा च आत्मनः कालावृत्तित्वे पूर्वोक्त-स्थले अतिव्याप्त्यसंभवेऽपि 'महाकालभिन्नः द्रव्यत्वात्', 'ईश्वर-ज्ञानभिन्नं गुणत्वात्' इत्यादावतिव्याप्तिः । महाकालभेदा-भाववति महाकाले द्रव्यत्वसत्त्वात् ईश्वरज्ञानभेदाभाववति ईश्वर-ज्ञाने गुणत्वसत्त्वाच्च तदुभयं व्यभिचारि । तत्र यावदभावपदेन महाकालभेदाभावस्य ईश्वरज्ञानभेदाभावस्य च ग्रहणेऽपि हेत्वधि-करणे महाकाले ईश्वरज्ञाने च प्रतियोगी महाकालभेदः कालिक-संबन्धेन, प्रतियोगी ईश्वरज्ञानभेदः विषयितासंबन्धेन च, यथाक्रमं वर्तत इति तयोरभावयोः यावद्धेत्वधिकरणान्तर्भावेण प्रतियोगि-सामानाधिकरण्यसत्त्वात् अतिव्याप्तिः । तद्वारणाय प्रतियोगि-सामानाधिकरण्यघटकप्रतियोगिमत्तायां व्यापकताघटकसंबन्धा-वच्छिन्नत्वं निवेशनीयम् । प्रथमस्थले हेत्वधिकरणे महाकाले प्रति-योगिनः ज्ञानस्य कालिकसंबन्धेन सत्त्वेऽपि व्यापकताघटकसमवाय-संबन्धेन असत्त्वात् । द्वितीयतृतीयस्थलयोः महाकालेश्वरज्ञानयोः कालिकसंबन्धेन विषयितासंबन्धेन वा महाकालभेदस्य ईश्वरज्ञान-भेदस्य च सत्त्वेऽपि व्यापकताघटकस्वरूपसंबन्धेन असत्त्वात् प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरिति भावः ।

साध्यतावच्छेदकसंबन्धावच्छिन्नेति [पृ. 137] । साध्यता-वच्छेदकसंबन्धेन साध्यं प्रति स्वप्रतियोगिताविशिष्टस्य येन संबन्धेन व्यापकत्वं भवति तेन संबन्धेन प्रतियोगिसामानाधिकरण्यं विवक्षणीयम् । 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यत्र सम-वायसंबन्धेन ज्ञानं प्रति ज्ञानाभावीयप्रतियोगिताविशिष्टस्य

ज्ञानस्य समवायसंबन्धेन व्यापकत्वं भवति । तेन संबन्धेन ज्ञानाभावप्रतियोगिनः ज्ञानस्य हेत्वधिकरणे काले अभावात् नातिव्याप्तिः । 'महाकालभिन्नं द्रव्यत्वात्' इत्यत्र स्वरूपसंबन्धेन महाकालभेदं प्रति महाकालभेदाभावीयप्रतियोगिताविशिष्टस्य महाकालभेदस्य स्वरूपसंबन्धेन व्यापकत्वात् तेन संबन्धेन महाकालभेदरूपप्रतियोगिनः महाकालेऽभावात् नातिव्याप्तिः । एवम् 'ईश्वरज्ञानभिन्नं गुणत्वात्' इत्यत्रापि ईश्वरज्ञानभेदाभावप्रतियोगिनः ईश्वरज्ञानभेदस्य व्यापकताघटकस्वरूपसंबन्धेन ईश्वरज्ञानेऽवृत्तेः नातिव्याप्तिः ।

ननु येन संबन्धेन लक्षणघटकाभावीयप्रतियोगिताविशिष्टस्य साध्यतावच्छेदकावच्छिन्नव्यापकत्वं तेन संबन्धेन प्रतियोगिमत्त्वविवक्षायामपि 'इदं नित्यज्ञानं नित्यत्वे सति सविषयकत्वात्' इत्यत्र अतिव्याप्तिः । नित्यज्ञानत्वरूपसाध्याभाववति नित्येच्छायां नित्यकृतौ च नित्यत्वे सति सविषयकत्वरूपहेतुसत्त्वात् अयं हेतुः व्यभिचारी । अत्र यावदभावपदेन नित्यज्ञानत्वत्वेन नित्यज्ञानत्वाभावस्य ग्रहणेऽपि तदीयप्रतियोगिताविशिष्टस्य नित्यज्ञानत्वस्य नित्यज्ञानत्वरूपसाध्यं प्रति समवायसंबन्धेनापि व्यापकत्वमस्ति । विषयितासंबन्धेनापि व्यापकत्वमस्ति । साध्यवति नित्यज्ञाने नित्यज्ञानत्वस्य जातिरूपस्य समवायसंबन्धेन सत्त्वात् सर्वविषयके नित्यज्ञाने विषयितासंबन्धेन नित्यज्ञानत्वस्य सत्त्वात् । एवं च विषयितासंबन्धेन व्यापकताघटकेन हेत्वधिकरणभूतेश्वरेच्छायां तत्कृतौ च नित्यज्ञानत्वाभावप्रतियोगिनः नित्यज्ञानत्वस्य सत्त्वात् ईश्वरेच्छाकृत्योरपि सर्वविषयकत्वात् । तथा च प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिः इत्याशङ्क्याह - **अत्र चेति** [पृ.137] । येन येन संबन्धेन स्वप्रतियोगिताविशिष्टस्य साध्यव्यापकत्वं तेन तेन संबन्धेन प्रतियोगिसामानाधिकरण्यमिति विवक्षणीयम् । उक्तस्थले समवायसंबन्धेनापि नित्यज्ञानत्वा-

भावीयप्रतियोगताविशिष्टस्य नित्यज्ञानत्वस्य साध्यव्यापकत्वात् तेन समवायसंबन्धेन नित्यज्ञानत्वस्य ईश्वरेच्छाकृत्योरभावात् प्रतियोगिसामानाधिकरण्यविरात् नातिव्याप्तिरिति भावः ।

नित्यज्ञानत्वं नाम सामानाधिकरण्यसंबन्धेन नित्यत्व-विशिष्टं ज्ञानत्वम् । तत्र ज्ञानत्वस्य जातिरूपस्य समवायसंबन्धेन साध्यव्यापकत्वम् इति ध्येयम् । तथा च व्यापकताघटकयाव-त्संबन्धेन प्रतियोगिमत्वं विवक्षणीयम् इति पर्यवसितम् ।

अत्र चेत्यादि [पृ.137] अभावे साध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदकप्रतियोगिताकत्वविशेषणस्य गोत्वाद्यभावमादाय असंभववारणाय उपात्तत्वात् प्रतियोगिसामानाधिकरण्यघटक-प्रतियोगिमत्तायां साध्यतावच्छेदकावच्छिन्नव्यापकताघटकसंब-न्धस्य 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यादौ अतिव्याप्ति-वारणाय पृथङ्निवेशे अभावे साध्यतावच्छेदकावच्छिन्नव्यापकता-वच्छेदकप्रतियोगिताकत्वविशेषणं व्यर्थं भवति । न च तदनुपादाने गोत्वाभावमादाय असंभवः शङ्कनीयः । गोत्वाभावीयप्रतियोगिता-विशिष्टस्य पूर्वक्षणवृत्तित्वविशिष्टगोत्वाभावाभावस्य वह्नि प्रति स्वरूपसंबन्धेन व्यापकतया व्यापकताघटकस्वरूपसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनः पर्वतादौ सत्त्वेन गोत्वाभावस्य लक्षणघटकत्वेऽपि प्रतियोगिसामानाधिकरण्यस-त्त्वात् असंभवाप्रसक्तेः ।

न च 'धूमवान् वह्नेः' इत्यादौ यावदभावान्तर्गतस्य धूमा-भावस्य व्यापकताघटकस्वरूपसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वा-भावात्मकप्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिरिति वाच्यम् । यावद्व्यापकताघटकसंबन्धेन प्रतियोगिसामानाधि-करण्यस्य विवक्षितत्वात् धूमाभावीयप्रतियोगिताविशिष्टस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावस्य स्वरूपसंबन्धेन धूमव्यापक-

त्ववत् धूमभावीयप्रतियोगिताविशिष्टस्य धूमस्य संयोगसंबन्धेन धूमव्यापकत्वमस्तीति व्यापकताघटकयावत्संबन्धान्तर्गतसंयोग-संबन्धेन धूमाभावस्य प्रतियोगिसामानाधिकरण्यविरहात् अति-व्याप्त्यप्रसक्तेः धूमाभावप्रतियोगी धूमः यावद्धेत्वधिकरणेऽ-योगोलके संयोगसंबन्धेन नास्त्येव । पूर्वक्षणवृत्तित्वविशिष्टस्वा-भावस्तु स्वरूपसंबन्धेन वर्तमानोऽपि यावद्व्यापकताघटकसंब-न्धान्तर्गतसंयोगेन नास्तीति ।

न च-'घटत्वाभाववान् मेयत्वात्' इत्यत्र व्यभिचारिणि अतिव्याप्तिः । तत्र यावदभावान्तर्गतस्य घटत्वाभावाभावस्य स्वरूपसंबन्धघटितव्यापकतावच्छेदकघटत्वाभावनिष्ठप्रतियोगिता-कस्य व्यापकताघटकस्वरूपसंबन्धेन यावद्धेत्वधिकरणघटान्तर्भावेण पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यस-त्त्वात् इति - वाच्यम् ।

अत्र घटत्वात्मकस्य अभावस्य उक्तरीत्या प्रतियोगिसामाना-धिकरण्यसत्त्वेऽपि यावदभावान्तर्गतः यः घटत्वाभावप्रकारकप्रमा-भावः तस्य प्रतियोगिसामानाधिकरण्यं नास्ति । तथा हि - घटत्वाभावरूपसाध्यं प्रति घटत्वात्मकाभावीयप्रतियोगिताविशिष्टः घटत्वाभावः यथ व्यापकः तथा घटत्वाभावप्रकारकप्रमाभावीय-प्रतियोगिताविशिष्टघटत्वाभावप्रकारकप्रमापि विशेष्यतासंबन्धेन व्यापिका । घटत्वाभाववति पटादौ विशेष्यतासंबन्धेन घटत्वा-भावप्रकारकप्रमायाः सत्त्वात् । 'पटः घटत्वाभाववान्' इति प्रतीतेः । तथा च तत्र हेतुसमानाधिकणयावदभावान्तर्गतस्य घटत्वाभावप्रकारकप्रमाभावस्य साध्यव्यापकतावच्छेदकयाव-त्संबन्धान्तर्गतविशेष्यतासंबन्धेन यावद्धेत्वधिकरणघटान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति । घटे घटत्वाभावप्रकारक-प्रमारूपप्रतियोगिनः विशेष्यतासंबन्धेनाभावात् । तथा च प्रति-

योगिसामानाधिकरण्यशरीरे व्यापकताघटकसंबन्धस्य स्वातन्त्र्येण निवेशे कस्यापि दोषस्य अप्रसक्तेः अभावविशेषणं साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वं व्यर्थं स्यात् । अतः स्वातन्त्र्येण न निवेशितम् । किन्तु व्यापकतायाः एकदैव निवेशः । तत्प्रकारस्तु-साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितयद्यत्संबन्धावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाः ये ये अभावाः तेन तेन संबन्धेन प्रतियोगिसमानाधिकरणाः इत्येवम् इति प्रघट्टकार्थः ।

साध्यतावच्छेदकावच्छिन्नव्याप्यतेत्यादि [पृ.137] । साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपिता या लक्षणघटकाभावीयप्रतियोगित्वावच्छिन्ना व्यापकता तदवच्छेदकसंबन्धत्वेनेत्यर्थः । स्वप्रतियोगिताविशिष्टस्य व्यापकत्वात् व्यापकता स्वप्रतियोगित्वावच्छिन्ना भवति । **स्वातन्त्र्येणेति** [पृ.137] पृथगित्यर्थः । **विशेष्यतासंबन्धघटितेति** [पृ.138] । विशेष्यतासंबन्धावच्छिन्ना या साध्यव्यापकता तदवच्छेदिका या प्रतियोगिता तन्निरूपकस्येत्यर्थः । **घटावृत्तेरिति**[पृ.138]कथनं यावद्धेत्वधिकरणे प्रतियोगिसत्त्वं नास्तीति सूचनाय । **अपि तु साध्यतावच्छेदकावच्छिन्नेति** । साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठव्याप्यनिरूपिता यद्यत्संबन्धावच्छिन्ना व्यापकता तदवच्छेदकप्रतियोगितानिरूपका इत्यर्थः ।

गादाधरी

(२२) 'संबन्धैक्यविवक्षया' इति दीधितौ मतभेदोपन्यासः

यत्तु - **साध्यतावच्छेदकसंबन्धेन** प्रतियोगिसामानाधिकरण्यनिवेशात् न 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यादावतिव्याप्तिः । इत्थं च व्यापकतापि साध्यतावच्छेदकसंबन्धघटिता ग्राह्या । अत एव 'वह्निमान् धूमात्' इत्यादौ घटत्वादिना **घटवृत्तित्वविशिष्टद्रव्यत्वत्वादिना वा** द्रव्यत्वादेरभावस्य समवा-

यादिसंबन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसंयोगादिसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिरिति —

तन्न। तथा सति कालिकविशेषणतया महाकालान्यत्वविशिष्टघटादौ साध्ये कालत्वादिहेतावतिव्याप्त्यापत्तेः। तत्र महाकालान्यत्वविशिष्टघटाभावमहाकालान्यत्वाभावादीनां कालिकसंबन्धेन महाकाले घटादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वात्। **यदि च** महाकालान्यत्वविशिष्टोऽपि घटो महाकाले वर्तते—अन्यथा **सिद्धान्तलक्षणे** 'महाकालो घटवान् कालपरिमाणात्' इत्यादौ महाकालान्यत्वविशिष्टघटाभावस्यैव प्रतियोगिव्यधिकरणस्य प्रसिद्धतया **उभयाभावघटित**प्रतियोगिवैयधिकरण्यनिर्वचनायासस्य निष्प्रयोजनकतापत्तेरिति दर्शितविशिष्टसाध्यकस्थले कालत्वादिः सद्धेतुरेवेति मन्यते, तदापि 'घटत्वाभाववान् मेयत्वात्' इत्यादौ घटत्वाद्यात्मकाभावस्य साध्यतावच्छेदकदैशिकविशेषणतासंबन्धेन किञ्चिद्विशिष्टस्वाभावात्मकप्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिरेतन्मते दुर्वारैव।

न च तेन संबन्धेन भावरूपप्रतियोगिसामानाधिकरण्यस्य विवक्षणीयतया नायं दोष इति वाच्यम्। तथा सति अभावसाध्यकसद्धेतौ निरुक्तयावदभावरूपसाध्याभावस्य भावरूपप्रतियोगिसामानाधिकरण्यासंभवात् अव्याप्तेः। अभावपदस्य भावभिन्नाभावपरत्वे कपिसंयोगाभावसाध्यकस्थले कपिसंयोगात्मकाभावमादाय अग्रे स्वविशिष्टपदव्यावृत्तिकथनस्य असाङ्गत्यापत्तेः। एवं साध्यतावच्छेदकसंबन्धेन व्यापकत्वादिनिवेशे 'सर्वत्र' इत्यादिना 'धूमवान् वह्नेः' इत्यादौ वाच्यत्वाद्यभावमादाय अतिव्याप्तिप्रदर्शनस्य असाङ्गत्यापत्तेश्चेति।

विवरणम्

यत्तु—साध्यतावच्छेदकसंबन्धेनेत्यादि [पृ.144]। प्रतियोगिसामानाधिकरण्यघटकप्रतियोगिमत्तायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। अतः 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यादौ ज्ञानत्वेन ज्ञानाभावस्य यावद्धेत्वधिकरणकालान्तर्भावेण कालिकसंबन्धेन ज्ञानरूपप्रतियोगिसामनाधिकरण्यसत्त्वेऽपि साध्यतावच्छेदकसंबन्धेन समवायेन तत्सामानाधिकरण्यं नास्ति। काले समवायसंबन्धेन ज्ञानविरहात् इति नातिव्याप्तिः।

न च - एवं सति 'वह्निमान् धूमात्' इत्यादौ संयोगसंबन्धेन वह्निं प्रति द्रव्यत्वाभावीयप्रतियोगिताविशिष्टस्य द्रव्यत्वस्य समवायसंबन्धेन व्यापकतया साध्यव्यापकतावच्छेदकप्रतियोगिताकयावदभावान्तर्गतस्य घटत्वेन द्रव्यत्वाभावस्य स्वविशिष्टयावद्धेत्वधिकरणपर्वतान्तर्भावेण साध्यतावच्छेदकसंयोगसंबन्धेन प्रतियोगिसामानाधिकरण्यं नास्ति। पर्वते संयोगेन द्रव्यत्वविरहात् इति अव्याप्तिः इति वाच्यम्।

व्यापकतायामपि साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य निवेशनीयत्वात् द्रव्यत्वाभावीयप्रतियोगिताविशिष्टस्य द्रव्यत्वस्य संयोगसंबन्धेन वह्निव्यापकत्वं नास्ति। वह्निमत्पर्वतादौ द्रव्यत्वविरहात्। तथा च साध्यतावच्छेदकसंबन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वं घटत्वेन द्रव्यत्वाभावे नास्तीति तस्य लक्षणाघटकतया नाव्याप्तिः। घटत्वेन वह्न्यभावमादाय समन्वयः।

इत्थं च यत्समानाधिकरणाः साध्यतावच्छेदकसंबन्धावच्छिन्न - साध्यतावच्छेदकावच्छिन्न - साध्यनिष्ठाधेयतानिरूपिताधिकरणतावन्निष्ठात्यन्ताभावनिरूपित - साध्यतावच्छेदक-

संबन्धावच्छिन्न - प्रतियोगितानवच्छेदक - प्रतियोगिताकाः यावन्तोऽभावाः साध्यतावच्छेदकसंबन्धेन प्रतियोगिसमानाधिकरणाः तत्त्वं व्याप्तिरिति ।

समनियताभावैक्यमते घटत्वेन द्रव्यत्वाभावस्य घटत्वेन वह्न्यभावाभिन्नतया साध्यतावच्छेदकसंयोगसंबन्धेन वह्निरूपप्रतियोगिसामानाधिकरण्यसत्त्वान्नाव्याप्तिः इत्यतः अभावान्तरमनुसरति — **घटवृत्तित्वविशिष्टद्रव्यत्वत्वादिनेति** [पृ.144] । द्रव्यत्वत्वेन द्रव्यत्वाभावस्य हेतुसामानाधिकरण्यविरहात् घटवृत्तित्वविशिष्टेत्युक्तम् । **न क्षतिरिति** [पृ.145] । नाव्याप्तिरित्यर्थः ।

'यत्तु' कारमतं दूषयति—**तन्नेत्यादिना** [पृ.145] । यदि साध्यतावच्छेदकसंबन्धेन व्यापकत्वम्, तेनैव संबन्धेन प्रतियोगिसामानाधिकरण्यं च दीधितिकारविवक्षितं स्यात्, तदा 'महाकालान्यत्वविशिष्टघटवान् कालत्वात्' इत्यत्र अतिव्याप्तिः । अत्र साध्यतावच्छेदकसंबन्धः कालिकसंबन्धः । महाकालान्यत्वविशिष्टघटरूपसाध्याभाववति महाकाले कालत्वसद्भावादयं व्यभिचारी । अत्र हेतुसमानाधिकरणयावदभावपदेन महाकालान्यत्वविशिष्टघटाभावो वा महाकालान्यत्वाभावो वा ग्राह्यः । तयोः यावद्धेत्वधिकरणमहाकालान्तर्भावेण प्रतियोगिसामानाधिकरण्यमस्ति । प्रतियोगिनः घटस्य महाकालान्यत्वस्य च साध्यतावच्छेदककालिकसंबन्धेन महाकाले सत्त्वात् । अतः साध्यतावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यं न निवेशनीयम् । व्यापकताघटकसंबन्धेनैव तन्निवेशनीयम् । तन्निवेशे स्वरूपसंबन्धस्यापि व्यापकताघटकतया तेन संबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरिति भावः ।

यदि चेत्यादि [पृ.145]। 'महाकालान्यत्वविशिष्टघटवान्, कालत्वात्' इत्ययं सद्धेतुः। महाकाले कालत्वरूपहेतोः महाकालान्यत्वविशिष्टघटरूपसाध्यस्य च सद्भावात्।

न च - महाकालान्यत्वरूपविशेषणाभावात् कथं महाकाले महाकालान्यत्वविशिष्टघटसत्त्वम् इति - वाच्यम्। विशिष्टघटस्य कालिकसंबन्धेन महाकालवृत्तौ बाधकाभावात्।

किञ्च महाकालान्यत्वविशिष्टघटः यदि महाकाले न स्यात्, तदा सिद्धान्तव्याप्तिलक्षणे 'महाकालो घटवान्, कालपरिमाणात्' इत्यादौ प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावाप्रसिद्धिकथनं न संगच्छते। हेत्वधिकरणे काले महाकालान्यत्वविशिष्टघटाभावस्यैव प्रतियोग्यनधिकरणमहाकालवृत्तेः प्रसिद्धत्वात्। तथा च तादृशाप्रसिद्धिवारणार्थं साध्यतावच्छेदकसंबन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्यनिर्वचनप्रयासस्य व्यर्थत्वापत्तेः। एवं च महाकालान्यत्वविशिष्टघटस्य महाकाले सत्त्वात् तत्साध्यककालत्वहेतुः सद्धेतुरेव। तत्र साध्यतावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यं न दोषमावहति इति मन्यते, तदापि साध्यतावच्छेदकसंबन्धेन व्यापकतायाः तेनैव संबन्धेन प्रतियोगिसामानाधिकरण्यस्य च निवेशे 'घटत्वाभाववान् मेयत्वात्' इत्यादौ अतिव्याप्तिः। तत्र घटत्वात्मकाभावीयप्रतियोगिताविशिष्टस्य घटत्वाभावस्य स्वरूपसंबन्धेनैव साध्यव्यापकतया स्वरूपसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य घटत्वाभावाभावस्य घटत्वरूपस्य यावद्धेत्वधिकरणघटान्तर्भावेण साध्यतावच्छेदकस्वरूपसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिः।

न च साध्यतावच्छेदकसंबन्धेन भावरूपप्रतियोगिसामानाधिकरण्यं विवक्षणीयम्, अतो नेयमतिव्याप्तिः इति - वाच्यम्।

तथा सति अभावसाध्यकसद्धेतौ 'घटत्वाभाववान् पटत्वात्,' इत्यत्र यावदभावान्तर्गतस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य 'घटत्वाभावो नास्ति' इति प्रतीतिसिद्धस्य घटत्वात्मकस्य हेत्वधिकरणे पटे कालिकसंबन्धेन वर्तमानतया लक्षणघटकस्य भावरूपप्रतियोगिसामानाधिकरण्यासंभवात् अव्याप्तिः। तस्याभावस्य घटत्वाभावो हि प्रतियोगी, न स भावरूप इति।

यदि च 'यावन्तोऽभावाः' इत्यत्र अभावपदं भावभिन्नपरम्; अतः 'घटत्वाभाववान् पटत्वात्' इत्यत्र घटत्वात्मकाभावः भावभिन्नो न भवतीति न लक्षणघटकः; किंतु घटत्वाभावप्रकारकप्रमाविशेष्यत्वाभावः लक्षणघटकः; तस्य स्वरूपसंबन्धेन भावरूपप्रतियोगिसामानाधिकरण्यमस्तीति नाव्याप्तिः इत्युच्यते, तदा 'कपिसंयोगाभाववान्, मेयत्वात्' इत्यत्र कपिसंयोगात्मकाभावस्य लक्षणघटकत्वानुपपत्तिः, तस्य भावभिन्नत्वविरहात्। न चेष्टापत्तिः। स्वविशिष्टपदव्यावृत्तिकथनावसरे दीधितिकारैः तस्य लक्षणघटकत्वोक्तेः।

किं च साध्यतावच्छेदकसंबन्धेन व्यापकत्वादिनिवेशे 'सर्वत्र वाच्यत्वाद्यभावस्य तथात्वात्' इति ग्रन्थेन 'धूमवान् वह्नेः' इत्यादौ वाच्यत्वाभावमादाय अतिव्याप्तिप्रदर्शनं न संगच्छते। वाच्यत्वाभावस्य साध्यतावच्छेदकसंयोगसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् अतिव्याप्त्यप्रसक्तेः इति भावः।

उभयाभावघटितेति [पृ.145]। स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वोभयाभाववत्साध्यतावच्छेदकसंबन्धसामान्यकत्वम् उभयाभावघटितप्रतियोगिवैयधिकरण्यम्।

गादाधरी

(२३) व्यधिकरणधर्मावच्छिन्नाभावस्य संबन्धावच्छिन्नप्रतियोगिताकत्वसमर्थनम्

यत्तु - विशेषणताविशेषेण व्यापकता तेनैव संबन्धेन प्रतियोगिसामानाधिकरण्यम्; सर्वत्र साध्यवत्त्वप्रकारकप्रमाविषयत्वाद्यभावमादायैव लक्षणसंगमनम्, अतिव्याप्तिवारणं चेति,

तदपि **उक्तातिव्याप्तेः आत्मत्वादिसाध्यकस्थले साध्याभावमादाय** हेतुतावच्छेदकसंबन्धव्यावृत्तिप्रदर्शनविरोधाच्च अनुपादेयमेव ।

केचित्तु—प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशात् न प्रागुक्तातिव्याप्तिः । इत्थं च व्यापकतापि तेनैव संबन्धेन वाच्या । अतो 'वह्निमान् धूमात्' इत्यादौ संयोगादिघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य समवायादिसंबन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य हेत्वधिकरणे समवायादिना प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः । तादृशाभावानां साध्यतावच्छेदकसंबन्धघटितसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगितावच्छेदकसंबन्धघटितव्यापकतावच्छेदकस्वप्रतियोगिताकत्वाभावेन निरुक्तयावदभावानन्तःपातित्वात् ।

न चैवं—व्यधिकरणधर्मावच्छिन्नाभावस्य संबन्धावच्छिन्नप्रतियोगिताकत्वे मानाभावेन तादृशाभावस्य लक्षणघटकत्वानुपपत्तिरिति - वाच्यम् । 'संयोगेन घटत्वेन पटो नास्ति' इत्यनुभवबलात् तादृशाभावप्रतियोगितायामपि संबन्धस्य अवच्छेदकत्वात् । अनुभवानादरे समानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितायामपि संबन्धस्य अवच्छेदकत्वासिद्धेः ।

अथ बाधबुद्धिप्रतिबन्धकतायाः संबन्धविशेषनियन्त्रितत्वानुरोधेन समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य

संबन्धावच्छिन्नप्रतियोगिताकत्वम् आवश्यकम् । अन्यथा एकैकविधघटाद्यभावज्ञानस्य संयोगसमवायादिरूपनिखिलसंसर्गावगाहिज्ञानप्रतिबन्धकत्वप्रसंगात् ।

न च - संयोगादिसंबन्धावच्छिन्नघटादिप्रकारकबुद्धिं प्रति वस्तुगत्या संयोगादिसंबन्धेन घटादिमत्ताविरोधी योऽभावः तज्ज्ञानत्वेन प्रतिबन्धकत्वात् नोक्तातिप्रसङ्ग इति - वाच्यम् ।

वास्तवतादृशाभावज्ञानत्वादिना प्रतिबन्धकत्वे घटाभावत्वादिना पदार्थान्तरावगाहिज्ञानस्य घटादिमत्ताज्ञानाविरोधित्वप्रसङ्गात् । तस्मात् तत्तत्संसर्गकविशिष्टबुद्धौ तत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वावगाहिज्ञानत्वेनैव प्रतिबन्धकताया वक्तव्यतया समानाधिकरणधर्मावच्छिन्नप्रतियोगितायां संबन्धस्य अवच्छेदकतासिद्धिरिति चेत्,

तर्हि घटत्वादिविशिष्टपटाद्यवगाहिज्ञानघटत्वावच्छिन्नपटाद्यभावज्ञानयोरपि प्रतिबध्यप्रतिबन्धकभावसत्त्वात् तादृशप्रतिबध्यप्रतिबन्धकभावस्य संबन्धविशेषनियन्त्रितत्वानुरोधेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अपि संबन्धावच्छिन्नत्वावश्यकत्वात् । व्यधिकरणधर्मावच्छिन्नाभावज्ञानस्य अप्रतिबन्धकत्वे **बाधग्रन्थे** लाघवोपनीतकाञ्चनमयत्वादिना वह्न्याद्यनुमितिविरोधितया काञ्चनमयत्वावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य हेत्वाभासत्वोक्तेः असांगत्यापत्तेरिति अलमप्रस्तुतविचारेण इति वदन्ति ।

विवरणम्

यत्तु विशेषणताविशेषेणेति [पृ. 150] । दैशिकविशेषणतासंबन्धेन साध्यव्यापकत्वम्, तेनैव संबन्धेन प्रतियोगिसामानाधिकरण्यं विवक्षितम् । 'वह्निमान् धूमात्' इत्यत्र सद्धेतौ सर्वत्र व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः साध्यवत्त्वप्रकारकप्रमा-

विशेष्यत्वाभाव: लक्षणघटक:। यत्र यत्र वह्निः पर्वतादौ तत्र वह्निमत्त्वप्रकारकप्रमाविशेष्यत्वमस्तीति स्वरूपसंबन्धेन तादृशप्रमाविशेष्यत्वं साध्यव्यापकम्। व्यापकतावच्छेदकप्रतियोगिताकः हेतुसमानाधिकरणश्च अभाव: घटत्वादिना वह्निमत्त्वप्रकारकप्रमाविशेष्यत्वाभावः। तस्य पर्वतान्तर्भावेण स्वरूपसंबन्धेन प्रतियोगिसामानाधिकरण्यमस्ति। प्रतियोगिनः वह्निमत्वप्रकारकप्रमाविशेष्यत्वस्य स्वरूपसंबन्धेन पर्वते सत्त्वात् इति लक्षणसमन्वयः।

'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि धूमवत्त्वप्रकारकप्रमाविशेष्यत्वत्वावच्छिन्नाभाव: यावदन्तर्गतः। तस्य यावद्धेत्वधिकरणायोगोलकान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति। अयोगोलके धूमवत्त्वप्रकारकप्रमाविशेष्यत्वस्य स्वरूपसंबन्धेन अभावात् इति नातिव्याप्तिः।

एवं 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यादौ ज्ञानवत्त्वप्रकारकप्रमाविशेष्यत्वत्वावच्छिन्नाभावस्य स्वरूपसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः इति केचिदाहुः।

तदपि न युक्तम्। 'घटत्वाभाववान् मेयत्वात्' इत्यत्र अभावसाध्यकव्यभिचारिणि घटत्वाभावप्रकारकप्रमाविशेष्यत्वाभावस्य स्वरूपसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्त्यापत्तेः। किं च आत्मत्वसाध्यकस्थले 'अयमात्मा ज्ञानात्' इत्यत्र आत्मत्वत्वेन आत्मत्वाभावमादाय प्रसक्ताया: अव्याप्तेः वारणाय यत्समानाधिकरणाः इत्यत्र हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणत्वं विवक्षणीयम् इति यत् दीधितिकारेण पूर्वमुक्तं तन्न संगच्छते। आत्मत्वाभावस्य स्वरूपसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात् इति भावः।

उक्तातिव्याप्तेरिति [पृ.150] । 'घटत्वाभाववान् मेयत्वात्' इत्यत्र अतिव्याप्तेरित्यर्थः । अभावे भावभिन्नत्वस्य प्रतियोगिनि भावत्वस्य च निवेशे उक्तातिव्याप्तेरभावात् दोषान्तरमाह - **आत्मत्वसाध्यकस्थले** इति [पृ.150] । आत्मत्वप्रकारकप्रमा-विषयत्वाभावमादाय हेतुतावच्छेदकसंबन्धव्यावृत्तिसंभवात् आह - **साध्याभावमादायेति** [पृ.150] ।

केचित्तु इति [पृ.150] । 'ज्ञानवान् आत्ममहाकालान्यतर-त्वात्' इत्यादावतिव्याप्तिवारणाय व्यापकताघटकसंबन्धेन प्रति-योगिसामानाधिकरण्यं विवक्षणीयमिति स्वमतमुपन्यस्य साध्यता-वच्छेदकसंबन्धेन विशेषणताविशेषेण च व्यापकतां प्रतियोगि-सामानाधिकरण्यं च वदतां मतं दूषयित्वा इदानीं प्रतियोगिता-वच्छेदकसंबन्धेन व्यापकत्वं प्रतियोगिसामानाधिकरण्यं च निवेशयतां मतम् अनुवदति । यावदभावपदेन यत्संबन्धावच्छिन्न-प्रतियोगिताकः अभावः गृह्यते, स संबन्धः प्रतियोगितावच्छेदक-संबन्धः । 'वह्निमान् धूमात्' इत्यादौ घटत्वेन संयोगसंबन्धेन वह्न्यभावः गृह्यते । अतः संयोगसंबन्धः प्रतियोगितावच्छेदक-संबन्धः । तेन संबन्धेन घटत्वेन वह्न्यभावीयप्रतियोगिता-विशिष्टस्य वह्नेः साध्यव्यापकत्वमस्ति । एवं तेन संबन्धेन पर्वतान्तर्भावेण प्रतियोगिसामानाधिकरण्यं च अस्तीति लक्षण-समन्वयः ।

'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यादौ समवाय-संबन्धावच्छिन्नज्ञानत्वावच्छिन्नज्ञाननिष्ठप्रतियोगिताकाभावः याव-दभावपदेन ग्राह्यः । तस्य प्रतियोगितावच्छेदकसंबन्धः समवाय-संबन्धः । तेन संबन्धेन ज्ञानाभावीयप्रतियोगिताविशिष्टस्य ज्ञानस्य साध्यव्यापकत्वमस्ति । परं तु तेन संबन्धेन ज्ञानाभावस्य कालान्त-र्भावेण प्रतियोगिसामानाधिकरण्यं नास्तीति नातिव्याप्तिः ।

ननु 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यत्र अतिव्याप्तिवारणाय प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यं विवक्ष्यताम्। व्यापकतायां प्रतियोगितावच्छेदकसंबन्धावच्छिन्नत्वं किमर्थं निवेशनीयम् इति चेत्, न। व्यापकतायां तदनिवेशे 'वह्निमान् धूमात्' इत्यादौ अव्याप्तेः। हेतुसमानाधिकरणयावदभावपदेन समवायसंबन्धावच्छिन्नवह्नित्वावच्छिन्नवह्न्यभावः गृह्यते। तस्य संयोगसंबन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वमस्ति। समवायसंबन्धावच्छिन्नवह्न्यभावीयप्रतियोगिताविशिष्टस्य वह्नेः संयोगसंबन्धेन साध्यव्यापकत्वात्। तथा च यावदन्तर्गतस्य समवायसंबन्धेन वह्न्यभावस्य हेत्वधिकरणपर्वतान्तर्भावेण प्रतियोगितावच्छेदकसमवायसंबन्धेन वह्निसामानाधिकरण्यं नास्तीत्यव्याप्तिः। तद्वारणाय व्यापकतायामपि प्रतियोगितावच्छेदकसंबन्धावच्छिन्नत्वं विवक्षणीयम्। तथा विवक्षणे समवायेन वह्न्यभावः यावदभावपदेन ग्रहीतुं न शक्यते। तत्प्रतियोगिताविशिष्टस्य वह्नेः समवायसंबन्धेन वह्निव्यापकत्वविरहात्। तस्य प्रतियोगितावच्छेदकसंबन्धावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात्। किं तु संयोगसंबन्धेन वह्न्यभाव एव ग्राह्यः। तत्प्रतियोगिनः वह्नेः प्रतियोगितावच्छेदकसंयोगसंबन्धेन वह्निव्यापकत्वात्। तथा च संयोगसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकं संयोगसंबन्धेन घटत्वेन वह्न्यभावं गृहीत्वा तस्य संयोगसंबन्धेन वह्निसामानाधिकरण्यसत्त्वात् लक्षणसमन्वयः कार्य इति भावः।

तादृशाभावानामिति [पृ.150]। समवायादिसंबन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावानामित्यर्थः। **साध्यतावच्छेदकसंबन्धघटितेति** [पृ.150]। साध्यतावच्छेदकसंबन्धावच्छिन्ना या साध्यनिष्ठा व्याप्यता तन्निरूपिता या स्वप्रतियोगितावच्छेदकसंबन्धावच्छिन्ना व्यापकता तदवच्छेदिका या स्वनिरूपिता प्रति-

योगिता तन्निरूपकत्वाभावेनेत्यर्थः। स्वपदेन यावदभावपदेन योऽभावो गृह्यते स ग्राह्यः।

ननु स्वप्रतियोगितावच्छेदकसंबन्धेन व्यापकत्वादिविवक्षणे व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वानुपपत्तिः। तस्य संबन्धावच्छिन्नप्रतियोगिताकत्वे प्रमाणाभावेन तन्निरूपितप्रतियोगितावच्छेदकसंबन्धस्याप्रसिद्ध्या तादृशसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात् इत्याशयेन शंकते - **न चैवमिति** [पृ.150]।

समाधत्ते - **संयोगेन घटत्वेनेति** [पृ.150]। 'संयोगेन घटत्वेन पटो नास्ति' इत्यनुभव एव व्यधिकरणधर्मावच्छिन्नाभावस्य संबन्धावच्छिन्नप्रतियोगिताकत्वे प्रमाणम्। अस्मिन्ननुभवे संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नपटनिष्ठप्रतियोगिताकाभावस्य विषयत्वात्। यदि अनुभवः न प्रमाणं, तर्हि समानाधिकरणधर्मावच्छिन्नाभावस्यापि संबन्धावच्छिन्नप्रतियोगिताकत्वं न सिद्ध्येत्। 'संयोगेन घटत्वेन घटो नास्ति' इति अनुभवस्यैव तत्र प्रमाणत्वात् इति भावः।

समानाधिकरणधर्मावच्छिन्नाभावस्य संबन्धावच्छिन्नप्रतियोगिताकत्वे अनुभवमात्रं न प्रमाणम्। किंतु युक्तिरपि इत्याशयेन शंकते—**अथ बाधबुद्धीत्यादिना** [पृ.150]। तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयः प्रतिबन्धक इति प्रतिबध्यप्रतिबन्धकभावः सर्वसंमतः। परं तु संयोगसंबन्धेन घटवत्ताबुद्धौ समवायसंबन्धावच्छिन्नघटाभावज्ञानस्य अप्रतिबन्धकत्वात् संबन्धविशेषं निवेश्यैव प्रतिबध्यप्रतिबन्धकभावो वक्तव्यः। तत्प्रकारस्तु - संयोगसंबन्धेन घटवत्ताबुद्धिं प्रति संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नघटाभावनिश्चयः प्रतिबन्धक इति। तथा च समानाधिकरणधर्मावच्छिन्नाभावस्य संबन्धावच्छिन्नप्रतियोगिताकत्वं बाध-

बुद्धिनिष्ठप्रतिबन्धकतायाः संबन्धविशेषनियन्त्रितत्वानुरोधात् तद्धर्मविच्छिन्नप्रतियोगित्वांशे तत्संबन्धावच्छिन्नत्वावगाहित्वनियमानुसारात् स्वीक्रियते ।

न च - संयोगसंबन्धेन घटप्रकारकबुद्धिं प्रति वस्तुगत्या संयोगसंबन्धेन घटवत्त्वविरोधी यः अभावः तद्विषयकज्ञानत्वेनैव प्रतिबन्धकत्वम् । नतु संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नत्वावगाहित्वेन । तथा च समानाधिकरणधर्मावच्छिन्नाभावस्य न संबन्धावच्छिन्नप्रतियोगिताकत्वम् इति-वाच्यम् । वस्तुतः घटविरोधी यः अभावः तज्ज्ञानत्वेन प्रतिबन्धकत्वे घटाभावत्वेन रूपेण घटाभावातिरिक्तपदार्थावगाहिभ्रमात्मकज्ञानस्य घटवत्ताज्ञानप्रतिबन्धकत्वं न स्यात् । तस्य वास्तवघटाभावाविषयकत्वात् । तस्मात् तत्संसर्गावच्छिन्नप्रकारताशालिविशिष्टबुद्धौ तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारताशालिज्ञानस्यैव प्रतिबन्धकत्वात् समानाधिकरणधर्मावच्छिन्नप्रतियोगितायां संबन्धावच्छिन्नत्वं सिद्ध्यति । व्यधिकरणधर्मावच्छिन्नप्रतियोगितायां संबन्धावच्छिन्नत्वे तु नैतादृशी युक्तिः दृश्यत इति **'अथे'** [पृ.150] त्यादिना आक्षेपः ।

तत्समाधानमाह - **तर्हीत्यादिना** [पृ.151] । संयोगसंबन्धेन घटत्वेन पटावगाहिबुद्धिं प्रति संयोगसंबन्धेन घटत्वेन पटाभावावगाहिज्ञानमेव प्रतिबन्धकम् । न तु समवायेन तदवगाहिज्ञानम् इत्येवं व्यधिकरणधर्मावच्छिन्नाभावावगाहिज्ञाननिष्ठप्रतिबन्धकताया अपि संबन्धविशेषनियमितत्वानुरोधेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अपि संबन्धावच्छिन्नत्वमावश्यकम् । न च - व्यधिकरणधर्मावच्छिन्नाभावज्ञानस्य प्रतिबन्धकत्वमेव नास्तीति - वाच्यम् । काञ्चनमयत्वप्रकारेण वह्निविषयकानुमितिं प्रति काञ्चनमयत्वरूपव्यधिकरणधर्मावच्छिन्न-

वह्निनिष्ठप्रतियोगिताकाभावज्ञानस्य प्रतिबन्धकत्वं स्वीकृत्य अनुमितिप्रतिबन्धकज्ञानविषयस्य काञ्चनमयत्वावच्छिन्नवह्न्यभावस्य हेत्वाभासत्वं **बाधग्रन्थे** मणिकारैर्यदुक्तं तदसाङ्गत्यापत्तेः इति भावः ।

लाघवोपनीतेति [पृ.151] । वह्नेः काञ्चनमयत्वे लाघवमिति लाघवज्ञानसहकृतवह्नित्वावच्छिन्नव्याप्यवत्तापरामर्शजन्या या काञ्चनमयत्वप्रकारेण वह्न्यनुमितिः तत्प्रतिबन्धकज्ञानविषयतया इत्यर्थः ।

गादाधरी

तदपि न साधीयः। निखिलाभावस्य किंचिद्विशिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकीभूतदैशिकविशेषणतासंबन्धेन तादृशप्रतियोगिसामानाधिकरण्यसत्त्वेन व्यभिचारिणि अतिव्याप्तेः । यावत्प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे च निखिलव्यधिकरणधर्मावच्छिन्नाभावानाम् ऐक्यमते निखिलसंबन्धानामेव एकैकतादृशाभावप्रतियोगितावच्छेदकतया क्वचिदपि हेत्वधिकरणे संयोगविषयित्वादिरूपसकलसंबन्धेन प्रतियोगिनोऽवृत्तेः असंभवापत्तेः । **प्रकारान्तरानुसरणे** च गौरवादिति ।

विवरणम्

प्रतियोगितावच्छेदकसंबन्धेन व्यापकत्वादिवदतां मतम् एतावता अनूदितम् । तद्दूषयति - **तदपि न साधीय** [पृ.157] इत्यादिना । प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि अतिव्याप्तिः । तथा हि - अत्र लक्षणघटकस्य धूमत्वेन धूमाभावस्य धूमोऽपि प्रतियोगी; पूर्वक्षणवृत्तित्वविशिष्टधूमाभावाभावोऽपि प्रतियोगी । अत्र धूमाभावनिरूपितधूमनिष्ठप्रतियोगितावच्छेदकसंबन्धः संयोगसंबन्धः । धूमाभावनिरूपितपूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठ-

प्रतियोगितावच्छेदकसंबन्धः स्वरूपसंबन्धः । एवं च धूमत्वेन धूमाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकस्वरूपसंबन्धेन स्वाभावरूपप्रतियोगिसामानाधिकरण्यं यावद्धेत्वधिकरणायोगोलकान्तर्भावेण अस्तीत्यतिव्याप्तिः ।

न च - प्रतियोगितावच्छेदकयावत्संबन्धेन प्रतियोगिसामानाधिकरण्यं विवक्षणीयम् । धूमाभावस्य प्रतियोगितावच्छेदकयावत्संबन्धान्तर्गतसंयोगसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरिति - वाच्यम् । तथा सति व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावानां सर्वेषामपि केवलान्वयित्वेन समनियततया ऐक्यमिति मते 'संयोगेन घटत्वेन वह्निर्नास्ति' इत्यभावस्य 'विषयित्वेन घटत्वेन वह्निर्नास्ति' इत्यभावस्य च ऐक्यात् संयोगसंबन्धेन घटत्वेन वह्न्यभावनिरूपितप्रतियोगितावच्छेदकतासंबन्धः विषयितासंबन्धोऽपि भवति । तेन संबन्धेन वह्निरूपप्रतियोगिनः पर्वतेऽभावात् प्रतियोगितावच्छेदकयावत्संबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् 'वह्निमान् धूमात्' इत्यादौ असंभवापत्तेः इति भावः ।

ननु यावत्प्रतियोगितावच्छेदकसंबन्धे हेत्वधिकरणवृत्तितावच्छेदकत्वं विशेषणं दातव्यम् । तथा च हेत्वधिकरणवृत्तितावच्छेदकस्वप्रतियोगिता वच्छेदकाः ये ये संबन्धाः प्रत्येकं तेन संबन्धेन प्रतियोगिसामानाधिकरण्यम् इति निवेश्यते । विषयितासंबन्धस्य वृत्त्यनियामकस्य हेत्वधिकरणवृत्तितावच्छेदकत्वं नास्तीति संयोगादिसंबन्ध एव ग्राह्यः । तेन संबन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वात् नासंभव इत्यत आह - **प्रकारान्तरानुसरणे** इति [पृ.157] । यावत्त्वस्य व्यापकत्वरूपत्वात् गौरवमिति भावः ।

एतदुक्तं भवति - हेत्वधिकरणवृत्तितावच्छेदकयावत्प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यं नाम हेत्वधि-

करणवृत्तितावच्छेदक - स्वप्रतियोगितावच्छेदकसंबन्धत्वव्यापकतावच्छेदकताकस्वप्रतियोगिनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तित्वम् । तत्र व्यापकतायाः प्रवेशात् गौरवमिति ।

दीधितिः

रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं **सद्धेतुरेव**। **प्रलये** परमाणौ **उत्पत्तिकाले** चावयविनि **तत्सत्वात्**।

गादाधरी

(२४) रूपादीतिग्रन्थावतारः

अथ यावत्त्वमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकस्य तदुपादाय साध्यतावच्छेदकव्यापकप्रतियोगिताकस्य वा अभावस्य निवेशे उभयत्वावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरुक्ता। न तु रूपसामान्याभावादिसाध्यके **प्राचीनमते** विरुद्धे पृथिवीत्वादिहेतौ इत्यत्र किंबीजम्। तथा सति तत्रापि रूपसामान्याभावाभावस्य रूपाद्यात्मकाभावस्य स्वध्वंसप्रागभावादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वेन अतिव्याप्तिसंभवात् इत्याशंकापरिहाराय तस्य स्वमते लक्ष्यत्वमेव उपपादयति - **रूपादीति** [पृ.159]। **यथोक्तलक्षणे** अतिव्याप्तिशङ्कया तु नैतद्ग्रन्थावतारः। तत्र पृथिव्यन्यत्वाद्यभावस्यापि यावदन्तर्गततया तस्य पृथिव्यां पृथिवीभेदरूपप्रतियोगिसामानाधिकरण्यासंभवेन अतिव्याप्त्यनवकाशात्।

यत्तु—उत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य पृथिव्यामपि सत्त्वेन न पृथिव्यन्यत्वाभावस्य रूपसामान्याभावव्यापकतावच्छेदकप्रतियोगिताकता इत्यभिसंधिपूर्विका प्राचीनप्रवादमात्रेण असद्धेतुत्वाभिमानिनां तटस्थानां यथोक्तलक्षणे अतिव्याप्तिशङ्कां निराकरोति - **रूपादीति** [पृ.159]। **सद्धेतुरेवेति** [पृ.159]। **यादृशरीत्या** पृथिव्यन्यत्वाभावस्य लक्षणाघटकत्वोपपत्तिः, तादृश–

रीत्या साध्यवति हेतुसत्ताया अप्यावश्यकतया सद्धेतुरेवेत्यर्थ इति व्याख्यातम् ।

तदनुपादेयमेव । तादृशाशङ्कितुः पृथिव्यां रूपसामान्याभावसत्त्वे अविप्रतिपत्तावेव अतिव्याप्तिशङ्कासंभवेन अग्रे पृथिव्यां रूपसामान्याभावव्यवस्थापनौपयिकाकाङ्क्षानुपपत्त्या तदसांगत्यापत्तेः ।

प्रलये [पृ.159] - **महाप्रलये** । परमाणूनां नित्यतया तत्रोत्पत्तिकालावच्छेदेन रूपसामान्याभावासंभव इति भावः ।

यद्यपि पाकाद्रूपनाशोत्पत्तिकाले पूर्वरूपात्मकप्रतिबन्धकसत्त्वेन रूपान्तरानुत्पादेन इदानीमपि परमाणौ रूपसामान्याभावसंभवः, तथापि अविनश्यदवस्थस्य रूपस्य रूपप्रतिबन्धकत्वे पूर्वरूपनाशोत्पत्तिक्षण एव पाकजरूपोत्पत्तिसंभव इत्यभिप्रायेण प्रलयपर्यन्तानुधावनम् ।

उत्पत्तिकाले इति [पृ.159] । अवयविद्रव्यस्य जन्यतया प्रलये असत्त्वात् तदवच्छेदेन तत्राभावासंभव इति भावः । **तत्सत्त्वात्** [पृ.159] - रूपादिसामान्याभावसत्त्वात् ।

विवरणम्

रूपादिसामान्याभावे इति दीधितिम् अवतारयति—**अथ यावत्त्वमनुपादाय इति** [पृ.159] । पूर्वं 'अत एव भूतत्वमूर्तत्वोभयवान्' इत्यादिदीधितिग्रन्थस्य अवतरणिकायां यावत्त्वमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकः कश्चिदभावः प्रतियोगिसमानाधिकरणः इति विवक्षणे 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिवारणेऽपि 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यत्र अतिव्याप्तिरिति भट्टाचार्यैरुक्तम् । तर्कालङ्कारैस्तु यावत्त्वमुपादाय साध्यतावच्छेदकव्यापकप्रतियोगिताकाः यावन्तोऽभावाः प्रतियोगिसमानाधिकरणाः इति विवक्षणे 'धूमवान् वह्नेः' इत्यादौ अति-

व्याप्तिवारणेऽपि 'भूतत्वमूर्तत्वोभयवान् मूर्तत्वात्' इत्यत्र अतिव्याप्तिः इत्युक्तम्। उभाभ्यामपि उभयत्वावच्छिन्नसाध्यके व्यभिचारिणि अतिव्याप्तिः प्रदर्शिता। विरुद्धविशेषेऽपि संभवन्त्याः अतिव्याप्तेः उपेक्षा किमर्थं कृता।

तथा हि - 'रूपसामान्याभाववान् पृथिवीत्वात्' इति हेतुः विरुद्धः। पृथिवीत्वाधिकरणपृथिव्यां रूपस्य सत्त्वेन रूपसामान्याभावविरहात् पृथिवीत्वं रूपसामान्याभावविरुद्धम्। तत्र साध्यतावच्छेदकं रूपसामान्याभावत्वम्। तद्व्याप्यप्रतियोगिताकः तद्व्यापकप्रतियोगिताकश्च रूपसामान्याभावाभावः रूपात्मकः तस्य प्रतियोगिसामानाधिकरण्यमस्ति। रूपस्य रूपध्वंसः रूपप्रागभावश्च प्रतियोगी। तत्सामानाधिकरण्यं रूपात्मकेऽभावे वर्तत इत्येवं विरुद्धेऽपि अतिव्याप्तिसंभवात् तदुपेक्षायां किं बीजम् इत्याशङ्कायां अयं दीधितिग्रन्थः प्रवृत्तः। रूपसामान्याभावे साध्ये पृथिवीत्वं सद्धेतुरेव। न तु विरुद्धम्। पृथिवीत्वरूपहेत्वधिकरणे अवयविरूपपृथिव्यां उत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य सत्त्वात् परमाणुरूपपृथिव्यां प्रलयावच्छेदेन रूपसामान्याभावस्य सत्त्वात्। सद्धेतौ लक्षणगमनं तु इष्टमेवेति तत्र अतिव्याप्तिर्नोक्ता इति भावः।

प्राचीनमते इति [पृ.159]। प्राचीनमते ध्वंसप्रागभावाधिकरणे अत्यन्ताभावः नाङ्गीक्रियते। अतः पृथिवीत्वाधिकरणेऽवयविनि उत्पत्तिकालावच्छेदेन रूपप्रागभावस्य, परमाणौ प्रलयावच्छेदेन रूपध्वंसस्य सत्त्वेन ध्वंसाधिकरणे प्रागभावाधिकरणे च तत्र रूपात्यन्ताभावः न भवितुमर्हतीति पृथिवीत्वं रूपसामान्याभावविरुद्धम्। नवीनमते तु ध्वंसप्रागभावाधिकरणेऽपि अत्यन्ताभावः स्वीक्रियत इति तस्य सद्धेतुत्वम्।

ननु 'अत एव भूतत्वमूर्तत्वोभयवान्' इति ग्रन्थः बहुव्यवहितः। तदुपरि शङ्कासमाधानपरतया एतद्दीधितिग्रन्थस्य

व्याख्यानं नोचितम् । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावघटितलक्षणे अतिव्याप्तिशङ्कासमाधानपरत्वमेव युक्तमित्यत्राह-**यथोक्तलक्षणे इति** [पृ.159] । 'रूपसामान्याभाववान् पृथिवीत्वात्' इत्यत्र साध्यतावच्छेदकरूपसामान्याभावत्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावान्तर्गतः पृथिव्यन्यत्वाभावोऽपि । यत्र यत्र रूपात्यन्ताभावः वाय्वादौ तत्र पृथिव्यन्यत्वस्य सत्त्वात् पृथिव्यन्यत्वं साध्यव्यापकम् । पृथिव्यन्यत्वनिष्ठप्रतियोगिता साध्यव्यापकतावच्छेदिका । तन्निरूपकाभावः पृथिव्यन्यत्वाभावः । तस्य हेत्वधिकरणपृथिव्यन्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति पृथिव्यन्यत्वरूपप्रतियोग्यभावात् । तथा च यथोक्तलक्षणेऽतिव्याप्त्यसंभवात् यावत्त्वाघटितसाध्यतावच्छेदकव्याप्यप्रतियोगिताकाभावघटितलक्षणे अतिव्याप्तिशंकया अथवा यावत्त्वघटितसाध्यतावच्छेदकव्यापकप्रतियोगिताकाभावघटितलक्षणेऽति व्याप्तिशंकया एतद्दीधितिग्रन्थावतारणमेव युक्तमिति भावः ।

यथोक्तलक्षणेऽतिव्याप्तिशंकानिरासपरतया एतद्दीधिति व्याचक्षाणानां मतमाह - **यत्तु** [पृ.159] इत्यादिना । 'रूपसामान्याभाववान् पृथिवीत्वात्' इत्यत्र पृथिव्यन्यत्वाभावस्य न रूपसामान्याभावव्यापकतावच्छेदकप्रतियोगिताकत्वम् । उत्पत्तिकालावच्छेदेन रूपसामान्याभावरूपसाध्यवत्यां अवयविपृथिव्यां पृथिव्यन्यत्वाभावीयप्रतियोगिताविशिष्टस्य पृथिव्यन्यत्वस्य अभावः वर्तते । तत्प्रतियोगितावच्छेदकत्वमेव पृथिव्यन्यत्वाभावीयप्रतियोगितायामस्तीति । तथा च पृथिव्यन्यत्वाभावस्य लक्षणाघटकतया तस्य च रूपध्वंसरूपप्रागभावात्मकप्रतियोगिसामानाधिकरण्यसद्भावात् यावत्वसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वोभयघटितयथोक्तलक्षणेऽतिव्याप्तिमाशंक्य तस्य सद्धेतुतया समाधानं दीधितिकारः वदति ।

न च - उत्पत्तिकालावच्छेदेन पृथिव्यां रूपसामान्याभाववत्त्वं पुरस्कृत्य पृथिव्यन्यत्वाभावस्य लक्षणघटकत्वं नास्तीत्युच्यते चेत् अस्य कथं विरुद्धत्वम् ? हेत्वधिकरणपृथिव्याम् उत्पत्तिकालावच्छेदेन रूपसामान्याभावात्मकसाध्यसत्त्वात् इति—वाच्यम्। 'अयं हेतुः विरुद्धः' इति प्राचीनानां प्रवादे श्रद्धावतां अस्य असद्धेतुत्वाभिमानिनां तटस्थानां अतिव्याप्तिशंकायाः संभवादिति भावः ।

तादृशाभिमानमेव निराकरोति - **यादृशरीत्येत्यादिना** [पृ.159] । उत्पत्तिकालावच्छेदेन पृथिव्यां रूपसामान्याभावसत्त्वाद्धि पृथिव्यन्यत्वाभावस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वविरहेण लक्षणाघटकत्वं त्वया उपपादितम् । तथा सति उत्पत्तिकालावच्छेदेन रूपसामान्याभावात्मकसाध्यवत्यां पृथिव्यां पृथिवीत्वसत्त्वेन पृथिवीत्वं कथं साध्यविरुद्धं स्यात्, किं तु सद्धेतुरेवेति भावः ।

एवंव्याख्यानं निराकरोति - **तदनुपादेयमेवेति** [पृ.160] । उत्पत्तिकालावच्छेदेन रूपसामान्याभावं पृथिव्यां सिद्धवत्कृत्य हि अतिव्याप्तिः आशङ्किता । तथा सति अग्रे रूपसामान्याभावस्थापनमनावश्यकम् । पृथिव्यां रूपसामान्याभावस्य सिद्धत्वात् इति भावः । तथा च अग्रिमग्रन्थासाङ्गत्यापत्त्या एतादृशं व्याख्यानं नोचितमिति सिद्धम् ।

खण्डप्रलये परमाणुषु रूपसामान्याभावो न संभवति । तथा सति भाविसर्गे रूपानुत्पादप्रसंगः । असमवायिकारणस्य परमाणुरूपस्य अभावात् । तदर्थं परमाणुषु पाककल्पने पूर्वसिद्धरूपस्वीकार एव उचित इत्यभिप्रायेण प्रलये इत्यस्य महाप्रलये इति व्याख्यानं कृतम् । महाप्रलयानन्तरं पुनः सर्गस्यैव अभावात् । महाप्रलयावच्छेदेन परमाणुषु रूपसामान्याभावः संभवतीति भावः ।

ननु परमाणुषु इदानीमपि रूपसामान्याभावः **संभवति।** पाकवशात् पृथिवीपरमाणौ पूर्वरूपनाशोत्पत्तिक्षणे रूपान्तरं नोत्पद्यते। रूपनाशोत्पत्तिपूर्वक्षणे रूपस्य प्रतिबन्धकस्य सत्त्वेन रूपनाशोत्पत्तिक्षणे रूपान्तरोत्पत्त्यसंभवात्। तथा च रूपनाशोत्पत्तिक्षणे रूपसामान्याभावस्य इदानीमपि परमाणुषु संभवात् प्रलयपर्यन्तानुधावनं किमर्थमित्याशङ्क्य अविनश्यदवस्थं रूपमेव रूपान्तरोत्पत्तिप्रतिबन्धकम्। रूपनाशोत्पत्तिपूर्वकालावच्छिन्नं रूपं तु विनश्यदवस्थम्। अतः तस्य रूपान्तरोत्पत्तिप्रतिबन्धकत्वाभावात् पाकात् रूपनाशोत्पत्तिक्षणे रूपान्तरस्योत्पत्त्या रूपसामान्याभावः परमाणौ न संभवतीत्यालोच्य महाप्रलयावच्छेदेन परमाणौ रूपसामान्याभाव उक्तः इति समाधत्ते - **यद्यपीत्यादिना** [पृ.160]। स्वाव्यवहितोत्तरक्षणोत्पत्तिकध्वंसप्रतियोगित्वं विनश्यदवस्थत्वम्।

दीधितिः

न च प्रतियोगिवद् ध्वंसप्रागभावयोः अत्यन्ताभावविरोधित्वम्। मानाभावात्। **अत एव 'अन्तरा श्यामे रक्तं रूपं नास्ति' इति प्रत्ययः।** न च **एष** रक्तिम**ध्वंसाद्य**वगाही। **पूर्वापर**रक्तिमध्वंसप्रागभाववति मध्ये रक्तेऽपि तथा प्रत्ययप्रसङ्गात्।

गादाधरी

(२५) सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावस्य अत्यन्ताभावात्मकतया दोषमाशङ्क्य निरसनम्

ननु सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावस्य अत्यन्ताभावात्मकतया रूपप्रागभाववत्युत्पत्तिकालावच्छिन्नावयविनि रूपध्वंसवति प्रलयावच्छिन्नपरमाणौ कथं रूपसामान्याभावसंभवः? ध्वंसप्रागभावयोः अत्यन्ताभावविरोधित्वात् इत्याशङ्क्य निरस्यति- **न चेति। प्रतियोगिवदिति।** यथा प्रतियोगिनः एककालावच्छिन्नैकदेशावृत्तित्वरूपस्वात्यन्ताभावविरोधिता तथा स्वध्वंसप्रागभाव-

योरपि स्वात्यन्ताभावविरोधिता इति न इत्यर्थः । **मानाभावा-दिति ।**

ननु रूपध्वंसप्रागभावावच्छिन्नाधिकरणे तदत्यन्ताभावस्य वृत्तौ प्रमाणाभावः । घटाद्युत्पत्तिक्षणे **तद्द्वितीयक्षणे** च तत्प्रत्यक्षासंभवेन तद्वृत्तित्वेन रूपात्यन्ताभावप्रत्यक्षस्य सुतरामसंभवात् । द्वितीयादिक्षणावच्छेदेन रूपस्यैव तत्रोत्पत्त्या तदभावीयविशेषणताया असत्त्वेन तृतीयक्षणादावपि तादृशप्रत्यक्षासंभवात् **अनुभवे विप्रतिपन्नस्य** प्रत्यक्षप्रमाणमुद्भाव्य निरसितुमशक्यत्वाच्च । अनुमानं चाप्रयोजकमिति ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वम् अर्थादायातमित्यत आह - **अत एवेति** । ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वाभावादेव ।

अन्तरा श्यामे - पूर्वापरदशायां रक्ते मध्यदशायां श्याम इत्यर्थः । **रक्तं रूपं नास्तीति प्रत्यय** इति । ध्वंसप्रागभावयोः अत्यन्ताभावविरोधित्वे तत्र पूर्वरक्तध्वंसभाविरक्तप्रागभावयोः सत्त्वेन अत्यन्ताभावावगाहिन्याः प्रमात्मकतादृशप्रतीतेः अनुपपत्तिरिति भावः ।

एषः - रक्तं रूपं नास्तीति प्रत्ययः । **ध्वंसादीत्यादिना** प्रागभावपरिग्रहः । **पूर्वापरेति** । यत्र घटादौ पाकात् एकरक्तरूपनाशानन्तरं रूपान्तरमुत्पन्नं तन्नाशानन्तरं च रक्तान्तरं ततः तन्नाशानन्तरोत्पन्नरूपान्तरनाशानन्तरं रक्तान्तरम् उत्पद्यते, तत्र मध्यरक्तदशायां 'रक्तं रूपं नास्ती'ति प्रतीत्यापत्तेरित्यर्थः । तत्रापि रक्तरूपध्वंसप्रागभावयोः सत्त्वादिति भावः ।

एतेन भवन्मते रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववत् **तादृशध्वंसप्रागभावावेव** तादृशप्रतीतिविषयौ । अन्तरा रक्तसमानकालिनौ पूर्वापररक्तध्वंसप्रागभावौ च **न तथाविधौ** इति नातिप्रसङ्ग इति निरस्तम् । **तादृशध्वंसप्रागभावयोरेव रूपान्तरदशायां**

तादृशप्रतीतिनियामकतया **तयोरपि** तथात्वस्वीकारस्य आवश्यकत्वात् । तत्र **मध्यरक्तध्वंसप्रागभावयोः तथात्वस्वीकारे तु** पूर्वापररक्तदशायां **तादृशप्रत्ययापत्तेः** ।

विवरणम्

ननु सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावस्येति [पृ.164] रूपसामान्याभावो नाम रूपत्वावच्छिन्नप्रतियोगिताकोऽभावः । स च अत्यन्ताभावरूपः । अत्यन्ताभावस्यैव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्वीकारात् । परमाणौ प्रलयावच्छेदेन रूपध्वंसस्य, अवयविनि उत्पत्तिकालावच्छेदेन रूपप्रागभावस्य च, सत्त्वात् ध्वंसप्रागभावयोश्च अत्यन्ताभावविरोधित्वात् प्रलये परमाणौ उत्पत्तिकाले च अवयविनि रूपात्यन्ताभावः न संभवति । तत्र तत्सत्त्वमवलम्ब्य रूपात्यन्ताभावसाध्यकपृथिवीत्वहेतोः सद्धेतुत्वकथनं असङ्गतमित्याशङ्क्य तयोः अत्यन्ताभावविरोधित्वाभावेन समाधत्ते - **न च प्रतियोगिवदित्यादिना** [पृ.164] इति भावः ।

प्रतियोगी यथा अत्यन्ताभावविरोधी तथा ध्वंसप्रागभावौ अत्यन्ताभावविरोधिनौ इति न च शङ्कनीयम् । तयोः अत्यन्ताभावविरोधित्वे प्रमाणाभावात् इति भावः । अत्र - 'रूपध्वंसप्रागभावौ न तदत्यन्ताभावविरोधिनौ । तदत्यन्ताभावविरोधित्वे साधकाभावात्' इत्यनुमानं विवक्षितम् ।

'अत एव' [पृ.164] इति ग्रन्थम् अवतारयति-**ननु रूपेति** [पृ.165] । रूपध्वंसप्रागभावयोः रूपात्यन्ताभावविरोधित्वे साधकाभावात् रूपात्यन्ताभावविरोधित्वं यदि नाङ्गीक्रियते, तदा रूपध्वंसप्रागभावाधिकरणे रूपात्यन्ताभावसत्वे साधकाभावात् तत्सत्त्वमपि न संभवतीति आशङ्क्य तत्समाधानपरतया **'अत एव'** इत्यादिग्रन्थः प्रवृत्तः । तथा हि - रूपध्वंसप्रागभावाधिकरणे रूपात्यन्ताभावसत्त्वे किं प्रमाणम् । न तावत् प्रत्यक्षं प्रमाणम् ।

घटोत्पत्तिक्षणे तद्द्वितीयक्षणे च घटस्यैव प्रत्यक्षाभावात् तद्वृत्तित्वेन रूपात्यन्ताभावप्रत्यक्षं न संभवति । तृतीयक्षणे रूपस्य सत्त्वेन रूपात्यन्ताभावविशेषणतारूपसन्निकर्षविरहात् रूपात्यन्ता-भावप्रत्यक्ष न संभवति ।

न च 'घटः रूपसामान्याभाववान्, नित्यरूपवदन्यत्वात्' इत्यनुमानमेव घटे रूपात्यन्ताभावे प्रमाणम् इति - वाच्यम् । तस्य अनुमानस्य अनुकूलतर्कविरहेण अप्रयोजकत्वात् । तथा च ध्वस-प्रागभावाधिकरणे अत्यन्ताभावसत्त्वे प्रमाणाभावात् अर्थात् ध्वंसप्रागभावाधिकरणे अत्यन्ताभावसत्त्वम् आयातम् इति ध्वंसप्रागभावयोः अत्यन्ताभावविरोधित्वं सिद्धयतीत्याशङ्क्य आह-'**अत एवेति** [पृ.165] इति भावः ।

तद्द्वितीयक्षणे [पृ.165] इति । घटप्रत्यक्षं प्रति रूपस्य कारणतया प्रथमक्षणे रूपविरहात् इति भावः । **अनुभवे विप्रति-पन्नस्येति** [पृ.165] । अत्र विप्रतिपत्तिः 'घटे रूपं नास्ति' इति प्रत्यक्षानुदयेन प्रत्यक्षप्रमाणस्यैव असत्त्वात्, तस्मिन् प्रत्यक्षे प्रमाणत्वसंशयाद्वा ।

दीधितौ **अत एवेति** [पृ. 164] । ध्वंसप्रागभावयोः अत्य-न्ताभावविरोधित्वे यत्र घटे पाकवशात् आदौ रक्तं रूपम्, ततः श्यामरूपम्, ततः रक्तरूपम् तत्र श्यामतादशायां पूर्वरक्तध्वंसस्य उत्तररक्तप्रागभावस्य च सत्त्वेन रक्तरूपात्यन्ताभावावगाही 'रक्तं रूपं नास्ति' इति प्रतीतिः न स्यात् । 'अन्तरा' इत्यस्य 'मध्ये' इत्यर्थः । मध्यकाले श्यामे घटे 'रक्तं रूपं नास्ति' इति प्रतीतिर्न स्यादिति यावत् ।

न च - एषः 'रक्तं रूपं नास्ति' इति प्रत्ययः रक्तरूपध्वंसं तत्प्रागभावं वा अवगाहते । अतो नानुपपत्तिः इति—वाच्यम् । पञ्चरक्तस्थले यत्र आदौ रक्तम्, ततः श्यामः, ततो रक्तम्, ततः

श्याम: तत: रक्तं पाकवशाज्जायते, तत्र मध्यरक्ततादशायां पूर्वरक्तध्वंसस्य पश्चमरक्तप्रागभावस्य च सत्त्वात् तदवगाही 'रक्तं रूपं नास्ति' इति प्रतीति: स्यात् । सा तु नेष्यते । न च 'रक्तं रूपं नास्ति' इति प्रतीते: रक्तात्यन्ताभावावगाहित्वेऽपि पूर्वापररक्तात्यन्ताभावसत्त्वात् मध्यरक्ततादशायां 'रक्तं रूपं नास्ति' इति प्रतीत्यापत्तिः इति वाच्यम् । नञुल्लेखिप्रतीतेः अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकात्यन्ताभावावगाहित्वनियमात् रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाव एव तादृशप्रतीतिविषयः । स च रक्ततादशायां बाधित: । रक्तसामान्याभावस्य तदानीमसंभवात् ।

न च - तादृशप्रतीते: ध्वंसप्रागभावावगाहित्वमतेऽपि रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसाद्यवगाहित्वमेव इष्यते, मध्यरक्ततादशायां रक्तसामान्यध्वंसाद्यसंभवात् तदवगाही 'रक्तं रूपं नास्ती'ति प्रतीतिः न भवतीति - वाच्यम् ।

ध्वंसप्रागभावयो: सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वविरहात् इति भाव: ।

एतेन भवन्मते [पृ.167] **इत्यादि**। ध्वंसप्रागभावयोरपि रक्तत्वावच्छिन्नप्रतियोगिताकत्वं अत्यन्ताभावस्येव अङ्गीक्रियते । 'रक्तं रूपं नास्ति' इति प्रतीते: रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसप्रागभावावेव विषयौ । मध्यरक्तकाले रक्तसामान्यध्वंसप्रागभावौ न स्त: । मध्यरक्तध्वंसप्रागभावयो: तदानीमसंभवात् । रक्तप्रतियोगिकौ पूर्वापररक्तप्रागभावध्वंसौ यद्यपि स्त: तथापि रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसप्रागभावौ न स्त: । अत: विषयविरहात् 'रक्तं रूपं नास्ति' इति प्रत्यय: तदानीं नापादयितुं शक्यत इत्यपि निरस्तम् । यथा पूर्वापररक्तध्वंसप्रागभावयो: श्यामतादशायां 'रक्तं रूपं नास्ति' इति प्रतीतिनियामकत्वं

स्वीकृतम्, तथा तयोरेव पूर्वापररक्तध्वंसप्रागभावयोः मध्यरक्ततादशायां विद्यमानयोः 'रक्तं रूपं नास्ति' इति प्रतीतिनियामकत्वं कुतो नाङ्गीक्रियते । यदि तु मध्यरक्तध्वंसः मध्यरक्तप्रागभावश्च 'रक्तं रूपं नास्ति' इति प्रतीतिनियामकः, अत एव पूर्वापरश्यामतादशायां 'रक्तं रूपं नास्ति' इति प्रतीतिरित्युच्यते, तदा पूर्वरक्ततादशायां मध्यरक्तप्रागभावस्य अपररक्ततादशायां मध्यरक्तध्वंसस्य च सद्भावात् तदानीं 'रक्तं रूपं नास्ति' इति प्रत्ययापत्तिरिति भावः ।

तादृशध्वंसप्रागभावाविति [पृ. 165] रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसप्रागभावावेव 'रक्तं रूपं नास्ति' इति प्रतीतिनियामकौ इति भावः । **न तथाविधाविति** [पृ.165] । न रक्तत्वावच्छिन्नप्रतियोगिताकौ इत्यर्थः । मध्यरक्तदशायां तद्ध्वंसप्रागभावविरहेण रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसप्रागभावयोरसंभवात् इति भावः । **तादृशध्वंसप्रागभावयोरेवेति** [पृ.165] । पूर्वापररक्तध्वंसप्रागभावयोरेवेत्यर्थः । **रूपान्तरदशायाम्** [पृ.165] श्यामरूपदशायाम् । **तादृशप्रतीतिनियामकतया** [पृ.166] - 'रक्तं रूपं नास्ति' इति प्रतीतिनियामकतया । **तयोरपीति** [पृ.166] । रक्तसमानकालीनयोः पूर्वापररक्तध्वंसप्रागभावयोरपि 'रक्तं रूपं नास्ति' इति प्रतीतिनियामकत्वस्य आवश्यकत्वात् इत्यर्थः । **मध्यरक्तेति** [पृ.166] । मध्यकाले वर्तमानस्य रक्तरूपस्य ध्वंसप्रागभावयोरित्यर्थः । **तथात्वस्वीकारे** [पृ.166] 'रक्तं रूपं नास्ति' इति प्रतीतिनियामकत्वस्य स्वीकारे इत्यर्थः । **तादृशप्रत्ययापत्तेरिति** [पृ.166] । पूर्वरक्ततादशायां मध्यरक्तप्रागभावस्य अपररक्ततादशायां मध्यरक्तध्वंसस्य च सत्त्वात् 'रक्तं रूपं नास्ति' इति प्रतीत्यापत्तेरित्यर्थः ।

गादाधरी

(२६) अत्यन्ताभावस्य ध्वंसात्यन्ताभावसमनियतता इति मते दोषः

अथ रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन ध्वंसादिरेव तादृशप्रतीतिविषयः । इत्थं च रक्तरूपदशायां लौकिकप्रत्यक्षात्मकः तादृशप्रत्ययः आपाद्यते अनुमित्यात्मको वा ? आद्ये रक्तरूपलौकिकप्रत्यक्षसामग्र्या रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन तदभावप्रत्यक्षं प्रति प्रतिबन्धकत्वात् नापत्तिः । अन्यथा भवन्मतेऽपि **रूपान्तरकालावच्छेदेन** तद्वृत्तिरक्तत्वावच्छिन्नात्यन्ताभावस्यैव तदानीं **धर्म्यन्तरघटितसन्निकर्षात्** तद्वृत्तितया प्रत्यक्षापत्तेः । विशेष्यघटितसन्निकर्षत्वेन सन्निकर्षस्य अहेतुत्वात् । रक्तरूपग्रहप्रतिबन्धकदोषादिसत्त्वे च तादृशाप्रत्यक्षस्य इष्टत्वात् ।

नान्त्यः । तद्रूपावच्छिन्नव्याप्यवत्ताज्ञानादिसत्त्वे आनुमानिकतथाविधप्रत्ययस्य इष्टत्वात् । न च तादृशप्रत्ययस्य प्रमात्वापत्तिः । भवन्मतेऽपि तथाविधात्यन्ताभावस्य तत्र सत्त्वात् तादृशप्रत्ययस्य प्रमात्वेन इष्टापत्तेः । यदा च तत्र रक्तरूपं तत्कालावगाहिनः 'इदानीमत्र रक्तरूपं नास्ती'ति प्रत्ययस्य प्रमात्वं पुनः अशक्यापादनम् । तादृशप्रत्ययेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वे तत्कालावच्छिन्नत्वावगाहनात् । यदा च न तत्र रक्तरूपं तत्कालावच्छेदेनैव च ध्वंसप्रागभावयोः रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेण तादृशविषयबाधात् । तद्धर्मोपलक्षिताभावांशे तत्कालावच्छिन्नत्वावगाहिप्रत्ययस्य प्रमात्वं पुनः इष्टमेव ।

न च - तद्धर्मिनिष्ठध्वंसादौ तत्कालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वं कल्प्यते; किं वा तत्कालावच्छेदेन तत्र धर्मिण्येव रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावः कल्प्यते इत्यत्र विनिगमनाविरहात् ध्वंसाद्यधिकरणे अत्यन्ताभावसिद्धेः निष्प्रत्यूह_

तैव इति - वाच्यम् । ध्वंसप्रागभावाधिकरणे अत्यन्ताभावाकल्पने ध्वंसादेः अतिरिक्तात्यन्ताभावाकल्पनेन लाघवात् रक्तरूपात्यन्ताभावस्य एतन्मते रक्तरूपध्वंसात्यन्ताभावसमनियततया तस्यैव ध्वंसात्यन्ताभावत्वात् ।

मैवम् । तत्तद्धर्मावच्छिन्नप्रतियोगिताकत्वस्य अव्याप्यवृत्तित्वोपगमे विशेषाभावानामेव अधिकरणविशेषावच्छेदेन सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वसंभवात् अतिरिक्तसामान्याभावासिद्धिप्रसङ्गः । एवमेकस्यैवाभावस्य अधिकरणविशेषकालविशेषवृत्तित्वावच्छेदेन घटत्वपटत्वादिरूपनिखिलधर्मावच्छिन्नप्रतियोगिताकत्वसंभवेन अभावभेदविलोपप्रसङ्गः । एवं रक्तानधिकरणकालावच्छेदेन रक्तध्वंसादेः रक्तत्वावच्छिन्नप्रतियोगिताकत्वोपगमे **तत्समानाधिकरणतत्समनियतध्वंसान्तरस्य** तत्समानाधिकरणैकत्वादेरेव वा तादृशकालावच्छेदेन तत्कल्पनमादाय **विनिगमनाविरहप्रसङ्गश्चेति** ध्वंसप्रागभावाधिकरणे अत्यन्ताभावकल्पनमेव न्याय्यम् ।

विवरणम्

अथ रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन इत्यादि [पृ.170] । 'रक्तं रूपं नास्ति' इति प्रतीतेः रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसादिरेव विषयः । रक्तरूपदशायां रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसावगाहि 'रक्तं रूपं नास्ती'त्याकारकं लौकिकप्रत्यक्षमापाद्यते वा? अनुमित्यात्मकः प्रत्ययः आपाद्यते वा? आद्ये रक्तरूपदशायां विद्यमानायाः रक्तरूपविषयकलौकिकप्रत्यक्षसामग्र्याः संयुक्तसमवायादिघटितायाः रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसप्रागभावप्रत्यक्षं प्रति प्रतिबन्धकत्वात् न 'रक्तं रूपं नास्ति' इति प्रत्यक्षापत्तिः । अन्यथा रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाव एव 'रक्तं रूपं नास्ति' इति प्रतीतिविषयः इति

स्वीकर्तॄणां मतेऽपि श्यामकालावच्छेदेन श्यामघटवृत्तिः रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावः नित्यत्वात् रक्तकालावच्छेदेनापि तत्र वर्तते । तस्य च चक्षुस्संयुक्तश्यामघटविशेषणतारूपसन्निकर्षात् रक्तवृत्तितया प्रत्यक्षमापद्यते । यद्वृत्तितया अभावस्य प्रत्यक्षं भवति तद्घटितसन्निकर्षत्वेन सन्निकर्षस्य अहेतुत्वात् । रक्तरूपग्रहप्रतिबन्धकदोषसत्त्वे रक्तरूपाभावप्रत्यक्षस्य इष्टत्वेन तदानीं चक्षुस्संयुक्तरक्तविशेषणतारूपसन्निकर्षविरहात् धर्म्यन्तरघटितसन्निकर्षादेव तादृशप्रत्यक्षस्योपपादनीयत्वात् ।

न द्वितीयः । रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावव्याप्यवत्ताज्ञानादिसत्त्वे अनुमितिरूपायाः 'रक्तं रूपं नास्ति' इति प्रतीतेः इष्टत्वात् । न च तादृशप्रतीतेः प्रमात्वापत्तिरिति वाच्यम् । इष्टापत्तेः । भवन्मतेऽपि रक्ततादशायां रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य सत्त्वात् । तद्दशायां विषयाबाधेन तादृशप्रतीतेः प्रमात्वस्य इष्टत्वात् । परं तु 'इदानीम् अत्र रक्तं रूपं नास्ति' इति प्रतीतेः प्रमात्वं नेष्यते । तादृशप्रतीत्या रक्तरूपकालावच्छिन्नत्वं रक्तत्वावच्छिन्नप्रतियोगिताकत्वे विषयीक्रियते । तत्तु बाधितम् । यदा रक्तं रूपं नास्ति तत्कालावच्छेदेनैव रक्तरूपध्वंसप्रागभावयोः रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेण ध्वंसप्रागभावनिष्ठरक्तत्वावच्छिन्नप्रतियोगिताकत्वे रक्तकालावच्छिन्नत्वस्य बाधात् तदवगाहिप्रतीतेः प्रमात्वासंभवात् । रक्तत्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितध्वंसादौ रक्तकालावच्छिन्नत्वावगाहिप्रत्ययस्य प्रमात्वं तु इष्टमेव ।

न च तद्धर्मिनिष्ठरक्तरूपध्वंसप्रागभावयोः तत्कालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वं कल्प्यते वा, तत्कालावच्छेदेन तत्र धर्मिणि रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावः कल्प्यते वा इत्यत्र विनिगमनाविरहात् द्वितीयपक्षाश्रयणेन ध्वंसप्रागभावा-

धिकरणे अत्यन्ताभावसिद्धिः दुर्वारा इति वाच्यम् । ध्वंसप्रागभावाधिकरणे अत्यन्ताभावाकल्पने ध्वंसस्य अतिरिक्तः अत्यन्ताभावः न कल्पनीय इति लाघवम् । यत्र यत्र रक्तात्यन्ताभावः तत्र तत्र रक्तध्वंसात्यन्ताभाव इति रक्तात्यन्ताभाव-रक्तरूपध्वंसात्यन्ताभावयोः समनियततया रक्तरूपात्यन्ताभाव एव रक्तरूपध्वंसात्यन्ताभावः, न तु अतिरिक्तः । ध्वंसप्रागभावाधिकरणे अत्यन्ताभावकल्पने तु रक्तात्यन्ताभाववति रक्तध्वंसप्रागभावयोः सत्त्वेन रक्तात्यन्ताभावरक्तध्वंसात्यन्ताभावयोः समनियतत्वविरहात् रक्तात्यन्ताभावापेक्षया अतिरिक्तस्य रक्तध्वंसात्यन्ताभावस्य कल्पनीयतया गौरवात् ।

एतावता 'रक्तं रूपं नास्ति' इति प्रतीतेः रक्तरूपध्वंसप्रागभावावगाहित्वमेव । परं तु रक्तध्वंसप्रागभावयोः रक्तत्वावच्छिन्नप्रतियोगिताकत्वं रक्तरूपशून्यकालावच्छेदेनैव स्वीक्रियते, न तु रक्तरूपकालावच्छेदेन इत्येवम् अव्याप्यवृत्ति । अत एव रक्ततादशायां 'इदानीम् अत्र रक्तं रूपं नास्ति' इति प्रमात्मकप्रतीतिः न भवतीति प्राचीनानां सिद्धान्तसारः । अयमेव **अथेत्या**दिना ग्रन्थेन गादाधर्यामनूदितः ।

रूपान्तरकालावच्छेदेनेति [पृ.170] । श्यामरूपकालावच्छेदेन घटवृत्तिः यः रक्तत्वावच्छिन्नात्यन्ताभावः तस्यैव रक्तकालावच्छेदेन श्यामघटविशेषणतारूपसन्निकर्षबलात् रक्तघटवृत्तितया प्रत्यक्षापत्तिः । रक्तत्वावच्छिन्नात्यन्ताभावस्य विशेष्यभूतः यः रक्तघटः तद्विशेषणतात्वेन सन्निकर्षस्य अहेतुत्वात् इति भावः । **धर्म्यन्तरघटितसन्निकर्षादिति** [पृ.170] ।

एतावता अनूदितं प्राचीनमतं दूषयति **नैवम्** [पृ.171] **इत्यादिना** । यदि तद्धर्मावच्छिन्नप्रतियोगिताकत्वमभावस्य कालविशेषावच्छेदेनैव भवतीत्येवं अव्याप्यवृत्तित्वं स्वीक्रियते, तर्हि

विशेषाभावातिरिक्तसामान्याभावो न सिद्धयेत्। यस्मिन् अधिकरणे घटविशेषाभावाः सन्ति, तदधिकरणावच्छेदेन घटविशेषाभावानां घटत्वरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वम् अङ्गीक्रियते। यस्मिन् अधिकरणे सर्वे घटविशेषाभावाः न सन्ति, किन्तु कतिपये घटविशेषाभावाः सन्ति, तदधिकरणावच्छिन्नत्वं घटत्वावच्छिन्नप्रतियोगिताकत्वे नाङ्गीक्रियते। अतः कतिपयघटविशेषाभाववति 'अत्र घटो नास्ति' इति प्रतीतिः न भवति इत्यपि वक्तुं शक्यत्वात् विशेषाभावातिरिक्तसामान्याभावासिद्धिप्रसङ्गः। एवं सर्वत्र जगतीतले एक एव अभावः वर्तते। न तु 'घटाभावः', 'पटाभावः' इत्येवं अभावभेदः इत्यपि वक्तुं शक्यते।

न च - अभावभेदाभावे घटवति पटाभावसत्त्वेन घटाभावस्यापि प्रतीतिः स्यात् इति - वाच्यम्। घटानधिकरणदेशकालविशेषवृत्तित्वविशिष्टस्यैव अभावस्य घटत्वावच्छिन्नप्रतियोगिताकत्वम्, न तु घटाधिकरणदेशकालवृत्तित्वविशिष्टस्य इत्येवम् अभावनिष्ठघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वादेः अव्याप्यवृत्तित्वं स्वीकृत्य घटवति 'घटो नास्ति' इति प्रतीतेः वारयितुं शक्यत्वात्। एवं च अभावभेदविलोपप्रसङ्गः।

किं च रक्तरूपानधिकरणकालावच्छेदेन रक्तरूपध्वंसादेः रक्तत्वावच्छिन्नप्रतियोगिताकत्वम् इति स्वीकारे रक्तरूपध्वंससमानाधिकरणस्य तत्समनियतस्य ध्वंसान्तरस्यापि रक्तानधिकरणकालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वं विनिगमनाविरहात् प्रसज्यते। अन्ततो गत्वा रक्तध्वंससमानाधिकरणैकत्वादेः रक्तानधिकरणकालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वं विनिगमनाविरहात् सिद्धयेत्। अतः ध्वंसप्रागभावाधिकरणे अत्यन्ताभावास्वीकारे रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्य अव्याप्यवृत्तित्वकल्पने विनिगमनाविरहादिदोषप्रसङ्गात् प्राचीन-

मतं न युक्तम् । ध्वंसप्रागभावाधिकरणे अत्यन्ताभावकल्पनमेव नव्यमतानुसारेण युक्तम् इति भावः ।

तत्समानाधिकरणतत्समनियतध्वंसान्तरस्येति [पृ.171] । रक्तरूपध्वसोत्पत्तिकालोत्पत्तिकरक्तरूपध्वंससमानाधिकरणवायुसंयोगादिध्वंसस्येत्यर्थः । **विनिगमनाविरहप्रसङ्गश्चेति** [पृ.171] । विनिगमनाविरहेण अनन्तध्वंसादौ रक्तत्वावच्छिन्नप्रतियोगिताकत्वकल्पनापत्या गौरवप्रसङ्ग इति भावः ।

गादाधरी

अथ एतादृशयुक्त्या रक्तध्वंसादिमति तदन्यन्ताभावसिद्धावपि रूपध्वंसादिमत्यां पृथिव्यां रूपत्वावच्छिन्नाभावः निर्युक्तिक एव इति चेत्, न । रूपोत्पत्तेः द्वितीयक्षणे पुनः तदधिकरणे सामान्यसामग्रीबलात् रूपान्तरोत्पत्तिवारणाय रूपं प्रति रूपत्वावच्छिन्नाभावस्य हेतुत्वं कल्पनीयम् । एवं च उत्पत्तिकाले पाकाद् रूपनाशोत्पत्तिक्षणे च रूपत्वावच्छिन्नाभावास्वीकारे तदुत्तरं रूपानुत्पादप्रसङ्गः । **रूपोत्पादानन्तरं** रूपसामान्यस्य पुनरुत्पादश्च प्रागभावहेतुतया दुर्वारः । रूपवत्यपि पाकजभाविरूपप्रागभावसत्त्वात् ।

न च - एवमपि पृथिव्यां रूपात्यन्ताभावो निर्युक्तिकः । यत्कालावच्छेदेन तत्र रूपात्यन्ताभावो भवता स्वीक्रियते तत्कालावच्छेदेन रूपप्रागभावे रूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेणैव उपपत्तेरिति - वाच्यम् । दत्तोत्तरत्वात् ।

इदं त्ववधेयम् - उक्तयुक्त्या उत्पत्तिकालावच्छेदेन घटादौ रूपत्वावच्छिन्नाभावसिद्धावपि प्रलयकालावच्छेदेन परमाणौ तत्सत्त्वे मानाभावः । एवं रूपं प्रति रूपत्वावच्छिन्नाभावहेतुत्वमेव न कल्प्यते । स्पर्शोत्पत्त्यनुरोधेन अवश्यकल्पनीयस्पर्शसामान्या-

भावस्य तद्धेतुतयैव रूपवति रूपान्तरापत्तेः शक्यवारणत्वात् । वायौ स्पर्शोत्पत्त्यनन्तरं स्पर्शोत्पत्तिवारणाय स्पर्शं प्रति रूपाभावहेतुतायाः वक्तुमशक्यत्वात्, स्पर्शाभावहेतुतायाः आवश्यकत्वात् ।

न च - रूपं प्रति स्पर्शाभावहेतुत्वे यत्र पाकाद् रूपसत्त्वे स्पर्शनाशः तत्र स्पर्शान्तरोत्पत्तिकाले रूपान्तरोत्पादप्रसङ्ग इति - वाच्यम् । एक जातीयस्यैव अग्निसंयोगस्य रूपरसगन्धस्पर्शनाशकतया स्पर्शनाशकाले रूपनाशस्य आवश्यकत्वादिति ।

एवं ध्वंसप्रागभावाधिकरणे सामयिकात्यन्ताभावानभ्युपगन्तृमते तादृशात्यन्ताभावो न तदधिकरणे कल्प्यते । अनन्ताधिकरणेषु तादृशाभावकल्पनामपेक्ष्य लाघवाद् एकैकेषु तद्धर्मावच्छिन्नवद्धेदेषु तद्धर्मावच्छिन्नप्रतियोगिताकत्वकल्पनेनैव उपपत्तेरिति ध्येयम् ।

विवरणम्

अथ एतादृशयुक्त्या इति [पृ.175] । पूर्वोक्तयुक्त्या रक्तध्वंसप्रागभावाधिकरणे रक्तात्यन्ताभावसिद्धावपि रूपध्वंसप्रागभाववत्यां पृथिव्यां रूपत्वावच्छिन्नाभावः अस्तीत्यत्र युक्तिः नास्ति । अतः रूपसामान्याभावसाध्यकस्य पृथिवीत्वस्य सद्धेतुत्वं नास्तीति प्रश्नः । रूपोत्पत्तेः द्वितीयक्षणे पुनः तस्मिन् अधिकरणे रूपोत्पत्तिवारणाय रूपं प्रति रूपसामान्याभावः कारणमिति वक्तव्यम् । रूपोत्पत्तेः द्वितीयक्षणे रूपसामान्याभावरूपकारणविरहात् पुनः तदधिकरणे न रूपान्तरमुत्पद्यत इति वक्तव्यम् । एवञ्च उत्पत्तिकालावच्छेदेन पृथिव्यां रूपत्वावच्छिन्नाभावः यदि न स्यात् तर्हि तदुत्तरक्षणे रूपानुत्पादप्रसङ्गः । रूपसामान्याभावरूपकारणविरहात् । एवं च उत्पत्तिकाले रूपसामान्याभावोऽस्तीत्युक्ते प्रागभावाधिकरणे अत्यन्ताभावोऽस्तीति फलितम् । पाकात् रूपनाशोत्पत्तिक्षणे रूपसामान्याभावोऽस्तीत्युक्ते ध्वंसाधिकरणे अत्यन्ता-

भावोऽस्तीति फलितम् । एवं च रूपं प्रति रूपसामान्याभावः कारणमिति कार्यकारणभावरूपयुक्तिबलात् रूपध्वंसप्रागभाववत्यां पृथिव्यां रूपत्वावच्छिन्नाभावः सिद्ध्यतीति भावः ।

ननु रूपोत्पत्त्यनन्तरं रूपान्तरोत्पत्तिवारणाय रूपसामान्याभावस्य कारणत्वं मास्तु, रूपप्रागभावस्यैव कारणत्वमस्तु इत्याशङ्क्य रूपोत्पत्तिकाले पाकजभाविरूपस्य प्रागभावोऽस्तीति तद्बलात् रूपोत्पत्त्यनन्तरक्षणे रूपोत्पत्तिः स्यादेव । अतः प्रागभावस्य हेतुत्वं स्वीकृत्य रूपोत्पादानन्तरं पुनः रूपोत्पादः वारयितुं न शक्यते । रूपात्यन्ताभावस्य हेतुतयैव वारयितुं शक्यते । रूपोत्पत्तिक्षणे रूपत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावविरहात् इत्याशयेन समाधत्ते - **रूपोत्पादानन्तरमिति** [पृ.175] ।

इदं तु अवधेयमित्यादि [पृ.175] । रूपोत्पत्त्यनन्तरं रूपान्तरोत्पत्तिप्रसङ्गः इत्यादियुक्त्या उत्पत्तिकालावच्छेदेन घटादौ रूपत्वावच्छिन्नाभावस्य सिद्धावपि प्रलयकालावच्छेदेन परमाणौ रूपत्वावच्छिन्नाभावसत्त्वे प्रमाणं नास्ति । किंच रूपं प्रति रूपत्वावच्छिन्नाभावस्य हेतुत्वं न कल्प्यते । स्पर्शोत्पत्त्यनन्तरं स्पर्शान्तरोत्पत्तिवारणाय स्पर्शं प्रति स्पर्शसामान्याभावस्य हेतुत्वं कल्पनीयम् । रूपस्पर्शयोः एककाले उत्पत्त्या स्पर्शाभावरूपकारणवशात् यदा स्पर्शः उत्पद्यते तदा तस्मादेव कारणात् रूपमपि उत्पत्स्यते । तथा च रूपस्पर्शादिकं प्रति स्पर्शाभाव एव हेतुः । न च विनिगमनाविरहः । वायौ स्पर्शोत्पत्त्यनन्तरं स्पर्शोत्पत्तिवारणाय स्पर्शं प्रति रूपाभावस्य कारणतायाः वक्तुमशक्यत्वात् । वायौ रूपाभावस्य सर्वदा सत्त्वेन तद्बलात् स्पर्शोत्पत्त्यनन्तरमपि स्पर्शोत्पत्त्यापत्तेः । स्पर्शाभावस्य कारणत्वे तु स्पर्शोत्पत्तिकाले स्पर्शाभावरूपकारणविरहात् न तदनन्तरं स्पर्शोत्पत्त्यापत्तिरिति भावः ।

दीधितिः

तत्सामानाधिकरण्यं च **स्वविशिष्टहेत्वधिकरणावच्छेदेन** बोध्यम् । **तेन गोत्वजन्यद्रव्यत्वप्रलयावृत्तित्वादिना गवादेरभावस्य** गवाद्यनधिकरणधर्म्यवच्छेदेन **तद्वति** काले महाकाले वा वृत्तावपि 'यदा गोत्वं तदा गौः', 'यदा कालत्वं तदा जन्यद्रव्यं प्रलयावृत्ति वा' इत्यादौ नातिप्रसङ्गः । **हेतुमति प्रलये तत्सामानाधिकरण्याभावात्** ।

गादाधरी

(२७) महाकाले प्रलयावच्छेदेन वर्तमानतया प्रतियोगिसामानाधिकरण्यमस्ति इति प्रतिपादनम्

तत्सामानाधिकरण्यम् - प्रतियोगिसामानाधिकरण्यम् । **स्वविशिष्टेति** । **स्वम्** - यत्राभावे प्रतियोगिसामानाधिकरण्यं ग्राह्यं स एव ।

हेत्वधिकरणावच्छेदेनेति । हेतुतावच्छेदकसंबन्धेन यद्धेतुतावच्छेदकावच्छिन्नाधिकरणं तत्सामान्यान्तर्भावेणेत्यर्थः । तेन वह्न्याद्यभावस्य धूमावयवाद्यवच्छेदेन 'द्रव्यं विशिष्टसत्त्वात्' इत्यादौ द्रव्यत्वाद्यभावस्य गुणाद्यवच्छेदेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः । **पर्वतादेः कालोपाधित्वानभ्युपगमे** धूमवत्त्वप्रकारकप्रमाविषयत्वाद्यभावस्य क्वचिदपि प्रतियोगिसामानाधिकरण्यस्य उपपादयितुम् अशक्यतया 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्त्यप्रसक्तेः दर्शितविवक्षाया स्थलान्तरे प्रयोजनमाह—**तेन गोत्वेति** । **तद्वति**-गवादिमति । **कालिकसंबन्धेन** गोत्वादिना गवादौ साध्ये प्रलयान्तर्भावेण व्यभिचारिणि गोत्वादिहेतौ लक्षणघटकानां गोत्वाद्यवच्छिन्नाभावानां गवादिमति एतत्काले गवाद्यनधिकरणदेशावच्छेदेन महाकाले च प्रलयावच्छेदेन वर्तमानतया प्रतियोगिसामानाधिकरण्यमक्षतमेव ।

एवं दैशिकविशेषणताविशेषेण गवादिव्यापकप्रलयान्यत्वादेरभावोऽपि तेन संबन्धेन प्रलयान्यत्वादिमति महाकाले कालिकसंबन्धेन वर्तमानतया प्रतियोगिसमानाधिकरण एव। प्रतियोगिसामानाधिकरण्यघटकीभूताभाववृत्तौ संबन्धविशेषानिवेशात् इति अतिव्याप्तिः स्यात्। निरुक्तविवक्षणे च स्वविशिष्टयावद्धेत्वधिकरणान्तर्गतप्रलयान्तर्भावेण तादृशाभावानां न प्रतियोगिसामानाधिकरण्यम्। प्रलये तत्प्रतियोगिनोऽवृत्तेः इति समुदायार्थः। **गवादिव्यापकस्य** चरमध्वंसादेरभावस्य योऽभावः चरमध्वंसादिः तस्य गवादिमति खण्डकाले न प्रतियोगिसामानाधिकरण्यम्, तत्र तस्य अवृत्तेः इत्यतो 'महाकाले वा' इत्युक्तम्। महाकाले च कालिकसंबन्धेन वृत्तेः तथात्वम् अक्षतमेव।

विवरणम्

तत्सामानाधिकरण्यं च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यमिति **दीधितिः**। तत्र हेत्वधिकरणपदेन हेतुतावच्छेदकसंबन्धेन यत् हेतुतावच्छेदकावच्छिन्नाधिकरणं तद्विवक्षितम्। हेतुतावच्छेदकसंबन्धेन इत्यनुक्तौ 'पर्वतो वह्निमान् धूमात्' इत्यादौ लक्षणघटकस्य घटत्वेन वह्न्यभावस्य हेत्वधिकरणसामान्यान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति। समवायसंबन्धेन धूमाधिकरणस्य धूमावयवस्यापि हेत्वधिकरणसामान्यान्तर्गततया तदन्तर्भावेण संयोगसंबन्धेन वह्निरूपप्रतियोगिविरहात् इत्यव्याप्तिः। हेतुतावच्छेदकसंबन्धेनेत्युक्तौ तु संयोगसंबन्धेन धूमाधिकरणं न धूमावयवः, किं तु पर्वत एव। तदन्तर्भावेण वह्निरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् नाव्याप्तिः। हेतुतावच्छेदकावच्छिन्नेत्यनुक्तौ 'द्रव्यं विशिष्टसत्त्वात्' इत्यादौ लक्षणघटकस्य घटत्वेन द्रव्यत्वाभावस्य विशिष्टशुद्धयोरनतिरेकात् शुद्धसत्तारूपहेत्वधिकरणगुणान्तर्भावेण द्रव्यत्वरूपप्रतियोगिविरहात् प्रतियोगिसामानाधिकरण्यं नास्तीति अव्याप्तिः। हेतुतावच्छेदकावच्छिन्नेत्युक्तौ तु

गुणकर्मान्यत्वविशिष्टसत्तात्वरूपं यत् हेतुतावच्छेदकं तदवच्छिन्नाधिकरणं द्रव्यमेव । न तु गुणादिः । द्रव्यावच्छेदेन द्रव्यत्वरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् नाव्याप्तिः । तदाह - **हेतुतावच्छेदकसंबन्धेनेत्यादि** [पृ.178] । हेतुतावच्छेदकसंबन्धावच्छिन्न - हेतुतावच्छेदकावच्छिन्नहेतुनिष्ठाधेयतानिरूपिताधिकरण - तावत्सामान्यान्तर्भावेण प्रतियोगिसामानाधिकरण्यमिति फलितम् ।

प्रतियोगिसामानाधिकरण्ये 'स्वविशिष्टहेत्वधिकरणावच्छेदेन' इति विशेषणोपादानस्य प्रयोजनं गोत्वादिसाध्यकस्थले दीधितौ प्रदर्शितम् । 'धूमवान् वह्नेः' इत्यादौ प्रसिद्धव्यभिचारिण्यपि अतिव्याप्तिवारणरूपं प्रयोजनं वक्तुं शक्यते । तथा हि - यावदभावपदेन धूमत्वेन धूमाभावग्रहणे तस्य धूमाधिकरणपर्वतवृत्तित्वं कालिकसंबन्धेन अस्तीति अतिव्याप्तिः । 'स्वविशिष्टयावद्धेत्वधिकरणावच्छेदेन' इत्युक्तौ तु धूमाभावविशिष्टं यावद्धेत्वधिकरणम् अयोगोलकमपि । तदन्तर्भावेण धूमरूपप्रतियोगिविरहात् प्रतियोगिसामानाधिकरण्यं नास्तीति नातिव्याप्तिः इत्याशङ्क्य 'स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण' इत्यनुक्तावपि यावदभावान्तर्गतस्य धूमवत्त्वप्रकारकप्रमाविषयत्वाभावस्य प्रतियोगिसामानाधिकरण्यं नास्ति, प्रतियोगिमति पर्वते कालिकसंबन्धेन तदभावस्य सत्त्वेऽपि पर्वतादेः कालोपाधित्वानुपगमे प्रतियोगिसामानाधिकरण्यस्य असंभवात् अतिव्याप्त्यप्रसक्तेः, गोत्वादिसाध्यकस्थले अतिव्याप्तिवारणरूपं प्रयोजनमुक्तं दीधितौ इत्याशयेन आह - **पर्वतादेः कालोपाधित्वानभ्युपगमे** [पृ.178] इत्यादिना ।

ननु पर्वतादेः कालोपाधित्वानुपगमे धूमाभावस्यापि प्रतियोगिसामानाधिकरण्यं नास्तीति तमादायैव अतिव्याप्तिवारणसंभवात् धूमवत्त्वप्रकारकप्रमाविषयत्वाभावपर्यन्तानुधावनं निर्बीजमिति चेत् ।

अत्राहुः - संयोगेन द्रव्यस्य अव्याप्यवृत्तितामते धूमाभावस्यापि पर्वतान्तर्भावेण प्रतियोगिसामानाधिकरण्यमस्तीति न तमादाय अतिव्याप्तिवारणम् । अतः धूमवत्त्वप्रकारकप्रमाविषयत्वाभावपर्यन्तानुधावनम् । महाकालस्य संयोगेन न धूमवत्त्वम् इत्यभिप्रायेण तादृशाभावानुधावनम् । अन्यथा धूमवत्त्वप्रकारकप्रमाविषयत्वस्य महाकाले सत्त्वात् तदभावस्य च कालिकसंबन्धेन सद्भावात् तत्रैव तादृशप्रमाविषयत्वाभावस्य प्रतियोगिसामानाधिकरण्यं संभवतीति बोध्यम् ।

'स्वविशिष्टहेत्वधिकरणावच्छेदेन' इत्यनुक्तौ गोत्वादिसाध्यकस्थलेऽतिव्याप्तिं तदुक्तौ अतिव्याप्त्यभावं च उपपादयति— **कालिकसंबन्धेन** [पृ.178] इत्यादिना । 'कालिकसंबन्धेन गोमान्, कालिकसंबन्धेन गोत्वात्' इत्यत्र कालिकसंबन्धेन गवाभाववति प्रलये कालिकसंबन्धेन गोत्वसत्त्वात् व्यभिचारिणि 'हेत्वधिकरणवृत्तयः यावन्तोऽभावाः' इत्यनेन गोत्वावच्छिन्नगवाभावस्य ग्रहणेऽपि तस्य प्रतियोगिसामानाधिकरण्यमस्ति, प्रतियोगिगोमति एतत्काले गवानधिकरणदेशावच्छेदेन गवात्यन्ताभावस्य सत्त्वात् । एवं प्रतियोगिमति महाकाले प्रलयावच्छेदेन गवात्यन्ताभावस्य सत्त्वाच्च यावदभावपदेन प्रकृतसाध्यगोव्यापकं यत् प्रलयान्यत्वं तदभावस्य ग्रहणेऽपि तस्य स्वरूपसंबन्धेन प्रलयान्यत्वरूपप्रतियोगिमति महाकाले कालिकसंबन्धेन वर्तमानतया प्रतियोगिसामानाधिकरण्यमस्ति । अभावनिष्ठप्रतियोग्यधिकरणनिरूपितवृत्तित्वे संबन्धविशेषानिवेशात् । तद्वारणाय स्वविशिष्टहेत्वधिकरणसामान्यान्तर्भावेण प्रतियोगिसामानाधिकरण्यं विवक्षणीयम् । गवाभावस्य प्रलयान्यत्वाभावस्य च स्वविशिष्टहेत्वधिकरणसामान्यान्तर्गतप्रलयान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति । प्रतियोगिनः गोः प्रलयान्यत्वस्य च प्रलयेऽभावात् इति नातिव्याप्तिः इति भावः ।

'काले' इत्येतदुपेक्ष्य 'महाकाले वा' इत्युक्तेः प्रयोजनमाह - **गवादिव्यापकस्येति** [पृ.178] । साध्यव्यापकः गोव्यापकः चरमध्वंसाभावः तदभावः चरमध्वंसाभावाभावः चरमध्वंसरूपः । सोऽपि साध्यव्यापकतावच्छेदकप्रतियोगिताकयावदभावान्तर्गतः । तस्य खण्डकालान्तर्भावेण न प्रतियोगिसामानाधिकरण्यम् । खण्डकाले चरमध्वंसरूपस्य अभावस्य अवृत्तेः इत्याशयेन 'महाकाले' इत्युक्तम् । महाकाले प्रलयावच्छेदेन कालिकसंबन्धेन चरमध्वंसरूपः अभावोऽप्यस्ति । चरमध्वंसाभावरूपप्रतियोग्यपि गवादिमद्देशावच्छेदेन वर्तत इति प्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिरिति भावः । 'यावद्धेत्वधिकरणावच्छेदेन' इत्युक्तौ तु यावद्धेत्वधिकरणान्तर्गतप्रलयावच्छेदेन प्रतियोगिविरहात् प्रतियोगिसामानाधिकरण्यं नास्तीति नातिव्याप्तिः ।

गादाधरी

[२८] गोसाध्यकस्थलेऽतिव्याप्तिवारणं न संभवतीति स्फुटीकरणम्

गोसाध्यकस्थले साध्यव्यापकतावच्छेदकजन्यद्रव्यत्वप्रलयावृत्तित्वाद्यवच्छिन्नाभावमादाय अतिव्याप्तिवारणं न संभवति इति स्फुटीकरणाय तत्तद्रूपावच्छिन्नसाध्यकस्थलेऽपि अतिव्याप्तिमाह - **यदा कालत्वमित्यादिना** [पृ.178] ।

अथ एतादृशविवक्षापेक्षया लाघवात् **प्रतियोगिसामानाधिकरण्यघटकाभावीयवृत्तौ** दैशिकविशेषणताविशेषसंबन्धावच्छिन्नत्वमेव निवेश्यताम् । तथा सति दैशिकविशेषणताविशेषसंबन्धेन प्रलयान्यत्वादेरभावस्य प्रतियोगिसामानाधिकरण्यविरहेण अतिव्याप्त्युद्धारस्य शक्यत्वात् ।

न च - एवं 'वह्निमान् धूमात्' इत्यादौ कालिकविशेषणताविशेषसंबन्धेन हेत्वधिकरणवृत्तेः द्रव्यत्वत्वादिना द्रव्यत्वादेरभावस्य दैशिकविशेषणतया द्रव्यवृत्तित्वाभावात् अव्याप्तिरिति -

वाच्यम् । हेतुसामानाधिकरण्यशरीरेऽपि अभावीयवृत्तौ दैशिकविशेषणताविशेषसंबन्धावच्छिन्नत्वस्य निवेशनीयत्वात् तावतापि लाघवानपायात् ।

न च-दैशिकविशेषणताविशेषेण प्रतियोगिसामानाधिकरण्यविवक्षणेऽपि उक्तस्थलेष्वतिव्याप्तिः तदवस्थैव । प्रलयान्यत्वाभावस्य प्रलयमात्रवृत्तेरभावमात्राधिकरणकतया प्रलयात्मकाधिकरणस्वरूपत्वात् तस्य च प्रलयान्यत्वरूपप्रतियोग्यधिकरणपरमाण्वादौ दैशिकविशेषणतया वृत्तेः इति वाच्यम् । एवमपि प्रलयान्यकालत्वप्रकारकप्रमाविशेष्यत्वादेरभावस्य प्रलयातिरिक्तगगनादावपि वर्तमानस्य प्रलयानात्मकतया प्रतियोगिसामानाधिकरण्यस्य दुरुपपादतया अतिव्याप्त्यनवकाशात् ।

विवरणम्

स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण' इत्यस्य 'गोमान् गोत्वात्' इत्यत्र अतिव्याप्तिवारणरूपं प्रयोजनम् उक्त्वा पुनः तत्स्थलं परित्यज्य 'यदा कालत्वम्' इत्यादिना स्थलान्तरे अतिव्याप्तिवारणरूपप्रयोजनकथनस्य बीजमाह — **गोसाध्यकस्थले** [पृ.182] **इत्यादिना** । 'गोमान् गोत्वात्' इत्यत्र कालिकसंबन्धेन गोरूपसाध्यं प्रति जन्यद्रव्यस्यापि व्यापकतया साध्यव्यापकतावच्छेदकप्रतियोगिताकाभावपदेन जन्यद्रव्यत्वावच्छिन्नाभावस्य ग्रहणे तस्य प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः । एवं प्रलयावृत्तित्वावच्छिन्नस्यापि गोव्यापकतया साध्यव्यापकतावच्छेदकप्रतियोगिताकः अभावः प्रलयावृत्तित्वावच्छिन्नाभावोऽपि । तस्य प्रतियोगिसामानाधिकरण्यं नास्ति । प्रतियोगिमति जन्यद्रव्यवति प्रलयावृत्तिमति वा जन्यद्रव्याभावस्य प्रलयावृत्त्यभावस्य वा असत्त्वात् इत्याशङ्क्य तादृशाभावयोः ग्रहणेऽपि प्रतियोगिमति महाकाले प्रलयावच्छेदेन जन्यद्रव्याभावस्य प्रलयावृत्त्यभावस्य च

कालिकसंबन्धेन सत्त्वात् अतिव्याप्तिः । स च स्वविशिष्टयावद्धे-त्वधिकरणान्तर्भावेणेति विवक्षयैव वारणीया । कालिकसंबन्धेन गोत्वाधिकरणसामान्यान्तर्गतप्रलयान्तर्भावेण प्रतियोगिसामानाधि-करण्यविरहात् इति स्फुटीकर्तुं जन्यद्रव्यत्वावच्छिन्नसाध्यक-स्थले प्रलयावृत्तित्वावच्छिन्नसाध्यकस्थले च अतिव्याप्ति प्रदर्श-यति । जन्यद्रव्यत्वाद्यवच्छिन्नसाध्यकस्थलेऽपि तदवच्छिन्ना-भावमादाय अतिव्याप्तिर्वारयितुं न शक्यते चेत् सुतरां गोत्वा-वच्छिन्नसाध्यकस्थले तदभावमादाय अतिव्याप्तिवारणमशक्यमिति स्फुटीकरणप्रकार इति भावः ।

गोसाध्यकस्थलं जन्यद्रव्यसाध्यकस्थलं च परित्यज्य प्रलया-वृत्तिसाध्यकस्थलानुधावने बीजम् आक्षेपसमाधानव्याजेन प्रदर्शयति - **अथ एतादृशविवक्षापेक्षया** [पृ.182] **इत्यादि** । 'गोमान् गोत्वात्' इत्यत्र गोत्वावच्छिन्नगवात्यन्ताभावस्य गोमति महाकाले गवानधिकरणदेशावच्छेदेन गवात्यन्ताभावस्य कालिक-संबन्धेन वर्तमानतया, एवं यावदभावान्तर्गतस्य प्रलयान्यत्वाभाव-स्यापि प्रलयान्यत्ववति महाकाले कालिकसंबन्धेन वर्तमानतया प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिः प्रसक्ता । सा च अतिव्याप्तिः प्रतियोग्यधिकरणवृत्तित्वे स्वरूपसंबन्धावच्छिन्नत्व-निवेशेनापि वारयितुं शक्यते । गवात्यन्ताभावादेः स्वरूपसंबन्धेन महाकालवृत्तित्वविरहात् । तथा च स्वविशिष्टयावद्धेत्वधिकरणा-वच्छेदेनेति किमर्थम् ?

न च - प्रतियोग्यधिकरणवृत्तित्वे स्वरूपसंबन्धावच्छिन्नत्व-निवेशे 'वह्निमान् धूमात्' इत्यादौ हेत्वधिकरणे पर्वते कालिक-संबन्धेन वर्तमानस्य द्रव्यत्वत्वेन द्रव्यत्वाभावस्यापि यावदभावा-न्तर्गततया तस्य च प्रतियोग्यधिकरणे द्रव्ये स्वरूपसंबन्धेन वृत्त्य-भावात् अव्याप्तिरिति - वाच्यम् । 'यत्समानाधिकरणाः' इत्यत्र हेत्वधिकरणनिरूपितवृत्तित्वेऽपि स्वरूपसंबन्धावच्छिन्नत्वस्य निवे-

शनीयत्वात् । हेत्वधिकरणपर्वते द्रव्यत्वत्वेन द्रव्यत्वाभावस्य स्वरूपसंबन्धेन अवर्तमानतया तस्य लक्षणाघटकत्वात् न तमादाय अव्याप्तिः । स्थलद्वये स्वरूपसंबन्धनिवेशेऽपि व्यापकत्वघटितस्व-विशिष्टयावद्धेत्वधिकरणान्तर्भावेण इति विशेषणापेक्षया लाघव-मस्त्येव इति तद्विशेषणस्य व्यर्थत्वात् ।

न च - प्रतियोगिसामानाधिकरण्यघटकाभावनिष्ठवृत्तौ स्व-रूपसंबन्धावच्छिन्नत्वनिवेशेऽपि 'गोमान् गोत्वात्' इत्यादावति-व्याप्तिः दुर्वारा । तथा हि - तत्र यावदभावान्तर्गतः प्रलयान्य-त्वाभावः प्रलयमात्रवृत्तिः । प्रलयश्च ध्वंसात्मकाभावरूपः । अभा-वाधिकरणकाभावः अधिकरणीभूताभावस्वरूपः । तथा च प्रल-याधिकरणकः प्रलयान्यत्वाभावः प्रलयस्वरूप इति पर्यवसितम् । स च प्रतियोगिसमानाधिकरणः । प्रलयान्यत्वरूपप्रतियोग्यधि-करणे परमाणौ प्रलयस्य सत्त्वात् प्रलयात्मकः प्रलयान्यत्वाभावोऽपि अस्त्येव इति - वाच्यम् ।

'गोमान् गोत्वात्' इत्यत्र प्रलयान्यत्वाभावस्य उक्तरीत्या प्रतियोगिसामानाधिकरण्यसत्त्वेऽपि तत्र प्रलयान्यकालत्वप्रकारक-प्रमाविशेष्यत्वाभावोऽपि यावदभावान्तर्गतः । कालिकसंबन्धेन गवाधिकरणे प्रलयान्यकाले प्रलयान्यकालत्वप्रकारक-प्रमाविशेष्य-त्वसत्त्वात् प्रलयान्यकालत्वप्रकारकप्रमाविशेष्यत्वं साध्यव्यापकम्, तदभावः साध्यव्यापकतावच्छेदकप्रतियोगिताकाभावः । अयम-भावः न प्रलयमात्राधिकरणकः । प्रलयातिरिक्ते गगनादावपि अस्य अभावस्य सत्त्वात् । अतः प्रलयान्यकालत्वप्रकारकप्रमाविशे-ष्यत्वरूपप्रतियोगिमति प्रलयान्यकाले तादृशप्रमाविशेष्यत्वाभावस्य कालिकसंबन्धेनापि अवर्तमानतया प्रतियोगिसामानाधिकरण्य-विरहात् अतिव्याप्तेरनवकाशात् स्वविशिष्टहेत्वधिकरणावच्छेदेनेति न विवक्षणीयमिति अथेत्यादिना [पृ.182] आक्षेपः ।

एतादृशविवक्षापेक्षयेति [पृ.182]। स्वविशिष्टहेत्वधिकरणावच्छेदेनेति विवक्षापेक्षयेत्यर्थः। **प्रतियोगिसामानाधिकरण्यघटकेति** [पृ.182]। प्रतियोगिसामानाधिकरण्यघटकं यत् अभावनिष्ठं वृत्तित्वं तत्रेत्यर्थः।

गादाधरी

मैवम्। दैशिकविशेषणतया प्रतियोगिसामानाधिकरण्यविवेशेऽपि दैशिकविशेषणतासंबन्धेन प्रलयावृत्तिसाध्यके कालत्वादिहेतौ अतिव्याप्तिर्दुर्वारैव। तत्र प्रलयमात्रस्य व्यभिचारनिरूपकाधिकरणतया साध्यतावच्छेदकसंबन्धेन साध्यं प्रति व्यापकतावच्छेदिका यदभावीयप्रतियोगिता, व्यापकताघटकसंबन्धावच्छिन्नप्रतियोगिताकस्य तस्य प्रलयमात्रवृत्तितया प्रलयात्मकत्वात् निरुक्तरीत्यैव प्रतियोगिसमानाधिकरणत्वात् इतरसंबन्धावच्छिन्नाभावस्य प्रलयानात्मकत्वेऽपि प्रलयान्यवृत्तितया सुतरामेव प्रतियोगिसमानाधिकरणत्वादिति निरुक्तविवक्षणमावश्यकम्। एतदभिप्रेत्यैव प्रलयावृत्तिसाध्यकानुधावनं ग्रन्थकृत इति।

विवरणम्

'गोमान् गोत्वात्' इत्यत्र स्वरूपसंबन्धेन प्रतियोग्यधिकरणत्वविवक्षया अतिव्याप्तिवारणेऽपि दैशिकविशेषणतासंबन्धेन प्रलयावृत्तिसाध्यके कालत्वहेतौ अतिव्याप्तिर्दुर्वारैव। प्रलयावृत्त्यभाववति प्रलये कालत्वसत्त्वात् अयं हेतुः व्यभिचारी। अत्र स्वरूपसंबन्धेन साध्यं प्रति प्रलयावृत्त्यभावीयप्रतियोगिताविशिष्टं प्रलयावृत्ति स्वरूपसंबन्धेन व्यापकम्। अतः स्वरूपसंबन्धघटितव्यापकतावच्छेदकस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकः प्रलयावृत्तित्वावच्छिन्नाभावः प्रलयमात्रवृत्तितया प्रलयस्वरूपः।

तस्य प्रलयावृत्तिप्रलयान्यत्वरूपप्रतियोगिमति परमाणौ स्वरूपसंबन्धेन वर्तमानतया प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिः। व्यधिकरणसंबन्धावच्छिन्नप्रलयावृत्त्यभावस्य ग्रहणे सुतरां तस्य प्रतियोग्यधिकरणप्रलयान्यवृत्तितया अतिव्याप्तिः। तद्वारणाय स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण इति विवक्षणीयमेव। तद्विवक्षायां उक्ताभावस्य हेत्वधिकरणयावदन्तर्गतप्रलयान्तर्भावेण प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः। एतदभिप्रायेणैव प्रलयावृत्तिसाध्यकस्थलानुधावनम् इति भावः।

गादाधरी

(२९) स्ववैशिष्ट्यविशेषणप्रयोजनवर्णनदीधितिविवरणम्।

वस्तुतस्तु—प्रलयादिमात्रवृत्तेरभावस्य प्रलयाद्यनात्मकत्वेऽपि दर्शितस्थलेषु उक्तविवक्षामन्तरेण अतिव्याप्तिवारणमशक्यम्। प्रलयान्यत्वादेरभावस्यापि स्वप्रतियोगिनिष्ठव्यापकताघटकस्वरूपसंबन्धेन प्रलयात्मकनानाध्वंसान्तर्गतयत्किंचिद्ध्वंसवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनोऽधिकरणे ध्वंसान्तरे स्वस्य प्रतियोगिसमानाधिकरणत्वात्। यत्किञ्चिद्ध्वंसान्यत्वाभावस्य यत्किञ्चिद्ध्वंसमात्रवृत्तेः तद्ध्वंसवृत्तित्वविशिष्टस्वाभावाधिकरणे ध्वंसान्तरे असत्त्वेऽपि कालिकसंबन्धावच्छिन्नप्रतियोगिताकस्वाभावस्य स्वानधिकरणध्वंसावच्छेदेन स्वाधिकरणेऽपि सत्त्वेन तत्रैव तत्प्रतियोगिसमानाधिकरणत्वात् प्रलयान्यविषयकत्वोपलक्षितप्रमाया विषयतासंबन्धेन केवलान्वयितया तादृशसंबन्धावच्छिन्नतादृशप्रमाभावाप्रसिद्धेः। प्रलयान्यविषयकत्वविशिष्टप्रमाभावस्य प्रलये प्रसिद्धावपि प्रलये तदन्यविषयकनित्यप्रमारूपप्रतियोगिसमानाधिकरणत्वात् प्रलयाविषयकप्रमाभावस्य च जन्यप्रमामात्रप्रतियोगिकतया कालिकाव्याप्यवृत्तित्वेन प्रतियोगिमत्यपि तच्छून्यकालावच्छेदेन वृत्तेः तादृशाभावमादाय अतिव्याप्तिवारणासंभवात्। उक्तविवक्षणे

तु प्रलये प्रलयाविषयकप्रमाभावस्य विषयतया प्रतियोगिसमानाधिकरणत्वविरहात् अतिव्याप्तिवारणसंभवः। एवम् उक्तरीत्या 'घटत्वाभाववान् मेयत्वात्' इत्यादावपि व्यावृत्तिः बोध्या।

हेतुमति प्रलये इति [पृ.178]। हेतुमत्सामान्यान्तर्गतप्रलयान्तर्भावेण इत्यर्थः। **तत्सामानाधिकरण्याभावात्** [पृ.178]—गवादिरूपप्रतियोगिसामानाधिकरण्याभावात्। अत्र गवादेरभावस्य इत्यनुषज्यते।

विवरणम्

प्रलयमात्रवृत्तेः प्रलयान्यत्वाभावस्य प्रलयस्वरूपतया प्रलयान्यत्वरूपप्रतियोग्यधिकरणपरमाणौ स्वरूपसंबन्धेन सत्त्वात् अतिव्याप्तिः पूर्वमुक्ता। तादृशाभावस्य प्रलयानात्मकत्वेऽपि उक्तविवक्षामन्तरेण अतिव्याप्तिर्दुर्वारा इति प्रतिपादयति—**वस्तुतस्तु** [पृ.187] इत्यादिना। स्वरूपसंबन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य प्रलयान्यत्वाभावस्य व्यापकताघटकस्वरूपसंबन्धेन प्रतियोगिसामानाधिकरण्यमस्ति। तथा हि - प्रलयो नाम सर्वकार्यद्रव्यध्वंसः सर्वकार्यध्वंसो वा नानाध्वंसात्मकः। तदन्तर्गतयत्किंचिद्ध्वंसवृत्तित्वविशिष्टप्रलयान्यत्वाभावाभावोऽपि प्रलयान्यत्वाभावस्य प्रतियोगी। स ध्वंसान्तरे यत्किञ्चिद्ध्वंसवृत्तित्वरूपविशेषणविरहात् व्यापकताघटकस्वरूपसंबन्धेन वर्तते। एवम् अत्र प्रलयान्यत्वाभावोऽपि स्वरूपसंबन्धेन वर्तत इति प्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिः। अतः स्वविशिष्टहेत्वधिकरणावच्छेदेनेति विवक्षणीयमेव। एवं यावदभावपदेन यत्किचिद्ध्वंसान्यत्वाभावस्य यत्किचिद्ध्वंसमात्रवृत्तेः ग्रहणेऽपि तद्ध्वंसवृत्तित्वविशिष्टस्वाभावरूपप्रतियोग्यधिकरणे ध्वंसान्तरे तस्य असत्त्वेऽपि स्वानधिकरणध्वंसावच्छेदेन कालिकसंबन्धावच्छिन्नप्रतियोगिकयत्किञ्चिद्ध्वंसान्यत्वाभावाभावरूपप्रतियोग्यधि-

करणे सत्त्वेन प्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिः । प्रलयान्यविषयकत्वोपलक्षितप्रमायाः विषयतासंबन्धेन सर्वत्र विद्यमानतया केवलान्वयित्वात् विषयतासंबन्धावच्छिन्नप्रलयान्यविषयकत्वोपलक्षितप्रमाभावस्य अप्रसिद्ध्या यावदभावपदेन तस्य अग्रहणेऽपि प्रलयान्यविषयकत्वविशिष्टप्रमायाः विषयतासंबन्धेन साध्यव्यापकतया विषयतासंबन्धावच्छिन्नप्रलयान्यविषयकत्वविशिष्टप्रमाभावं यावदभावपदेन गृहीत्वा तस्य प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरित्यपि नाशङ्कनीयम् । विशिष्टशुद्धयोरनतिरेकात् सर्वविषयकनित्यप्रमारूपतत्प्रतियोगिनः विषयतासंबन्धेन अधिकरणे प्रलये विशिष्टप्रमाभावस्य सत्त्वेन प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तेर्दुर्वारत्वात् ।

एवं कालिकसंबन्धेन गां प्रति प्रलयाविषयकप्रमाया अपि विषयतासंबन्धेन व्यापकतया विषयतासंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य प्रलयाविषयकप्रमाभावस्य यावदन्तर्गतस्य प्रतियोगिसामानाधिकरण्यं नास्तीत्यपि नाशङ्कनीयम् । तादृशाभावस्य जन्यप्रमामात्रं प्रतियोगि, नित्यप्रमायाः प्रलयाविषयकत्वासंभवात् जन्यप्रमायाः अभावश्च कालिकाव्याप्यवृत्तिः । अतः प्रलयाविषयकजन्यप्रमायाः विषयतासंबन्धेन अधिकरणे घटादौ तादृशप्रमाशून्यकालावच्छेदेन प्रलयाविषयकप्रमाभावस्य वर्तमानतया प्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिर्दुर्वारा । सा च अतिव्याप्तिः स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविवक्षयैव वारणीया । तद्विवक्षायां तु हेत्वधिकरणसामान्यान्तर्गतप्रलयान्तर्भावेण विषयतासंबन्धेन प्रलयाविषयकप्रमारूपप्रतियोगिविरहात् प्रतियोगिसामानाधिकरण्यं नास्तीति नातिव्याप्तिः ।

किञ्च 'घटत्वाभाववान् मेयत्वात्' इत्यादौ घटत्वात्मकाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणत्वात् अतिव्याप्तिः । तद्वारणाय स्वविशिष्टहेत्वधिकरणावच्छेदेन इति विवक्षणीयम् । न च - तद्विवक्षणेऽपि घटान्तर्भावेण विशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिरिति - वाच्यम् । विशेष्यतासंबन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य विशेष्यतासंबन्धेन घटत्वाभावप्रकारकप्रमायाः अभावस्य यावदन्तर्गतस्य घटान्तर्भावेण विशेष्यतासंबन्धेन घटत्वाभावप्रकारकप्रमारूपप्रतियोगिसामानाधिकरण्यविरहात् अतिव्याप्त्यनवकाशात् इति भावः ।

स्वस्येति [पृ.187] - प्रलयान्यत्वाभावस्येत्यर्थः । **तद्ध्वंसवृत्तित्वविशिष्टस्वाभावाधिकरणे** [पृ.187] इति । तद्ध्वंसवृतित्वविशिष्टं यत् स्वं यत्किञ्चिद्ध्वंसान्यत्वाभावः तदभावाधिकरणेत्यर्थः । **असत्त्वेऽपि** [पृ.187] इत्यनेन यत्किंचिद्ध्वंसान्यत्वाभावस्य प्रतियोगिसामानाधिकरण्यं नास्तीति सूचितम् । **कालिकसंबन्धावच्छिन्नेति** [पृ.187] । स्वपदग्राह्ययत्किञ्चिद्ध्वंसान्यत्वाभावनिष्ठकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावस्येत्यर्थः । **सत्त्वेनेति** [पृ.187] । अनेन यत्किचिद्ध्वंसान्यत्वाभावस्य प्रतियोगिसामानधिकरण्यमस्तीति सूचितम् ।

दीधितिः

'स्वविशिष्टे'ति विशेषणात् 'कपिसंयोगाभाववान् मेयत्वात्' इत्यादौ संयोगाद्यात्मकसाध्याभावस्य **सकलहेत्वधिकरणावृत्तित्वेऽपि** नाव्याप्तिः ।

गादाधरी

हेतुमति स्ववैशिष्ट्यनिवेशनफलमाह - स्वविशिष्टेतीति । सांप्रदायिकैः द्रव्ये संयोगसामान्यभावानभ्युपगमात् सद्धेतुत्वार्थं

कपिसंयोगभावपर्यन्तानुधावनम् । **सकलहेत्वधिकरणावृत्तित्वेऽपीति** । नित्यगुणादौ केनापिसंबन्धेन कपिसंयोगासत्त्वादिति भावः । एतेन हेत्वधिकरणसामान्यान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्तीति सूचितम् । **नाव्याप्तिरिति** । नित्यगुणादेः स्वविशिष्टत्वाभावात् तदन्तर्भावेण अतथात्वेऽपि स्वविशिष्टहेत्वधिकरणान्तर्भावेण तथात्वस्य अक्षतत्वात् ।

अत्र व्यापकताघटकाभावे उक्तयुक्त्या प्रतियोगिवैयधिकरण्यस्य निवेशनीयतया साध्यवद्यत्किचिद्व्यक्त्यसम्बद्धस्वविशिष्टसामान्यकभिन्नत्वरूपव्यापकतावच्छेदकत्वस्य निवेशनीयतया वा कपिसंयोगाभावादिनिष्ठप्रतियोगिताया अपि व्यापकतावच्छेदकतानिर्वाह इत्यभिप्रेत्य कपिसंयोगाद्यात्मकाभावमादाय अव्याप्तिराशङ्किता । **अन्यथा** पुनः 'सत्तावान् जातेः' इत्यादौ काले कालिकसंबन्धेन हेतुसमानाधिकरणानां सत्तात्वाद्यवच्छिन्नाभावानां हेत्वधिकरणसामान्यान्तर्गतगगनाद्यन्तर्भावेण प्रतियोगिसामानाधिकरण्यविरहात् प्रसक्ताव्याप्तेर्वारणाय स्वविशिष्टेति विशेषणमावश्यकमिति । आदिपदग्राह्यमपि तादृशस्थलमेवेत्यपि बोध्यम् ।

विवरणम्

हेतुमति स्ववैशिष्ट्यनिवेशनफलमाहेति [पृ.190] । स्वविशिष्टहेत्वधिकरणावच्छेदेनेत्यत्र हेत्वधिकरणे स्वविशिष्टत्वानुपादाने 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र सद्धेतौ हेतुसमानाधिकरणयावदभावान्तर्गतस्य कपिसंयोगात्मकस्य साध्याभावस्य सकलहेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति । मेयत्वाधिकरणसकलान्तर्गतनित्यगुणादौ प्रतियोगिनः कपिसंयोगाभावस्य सत्त्वेऽपि कपिसंयोगात्मकस्य अभावस्य कालिकसंबन्धेनापि असत्त्वात् अव्याप्तिः । स्वविशिष्टेति उपादाने तु कपि-

संयोगात्मकाभावविशिष्टं हेत्वधिकरणं न नित्यगुणादि । किन्तु वृक्षादिकमेव । तदन्तर्भावेण कपिसंयोगस्य प्रतियोगिसामानाधिकरण्यमस्तीति नाव्याप्तिरिति भावः ।

साध्यघटकस्य कपिपदस्य प्रयोजनमाह - **सांप्रदायिकैरिति** [पृ.190] । 'संयोगाभाववान् मेयत्वात्' इत्युक्ते मेयत्वाधिकरणे द्रव्ये संयोगसामान्याभावस्य प्राचीनैः अनङ्गीकारात् सद्धेतुत्वं न निर्वहतीति सद्धेतुत्वार्थं कपिसंयोगाभावस्य साध्यत्वानुसरणम् इति भावः ।

कपिसंयोगात्मकाभावस्य लक्षणघटकत्वं पूर्वमुपपादितं स्मारयति - **अत्र व्यापकताघटकाभावे** [पृ.191] इत्यादिना । **अन्यथा पुनरिति** [पृ.191] । व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यानिवेशे कपिसंयोगात्मकाभावस्य लक्षणाघटकत्वात् 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र अव्याप्तिवारणरूपं प्रयोजनं स्वविशिष्टपदस्य न संभवति । किन्तु 'सत्तावान् जातेः' इत्यत्र अव्याप्तिवारणं प्रयोजनम् । तथा हि - स्वविशिष्टपदानुपादाने समवायसंबन्धेन जातेः अधिकरणे काले कालिकसंबन्धेन वर्तमानस्य सत्तात्वावच्छिन्नसत्ताभावस्य हेत्वधिकरणसामान्यान्तर्गतगगनाद्यन्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति । प्रतियोगिन्याः सत्तायाः गगने सत्त्वेऽपि सत्ताभावस्य केनापि संबन्धेन असत्त्वात् । नित्येषु कालिकायोगात् कालिकसंबन्धेनापि असत्त्वात् अव्याप्तिः । तद्वारणाय स्वविशिष्टेति विशेषणमावश्यकम् । तन्निवेशे सत्ताभावविशिष्टं हेत्वधिकरणं गगनादिकं न भवति । किन्तु कालादिकम् । तदन्तर्भावेण प्रतियोगिसामानाधिकरण्यमस्तीति नाव्याप्तिरिति भावः ।

गादाधरी

(३०) स्वयं लघुलक्षणकथनम् ।

अत्र तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः यद्धेतुतावच्छेदकविशिष्टाधिकरणसामान्यान्तर्भावेण यत्र कुत्रचित् तत्तत्प्रतियोगिसामानाधिकरण्यकाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः यद्रूपविशिष्टाधिकरणत्वव्यापकतावच्छेदकप्रतियोगिताकाः तद्रूपवत्त्वम् इत्यादिकं तादृशाभावे हेतुसामानाधिकरण्यविशेषणाघटितं हेत्वधिकरणे स्वविशिष्टत्वविशेषणाघटितं च व्यधिकरणधर्मावच्छिन्नाभावघटितं लघुलक्षणं संभवतीति बोध्यम् ।

विवरणम्

दीधितिकारोक्तप्रथमस्वलक्षणापेक्षया लघुतरं लक्षणद्वयम् आह - **अत्र तु** [पृ.193] इत्यादिना । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाः यावन्तोऽभावाः प्रत्येकं यद्धेतुतावच्छेदकविशिष्टाधिकरणसामान्यान्तर्भावेण यत्र कुत्रचित् तत्तत्प्रतियोगिसामानाधिकरण्यकाः तद्रूपवत्वं इति प्रथमं लक्षणम् । अत्र प्रत्येकमित्यस्य यावदभावघटकैकाभावस्य इत्यर्थः । तत्तत्प्रतियोगीत्यत्र तत्तत्पदं एकैकाभावपरम् । प्रतियोगिसामानाधिकरण्यं अभावनिष्ठमिति न निर्बन्धः इति सूचनाय यत्र कुत्रचित् इत्युक्तम् ।

'वन्हिमान् धूमात्' इत्यादौ वन्हित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाः यावन्तोऽभावाः इत्यनेन समानाधिकरणधर्मावच्छिन्नसाध्याभावः व्यधिकरणधर्मावच्छिन्नसाध्याभावश्च गृह्यते । तत्र वन्हित्वेन वन्ह्यभावोयवन्हिरूपप्रतियोगिसामानाधिकरण्यं धूमाधिकरणपर्वतान्तर्भावेण पर्वतनिष्ठे पदार्थे वर्तते । तद्रूपवत्त्वस्य धूमत्ववत्त्वस्य धूमे सत्त्वात् लक्षणसमन्वयः ।

'धूमवान् वह्नेः' इत्यादौ धूमत्वेन धूमाभावस्य घटत्वेन धूमाभावस्य च यः प्रतियोगी धूमः, तत्सामानाधिकरण्यं हेत्वधिकरणायोगोलकान्तर्भावेण कुत्रापि नास्ति। अयोगोलके धूमरूपप्रतियोगिविरहात् इति नातिव्याप्तिः।

'अयमात्मा ज्ञानात्' इत्यादौ आत्मत्वत्वेन आत्मत्वाभावस्य लक्षणघटकत्वेऽपि तदीयात्मत्वरूपप्रतियोगिसामानाधिकरण्यम् आत्मवृत्तिपदार्थान्तरे वर्तत इति तत्रापि नाव्याप्तिः। अतः अभावे हेतुसामानाधिकरण्यं विशेषणमनावश्यकम्।

'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र कपिसंयोगात्मकाभावस्य यः प्रतियोगी कपिसंयोगाभावः तत्सामानाधिकरण्यं गगनाभावादौ यावद्धेत्वधिकरणनित्यगुणान्तर्भावेणापि अस्तीति नाव्याप्तिः। अतः हेत्वधिकरणे स्वविशिष्टत्वविशेषणमपि अनावश्यकम्। सामान्यपदं व्यापकत्वपर्यवसितम्। तथा च एवं लक्षणं संपन्नम्—साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाः यावन्तोऽभावाः तद्घटकस्य एकैकस्य अभावस्य यद्धेतुतावच्छेदकविशिष्टाधिकरणत्वव्यापकतत्तत्प्रतियोगिसामानाधिकरण्यनिरूपकताकधर्मवत्त्वं [यत्किञ्चिद्धर्मनिष्ठप्रतियोगिसामानाधिकरण्यनिरूपकतायाः हेतुतावच्छेदकविशिष्टाधिकरणत्वव्यापकत्वमत्र विवक्षितम्] तद्धेतुतावच्छेदकरूपवत्त्वं व्याप्तिरिति।

साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाः यावन्तः अभावाः यद्रूपविशिष्टाधिकरणत्वव्यापकतावच्छेदकप्रतियोगिताकाः तद्रूपवत्त्वं व्याप्तिरिति द्वितीयं लक्षणम्। 'वन्हिमान् धूमात्' इत्यादौ वन्हित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकानां यावतामभावानां घटत्वेन वन्ह्यभाव - पटत्वेन वन्ह्यभाव-वन्हित्वेन वह्न्यभावादीनां धूमत्वविशिष्टाधिकरणत्वव्यापकतावच्छेदकप्रतियोगिताकत्वं वर्तते। धूमत्वविशिष्टाधिकरणे

पर्वतादौ वह्न्यभावीयप्रतियोगिताविशिष्टस्य सत्त्वात् । तद्रूपवत्त्वं धूमेऽस्तीति लक्षणसमन्वयः ।

'धूमवान् वह्नेः' इत्यादौ साध्यतावच्छेदकधूमत्वावच्छिन्न-व्यापकतावच्छेदकप्रतियोगिताकयावदभावान्तर्गतस्य धूमत्वेन धूमाभावस्य वन्हित्वविशिष्टाधिकरणत्वव्यापकतावच्छेदकप्रति-योगिताकत्वं नास्ति । वन्हित्वविशिष्टाधिकरणेऽयोगोलके धूमत्वेन धूमाभावीयप्रतियोगिताविशिष्टस्य धूमस्य विरहात् इति नातिव्याप्तिः । एवम् 'अयम् आत्मा ज्ञानात्' इत्यादावपि हेतुसामानाधिकरण्यादिविशेषणं विनैव लक्षणसमन्वयः भवति ।

इत्यादिकम् [पृ.193] इत्यादिपदेन यावत्यः साध्यता-वच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताः यद्रूपविशिष्टा-धिकरणत्वव्यापकतावच्छेदिकाः तद्रूपवत्त्वम् इति लक्षणं गृह्यते ।

दीधितिः

जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावः जलत्वाद्यभाव एव; न तु धूमाद्यभावः । जलादावपि तदभावप्रत्ययप्रसङ्गात् ।

गादाधरी

(३१) जलादीति ग्रन्थावतारः ।

ननु **'धूमवान् वह्नेः'** इत्यादौ अतिव्याप्तिः । धूमाभावा-देरपि अयोगोलकादौ गोत्वाभावरूपप्रतियोगिसमानाधिकरण-त्वात् । गोत्वाद्यभावस्य तत्प्रतियोगित्वं च धूमाभावे 'जलवृत्तित्व-विशिष्टगोत्वाभावो नास्ति' इति प्रतीतिनियामकाभावस्य अभावा-धिकरणकाभावप्रतियोगिकाभावतया अधिकरणीभूतधूमाभावस्व-रूपत्वात् जलवृत्तित्वविशिष्टगोत्वाभावस्य शुद्धविशेष्यानति-रिक्तत्वाद् इत्याशङ्क्य जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावातिरिक्तक्लृप्ताभावस्वरूपतां प्रदर्शयन् तत्स्वरूपतां प्रति-क्षिपति **जलेत्यादिना** [पृ.195] ।

विवरणम्

जलादिवृत्तित्वविशिष्टेत्यादि दीधितिमवतारयति — **ननु धूमवान् वह्नेः इत्यादावित्यादिना** [पृ.195]। 'यत्समानाधिकरणाः' इत्यादि निष्कृष्टप्रथमस्वलक्षणस्य 'धूमवान् वह्नेः' इत्यादावतिव्याप्तिः। यावदभावान्तर्गतस्य धूमत्वेन धूमाभावस्य स्वविशिष्टहेत्वधिकरणसामान्यान्तर्गतायोगोलकान्तर्भावेण प्रतियोगिसामानाधिकरण्यमस्ति। यद्यपि धूमरूपप्रतियोगी अयोगोलके नास्ति, तथापि धूमाभावस्य धूमवत् गोत्वाभावोऽपि प्रतियोगी। स च अयोगोलके वर्तते। धूमाभावस्य गोत्वाभावः कथं प्रतियोगीति चेत्—'धूमाभावे जलवृत्तित्वविशिष्टगोत्वाभावः नास्ति' इति प्रतीतिसिद्धः यः जलवृत्तित्वविशिष्टस्य गोत्वाभावस्य अभावः स धूमाभावाधिकरणकः गोत्वाभावप्रतियोगिकश्च। अभावाधिकरणकस्य अभावप्रतियोगिकस्य अभावस्य अधिकरणीभूताभावस्वरूपत्वम् इति नियमात् जलवृत्तित्वविशिष्टगोत्वाभावाभावः धूमाभावश्च एकः। अतः जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य प्रतियोगि जलवृत्तित्वविशिष्टगोत्वाभावः तदभिन्नस्य धूमाभावास्यापि प्रतियोगी। स च गोत्वाभावोऽयोगोलके वर्तते। धूमाभावश्च वर्तते। तथा च धूमाभावस्य अयोगोलकान्तर्भावेण गोत्वाभावरूपप्रतियोगिसामानाधिरण्यसत्त्वात् अतिव्याप्तिः इत्याशङ्का निराकर्तुं जलादिवृत्तित्वविशिष्टेति ग्रन्थः अवतीर्णः।

धूमाभावे गोत्वाभावस्य सत्त्वेन गोत्वाभावाभावः न भवितुमर्हतीति गोत्वाभावे जलवृत्तित्वविशेषणम्। जलवृत्तित्वविशिष्टः गोत्वाभावः जले एव वर्तते। न तु धूमाभावे। अतः जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावाधिकरणकत्वं संभवति। यद्यपि धूमाभावाधिकरणकः जलवृत्तित्वविशिष्टिगोत्वाभावाभावः तथापि स न धूमाभावस्वरूपः। जले धूमाभावस्य सत्त्वेन तदभिन्नस्य जलवृत्तित्वविशिष्टगोत्वाभावभावस्यापि सत्त्वप्रङ्गात्

जले जलवृत्तित्वविशिष्टगोत्वाभावो नास्तीति प्रतीत्यापत्तेः । किन्तु जलवृत्तित्वविशिष्टगोत्वाभावाभावः जलत्वाभावस्वरूपः । यत्र जलत्वं नास्ति तत्रैव तादृशविशिष्टाभावप्रत्ययात् । तथा च गोत्वाभावः न धूमाभावस्य प्रतियोगी इति तत्सामानाधिकरण्यमादाय अतिव्याप्तिः नाशङ्कनीया इति दीधित्याशयः ।

गादाधरी

न च - धूमाभावस्य स्वप्रतियोगिनिष्ठव्यापकताघटकयावत्संबन्धान्तर्गतसंयोगसंबन्धेन प्रतियोगिसामानाधिकरण्यविरहात् कथम् अतिव्याप्तिशङ्का इति - वाच्यम् ।

जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्यापि उक्तयुक्त्या धूमाभावस्वरूपतासंभवात् संयोगसंबन्धेन द्रव्यात्मकप्रतियोगिनैव सामानाधिकरण्यसत्त्वात् ।

विवरणम्

न च धूमाभावस्येति [पृ.197] । धूमाभावस्य गोत्वाभावः प्रतियोगीति स्वीकारेऽपि स्वप्रतियोगिनिष्ठव्यापकताघटकयावत्संबन्धान्तर्गतसंयोगसंबन्धेन गोत्वाभावरूपप्रतियोगिसामानाधिकरण्यं नास्ति; अयोगोलके संयोगसंबन्धेन गोत्वाभावस्य अवृत्तेः । तथा च अतिव्याप्तिशङ्काया एव असंभवात् तत्परिहारप्रयासः विफल इति भावः ।

जलवृत्तित्वविशिष्टेति [पृ.197] । धूमाभावे जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतरत् नास्ति इति प्रतीत्या धूमाभावाधिकरणकस्य जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्यापि धूमाभावस्वरूपत्वं वर्तते । तथा च धूमाभावस्य द्रव्यमपि प्रतियोगि । व्यापकताघटकसंयोगसंबन्धेन द्रव्यात्मकप्रतियोगिसामानाधिकरण्यं धूमाभावेऽस्तीति अतिव्याप्तिशङ्का भवति । तत्समाधानार्थोऽयमायास इति भावः ।

गादाधरी

न च - एवं जलवृत्तिद्रव्यमेव तत्प्रतियोगि, तस्यैवप्रतियोगितावच्छेदकजलवृत्तित्ववैशिष्टयाक्रान्तत्वात् तस्य च धूमाभावविशिष्टसकलवह्निमतिवृत्तौ मानाभावात् नातिव्याप्तिप्रसक्तिः। यदि च जलवृत्तित्ववैशिष्टयम् **अन्यतरत्वघटकीभूतभेदप्रतियोगिनि** गोत्वाभावत्वावच्छिन्न एव विशेषणम्, न तु अन्यतरत्वावच्छिन्ने विशेषणतया प्रतियोगितावच्छेदकमिति जलावृत्तिद्रव्यस्यापि तत्प्रतियोगित्वमित्युच्यते तदा तादृशाभावस्य विशिष्टाभावपनात्मकतया अन्यतरत्वरूपप्रतियोगितावच्छेदकविशिष्टगोत्वाभावाधिकरणधूमाभावाद्यधिकरणकत्वानुपपत्तिरिति वाच्यम्।

जलवृत्तिद्रव्यं धूमाभावविशिष्टयादृशहेत्वधिकरणे नियमतवर्तते, तादृशव्यभिचारिहेतुकस्थल एव धूमाभावात्मकनिरुक्तविशिष्टाभावप्रतियोगिद्रव्यसामानाधिकरण्यमादाय अतिव्याप्तिमाशङ्क्य **जलादिवृत्तित्वेत्यादिग्रन्थस्य अवतरणीयत्वात्।**

विवरणम्

न चैवं जलवृत्तिद्रव्यमेवेति [पृ.198]। धूमाभावजलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावयोः ऐक्यस्वीकारेऽपि जलवृत्तिद्रव्यमेव तादृशाभावप्रतियोगि। तथा हि - जलवृत्तित्ववैशिष्टयं गोत्वाभावे द्रव्ये उभयत्रान्वेति वा गोत्वाभावमात्रेऽन्वेति वा ? यदि गोत्वाभावमात्रेऽन्वेति तदा अयं विशिष्टाभावरूपो न भवति। वैशिष्टयावच्छिन्नप्रतियोगिताकाभावस्यैव विशिष्टाभावरूपत्वात्। अन्यतराभावीयप्रतियोगितावति द्रव्ये जलवृत्तित्ववैशिष्टयं न विवक्षितं चेत् प्रतियोगितान्यूनवृत्तिः वैशिष्टयरूपो धर्मः भवति। प्रतियोगितान्यूनवृत्तिधर्मस्य च नास्ति प्रतियोगितावच्छेदकत्वम्। प्रतियोगित्वान्यूनानतिप्रसक्तधर्मस्यैव प्रतियोगितावच्छेदकत्वात्। तथा च अस्य वैशिष्टयावच्छिन्नप्रतियोगिताक-

त्वाभावात् अयमन्यतराभावः न विशिष्टाभावरूपः। किन्तु अन्यतरत्वावच्छिन्नप्रतियोगिताक इति वक्तव्यम्। तथा सति अन्यतरत्वरूपप्रतियोगितावच्छेदकविशिष्टस्य गोत्वाभावस्य अधिकरणे धूमाभावे गोत्वाभावद्रव्यान्यतरत्वावच्छिन्नाभावः न भवितुमर्हति। प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यधिकरणे अभावस्य विरोधेन असंभवात्। तथा च धूमाभावाधिकरणकत्वं उक्तान्यतराभावस्य नास्तीति द्रव्यरूपप्रतियोगिसामानाधिकरण्यमादाय अतिव्याप्तिशङ्काया अनुपपत्तिः। यदि तु जलवृत्तित्ववैशिष्ट्यं गोत्वाभावे द्रव्ये उभयत्र विशेषणम्, तदा जलवृत्तित्वविशिष्टं द्रव्यमेव अन्यतराभावस्य तदभिन्नस्य धूमाभावस्य च प्रतियोगि। तादृशप्रतियोगिनः जलवृत्तिद्रव्यस्य वन्हिमति अयोगोलकादौ सर्वत्र वृत्तौ मानाभावात् प्रतियोगिसामानाधिकरण्यं नास्तीति कथम् अतिव्याप्तिशङ्का इति भावः।

अन्यतरत्वघटकीभूतेति [पृ.198]। तद्भिन्नभिन्नत्वम् अन्यतरत्वम्। तद्घटकस्य प्रथमभेदस्य प्रतियोगिनि गोत्वाभावे इत्यर्थः।

समाधत्ते - **जलवृत्तिद्रव्यमिति** [पृ.198]। यादृशवन्हिरूपहेत्वधिकरणे अयोगोलके जलवृत्तिदीर्घदण्डादिरूपं द्रव्यं संयोगसंबन्धेन नियमेन वर्तते तादृशवन्हिरूपे धूमसाध्यकव्यभिचारिणि अतिव्याप्तिमाशङ्क्य तत्परिहाराय ग्रन्थोऽयमवतीर्णः। तत्र धूमाभावविशिष्टहेत्वधिकरणे धूमाभावप्रतियोगिनः जलवृत्तिद्रव्यस्य संयोगसंबन्धेन सत्त्वात् अतिव्याप्तिशङ्का। जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावः न धूमाभावस्वरूपः। जलादावपि 'जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतरत् नास्ति' इति प्रतीतिप्रसङ्गात्। तथा च नातिव्याप्तिरिति समाधानमिति भावः।

गादाधरी

न च - एवं तादृशान्यतराभावस्यैव धूमाभावस्वरूपताप्रतिक्षेप उचित इति विशिष्टगोत्वाद्यभावस्याभाव इति ग्रन्थासङ्गतिर्दुवारैव इति - वाच्यम् ।

तादृशग्रन्थस्यापि गोत्वाभावप्रतियोगिकाभावत्वेन रूपेण जलवृत्तित्वविशिष्टतादृशान्यतरत्वावच्छिन्नप्रतियोगिताकाभावपरत्वात्

विवरणम्

न चैवमिति [पृ.200] । जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य धूमाभावरूपत्वप्रतिक्षेपपरः यद्ययं ग्रन्थः स्यात् तदा जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावः जलत्वाद्यभाव एव इति ग्रन्थविन्यास उचितः । जलवृत्तित्वविशिष्टगोत्वाभावस्याभाव इति ग्रन्थलेखनमसङ्गतमिति शङ्का ।

जलवृत्तित्वविशिष्टगोत्वाभावस्याभाव इति ग्रन्थस्यापि जलवृत्तित्वविशिष्टगोत्वाभावप्रतियोगिकोऽभाव इत्यर्थः । जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्यापि गोत्वाभावप्रतियोगिकत्वेन तद्ग्रन्थप्रतिपाद्यत्वात् न काप्यसङ्गतिः ।

गादाधरी

न च - एवमपि अयोगोलकभेदाभावस्य अयोगोलकत्वादिरूपभावात्मकस्य स्वनिष्ठजलवृत्तित्वविशिष्टगोत्वाभावाभावस्वरूपताविरहात् तस्य प्रतियोगिसामानाधिकरण्यं न घटत इति अतिव्याप्त्यप्रसक्तिः । साध्यतावच्छेदकसंबन्धेन व्यापकताया लक्षणघटकत्वं प्रागेव दूषितम् । अतो नायोगोलकभेदाभावस्य लक्षणघटकत्वासंभव इति - वाच्यम् ।

अयोगोलकभेदाभावादेरपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसंभवात् ।

विवरणम्

न चैवमपीति [पृ.200]। 'धूमवान् वह्नेः' इत्यादौ धूमाभावस्य जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावरूपतया द्रव्यरूपप्रतियोगिसामानाधिकरण्यसत्त्वेऽपि यावदभावान्तर्गतस्य अयोगोलकभेदाभावस्य प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः।

न च - अयोगोलकभेदाभावे यः जलवृत्तित्वविशिष्टगोत्वाभावाभावः तस्य अयोगोलकभेदाभावरूपत्वात् अयोगोलकभेदाभावस्य गोत्वाभावोऽपि प्रतियोगी। तत्सामानाधिकरण्यम् अयोगोलकभेदाभावेऽस्तीति अतिव्याप्तिरिति - वाच्यम्।

अभावाधिकरणकाभावस्यैव अधिकरणीभूताभावस्वरूपत्वात् अयोगोलकभेदाभावस्य भेदप्रतियोगितावच्छेदकायोगोलकत्वादिरूपभावात्मकतया तदधिकरणकस्य जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य अयोगोलकभेदाभावरूपत्वविरहात् तस्य प्रतियोगिसामानाधिकरण्यं नास्ति इति अतिव्याप्त्यप्रसक्तिः।

न च - अयोगोलकभेदस्य स्वरूपसंबन्धेन धूमव्यापकत्वेऽपि साध्यतावच्छेदकसंयोगसंबन्धेन धूमव्यापकत्वाभावात् साध्यतावच्छेदकसंबन्धावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविरहात् कथम् अयोगोलकभेदाभावस्य लक्षणघटकत्वम् इति - वाच्यम्।

साध्यतावच्छेदकसंबन्धेन व्यापकतानिवेशस्य पूर्वं दूषितत्वात्। येन संबन्धेन व्यापकत्वं संभवति, तत्संबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकाभावस्यैव लक्षणे निवेशात्। स्वरूपसंबन्धेन अयोगोलकभेदस्य धूमव्यापकत्वात् स्वरूपसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य अयोगोलकभेदाभावस्यापि लक्षणघटकत्वात् तमादाय अतिव्याप्तिवारणसंभवात् जलवृत्तित्वविशिष्टगो-

त्वाभावाभावस्य धूमाभावरूपत्वनिराकरणं व्यर्थमिति **'न चैवम्'** [पृ.223] इत्यादिना शङ्का ।

तां समाधत्ते - **अयोगोलकभेदाभावादेरपीति** [पृ.223] । यावदभावपदेन अयोगोलकभेदाभावस्य ग्रहणेऽपि तस्य व्यापकताघटकस्वरूपसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिर्दुर्वारा इति भावः ।

गादाधरी

न च - एवं धूमाभावस्य गोत्वाभावाद्यप्रतियोगिकत्वेऽपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तितादवस्थ्यम् इति - वाच्यम् ।

तादृशप्रतियोगिनः स्वप्रतियोगिनिष्ठव्यापकताघटकयावत्संबन्धान्तर्गतसंयोगादिना सामानाधिकरण्यविरहात् 'घटत्वाभाववान् मेयत्वात्' इत्यादावपि घटत्वाभावादिप्रकारकप्रमाभावस्य यावद्व्यापकताघटकसंबन्धान्तर्गतविशेष्यतासंबन्धेन प्रतियोगिसामानाधिकरण्यविरहेण अतिव्याप्त्यनवकाशात् ।

विवरणम्

ननु धूमाभावस्यापि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादाय अतिव्याप्तेर्दुर्वारतया तस्य गोत्वाभावप्रतियोगिकत्वखण्डनं व्यर्थमित्याशङ्क्य धूमाभावस्य स्वप्रतियोगिनिष्ठसाध्यव्यापकताघटकयावत्संबन्धान्तर्गतसंयोगसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यविरहात् अतिव्याप्त्यनवकाशात् इति समाधत्ते - **न च एवं धूमाभावस्येत्यादिना** [पृ.202] ।

ननु 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्त्यभावेऽपि 'घटत्वाभाववान् मेयत्वात्' इत्यादौ घटत्वात्मकस्य अभावस्य घटत्वा-

भावनिष्ठस्वरूपसंबन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य व्यापकताघटकस्वरूपसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूप-प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिरित्याशङ्क्य आह - **घटत्वाभाववान् इति** [पृ.202] । तथा च घटत्वाभावरूपसाध्यं प्रति घटत्वाभावप्रकारकप्रमायाः विशेष्यतासंबन्धेन व्यापकतया विशेष्यतासंबन्धावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकस्य घट-त्वाभावप्रकारकप्रमाभावस्य व्यापकताघटकविशेष्यतासंबन्धेन यावद्धेत्वधिकरणघटान्तर्भावेण घटत्वाभावप्रकारकप्रमारूपप्रतियो-गिसामानाधिकरण्यविरहात् अतिव्याप्त्यनवकाशात् इति भावः ।

गादाधरी

न च - एवं जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतरा-भावस्य धूमाभावस्वरूपतया संयोगेन प्रतियोगिसामानाधिकरण्य-संभवेऽपि धूमादिप्रकारकप्रमाभावस्य यावद्व्यापकताघटकसंब-न्धान्तर्गतविशेष्यतासंबन्धेन प्रतियोगिसामानाधिकरण्याभावात् 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्त्यप्रसक्त्या तादृशाभावस्य धूमाभावस्वरूपताप्रतिक्षेपो न युक्त इति - वाच्यम् ।

तादृशाभावस्य तत्स्वरूपत्वे तुल्ययुक्त्या धूमादिप्रकारक-प्रमाभावनिष्ठस्य जलादिवृत्तित्वविशिष्टगोत्वाभावद्रव्यत्वप्रकारक-प्रमान्यतराभावस्य तत्स्वरूपतया द्रव्यत्वप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन तयैव समं विशेष्यतासंबन्धेन तादृशाभावस्य सामानाधिकरण्यसत्त्वात् अतिव्याप्तिप्रसक्तेरिति ।

विवरणम्

नन्वेवं जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य धूमाभावाधिकरणकस्य धूमाभावस्वरूपतया व्यापकताघटकसंयोग-संबन्धेन द्रव्यरूपप्रतियोगिसामानाधिकरण्यं धूमाभावस्य **यद्यपि** संभवति, **तथापि** विशेष्यतासंबन्धेन साध्यव्यापिका **या**

धूमप्रकारकप्रमा तन्निष्ठप्रतियोगिताकस्य धूमप्रकारकप्रमाभावस्य व्यापकताघटकयावत्संबन्धान्तर्गतविशेष्यतासंबन्धेन अयोगोलकान्तर्भाविण प्रतियोगिसामानाधिकरण्यं नास्ति । अयोगोलके विशेष्यतासंबन्धेन धूमप्रकारकप्रमारूपप्रतियोगिविरहात् इत्यतिव्याप्त्यप्रसक्त्या जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य धूमाभावस्वरूपत्वप्रतिक्षेपः न युक्त इत्याशङ्क्य धूमप्रकारकप्रमाभावस्य यावदभावपदेन ग्रहणेऽपि तस्य व्यापकताघटकविशेष्यतासंबन्धेन प्रतियोगिसामानाधिकरण्यमस्ति । धूमप्रकारकप्रमाभावे यः जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यत्वप्रकारकप्रमान्यतराभावः तस्य धूमप्रकारकप्रमाभावरूपतया धूमप्रकारकप्रमाभावस्य द्रव्यत्वप्रकारकप्रमापि प्रतियोगिनी । सा विशेष्यतासंबन्धेन यावद्धेत्वधिकरणे अयोगोलके वर्तते । तथा च धूमप्रकारकप्रमाभावस्यापि द्रव्यत्वप्रकारकप्रमारूपप्रतियोगिसामानाधिकरण्यं व्यापकताघटकविशेष्यतासंबन्धेन अस्तीति अतिव्याप्तिः प्रसज्यत एव । तद्वारणं तु जलवृत्तित्वविशिष्टगोत्वाभाव - द्रव्यत्वप्रकारकप्रमान्यतराभावस्य धूमाभावरूपताप्रतिक्षेप एव संभवतीति तत्प्रतिक्षेपपरस्य ग्रन्थस्य साङ्गत्यमित्यभिप्रायेण समाधत्ते न चैवं जलवृत्तित्वविशिष्टेत्यादिना [पृ.203] ।

॥ इति प्रथमस्वलक्षणम् ॥

॥ श्रीः ॥

द्वितीयस्वलक्षणम्

दीधितिः

यत्समानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावतामभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत् ।

गादाधरी

(३२) द्वितीयलक्षणावतारः

नन्वेवमपि 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिर्दुर्वारैव । उक्ताभावस्य जलत्वाद्यभावस्वरूपत्वे तु तुल्ययुक्त्या धूमवद्वृत्तित्वविशिष्टतादृशाभावस्य धूमाभावस्वरूपत्वेन द्रव्यसामान्यस्य तत्प्रतियोगित्वानपायात् । **एवं धूमाद्यभावस्य** धूमत्वादिना प्रमेयसामान्याभावसमनियतत्वेन तत्तदभिन्नत्वोपगमात् प्रमेयमात्रस्यैव तत्प्रतियोगित्वात् ।

यदि च धूमत्वादिना 'प्रमेयं नास्ति' इत्यादि प्रतीतौ धूममात्रस्यैव प्रतियोगित्वग्रहः न प्रमेयान्तरस्य, **अथ वा** प्रतियोगिसामानाधिकरण्यशरीरे न्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिता निवेशनीया, एवं च **तादृशप्रतियोगिताको** हेतुसमानाधिकरणाभावो ग्राह्यः, यावत्प्रमेयनिष्ठप्रतियोगिता च **तथाविध**धूमत्वावच्छिन्नैव, तादृशधर्मानवच्छिन्ना च धूमादिमात्रवृत्तिधूमाभावीयप्रतियोगितैव, तदाश्रयसामानाधिकरण्यं च नायोगोलकाद्यन्तर्भावेण इति मन्यते - तदापि धूमाभावस्य वन्हिधूमोभयत्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन वह्नेरपि तदभावप्रतियोगितया, **अयोगोलकान्यत्वाभावस्य** अयोगोलकान्यवृत्तित्वविशिष्टाकाशाभावाभावसमनियततया तदभिन्नत्वेन आकाशाभावस्यापि तत्प्रतियोगितया, **धूमवत्त्वप्रकारकप्रमाभावस्य** धूमवद्विशेष्यकत्वविशिष्टद्रव्यत्वादिप्रकारकप्रमाभाव-

समनियततया **द्रव्यत्वादिप्रकारकप्रमाया अपि** तत्प्रतियोगित्वेन **धूमभेदस्य** धूमत्वसदुभयत्वावच्छिन्नाभावसमनियतत्वेन सन्मात्रस्यैव तत्प्रतियोगितया **हेतुसमानाधिकरणतादृशाभावानां** स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण **दर्शितप्रतियोगिभिः** सामानाधिकरण्यमक्षतमेव इति अतिव्याप्तिः ।

विवरणम्

द्वितीयस्वलक्षणमवतारयति-**नन्वेवमपीत्यादिना** [पृ.205] । 'धूमवान् वह्नेः' इत्यादौ धूमाभावस्य जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य च अभिन्नतया गोत्वाभावरूपप्रतियोगिसामानाधिकरण्यमादाय अतिव्याप्तिशङ्कायां जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य जलत्वाभावरूपत्वात् नातिव्याप्तिरिति समाहितम् । तथा सति धूमवद्वृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य धूमाभावस्य च समनियतत्वेन अभिन्नतया धूमाभावस्य द्रव्यसामान्यं प्रतियोगि । तत्सामानाधिकरण्यम् अयोगोलकान्तर्भावेण धूमाभावस्यास्तीति अतिव्याप्तिः । अतः द्वितीयलक्षणमहा इत्यर्थः ।

एवं तत्रैव प्रकारान्तरेण अतिव्याप्तिमाह - **एवं धूमाद्यभावस्य इत्यादिना** [पृ.205] । धूमत्वावच्छिन्नाभावस्य 'धूमो नास्ति' इति प्रतीतिसिद्धस्य धूमत्वेन प्रमेयसामान्याभावस्य च समनियतत्वेन अभिन्नत्वात् धूमाभावस्य प्रमेयसामान्यं प्रतियोगि । अयोगोलके संयोगसंबन्धेन वह्न्यादिप्रमेयस्य सत्त्वेन धूमाभावस्य अयोगोलकान्तर्भावेण प्रमेयरूपप्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिः । यदि च 'धूमत्वेन धूमो नास्ति' इत्यत्र धूममात्रनिष्ठा या प्रतियोगिता प्रतीयते, सैव प्रतियोगिता 'धूमत्वेन प्रमेयं नास्ति' इत्यत्रापि प्रमेयत्वसामानाधिकरण्येन प्रतीयते । न तु धूमातिरिक्तस्य प्रमेयस्य प्रतियोगित्वम् । असति बाधके

अवच्छेदकैक्ये प्रतियोगिताया अपि ऐक्यात् । तथा च धूमरूप-प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः ।

अथ वा प्रतियोगिसामानाधिकरण्यशरीरे प्रतियोगितायां न्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नत्वं निवेश्यते । तथा च न्यूनवृत्तिः समानाधिकरणश्च यो धर्मः तदनवच्छिन्नप्रतियोगिता-श्रयसामानाधिकरण्यं यावदभावे विशेषणम् । धूमाभावस्य प्रमेयसामान्यप्रतियोगिकत्वाङ्गीकारेऽपि प्रमेयसामान्यनिष्ठा या प्रतियोगिता सा स्वन्यूनवृत्तिसमानाधिकरणधूमत्वावच्छिन्नैव भवति । अतः न्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिता धूममात्रनिष्ठप्रतियोगिता । तदाश्रयधूमसामानाधिकरण्यं धूमा-भावस्य नास्तीति नातिव्याप्तिः ।

न च - एवं निवेशे 'वन्हिमान् धूमात्' इत्यादौ हेतु-समानाधिकरणयावदभावान्तर्गतस्य घटत्वेन प्रमेयसामान्याभावस्य यावद्धेत्वधिकरणपर्वतान्तर्भावेण स्वन्यूनवृत्तिसमानाधिकरणधर्मान-वच्छिन्ना या घटमात्रनिष्ठप्रतियोगिता तदाश्रयघटसामानाधिकरण्यं नास्तीति अव्याप्तिः इति - वाच्यम् । साध्यव्यापकतावच्छेदक-प्रतियोगितायामपि स्वन्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नत्वस्य निवेशनीयत्वात् । घटत्वेन प्रमेयसामान्याभावीया या प्रमेयसामा-न्यनिष्ठा प्रतियोगिता तस्यां साध्यवह्निव्यापकतावच्छेदकत्व-सत्त्वेऽपि स्वन्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नत्वं नास्ति । तादृशघटत्वावच्छिन्नत्वात् । घटमात्रनिष्ठप्रतियोगितायां साध्य-व्यापकतावच्छेदकत्वं नास्तीति घटत्वेन प्रमेयसामान्याभावस्य लक्षणाघटकतया नाव्याप्तिरित्यालोच्यते, तदापि धूमत्वेन धूमाभावस्य वन्हिधूमोभयाभावसमनियतत्वमस्ति । यत्र यत्र धूमाभावः तत्र वन्हिधूमोभयाभावस्य सत्त्वात् । तथा च धूमा-भावस्य वन्हिधूमोभयाभावाभिन्नतया वह्निरपि प्रतियोगी ।

तत्सामानाधिकरण्यम् अयोगोलकान्तर्भावेण धूमाभावेऽस्तीति अतिव्याप्तिरिति भावः ।

धूमाभावस्य धूमत्वेन प्रमेयसामान्याभावस्य च अभिन्नत्वेऽपि तदीयप्रतियोगितयोः धूममात्रनिष्ठप्रमेयसामान्यनिष्ठयोः नाभिन्नत्वमित्युच्यते, तदाप्याह—**अथ वेति** [पृ.205] । **तादृशप्रतियोगिताक इति** [पृ.205] । न्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नसाध्यव्यापकतावच्छेदकप्रतियोगिताक इत्यर्थः । **तथाविधेति** [पृ.205] । न्यूनवृत्तिसमानाधिकरणधूमत्वावच्छिन्नेत्यर्थः । प्रमेयनिष्ठा प्रतियोगिता सर्वेषु प्रमेयेषु वर्तते । धूमत्वं धूममात्रे इति धूमत्वस्य प्रमेयनिष्ठप्रतियोगितान्यूनवृत्तित्वम् ।

ननु धूमाभावस्य वन्हिरूपप्रतियोगिसामानाधिकरण्यमादाय अतिव्याप्तिसंभवेऽपि हेतुसमानाधिकरणयावदभावान्तर्गतस्य अयोगोलकान्यत्वाभावस्य प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरित्यत आह - **अयोगोलकान्यत्वाभावस्येति** [पृ.205] । यत्र यत्र अयोगोलकान्यत्वाभावः अयोगोलके, तत्र आकाशाभावस्य सत्त्वेऽपि अयोगोलकान्यवृत्तित्वविशिष्टः आकाशाभावो नास्ति । अतः अयोगोलकान्यवृत्तित्वविशिष्टाकाशाभावाभावः अयोगोलकान्यत्वाभावसमनियत इति द्वयोरभावयोः ऐक्यात् अयोगोलकान्यत्वाभावस्य अयोगोलकान्यवृत्तित्वविशिष्टाकाशाभावोऽपि प्रतियोगी । विशिष्टशुद्धयोरनतिरेकात् शुद्धाकाशाभावोऽपि प्रतियोगी । आकाशाभावश्च केवलान्वयितया हेत्वधिकरणेऽयोगोलके वर्तते । तथा च अयोगोलकान्यत्वाभावस्य आकाशाभावरूपप्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिरिति भावः ।

ननु एवमपि यावदभावान्तर्गतस्य हेत्वधिकरणायोगोलकवृत्तेः धूमवत्त्वप्रकारकप्रमाभावस्य प्रतियोगिसामानाधिकरण्य-

विरहात् 'धूमवान् वह्नेः' इत्यत्र नातिव्याप्तिरित्यत्राह - **धूमवत्त्वप्रकारकप्रमाभावस्येति** [पृ.205] । यत्र यत्र धूमवत्त्वप्रकारकप्रमाभावः अयोगोलकादौ तत्र धूमशून्यायोगोलकविशेष्यकद्रव्यत्वप्रकारकप्रमायाः सत्त्वेऽपि धूमवद्विशेष्यकत्वविशिष्टद्रव्यत्वप्रकारकप्रमा नास्ति। अतः धूमवत्त्वप्रकारकप्रमाभावस्य धूमवद्विशेष्यकत्वविशिष्टद्रव्यत्वप्रकारकप्रमाभावस्य च अभिन्नतया धूमवत्त्वप्रकारकप्रमाभावस्य द्रव्यत्वप्रकारकप्रमापि प्रतियोगिनी । सा च अयोगोलके वर्तत इति तत्सामानाधिकरण्यम् अयोगोलकान्तर्भावेण धूमवत्त्वप्रकारकप्रमाभावे अस्तीति अतिव्याप्तिर्दुर्वारा इति भावः ।

द्रव्यत्वादिप्रकारकप्रमाया अपीति [पृ.206] । विशिष्टशुद्धयोः अनतिरेकात् इति भावः ।

ननु तथापि हेतुसमानाधिकरणयावदभावान्तर्गतस्य धूमभेदस्य धूमरूपप्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरित्यत्राह - **धूमभेदस्येति** [पृ.206] । यत्र यत्र धूमभेदः धूमभिन्नेषु पदार्थेषु तत्र सतः कस्यचित् वृत्तावपि धूमत्वस्याभावात् धूमत्वसदुभयाभावः वर्तते । अतः धूमभेदस्य धूमत्वसदुभयाभावस्य च समनियतत्वेन अभिन्नतया धूमभेदस्य धूमत्वसदुभयं प्रतियोगि । उभयस्य प्रत्येकानतिरेकात् सन्मात्रमपि प्रतियोगि । तत्सामानाधिकरण्यं च धूमभेदे अयोगोलकान्तर्भावेण वर्तते। अयोगोलके धूमभेदस्य सतः वह्न्यादेश्च वर्तमानत्वात् । तथा च अतिव्याप्तिरिति भावः।

हेतुसमानाधिकरणतादृशाभावानाम् इति [पृ.206] । धूमाभावायोगोलकान्यत्वाभावधूमवत्त्वप्रकारकप्रमाभावधूमभेदानाम् इत्यर्थः । **दर्शितप्रतियोगिभिरिति** [पृ.206] । वह्न्याकाशाभावद्रव्यत्वप्रकारकप्रमासन्मात्ररूपप्रतियोगिभिस्साकम् इत्यर्थः ।

गादाधरी

अथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका या या प्रतियोगिता तत्तन्निरूपकाभावानां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षणीयम् इति नातिव्याप्तिरिति चेत् - तर्हि तादृशो या या प्रतियोगिता तदाश्रयसामानाधिकरण्यं यत्र क्वचिद् यावद्यदधिकरणान्तर्भावेण तत्त्वम् इत्येतावतैव सामञ्जस्ये अभावे यावत्त्वस्य तत्तत्प्रतियोगितानिरूपकत्वस्य हेतुसामानाधिकरण्यस्य विशेषणस्य हेत्वधिकरणे च स्वविशिष्टत्वविशेषणस्य वैयर्थ्यप्रसङ्गः। एवं सर्वत्र हेतुसमानाधिकरणम् उभयत्वावच्छिन्नप्रतियोगिताकं साध्याभावम् आदाय लक्षणसमन्वयसंभवात् व्यधिकरणधर्मावच्छिन्नाभावस्य अप्रामाणिकत्वेऽपि क्षतिविरहेण एतादृशव्याप्तिलक्षणशङ्कायां 'प्रतियोग्यवृत्तिश्च' इत्यादिना तादृशाभावखण्डनस्य असङ्गत्यापत्तिः। अतो लक्षणान्तरमाह - यत्समानाधिकरणानाम् इति [पृ.205]।

अत्रापि यत्तत्पदयोः पूर्ववत् यत्तद्धर्मावच्छिन्नपरता बोध्या। 'वह्निमान् धूमात्' इत्यादौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावाः वन्हित्वादिना घटाद्यभावा एव। तेषां च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण वन्हित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतया लक्षणसमन्वयः। अत्रापि प्रतियोगिसामानाधिकरण्यनिवेशे उक्तक्रमेण 'धूमवान् वह्नेः' इत्यादावतिव्याप्तिः। अतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः। तथा च धूमाद्यभावानां वन्हिधूमोभयत्वावच्छिन्नप्रतियोगिताश्रयवह्न्यादिसामानाधिकरण्यसत्त्वेऽपि प्रतियोगितावच्छेदकीभूततादृशोभयत्वावच्छिन्नसामानाधिकरण्याभावात् नातिव्याप्तिः।

एवं तादृशाभावाधिकरणधूमवद्वृत्तित्वविशिष्टगोत्वाभाव-द्रव्यान्यतराभावस्य धूमाभावस्वरूपत्वेऽपि तादृशाभावप्रति-योगितावच्छेदकधूमवद्वृत्तित्वविशिष्टत्वावच्छिन्नेन समं तादृशा-भावस्य स्वविशिष्टहेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधि-करण्यविरहात् नातिव्याप्तिः ।

विवरणम्

उक्तप्रकारेण प्रसक्तायाः अतिव्याप्तेरुद्धारं शङ्कते - **अथेति** [पृ.210] । अभावे यावत्त्वमनिवेश्य प्रतियोगितायां यावत्त्वं व्यापकत्वावच्छेदकप्रतियोगितायाः प्रतियोगिसामानाधिकरण्यघटक-प्रतियोगितायाश्च ऐक्यं विवक्षणीयम् । साध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदिका या या प्रतियोगिता प्रत्येकं तन्निरूपका-भावानां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण तत्तत्प्रतियोगिता-श्रयसामानाधिकरण्यं व्याप्तिः । 'वन्हिमान् धूमात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नां वह्न्यादिनिष्ठां प्रतियोगितां गृहीत्वा लक्षणसमन्वयः कार्यः । 'धूमवान् वह्नेः' इत्यत्र धूमाभावस्य वन्हिधूमोभयाभावस्य च समनियतत्वेन अभिन्नत्वेऽपि धूमाभावीया धूमत्वावच्छिन्ना धूमनिष्ठा प्रतियोगिता अन्या, वन्हिधूमोभयत्वा-वच्छिन्ना वन्हिधूमोभयनिष्ठा प्रतियोगिता अन्या । तत्र या या प्रतियोगिता इत्यनेन गृहीता या धूममात्रनिष्ठा प्रतियोगिता तदाश्रयधूमसामानाधिकरण्यं धूमाभावस्य नास्तीति नातिव्याप्ति-रिति भावः ।

तर्हीति [पृ.210] । प्रतियोगितायां यावत्त्वनिवेशे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका या या प्रतियोगिता तदाश्रयसामानाधिकरण्यं यत्रकुत्रचित् यावद्यदधिकरणान्तर्भावेण वर्तते तत्त्वं व्याप्तिः इत्येतावतैव सर्वदोषवारणसंभवात् अभावे यावत्त्वविशेषणं तत्तत्प्रतियोगितानिरूपकत्वविशेषणं हेतुसामा-

नाधिकरण्यविशेषणं हेत्वधिकरणे स्वविशिष्टत्वविशेषणं च व्यर्थम् ।

'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिवारणाय हि अभावे यावत्त्वविशेषणं दत्तम् । सा च अतिव्याप्तिः प्रतियोगितायां यावत्त्वविशेषणेनैव वारयितुं शक्यते । 'अयम् आत्मा ज्ञानात्' इत्यादौ आत्मत्वत्वावच्छिन्नप्रतियोगितायाः ग्रहणेऽपि तदाश्रयात्मत्वसामानाधिकरण्यं आत्मवृत्तौ यत्रकुत्रचित् ज्ञानादौ वर्तत इति अव्याप्तेरप्रसक्त्या हेतुसामानाधिकरण्यविशेषणं व्यर्थम् । अभावस्य अनिवेशादेव तत्तत्प्रतियोगितानिरूपकत्वमपि व्यर्थम् । 'कपिसंयोगाभाववान् मेयत्वात्' इत्यादावपि 'कपिसंयोगाभावनिष्ठप्रतियोगिताश्रयसामानाधिकरण्यं यावद्धेत्वधिकरणनित्यगुणादिनिष्ठगुणत्वादौ वर्तत इति अव्याप्तेरप्रसिद्ध्या स्वविशिष्टत्वविशेषणमपि व्यर्थमिति भावः ।

यथासंनिवेशे अवैयर्थ्यादाह - **एवं सर्वत्रेति** [पृ.210] । यथास्थितप्रथमस्वलक्षणे 'वन्हिमान् धूमात्', 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ हेतुसमानाधिकरणाभावपदेन वन्हिघटोभयत्वावच्छिन्नाभावं वाच्यत्वघटोभयत्वावच्छिन्नाभावं च गृहीत्वा तस्य वह्निवाच्यत्वरूपप्रतियोगिसामानाधिकरण्यसत्त्वेन लक्षणसमन्वयात् व्यधिकरणधर्मावच्छिन्नाभावस्य अप्रामाण्येऽपि दोषविरहेण व्यधिकरणधर्मावच्छिन्नाभावखण्डनपरस्य 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थस्य अनुत्थितिः इत्यभिप्रेत्य लक्षणान्तरमाह इति भावः ।

प्रथमस्वलक्षणे उद्देश्यवाचकपदानि प्रतियोगिसामानाधिकरण्यरूपविधेयवद्वाचकपदं च प्रथमाविभक्त्यन्ततया निर्दिष्टानि । द्वितीयस्वलक्षणे उद्देश्यवाचकपदानां षष्ठ्यन्ततया विधेयवाचकपदस्य प्रथमान्ततया च निर्देशः कृतः । तेन व्युत्पत्तिद्वयं सूच्यते - उद्देश्यवाचकपदस्य प्रथमान्तत्वे विधेयवद्वाचकपदस्य प्रथमान्तत्वम्

इति एका व्युत्पत्तिः। उद्देश्यवाचकपदस्य षष्ठ्यन्तत्वे विधेयवाचकपदस्य प्रथमान्तत्वम् इत्यपरा व्युत्पत्तिरिति।

यद्धर्मावच्छिन्नसमानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकानां यावतामभावानां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्नत्वं व्याप्तिः।

'वन्हिमान् धूमात्' इत्यादौ यद्धर्मः धूमत्वम्, तदवच्छिन्नाधिकरणं पर्वतादिकम्। तद्वृत्तयः यावन्तोऽभावाः वह्नित्वेन घटाद्यभावाः। ते च साध्यतावच्छेदकेत्यादिविशेषणाक्रान्ताः। साध्यतावच्छेदकं वह्नित्वम्। तदवच्छिन्नाधिकरणं पर्वतादि। तद्वृत्तिः यः अत्यन्ताभावः न वह्न्यभावः। किन्तु घटाद्यभावः। तत्प्रतियोगितावच्छेदकं घटत्वादिकम्। तत्प्रतियोगितानवच्छेदकं वन्हित्वम्। तदवच्छिन्नप्रतियोगिताकाभावः वह्नित्वेन वह्न्यभावः, वह्नित्वेन घटाद्यभावश्च। तत्र वह्नित्वेन वह्न्यभावस्य हेतुसमानाधिकरणत्वविरहात् वह्नित्वेन घटाद्यभावा एव ग्राह्याः। तेषां च स्वविशिष्टं यद्धेत्वधिकरणं तदन्तर्भावेण वन्हित्वरूपप्रतियोगितावच्छेदकावच्छिन्नवह्निसामानाधिकरण्यमस्ति। पर्वतादौ वन्हित्वावच्छिन्नस्य वह्नेः वह्नित्वेन घटाद्यभावानां च सत्त्वात् इति लक्षणसमन्वयः।

प्रथमस्वलक्षणे प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वं निवेशितम्। अतः यन्निष्ठप्रतियोगिताकाभावस्य यावदभावपदेन ग्रहणे तत्प्रतियोगिताविशिष्टस्य साध्यव्यापकत्वं संभवति, तन्निष्ठप्रतियोगिताकोऽभावः यावदभावपदेन ग्राह्यः। स च सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्यनिष्ठप्रतियोगिताकः घटत्वादिना वह्न्याद्यभावः। व्यभिचारिणि धूमत्वादिना धूमाद्यभावः।

द्वितीयस्वलक्षणे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वं प्रतियोगितावच्छेदके विशेषणम् । अतः यद्धर्मावच्छिन्नस्य साध्यव्यापकत्वं संभवति, तद्धर्मावच्छिन्नप्रतियोगिताकाभावः ग्राह्यः । स च सद्धेतौ वन्हित्वादिना घटाद्यभावः । प्रथमलक्षणे प्रतियोगिसामानाधिकरण्यं निवेशितम् । अत्र तु प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमिति विशेषः ।

'धूमवान् वह्नेः' इत्यादौ वन्हिसमानाधिकरणस्य धूमत्वावच्छिन्नव्यापकतावच्छेदकधूमत्वावच्छिन्नप्रतियोगिताकस्य धूमत्वेन धूमाभावस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्गतायोगोलकान्तर्भावेण धूमत्वरूपप्रतियोगितावच्छेदकावच्छिन्नधूमरूपप्रतियोगिसामानाधिकरण्यं नास्ति । अयोगोलके धूमविरहात् इति नातिव्याप्तिः ।

अत्र प्रतियोगिसामानाधिकरण्यमात्रनिवेशे एतल्लक्षणावतरणिकोक्तरीत्या धूमाभावस्य वन्हिधूमोभयत्वावच्छिन्नाभावस्य च समनियतत्वेन अभिन्नतया प्रतियोगिताश्रयवह्निसामानाधिकरण्यमादाय अतिव्याप्तिः स्यात् । तद्वारणाय प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः । तथा सति प्रतियोगितावच्छेदकं यत् वह्निधूमोभयत्वं तदवच्छिन्नसामानाधिकरण्यं नास्ति । अयोगोलके वह्निधूमोभयत्वावच्छिन्नस्य असत्त्वात् इति नातिव्याप्तिः ।

एवं धूमाभावस्य धूमवद्वृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य च समनियतत्वेन अभिन्नतया द्रव्यरूपप्रतियोगिसामानाधिकरण्यसत्त्वेऽपि धूमाभावप्रतियोगितावच्छेदकं यत् धूमवद्वृत्तित्वविशिष्टत्वं तदवच्छिन्नसामानाधिकरण्यम् अयोगोलकान्तर्भावेण धूमाभावस्य नास्तीति नातिव्याप्तिः । तदाह - **अत्रापि यत्तत्पदयोरित्यादिना** [पृ.210] ।

गादाधरी

'द्रव्यत्वेन धूमो नास्ति' इत्यादि प्रतीतौ च द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वं न भासते, अपि तु धूमत्वादेरेव। द्रव्यत्वादेस्तु तृतीयोल्लिखितवैशिष्ट्यमात्रं धूमादौ भासत इत्युपेयते। अतः तादृशाप्रतीतिविषयाभावस्य धूमाभावादिसमनियततया **तत्प्रतियोगितावच्छेदकं** द्रव्यत्वादिकमपि धूमाभावप्रतियोगितावच्छेदकमिति प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणेऽपि अतिव्याप्तेर्दुर्वारिता इत्याशङ्काया नावकाशः।

विवरणम्

ननु प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशेऽपि 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिर्दुर्वारा। तथा हि - 'द्रव्यत्वेन धूमो नास्ति' इति प्रतीतिसिद्धः यः द्रव्यत्वावच्छिन्नधूमाभावः तस्य 'धूमो नास्ति' इति प्रतीतिसिद्धो यो धूमत्वावच्छिन्नधूमाभावः तस्य च समनियतत्वेन अभिन्नतया धूमाभावस्य धूमत्ववत् द्रव्यत्वमपि प्रतियोगितावच्छेदकम्। तदवच्छिन्नद्रव्यसामानाधिकरण्यं अयोगोलकान्तर्भावेण धूमाभावे वर्तते। अयोगोलके वह्न्यादिरूपद्रव्यस्य धूमाभावस्य च सत्त्वात् इत्यत आह - **द्रव्यत्वेन धूमो नास्तीत्यादिना** [पृ.215]।

'द्रव्यत्वेन धूमो नास्ति' इति प्रतीतौ धूमत्वस्यैव प्रतियोगितावच्छेदकत्वं भासते। 'द्रव्यत्वेन' इति तृतीयया द्रव्यत्ववैशिष्ट्यमात्रं धूमे भासते। न तु द्रव्यत्वस्य प्रतियोगितावच्छेदकत्वम्। अतिप्रसक्तत्वात्। तथा च धूमाभावप्रतियोगितावच्छेदकत्वं द्रव्यत्वस्य नास्तीति तदवच्छिन्नसामानाधिकरण्यमादाय अतिव्यप्तिशङ्का न कार्या इति भावः।

तत्प्रतियोगितावच्छेदकमिति [पृ.215]। द्रव्यत्वेन धूमाभावप्रतियोगितावच्छेदकमित्यर्थः।

गादाधरी

एतेन धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टस्य वन्हित्वरूपेण योऽभावः तस्य धूमाभावसमनियततया वन्हित्वमपि धूमाभावप्रतियोगितावच्छेदकम् इति - अपास्तम्। वन्हित्वेन तादृशधूमवद्वृत्तित्वविशिष्टं नास्तीति प्रतीतौ तादृशधूमवद्वृत्तित्ववैशिष्टयस्यैव प्रतियोगितावच्छेदकत्वावगाहनोपगमात्। अन्यथा धूमवद्वृत्तित्वविशिष्टवह्निमति धूमशून्ये वन्हित्वरूपप्रतियोगितावच्छेदकविशिष्टवन्हिरूपप्रतियोगिसत्त्वेन तादृशप्रतीत्यनुदयप्रसङ्गात्। अस्तु वा तत्र तादृशवैशिष्टयसहितस्यैव वन्हित्वस्य तथात्वम्। तावतापि न क्षतिः। प्रतियोगितावच्छेदकपदस्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणार्थकत्वात्।

विवरणम्

एतेनेत्यादि [पृ.216]। वन्हित्वेन धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टं नास्ति इति प्रतीतिसिद्धः यः अभावः स धूमाभावसमनियतः। धूमाभाववति अयोगोलकादौ धूमवद्वृत्तित्वविशिष्टस्य अभावसत्त्वात्। तथा च तयोरभावयोः समनियतत्वेन अभिन्नतया वन्हित्वेन तादृशविशिष्टाभावप्रतियोगितावच्छेदकं वन्हित्वं, तदभिन्नस्य धूमाभावस्यापि प्रतियोगितावच्छेदकम्। वन्हित्वावच्छिन्नसामानाधिकरण्यं च अयोगोलकान्तर्भावेण धूमाभावे अस्तीति 'धूमवान् वह्नेः' इत्यादौ प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणेऽपि अतिव्याप्तिर्दुर्वारा इत्याशङ्का।

तस्याः निरासस्तु 'वन्हित्वेन धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टं नास्ति' इति प्रतीतौ वन्हित्वस्य न प्रतियोगितावच्छेदकत्वं भासते, किन्तु धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टत्वस्यैव प्रतियोगितावच्छेदकत्वं भासते। वन्हित्वस्य प्रतियोगिता-

वच्छेदकत्वे तद्विशिष्टवन्हिमति धूमशून्ये अयोगोलकादौ वन्हित्वेव धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टं नास्तीति प्रतीतेः अनुदय-प्रसङ्गात् । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिना साकम् अभावस्य विरोधात् । धूमवद्वृत्तित्ववैशिष्टयस्य प्रतियोगिता-वच्छेदकत्वे तु तदवच्छिन्नप्रतियोगिविरहात् अयोगोलकादौ तादृशप्रतीतिरुपपद्यते । एवञ्च तादृशविशिष्टाभावधूमाभावयो-रैक्येऽपि प्रतियोगितावच्छेदकं यत् धूमकालावच्छिन्नधूमवद्वृत्तित्व-वैशिष्टयं तदवच्छिन्नसामानाधिकरण्यविरहात् नातिव्याप्तिरिति ।

धूमकालावच्छिन्नेति धूमवद्वृत्तित्वे विशेषणम् । धूमशून्येऽ-ङ्गारशेषे धूमवद्वृत्तित्वविशिष्टवह्न्यभावसत्त्वात् तादृशा-भावस्य न धूमाभावसमनियतत्वसंभवः इति धूमकालावच्छिन्नेति विशेषणं दत्तम् । धूमशून्येऽङ्गारशेषे धूमकालावच्छिन्नं यत् धूमव-द्वृत्तित्वं तद्विशिष्टवह्नेः अभावः अस्तीति तस्य अभावस्य धूमाभावसमनियतत्वम् ।

अस्तु वेति [पृ.216] । वन्हित्वेनेति तृतीयया वन्हित्व-स्यापि अवच्छेदकत्वावगाहनात् वन्हित्व - धूमकालावच्छिन्न-धूमवद्वृत्तित्ववैशिष्टयोभयं तादृशाभावप्रतियोगितावच्छेदकम् । तदवच्छिन्नसामानाधिकरण्यं धूमाभावस्य नास्तीति नातिव्याप्तिः। यद्यपि उभयस्य प्रतियोगितावच्छेदकत्वे तदन्तर्गतस्य वन्हित्व-स्यापि प्रतियोगितावच्छेदकत्वमस्तीति तदवच्छिन्नसामानाधि-करण्यसत्त्वात् अतिव्याप्तिः इति शङ्का भवति, तथापि प्रतियोगिता-वच्छेदकपदेन प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणस्य विवक्षित-त्वात् तत्पर्याप्त्यधिकरणोभयधर्मावच्छिन्नसामानाधिकरण्यविरहात् नातिव्याप्तिरिति भावः ।

गादाधरी

अथ एवमपि 'घटभिन्नत्वेन धूमघटान्यतरन्नास्ति' इत्यत्र घटधूमान्यतरत्वमात्रस्य न प्रतियोगितावच्छेदकत्वभानम् ।

धूमशून्ये घटवति तादृशप्रतीत्यनुपपत्तेः। नापि घटभिन्नत्व-सहितस्य तस्य, गौरवात्। किन्तु घटभिन्नत्वमात्रस्यैव। एवं च तादृशाभावस्य धूमाभावसमनियततया धूमाभावस्यापि घटभिन्नत्वं प्रतियोगितावच्छेदकम्।

एवं भेदत्वेन अयोगोकलभेदघटात्यन्ताभावान्यतराभावस्य अयोगोलकभेदत्वावच्छिन्नाभावसमनियततया भेदत्वमपि अयोगो-लकभेदाभावप्रतियोगितावच्छेदकम्।

एवं द्रव्यत्वभिन्नत्वेन द्रव्यत्वधूमत्वान्यतराभावस्य धूमभेद-समनियततया द्रव्यत्वभिन्नत्वमपि धूमभेदप्रतियोगितावच्छेदकम्। तादृशधर्मावच्छिन्नानां च अयोगोलकादावपि सत्त्वात् अतिव्याप्ति-स्तदवस्थैव इति चेत्—

विवरणम्

प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणेऽपि प्रकारान्तरेण 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिमाशङ्कते—**अथैवमपीति** [पृ.217]। यत्र यत्र धूमाभावः तत्र तत्र घटभिन्न-त्वेन रूपेण धूमघटान्यतराभावः वर्तते। धूमाभाववति घटस्य सत्त्वेऽपि घटभिन्नत्वेन घटो नास्ति, धूमस्तु सुतरां नास्ति। अतः घटभिन्नत्वेन धूमघटान्यतराभावः धूमाभावसमनियतः। तस्य प्रतियोगितावच्छेदकं न घटधूमान्यतरत्वम्। धूमशून्ये अन्यतरत्वविशिष्टघटवति प्रदेशे घटभिन्नत्वेन धूमघटान्यतराभाव-प्रतीत्यनुपपत्तेः। प्रतियोगितावच्छेदकविशिष्टप्रतियोगिना साकं अभावस्य विरोधात्। नापि घटभिन्नत्वसहितं अन्यतरत्वं प्रति-योगितावच्छेदकम्। गौरवात्। किन्तु घटभिन्नत्वमेव प्रति-योगितावच्छेदकम्। तथा च उक्तान्यतराभावप्रतियोगिता-वच्छेदकं घटभिन्नत्वं तदभिन्नस्य धूमाभावस्यापि प्रतियोगिता-वच्छेदकम्। तद्विशिष्टः घटभिन्नः वह्न्यादिः। तत्सामानाधि-करण्यं धूमाभावस्य अस्तीति अतिव्याप्तिरिति भावः।

ननु धूमाभावस्य उक्तरीत्या प्रतियोगितावच्छेदकावच्छिन्न-सामानाधिकरण्यसत्त्वेऽपि यावदभावान्तर्गतस्य धूमत्वावच्छिन्नव्यापकतावच्छेदकायोगोलकभेदत्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिरित्याशङ्क्य अयोगोलकभेदाभावस्य भेदत्वेन अयोगलकभेद - घटात्यन्ताभावान्यतराभावस्य च समनियततया अभिन्नत्वेन अन्यतराभावप्रतियोगितावच्छेदकं भेदत्वमपि अयोगोलकभेदाभावप्रतियोगितावच्छेदकम्। तादृश-भेदत्वावच्छिन्नघटादिभेदसामानाधिकरण्यं अयोगोलकान्तर्भावेण अयोगोलकभेदाभावेऽस्तीति अतिव्याप्तिर्दुर्वारा इत्यत आह—**एवं भेदत्वेन इति** [पृ.218]। अयोगोलकभेदाभाववति अयोगोलके अयोगोलकभेदो नास्ति। घटात्यन्ताभावः वर्तमानोऽपि भेदत्वेन रूपेण न वर्तते। अतः भेदत्वेन अयोगोलकभेदघटात्यन्ताभावान्यतराभावः अयोगोलकभेदाभावसमनियतः।

ननु धूमभेदं यावदभावान्तर्गतमादाय अतिव्याप्तिवारणं शक्यम् इत्याशङ्क्य धूमभेदस्य द्रव्यत्वभिन्नत्वेन द्रव्यत्व-धूमत्वान्यतरात्यन्ताभावस्य च समनियततया अभिन्नत्वेन उक्तान्यतराभावप्रतियोगितावच्छेदकं द्रव्यत्वभिन्नत्वमपि धूमभेदप्रतियोगितावच्छेदकम्। तदवच्छिन्नस्य द्रव्यत्वभिन्नस्य अयोगोलकत्वादेः अयोगोलके सत्त्वेन द्रव्यत्वभिन्नत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं धूमभेदेऽस्तीति अतिव्याप्तिः तदवस्था इत्याह - **एवं द्रव्यत्वभिन्नत्वेनेति** [पृ.218]। धूमभेदवति घटादौ द्रव्यत्वसत्त्वेऽपि द्रव्यत्वभिन्नत्वेन द्रव्यत्वं नास्ति। धूमत्वं तु सुतरां नास्ति। अतः द्रव्यत्वभिन्नत्वेन द्रव्यत्व - धूमत्वान्यतराभावस्य धूमत्वसमनियतत्वम्।

गादाधरी

—तर्हि प्रतियोगितावच्छेदकेत्यनेन प्रतियोगिताया न्यूनवृत्ति-भिन्नं सद् यत् अवच्छेदकं तदेव विवक्षणीयम्। **न्यूनवृत्तित्वं च**

स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वसमानाधि-करणत्वम् । तद्भिन्नत्वं च व्यधिकरणधर्मसाधारणम् । घटधूमा-न्यतरादिनिष्ठप्रतियोगिताया न्यूनवृत्त्येव घटभिन्नत्वादिकम् ।

विवरणम्

उक्तातिव्याप्ति परिहरति - तर्हि प्रतियोगितावच्छेदके-ष्वनेनेति [पृ.219] । प्रतियोगितावच्छेदकावच्छिन्नसामानाधि-करण्यम् इत्यत्र प्रतियोगितावच्छेदकपदेन प्रतियोगितायाः न्यून-वृत्तिभिन्नं सद् यदवच्छेदकम् तत् विवक्षितम् । न्यूनवृत्तित्वं च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वसमानाधि-करणत्वम् । तथा च प्रतियोगितासमानाधिकरणभेदप्रति-योगितावच्छेदकत्वे सति प्रतियोगितासमानाधिकरणं यत् तद्भिन्नं यत् प्रतियोगितावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यम् इत्युक्तं भवति ।

'वन्हिमान् धूमात्' इत्यादौ लक्षणघटकः यः वन्हित्वेन घटाभावः तत्प्रतियोगितावच्छेदकं वन्हित्वम् उक्तप्रतियोगिता-वच्छेदकरूपं भवति । प्रतियोगिताधिकरणे घटे वर्तमानः यः भेदः वह्निभेदः तत्प्रतियोगितावच्छेदकत्वस्य वह्नित्वे सत्त्वेऽपि घटनि-ष्ठप्रतियोगिताव्यधिकरणस्य वह्नित्वस्य तत्प्रतियोगितासमानाधि-करणत्वं नास्ति । अतः प्रतियोगितान्यूनवृत्तिभिन्नमेव वन्हित्वम् । तदवच्छिन्नवन्हिसामानाधिकरण्यं वन्हित्वेन घटाभावेऽस्तीति लक्षणसमन्वयः ।

'धूमवान् वह्नेः' इत्यादौ घटभिन्नत्वेन धूमघटान्यतराभाव-धूमाभावयोः अभिन्नत्वेऽपि धूमाभावनिरूपिता या धूमघटान्यत-रनिष्ठा प्रतियोगिता तन्न्यूनवृत्त्येव घटभिन्नत्वम् । तादृशप्रति-योगिताधिकरणघटनिष्ठः यः घटभिन्नभेदः तत्प्रतियोगितावच्छेदक-त्वात् तादृशप्रतियोगिताधिकरणधूमनिष्ठत्वाच्च घटभिन्नत्वस्य ।

अतः न्यूनवृत्तिभिन्नं सत् अवच्छेदकं घटभिन्नत्वं न भवति। किन्तु धूमाभावीयधूमनिष्ठप्रतियोगितान्यूनवृत्तिभिन्नं सत् अवच्छेदकं धूमत्वमेव। तदवच्छिन्नसामानाधिकरण्यं धूमाभावे नास्तीति नातिव्याप्तिरिति भावः। **न्यूनवृत्तित्वं चेति** [पृ.219]। स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्व - स्वसमानाधिकरणत्वोभयसंबन्धेन प्रतियोगिताविशिष्टत्वं प्रतियोगितान्यूनवृत्तित्वम्।

गादाधरी

न च - 'वन्हित्वेन प्रमेयं नास्ति' इत्यत्र प्रमेयसामान्यवृत्तित्वेन वन्हित्वावच्छिन्नप्रतियोगिता या प्रतीयते, 'वन्हिर्नास्ति' इत्यत्रापि वन्हिवृत्तितया सैव प्रतीयत इत्युपेयते। एकधर्मावच्छिन्नविभिन्नप्रतियोगिताकल्पने गौरवात्। तथा च कालिकसंबन्धेन हेतुसमानाधिकरणवन्हित्वावच्छिन्नवह्न्याद्यभावप्रतियोगिताया न्यूनवृत्तिभिन्नावच्छेदकाप्रसिद्धया अव्याप्तिरिति - वाच्यम्। 'वन्हित्वेन प्रमेयं नास्ति' इति प्रतीतौ प्रमेयत्वविशेषितस्य वह्नेरेव प्रतियोगिता भासते नान्यस्य इत्यभ्युपगमात् तादृशाभावप्रतियोगितायां प्रमेयसामान्यवृत्तित्वस्यैव असिद्धेः।

विवरणम्

न च वन्हित्वेन प्रमेयं नास्तीत्यादि [पृ.221]। 'वन्हिमान् धूमात्' इत्यादौ हेत्वधिकरणपर्वतादौ कालिकसंबन्धेन वन्हित्वेन वह्न्यभावस्यापि वर्तमानतया सोऽपि लक्षणघटकः। वन्हित्वेन वह्न्यभावस्य वन्हित्वेन प्रमेयसामान्याभावस्य च समनियतत्वेन अभिन्नतया अवच्छेदकैक्येन प्रतियोगिताया अपि ऐक्यस्य आवश्यकत्वात् 'वन्हित्वेन प्रमेयं नास्ति' इत्यत्र प्रमेयसामान्यवृत्तित्वेन या प्रतियोगिता वन्हित्वावच्छिन्ना प्रतीयते, सैव 'वन्हिर्नास्ति' इत्यत्रापि वन्हिवृत्तितया प्रतीयते। एवञ्च वह्न्यभावीयप्रतियोगिता प्रमेयसामान्यनिष्ठा इति फलितम्।

तन्न्यूनवृत्तिभिन्नम् अवच्छेदकम् अप्रसिद्धम् । वन्हित्वादेः प्रमेयसामान्यनिष्ठप्रतियोगितापेक्षया न्यूनवृत्तित्वात् । तथा च अव्याप्तिरित्याशङ्क्य प्रतियोगितायाः ऐक्येपि 'वन्हिर्नास्ति' इत्यत्र या वन्हिमात्रवृत्तिः प्रतियोगिता भासते, सैव वन्हित्वेन प्रमेयं नास्ति' इत्यत्रापि प्रमेयत्वसमानाधिकरणतया भासते। तथा च वह्न्यभावीयप्रतियोगिता न प्रमेयसामान्यवृत्तिः, किन्तु वन्हिमात्रवृत्तिः। तन्न्यूनवृत्तिभिन्नं सत् अवच्छेदकं वन्हित्वम्। तदवच्छिन्नसामानाधिकरण्यं वह्न्यभावेऽस्तीति नाव्याप्तिरिति समाधानम् उक्तवान् ।

गादाधरी

अथ वा प्रतियोगितावच्छेदकपदं प्रतियोगितायाः अनतिरिक्तवृत्ति सद् यदवच्छेदकं तत्परम्। अनतिरिक्तवृत्तित्वं च स्वव्यापकतत्कान्यत्व - तत्सामानाधिकरण्योभयाभाववत्त्वम् । तथात्वं च व्यधिकरणधर्मसाधारणमपि । घटधूमान्यतरादिनिष्ठप्रतियोगितायाश्च अतिरिक्तवृत्त्येव घटभिन्नत्वादिकम् । तादृशप्रतियोगितायाः यावद्घटभिन्नादिसाधारण्याप्रसक्तेः। वन्हित्वाद्यवच्छिन्नप्रतियोगितायाः प्रमेयसामान्यवृत्तित्वेऽपि तदनतिरिक्तवृत्त्यवच्छेदकं वन्हित्वादिकमेव। स्वव्यापकतत्कान्यत्वस्य अवृत्तौ प्रसिद्धत्वात् इति नानुपपत्तिगन्धोऽपीति ।

विवरणम्

प्रमेयसामान्यनिष्ठप्रतियोगितैव वन्हिवृत्तितया भासत इत्यङ्गीकारेऽपि उक्ताव्याप्तिवारणार्थं परिष्करोति **अथ वेत्यादिना** [पृ.222] । प्रतियोगितावच्छेदकम् इत्यनेन प्रतियोगितायाः अनतिरिक्तवृत्ति सत् यत् अवच्छेदकं तद्विवक्षितम् । प्रतियोगितानतिरिक्तवृत्तित्वं च स्वव्यापकतत्कान्यत्वतत्सामानाधिकरण्योभयाभाववत्त्वम्। स्वपदम् अवच्छेदकपरम्। तत्पदं प्रतियोगितापरम्।

'वन्हिमान् धूमात्' इत्यादौ वन्हित्वेन घटाभावस्य अभावपदेन ग्रहणे तत्प्रतियोगितानतिरिक्तवृत्तित्वं वह्नित्वस्य वर्तते। वह्नित्वेन घटाभावीयघटनिष्ठप्रतियोगितायाः वन्हित्वव्यापकत्वविरहेण वन्हित्वव्यापकतत्कान्यत्वं यद्यपि वन्हित्वे वर्तते, तथापि घटनिष्ठप्रतियोगितासामानाधिकरण्यं वन्हित्वे नास्ति। प्रतियोगिताधिकरणघटावृत्तित्वात् वह्नित्वस्य। अतः तत्सामानाधिकरण्याभावप्रयुक्तोभयाभाववत्त्वं वह्नित्वेऽस्तीति वह्नित्वं प्रतियोगितावच्छेदकम्। तदवच्छिन्नसामानाधिकरण्यं वन्हित्वेन घटाभावेऽस्तीति लक्षणसमन्वयः।

वन्हित्वेन वह्नयभावस्य अभावपदेन ग्रहणे तत्प्रतियोगितायाः प्रमेयसामान्यनिष्ठायाः अनतिरिक्तवृतिवह्नित्वं भवति। प्रमेयसामान्यनिष्ठप्रतियोगितायां वह्नित्वव्यापकत्वसत्त्वात् स्वव्यापकतत्कान्यत्वं वह्नित्वे नास्तीति तदभावप्रयुक्तोभयाभाववत्त्वस्य वह्नित्वे सत्त्वात् वन्हित्वस्य प्रतियोगितावच्छेदकत्वोपपतिः।

स्वव्यापकतत्कान्यत्वं अवृत्तिगगनादौ प्रसिद्धम्। गगनाधिकरणाप्रसिद्धया अधिकरणत्वघटितस्वव्यापकतत्कत्वस्य गगनेऽभावात् धूमाभावघटभिन्नत्वेन धूमघटान्यतराभावयोः ऐक्येऽपि तदीयान्यतरनिष्ठप्रतियोगितानतिरिक्तवृत्ति घटभिन्नत्वं न भवति। घटभिन्नत्वव्यापकत्वस्य अन्यतरनिष्ठप्रतियोगितायां विरहात्। घटभिन्नत्वं हि पटादावपि वर्तते। न हि तत्र धूमघटान्यतराभावीयप्रतियोगिता वर्तते। तथा च स्वव्यापकतत्कान्यत्वं तत्सामानाधिकरण्यं च उभयमेव घटभिन्नत्वेऽस्ति। न तु उभयाभाववत्त्वम्। अतः प्रतियोगितावच्छेदकपदेन घटभिन्नत्वं न ग्रहीतुं शक्यते, किन्तु धूमत्वमेव। तदवच्छिन्नसामानाधिकरण्यं धूमाभावे नास्तीति न 'धूमवान् वह्नेः' इत्यादावतिव्याप्तिरिति भावः।

गादाधरी

प्रतियोगितायाः स्वन्यूनवृत्तिभिन्नाया यदवच्छेदकं तदवच्छिन्नसामानाधिकरण्यं विवक्षितम् । न्यूनवृत्तित्वं च सामानाधिकरण्यघटितमिति व्यधिकरणधर्मपरिग्रहः ।

विवरणम्

प्रतियोगितायाः स्वन्यूनवृत्तिभिन्नाया इत्यादिना [पृ.224] पक्षान्तरम् उपन्यस्यते । स्वपदेन यस्य प्रतियोगितावच्छेदकत्वम् उपपादनीयं स धर्मो ग्राह्यः । घटभिन्नत्वेन धूमघटान्यतराभावीयप्रतियोगितायाः घटभिन्नत्वन्यूनवृत्तित्वमेवास्ति । घटभिन्नत्वाधिकरणे पटादौ धूमघटान्यतराभावीयप्रतियोगितावच्छेदस्य सत्त्वात् । अतः प्रतियोगितायां स्वन्यूनवृत्तिभिन्नत्वं नास्तीति स्वपदेन घटभिन्नत्वं न ग्राह्यम् । किन्तु धूमत्वमेव । तन्न्यूनवृत्तिभिन्नत्वं धूमाभावीयधूमनिष्ठप्रतियोगितायाम् अस्ति । अतः स्वन्यूनवृत्तिभिन्नायाः प्रतियोगितायाः यदवच्छेदकं धूमत्वम्, तदवच्छिन्नसामानाधिकरण्यं धूमाभावे नास्तीति नातिव्याप्तिः ।

न च - 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नाभावस्य वाच्यत्वत्वेन घटाभावस्य ग्रहणे तदीयप्रतियोगितायां यदवच्छेदकं वाच्यत्वत्वम्, तत् स्वन्यूनवृत्तिभिन्नप्रतियोगितायाम् अवच्छेदकं न भवति । घटनिष्ठप्रतियोगितायां वाच्यत्वत्वन्यूनवृत्तित्वसत्त्वेन स्वन्यूनवृत्तिभिन्नत्वविरहात् । तथा च तत्र एतादृशप्रतियोगितावच्छेदकाप्रसिद्धया अव्याप्तिरिति - वाच्यम् ।

न्यूनवृत्तित्वशरीरे सामानाधिकरण्यस्यापि निवेशनीयत्वात् । तथा च स्वसमानाधिकरणत्वे सति स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वं स्वन्यूनवृत्तित्वम् । वाच्यत्वत्वेन घटाभावीयप्रतियोगितायां घटनिष्ठायां वाच्यत्वत्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकत्वसद्भावेऽपि वाच्यत्वत्वसामानाधिकरण्यं नास्ति ।

अतः सामानाधिकरण्यघटितन्यूनवृत्तित्वविरहात् स्वन्यूनवृत्तिभिन्नत्वं प्रतियोगितायामस्तीति प्रतियोगितावच्छेदकपदेन वाच्यत्वत्वं गृहीत्वा तदवच्छिन्नसामानाधिकरण्यं वाच्यत्वत्वेन घटाभावेऽस्तीति लक्षणसमन्वयः कार्य इति भावः ।

स्वन्यूनवृत्तिभिन्नाया इत्यस्य अवच्छिन्नत्व-सामानाधिकरण्य-समानाधिकरणभेदप्रतियोगितावच्छेदकत्व - एतत्त्रियतसंबन्धेन धर्मविशिष्टभिन्नाया इत्यर्थः ।

गादाधरी

तत्प्रतियोगितासमानाधिकरणं सत् तत्प्रतियोगितानिरूपकाभाववद्वृत्तितावच्छेदकं यत् तदन्यप्रतियोगितावच्छेदकं वा निवेश्यम् ।

विवरणम्

एतत्कल्पत्रयेऽपि भावरूपप्रतियोगिसामानाधिकरण्यनिवेशस्य आवश्यकतया गौरवात् पक्षान्तरमाह - **तत्प्रतियोगितासमानाधिकरणं सत्** [पृ.225] इत्यादिना । तथा च प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यम् इत्यत्र प्रतियोगितावच्छेदकपदेन तत्प्रतियोगितासमानाधिकरणं सत् तत्प्रतियोगितानिरूपकाभाववद्वृत्तितावच्छेदकं यत् तदन्यो धर्मः विवक्षितः । तत्प्रतियोगितापदेन 'वन्हिमान् धूमात्' इत्यादौ वन्हित्वेन घटाभावीयप्रतियोगितायाः ग्रहणे तत्सामानाधिकरण्यं वन्हित्वे नास्तीति अव्याप्यवृत्तिकपिसंयोगाद्यभावीयप्रतियोगिता तत्प्रतियोगितापदेन ग्राह्या । तत्समानाधिकरणत्वे सति तन्निरूपकाभाववद्वृत्तितावच्छेदकं कपिसंयोगत्वम् । तद्भिन्नं प्रतियोगितावच्छेदकं वह्नित्वम् । तदवच्छिन्नसामानाधिकरण्यं वह्नित्वेन घटाभावेऽस्तीति लक्षणसमन्वयः ।

अथ वा तत्प्रतियोगितापदेन घटभिन्नत्वेन वह्निघटान्यतराभावीयप्रतियोगिता ग्राह्या । तत्समानाधिकरणं सत् तन्निरूपकाभाववद्वृत्तितावच्छेदकं घटभिन्नत्वम् । तद्भिन्नं प्रतियोगितावच्छेदकं वह्नित्वम् । तदवच्छिन्नसामानाधिकरण्यं वन्हित्वेन घटाभावेऽस्तीति समन्वयः कार्यः ।

'धूमवान् वह्नेः' इत्यादौ धूमत्वेन धूमाभावस्य घटभिन्नत्वेन धूमघटान्यतराभावस्य च समनियततया ऐक्येऽपि तत्प्रतियोगितापदेन अन्यतरनिष्ठप्रतियोगितां गृहीत्वा तदधिकरणधूमवृत्तित्वं घटभिन्नत्वे वर्तते । एवं तत्प्रतियोगितानिरूपकान्यतराभाववद्भूतलादिवृत्तितावच्छेदकत्वं च घटभिन्नत्वे वर्तते । अन्यतराभाववति भूतले घटभिन्नस्य पटादेः सत्वात् इति रीत्या घटभिन्नत्वं तत्प्रतियोगितासमानाधिकरणं सत् तत्प्रतियोगितानिरूपकाभाववद्वृत्तितावच्छेदकं भवति । तद्भिन्नप्रतियोगितावच्छेदकं धूमत्वमेव । तदवच्छिन्नसामानाधिकरण्यं धूमाभावे नास्तीति नातिव्याप्तिरिति भावः ।

गादाधरी

एतल्लक्षणे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावनिवेशे 'वन्हिमान् धूमात्' इत्यादौ वन्हित्वादिना घटाभावसमनियतत्वेन घटत्वादिना वह्न्याद्यभावस्य हेत्वधिकरणावच्छेदेन वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यसंभवेऽपि वह्निघटोभयत्वावच्छिन्नाभावस्यापि तथाविधतया तस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभावेन असंभव इत्यतो व्यापकतावच्छेदकरूपावच्छिन्न प्रतियोगिताकत्वमुक्तम् ।

अत एव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे हेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावस्य अप्रसिद्ध्या असंभवः, 'अयम् आत्मा ज्ञानात्'

इत्यादौ केवलान्वयिसाध्यके च अव्याप्तिर्वा भवतीत्यभिप्रायकतया 'प्रतियोग्यवृत्तिश्चे'त्यादि ग्रन्थसङ्गतिः ।

विवरणम्

प्रथमलक्षणवत् अस्मिन्नपि लक्षणे प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वं कुतो न निवेशितम् इत्यत्राह - **एतल्लक्षणे** [पृ.226] इत्यादिना । तथा च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावविवक्षणे घटत्वेन वह्न्यभाव एव 'वह्निमान् धूमात्' इत्यादौ लक्षणघटकः स्यात् । तस्य च यावद्धेत्वधिकरणान्तर्भावेण प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं नास्ति । पर्वते प्रतियोगितावच्छेदकघटत्वावच्छिन्नस्य विरहात् इत्यसंभवः।

न च - घटत्वेन वह्न्यभावस्य लक्षणघटकत्वेऽपि तस्य वह्नित्वेन घटाभावसमनियतत्वेन तदभिन्नतया घटत्वेन वह्न्यभावस्य वह्नित्वमपि प्रतियोगितावच्छेदकम् । तदवच्छिन्नवह्नेः यावद्धेत्वधिकरणान्तर्गतपर्वते सत्वात् न असंभव इति - वाच्यम् ।

एवमपि वन्हिघटोभयाभावस्यापि साध्यतावच्छेदकवन्हित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकतया यावदभावान्तर्गतत्वेन तस्य पर्वताद्यन्तर्भावेण वन्हिघटोभयत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं नास्तीति असंभवः । अतः व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वं निवेशितम् । वन्हिघटोभयत्वं तु न वह्नित्वावच्छिन्नव्यापकतावच्छेदकम् । वन्हित्वावच्छिन्नाधिकरणे पर्वतादौ वह्निघटोभयत्वावच्छिन्नाभावसत्वात् । अतः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-

रूपावच्छिन्नप्रतियोगिताकः अभावः न वह्निघटोभयाभावः, किन्तु वह्नित्वेन घटाद्यभाव एवेति न असंभव इति भावः।

अत एवेति [पृ.226]। साध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदकप्रतियोगिताकत्वमुपेक्ष्य साध्यतावच्छेदका-वच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वनिवेशादेवे-त्यर्थः।

वह्निघटोभयाभावस्यापि हेतुसमानाधिकरणतया वह्नि-त्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकतया च तमादायैव लक्षणसमन्वयसंभवात् व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि न क्षतिः इति यो दोषः प्रथमलक्षणे उक्तः सोऽत्र न संभवति। वह्निघटोभयाभावस्य हेतुसमानाधिकरणत्वेऽपि साध्यव्यापकता-वच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहात् वह्नित्वेन वह्न्य-भावस्य साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेऽपि हेतुसमानाधिकरणत्वविरहात्। तथा च सद्धेतौ समानाधिकरण-धर्मावच्छिन्नाभावस्य लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्ना-भावमादायैव समन्वयः कार्य इति 'प्रतियोग्यवृत्तिश्च' इत्यादिग्र-न्थसङ्गतिः।

यद्यपि 'वह्निमान् धूमात्' इत्यादौ हेत्वधिकरणनिरूपित-वृत्तित्वे संबन्धविशेषानिवेशात् वह्नित्वेन वह्न्यभावस्य हेत्वधि-करणे पर्वतादौ कालिकसंबन्धेन वर्तमानतया तमादाय लक्षण-समन्वयः संभवति। तथापि 'अयमात्मा ज्ञानात्' इत्यादौ आत्मत्वत्वेन आत्मत्वाभावस्य हेत्वधिकरणे आत्मनि केनापि संबन्धेन अवर्तमानतया व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे हेतुसमानाधिकरणस्य साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रति-योगिताकाभावस्य अप्रसिद्धया अव्याप्तिः। तद्वारणाय व्यधिकरण-धर्मावच्छिन्नाभावं स्वीकृत्य आत्मत्वत्वादिना घटाद्यभावमादाय

तत्र लक्षणसमन्वयः कार्यं इति व्यधिकरणधर्मावच्छिन्नखण्डनपरस्य प्रतियोग्यवृत्तिश्चेति ग्रन्थस्य सङ्गतिरिति भावः ।

गादाधरी

न च - 'अयम् आत्मा ज्ञानात्' इत्यादौ पूर्वक्षणवृत्तित्वविशिष्टात्मत्वत्वादेः आत्मत्वादिव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्य उत्तरक्षणावच्छेदेन हेतुसमानाधिकरणतया 'इदं वाच्यं ज्ञेयत्वात्' इत्यादावपि एतत्क्षणान्यवृत्तित्वविशिष्टवाच्यत्वत्वादेः विषयतासंबन्धेन जन्यज्ञानत्वविश्वविषयकजन्यज्ञाननिष्ठतद्व्यक्तित्वादेः साध्यव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्य एतत्क्षणावच्छेदेन प्रलयावच्छेदेन च हेतुसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि न तादृशाभावाप्रसिद्धिरिति - वाच्यम् ।

प्रतियोगिवैयधिकरण्याघटितव्यापकताया एव निवेशनीयतया निरुक्तधर्मावच्छिन्नाभावानामपि साध्यवति सत्त्वेन तादृशधर्मणो व्यापकतावच्छेदकत्वासंभवात् ।

विवरणम्

व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि 'अयम् आत्मा ज्ञानात्' इत्यादौ नाव्याप्तिरिति शङ्कते - न चायमात्मेत्यादिना [पृ.229] । 'अयम् आत्मा ज्ञानात्' इत्यादौ साध्यतावच्छेदकम् आत्मत्वत्वम्, तदवच्छिन्नम् आत्मत्वम्, तद्व्यापकम् आत्मत्वमेव । व्यापकतावच्छेदकम् आत्मत्वत्वम् । तदवच्छिन्नप्रतियोगिताकाभावपदेन पूर्वक्षणवृत्तित्वविशिष्टात्मत्वाभावः गृह्यते । स च हेत्वधिकरणे आत्मनि उत्तरक्षणावच्छेदेन वर्तते । अस्य च अभावस्य आत्मान्तर्भावेण प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमस्ति । आत्मनि पूर्वक्षणावच्छेदेन पूर्वक्षणवृत्ति-

त्वविशिष्टात्मत्वत्वावच्छिन्नस्य उत्तरक्षणावच्छेदेन तदवच्छिन्नाभावस्य च सत्त्वात् । तथा च लक्षणसमन्वयेन अव्याप्त्यभावात् व्यधिकरणधर्मावच्छिन्नाभावस्वीकारः अनावश्यकः ।

न च - व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे 'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र कथं लक्षणसमन्वय इति वाच्यम् । तत्रापि साध्यव्यापकतावच्छेदकं यत् एतत्क्षणान्यवृत्तित्वविशिष्टवाच्यत्वत्वं तदवच्छिन्नप्रतियोगिताकाभावस्य एतत्क्षणावच्छेदेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिरण्यसत्वात् लक्षणसमन्वयसंभवात् ।

अथ वा वाच्यत्वत्वावच्छिन्नं प्रति जन्यज्ञानत्वावच्छिन्नस्य विश्वविषयकजन्यज्ञाननिष्ठतद्व्यक्तित्वावच्छिन्नस्य च विषयतासंबन्धेन व्यापकतया साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावपदेन जन्यज्ञानत्वावच्छिन्नाभावं गृहीत्वा तस्य च हेत्वधिकरणे काले विषयतासंबन्धेन जन्यज्ञानत्वावच्छिन्नस्य प्रलयावच्छेदेन तदवच्छिन्नाभावस्य च सद्भावेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमस्तीति नाव्याप्तिः । तथा च व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि क्षतिविरहात् तत्खण्डनपरग्रन्थानुत्थितिरिति शङ्का ।

समाधत्ते—प्रतियोगिवैयधिकरण्याघटितेत्यादिना [पृ.229]। व्यापकताघटकाभावे प्रयोजनविरहात् प्रतियोगिवैयधिकरण्यं न निवेश्यते । अतः आत्मत्वरूपसाध्यवति आत्मनि एतत्क्षणावच्छेदेन पूर्वक्षणवृत्तित्वविशिष्टात्मत्वाभावस्य सत्वात् पूर्वक्षणवृत्तित्वविशिष्टात्मत्वत्वं साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकम्, न तु तत्प्रतियोगितानवच्छेदकम् । अतः साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहात् पूर्वक्षणवृत्तित्वविशिष्टात्मत्वत्वावच्छिन्नाभावः न लक्षणघटकः । किन्तु व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः आत्मत्वत्वेन घटाभाव एव लक्षणघटकः ।

एवं 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ साध्यवति काले प्रलयावच्छेदेन जन्यज्ञानाभावस्य सत्त्वात् जन्यज्ञानत्वं साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकम्; न तु तदनवच्छेदकम् इति साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहात् जन्यज्ञानत्वावच्छिन्नाभावमादाय लक्षणसमन्वयो न संभवति। किन्तु वाच्यत्वत्वेन घटाद्यभावमादायैव लक्षणसमन्वयः कार्य इति व्यधिकरणधर्मावच्छिन्नाभावस्वीकारस्य आवश्यकतया 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थसङ्गतिरिति भावः।

गादाधरी

न च - **साध्यतावच्छेदका**वच्छिन्नप्रतियोगिताकभाव एव किं न निवेश्यते ? प्रमेयसाध्यकस्थले संयोगसमवायादिरूपव्यधिकरणसंबन्धावच्छिन्नप्रमेयत्वादिनिष्ठप्रतियोगितावच्छेदकताकाभावमादाय लक्षणसमन्वयसंभवात् इति - वाच्यम्।

तथा सति लघुरूपसमनियतगुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वेन तद्रूपावच्छिन्नसाध्यके तथाविधाभावाप्रसिद्ध्या अव्याप्त्यापत्तेः।

विवरणम्

न च साध्यतावच्छेदकेत्यादि [पृ.231]। लाघवात् साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव एव निवेश्यताम्। 'वन्हिमान् धूमात्' इत्यादौ वन्हित्वावच्छिन्नप्रतियोगिताकाभावपदेन वन्हित्वेन घटाभावं गृहीत्वा लक्षणसमन्वयः करिष्यते।

न च - प्रमेयसाध्यकस्थले साध्यतावच्छेदकप्रमेयत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या अव्याप्तिः इति - वाच्यम्। प्रमेयत्वनिष्ठसंयोगादिव्यधिकरणसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावमादाय लक्षणसमन्वयसंभवात् इति-आशङ्का।

तत्समाधानं तु - गुरुधर्मावच्छिन्नसाध्यकसद्धेतौ 'प्रमेयवन्हिमान् धूमात्' इत्यादौ साध्यतावच्छेदकं यत् प्रमेयत्वविशिष्टवन्हित्वं तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या अव्याप्तिः। लघुधर्मवन्हित्वसमनियतस्य गुरुधर्मस्य प्रमेयत्वविशिष्टवह्नित्वस्य प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या अव्याप्तिः स्यात्। अतः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावनिवेशः।

प्रमेयवन्हित्वावच्छिन्नसाध्यकस्थले प्रमेयवन्हित्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकं शुद्धवह्नित्वम्। तदवच्छिन्नप्रतियोगिताकाभावः वन्हित्वेन घटाभावः प्रसिद्ध इति नाव्याप्तिरिति।

गादाधरी

अत्र च 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यादौ अतिव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धेन व्यापकत्वं तेनैव संबन्धेन प्रतियोगिसामानाधिकरण्यं विवक्षणीयम्। महाकालान्यत्वविशिष्टघटादिसाध्यकस्थले कालत्वादेः व्यभिचारित्वेऽपि तत्र हेतुसमानाधिकरणस्य महाकालान्यत्वविशिष्टघटाद्यभावस्य प्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्याभावेन अतिव्याप्त्यसंभवात्।

तादात्म्यसंबन्धेन प्रमेयसाध्यकस्थले तादृशसंबन्धेन साध्यं प्रति तादृशसंबन्धेन व्यापकतायाम् अवच्छेदकीभूतो यः प्रमेयत्वादिरूपकेवलान्वयिधर्मः तदवच्छिन्नस्य संयोगसमवायविषयितादिसंबन्धावच्छिन्नाभावमादायैव लक्षणसमन्वयसंभवात् अभावप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य प्रयोजनविरहेणाविवे ात्।

तन्निवेशेऽपि व्यधिकरणसमवायित्वावच्छिन्नप्रतियोगितावच्छेदकताकं प्रमेयत्वादिमद्भेदमादाय लक्षणसमन्वयसंभवात् । 'समवायितया वाच्यत्ववद्भेदोऽपि द्रष्टव्य' इति मिश्रोक्त्या तादृशभेदस्यापि सौन्दलसंमतत्वात्—इति केचित् ।

तदसत् । 'घटत्वाभाववान् मेयत्वात्' इत्यादौ पूर्वोक्तदिशा अतिव्याप्तेः ।

विवरणम्

व्यापकतायां प्रतियोगिसामानाधिकरण्ये च संबन्धविशेषं निवेशयतां केषांचिन्मतमनुवदति - अत्र चेत्यादिना [पृ.232] । प्रतियोगिसामानाधिकरण्यशरीरे संबन्धविशेषानिवेशे 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यत्र साध्यतावच्छेदकज्ञानत्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकस्य ज्ञानत्वादिना ज्ञानाद्यभावस्य यावद्धेत्वधिकरणकालान्तर्भावेण कालिकसंबन्धेन ज्ञानरूपप्रतियोगिसामानाधिकरण्यमस्तीति अतिव्याप्तिः । तद्वारणाय प्रतियोगिसामानाधिकरण्यघटकप्रतियोगिमत्तायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । काले ज्ञानस्य कालिकसंबन्धेन सत्त्वेऽपि साध्यतावच्छेदकसमवायसंबन्धेन असत्त्वात् नातिव्याप्तिः ।

एवं व्यापकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा 'वन्हिमान् धूमात्' इत्यादौ साध्यतावच्छेदकवन्हित्वावच्छिन्नं प्रति द्रव्यत्वत्वविशिष्टस्य द्रव्यत्वस्य समवायसंबन्धेन व्यापकतया समवायसंबन्धघटितसाध्यव्यापकतावच्छेदकं यत् द्रव्यत्वत्वं तदवच्छिन्नप्रतियोगिताकस्य द्रव्यत्वत्वेन घटाभावस्य हेतुसमानाधिकरणयावदभावान्तर्गतस्य स्वविशिष्टयावद्धेत्वधिकरणपर्वताद्यन्तर्भावेण साध्यतावच्छेदकसंयोगसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्यं नास्ति ।

प्रतियोगितावच्छेदकद्रव्यत्वत्वावच्छिन्नस्य द्रव्यत्वस्य संयोगसंबन्धेन पर्वतादावसत्त्वात् इति अव्याप्तिः स्यात् । व्यापकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु द्रव्यत्वस्य संयोगसंबन्धेन वह्निव्यापकत्वविरहात् संयोगसंबन्धावच्छिन्नसाध्यव्यापकतावच्छेदकं वह्नित्वादिकमेव, न तु द्रव्यत्वत्वम् । वह्नित्वाद्यवच्छिन्नप्रतियोगिताकस्य वह्नित्वादिना घटाद्यभावस्यैव लक्षणघटकतया तस्य संयोगसंबन्धेन वह्नित्वावच्छिन्नसामानाधिकरण्यम् अस्तीति नाव्याप्तिः ।

यद्यपि प्रथमस्वलक्षणे साध्यतावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे 'महाकालान्यत्वशिष्टघटवान् कालत्वात्' इत्यत्र लक्षणघटकस्य महाकालान्यत्वविशिष्टघटाभावस्य साध्यतावच्छेदककालिकसंबन्धेन घटरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तिरापादिता, तथापि द्वितीयलक्षणे प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यस्यैव निवेशात् महाकाले प्रतियोगितावच्छेदकमहाकालान्यत्वविशिष्टघटस्य कालिकसंबन्धेन असत्त्वात् विशिष्टघटाभावस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविरहात् अतिव्याप्त्यप्रसक्तेः साध्यतावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशनं न दोषमावहतीति भावः ।

कालत्वादेः व्यभिचारित्वेऽपि इति [पृ.232] । 'अपि' शब्देन अस्य सद्धेतुत्वं प्रथमलक्षणे समर्थितं स्मार्यते । तथा च तस्य सद्धेतुत्वे लक्षणसमन्वयः न दोषावहः । असद्धेतुत्वे विशिष्टघटरूपप्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः इति आशयः ।

ननु तादात्म्यसंबन्धेन प्रमेयसाध्यकसद्धेतौ साध्यतावच्छेदक तादात्म्यसंबन्धेन साध्यं प्रति तेन संबन्धेन प्रमेयसामान्यस्य

व्यापकतया तादात्म्यसंबन्धघटितसाध्यव्यापकतावच्छेदकं यत् प्रमेयत्वं तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्धया अव्याप्तिरित्याशङ्क्य तत्र संयोगसमवायविषयित्वादिसंबन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकाभावः प्रसिद्धयति। साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायां प्रयोजनविरहेण साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य अनिवेशात् तादात्म्यसंबन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकाभाव एव ग्राह्य इति निर्बन्धविरहात् इत्याशयेन समाधत्ते - **तादात्म्यसंबन्धेनेत्यादिना** [पृ.232]।

तदवच्छिन्नस्येति षष्ठ्याः प्रतियोगित्वमर्थः। **प्रयोजनविरहेणेति** [पृ.232]। समवायसंबन्धावच्छिन्नवह्नित्वावच्छिन्नवह्न्यभावस्य लक्षणघटकत्वेऽपि तस्य साध्यतावच्छेदकसंयोगसंबन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वेन अव्याप्त्यप्रसक्तेरिति भावः।

ननु प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वाविवेशे सर्वत्र व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकाभावमादायैव लक्षणसमन्वयसंभवात् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावानभ्युपगमेऽपि क्षतिविरहात् 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थानुत्थितिरित्यत आह - **तन्निवेशेऽपीति** [पृ.233]। प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशेऽपि तादात्म्यसंबन्धेन प्रमेयसाध्यकस्थले साध्यव्यापकतावच्छेदकं यत् प्रमेयत्वं तदवच्छिन्नतादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावः प्रसिद्धयत्येव। 'समवायित्वेन प्रमेयत्ववान् न भवति' इति प्रतीतिसिद्धः यः समवायित्वरूपव्यधिकरणधर्मावच्छिन्नप्रमेयत्वनिष्ठावच्छेदकताकप्रमेयत्ववन्निष्ठप्रतियोगिताकभेदः तस्यापि प्रमेयत्वावच्छिन्नतादात्म्यसंबन्धावच्छिन्नप्रतियोगिता त्वात्। तस्य भेदस्य

केवलान्वयितया हेतुसमानाधिकरणत्वात् तमादाय लक्षणसमन्वय-संभवात् व्यधिकरणधर्मावच्छिन्नात्यन्ताभाववादिभिः व्यधिकरण-धर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदस्यापि 'समवायितया वाच्यत्ववद्भेदोऽपि द्रष्टव्य' इति मिश्रोक्त्यनुसारेण अङ्गीकृतत्वात् इति भावः।

एतावता साध्यतावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यं तेनैव संबन्धेन व्यापकत्वं च निवेशयतां मतम् अनूदितम्। तद्दूषयति - तदसदिति [पृ.233]। 'घटत्वाभाववान् मेयत्वात्' इत्यत्र व्यभिचारिणि लक्षणघटकः यः घटत्वाभावत्वेन घटत्वाभावाभावः घटत्वात्मकः तस्य यावद्धेत्वधिकरणघटान्तर्भावेण साध्यतावच्छेदकस्वरूपसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभाव-रूपप्रतियोगिसामानाधिकरण्यमादाय अतिव्याप्त्यापत्तेः साध्यतावच्छेदकसंबन्धनिवेशो न युक्त इति भावः।

पूर्वोक्तदिशा इति [पृ.233]। प्रथमलक्षणोक्तरीत्या इत्यर्थः।

गादाधरी

स्वप्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकयावत्संबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशनमपि न सत्। तथा सति 'इदं वाच्यम् ज्ञेयत्वात्' इत्यादौ विषयतासंयोगादि-संबन्धावच्छिन्नप्रतियोगिताकाभावमादाय व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि लक्षणसामञ्जस्यात् 'प्रतियोग्यवृत्तिश्च' इत्यादिग्रन्थासङ्गतेः।

विवरणम्

व्यापकताघटकयावत्संबन्धेन प्रतियोगिसामानाधिकरण्यं 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यादौ अतिव्याप्ति-वारणाय प्रथमलक्षणे निवेशितम्। तथा द्वितीयलक्षणेऽपि

निवेश्यताम् इत्याशङ्क्याह - **स्वप्रतियोगितावच्छेदकावच्छिन्नेति** [पृ.236]। स्वं - लक्षणघटकाभावः। स्वप्रतियोगितावच्छेदकावच्छिन्नस्य येन येन संबन्धेन साध्यव्यापकत्वं तेन तेन संबन्धेन प्रतियोगिसामानाधिकरण्यमिति निवेशे यद्यपि 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यत्र ज्ञानत्वावच्छिन्नज्ञानाभावप्रतियोगितावच्छेदकज्ञानत्वावच्छिन्नस्य समवायसंबन्धेनापि साध्यव्यापकतया तेन संबन्धेन काले ज्ञानत्वावच्छिन्नविरहात् अतिव्याप्तिः वारयितुं शक्यते। तथापि 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ स्वरूपसंबन्धघटितसाध्यव्यापकतावच्छेदकं यत् वाच्यत्वत्वं तदवच्छिन्नप्रतियोगिताकाभावपदेन विषयतासंबन्धेन वाच्यत्वं नास्तीति प्रतीतिसिद्धः यः वाच्यत्वत्वावच्छिन्नविषयतासंबन्धावच्छिन्नप्रतियोगिताकाभावः अर्थात् समानाधिकरणधर्मावच्छिन्नव्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकः अभावः, तमादायापि लक्षणसमन्वयः संभवति। तत्प्रतियोगितावच्छेदकवाच्यत्वत्वावच्छिन्नस्य व्यापकताघटकस्वरूपसंबन्धेन हेत्वधिकरणघटादौ वृत्तेः। तथा च व्यधिकरणधर्मावच्छिन्नाभावानङ्गीकारेऽपि लक्षणसमन्वयात् तत्खण्डनपर 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थासङ्गतिः स्यात्। अतः द्वितीयलक्षणे व्यापकताघटकसंबन्धेन प्रतियोगिसामानाधिकरण्यनिवेशो न संभवतीति भावः।

गादाधरी

एतेन - विषयतासंबन्धेन व्यापकता तेन संबन्धेन प्रतियोगिसामानाधिकरण्यं विवक्षणीयम्। साध्यवत्त्वप्रकारकप्रमात्वाद्यवच्छिन्नाभावमादाय सर्वत्र लक्षणसंगमनम् अतिव्याप्तिनिरासश्च इति - निरस्तम्।

'ज्ञेयत्वत्वादिना वाच्यत्वादीनामभाव' इत्येतादृशग्रन्थासंगतेश्च ज्ञेयत्वस्य ज्ञानविषयतात्मकस्य विषयतासंबन्धेन अव्यापकत्वात्।

विवरणम्

समानयुक्त्या मतान्तरमपि खण्डयति - एतेनेति [पृ.237]। 'प्रतियोग्यवृत्तिश्च' इत्यादि ग्रन्थासाङ्गत्या इत्यर्थः। अयमाशयः- विषयतासंबन्धेन व्यापकत्वं तेनैव संबन्धेन प्रतियोगिसामानाधिकरण्यं च विवक्षणीयम्। यद्यपि 'वन्हिमान् धूमात्' इत्यादौ वह्नित्वेन घटाभावस्य लक्षणघटकत्वं न संभवति, वह्नित्वावच्छिन्नस्य विषयतासंबन्धेन वह्निव्यापकत्वविरहात्; तथापि वह्निमत्त्वप्रकारकप्रमात्वेन घटाभावः लक्षणघटकः। वह्निमत्त्वप्रकारकप्रमात्वावच्छिन्नतादृशप्रमायाः विषयतासंबन्धेन वह्निव्यापकत्वमस्ति। वह्निमति पर्वतादौ 'वह्निमान्' इत्याकारिकायाः वह्निमत्त्वप्रकारिकायाः प्रमायाः विषयतासंबन्धेन सत्वात्। तथा च विषयतासंबन्धघटितव्यापकतावच्छेदकं यत् वह्निमत्त्वप्रकारकप्रमात्वं तदवच्छिन्नप्रतियोगिताकः हेतुसमानाधिकरणः अभावः वह्निमत्त्वप्रकारकप्रमात्वेन घटाभावः। तस्य विषयतासंबन्धेन पर्वताद्यन्तर्भावेण वन्हिमत्त्वप्रकारकप्रमात्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमस्ति। पर्वते तादृशप्रमायाः तदवच्छिन्नघटाभावस्य च सत्वात् इति लक्षणसमन्वयः।

धूमवान् वह्नेः' इत्यादौ धूमवत्त्वप्रकारकप्रमात्वावच्छिन्नतादृशप्रमाभावः यावदन्तर्गतः। तस्य स्वविशिष्टयावद्धेत्स्वधिकरणायोगोलकान्तर्भावेण तादृशप्रमारूपप्रतियोगिविरहात् प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं नास्तीति नातिव्याप्तिः।

एवं 'ज्ञानवान् आत्ममहाकालान्यतरत्वात्' इत्यत्र ज्ञानवत्त्वप्रकारकप्रमात्वावच्छिन्नाभावस्य विषयतासंबन्धेन तादृशप्रमारूपप्रतियोगिसामानाधिकरण्यं कालान्तर्भावेण नास्तीति नातिव्याप्तिः।

एवं सति 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ वाच्यत्ववत्त्वप्रकारकप्रमात्वावच्छिन्नव्यधिकरणसंयोगादिसंबन्धावच्छिन्नप्रतियोगिताकाभावामादायैव लक्षणसमन्वयसंभवात् व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि क्षत्यभावात् 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थानुत्थितिः। अतः इदं मतमपि न युक्तम्।

किञ्च 'ज्ञेयत्वत्वादिना वाच्यत्वादीनाम् अभावः सुलभः' इति दीधितिग्रन्थेन द्वितीयस्वलक्षणे 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ ज्ञेयत्वत्वेन वाच्यत्वाभावमादाय समन्वयः कार्यं इत्यवगम्यते। विषयतासंबन्धघटितव्यापकतानिवेशे ज्ञेयत्वस्य साध्यं प्रति स्वरूपसंबन्धेनैव व्यापकतया विषयतासंबन्धेन व्यापकत्वं नास्तीति ज्ञेयत्वत्वस्य विषयतासंबन्धघटितव्यापकतावच्छेदकत्वविरहात् तदवच्छिन्नप्रतियोगिताकस्य ज्ञेयत्वत्वेन वाच्यत्वाभावस्य लक्षणाघटकतया उक्तदीधितिग्रन्थासाङ्गत्यं च प्रसज्यते। अतः विषयतासंबन्धेन व्यापकत्वादिनिवेशः नोचित इति भावः।

गादाधरी

किन्तु स्वप्रतियोगितावच्छेदकसंबन्धेन व्यापकत्वम्, तेनैव संबन्धेन प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यं विवक्षणीयम्। **व्यभिचारिणि** साध्याद्यभावस्य विशेषणताविशेषेण किञ्चिद्विशिष्टस्वाभावनिष्ठतादृशाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्येऽपि तदवच्छिन्नभावसामानाधिकरण्याभावात् नातिव्याप्तिः। **किञ्चिद्विशिष्टस्य स्वस्य** योऽभावः सामानाधिकरण्यसंबन्धेन तद्विशिष्टस्य अभावश्च **विशिष्टस्वसमनियतोऽपि स्वस्मादतिरिक्त एव।** अभावमात्रप्रतियोगिताकाभावस्यैव **तदभावप्रतियोगिस्वरूपतायाः** सिद्धान्तसिद्धत्वात्। अतो धूमाद्यभावस्य सामानाधिकरण्यसंबन्धेन ह्रदादिवृत्तित्वविशिष्टधूमाद्यभावाभावविशिष्टत्वावच्छिन्नभावसामानाधिकरण्येऽपि न क्षतिः।

वस्तुतस्तु प्रतियोगितावच्छेदकावच्छिन्ने भावत्वमनिवेश्य प्रतियोगितावच्छेदके अभावावृत्तित्वमेव निवेश्यम् । तादृशविशिष्टत्वं च अभावसाधारणमिति ।

विवरणम्

तर्हि केन संबन्धेन व्यापकत्वं प्रतियोगिसामानाधिकरण्यं च निवेशनीयम् इत्यत्राह - किन्तु इत्यादिना [पृ.239] । स्वप्रतियोगितावच्छेदकसंबन्धेन व्यापकत्वं तेनैव संबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं च विवक्षणीयम् । यत्संबन्धावच्छिन्नप्रतियोगिताकाभावः लक्षणघटकः स संबन्धः स्वप्रतियोगितावच्छेदकसंबन्धः ।

'वन्हिमान् धूमात्' इत्यादौ 'वन्हित्वेन संयोगसंबन्धेन घटो नास्तीतिप्रतीतिसिद्धः अभावः लक्षणघटकः । तत्प्रतियोगितावच्छेदकसंबन्धः संयोग संबन्धः । तेन संबन्धेन वह्नित्वावच्छिन्नस्य साध्यव्यापकत्वात् स्वप्रतियोगितावच्छेदकसंबन्धघटितव्यापकतावच्छेदकवह्नित्वावच्छिन्नप्रतियोगिताकत्वसद्भावात् तस्य लक्षणघटकत्वम् । तस्य अभावस्य संयोगसंबन्धेन वह्नित्वावच्छिन्नसामानाधिकरण्यमस्तीति लक्षणसमन्वयः ।

'धूमवान् वह्नेः' इत्यादौ संयोगसंबन्धेन 'धूमत्वेन धूमो नास्ति' इति प्रतीतिसिद्धाभावमादाय अतिव्याप्तिर्वारणीया ।

'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ व्यधिकरणविषयतासंयोगादिसंबन्धावच्छिन्नवाच्यत्वाभावमादाय लक्षणसमन्वयो न संभवति । प्रतियोगितावच्छेदकविषयतादिसंबन्धेन वाच्यत्वस्य साध्यव्यापकत्वविरहात् । अतः 'वाच्यत्वत्वेन स्वरूपसंबन्धेन ज्ञेयत्वं नास्ति' इत्यादि प्रतीतिसिद्धं व्यधिकरणधर्मावच्छिन्नाभावमादायैव लक्षणसमन्वयः कार्य इति 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थसङ्गतिरिति भावः ।

ननु स्वप्रतियोगितावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणेऽपि 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिः। धूमत्वेन धूमाभावस्य धूमः यथा प्रतियोगी, तथा पूर्वक्षणवृत्तित्वविशिष्टधूमाभावाभावोऽपि प्रतियोगी। धूमाभावनिरूपितधूमनिष्ठप्रतियोगितावच्छेदकसंबन्धः संयोगसंबन्धः। धूमाभावनिरूपितपूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठप्रतियोगितायाम् अवच्छेदकः संबन्धः स्वरूपसंबन्धः। एवं धूमाभावस्य धूमत्वं यथा प्रतियोगितावच्छेदकं तथा पूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वमपि प्रतियोगितावच्छेदकम्। एवं च स्वप्रतियोगितावच्छेदकीभूतस्वरूपसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं धूमाभावे अयोगोळकान्तर्भावेण वर्तते। अयोगोलके धूमत्वेन धूमाभावस्य पूर्वक्षणवृत्तित्वविशिष्टधूमाभावाभावस्य च सत्त्वात् इत्याशङ्क्य स्वप्रतियोगितावच्छेदकावच्छिन्नभावरूपप्रतियोगिसामानाधिकरण्यविवक्षणात् नातिव्याप्तिः। पूर्वक्षणवृत्तित्वविशिष्टस्वाभावस्य भावरूपत्वविरहात् भावरूपस्य धूमस्य अयोगोलके अभावाच्च इत्याशयेन समाधत्ते - **व्यभिचारिणि** [पृ.239]। इति।

ननु प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यनिवेशेऽपि 'धूमवान् वह्नेः' इत्यादावतिव्याप्तिः। तथा हि - यत्र ह्रदवृत्तित्वविशिष्टः धूमाभावः तत्र - ह्रदे ह्रदवृत्तित्वविशिष्टधूमाभावाभावविशिष्टं नास्ति इति प्रतीतिसिद्धः अभावः वर्तते। ह्रदवृत्तित्वविशिष्टधूमाभावभावविशिष्टत्वं सामानाधिकरण्यसंबन्धेन। ह्रदे ह्रदवृत्तित्वविशिष्टधूमाभावोऽस्ति। अयोगोलके ह्रदवृत्तित्वविशिष्टधूमाभावाभावः अस्ति। तथा सामानाधिकरण्यसंबन्धेन तद्विशिष्टः वह्न्यादिः घटाद्यभावश्च वर्तते। ह्रदे ह्रदवृत्तित्वविशिष्टधूमाभावाभावविशिष्टाभावः वर्तते। तथा च ह्रदान्तर्भावेण ह्रदवृत्तित्वविशि-

ष्टधूमाभावस्य ह्रदवृत्तित्वविशिष्टधूमाभावाभावविशिष्टाभावस्य च समनियतत्वात् उभयोरपि ऐक्यम् । ह्रदवृत्तित्वविशिष्टधूमाभावस्य शुद्धधूमाभावस्य च 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायेन ऐक्यम् । एवञ्च लक्षणघटकः यः धूमाभावः तस्यापि ह्रदवृत्तित्वविशिष्टधूमाभावाभावविशिष्टं प्रतियोगि । तादृशविशिष्टं च भावरूपवह्न्यादिकमपि । तत्सामानाधिकरण्यं धूमाभावे अयोगोलकान्तर्भावेण अस्तीति अतिव्याप्तिरिति आशङ्का ।

अभावमात्रप्रतियोगिकः अभाव एव स्वप्रतियोगिस्वरूपः। यथा घटाभावमात्रप्रतियोगिकः घटाभावाभावः घटाभावप्रतियोगिघटस्वरूपः । ह्रदवृत्तित्वविशिष्टधूमाभावाभावविशिष्टाभावस्तु न अभावमात्रप्रतियोगिकः । वह्न्यादेः भावस्यापि तत्प्रतियोगित्वात् । तथा च तस्य ह्रदवृत्तित्वविशिष्टधूमाभावरूपत्वविरहात् शुद्धधूमाभावरूपत्वमपि नास्ति । अतः ह्रदवृत्तित्वविशिष्टधूमाभावाभावविशिष्टस्वरूपप्रतियोगितावच्छेदकावच्छिन्नवह्न्यादिरूपभावसामानाधिकरण्यमादाय नातिव्याप्तिरिति भावः ।

किंचिद्विशिष्टस्य [पृ.239] — ह्रदवृत्तित्वविशिष्टस्य । **स्वस्य** [पृ.239] — धूमाभावस्य यः अभावः सामानाधिकरण्यसंबन्धेन तद्विशिष्टस्य ह्रदवृत्तित्वविशिष्टधूमाभावाभावविशिष्टस्य अभावः । **विशिष्टस्वसमनियतोऽपि** [पृ.239] — ह्रदवृत्तित्वविशिष्टधूमाभावसमनियतोऽपि । **स्वस्मात्** [पृ.239] — ह्रदवृत्तित्वविशिष्टधूमाभावात् अतिरिक्त एव । **तदभावप्रतियोगिस्वरूपताया इति** [पृ.239] । स चासौ अभावश्च तदभावः तत्प्रतियोगिस्वरूपताया इत्यर्थः । अभावमात्रेत्यत्र योऽभावो गृह्यते सः अभावः तदभावपदेन ग्राह्यः । सामानाधिकरण्यसंबन्धेनेत्यस्य धूमाभावाभावविशिष्टत्वे अन्वयः ।

तादृशविशिष्टत्वं चेति [पृ.240]। ह्रदवृत्तित्वविशिष्टधूमाभावाभावविशिष्टत्वं चेत्यर्थः। **अभावसाधारणमिति** [पृ. 240]। ह्रदवृत्तित्वविशिष्टधूमाभावाभावाधिकरणायोगोलकनिष्ठे वह्न्यादिरूपभावे घटाभावादिरूपे अभावे च तादृशविशिष्टत्वमस्तीत्यर्थः। तथा च अभावावृत्तिप्रतियोगितावच्छेदकं न तादृशविशिष्टत्वम्। किन्तु धूमत्वादिकमेव। तदवच्छिन्नसामानाधिकरण्यं धूमाद्यभावे नास्ति इति नातिव्याप्तिरिति भावः।

गादाधरी

यावदभावानाम् इत्यत्रापि अभावपदं भावभिन्नपरम्। अतः कालिकादिसंबन्धेन हेतुसमानाधिकरणस्य वह्न्यादिव्यापकतावच्छेदकह्रदत्वाद्यभावत्वावच्छिन्नप्रतियोगिताकस्य ह्रदत्वादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यासंभवेऽपि न क्षतिः।

न च - ह्रदत्वाभावाभावस्य ह्रदत्वाभावप्रकारकप्रमाविषयत्वाभावसमनियततया स्वप्रतियोगितावच्छेदकतादृशप्रमाविषयत्वत्वावच्छिन्नभावसामानाधिकरण्यमस्त्येवेति - वाच्यम्। तस्य भावतया भिन्नत्वात्।

एवं च सति 'कपिसंयोगाभाववान् मेयत्वात्' इत्यादौ कपिसंयोगात्मकाभावस्य लक्षणाघटकत्वेऽपि विवक्षणीयस्वविशिष्टेत्यस्य सार्थकता पूर्वोक्तदिशा अवसेया।

विवरणम्

ननु प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यनिवेशे 'वन्हिमान् धूमात्' इत्यादावव्याप्तिः। वन्हिव्यापकः ह्रदत्वाभावः। व्यापकतावच्छेदकं ह्रदत्वाभावत्वम्। तदवच्छिन्नप्रतियोगिताकोऽभावः ह्रदत्वाभावाभावः ह्रदत्वस्वरूपः। स च

हेत्वधिकरणे पर्वतादौ कालिकसंबन्धेन वर्तमानतया लक्षणघटकः। तत्प्रतियोगितावच्छेदकं यत् ह्रदत्वाभावत्वं तदवच्छिन्नह्रदत्वाभावसामानाधिकरण्यं ह्रदत्वात्मकाभावे पर्वतान्तर्भावेण यद्यप्यस्ति, पर्वते ह्रदत्वाभावस्य स्वरूपसंबन्धेन ह्रदत्वात्मकाभावस्य च कालिकसंबन्धेन सत्त्वात्। तथापि प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यं नास्ति। प्रतियोगितावच्छेदकावच्छिन्नस्य ह्रदत्वाभावस्य भावरूपत्वविरहात्। तथा चाव्याप्तिरित्याशङ्क्य यावदभावानाम् इत्यत्र अभावपदं भावभिन्नपरम्। ह्रदत्वात्मकस्य अभावस्य भावरूपतया लक्षणघटकत्वविरहेण न तमादाय अव्याप्तिरिति समाधत्ते - **यावदभावानामित्यत्रापीति** [पृ.243]।

न च ह्रदत्वाभावाभावस्येति [पृ.243]। यावदभावानाम् इत्यत्र अभावपदस्य भावभिन्नपरत्वाभावेऽपि 'वह्निमान् धूमात्' इत्यादौ ह्रदत्वात्मकाभावस्य लक्षणघटकत्वेऽपि नाव्याप्तिः। ह्रदत्वाभावाभावस्य ह्रदत्वाभावप्रकारकप्रमाविषयत्वाभावस्य च समनियततया अभिन्नत्वेन ह्रदत्वात्मकाभावस्य ह्रदत्वाभावप्रकारकप्रमाविषयत्वत्वमपि प्रतियोगितावच्छेदकम्। तदवच्छिन्नः भावः ह्रदत्वाभावप्रकारकप्रमाविषयत्वम्। तत्सामानाधिकरण्यं ह्रदत्वेऽस्तीति नाव्याप्तिरिति भावः।

तस्येति [पृ.243]। समनियतयोरभावयोरेवैक्यम्। न तु भावाभावयोः। ह्रदत्वाभावाभावस्तु ह्रदत्वात्मकतया भावरूपः। अतस्तस्य ह्रदत्वाभावप्रकारकप्रमाविषयत्वाभावसमनियतत्वेऽपि न तदभिन्नत्वम्। अतः ह्रदत्वात्मकाभावस्य ह्रदत्वाभावप्रकारकप्रमाविषयत्वत्वं न प्रतियोगितावच्छेदकम्, किन्तु ह्रदत्वाभावत्वमेव। तदवच्छिन्नभावसामानाधिकरण्यं ह्रदत्वात्मकाभावे नास्तीति अव्याप्तिरस्त्येव। तद्वारणार्थं यावदभावपदेन भावभिन्नोऽभावः विवक्षणीय इति भावः। तस्य ह्रदत्वा-

त्मकाभावस्य भावरूपतया ह्रदत्वाभावप्रकारकप्रमाविषयत्वापेक्षया भिन्नत्वात् इत्यर्थः ।

ननु 'यावदभावानाम्' इत्यत्र अभावपदस्य भावभिन्नपरत्वे 'कपिसंयोगाभाववान् मेयत्वात्' इत्यादौ कपिसंयोगात्मकाभावस्य लक्षणाघटकतया तमादाय अव्याप्त्यप्रसक्तेः तद्वारणायोपात्तं स्वविशिष्टपदं व्यर्थमित्याशङ्क्य स्वविशिष्टपदस्य स्थलान्तरे अव्याप्तिवारकतया सार्थक्यमाह - **एवं च सतीति** [पृ.243] । **अभावपदस्य भावभिन्नपरत्वे सतीत्यर्थः** । स्वविशिष्टपदानुपादाने 'सत्तावान् जातेः' इत्यत्र हेत्वधिकरणे काले कालिकसंबन्धेन वर्तमानस्य सत्तात्वेन सत्ताभावस्य यावद्धेत्वधिकरणनित्यगुणान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्ति । नित्यगुणादौ प्रतियोगिसत्तासत्त्वेऽपि सत्ताभावस्य केनापि संबन्धेन अवृत्तेः । नित्येषु कालिकायोगात् कालिकसंबन्धेनापि अवृत्तेरिति अव्याप्तिः स्यात् । तद्वारणाय स्वविशिष्टपदोपादानम् । तदुपादाने सत्ताभावविशिष्टं हेत्वधिकरणं न नित्यगुणादि । किन्तु अनित्यगुणादिकमेव । तदन्तर्भावेण प्रतियोगिसामानाधिकरण्यसत्त्वात् नाव्याप्तिरिति भावः ।

गादाधरी

[३४] व्यापकतावच्छेदकरूपे भाववृत्तित्वविशेषणम्

न च—भावभिन्नाभावविवक्षणेऽपि 'अयमात्मा ज्ञानात्' इत्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतकालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वाद्यवच्छिन्नप्रतियोगिताकस्य आकाशाभावादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यासंभवात् लक्षणसमन्वयासंभव इति - वाचयम् ।

आकाशाभावीयतादृशाभावत्वस्य दैशिकविशेषणतया साध्य-वद्वृत्तेः आकाशाभावस्य प्रतियोगितावच्छेदकतया साध्यव्यापकता-वच्छेदकत्वविरहेण तदवच्छिन्नाभावस्य लक्षणाघटकत्वात् ।

विवरणम्

शङ्कते—**न च भावभिन्नाभावविवक्षणेऽपीति** [पृ.245] । यावतामभावानामित्यत्र अभावपदेन भावभिन्नाभावविवक्षणेऽपि 'अयम् आत्मा ज्ञानात्' इत्यत्र अव्याप्तिः । आत्मत्वरूपसाध्यं प्रति-यथा आत्मत्वं व्यापकं तथा कालिकसंबन्धावच्छिन्नप्रतियोगिता-काकाशाभावाभावोऽपि व्यापकः । आत्मत्ववति आत्मनि आकाशा-भावस्य कालिकसंबन्धेन असत्त्वात् । अतः साध्यव्यापकतावच्छेदकं कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वम् । तद-वच्छिन्नप्रतियोगिताकः भावभिन्नः आकाशाभावात्मकः कालिक-संबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावाभावः यावदन्तर्गतः । तस्य स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यं नास्ति । प्रतियोगितावच्छेदकावच्छिन्नस्य कालिकसंबन्धावच्छिन्न-प्रतियोगिताकाकाशाभावाभावस्य भावत्वाभावात् । तथा चाव्यप्तिरिति भावः ।

समाधत्ते - **आकाशाभावीयेति** [पृ.246] । कालिकसंबन्धा-वच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वस्य साध्यवन्निष्ठाभाव-प्रतियोगितानवच्छेदकत्वरूपं साध्यव्यापकतावच्छेदकत्वं नास्ति । साध्यवति आत्मनि वर्तते यः आकाशाभावात्मकः तृतीयाभावः तत्प्रतियोगितावच्छेदकत्वात् तस्य । अतः कालिकसंबन्धावच्छिन्न-प्रतियोगिताकाकाशाभावाभावत्वावच्छिन्नप्रतियोगिताकस्य आका-शाभावादेः लक्षणाघटकतया न तमादाय 'अयम् आत्मा ज्ञानात्' इत्यादौ अव्याप्तिरिति भावः ।

गादाधरी

अस्तु वा व्यापकतावच्छेदकरूपांश एव भाववृत्तित्वविशेषणम् । **'इदं वाच्यं ज्ञेयत्वात्'** इत्यादौ च व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावस्य प्रतियोगितावच्छेदकं न प्रतियोगितावच्छेदकसंबन्धघटितव्यापकतावच्छेदकम् । अतस्तादृशाभावस्य न लक्षणघटकता इति नोक्तप्रतियोग्यवृत्तिश्च इत्यादि ग्रन्थासङ्गतिरिति ।

विवरणम्

ननु भावभिन्नाभावविवक्षणेऽपि 'वह्निमान् धूमात्' इत्यादौ कालिकसंबन्धेन हेतुसमानाधिकरणस्य घटवृत्तिरूपध्वंसवदन्यत्वाभावस्य भावरूपप्रतियोगिसामानाधिकरण्याभावात् अव्याप्तिः । अतः आह - **अस्तु वा** [पृ.247] इति । अभावे भावभिन्नत्वमनिवेश्य व्यापकतावच्छेदकरूपे भाववृत्तित्वं निवेश्यते । साध्यव्यापकतावच्छेदकभाववृत्तिरूपावच्छिन्नप्रतियोगिताकानां यावतामभावानाम् इत्यादिलक्षणम् । कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वस्य प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकत्वेऽपि तस्य भाववृत्तित्वं नास्तीति भाववृत्तिरूपावच्छिन्नप्रतियोगिताकाभावः आत्मत्वत्वेन घटाद्यभाव एव । तस्य च प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यसत्त्वात् न 'अयमात्मा ज्ञानात्' इत्यादौ अव्याप्तिरिति भावः ।

साध्यतावच्छेदकसंबन्धेन व्यापकत्वादिनिवेशे 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ स्वरूपसंबन्धघटितव्यापकतावच्छेदकवाच्यत्वत्वाद्यवच्छिन्नसंयोगादिव्यधिकरणसंबन्धावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकाभावमादायैव लक्षणसमन्वयसंभवात् 'प्रतियोग्यवृत्तिश्च' इत्यादिग्रन्थानुत्थितिः पूर्वमुद्भाविता । प्रतियोगितावच्छेदकसंबन्धेन व्यापकत्वादिनिवेशे स दोषो नास्तीत्याह - **इदं**

वाच्यं ज्ञेयत्वात् [पृ.247] **इत्यादिना** । संयोगसंबन्धेन वाच्यत्व-त्वेन वाच्यत्वाभावस्य ग्रहणे स्वप्रतियोगितावच्छेदकसंबन्धः संयोगसंबन्धः । तेन संबन्धेन वाच्यत्वस्य साध्यव्यापकत्वं नास्तीति स्वप्रतियोगितावच्छेदकसंबन्धघटितव्यापकतावच्छेदक-रूपावच्छिन्नप्रतियोगिताकत्वं संयोगसंबन्धेन वाच्यत्वाभावस्य नास्ति इति तमादाय लक्षणसमन्वयासंभवात् स्वरूपसंबन्धघटित-साध्यव्यापकतावच्छेदकवाच्यत्वत्वरूपव्यधिकरणधर्मावच्छिन्नज्ञेय-त्वादिनिष्ठप्रतियोगिताकाभावमादायैव लक्षणस्य संगमनीयतया 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थसङ्गतिरिति भावः ।

गादाधरी

न च—प्रतियोगितावच्छेदकसंबन्धेन व्यापकताविवक्षणेऽपि 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ विषयितादिसंबन्धेन वाच्यत्व-त्वादिमतो ज्ञानादेः यः स्वरूपसंबन्धेनाभावः तस्य **स्वप्रतियोगिता-वच्छेदकीभूत**स्वरूपसंबन्धघटितवाच्यत्वनिष्ठव्यापकतावच्छेदकवा-च्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकतया हेतुसमानाधिकरणतया स्वरूपसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नवाच्यत्वादिसमानाधि-करणतया च तत्र व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि तमादायैव लक्षणसामञ्जस्यमिति तादृशग्रन्थासंगतितादवस्थ्यम् इति—वाच्यम् ।

'धूमवान् वह्नेः' इत्यादौ संयोगादिसंबन्धावच्छिन्नप्रति-योगिताकधूमाद्यभावस्य कालिकसंबन्धेन धूमत्वादिविशिष्ट-वह्न्यादिना संयोगेन, समवायसंबन्धावच्छिन्नप्रतियोगिताकस्य अयोगोलकावृत्तिजातित्वाद्यवच्छिन्नाभावस्य कालिकादिसंबन्धेन तादृशजातित्वादिविशिष्टायोगोलकीयरूपादिना समं समवायेन, स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकस्य धूमवत्त्वप्रकारकप्रमाविषय-त्वाद्यभावस्य कालिकादिसंबन्धेन - तादृशविषयत्वत्वादिविशिष्ट-**संयोगादिध्वंसेन** अनुयोगिताविशेषसंबन्धेन तादृशविषयत्वत्वादि-

विशिष्टतादृशविषयत्वत्वाद्यभावेन च समं स्वरूपसंबन्धेन, विषयतासंबन्धावच्छिन्नप्रतियोगिताकधूमवत्त्वप्रकारकप्रमाद्यभावस्य विषयितासंबन्धेन, कालिकसंबन्धेन वा तादृशप्रमात्वविशिष्टं यदयोगोलकादिविषयकज्ञानं तेन समं विषयतासंबन्धेन — सामानाधिकरण्यसत्त्वात् अतिव्याप्तेर्वारणाय प्रतियोगितावच्छेदकत्वघटकसंबन्धेनैव प्रतियोगितावच्छेदकविशिष्टत्वस्य विवक्षणीयतया 'वन्हिमान् धूमात्' इत्यादौ विषयितासंबन्धेन द्रव्यत्वत्वादिमतः समवायादिसंबन्धावच्छिन्नाभावस्य स्वप्रतियोगितावच्छेदकसमवयादिसंबन्धघटितद्रव्यत्वादिनिष्ठव्यापकतायां स्वरूपसंबन्धेन अवच्छेदकीभूतो यो द्रव्यत्वत्वादिः तदवच्छिन्नप्रतियोगिताकस्य स्वप्रतियोगितावच्छेदकत्वघटकविषयितादिसंबन्धेन प्रतियोगितावच्छेदकविशिष्टज्ञानादिना समं हेत्वधिकरणे स्वप्रतियोगितावच्छेदकसमवायादिना सामानाधिकरण्यं न संभवतीति व्यापकतावच्छेदकतायामपि स्वप्रतियोगितावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्य अवश्यं निवेशनीयत्वेन 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ दर्शिताभावानां लक्षणाघटकत्वादिति दिक् ।

विवरणम्

स्वप्रतियोगितावच्छेदकसंबन्धेन व्यापकत्वादिविवक्षणेऽपि 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थानुत्थितिरिति शङ्कते — **न च प्रतियोगितावच्छेदकसंबन्धेनेति** [पृ.248] । 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ यावदभावपदेन विषयितासंबन्धेन वाच्यत्वत्ववतः ज्ञानादेः स्वरूपसंबन्धेन अभावः 'विषयितासंबन्धेन वाच्यत्वत्ववत् स्वरूपसंबन्धेन नास्ति' इति प्रतीतिसिद्धः अभावः गृह्यते । अयं हेत्वधिकरणघटादिवृत्तिः । अस्य अभावस्य प्रतियोगितावच्छेदकसंबन्धः स्वरूपसंबन्धः । तत्संबन्धघटितव्यापकतावच्छेदकं यत् वाच्यत्वत्वम्, तदवच्छिन्नप्रतियोगिताकश्चेति लक्षणघटकः ।

तस्य च अभावस्य प्रतियोगितावच्छेदकस्वरूपसंबन्धेन प्रतियोगितावच्छेदकवाच्यत्वत्वविशिष्टवाच्यत्वाधिकरणवृत्तित्वमस्ति इति लक्षणसमन्वयः। तथा च समानाधिकरणधर्मावच्छिन्नव्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकतादृशाभावमादाय लक्षणसमन्वयात् व्यधिकरणधर्मावच्छिन्नाभावखण्डनपरस्य 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थस्य अनुत्थितिः तदवस्थेति शङ्काग्रन्थस्याशयः।

स्वप्रतियोगितावच्छेदकीभूतेति [पृ.248]। स्वप्रतियोगितावच्छेदकीभूतः यः स्वरूपसंबन्धः तदवच्छिन्ना या वाच्यत्वनिष्ठा व्यापकता तदवच्छेदकं यत् वाच्यत्वत्वं तदवच्छिन्नप्रतियोगिताकतया इत्यर्थः।

समाधत्ते—**'धूमवान् वह्नेः' इत्यादौ** [पृ.248] इत्यादिना। 'धूमवान् वह्नेः' इत्यादौ यावदभावपदेन ग्रहीतुं शक्यानां सर्वेषामेव अभावानां स्वप्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वात् अतिव्याप्तेः वारणाय प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यम् इत्यत्र प्रतियोगितावच्छेदकावच्छिन्नत्वं प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकविशिष्टत्वमिति विवक्षणीयम्। तथा विवक्षणे 'वन्हिमान् धूमात्' इत्यादावव्याप्तिः। तद्वारणाय व्यापकतावच्छेदकतायां स्वप्रतियोगितावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावनिरूपितस्वप्रतियोगितावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानिरूपित - स्वप्रतियोगितावच्छेदकतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताशून्यरूपावच्छिन्नप्रतियोगिताकत्वं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वम् इति निष्कर्षः।

'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र विषयितासंबन्धेन वाच्यत्वत्ववतः ज्ञानस्य स्वरूपसंबन्धेन योऽभावः स एतादृशनिष्कृष्टविशेषणाक्रान्तो न भवति। साध्यवति — वाच्यत्ववति घटादौ तादृशाभावस्य सत्त्वात् तन्निरूपितप्रतियोगितावच्छेदकस्वरूपसंबन्धावच्छिन्ना या ज्ञाननिष्ठा प्रतियोगिता तन्निरूपितस्य प्रतियोगितावच्छेदकतावच्छेदकविषयितासंबन्धावच्छिन्नावच्छेदकत्वस्यैव वाच्यत्वत्वे सत्त्वात् । तादृशावच्छेदकताशून्यरूपावच्छिन्नप्रतियोगिताकत्वस्य विषयितासंबन्धावच्छिन्नवाच्यत्वत्वनिष्ठावच्छेदकताकस्वरूपसंबन्धावच्छिन्नज्ञाननिष्ठप्रतियोगिताकोक्ताभावे विरहेण तस्य लक्षणाघटकतया तमादाय लक्षणसमन्वयासंभवात् व्यधिकरणधर्मावच्छिन्नाभावमादायैव लक्षणसमन्वयस्य कर्तव्यत्वात् प्रतियोग्यवृत्तिश्चेति ग्रन्थसाङ्गत्यमिति समाधानस्य सारांशः ।

अथ प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकविशिष्टत्वानिवेशे 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः उपपाद्यते — 'धूमवान् वह्नेः' इत्यत्र संयोगसंबन्धावच्छिन्न - धूमत्वावच्छिन्न - धूमनिष्ठप्रतियोगिताकाभावस्य ग्रहणे तस्य यावद्धेत्वधिकरणान्तर्गतायोगोलकान्तर्भावेण प्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्यमस्ति । प्रतियोगितावच्छेदकं यत् धूमत्वं कालिकसंबन्धेन तद्विशिष्टस्य वह्नेः प्रतियोगितावच्छेदकसंयोगसंबन्धेन अयोगोलके सत्त्वात् धूमाभावस्य च सत्त्वात् अतिव्याप्तिः। तद्वारणाय प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेव प्रतियोगितावच्छेदकविशिष्टत्वं निवेशनीयम् । तन्निवेशे धूमाभावीयप्रतियोगितावच्छेदकतावच्छेदकसंबन्धः समवायः । तेन संबन्धेन धूमत्वविशिष्टः धूम एव । स तु संयोगसंबन्धेन अयोगोलके नास्तीति नातिव्याप्तिः ।

एवं 'धूमवान् वह्नेः' इत्यत्र यावदभावपदेन 'समवायसंबन्धेन अयोगोलकावृत्तिजातिर्नास्ति' इति प्रतीतिसिद्धाभावस्य ग्रहणेऽपि तत्प्रतियोगितावच्छेदकं यत् अयोगोलकावृत्तित्वविशिष्टजातित्वम्, कालिकसंबन्धेन तद्विशिष्टं यत् अयोगोलकीयरूपं तत्सामानाधिकरण्यम् अयोगोलकान्तर्भावेण अयोगोलकावृत्तिजात्यभावेऽस्ति । अयोगोलके प्रतियोगितावच्छेदकसमवायसंबन्धेन अयोगोलकीयरूपस्य अयोगोलकावृत्तिजात्यभावस्य च सत्त्वात् इत्यतिव्याप्तिः । प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेनेति विवक्षणे तु तादृशस्वरूपसंबन्धेन अयोगोलकावृत्तिजातित्वविशिष्टा अयोगोलकावृत्तिजातिरेव । सा तु समवायसंबन्धेन अयोगोलके नास्तीति तत्सामानाधिकरण्यविरहात् अभावस्य नातिव्याप्तिः ।

एवं यावदभावपदेन धूमवत्त्वप्रकारकप्रमाविषयत्वाभावस्य ग्रहणे तत्प्रतियोगितावच्छेदकं यत् धूमवत्त्वप्रकारकप्रमाविषयत्वत्वम्, कालिकसंबन्धेन तद्विशिष्टः संयोगध्वंसः अनुयोगितासंबन्धेन तद्विशिष्टः धूमवत्त्वप्रकारकप्रमाविषयत्वत्वाभावश्च । तदुभयम् अयोगोलके प्रतियोगितावच्छेदकस्वरूपसंबन्धेन अस्तीति तेन सम सामानाधिकरण्यं धूमवत्त्वप्रकारकप्रमाविषयत्वाभावे अयोगोलकान्तर्भावेण अस्तीति अतिव्याप्तिः । प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नेत्युक्तौ तु तादृशस्वरूपसंबन्धेन धूमवत्त्वप्रकारकप्रमाविषयत्वत्वविशिष्टं धूमवत्त्वप्रकारकप्रमाविषयत्वमेव । तत्तु अयोगोलके नास्तीति नातिव्याप्तिः ।

एवं यावदभावपदेन धूमवत्त्वप्रकारकप्रमाभावस्य ग्रहणेऽपि तत्प्रतियोगितावच्छेदकं यत् धूमवत्त्वप्रकारकप्रमात्वं विषयितासंबन्धेन कालिकसंबन्धेन वा तद्विशिष्टं यत् अयोगोलकविषयकज्ञानं तस्य प्रतियोगितावच्छेदकविषयितासंबन्धेनायोगोलके सत्त्वादति-

व्याप्तिः। प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकविशिष्टेत्युक्तौ तु तादृशसमवायसंबन्धेन तादृशप्रमात्वनिष्ठायाः धूमवत्त्वप्रकारकप्रमाया विषयतासंबन्धेनायोगोलकेऽभावान्नातिव्याप्तिः।

एवंरीत्या प्रसक्तायाः अतिव्याप्तेः वारणाय प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशे 'वन्हिमान् धूमात्' इत्यादौ समवायसंबन्धघटितवन्हिव्यापकतायां द्रव्यत्वनिष्ठायां स्वरूपसंबन्धेन अवच्छेदकं यत् द्रव्यत्वत्वम्, तदवच्छिन्नप्रतियोगिताकाभावपदेन विषयितासंबन्धेन द्रव्यत्वत्ववतः ज्ञानादेः समवायसंबन्धेन योऽभावः तस्यापि ग्रहीतुं शक्यतया तदीयप्रतियोगितावच्छेदकतावच्छेदकविषयितासंबन्धेन प्रतियोगितावच्छेदकद्रव्यत्वत्वविशिष्टं यत् द्रव्यत्वत्वविषयकं ज्ञानं तत् यावद्धेत्वधिकरणान्तर्गतपर्वते स्वप्रतियोगितावच्छेदकसमवायसंबन्धेन नास्तीति प्रतियोगिसामानाधिकरण्यविरहात् उक्ताभावस्य अव्याप्तिः। तद्वारणाय व्यापकतावच्छेदकतायां स्वप्रतियोगितावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। तन्निवेशे विषयितासंबन्धेन द्रव्यत्वत्ववतः ज्ञानस्य स्वरूपसंबन्धेन अभावः न लक्षणघटकः। तस्य साध्यवति सत्त्वेन साध्यवन्निष्ठाभावप्रतियोगितानिरूपितप्रतियोगितावच्छेदकतावच्छेदकविषयितासंबन्धावच्छिन्नावच्छेदकत्वस्यैव द्रव्यत्वत्वे सत्त्वात्। किंतु वह्नित्वादिना घटाद्यभाव एव लक्षणघटकः। तस्य स्वप्रतियोगितावच्छेदकावच्छिन्नवह्न्यादिसामानाधिकरण्यसत्त्वात् नाव्याप्तिः। एवञ्च 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ विषयितासंबन्धेन वाच्यत्वत्ववतः ज्ञानादेः स्वरूपसंबन्धेनाभावस्य पूर्वोपपादितरीत्या लक्षणाघटकत्वात् व्यधिकरणधर्मावच्छिन्नाभावमादायैव समन्वयः कार्य इति 'प्रतियोग्यवृत्तिश्चे'ति ग्रन्थसाङ्गत्यमिति प्रघट्टकार्थः।

संयोगादिध्वंसेनेति । [पृ.248] । जन्यमात्रं कालोपाधिरित्याशयेन इदम् । प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिमत्त्वसंपादनाय ध्वंसानुसरणम् ।

दीधितिः

ज्ञेयत्वत्वादिना वाच्यवादीनाम् अभावः सुलभ एव; **शेषं** दर्शितदिशा अवसेयम् इत्यत आह - **प्रतियोग्यवृत्तिश्चेति** ।

गादाधरी

[३५] शेषमितिदीधितेरर्थवर्णनम् ।

ननु अत्र लक्षणे समवायित्वादिना वाच्यत्वाद्यभावोयसमवायित्वादिरूपप्रतियोगितावच्छेदकस्य वाच्यत्वादिव्यापकतानवच्छेदकत्वात् वाच्यत्वादिसाध्यकस्थले न तादृशाभावानां लक्षणघटकता । तथा च तत्र तादृशाभाव एव दुर्लभ इत्यत आह - **ज्ञेयत्वत्वादिनेति** । [पृ.254] । वाच्यत्वादीनाम् इत्यादिपदात् घटादेरपि परिग्रहः । **शेषमिति** [पृ.254] । स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणं हेतुसामानाधिकरण्यादिशरीरे संबन्धविशेषनिवेशनं तत्प्रयोजनं चेत्यर्थः ।

अत्र च निरुक्ताभावेषु स्वविशिष्टहेत्वधिकरणसामान्यान्तर्भावेण प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशापेक्षया प्रतियोगिवृत्तित्वमेव निवेशयितुमुचितम् । सद्धेतौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानां तादृशाभावानां केवलान्वयितया प्रतियोगिन्यपि वृत्तेः लक्षणसमन्वयसंभवात् 'वन्हिमान् धूमात्' इत्यादौ **कालिकादिसंबन्धेन हेतुसमानाधिकरणस्य** रूपान्यत्वप्रकारकप्रमाविषयत्वाद्यभावस्य दैशिकविशेषणतया हेतुसामानाधिकरण्यनिवेशेन **वह्न्यादिभेदस्य** प्रतियोगितावच्छेदकतादात्म्य-

संबन्धघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्व-विरहेण लक्षणाघटकतया प्रतियोग्यवृत्तित्वेऽपि क्षतिविरहात् ।

'**कपिसंयोगाभाववान् मेयत्वात्**' इत्यादौ कपिसंयोगादेः उक्तरीत्या व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण दैशिकविशेषणतया हेतुसामानाधिकरण्याभावेन अभावे भावभिन्नत्वविरहेण च लक्षणाघटकतया प्रतियोग्यवृत्तित्वेऽपि न क्षतिः ।

'**धूमवान् वह्नेः**' **इत्यादौ** धूमाद्यभावस्य प्रतियोगिवृत्तित्वेऽपि अयोगोलकान्यत्वादिप्रकारकप्रमाविषयत्वाद्यभावस्य भावप्रतियोगिकतया अयोगोलकत्वाद्यतिरिक्तस्य प्रतियोग्यवृत्तित्वात् नातिव्याप्तिरित्यवधेयम् ।

विवरणम्

नन्वत्र लक्षणे [पृ.254] **इत्यादि** । प्रथमलक्षणे समवायितया वाच्यत्वाभावमादाय 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ समन्वयः कृतः । तथा द्वितीयलक्षणे कर्तुं न शक्यते । प्रतियोगितावच्छेदकरूपे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वस्य द्वितीयलक्षणे निवेशात् । समवायितया वाच्यत्वाभावीयप्रतियोगितावच्छेदके समवायित्वे वाच्यत्वव्यापकतावच्छेदकत्वविरहात् । वाच्यत्ववति सामान्यादौ समवाय्यभावस्य सत्त्वेन प्रतियोगितावच्छेदकत्वस्यैव समवायित्वे सत्त्वात् । तथा च समवायितया वाच्यत्वाभावस्य साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकतया तादृशाभावः दुर्लभ इत्याशङ्क्य ज्ञेयत्वत्वादिना वाच्यत्वाद्यभाव एव सुलभ इत्याह दीधितिकारः । यत्र यत्र वाच्यत्वं तत्र ज्ञेयत्वस्य सत्त्वेन ज्ञेयत्वं वाच्यत्वव्यापकम् । ज्ञेयत्वत्वं वाच्यत्वत्वव्यापकतावच्छेदकम् । तदवच्छिन्नप्रतियोगिताकः ज्ञेयत्वत्वेन वाच्यत्वाभावः । ज्ञेयत्वत्वरूपव्यधिकरणधर्मावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकः सुलभ एवेति भावः ।

अत्र चेत्यादि [पृ.254]। स्वविशिष्टहेत्वधिकरणसामान्यान्तर्भावेण प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यस्थाने प्रतियोगिवृत्तित्वं लाघवात् निवेशयितुं युक्तम्। तथा च यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाः यावन्तोऽभावाः प्रतियोगिवृत्तयः तत्त्वमिति लक्षणम्।

'वन्हिमान् धूमात्' इत्यादौ धूमसमानाधिकरणानां वन्हित्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां वह्नित्वादिना घटाद्यभावानां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन केवलान्वयितया प्रतियोगिनि घटादावपि वृत्तेः लक्षणसमन्वयः।

'धूमवान् वह्नेः' इत्यादौ धूमत्वेन धूमाभावस्य धूमरूपप्रतियोगिवृत्तित्वेऽपि यावदभावान्तर्गतस्य हेत्वधिकरणायोगोलकवृत्तेः अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्य प्रतियोगिवृत्तित्वं नास्ति। प्रतियोगिनि अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वे अयोगालकादन्यस्मिन् अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वं 'अयोगोलकान्यत्' इत्याकारिका या अयोगोलकान्यत्वप्रकारिका प्रमा तद्विषयत्वस्यैव सत्त्वेन तदभावविरहात्। अतो नातिव्याप्तिः।

ननु 'वह्निमान् धूमात्' इत्यादौ हेत्वधिकरणपर्वतादौ कालिकसंबन्धेन रूपान्यत्वप्रकारकप्रमाविषयत्वाभावोऽस्ति। अतः सोऽपि लक्षणघटकः। तस्य च प्रतियोगिवृत्तित्वं नास्ति। प्रतियोगिनि रूपान्यत्वप्रकारकप्रमाविषयत्वे रूपादन्यस्मिन् रूपान्यत्वप्रकारकप्रमाविषयत्वस्यैव सत्त्वात् तदभावस्य अवृत्तेः। तथा चाव्याप्तिरित्याशङ्क्य हेत्वधिकरणवृत्तित्वे दैशिकविशेषणतासंबन्धावच्छिन्नत्वनिवेशात् हेत्वधिकरणे पर्वतादौ रूपान्यत्वप्रकार-

कप्रमाविषयत्वस्यैव सत्त्वेन तदभावस्य स्वरूपसंबन्धेनावृत्तेः तस्य लक्षणाघटकतया नाव्याप्तिरित्याह - **कालिकादिसंबन्धेन हेतुसमानाधिकरणस्येत्यादिना** [पृ.254]।

ननु 'वह्निमान् धूमात्' इत्यादौ वन्हिभेदस्यापि हेतुसमानाधिकरणतया लक्षणघटकत्वेन तस्य प्रतियोगिवृत्तित्वविरहात् अव्याप्तिः। प्रतियोगिनि वन्हौ वह्निभेदस्यावृत्तेः इत्याशङ्क्य तस्य साध्यतावच्छेदकेत्यादिविशेषणानाक्रान्ततया लक्षणाघटकत्वेन नाव्याप्तिरित्याह - **वह्न्यादिभेदस्येति** [पृ.254]। व्यापकतायां प्रतियोगितावच्छेदकसंबन्धावच्छिन्नत्वनिवेशात् वह्निभेदीयप्रतियोगितावच्छेदकतादात्म्यसंबन्धेन वह्नेः व्यापकत्वं नास्ति, संयोगेन वह्निमति पर्वतादौ तादात्म्येन वह्नेः असत्त्वात्। तथा च प्रतियोगितावच्छेदकतादात्म्यसंबन्धघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेण वह्न्यादिभेदस्य लक्षणाघटकतया तस्य प्रतियोग्यवृत्तित्वेऽपि नाव्याप्तिरिति भावः।

ननु 'कपिसंयोगाभाववान् मेयत्वात्' इत्यादौ यावदभावान्तर्गतस्य कपिसंयोगात्मकाभावस्य कपिसंयोगाभावरूपप्रतियोगिवृत्तित्वविरहात् अव्याप्तिरित्यत आह - **कपिसंयोगाभाववान्** [पृ.255] **इति**। व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यानिवेशेन साध्यवन्निष्ठकपिसंयोगात्मकाभावप्रतियोगितावच्छेदकत्वस्यैव कपिसंयोगाभावत्वे सत्त्वेन साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वं कपिसंयोगात्मकाभावे नास्तीति तस्य लक्षणाघटकतया नाव्याप्तिः।

एवं हेत्वधिकरणवृत्तित्वे स्वरूपसंबन्धावच्छिन्नत्वस्य निवेशात् कपिसंयोगस्य स्वरूपसंबन्धेन हेत्वधिकरणवृत्तित्वविरहात् न लक्षणघटकता। एवम् अभावे भावभिन्नत्वनिवेशादपि तस्य न लक्षणघटकता इति अभावान्तरमादाय समन्वयात् नाव्याप्तिरिति भावः।

33

ननु 'धूमवान् वह्नेः' इत्यादौ यावदभावान्तर्गतस्य अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्य प्रतियोग्यवृत्तितया नातिव्याप्तिरिति यदुक्तं तन्न संगच्छते । अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्य अयोगोलकान्यत्वाभावसमनियतत्वेन तदभिन्नतया अयोगोलकान्यत्वाभावस्य यथा अयोगोलकत्वरूपत्वं तथा अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्यापि अयोगोलकत्वरूपतया भावरूपत्वेन अभावे भावभिन्नत्वविशेषणसत्त्वात् तस्य लक्षणाघटकत्वात् इत्याशङ्क्याह - 'धूमवान् वह्नेः' इत्यादावित्यादिना [पृ.255] । भावभिन्नयोरेव समनियतयोः ऐक्यम् । अयोगोलकान्यत्वाभावस्य अभावप्रतियोगिकस्य भावरूपत्वात् अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्य भावप्रतियोगिकस्य भावभिन्नत्वात् तयोः ऐक्याप्रसक्तेः । तथा च भावभिन्नस्य यावदन्तर्गतस्य अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्य प्रतियोगिवृत्तित्वं नास्ति । प्रतियोगिनि अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वे अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वस्यैव सत्त्वात् । अतः नातिव्याप्तिरिति आशयः ।

॥ इति द्वितीयस्वलक्षणम् ॥

॥ श्रीः ॥

चक्रवर्तिलक्षणम्

दीधितिः

केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणस्य साध्याभावस्य प्रतियोगितायामनवच्छेदकं, हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरणस्य वा अभावस्य प्रतियोगितायां सामानाधिकरण्येनानवच्छेदकं वा यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः ।

गादाधरी

[११] चक्रवर्तिलक्षणम्

चक्रवर्तिलक्षणमाह—**केचित्तु** इति । **सद्धेतौ** साध्यावृत्तिघटत्वादिना साध्याभाव एव लक्षणघटकः । तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् लक्षणसमन्वयः । व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापि लक्षणघटकत्वात् नातिव्याप्तिः ।

'कपिसंयोगी एतत्त्वात्' इत्यादौ अव्याप्तेर्वारणाय **व्याप्यवृत्तेरिति** । व्याप्यवृत्तित्वं च निरवच्छिन्नवृत्तिकत्वम् । न तु अवच्छिन्नवृत्तिकान्यत्वम् । 'कपिसंयोगी सत्त्वात्' इत्यादौ कपिसंयोगाभावादेः द्रव्येऽवच्छिन्नवृत्तिकतया तदन्यत्वाभावात् घटत्वादिना साध्याभावस्यैव लक्षणघटकतया अतिव्याप्त्यापत्तेः । निरुक्तव्याप्यवृत्तित्वविशिष्टस्य च हेत्वधिकरणवृत्तित्वं बोध्यम् । अन्यथा 'कपिसंयोगी एतत्त्वाद्' इत्यत्र कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य द्रव्ये हेतुसमानाधिकरणतया गुणादौ च निरवच्छिन्नवृत्तिकतया तमादाय अव्याप्तेर्वारणासंभवात् ।

हेत्वधिकरणनिरूपितनिरवच्छिन्नाधेयतावत्त्वम्, हेत्वधिकरणनिष्ठनिरवच्छिन्नाधिकरणताकत्वं वा दलद्वयपर्यवसितार्थः ।

विवरणम्

अथ चक्रवर्तिलक्षणम् । केचित्तु [पृ.258] इत्यादिना चक्रवर्तिना उक्तं व्याप्तिलक्षणम् अनूद्यते । अत्र त्रीणि लक्षणानि अन्तर्गतानि ।

'व्याप्यवृत्तेः हेतुसमानाधिकरणस्य साध्याभावस्य प्रतियोगितायाम् अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यम्' इति प्रथमं लक्षणम् ।

साध्याभावपदस्य साध्यनिष्ठप्रतियोगिताकाभावोऽर्थः । 'वन्हिमान् धूमात्' इत्यादौ व्याप्यवृत्तिः हेत्वधिकरणवृत्तिश्च साध्यनिष्ठप्रतियोगिताकोऽभावः घटत्वेन वह्न्यभावः । तत्प्रतियोगितायाम् अवच्छेदकं घटत्वम् । अनवच्छेदकं वह्नित्वम् । तदवच्छिन्नवह्निसामानाधिकरण्यं धूमेऽस्तीति लक्षणसमन्वयः । 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ समवायितया वाच्यत्वाभावमादाय लक्षणसमन्वयः ।

'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि हेतुसमानाधिकरणः वह्न्यधिकरणायोगोलकवृत्तिः साध्यनिष्ठप्रतियोगिताकोऽभावः साध्यतावच्छेदकधूमत्वावच्छिन्नधूमनिष्ठप्रतियोगिताकाभावोऽपि । तत्प्रतियोगितायाम् अवच्छेदकमेव साध्यतावच्छेदकं धूमत्वमिति नातिव्याप्तिः ।

तदाह—**सद्धेतौ** [पृ.259] इत्यादिना । **साध्यावृत्तिघटत्वादिना** [पृ.259] इति । घटत्वेन वह्न्यभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसूचनाय साध्यावृत्तित्वकथनम् । 'एव'कारेण वह्नित्वेन वह्न्यभावः व्यवच्छिद्यते । तस्य हेत्वधिकरणपर्वताद्यवृत्तित्वेन हेतुसमानाधिकरणत्वविशेषणविरहात् न लक्षणघटकत्वम् इति भावः ।

साध्याभावे व्याप्यवृत्तित्वविशेषणस्य प्रयोजनमाह—**कपिसंयोगीत्यादिना** [पृ. 259] 'अयं कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र हेतोः एतद्वृक्षत्वस्य अधिकरणे एतद्वृक्षे वर्तमानः साध्यनिष्ठप्रतियोगिताकाभावः कपिसंयोगत्वावच्छिन्न-कपिसंयोगाभावोऽपि । तस्य मूलावच्छेदेन एतद्वृक्षे सत्वात् तत्प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकं कपिसंयोगत्वमिति साध्यतावच्छेदके प्रतियोगितानवच्छेदकत्वविरहात् अव्याप्तिः स्यात् । तद्वारणाय साध्याभावे व्याप्यवृत्तित्वविशेषणम् । कपिसंयोगत्वेन कपिसंयोगाभावस्य अव्याप्यवृत्तितया व्याप्यवृत्तिः कपिसंयोगनिष्ठप्रतियोगिताकः अभावः व्यधिकरणघटत्वादिना कपिसंयोगाभाव एव । तत्प्रतियोगितायाम् अवच्छेदकं घटत्वादिकम् । अनवच्छेदकं कपिसंयोगत्वम् इति नाव्याप्तिः ।

ननु व्याप्यवृत्तित्वम् अवच्छिन्नवृत्तिकान्यत्वं यदि विवक्ष्यते तदा 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र यद्यपि अव्याप्तिवारणं संभवति—कपिसंयोगत्वेन कपिसंयोगाभावस्य वृक्षे अग्रावच्छिन्नवृत्तिकतया अवच्छिन्नवृत्तिकान्यत्वविरहात् घटत्वादिना कपिसंयोगाभावस्यैव लक्षणघटकत्वात् — तथापि अव्याप्यवृत्तिसाध्यकव्यभिचारिणि 'अयं कपिसंयोगी सत्त्वात्' इत्यादौ अतिव्याप्तिः । तत्र सत्ताधिकरणगुणवृत्तेः कपिसंयोग-त्वावच्छिन्नकपिसंयोगाभावस्य वृक्षादौ अवच्छिन्नवृत्तिकतया अवच्छिन्नवृत्तिकान्यत्वविरहात् । तथा च तत्रापि घटत्वादिना कपिसंयोगाभावस्यैव लक्षणघटकतया तत्प्रतियोगितायाम् अन-वच्छेदकं कपिसंयोगत्वरूपं साध्यतावच्छेदकं भवतीति आशङ्क्य अत्र व्याप्यवृत्तित्वं निरवच्छिन्नवृत्तिकत्वरूपं विवक्षितम् 'कपि-संयोगी सत्त्वात्' इत्यत्र हेत्वधिकरणगुणे वर्तमानस्य कपिसंयोग-त्वावच्छिन्नकपिसंयोगाभावस्य निरवच्छिन्नवृत्तिकतया लक्षणघटक-त्वेन नातिव्याप्तिरित्याह—**व्याप्यवृत्तित्वं च** [पृ.259] इत्यादिना ।

ननु निरवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वविवक्षणेऽपि 'कपिसंयोगी सत्त्वात्' इत्यत्र अतिव्याप्तिवारणेऽपि 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र अव्याप्तिर्दुवारा । कपिसंयोगत्वेन कपिसंयोगाभावस्य गुणे निरवच्छिन्नवृत्तिकत्वात् मूलावच्छेदेन हेत्वधिकरणवृत्तित्वाच्च लक्षणघटकतया तत्प्रतियोगितावच्छेदकत्वस्यैव कपिसंयोगत्वे सत्त्वात् इत्यत आह - **निरुक्तव्याप्यवृत्तित्वविशिष्टस्येति** [पृ.259] । निरवच्छिन्नवृत्तिकत्वविशिष्टस्य साध्याभावस्य हेत्वधिकरणवृत्तित्वं विवक्षितम् । 'कपिसंयोगी सत्त्वात्' इत्यत्र कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य निरवच्छिन्नवृत्तिकत्वविशिष्टस्य हेत्वधिकरणगुणवृत्तित्वमस्तीति लक्षणघटकतया नातिव्याप्तिः । 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र निरवच्छिन्नवृत्तिकत्वविशिष्टस्य कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य हेत्वधिकरणवृक्षवृत्तित्वं नास्तीति लक्षणाघटकतया घटत्वादिना कपिसंयोगाभावस्यैव लक्षणघटकतया नाव्याप्तिरिति भावः ।

ननु निरवच्छिन्नवृत्तिकत्वविशिष्टस्य हेत्वधिकरणवृत्तित्वनिवेशेऽपि 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र विशेष्ये कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावे हेत्वधिकरणवृत्तित्वसत्त्वेन निरवच्छिन्नवृत्तिकत्वविशिष्टे कपिसंयोगाभावेऽपि हेत्वधिकरणवृत्तित्वमावश्यकम् । विशेष्यवृत्तिधर्मप्रतियोगिकविशिष्टानुयोगिकाभावानङ्गीकारात् । विशिष्टशुद्धयोरनतिरेकात् । तथा च अव्याप्तितादवस्थ्यम् इत्याशङ्क्य व्याप्यवृत्तेः हेतुसमानाधिकरणस्येति दलद्वयपर्यवसितार्थमाह—**हेत्वधिकरणेत्यादिना** [पृ.259] । हेत्वधिकरणनिरूपिता या निरवच्छिन्ना आधेयता तद्वत्त्वम्, अथवा हेत्वधिकरणनिष्ठा या निरवच्छिन्ना अधिकरणता तन्निरूपकत्वं साध्याभावस्य विशेषणम् । 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र हेत्वधिकरणवृक्षनिरूपितमूलावच्छिन्नाधेयतावत्त्वमेव कपि-

संयोगत्वावच्छिन्नकपिसंयोगाभावेऽस्ति, न तु हेत्वधिकरणनिरूपित-निरवच्छिन्नाधेयतावत्त्वम् । अतः कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावः न लक्षणघटकः, किन्तु घटत्वादिना कपिसंयोगाभाव एव इति वाव्याप्तिः ।

'कपिसंयोगी सत्त्वात्' इत्यत्र हेत्वधिकरणगुणनिरूपित-निरवच्छिन्नाधेयतावत्त्वं कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावेऽस्तीति तस्य लक्षणघटकतया नातिव्याप्तिः । आधेयतायाः आधेयस्वरूपत्वे आधेयतावच्छेदकरूपत्वे वा कपिसंयोगाभावरूपायाः कपिसंयोगत्वरूपाया वा निरवच्छिन्नाधेयतायाः हेत्वधिकरण-निरूपितत्वानपायात् अव्याप्तितादवस्थ्यम् इत्याशयेन द्वितीय-पक्षानुसरणम् ।

गादाधरी

[२७] तत्र मतान्तरोपन्यासः ।

केचित्तु—'व्याप्यवृत्तेः हेतुसमानाधिकरणसाध्याभावस्य' इति समुदायस्य, हेत्वधिकरणे व्याप्यवृत्तिः यः साध्याभावः तस्येत्यर्थः । हेत्वधिकरणे व्याप्यवृत्तित्वं च हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्ति-निष्ठात्यन्ताभावप्रतियोगितायाः सामानाधिकरण्येन अनवच्छेदकं यदभावनिष्ठं तद्व्यक्तित्वं तत्त्वम् ।

न च - '**विशिष्टसत्तावान्** जातेः' इत्यादौ गुणादिनिष्ठ-सत्त्वादिरूपाभावप्रतियोगितायां विशिष्टसत्ताभावनिष्ठतद्व्यक्ति-त्वस्य अवच्छेदकत्वात् विशिष्टसत्त्वाद्यभावस्य व्याप्यवृत्ति-त्वानुपपत्तिः । यदभावाभावत्वावच्छिन्नानधिकरणत्वं हेतुमतः तत्त्वमिति विवक्षणे व्यधिकरणधर्मावच्छिन्नाभावस्य असं-ग्रहप्रसङ्गः, तदभावाप्रसिद्धेरिति - वाच्यम् ।

यत्किंचिद्धेत्वधिकरणवृत्तितावच्छेदकानुयोगितानिरूपकतान-वच्छेदकं यदभावत्वं तत्त्वस्य विवक्षितत्वात्, 'गुणे गुणान्यत्व-

'विशिष्टसत्ताभावो नास्ति' इत्यप्रत्ययेन **विशिष्टसत्ताभावत्वाद्य-वच्छिन्न**निरूपितानुयोगिताविशिष्टायाः सत्ताया गुणादिवृत्तितान-भ्युपगमेन विशिष्टसत्ताद्यभावस्य व्याप्यवृत्तितानिर्वाहात् इत्याहुः ।

विवरणम्

स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपं व्याप्यवृत्तित्वं लक्षणघटकं इत्याशयवतां केषांचिन्मतमनुवदति—**केचित्तु** [पृ.263] इत्यादिना । व्याप्यवृत्तेः हेतुसमानाधिकरणस्य साध्याभावस्येति समुदायस्य हेत्वधिकरणे व्याप्यवृत्तिः यः साध्याभावः तस्य इत्यर्थः । हेत्वधिकरणे व्याप्यवृत्तित्वं च हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठात्यन्ताभावप्रतियोगितायां सामानाधिकरण्येन अनवच्छेदकं यदभावनिष्ठं तद्व्यक्तित्वं तत्त्वम् ।

'वह्निमान् धूमात्' इत्यादौ 'यदभावनिष्ठं तद्व्यक्तित्वम्' इत्यनेन घटत्वेन वह्न्यभावनिष्ठं तद्व्यक्तित्वं गृह्यते । तत् हेत्वधि-करणीभूतेत्यादिविशेषणाक्रान्तम् । हेत्वधिकरणं पर्वतः । तन्निष्ठः अत्यन्ताभावः घटत्वेन वह्न्यभावनिष्ठतद्व्यक्तित्वावच्छिन्नाभावः न भवति । तद्व्यक्तित्वावच्छिन्नस्य घटत्वेन वह्न्यभावस्यैव तत्र सत्त्वात् । किंतु पर्वतत्वाभावनिष्ठतद्व्यक्तित्वावच्छिन्नाभावः । तत्प्रतियोगितायां सामानाधिकरण्येन अवच्छेदकं पर्वतत्वाभावनिष्ठं तद्व्यक्तित्वम् । अनवच्छेदकं घटत्वेन वह्न्यभावनिष्ठं तद्व्य-क्तित्वम् । तत्त्वं घटत्वेन वह्न्यभावेऽस्तीति स हेत्वधिकरणे व्याप्यवृत्तिः साध्याभावः । तत्प्रतियोगितायाम् अनवच्छेदकं वह्नित्वम् । तदवच्छिन्नसामानाधिकरण्यं धूमेऽस्तीति समन्वयः ।

'धूमवान् वह्नेः' इत्यादौ धूमत्वावच्छिन्नधूमाभावनिष्ठं तद्व्यक्तित्वं हेत्वधिकरणीभूतायोगोलकनिष्ठात्यन्ताभावप्रति-योगितायां अनवच्छेदकम् । अयोगोलके धूमत्वेन धूमाभावस्य सत्त्वेन तन्निष्ठतद्व्यक्तित्वावच्छिन्नाभावासंभवात् । तत्स्वरूप-

हेत्वधिकरणे व्याप्यवृत्तित्वाश्रयः धूमत्वेन धूमाभावः। तत्प्रतियोगितानवच्छेदकत्वं धूमत्वे नास्तीति नातिव्याप्तिः।

'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावनिष्ठं तद्व्यक्तित्वं न हेत्वधिकरणीभूतेत्यादिविशेषणाक्रान्तम्। हेत्वधिकरणवृक्षनिष्ठः अत्यन्ताभावः कपिसंयोगाभावनिष्ठतद्व्यक्तित्वावच्छिन्नाभावः कपिसंयोगात्मकः। तत्प्रतियोगितावच्छेदकत्वस्यैव कपिसंयोगाभावनिष्ठतद्व्यक्तित्वे सत्त्वात्। अतः यदभावनिष्ठं तद्व्यक्तित्वम् इत्यनेन कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावनिष्ठं तद्व्यक्तित्वं ग्रहीतुं न शक्यते। किंतु घटत्वेन कपिसंयोगाभावनिष्ठं तद्व्यक्तित्वमेव ग्रहीतुं शक्यते। तदवच्छिन्नस्य केवलान्वयितया तदवच्छिन्नाभावस्य हेत्वधिकरणनिष्ठत्वासंभवात्। तस्मात् निरुक्तव्याप्यवृत्तित्वाश्रयः साध्याभावः घटत्वेन कपिसंयोगाभावः। तत्प्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके कपिसंयोगत्वे अस्तीति नाव्याप्तिः।

'कपिसंयोगी सत्त्वात्' इत्यत्र कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावनिष्ठं तद्व्यक्तित्वमपि ग्रहीतुं शक्यते। हेत्वधिकरणयत्किंचिद्व्यक्तिगुणनिष्ठः यः अत्यन्ताभावः न कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावनिष्ठतद्व्यक्तित्वावच्छिन्नाभावः। तद्व्यक्तित्वावच्छिन्नस्य कपिसंयोगाभावस्यैव तत्र सत्त्वात्। किन्तु गुणत्वाभावनिष्ठतद्व्यक्तित्वावच्छिन्नाभावः। तत्प्रतियोगितायाम् अवच्छेदकं गुणत्वाभावनिष्ठं तद्व्यक्तित्वम्। अनवच्छेदकं कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावनिष्ठं तद्व्यक्तित्वम्। तथा च कपिसंयोगत्वेन कपिसंयोगाभावोऽपि निरुक्तव्याप्यवृत्तित्वाश्रयः साध्याभावः। तत्प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकं कपिसंयोगत्वमिति नातिव्याप्तिः।

अत्र यत्किञ्चित्पदानुपादाने 'कपिसंयोगी सत्त्वात्' इत्यत्र अतिव्याप्तिर्वारयितुमशक्या । कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावनिष्ठतद्व्यक्तित्वे हेत्वधिकरणसामान्यनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वस्य विरहात् । सत्ताधिकरणद्रव्ये कपिसंयोगात्मकस्य कपिसंयोगाभावनिष्ठतद्व्यक्तित्वावच्छिन्नाभावस्य सत्त्वेन तत्प्रतियोगितावच्छेदकत्वस्यैव तद्व्यक्तित्वे सत्त्वात् । तथा च कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य निरुक्तव्याप्यवृत्तित्वविरहेण लक्षणाघटकतया घटत्वेन कपिसंयोगाभावस्यैव लक्षणघटकतया तत्प्रतियोगितानवच्छेदकत्वस्यैव साध्यतावच्छेदके कपिसंयोगत्वे सत्त्वात् अतिव्याप्तिः स्यात् । तद्वारणाय यत्किचित्पदम् । यत्किंचित्पदोपादाने तु हेत्वधिकरणयत्किंचित्पदेन गुणं कर्म वा गृहीत्वा पूर्वोक्तरीत्या कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावनिष्ठतद्व्यक्तित्वस्य अनवच्छेदकत्वमुपपाद्य कपिसंयोगत्वेन कपिसंयोगाभावस्य लक्षणघटकत्वं संपाद्य अतिव्याप्तिर्वारणीया । एवं निरुक्तव्याप्यवृत्तित्वशरीरे 'सामानाधिकरण्येन' इत्यस्य अनुपादाने 'वन्हिमान् धूमात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य निरुक्तव्याप्यवृत्तित्वविरहेण लक्षणाघटकतया असंभवः स्यात् ।

तथा हि-धूमाधिकरणयत्किचित्पदेन पर्वतादेर्ग्रहणेऽपि तन्निष्ठः यः अत्यन्ताभावः घटत्वेन वह्न्यभावनिष्ठतद्व्यक्तित्वेन घटाभावः । तदीयप्रतियोगितायां घटनिष्ठायां व्यधिकरणतया अवच्छेदकमेव घटत्वेन वह्न्यभावनिष्ठं तद्व्यक्तित्वमिति तत्प्रतियोगितानवच्छेदकं साध्याभावनिष्ठं तद्व्यक्तित्वमप्रसिद्धमिति असंभवः स्यात् । तद्वारणाय 'सामानाधिकरण्येन' इत्युक्तम् । तदुक्तौ उक्तरीत्या घटत्वेन वह्न्यभावनिष्ठतद्व्यक्तित्वस्य हेत्वधिकरणनिष्ठात्यन्ताभावप्रतियोगितायां व्यधिकरणतया अवच्छेदकत्वेऽपि

सामानाधिकरण्येन अनवच्छेदकत्वमस्तीति, घटत्वेन वह्न्यभावस्य लक्षणघटकतया न असंभवः ।

न च विशिष्टसत्तावानिति [पृ.263]। निरुक्तव्याप्यवृत्तित्वविवक्षणेऽपि 'विशिष्टसत्तावान् जातेः' इत्यत्र अतिव्याप्तिः। तत्र हि विशिष्टसत्तात्वेन विशिष्टसत्ताभावमादाय अतिव्याप्तिर्वारणीया । तस्य अभावस्य निरुक्तव्याप्यवृत्तित्वं दुर्घटम्। हेतोः जातेः अधिकरणे गुणे वर्तते यः अत्यन्ताभावः विशिष्टसत्ताभावनिष्ठतद्व्यक्तित्वावच्छिन्नाभावोऽपि। तस्य अभावस्य विशिष्टसत्तारूपस्य विशिष्टशुद्धयोरनतिरेकात् शुद्धसत्तारूपत्वमप्यस्ति। शुद्धसत्ता च गुणे वर्तते। अतः हेत्वधिकरणवृत्तिः यः अभाव इत्युक्ते सत्तात्मकः विशिष्टसत्ताभावनिष्ठतद्व्यक्तित्वावच्छिन्नाभावः । तत्प्रतियोगितायाम् अवच्छेदकमेव विशिष्टसत्ताभावनिष्ठं तद्व्यक्तित्वमिति तत्प्रतियोगितायामनवच्छेदकं ! यदभावनिष्ठं तद्व्यक्तित्वं घटत्वेन विशिष्टसत्ताभावनिष्ठं तद्व्यक्तित्वमेव । तदभावपदेन घटत्वेन विशिष्टसत्ताभावस्यैव ग्राह्यतया तत्प्रतियोगितानवच्छेदकं विशिष्टसत्तात्वरूपं साध्यतावच्छेदकं भवतीति अतिव्याप्तिः स्यात् ।

न च - यदभावाभावत्वावच्छिन्नानधिकरणत्वं हेतुमतः तत्त्वमेव हेत्वधिकरणे व्याप्यवृत्तित्वम् । विशिष्टसत्ताभावाभावस्य सत्तात्वेन रूपेण अधिकरणं यद्यपि गुणः भवति, तथापि विशिष्टसत्ताभावाभावत्वावच्छिन्नानधिकरणमेव हेतुमान् गुणः । तदभावपदेन विशिष्टसत्तात्वावच्छिन्नाभावस्य ग्राह्यतया तस्यापि लक्षणघटकतया नातिव्याप्तिः इति - वाच्यम् । तथा सति व्यधिकरणधर्मावच्छिन्नाभावस्य घटत्वेन वह्न्यभावादेः असंग्रहापत्तेः । घटत्वेन वह्न्यभावाभावस्य अप्रसिद्धेः । घटत्वेन वह्न्यभावस्य केवलान्वयित्वात् इति 'न च' इत्यादि शङ्काग्रन्थस्याशयः ।

उक्तशङ्कां समाधत्ते - यत्किंचिद्धेत्वधिकरणेत्यादिना [पृ.263] । यत्किंचिद्धेत्वधिकरणवृत्तितावच्छेदकीभूता या अनुयोगिता तन्निरूपकतानवच्छेदकं यदभावत्वं तदभावः हेत्वधिकरणे व्याप्यवृत्तिः साध्याभाव इत्यनेन ग्राह्यः । अत्र अनुयोगितापदेन अभावत्वरूपा अनुयोगिता ग्राह्या । 'विशिष्टसत्तावान् जातेः' इत्यत्र यत्किंचिद्धेत्वधिकरणं गुणः कर्म वा । तद्वृत्तितावच्छेदकीभूता अनुयोगिता गुणकर्मान्यत्वविशिष्टसत्ताभावाभावत्वरूपा अनुयोगिता न भवति । गुणे गुणकर्मान्यत्वविशिष्टसत्ताभावाभावत्वेन रूपेण गुणकर्मान्यत्वविशिष्टसत्ताभावाभावस्य अवृत्तेः । गुणे गुणकर्मान्यत्वविशिष्टसत्ताभावो नास्तीति प्रतीतिविरहात् । किंतु सत्ताभावाभावत्वरूपा अनुयोगिता गुणवृत्तितावच्छेदिका । तन्निरूपकः सत्ताभावः । निरूपकतावच्छेदकं सत्ताभावत्वम् । निरूपकतानवच्छेदकं यदभावत्वं विशिष्टसत्ताभावत्वम् । तत्त्वस्य विशिष्टसत्ताभावे सत्त्वात् तस्य लक्षणघटकतया तत्प्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके विशिष्टसत्तात्वे सत्त्वात् नातिव्याप्तिरिति भावः ।

अभावत्वरूपानुयोगितायाः निरूपकः अभावप्रतियोगी । **विशिष्टसत्ताभावत्वाद्यवच्छिन्नेति** [पृ.263] । विशिष्टसत्ताभावत्वावच्छिन्ननिरूपिता या अनुयोगिता विशिष्टसत्ताभावाभावत्वरूपा । तद्विशिष्टसत्तायाः गुणवृत्तितानङ्गीकारेणेत्यर्थः । तद्विशिष्टायाः सत्तायाः गुणवृत्तिताङ्गीकारे हि गुणवृत्तितावच्छेदिका अनुयोगिता तन्निरुपकतावच्छेदकं विशिष्टसत्ताभावत्वं भवेदिति भावः । एतावता 'व्याप्यवृत्तेः' 'हेतुसमानाधिकरणस्य' इति दलद्वयस्य पर्यवसितार्थः प्रसभेदेन निरूपितः ।

गादाधरी

३८. 'संयोगिभिन्नं प्रमेयत्वात्' इत्यत्र अतिव्याप्तिनिरासप्रकारः

ननु 'संयोगिभिन्नं प्रमेयत्वात्' इत्यत्र अतिव्याप्तिः । संयोगिभेदाभावस्य तद्भेदप्रतियोगितावच्छेदकीभूतसंयोगात्मकस्य अव्याप्यवृत्तित्वेन लक्षणघटकत्वाभावात्, व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणगमवात् इति चेत् ।

न । संयोगिभेदस्य **व्याप्यवृत्तित्वेन** तस्य द्रव्यत्व-संयोगप्रकारकप्रमाविशेष्यत्वाद्यवच्छिन्नभेदसमनियततया तदभिन्नत्वेन **तद्भेदप्रतियोगितावच्छेदकद्रव्यत्वादिकमपि** संयोगिभेदाभावः । तस्य हेत्वधिकरणे व्याप्यवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वेन अतिव्याप्त्यनवकाशात् ।

एवं 'द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वात्' इत्यादौ व्याप्यवृत्तेः सत्तादिरूपाभावस्य प्रतियोगितावच्छेदकं साध्यतावच्छेदकमिति अव्याप्तिरित्यपि नाशङ्कनीयम् । सत्तादिसत्त्वेऽपि द्रव्यादौ द्रव्यान्यत्वविशिष्टसत्ताभावो नास्तीति प्रत्ययानुदयात् । विशिष्टनिरूपिताधिकरणताविशेषस्यैव विशिष्टाभावाभावत्वोपगमात् । **विशिष्टाभावस्य** विशिष्टाधिकरणत्वाभावसमनियततया ; तदभिन्नतया विशिष्टसत्ताधिकरणताया अपि विशिष्टाभावप्रतियोगित्वात् ।

विवरणम्

अथ पर्यवसितार्थोपरि अतिव्याप्तिमाशङ्कते - **ननु संयोगिभिन्नमित्यादिना** [पृ.269] । संयोगिभेदाभाववति द्रव्ये प्रमेयत्वसत्त्वात् 'संयोगिभिन्नं प्रमेयत्वात्' इति व्यभिचारिहेतुः । अत्र हेत्वधिकरणे द्रव्ये व्याप्यवृत्तिः साध्याभावः इत्यनेन संयोगिभेदाभावं गृहीत्वा तत्प्रतियोगितावच्छेदकमेव संयोगिभेदत्वरूपं साध्यता-

वच्छेदकं भवतीति अतिव्याप्तिर्वारणीया । परन्तु भेदाभावस्य भेदप्रतियोगितावच्छेदकस्वरूपतया संयोगिभेदाभावस्य संयोगिभेदप्रतियोगितावच्छेदकसंयोगस्वरूपत्वात् संयोगस्य च अव्याप्यवृत्तित्वात् संयोगात्मकस्य संयोगिभेदाभावस्य अव्याप्यवृत्तित्वमेवास्ति । न तु व्याप्यवृत्तित्वम् इति संयोगिभेदाभावस्य लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव - घटत्वादिना संयोगिभेदाभावस्यैव लक्षणघटकतया अतिव्याप्तिरिति शङ्का ।

समाधानं तु - सत्यं भेदाभावः भेदप्रतियोगितावच्छेदकस्वरूप इति । प्रकृते संयोगिभेदस्य न केवलं संयोग एव प्रतियोगितावच्छेदकः । किन्तु द्रव्यत्वं संयोगप्रकारकप्रमाविशेष्यत्वं च संयोगिभेदस्य प्रतियोगितावच्छेदकम् ।

तथा हि—यत्र यत्र संयोगिभेदः गुणादौ, तत्र द्रव्यत्वावच्छिन्नद्रव्यभेदः, संयोगप्रकारकप्रमाविशेष्यत्वावच्छिन्नभेदश्च वर्तते । 'गुणः न द्रव्यम्', 'गुणः न संयोगप्रकारकप्रमाविशेष्यः' इति प्रतीतेः । तथा च संयोगिभेदस्य द्रव्यत्वावच्छिन्नभेद - संयोगप्रकारकप्रमाविशेष्यत्वावच्छिन्नभेदसमनियततया तदभिन्नत्वेन तादृशभेदयोः प्रतियोगितावच्छेदकं द्रव्यत्वं संयोगप्रकारकप्रमाविशेष्यत्वं च संयोगिभेदस्य प्रतियोगितावच्छेदकम् । एवञ्च संयोगिभेदाभावः द्रव्यत्वादिस्वरूपः । द्रव्यत्वादेश्च व्याप्यवृत्तितया तत्स्वरूपस्य संयोगिभेदाभावस्यापि व्याप्यवृत्तित्वमस्तीति लक्षणघटकतया तत्प्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके संयोगे सत्त्वेन नातिव्याप्तिरिति ।

व्याप्यवृत्तित्वेनेति [पृ.269] । संयोगिभेदस्य अव्याप्यवृत्तित्वे तस्य द्रव्येषु सत्त्वेन द्रव्यभेदसमनियतत्वं दुर्घटमित्यालोच्य संयोगिभेदस्य व्याप्यवृत्तित्वेनेत्युक्तम् । **तद्भेदप्रतियोगितावच्छेदक-**

द्रव्यत्वादिकमपीति [पृ.269] । द्रव्यत्वसंयोगप्रकारकप्रमाविशेष्यत्वाद्यवच्छिन्नभेदप्रतियोगितावच्छेदकं द्रव्यत्वादिकमपीत्यर्थः ।

एवमित्यादि [पृ.269] । 'द्रव्यान्यत्वविशिष्टसत्ताभाववान्, द्रव्यत्वात्' इति सद्धेतुः। द्रव्ये द्रव्यान्यत्वविशिष्टसत्ताया अभावात्। अत्र हेत्वधिकरणे द्रव्ये 'व्याप्यवृत्तिः साध्याभाव' इत्यनेन द्रव्यान्यत्वविशिष्टसत्ताभावाभावोऽपि ग्रहीतुं शक्यते । तस्य अभावस्य विशिष्टशुद्धयोरनतिरेकेण सत्तारूपतया सत्तायाश्च द्रव्यवृत्तित्वात् । तथा च तादृशाभावप्रतियोगितायां अवच्छेदकमेव द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपं साध्यतावच्छेदकमिति अव्याप्तिरित्याशङ्का ।

समाधानं तु - द्रव्यान्यत्वविशिष्टसत्ताभावाभावः न सत्तारूपः । किन्तु द्रव्यान्यत्वविशिष्टसत्तानिरूपिताधिकरणताविशेषरूपः । द्रव्यान्यत्वविशिष्टसत्ताधिकरणे गुणादावेव द्रव्यान्यत्वविशिष्टसत्ताभावो नास्तीति प्रतीतेः । सत्तारूपत्वे तु द्रव्येऽपि सत्तायाः सत्त्वेन द्रव्यान्यत्वविशिष्टसत्ताभावो नास्ति इति प्रतीतिप्रसङ्गात् । तथा च हेत्वधिकरणवृत्तिः साध्याभाव इत्यनेन द्रव्यान्यत्वविशिष्टसत्ताभावत्वावच्छिन्नाभावः न ग्राह्यः । विशिष्टनिरूपिताधिकरणताविशेषस्य द्रव्येऽभावेन तदात्मकस्य विशिष्टाभावाभावस्यापि हेत्वधिकरणे द्रव्येऽवृत्तेः । किन्तु व्यधिकरणधर्मावच्छिन्नसाध्याभावः घटत्वेन द्रव्यान्यत्वविशिष्टसत्ताभावस्य अभावः ग्राह्यः । तत्प्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदकेऽस्तीति नाव्याप्तिरिति भावः ।

ननु द्वितीयाभावस्य प्रथमाभावप्रतियोगिस्वरूपत्वम् इति सिद्धान्तः । व्यान्यत्वविशिष्टसत्ताभावाभावस्य द्रव्यान्यत्वविशिष्टसत्ताभावप्रतियोगिस्वरूपत्वमेव युक्तम् । द्रव्यान्यत्वविशिष्टसत्ताभावस्य च द्रव्यान्यत्वविशिष्टसत्तैव प्रतियोगिनी न तु

द्रव्यान्यत्वविशिष्टसत्तानिरूपिताधिकरणताविशेषः । तथा च कथम् अधिकरणताविशेषात्मकत्वं विशिष्टाभावाभावस्य इत्याशङ्क्याह – **विशिष्टाभावस्येति** [पृ.269]। यत्र यत्र द्रव्यान्यत्वविशिष्टसत्ताभावः तत्र तत्र द्रव्यान्यत्वविशिष्टसत्तानिरूपिताधिकरणत्वाभावः इति विशिष्टाभावस्य विशिष्टाधिकरणत्वाभावस्य च समनियतत्वेन अभिन्नतया विशिष्टाधिकरणत्वाभावप्रतियोगिभूतं विशिष्टाधिकरणत्वं तदभिन्नस्य विशिष्टाभावस्यापि प्रतियोगि। एवं च विशिष्टसत्ताभावाभावः विशिष्टसत्ताभावप्रतियोगिस्वरूपः इत्युक्तावपि विशिष्टाभावस्य प्रतियोगि यत् विशिष्टाधिकरणत्वं तत्स्वरूपत्वमक्षतमेवेति न काचिदनुपपत्तिरिति भावः ।

गादाधरी

[३१] तत्र मतान्तरोपन्यासः

परे तु — संयोगत्वेन संयोगनिरूपिताया अधिकरणतायाः **किञ्चिदवच्छिन्नत्वेऽपि संयोगिभेदाभावत्वेन** तन्निरूपिताधिकरणता **निरवच्छिन्नैव। द्रव्ये संयोगिभेदस्य** अप्रत्ययात्, अवच्छेदकानन्तर्भाव्यैव तदभावत्वावच्छिन्नवत्ताप्रतीतेः। एवं द्रव्यादौ सत्तात्वाद्यवच्छिन्नसत्ताद्यधिकरणतासत्त्वेऽपि द्रव्यान्यत्वविशिष्टसत्तात्वादिनेव तदवच्छिन्नप्रतियोगिताकाभावाभावत्वेनापि न **वृत्तिः। तत्र** विशिष्टाभावो नास्ति इति अप्रत्ययात्। तथा च साध्यनिष्ठयादृशप्रतियोगिताकाभावत्वावच्छिन्ननिरूपिता अनवच्छिन्नाधिकरणता हेत्वधिकरणवृत्तिः तादृशप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके निवेश्यम् इति न कश्चिद्दोष इत्याहुः।

विवरणम्

'संयोगिभिन्नं प्रमेयत्वात्' इत्यत्र प्रकारान्तरेण अतिव्याप्तिं वारयतां मतमुपन्यस्यति - **परे तु** [पृ.272] इत्यादिना।

संयोगि-भेदाभावस्य संयोगरूपत्वेऽपि संयोगत्वेन रूपेणैव तस्य सावच्छिन्नवृत्तिकत्वम्, संयोगिभेदाभावत्वेन रूपेण तु तस्य निरवच्छिन्नवृत्तिकत्वमेव। द्रव्ये संयोगिभेदस्य प्रतीतौ सत्यां किंचिदवच्छेदेन संयोगिभेदः किंचिदवच्छेदेन संयोगिभेदाभाव इति वक्तुं शक्यते। द्रव्ये तु संयोगिभेदः न प्रतीयते। किंतु संयोगिभेदाभाव एव प्रतीयते। तथा च संयोगिभेदाभावत्वावच्छिन्नसंयोगिभेदाभावनिष्ठाधेयतानिरूपिता द्रव्यनिष्ठा अधिकरणता निरवच्छिन्ना। संयोगत्वावच्छिन्नसंयोगिभेदाभावनिष्ठाधेयतानिरूपिता द्रव्यनिष्ठा अधिकरणता किंञ्चिदवच्छिन्ना। एवं द्रव्ये सत्तात्वेन रूपेण द्रव्यान्यत्वविशिष्टसत्ताभावाभावस्य सत्त्वेऽपि द्रव्यान्यत्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगिताकाभावाभावत्वेन तादृशविशिष्टसत्ताभावाभावः न वर्तते। द्रव्ये 'द्रव्यान्यत्वविशिष्टसत्ताभावो नास्ति' इति प्रतीतिविरहात्। एतदनुसारेण व्याप्यवृत्तित्वघटितलक्षणपरिष्कारः एवं क्रियते—

'साध्यनिष्ठयादृशप्रतियोगिताकाभावत्वावच्छिन्नाधेयतानिरूपिता निरवच्छिन्नाधिकरणता हेत्वधिकरणवृत्तिः तादृशप्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः' इति।

'संयोगिभिन्नं प्रमेयत्वात्' इत्यत्र संयोगिभेदनिष्ठसंयोगिभेदत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाधेयतानिरूपिता निरवच्छिन्नाधिकरणता हेत्वधिकरणद्रव्यवृत्तिर्भवति। तादृशप्रतियोगितायां संयोगिभेदत्वावच्छिन्नायां अवच्छेदकमेव संयोगिभेदत्वरूपं साध्यतावच्छेदकमिति नातिव्याप्तिः।

'द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वात्' इत्यत्र साध्यनिष्ठयादृशप्रतियोगितापदेन द्रव्यान्यत्वविशिष्टसत्ताभावत्वाव-

च्छिन्नप्रतियोगिता ग्रहीतुं न शक्यते । तत्प्रतियोगिताकाभावत्वावच्छिन्नाधेयतानिरूपिताधिकरणताया: हेत्वधिकरणद्रव्यवृत्तित्वविरहात् । किन्तु शुद्धसत्ताभावत्वावच्छिन्नप्रतियोगितैव यादृशप्रतियोगितापदेन ग्राह्या । तन्निरूपकाभावत्वावच्छिन्ननिरूपिताधिकरणताया: हेत्वधिकरणद्रव्यवृत्तित्वात् । तादृशप्रतियोगितायाम् अवच्छेदकं शुद्धसत्ताभावत्वम् । अनवच्छेदकं द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूप साध्यतावच्छेदकं भवतीति नाव्याप्ति: इति भाव: ।

संयोगत्वेन संयोगनिरूपिताया [पृ. 272] इति । संयोगत्वावच्छिन्नसंयोगात्मकसंयोगिभेदाभावनिष्ठाधेयतानिरूपिताया इत्यर्थ: । **किञ्चिदवच्छिन्नत्वेऽपि** [पृ. 272] - अग्राद्यवच्छिन्नत्वेऽपि । **संयोगिभेदाभावत्वेनेति** [पृ. 272] संयोगिभेदाभावत्वावच्छिन्नसंयोगनिष्ठाधेयतानिरूपिता धिकरणता निरवच्छिन्नेत्यर्थ: । **न वृत्तिरिति** [पृ.272] सत्ताया इति शेष: । तत्र [पृ. 272] - द्रव्ये ।

गादाधरी

[४०] हेत्वधिकरणवृत्तित्वे संबन्धविशेषनिवेशनम् ।

अथ अत्र हेत्वधिकरणवृत्तित्वं यदि येन केनचित् संबन्धेन, तदा कालिकादिसंबन्धेन धूमाधिकरणवृत्तिवह्नित्वावच्छिन्नवह्न्यभावादिकमादाय अव्याप्ति: । यदि च कालिकसंबन्धेन काले वह्न्यभावादे: वृत्ति: वह्न्यनधिकरणदेशावच्छिन्नैवेति नासौ हेत्वधिकरणे निरवच्छिन्नवृत्तिक इति मन्यते, तदापि 'सत्तावान् जाते:' इत्यादौ हेतुमति ज्ञानादौ विषयितासंबन्धेन वर्तमानं साध्याभावमादाय अव्याप्तिर्दुवारैव । दैशिकविशेषणतासंबन्धेन हेत्वधिकरणवृत्तित्वनिवेशने च घटत्वाभावादिसाध्यके व्यभिचारिण्यतिव्याप्ति: । तत्र समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य भावरूपसाध्याभावस्य तेन संबन्धेन अवृत्ते: व्यधिकरणधर्मावच्छिन्ना-

भावस्यैव लक्षणघटकत्वात् । एवं कालिकसंबन्धावच्छिन्नप्रतियोगिताके आकाशाभावाभावे साध्ये आत्मत्वादिहेतौ अव्याप्तिः । दैशिकविशेषणतया हेतुसमानाधिकरणस्य आकाशाभावस्य प्रतियोगितावच्छेदकतायाः साध्यतावच्छेदके सत्त्वात् **कालिकसंबन्धेन आकाशाभावरूपप्रतियोगिसत्ताया** एव कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावो नास्तीति प्रत्ययनियामकत्वात् आकाशाभावस्यैव तादृशसाध्याभावरूपत्वे बाधकविरहात् इति चेत् न ।

स्वीययादृशप्रतियोगिताश्रयवत्ताज्ञानं प्रति यादृशसंबन्धेन स्वप्रकारकं ज्ञानं विरोधि, तादृशसंबन्धेन हेत्वधिकरणवृत्तिः योऽभावः तदीयतादृशप्रतियोगितानवच्छेदकत्वस्यैव निवेशनीयत्वात् । आकाशाभावस्य दैशिकविशेषणतासंबन्धश्च न दर्शिताकाशाभावाभाववत्ताज्ञावविरोधिज्ञानविषयः । अपि तु कालिककसंबन्ध एव । स च तेन संबन्धेन आत्मनि न वर्तते । अत आकाशाभावाभावीयसाध्यनिष्ठप्रतियोगितायाः 'यादृशप्रतियोगिता' इत्यनेन उपादानासंभवः । अपि तु व्यधिकरणधर्मावच्छिन्नसाध्याभावीयप्रतियोगिताया एव । तादृशाभावज्ञानस्य दैशिकविशेषणतासंसर्गकस्य व्यधिकरणधर्मप्रकारेण साध्यावगाहिनं भ्रमं प्रति विरोधित्वात् ।

सामान्यतः प्रतियोगिप्रकारकज्ञाननिवेशे आकाशप्रकारकज्ञानं प्रति दैशिकविशेषणतासंबन्धेन आकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकतया उक्तदोषतादवस्थ्यमिति यादृशप्रतियोगिताश्रयेत्युक्तम् । प्रतियोगिताश्रयवत्ताज्ञानं च तत्प्रतियोगितावच्छेदकधर्मावच्छिन्नप्रकारकं ग्राह्यम् । तेन आकाशत्वेन तादृशसाध्यवत्ताज्ञानं प्रति दैशिकविशेषणतासंबन्धेन आकाशाभावप्रकारकज्ञानस्य विरोधित्वेऽपि न क्षतिः । एवं च प्रतियोगिता-

अयावगाहित्वविवेशे प्रयोजनाभावाद् यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानं प्रति प्रतिबन्धकमित्येव वक्तव्यम् ।

साध्यवत्ताज्ञानविरोधित्वं वा एतल्लक्षणे निवेशनीयम् ।

न च — आकाशत्वादिना साध्यवत्ताज्ञानविरोधितामादाय दर्शितदोषतादवस्थ्यात्, साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानविरोधित्वपर्यन्तनिवेशे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववत्ताज्ञानस्यापि व्यधिकरणधर्मादिप्रकारकसाध्यवत्ताज्ञानं प्रत्येव विरोधित्वेन साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानाविरोधितया तादृशसाध्याभावाप्रसिद्धिरिति — वाच्यम् । 'घटत्वादिविशिष्टवह्निमान्' इत्यादिज्ञानस्यापि साध्यतावच्छेदकावच्छिन्नप्रकारकताया 'अधिकं तु' इत्यादिन्यायेन अक्षतत्वात् ।

न च तन्मात्रावच्छिन्नप्रकारताकत्वम् अवश्यं निवेश्यम् । अन्यथा आकाशत्वनिरुक्तसाध्यतावच्छेदकोभयत्वरूपेण साध्यज्ञानं प्रति दैशिकविशेषणतया आकाशाभाववत्ताज्ञानस्य विरोधितया तद्दोषतादवस्थ्यमिति कथं व्यधिकरणधर्मावच्छिन्नाभावसंग्रह इति वाच्यम् । प्रतियोगितावच्छेदकमात्रावच्छिन्नप्रकारतानिवेशेऽपि व्यधिकरणधर्मावच्छिन्नाभावासंग्रहात् । तदवच्छिन्नप्रकारतामात्रनिवेशे उक्तस्थले आकाशाभावीयदैशिकविशेषणतावारणासंभवात् । द्वितीयलक्षणे यादृशप्रतियोगितावच्छेदकयादृशप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदकातिरिक्तानवच्छिन्नप्रकारताशालिज्ञानं प्रति येन संबन्धेन स्वप्रकारकज्ञानं विरोधीति विवक्षणवद् एतल्लक्षणे साध्यतावच्छेदकप्रकृतप्रतियोगितावच्छेदकातिरिक्तानवच्छिन्नप्रकारताकज्ञानविरोधितानिवेशेन प्रतीकारसंभवात् । आकाशत्वादेः आकाशाभावाभावत्वादिरूपप्रतियोगितावच्छेदकातिरिक्ततया तदवच्छिन्नप्रकारताकज्ञानविरोधितामादाय दोषाभावात् ।

विवरणम्

अभावनिष्ठहेत्वधिकरणवृत्तित्वे संबन्धविशेषं निवेशयितुं शङ्कते - **अथ अत्रेत्यादिना** [पृ.274] । अत्र लक्षणे हेत्वधिकरणवृत्तित्वं यदि येन केनचित् संबन्धेन तदा 'वह्निमान् धूमात्' इत्यादौ धूमाधिकरणे पर्वते कालिकसंबन्धेन वह्नित्वावच्छिन्नवह्न्यभावस्यापि वृत्तेः तस्यापि लक्षणघटकतया तत्प्रतियोगितावच्छेदकत्वमेव साध्यतावच्छेदके वह्नित्वेऽस्तीति अव्याप्तिः । न च 'काले वृत्तौ देशस्य अवच्छेदकत्वम्' इति न्यायेन पर्वतरूपकाले वह्नित्वेन वह्न्यभावः वह्न्यनधिकरणप्रदेशावच्छेदेनैव कालिकसंबन्धेन वर्तते । तथा च हेत्वधिकरणे निरवच्छिन्नवृत्तिकः अभावः वह्नित्वेन वह्न्यभावः न भवतीति नासौ लक्षणघटक इति वाच्यम् । तथा सत्यपि 'वह्निमान् धूमात्' इत्यादौ अव्याप्तिविरहेऽपि 'सत्तावान् जातेः' इत्यादौ सद्धेतौ हेतोः जातेः अधिकरणे ज्ञाने सत्तात्वेन सत्ताभावः विषयितासंबन्धेन वर्तत इति तमभावमादाय तत्प्रतियोगितावच्छेदकत्वमेव साध्यतावच्छेदके सत्तात्वेऽस्तीति अव्याप्तिः प्रसज्यते । यदि तु एतद्दोषवारणाय हेत्वधिकरणवृत्तितायां स्वरूपसंबन्धावच्छिन्नत्वं निवेश्यते, जात्यधिकरणज्ञानादौ विषयितासंबन्धेन सत्तात्वावच्छिन्नसत्ताभावस्य वृत्तावपि स्वरूपसंबन्धावच्छिन्नवृत्तित्वं नास्ति, स्वरूपसंबन्धावच्छिन्नवृत्तित्वाश्रयः अभावः व्यधिकरणघटत्वादिना सत्ताभाव एव । तत्प्रतियोगितानवच्छेदकत्वं सत्तात्वेऽस्तीति नाव्याप्तिः इत्युच्यते, तदा 'घटत्वाभाववान् मेयत्वात्' इत्यत्र व्यभिचारिणि अतिव्याप्तिः । घटत्वाभावाभाववति घटे मेयत्वसत्त्वात् अयं हेतुः व्यभिचारी । व्यभिचारिणि हेत्वधिकरणवृत्तिसाध्याभावपदेन समानाधिकरणधर्मावच्छिन्नसाध्याभावं गृहीत्वैव अतिव्याप्तिः वारणीया । तत्र घटत्वाभावत्वेन घटत्वाभावाभावः घटत्वात्मकः मेयत्वाधिकरणे घटे समवायसंबन्धेनैव वर्तते, न तु

स्वरूपसंबन्धेन । अतः स्वरूपसंबन्धावच्छिन्नहेत्वधिकरणनिरूपित-वृत्तित्वाश्रयः अभावः समानाधिकरणधर्मावच्छिन्नसाध्यभावः न भवति । किन्तु व्यधिकरणपटत्वादिना घटत्वाभावाभाव एव । तत्प्रतियोगितानवच्छेदकं घटत्वाभावत्वरूपं साध्यतावच्छेदकं भवतीति अतिव्याप्तिः ।

न च 'घटत्वाभाववान् मेयत्वात्' इत्यादौ घटत्वाभावस्य घटत्वप्रकारकप्रमाविशेष्यत्वाभावस्य च समनियतत्वेन अभिन्नतया घटत्वाभावरूपसाध्यनिष्ठप्रतियोगिताकाभावपदेन घटत्वप्रकारक-प्रमाविशेष्यत्वाभावभावोऽपि गृह्यते । स च घटत्वप्रकारक-प्रमाविशेष्यत्वरूपः हेत्वधिकरणे घटे स्वरूपसंबन्धेन वर्तते । तादृशाभावप्रतियोगितायां अवच्छेदकमेव घटत्वाभावत्वरूपं साध्यतावच्छेदकम् इति नातिव्याप्तिरिति वाच्यम् । एवमपि 'कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् आत्म-त्वात्' इत्यत्र अव्याप्तेः । आत्मनि आकाशाभावः स्वरूप-संबन्धेनैव वर्तते, न तु कालिकसंबन्धेन । नित्येषु कालिकायोगात् । अतः कालिकसंबन्धेन आकाशाभावस्य अभावः आत्मन्यस्ति, आत्मत्वं चास्तीति अयं सद्धेतुः । अत्र साध्याभावः आकाशाभाव-निष्ठकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावाभावः आकाशा-भावस्वरूपः । हेत्वधिकरणे आत्मनि स्वरूपसंबन्धेन वर्तमानतया लक्षणघटकः । तादृशाभावप्रतियोगितायां अवच्छेदकमेव कालिक-संबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वरूपं साध्यता-वच्छेदकमिति अव्याप्तिः इति 'अथे'त्यादि 'चेत्' इत्यन्तस्य शङ्काग्रन्थस्यार्थः ।

ननु कालिकादिसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावा-भावाभावस्य आकाशाभावरूपतया आत्मवृत्तित्वस्वीकारे आत्मनि कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावो नास्तीति

प्रतीतिः स्यात् इत्याशङ्क्य कालिकसंबन्धेन आकाशाभावसत्त्वं तादृशप्रतीतिनियामिका । आत्मनि कालिकसंबन्धेन आकाशाभावस्य असत्त्वात् न तादृशप्रतीतिः । तावता तृतीयाभावस्य प्रथमाभावस्वरूपत्वं न अपैति इत्याशयेन समाधत्ते - **कालिकसंबन्धेन आकाशाभावरूपप्रतियोगिसत्तायाः** [पृ.275] इति ।

पूर्वोक्तदोषाणां वारणाय हेत्वधिकरणनिरूपितवृत्तितायां स्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धावच्छिन्नत्वं निवेशनीयम् इत्याह - **स्वीययादृशेत्यादिना** [पृ.275] । स्वपदं लक्षणघटकाभावपरम् । स्वीयेत्यस्य स्वनिरूपितेत्यर्थः । स्वनिरूपितयादृशप्रतियोगिताश्रयवत्ताज्ञानं प्रति यादृशसंबन्धावच्छिन्नस्वनिष्ठप्रकारतानिरूपकज्ञानं प्रतिबन्धकम्, तादृशसंबन्धेन हेत्वधिकरणवृत्तिः यः साध्यनिष्ठप्रतियोगिताकोऽभावः तदीयतादृशप्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः ।

'वह्निमान् धूमात्' इत्यादौ स्वपदेन वह्नित्वेन वह्न्यभावस्य ग्रहणे तदीयवह्निनिष्ठप्रतियोगिताश्रयवत्ताज्ञानं प्रति - 'पर्वतः वह्निमान्' इत्याकारकज्ञानं प्रति - स्वरूपसंबन्धेन वह्न्यभावप्रकारकं ज्ञानमेव प्रतिबन्धकम्, न तु कालिकसंबन्धेन वह्न्यभावप्रकारकं ज्ञानम् । 'पर्वतः कालिकसंबन्धेन वह्न्यभाववान्' इति ज्ञानसत्त्वेऽपि 'पर्वतो वह्निमान्' इति ज्ञानस्य उत्पत्तेः । तथा च स्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धः स्वरूपसंबन्धः । तेन संबन्धेन हेत्वधिकरणवृत्तिः अभावः न वह्नित्वेन वह्न्यभावः । किंतु घटत्वेन वह्न्यभाव एव । तत्प्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदकेऽस्तीति नाव्याप्तिः ।

'सत्तावान् जातेः' इत्यादौ स्वरूपसंबन्ध एव प्रतियोगिमत्ताग्रहविरोधितानियामकः संबन्धः । तेन संबन्धेन हेत्वधिकरण-

वृत्तिः साध्याभावः घटत्वेन सत्ताभावः । तत्प्रतियोगितानवच्छेदकत्वं सत्तात्वेऽस्तीति नाव्याप्तिः ।

'घटत्वाभाववान् मेयत्वात्' इत्यत्र घटत्वात्मकाभावस्य ग्रहणेऽपि तदीयघटत्वाभावनिष्ठप्रतियोगिताश्रयप्रकारकज्ञानं प्रति समवायसंबन्धेन घटत्वप्रकारकज्ञानस्य प्रतिबन्धकतया प्रतियोगिमत्ताग्रहविरोधितानियामकसमवायसंबन्धेन हेत्वधिकरणघटवृत्तिः अभावः घटत्वाभावाभावः । तत्प्रतियोगितावच्छेदकमेव घटत्वाभावत्वरूपं साध्यतावच्छेदकमिति नातिव्याप्तिः ।

'कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् आत्मत्वात्' इत्यत्र समानाधिकरणधर्मावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावस्य स्वपदेन ग्रहणे तदीयसाध्यनिष्ठप्रतियोगिताश्रयप्रकारकज्ञानं प्रति कालिकसंबन्धेन स्वप्रकारकज्ञानस्यैव विरोधितया तेन संबन्धेन साध्याभावस्य हेत्वधिकरणात्मवृत्तित्वविरहात् तस्य लक्षणघटकत्वं न भवति । अतः स्वपदेन व्यधिकरणधर्मावच्छिन्नसाध्याभावं गृहीत्वा तस्य व्यधिकरणधर्मप्रकारेण स्वप्रतियोगिसाध्यवत्ताभ्रमं प्रति स्वरूपसंबन्धेन स्वप्रकारकज्ञानस्य प्रतिबन्धकतया तेन संबन्धेन हेत्वधिकरणवृत्तित्वं वर्तते । तथा च हेत्वधिकरणवृत्तिव्यधिकरणधर्मावच्छिन्नसाध्याभावीयप्रतियोगितायाम् अनवच्छेदकं साध्यतावच्छेदकं भवतीति नाव्याप्तिः ।

'स्वप्रतियोगिप्रकारकज्ञानं प्रति' इत्यनुक्त्वा 'स्वीययादृशप्रतियोगिताश्रयवत्ताज्ञानं प्रति' इति निवेशनस्य प्रयोजनमाह - **सामान्यतः प्रतियोगिप्रकारकज्ञाननिवेशे** [पृ275] इत्यादिना । आकाशाभावरूपस्य साध्याभावस्य प्रतियोगी कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावः आकाशस्वरूपः । 'स्वप्रतियोगिप्रकारकज्ञानं प्रति' इत्युक्तौ आकाशत्वेन रूपेण

आकाशप्रकारकज्ञानमपि आकाशाभावप्रतियोगिप्रकारकं ज्ञानम् । तत् प्रति स्वरूपसंबन्धेन आकाशाभावप्रकारकज्ञानमपि प्रतिबन्धकम् । तेन संबन्धेन आत्मवृत्तिः अभावः आकाशाभावः समानाधिकरणधर्मावच्छिन्नसाध्याभावात्मकः । तत्प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकमिति अव्याप्तिः । अतः स्वप्रतियोगिप्रकारकज्ञानमुपेक्ष्य स्वीययादृशप्रतियोगिताश्रयवत्ताज्ञानं प्रतीत्युक्तम् । तदुक्तौ च यादृशप्रतियोगितापदेन कालिकसंबन्धावच्छिन्नाकाशाभावाभावत्वावच्छिन्नप्रतियोगिताया एव ग्राह्यतया तदाश्रयवत्ताज्ञानं प्रति कालिकसंबन्धेन आकाशाभावप्रकारकज्ञानस्यैव प्रतिबन्धकतया तेन संबन्धेन हेत्वधिकरणवृत्तित्वं समानाधिकरणधर्मावच्छिन्नसाध्याभावे नास्ति इति न तमादाय अव्याप्तिरिति भावः ।

ननु 'यादृशप्रतियोगिता' इति निवेशेऽपि आकाशाभावात्मकसाध्याभावनिरूपितायाः कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वावच्छिन्नायाः प्रतियोगितायाः यादृशप्रतियोगितापदेन ग्रहणेऽपि तदाश्रयप्रकारकज्ञानं - आकाशत्वेन साध्यप्रकारकं ज्ञानं गृहीत्वा तत्प्रति स्वरूपसंबन्धेन आकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकतया तेन संबन्धेन हेत्वधिकरणवृत्ति साध्याभावं गृहीत्वा पुनः अव्याप्तिः इत्याशङ्क्य 'प्रतियोगिताश्रयप्रकारकज्ञानम्' इत्यनेन प्रतियोगिताश्रयनिष्ठतत्प्रतियोगितावच्छेदकधर्मावच्छिन्नप्रकारताशालिज्ञानं विवक्षितम् । यादृशप्रतियोगितापदेन यद्धर्मावच्छिन्नप्रतियोगिता गृह्यते तद्धर्मावच्छिन्नप्रकारताशालिज्ञानमेव प्रतियोगिताश्रयवत्ताज्ञानपदेन ग्राह्यम् । तथा च आकाशाभावीययादृशप्रतियोगितापदेन कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वावच्छिन्नप्रतियोगितायाः ग्रहणे तदाश्रयनिष्ठतादृशधर्मावच्छिन्नप्रकारताशालिज्ञानं प्रति कालिकसंबन्धेन आकाशाभावप्रकारकज्ञानस्यैव प्रतिबन्धकतया तेन

संबन्धेन हेत्वधिकरणवृत्तित्वं समानाधिकरणधर्मावच्छिन्नसाध्याभावे नास्तीति नाव्याप्तिः । आकाशाभावीययादृशप्रतियोगितापदेन आकाशत्वावच्छिन्नप्रतियोगितायाः ग्रहणे तदाश्रयनिष्ठाकाशत्वावच्छिन्नप्रकारताशालिज्ञानं प्रति स्वरूपसंबन्धेन आकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकतया तेन संबन्धेन हेत्वधिकरणवृत्तित्वस्य साध्याभावे सत्त्वेऽपि तदीयतादृशप्रतियोगितायां आकाशत्वमेव अवच्छेदकम् । साध्यतावच्छेदकं कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वं तु अनवच्छेदकमिति नाव्याप्तिरिति भावः । एवञ्च स्वीययादृशप्रतियोगिताश्रयनिष्ठतत्प्रतियोगितावच्छेदकधर्मावच्छिन्नप्रकारताशालिज्ञानं प्रति येन संबन्धेन स्वप्रकारकज्ञानं प्रतिबन्धकम्, तेन संबन्धेन हेत्वधिकरणवृत्तिः यः साध्याभावः तदीयतादृशप्रतियोगितायाम् अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः इति फलितम् ।

अत्र 'यादृशप्रतियोगिताश्रयनिष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानम्' इत्येतस्य स्थाने लाघवात् 'यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानम्' इति निवेशनमुचितम् इत्याशयेन आह - **एवञ्चेति** [पृ.275] । साध्याभावस्य लक्षणघटकत्वात् साध्यवत्ताज्ञानविरोधितानियामकसंबन्धनिवेश एव उचित इत्याशयेन आह - **साध्यवत्ताज्ञानविरोधित्वं वा** [पृ.276] इति । साध्यतावच्छेदकसंबन्धेन साध्यप्रकारकज्ञानं प्रति येन संबन्धेन साध्याभावप्रकारकं ज्ञानं प्रतिबन्धकं तेन संबन्धेन हेत्वधिकरणवृत्तित्वं साध्याभावे निवेशनीयम् । 'वह्निमान् धूमात्' इत्यादौ संयोगसंबन्धेन वह्निप्रकारकज्ञानं प्रति स्वरूपसंबन्धेन वह्न्यभावप्रकारकज्ञानं प्रतिबन्धकमिति तेन संबन्धेन हेत्वधिकरणवृत्तिः साध्याभावः घटत्वादिना वह्न्यभाव एव । **न च आकाशत्वादिना** [पृ.276] इति । 'कालिकसंबन्धावच्छिन्नप्रति-

योगिताकाकाशाभावाभाववान् आत्मत्वात्' इत्यत्र आकाशत्वेन रूपेण साध्यप्रकारकज्ञानं प्रति स्वरूपसंबन्धेन आकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकतया तेन संबन्धेन हेत्वधिकरणात्मवृत्ति आकाशाभावमादाय अव्याप्तिर्भवति । तद्वारणाय साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानविरोधितानियामकसंबन्धेनेति विवक्षणीयम् । तथा च कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वरूपसाध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानं प्रति तादृशसंबन्धेन आकाशाभावप्रकारकज्ञानस्यैव विरोधितया तेन संबन्धेन हेत्वधिकरणवृत्तित्वम् आकाशाभावे नास्तीति व्यधिकरणधर्मावच्छिन्नसाध्याभावमादाय लक्षणसमन्वयः कार्यः । तथापि व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वानुपपत्तिः । घटत्वेन वह्न्यभावप्रकारकज्ञानस्य 'घटत्वेन वह्निमान्' इत्याकारकज्ञानं प्रत्येव प्रतिबन्धकतया वह्नित्वावच्छिन्नप्रकारकज्ञानं प्रति अप्रतिबन्धकतया साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानविरोधितानियामकसंबन्धाप्रसिद्धेः इत्याशङ्का ।

समाधानं तु - 'घटत्वेन वह्निमान्' इति ज्ञानस्य घटत्ववह्नित्वोभयावच्छिन्नप्रकारकतया 'अधिकं तु प्रविष्टं चेत् न तद्धान्यै' इति न्यायेन वह्नित्वावच्छिन्नप्रकारकत्वमप्यस्तीति तादृशज्ञानं प्रति स्वरूपसंबन्धेन घटत्वावच्छिन्नवह्न्यभावप्रकारकज्ञानस्य प्रतिबन्धकतया तेन संबन्धेन हेत्वधिकरणवृत्तित्वं घटत्वेन वह्न्यभावस्य अस्तीति तस्य लक्षणघटकत्वोपपत्तेरिति ।

न च तन्मात्रावच्छिन्नेति [पृ.276] । साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानं प्रतीत्यादिरीत्या निवेशेऽपि आकाशत्व-कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वोभयरूपेण साध्यप्रकारकज्ञानं प्रति स्वरूपसंबन्धेन आकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकतया तेन संबन्धेन आत्मवृत्तिम् आकाशाभाव-

रूपं साध्याभावं गृहीत्वा अव्याप्तिः प्रसज्यते । तद्वारणाय साध्यतावच्छेदकमात्रावच्छिन्नप्रकारताशालिज्ञानं प्रति येन संबन्धेन साध्याभावप्रकारकज्ञानं प्रतिबन्धकं तेन संबन्धेन हेत्वधिकरण-वृत्तित्वं विवक्षणीयम् । अतः आकाशत्वप्रकारकज्ञानव्यवच्छेदः । एवं सति व्यधिकरणधर्मप्रकारेण साध्यप्रकारकज्ञानस्य 'घटत्वेन वह्निमान्' इत्याकारकस्य वह्नित्व-घटत्वोभयावच्छिन्नप्रकारकस्य वह्नित्वमात्रावच्छिन्नप्रकारताकत्वविरहात् तद्घटितविरोधिता-नियामकसंबन्धाप्रसिद्धेः कथं व्यधिकरणधर्मावच्छिन्नाभावसंग्रह इति प्रश्नः ।

समाधानं तु - अयं दोषः प्रतियोगिमत्ताग्रहविरोधिता-नियामकसंबन्धनिवेशपक्षेऽपि वर्तत एव । 'प्रतियोगितावच्छेदका-वच्छिन्नप्रकारताशालिज्ञानं प्रति' इत्यादिरीत्या निवेशे आकाश-त्वप्रतियोगितावच्छेदककालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशा-भावाभावत्वोभयावच्छिन्नप्रकारताशालिज्ञानमादाय अव्याप्ति-वारणाय 'प्रतियोगितावच्छेदकमात्रावच्छिन्नप्रकारताशालिज्ञानं प्रति' इत्यादिरीत्या निवेशे व्यधिकरणधर्मेण प्रतियोगिप्रकारकस्य 'घटत्वेन वह्निमान्' इति ज्ञानस्य प्रतियोगितावच्छेदकघटत्व-मात्रावच्छिन्नप्रकारकत्वविरहात् कथं व्यधिकरणधर्मावच्छिन्नाभाव-सङ्ग्रहः ।

यदि च यादृशप्रतियोगितावच्छेदक-यादृशप्रतियोगितासं-बन्धावच्छिन्नप्रकारतावच्छेदक-एतदुभयातिरिक्तधर्मानवच्छिन्नप्रका-रताशालिज्ञानं प्रति येन संबन्धेन स्वप्रकारकज्ञानं प्रतिबन्धकम्, तेन संबन्धेन हेत्वधिकरणवृत्तित्वं द्वितीयलक्षणे प्रतियोगिमत्ताग्रह-विरोधितानियामकसंबन्धस्य परिष्कारो विवक्षितः । 'घटत्वेन वह्निः नास्ति' इति प्रतीतौ घटत्वं प्रतियोगितावच्छेदकतया वह्नित्वं प्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदकतया भासते ।

नञर्थाभावे वह्नेः प्रतियोगितासंबन्धेन प्रकारत्वात् प्रतियोगितासंबन्धावच्छिन्नप्रकारता वह्निनिष्ठा । वह्नित्वं तादृशप्रकारतावच्छेदकम् । 'घटत्वेन वह्निमान्' इति बुद्धौ घटत्व-वह्नित्वाभ्यां वह्निः प्रकारः । न तु तदतिरिक्तरूपेण । अतः 'घटत्वेन वह्निमान्' इति बुद्धेः प्रतियोगितावच्छेदकघटत्वप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदकवह्नित्व-एतदुभयातिरिक्तधर्मानवच्छिन्नप्रकारताशालित्वं वर्तते । तादृशज्ञानं प्रति स्वरूपसंबन्धेन घटत्वावच्छिन्नवह्न्यभावप्रकारकज्ञानस्य प्रतिबन्धकतया तेन स्वरूपसंबन्धेन हेत्वधिकरणवृत्ति घटत्वेन वह्न्यभावमादाय लक्षणसमन्वयः । अतः प्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धनिवेशे न दोष इत्यालोच्यते, तदा एतल्लक्षणे साध्यवत्ताग्रहविरोधितानियामकसंबन्धस्यापि उक्तरीत्या परिष्कृत्य निवेशसंभवात् न दोषः । तथा हि—

साध्यतावच्छेदक - प्रकृतप्रतियोगितावच्छेदक-उभयातिरिक्तधर्मानवच्छिन्नप्रकारताशालिज्ञानं प्रति येन संबन्धेन साध्याभावप्रकारकज्ञानं विरोधि, तेन संबन्धेन हेत्वधिकरणवृत्तित्वं निवेश्यते । 'घटत्वेन वह्निमान्' इति प्रतिबध्यबुद्धेः साध्यतावच्छेदकवह्नित्व - प्रकृतप्रतियोगितावच्छेदकघटत्व-एतदुभयातिरिक्तधर्मानवच्छिन्नप्रकारताशालितया तादृशबुद्धिं प्रति स्वरूपसंबन्धेन घटत्वेन वह्न्यभावप्रकारकज्ञानस्य प्रतिबन्धकतया तेन संबन्धेन हेत्वधिकरणवृत्तित्वात् व्यधिकरणधर्मावच्छिन्नाभावस्य संग्रहः । 'कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् आत्मत्वात्' इत्यत्र आकाशाभावरूपस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य प्रतियोगितावच्छेदकं कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वम् । साध्यतावच्छेदकमपि तदेव । तदतिरिक्तधर्मः आकाशत्वम् । तदनवच्छिन्नप्रकारताकत्वं आकाशत्व - कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्व-उभयरूपेण साध्यप्रकारकज्ञानस्य नास्तीति तादृशज्ञानं प्रति

स्वरूपसंबन्धेन आकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकत्वमादाय प्रसक्ताया अव्याप्तेरपि नावकाश इति ।

गादाधरी

४१. साध्याभावपदप्रयोजनम्

हेतुसमानाधिकरणस्य व्याप्यवृत्तेः वह्नित्वादिना घटाद्यभावस्य प्रतियोगितावच्छेदकमेव वह्नित्वादिरूपं साध्यतावच्छेदकम्, अतः **साध्याभावस्येति** [पृ.259] ।

यद्यपि वह्नित्वेन घटाभावादेः घटत्वेन वह्न्यभावाद्यभिन्नतया तादृशाभावोऽपि साध्याभाव एव, **तथापि** प्रतियोगितावच्छेदकभेदेन अभावभेदमतेन इदं लक्षणम् । समनियताभावानामैक्याभिप्रायेण चाग्रिमलक्षणम् ।

अथ वा हेतुसमानाधिकरणाभावीयसाध्यनिष्ठप्रतियोगितानवच्छेदकत्वनिवेशान्न दोषः । वह्नित्वादिना घटाद्यभावस्य घटत्वादिना वह्न्याद्यभावाभिन्नत्वेऽपि तदीयघटादिनिष्ठप्रतियोगिताया एव व्यधिकरणवह्नित्वाद्यवच्छिन्नत्वेन वह्न्यादिनिष्ठप्रतियोगितायां वह्नित्वादेरनवच्छेदकत्वात् ।

विवरणम्

अभावे साध्यनिष्ठप्रतियोगिताकत्वनिवेशस्य प्रयोजनमाह - **हेतुसमानाधिकरणस्य** [पृ.286] इत्यादिना । हेतुसमानाधिकरणस्य व्याप्यवृत्तेः अभावस्य प्रतियोगितायामनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः इत्युक्तौ 'वह्निमान् धूमात्' इत्यादौ हेतुसमानाधिकरणः व्याप्यवृत्तिः अभावः वह्नित्वेन घटाभावोऽपि । तत्प्रतियोगितावच्छेदकमेव वह्नित्वमिति अव्याप्तिः । तद्वारणाय अभावे साध्यनिष्ठप्रतियोगिताकत्वनिवेशः । वह्नित्वेन घटाभावस्य घटनिष्ठप्रतियोगिता-

कस्य साध्यवह्निनिष्ठप्रतियोगिताकत्वविरहेण न लक्षणघटकत्वम् । किन्तु घटत्वेन वह्न्यभाव एव साध्यनिष्ठप्रतियोगिताकत्वात् लक्षणघटकः । तत्प्रतियोगितानवच्छेदकत्वं वह्नित्वेऽस्तीति नाव्याप्तिः ।

यद्यपीत्यादि [पृ.286] । साध्यनिष्ठप्रतियोगिताकाभावनिवेशेऽपि वह्नित्वेन घटाभावस्य वारणमशक्यम् । वह्नित्वेन घटाभावस्य घटत्वेन वह्न्यभावस्य च समनियतत्वेन अभिन्नतया यथा घटत्वेन वह्न्यभावस्य वह्निनिष्ठप्रतियोगिताकत्वं तथा तदभिन्नस्य वह्नित्वेन घटाभावस्यापि वह्निनिष्ठप्रतियोगिताकत्वमस्ति । तथा च वह्नित्वेन घटाभावमादाय अव्याप्तितादवस्थ्यम् । **तथापीति** [पृ.286] । समनियताभावानाम् ऐक्यवादिभिः प्रतियोगितावच्छेदकैक्ये एव ऐक्यं स्वीक्रियते ! प्रतियोगितावच्छेदकभेदे तु समनियताभावानाम् ऐक्यं न स्वीक्रियते । वह्नित्वेन घटाभावघटत्वेन वह्न्यभावयोः समनियतत्वेऽपि प्रतियोगितावच्छेदकभेदात् भेद एव । अतः वह्नित्वेन घटाभावस्य साध्यनिष्ठप्रतियोगिताकत्वविरहात् न तमादाय अव्याप्तिरिति भावः ।

प्रतियोगितावच्छेदकभेदेऽपि ऐक्यस्वीकारे तु आह - **अथ वा** [पृ.286] इत्यादिना । अभावे साध्यनिष्ठप्रतियोगिताकत्वमनिवेश्य अभावीयप्रतियोगितायां साध्यनिष्ठत्वं निवेश्यते । तथा च हेतुसमानाधिकरणव्याप्यवृत्त्यभावीयसाध्यनिष्ठप्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकमिति लक्षणे निवेश्यते । वह्नित्वेन घटाभावस्य घटत्वेन वह्न्यभावस्य च अभिन्नत्वेऽपि तदीयप्रतियोगिताभिन्ना । वह्नित्वं घटनिष्ठप्रतियोगितायामेव अवच्छेदकम् । साध्यनिष्ठप्रतियोगितायां तु घटत्वमेव अवच्छेदकम् । वह्नित्वं तु साध्यनिष्ठप्रतियोगितायां नावच्छेदकमिति नाव्याप्तिरिति भावः ।

गादाधरी

[४२] प्रतियोगितायां संबन्धविशेषनिवेशः

प्रतियोगिता साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेन निवेशनीया। तेन संबन्धान्तरावच्छिन्नप्रतियोगिताकसाध्याभावमादाय नासंभवः। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अपि संबन्धावच्छिन्नत्वं व्यवस्थापितमेव।

विवरणम्

प्रतियोगिता साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेनेति [पृ.288]। 'वह्निमान् धूमात्' इत्यादौ हेत्वधिकरणपर्वतादौ समवायसंबन्धेन वह्नित्वावच्छिन्नवह्न्यभावस्य वर्तमानतया तत्प्रतियोगितावच्छेदकमेव वह्नित्वमित्यव्याप्तिः। तद्वारणाय प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। तथा सति संयोगसंबन्धेन घटत्वेन वह्न्यभावस्यैव लक्षणघटकतया तदीयसंयोगसंबन्धावच्छिन्नप्रतियोगितायां अनवच्छेदकं वह्नित्वं भवतीति नाव्याप्तिः।

गादाधरी

[४३] प्रतियोगितावच्छेदकतायां संबन्धविशेषनिवेशः

प्रतियोगितावच्छेदकत्वं च साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नं ग्राह्यम्। तेन 'गुणवान् द्रव्यत्वात्' इत्यादौ हेतुसमानाधिकरणस्य विषयितया गुणत्वादिमतः समवायेन अभावस्य या ज्ञानादिनिष्ठप्रतियोगिता तदवच्छेदकत्वेऽपि साध्यतावच्छेदकस्य न क्षतिः।

विवरणम्

प्रतियोगितावच्छेदकत्वं चेति [पृ.288]। 'प्रतियोगितानवच्छेदकम्' इत्यत्र प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। अन्यथा 'गुणवान् द्रव्य-

त्वात्' इत्यादौ हेत्वधिकरणे घटादौ वर्तते यः विषयितासंबन्धेन गुणत्ववतः ज्ञानस्य समवायसंबन्धेन अभावः तत्प्रतियोगितायां साध्यतावच्छेदकस्य गुणत्वस्य विषयितासंबन्धेन अवच्छेदकत्वमेव अस्ति इति अव्याप्तिः । साध्यतावच्छेदकसंबन्धनिवेशे तु तादृश-समवायसंबन्धेन अवच्छेदकत्वविरहात् नाव्याप्तिरिति भावः ।

एवं च हेत्वधिकरणनिरूपिता या निरवच्छिन्ना साध्यता-वच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदक - प्रकृतप्रतियोगिता-वच्छेदकोभयातिरिक्तधर्मानवच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्न-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसंब-न्धावच्छिन्नाधेयता तद्वान् यः अभावः तदीयसाध्यतावच्छेदक-संबन्धावच्छिन्न - साध्यनिष्ठप्रतियोगितानिरूपितसाध्यतावच्छेदक-तावच्छेदकसंबन्धावच्छिन्नावच्छेदकताशून्यं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति प्रथमलक्षणनिष्कर्षः ।

गादाधरी

[४४] चक्रवर्तिद्वितीयलक्षणावतरणं तत्प्रपञ्चश्च

सर्वत्र द्वित्वावच्छिन्नप्रतियोगिताकसाध्याभावमादायैव एतल्लक्षणसमन्वयसंभवात् व्यधिकरणधर्मावच्छिन्नाभावानभ्युपग-मेऽपि क्षतिविरहेण व्यधिकरणधर्मावच्छिन्नाभावखण्डनं मूल-कृतोऽकिंचित्करम् । अतो लक्षणान्तरमाह - **हेतुसमानाधिकरण-स्येति** [पृ.259] ।

अत्र च व्यधिकरणधर्मावच्छिन्नाभावस्य अप्रामाणिकत्वे व्यधि-करणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमादाय अव्याप्ते-र्वारणाय उपात्तस्य 'सामानाधिकरण्येन' इत्यस्य वैयर्थ्यात् लक्षणा-सामञ्जस्यमिति तादृशाभावखण्डनं संगच्छते ।

अत्रापि हेतुसमानाधिकरणस्य व्याप्यवृत्तेरित्यस्य पूर्वोक्त एव पर्यवसितार्थः, व्यावृत्यादिकमपि पूर्वोक्तमेव ।

विवरणम्

चक्रवर्तिद्वितीयलक्षणमवतारयति - **सर्वत्रेति** [पृ.289] । सर्वत्र सद्धेतौ व्यधिकरणधर्मावच्छिन्नाभावानङ्गीकारेऽपि समानाधिकरणधर्मावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावमादायैव प्रथमलक्षणसमन्वयः संभवति । तथा हि—'वह्निमान् धूमात्', 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ व्याप्यवृत्तिः हेतुसमानाधिकरणश्च साध्यनिष्ठप्रतियोगिताकाभावः वह्निघटोभयाभावः वाच्यत्वघटोभयाभावश्च । तत्प्रतियोगितावच्छेदकं उभयत्वम्; अनवच्छेदकं वह्नित्वं वाच्यत्वत्वं चेति । तथा च व्यधिकरणधर्मावच्छिन्नाभावखण्डनं मणिकृतां नोपयोगि इत्यतः द्वितीयलक्षणमाह इत्यर्थः ।

व्याप्यवृत्तेः हेतुसमानाधिकरणस्य अभावस्य प्रतियोगितायां सामानाधिकरण्येन अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः ।

अत्र अभावे साध्यनिष्ठप्रतियोगिताकत्वं न निवेशितम् । 'सामानाधिकरण्येन' इति विशेषणमधिकं संयोजितमिति प्रथमलक्षणापेक्षया विशेषः ।

'वन्हिमान् धूमात्' इत्यादौ व्याप्यवृत्तिः हेत्वधिकरणवृत्तिश्च अभावः वह्नित्वेन घटाभावः तदीयप्रतियोगितायां वह्नित्वस्य अवच्छेदकत्वात् अव्याप्तिः स्यात् । तद्वारणाय 'सामानाधिकरण्येन' इत्युक्तम् । वह्नित्वस्य वह्नित्वेन घटाभावीयप्रतियोगितायां व्यधिकरणतया अवच्छेदकत्वेऽपि सामानाधिकरण्येन अवच्छेदकत्वविरहात् अनवच्छेदकत्वमस्तीति नाव्याप्तिः ।

एवञ्च व्यधिकरणधर्मावच्छिन्नाभावमादाय अव्याप्तेः वारणाय उपात्तस्य 'सामानाधिकरण्येन' इत्यस्य व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे वैयर्थ्यं स्यादिति तम् अभावमवलम्ब्य प्रवृत्तस्य

लक्षणस्य दूषणार्थं व्यधिकरणधर्मावच्छिन्नाभावखण्डनं संगच्छते। तदाह - **अत्र चेत्यादिना** [पृ.289]।

गादाधरी

[४५] चक्रवर्तितृतीयलक्षणावतरणम् तत्प्रपञ्चश्च

'कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् आत्मत्वात्' इत्यादौ अव्याप्तिवारणाय पूर्वोक्तरीत्यनुसरणे गौरवात् व्याप्यवृत्तित्वं परित्यज्य प्रतियोगिव्यधिकरणत्वेन अभावं विशेषयति—**प्रतियोगिव्यधिकरणस्य वेति**। **पूर्वोक्तलक्षणे** साध्याभावस्य विशिष्योपादानात् तस्य च हेत्वधिकरणे साध्यरूप-प्रतियोगिसामानाधिकरण्यमावश्यकमेव एकव्यक्तिसाध्यके। अतः तत्र प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्ध्या अव्याप्तिरिति तन्नोक्तम्।

विवरणम्

तृतीयलक्षणमवतारयति - **कालिकसंबन्धावच्छिन्नेत्यादिना** [पृ.291]। 'कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावा-भाववान्, आत्मत्वात्' इत्यत्र आकाशाभावात्मकं साध्याभावमा-दाय प्रसक्तायाः अव्याप्तेः वारणाय व्याप्यवृत्तित्वघटितलक्षणे यादृशप्रतियोगितावच्छेदक - यादृशप्रतियोगितासंबन्धावच्छिन्न-प्रकारतावच्छेदक - उभयातिरिक्तधर्मानवच्छिन्नप्रकारताशालिज्ञानं प्रति येन संबन्धेन स्वप्रकारकज्ञानं विरोधि, तेन संबन्धेन हेत्वधि-करणवृत्तित्वमिति पूर्वोक्तरीत्यनुसरणे गौरवं भवतीत्यालोच्य व्याप्यवृत्तित्वविशेषणं परित्यज्य तत्स्थाने प्रतियोगिव्यधिकरणत्वं निवेश्य तृतीयलक्षणमाह इत्यर्थः। तथा च—

> 'हेतुसमानाधिकरणस्य प्रतियोगिव्यधिकरणस्य अभावस्य प्रतियोगितायाः सामानाधिकरण्येन अनवच्छेदकं यत् साध्य-तावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः'

इति तृतीयलक्षणम्

अत्रापि 'वह्निमान् धूमात्' इत्यादौ प्रतियोगिव्यधिकरणः हेतुसमानाधिकरणश्च अभाव इत्यनेन वह्नित्वेन घटाभावं गृहीत्वा तदीयप्रतियोगितायां सामानाधिकरण्येन अनवच्छेदकत्वं वह्नित्वेऽस्तीति लक्षणसमन्वयः।

'सामानाधिकरण्येन' इत्यस्य सार्थक्याय व्यधिकरणधर्मावच्छिन्नाभावस्य अङ्गीकरणीयतया तत्खण्डनपरग्रन्थोऽपि संगच्छते। 'कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् आत्मत्वात्' इत्यत्र आकाशाभावरूपस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य प्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणत्वविरहात् न तमादाय अव्याप्तिः। व्यधिकरणधर्मावच्छिन्नाभावमादाय समन्वयः कार्यः। यथा च व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्यं तथा पश्चादुपपादयिष्यते।

प्रथमलक्षणे प्रतियोगिव्यधिकरणत्वं व्याप्यवृत्तित्वस्थाने कुतो न निवेशितम् इत्याशङ्क्याह—**पूर्वोक्तलक्षणे** [पृ.291] इति। प्रथमलक्षणे साध्यनिष्ठप्रतियोगिताकोऽभावो निवेशितः। तस्य एकव्यक्तिसाध्यकसद्धेतौ हेत्वधिकरणे प्रतियोगिवैयधिकरण्यं दुर्घटम्। 'एतद्रूपवान् एतद्रसात्' इत्यादौ साध्यनिष्ठप्रतियोगिताकोऽभावः घटत्वेन एतद्रूपाभावः। तस्य हेत्वधिकरणे एतद्घटे एतद्रूपात्मकप्रतियोगिसामानाधिकरण्यसत्त्वात्। अतः तत्र प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्ध्या अव्याप्तिरिति प्रथमलक्षणे प्रतियोगिवैयधिकरण्यं न निवेशितम्।

नानाव्यक्तिसाध्यके 'वह्निमान् धूमात्' इत्यादौ साध्यनिष्ठप्रतियोगिताकस्य महानसीयवह्न्यभावस्य हेत्वधिकरणपर्वतान्तर्भावेण प्रतियोगिवैयधिकरण्यसत्त्वात् प्रथमलक्षणे प्रतियोगिवैयधिकरण्यनिवेशेऽपि प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धिरूपो दोषो न प्रसजति इति आलोच्य एकव्यक्तिसाध्यके इत्युक्तम्।

गादाधरी

[४६] प्रतियोगिव्यधिकरणत्वपरिष्कारः

प्रतियोगिव्यधिकरणत्वं च न प्रतियोग्यधिकरणावृत्तित्वम् । 'संयोगी सत्त्वाद्' इत्यादौ संयोगाद्यभावस्य अतथात्वात् तादृशाभावान्तरमादाय अतिव्याप्तेः । किंतु प्रतियोग्यनधिकरणवृत्तित्वम् । एवञ्च प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तेरिति दलद्वयपर्यवसितार्थः ।

प्रतियोग्यनधिकरणत्वं च साध्यतावच्छेदकसंबन्धेन प्रतियोग्यधिकणभिन्नत्वम् । अतः समवायेन ज्ञानादिसाध्यकद्रव्यत्वादिहेतौ नातिव्यप्तिः । **इत्थं च** प्रतियोगिता न संबन्धविशेषावच्छिन्नत्वेन विशेषणीया ।

विशेषणताविशेषेण अभावसाध्यके सर्वस्यैव अभावस्य तेन संबन्धेन किंचिद्विशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः । अतः 'यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमतः तादृशप्रतियोगितायाः सामानाधिकरण्येन अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यम्' इति **सिद्धान्तलक्षणे** वक्ष्यमाणरीत्या निष्कर्षणीयम् ।

विवरणम्

प्रतियोगिव्यधिकरणत्वं परिष्करोति-**प्रतियोगिव्यधिकरणत्वं चेत्यादिना** [पृ.293] । प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यधिकरणावृत्तित्वम्, तदा 'संयोगी सत्त्वात्' इत्यत्र व्यभिचारिणि अतिव्याप्तिः । हेत्वधिकरणगुणवृत्तेः संयोगत्वेन संयोगाभावस्य संयोगाधिकरणद्रव्यवृत्तितया प्रतियोग्यधिकरणावृत्तित्वं नास्तीति तस्य लक्षणाघटकतया घटाद्यभावमादाय तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके संयोगत्वे सत्त्वात् अतिव्याप्तिः स्यात् । अतः प्रतियोग्यनधिकरणवृत्तित्वमेव प्रतियोगिव्यधि-

करणत्वम् । संयोगत्वेन संयोगाभावस्य संयोगानधिकरणगुणवृत्तितया प्रतियोगिव्यधिकरणत्वमस्तीति तस्य लक्षणघटकतया 'संयोगी सत्त्वात्' इत्यत्र नातिव्याप्तिः । परं तु 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य प्रतियोग्यनधिकरणगुणवृत्तितया हेत्वधिकरणवृक्षवृत्तितया च तमादाय अव्याप्तिः स्यात् । तद्वारणाय प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तेः इति दलद्वयपर्यवसितार्थः वक्तव्यः । तत्र प्रतियोग्यनधिकरणत्वं प्रतियोगिनिष्ठाधेयतानिरूपिताधिकरणतावद्भिन्नत्वम् । प्रतियोगिनिष्ठाधेयतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा 'समवायेन ज्ञानवान् द्रव्यत्वात्' इत्यत्र अतिव्याप्तिः । हेत्वधिकरणघटादिवृत्तेः ज्ञानाभावस्य विषयतासंबन्धेन ज्ञानाधिकरणघटवृत्तितया प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वविरहात् अभावान्तरमादाय अतिव्याप्त्यापत्तेः । साध्यतावच्छेदकसंबन्धनिवेशे तु साध्यतावच्छेदकेन समवायेन ज्ञानस्य अनधिकरणं यद्घटादि तद्वृत्तितया ज्ञानाभावस्यापि लक्षणघटकत्वात् नातिव्याप्तिः ।।

ननु प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वमेव निवेश्यताम् । उपस्थितत्वात् । किं साध्यतावच्छेदकसंबन्धेन तन्निवेशनम् इत्यत आह - **इत्थं चेति** [पृ॰293] । 'वह्निमान् धूमात्' इत्यादौ समवायसंबन्धेन वह्न्यभावस्य प्रतियोगितावच्छेदकसमवायसंबन्धेन वह्न्यनधिकरणं यत् हेत्वधिकरणं पर्वतादि तद्वृत्तितया लक्षणघटकत्वेन तदीयसमवायसंबन्धावच्छिन्नप्रतियोगितायाम् अवच्छेदकमेव साध्यतावच्छेदकं वह्नित्वं भवतीति अव्याप्तिः स्यात् । तद्वारणाय हेत्वधिकरणवृत्त्यभावीयप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयमिति स्थलद्वये संबन्धनिवेशेन गौरवम् । प्रतियोगिवैयधिकरण्यशरीरे साध्यतावच्छेदकसंबन्धनिवेशे तु समवायेन वह्न्यभावस्य संयोगसंबन्धेन-

वह्न्यधिकरणपर्वतवृत्तितया साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वं नास्तीति संबन्धान्तरावच्छिन्नाभावस्य लक्षणाघटकतया तमादाय अव्याप्त्यप्रसक्तेः प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं न निवेशनीयमिति लाघवम्। अतः प्रतियोगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदकसंबन्धमनिवेश्य साध्यतावच्छेदकसंबन्धनिवेशनमिति भावः।

ननु साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वनिवेशेऽपि स्वरूपसंबन्धेन अभावसाध्यकस्थले 'ह्रदः धूमाभाववान् वह्न्यभावात्' इत्यादि सद्धेतौ हेतुसमानाधिकरणस्य सर्वस्यैव अभावस्य स्वरूपसंबन्धेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोग्यधिकरणं यत् हेत्वधिकरणं तद्वृत्तितया स्वरूपसंबन्धेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तेः अभावस्य अप्रसिद्ध्या अव्याप्तिः इत्याशङ्क्य **सिद्धान्तलक्षणे** वक्ष्यमाणरीत्या निष्कर्षः कार्य इत्याह-**विशेषणताविशेषेणेत्यादिना** [पृ.293]। तथा च साध्यतावच्छेदकसंबन्धेन यादृशप्रतियोगिताश्रयाधिकरणभिन्नत्वं हेतुमतः तादृशप्रतियोगितायां सामानाधिकरण्येन अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति निष्कर्षः।

यादृशप्रतियोगितापदेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठप्रतियोगितायाः ग्रहणे तदाश्रयाधिकरणत्वमेव हेत्वधिकरणस्य अस्तीति सा न ग्राह्या। किन्तु घटादिनिष्ठा प्रतियोगिता ग्राह्या। स्वरूपसंबन्धेन तदाश्रयानधिकरणत्वं हेत्वधिकरणस्य अस्ति। तादृशप्रतियोगितायाम् अनवच्छेदकं साध्यतावच्छेदकं भवतीति नाव्याप्तिरिति भावः।

गादाधरी

(४७) सामानाधिकरण्येनेत्यस्य वैयर्थ्यशङ्का

अथ '**विशिष्टसत्तावान् जातेः**' इत्यत्र अतिव्याप्तेर्वारणाय 'यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं हेतुमतः' इत्यस्यैव

वाच्यतया 'वह्निमान् धूमात्' इत्यादौ वह्नित्वादिना घटाद्यभावीयप्रतियोगितायाः लक्षणघटकत्वासंभवः । तदवच्छेदकवह्नित्वावच्छिन्नानधिकरणत्वस्य हेतुमत्यसत्त्वात् । तथा च 'सामानाधिकरण्येन' इत्यनर्थकम् ।

विवरणम्

अस्मिन् लक्षणे 'समानाधिकरण्येन' इत्यस्य वैयर्थ्यमाशङ्कते- **अथ विशिष्टसत्तावान् जातेरित्यादिना** [पृ.295] । यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमतः तादृशप्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकम् इति विवक्षणेऽपि 'गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः' इत्यत्र अतिव्याप्तिः । यादृशप्रतियोगितापदेन गुणकर्मान्यत्वविशिष्टसत्ताभावीयप्रतियोगितामादाय अतिव्याप्तिर्वारणीया । परन्तु तादृशप्रतियोगिताश्रयसत्तायाः अधिकरणमेव हेत्वधिकरणं गुणः भवति इति यादृशप्रतियोगितापदेन घटाद्यभावीयप्रतियोगितैव ग्राह्या । तादृशप्रतियोगितानवच्छेदकत्वं विशिष्टसत्तात्वरूपे साध्यतावच्छेदकेऽस्तीति अतिव्याप्तिः। तद्वारणाय यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं हेतुमतः तादृशप्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकम् इति विवक्षणीयम् । तथा सति यादृशप्रतियोगितापदेन विशिष्टसत्ताभावीयप्रतियोगितापि ग्रहीतुं शक्या । तत्प्रतियोगितावच्छेदकविशिष्टसत्तात्वावच्छिन्नानधिकरणत्वस्य हेतुमति गुणे सत्त्वात् तादृशप्रतियोगितायाम् अवच्छेदकमेव विशिष्टसत्तात्वमिति नातिव्याप्तिः ।

एवं विवक्षणे 'सामानाधिकरण्येन' इत्यस्य वैयर्थ्यम् । 'वह्निमान् धूमात्' इत्यादौ वह्नित्वेन घटाभावमादाय तदीयप्रतियोगितायां व्यधिकरणतया अवच्छेदकत्वमेव वह्नित्वस्य अस्तीति प्रसक्तायाः अव्याप्तेः वारणाय हि 'सामानाधिकरण्येन' इत्युपात्तम् । उक्तविवक्षायां तु यादृशप्रतियोगितापदेन वह्नित्वेन घटाभावीयप्रतियोगिता ग्रहीतुं न शक्यते । तत्प्रतियोगितावच्छेदकवह्नित्वा-

वच्छिन्नाधिकरणत्वस्यैव हेतुमति सत्त्वात् ।, तदवच्छिन्नानधिकरणत्वस्य असत्त्वात् । किन्तु घटत्वावच्छिन्नघटाद्यभावीयप्रतियोगितैव यादृशप्रतियोगितापदेन ग्राह्या । तादृशप्रतियोगितायाम् अनवच्छेदकत्वस्य वह्नित्वे सत्त्वात् अव्याप्त्यप्रसक्तेः सामानाधिकरण्येनेति व्यर्थमित्याक्षेपः ।

गादाधरी

[४८] केषांचिन्मतेन सामानाधिकरण्यदलसार्थक्यम्

अत्र केचित् - यादृशप्रतियोगितावच्छेदकविशिष्टयादृशप्रतियोगिताश्रयोभयानधिकरणत्वं हेतुमत इत्येव तत्सार्थक्यार्थं विवक्षणीयम् । दर्शिताभावीयप्रतियोगितावच्छेदकवह्नित्वादिविशिष्टस्य हेतुमति सत्त्वेऽपि तादृशप्रतियोगिताश्रयघटादेरसत्त्वात् उभयानधिकरणत्वं हेतुमतोऽक्षतमेवेति तादृशप्रतियोगितावच्छेदकत्वमादाय दोषवारकतया सामानाधिकरण्येनेत्यस्य सार्थकता ।

न च वह्नित्वेन घटाद्यभावप्रतियोगिता यावद्वह्निभिन्नवृत्तिरेकैव स्वीक्रियते । न तु घटादिरूपप्रतियोगिभेदेन भिन्ना । अभावस्य प्रतियोगितावच्छेदकस्य च ऐक्यात् । तथा च घटादिनिष्ठप्रतियोगिताश्रयसाधनादेरेव साधनवति सत्त्वात् तादृशप्रतियोगिताश्रयानधिकरणत्वं न तत्रेति न सामानाधिकरण्येनेत्यस्य सार्थकतासंभवः। प्रतियोगिभेदे प्रतियोगिताभेदे तु महानसीयवह्न्यादिनिष्ठायाः वह्न्यादिसामान्याभावीयप्रतियोगितायाः पर्वतीयवह्न्याद्यवृत्तितया तादृशप्रतियोगिताश्रयानधिकरणत्वस्य हेतुमति पर्वतादौ सत्त्वात् वह्नित्वादेः तदवच्छेदकत्वमादाय अव्याप्तिरिति - वाच्यम् ।

यतः प्रतियोगिभेदेन न प्रतियोगिताभेदः । अपि तु अवच्छेदकभेदेनैव। एवमपि 'वह्निभिन्नवान् घटात्' इत्यादौ वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगिताया वह्निभिन्नेऽसंभाविततया तदाश्रया-

नधिकरणत्वस्य वह्निशून्ये हेतुमति अक्षततया तादृशप्रतियोगितावच्छेदकत्वमादाय अव्याप्तेः वारकतया सामानाधिकरण्येनेत्यस्य सार्थक्यम् । 'महाकालो घटवान्, कालपरिमाणात्' इत्यादौ महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितैव तादृशी । महाकालस्य तदवच्छेदकमहाकालान्यत्वविशिष्टघटत्वाद्यवच्छिन्नाधिकरणताशून्यत्वात् ।

अथ वा वक्ष्यमाणरीत्या साध्यतावच्छेदकसंबन्धसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्व - यादृशप्रतियोगिताश्रयप्रतियोगिकत्व - हेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्व - एतत्त्रित्वावच्छिन्नाभावः तदनवच्छेदकत्वमेव वाच्यम् । एवञ्च तत्र अवृत्तिगगनाद्यभावप्रतियोगितैव तादृशी । एवं च वह्नित्वादिना घटाद्यभावप्रतियोगिता तादृशी । वह्नित्वविशिष्टप्रतियोगिकत्वतदाश्रयवह्निभिन्नप्रतियोगिकत्वयोः एकस्मिन् संबन्धेऽसत्त्वेन तादृशप्रतियोगिताया अपि तथात्वात् तद्वारकतयापि सामानाधिकरण्येनेत्यस्य सफलत्वमवसेयमित्याहुः ।

विवरणम्

अत्र केषांचिन्मतेन सामानाधिकरण्यपदस्य सार्थक्यमुपपादयति - यादृशप्रतियोगितावच्छेदकविशिष्टयादृशप्रतियोगिताश्रय - उभयानधिकरणत्वं हेतुमतः तादृशप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके निवेशनीयम् । यादृशप्रतियोगितापदेन वह्नित्वेन घटाभावीयप्रतियोगितायाः ग्रहणे तादृशप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नस्य हेत्वधिकरणे पर्वतादौ सत्त्वेऽपि यादृशप्रतियोगिताश्रयस्य घटस्य असत्त्वेन उभयानधिकरणत्वं हेतुमतः अस्तीति तादृशवह्नित्वेन घटाभावीयप्रतियोगितायाम् अवच्छेदकत्वात् वह्नित्वस्य अनवच्छेदकत्वं नास्तीति अव्याप्तेः वारणाय 'सामानाधिकरण्येन' इति विशेषणम् । तद्विशेषणे दत्ते वह्नित्वेन

घटाभावीयप्रतियोगितायां वह्नित्वस्य व्यधिकरणतया अवच्छेदकत्वेन सामानाधिकरण्येन अनवच्छेदकत्वमस्तीति नाव्याप्तिः ।

अत्र यादृशप्रतियोगितावच्छेदकविशिष्टाधिकरणत्वयादृशप्रतियोगिताश्रयाधिकरणत्व - उभयाभाववत्त्वं हेतुमतः तादृशप्रतियोगितानवच्छेदकं इति विवक्षणीयम् । यथाश्रुते 'विशिष्टसत्तावान् जातेः' इत्यत्र अतिव्याप्तेरिति भावः ।

न च वह्नित्वेनेति [पृ.297] । वह्नित्वेन घटाभावस्य वह्नित्वेन धूमाद्यभावस्य च समनियतत्वेन अभिन्नतया ऐक्येन अवच्छेदकैक्येन च यावद्वह्निभिन्नवृत्तिः वह्नित्वेन घटाभावीया एकैव प्रतियोगिता स्वीक्रियते । घटधूमादिरूपप्रतियोगिभेदेन प्रतियोगिताभेदः न स्वीक्रियते । अवच्छेदकैक्ये अभावैक्ये प्रतियोगितायाः ऐक्यमिति सिद्धान्तात् । तथा च वह्नित्वेन घटाभावीयप्रतियोगिताश्रयः धूमोऽपि । तदधिकरणत्वं हेत्वधिकरणस्य वर्तते । एवं प्रतियोगितावच्छेदकवह्नित्वावच्छिन्नाधिकरणत्वं च वर्तते । न तु उभयाभाववत्त्वमिति यादृशप्रतियोगितापदेन वह्नित्वेन घटाभावीयप्रतियोगितायाः ग्रहीतुमशक्यतया तामादाय अव्याप्त्यप्रसक्तेः सामानाधिकरण्येनेति व्यर्थम् । प्रतियोगिभेदेन प्रतियोगिताभेदस्वीकारे तु वह्नित्वेन वह्न्यभावीयप्रतियोगिताया अपि वह्निभेदेन भिन्नतया महानसीयवयवह्न्यात्मकवह्निसामान्याभावीयप्रतियोगिताश्रयमहानसीयवह्न्यनधिकरणत्वस्य हेत्वधिकरणे पर्वते सत्त्वेन यादृशप्रतियोगितापदेन वह्नित्वावच्छिन्नवह्न्यभावीयप्रतियोगितां गृहीत्वा वह्नित्वस्य तदवच्छेदकत्वमादाय अव्याप्तेः 'सामानाधिकरण्येन' इति विशेषणे दत्तेऽपि वारयितुम् अशक्यत्वात् इति भावः ।

यावद्वह्निभिन्नवृत्तिरिति [पृ.297] । वह्नित्वेन घटाभावीयप्रतियोगितायाः वह्निवृत्तित्वं न संभवति । वह्नित्वेन घटाभावस्य

वह्नित्वेन वह्न्यभावस्य च समनियतत्वविरहात्। अतः वह्निभिन्नवृत्तिरित्युक्तम्।

समाधत्ते - यतः प्रतियोगिभेदेनेति [पृ.297]। प्रतियोगिभेदेन प्रतियोगिताया न भेदः। किन्तु अवच्छेदकभेदेनैव। वह्नित्वेन घटाभावीयप्रतियोगिता यावद्वह्निभिन्नवृत्तिः एकैव। तथापि 'वह्निमान् धूमात्' इत्यादौ वह्नित्वेन घटाभावीयप्रतियोगितामादाय उक्तरीत्या अव्याप्तेः अप्रसक्तावपि 'वह्निभिन्नवान् घटात्' इत्यादौ अव्याप्तिवारकतया 'सामानाधिकरण्येन' इत्यस्य सार्थक्यम्। तथा हि—'वह्निभिन्नवान् घटात्' इत्यत्र यादृशप्रतियोगितापदेन वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगिता गृह्यते। यादृशप्रतियोगितावच्छेदकं वह्निभिन्नत्वम्। तदवच्छिन्नघटाधिकरणत्वं हेतुमति भूतले वर्तते। वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगिताश्रयः यः वह्निः तदधिकरणत्वं तु हेतुमति भूतले नास्ति। अतः यादृशप्रतियोगितावच्छेदकविशिष्टयादृशप्रतियोगिताश्रयोभयाधिकरणत्वाभावस्य हेतुमति सत्त्वेव तादृशप्रतियोगितायां वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगितायां वह्निभिन्नत्वरूपं साध्यतावच्छेदकं अवच्छेदकमेव भवतीति अव्याप्तिः। तद्वारणाय 'सामानाधिकरण्येन' इत्युक्तम्। वह्निभिन्नत्वस्य उक्तप्रतियोगितायां व्यधिकरणतया अवच्छेदकत्वेऽपि सामानाधिकरण्येन अनवच्छेदकत्वमक्षतमिति नाव्याप्तिः।

न च - वह्निभिन्नत्वेन वह्न्यभावस्य वह्निभिन्नत्वेन घटाभावस्य च अभिन्नतया अवच्छेदकैक्येन प्रतियोगितैक्यात् वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगिताश्रयः घटोऽपि। तदधिकरणत्वमेव हेत्वधिकरणे भूतलेऽस्तीति कथमव्याप्तिः इति - वाच्यम्। वह्निभिन्नत्वेन वह्न्यभावः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकतया केवलान्वयी। वह्निभिन्नत्वेन घटाभावश्च न

तथा। घटवति भूतले वह्निभिन्नत्वेन रूपेण घटस्य सत्त्वेन तदभावस्य असंभवात्। अत उभयोरभावयोः ऐक्यं नास्तीति प्रतियोगितायाः ऐक्यं न भवति। तथा च वन्हिभिन्नत्वेन वह्न्यभावीयप्रतियोगिता वह्निमात्रवृत्तिः। तदाश्रयानधिकरणत्वं हेतुमति वर्तत इति अव्याप्तेः प्रसक्तिः। तदिदमभिप्रेत्य उक्तम् **वह्निभिन्ने असंभाविततया** [पृ.297] इति।

न च - वह्निभिन्नत्वेन वह्न्यभाव - वह्निभिन्नत्वेन वह्नितदन्य-उभयाभावयोः समनियतत्वेन अभिन्नतया अवच्छेदकैक्येन च तदीयप्रतियोगितयोरपि ऐक्यमिति तादृशाभावप्रतियोगितायाः वह्निभिन्नेऽपि संभव इति - वाच्यम्। वह्निभिन्नत्वेन वह्नितदन्य - उभयाभावीयप्रतियोगितायाः व्यासज्यवृत्तित्वेन वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगितातः विलक्षणत्वेन तादृशप्रतियोगितापर्याप्त्याश्रयानधिकरणत्वस्य हेतुमति वह्निशून्येऽक्षतत्वात्।

ननु 'महाकालो घटवान् कालपरिमाणात्' इत्यत्र हेत्वधिकरणे महाकाले कालिकसंबन्धेन सर्वेषामपि सत्त्वेन यादृशप्रतियोगितावच्छेदकविशिष्टयादृशप्रतियोगिताश्रय - उभयानधिकरणत्वस्य हेतुमति असत्त्वात् प्रतियोगितायाः अप्रसिद्ध्या अव्याप्तिरित्याशङ्क्य तत्र यादृशप्रतियोगितापदेन महाकालान्यत्वविशिष्टघटाभावीयप्रतियोगिता ग्राह्या। तदवच्छेदकमहाकालान्यत्वविशिष्टघटत्वावच्छिन्नाधिकरणत्वस्य महाकालेऽभावात् उभयानधिकरणत्वस्य हेतुमति सत्त्वात् नाव्याप्तिरिति समाधत्ते - **महाकालो घटवान्** [पृ.298] इति। यदि तु महाकालान्यत्वविशिष्टोऽपि घटः महाकालेऽस्तीति स्वीक्रियते, तदा विशिष्टानधिकरणत्वं हेतुमतः महाकालस्य नास्तीति अव्याप्तिः। अतः पक्षान्तरमवलम्बते - **अथ वेति** [पृ.298]।

वक्ष्यमाणरीत्येति [पृ.298]। सिद्धान्तलक्षणे वक्ष्यमाणरीत्येत्यर्थः। तथा च साध्यतावच्छेदकसंबन्धसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्व - यादृशप्रतियोगिताश्रयप्रतियोगिकत्व - हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्व - एतत्त्रितयाभावः तादृशप्रतियोगितायां सामानाधिकरण्येन अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति लक्षणम्।

'महाकालो घटवान् कालपरिमाणात्' इत्यत्र यादृशप्रतियोगितापदेन अवृत्तिगगनाभावीयप्रतियोगिता ग्राह्या। तदवच्छेदकगगनत्वविशिष्टगगनप्रतियोगिकत्वस्य साध्यतावच्छेदककालिकसंबन्धे विरहेण तदभावप्रयुक्तत्रितयाभावस्य कालिकसंबन्धे सत्त्वात् तादृशप्रतियोगितायां अवच्छेदकं गगनत्वम्, अनवच्छेदकं घटत्वमिति लक्षणसमन्वयः। 'सामानाधिकरण्येन' इत्यनुक्तौ 'वह्निमान् धूमात्' इत्यादौ यादृशप्रतियोगितापदेन वह्नित्वेन घटाभावीयप्रतियोगिता गृह्यते। तदवच्छेदकवह्नित्वावच्छिन्नप्रतियोगिकत्वस्य साध्यतावच्छेदकसंयोगसंबन्धे सत्त्वेऽपि तादृशप्रतियोगिताश्रयघटप्रतियोगिकत्वं वह्निप्रतियोगिकसंयोगे नास्ति। न हि एकस्मिन् संयोगे वह्निप्रतियोगिकत्वं घटप्रतियोगिकत्वं च संभवति। तथा च साध्यतावच्छेदकसंयोगसंबन्धे प्रतियोगितावच्छेदकवह्नित्वावच्छिन्न प्रतियोगिकत्वस्य वा प्रतियोगिताश्रयघटप्रतियोगिकत्वस्य वा अभावेन उक्तत्रितयाभावः भवति। तादृशप्रतियोगितायां वह्नित्वेन घटाभावीयप्रतियोगितायां वह्नित्वस्य व्यधिकरणतया अवच्छेदकत्वमादाय अव्याप्तेःवारणाय 'सामानाधिकरण्येन' इत्यस्य उपादानम्।

अत्र 'चैत्रान्यत्वविशिष्ट - एतद्दण्डवान्, एतद्दण्डसंयोगात्' इत्यत्र व्यभिचारिणि एतद्दण्डसंयोगसामान्ये चैत्रान्यत्वविशिष्ट -

एतद्दण्डाभावप्रतियोग्येतद्दण्डप्रतियोगिकत्व-चैत्रानुयोगिकत्व-उभय-सत्त्वेन विशिष्टाभावस्य लक्षणघटकत्वानुपपत्तिः । अतः यादृश-प्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वनिवेशः । धूमसंयोगे धूमत्वविशिष्टप्रतियोगिकत्व - धूमप्रतियोगिकत्वयोः द्वयोः सत्त्वेन धूमसाध्यके व्यभिचारिणि धूमाभावस्य लक्षणघटकत्वसंपादनाय हेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वनिवेशः । तत्रैव धूम-संयोगे वह्निमत्पर्वतानुयोगिकत्वस्य सत्त्वेन धूमाभावस्य लक्षण-घटकत्वानुपपत्तिः । अतः **यत्किंचिदिति** । वह्नित्वेन घटाभाव-संग्रहाय यादृशप्रतियोगिताश्रयप्रतियोगिकत्वनिवेश इत्यवधेयम् ।

गादाधरी

[४९] परेषां मतेन सामानाधिकरण्येनेत्यस्य सार्थक्यम्

परे तु—अत्यन्ताभावस्येव अन्योन्याभावस्यापि प्रतियोग्य-वृत्ति धर्मावच्छिन्नप्रतियोगिताकत्वोपगमात् पर्वतादौ वह्नित्व-विशिष्टाद्यवच्छिन्नजलादिमद्भेदोऽपि प्रामाणिकः । एवं च स्वावच्छेदकविशिष्टावच्छिन्न - स्वाश्रयवन्निष्ठप्रतियोगिताकभेद-वद्धेत्वधिकरणकं यत्प्रतियोगित्वं तदनवच्छेदकत्वं साध्यतावच्छे-दकस्य निवेशनीयम् । एवं च वह्नित्वादिना जलाद्यभावीय-प्रतियोगितापि तादृशं स्वम् । कथितभेदस्य तदवच्छेदकवह्नि-त्वादिविशिष्टावच्छिन्नतदाश्रयजलादिमन्निष्ठप्रतियोगिताकत्वात् । अतः तदवच्छेदकतामादाय दोषवारणाय सामानाधिकरण्येनेति । 'संयोगी द्रव्यत्वात्', 'वह्निमान् धूमात्' इत्यादौ संयोगत्ववन्हि-त्वाद्यवच्छिन्नसंयोगवह्न्याद्यभावप्रतियोगितायाः गुणत्वहृदत्वाद्य-वच्छिन्नसंयोगिपर्वतभेदौ संयोगवह्नयाद्यवच्छिन्नघटादिभेदौ च आदाय तथात्ववारणाय अवच्छिन्नान्तनिष्ठान्तयोरुपादानम् ।

अथ वा यादृशप्रतियोगितावच्छेदकावच्छिन्न - यादृशप्रति-योगिताश्रयवृत्तिप्रतियोगितावच्छेदकताकभेदवत्त्वं हेतुमतः तदन-

वच्छेदकत्वं विवक्षणीयम् । वह्नित्वावच्छिन्नघटाभावप्रतियोगि-
तापि एतादृशी । तादृशप्रतियोगितावच्छेदकवह्नित्वाद्यवच्छिन्न
तादृशप्रतियोगितासमानाधिकरणप्रतियोगितावच्छेदकताकस्य
'वह्नित्वेन घटवान् न' इति प्रतीतिविषयभेदस्य हेतुमति
सत्त्वात् । व्यधिकरणधर्मस्य अन्यत्ताभावप्रतियोगितावच्छेदक-
त्ववत् अन्योन्याभावप्रतियोगितावच्छेदकतायामपि अवच्छेदक-
त्वात् ।

अत एव 'समवायितया वाच्यत्ववद्भेदोऽपि द्रष्टव्यः' इति
मिश्रैरभिहितम् । इत्थं च **तादृशप्रतियोगितावारणाय** सामानाधि-
करण्येनेति । हेतुमतो वह्नित्वेन घटवद्भेदवत्त्वं घटत्वेन वन्हिम-
द्भेदवत्त्वं चादाय वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगितायाः तादृश-
त्ववारणाय प्रकृतप्रतियोगितासमानाधिकरणत्व - तदवच्छेदका-
वच्छिन्नत्वयोः भेदप्रतियोगितावच्छेदकतायां निवेशनम्। **'महाकालो
घटवान् कालपरिमाणात्'** इत्यादौ महाकालान्यत्वविशिष्ट-
घटाद्यभावीयप्रतियोगितामादायैव लक्षणसमन्वयः, **नतु गगनत्वपट-
त्वादिना** घटाद्यभावीयप्रतियोगिताम् । गगनत्वपटत्वाद्यवच्छिन्न-
घटवृत्तिप्रतियोगितावच्छेदकताकभेदस्य हेत्वधिकरणमहाकाले
संभवेऽपि सामानाधिकरण्येन तदवच्छेदकस्याप्रसिद्धेः ।

अथ वा तादृशप्रतियोगितासामान्ये यद्धर्मसामानाधिकरण्य-
विशिष्टयद्धर्मावच्छेद्यत्वाभावः तद्धर्मविशिष्टसामानाधिकरण्यं
व्याप्तिरित्येव विवक्षणीयम् । इत्थं च व्यधिकरणधर्मावच्छिन्ना-
भावमादायापि लक्षणसमन्वयः तत्र संभवति इत्यवधेयम् ।

'वह्नित्वेन वह्निधूमोभयं नास्ति' इत्येतादृशप्रतीतिविषया-
भावस्य 'वह्निमान् वह्नित्वेन वह्निधूमोभयवान्न' इति प्रतीति-
सिद्धभेदमादाय प्रतियोगिव्यधिकरणत्वेऽपि तस्य प्रतियोगिता-
वच्छेदकत्वं न वह्नित्वमात्रे पर्याप्तम् । तथा सति वह्नित्वरूप-

प्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिमत्यपि तादृशाभावाप्रत्ययप्रसङ्गात्। किंतु वह्नित्वतदुभयत्वयोरेव तत्पर्याप्तिः। अतः तादृशप्रतियोगितायां समानाधिकरणतया अवच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः।

यदि च तादृशाभावप्रतियोगितावच्छेदकं वह्नित्वादिकमेव, न तु प्रतियोगिविशेषणतापन्नमुभयत्वम्। प्रतियोगिविशेषणतानापन्ने प्रतियोगितावच्छेदकत्वावगाहिप्रतीत्या तद्विशेषणतापन्ने तदनवगाहनात्। अन्यथा 'वह्नित्वेन घटो नास्ति' इत्यादावपि घटत्ववह्नित्वाद्युभयावच्छेदकत्वपर्याप्त्यवगाहनौचित्यात् 'सामानाधिकरण्येन' इत्यस्य वैयर्थ्यापत्तेः। वह्नित्वेनोभयाभावप्रतियोगिता च व्यासज्यवृत्तिः। अतो न तादृशाभावस्य केवलान्वयित्वानुपपत्तिरिति मन्यते, तदा 'सामानाधिकरण्येन' इत्यस्य 'प्रतियोगितापर्याप्त्यधिकरणवृत्तित्वेन' इत्यर्थं इत्याहुः।

तदुभयमपि न युक्तम्। एवं सति घटत्वादिना साध्याभावप्रतियोगिताया अपि निरुक्तप्रतियोगिवैयधिकरण्यनिरूपकत्वसंभवेन प्रथमलक्षणे प्रतियोगिवैयधिकरण्यानभिधानस्य निर्बीजतया सन्दर्भविरोधापत्तेः।

विवरणम्

'सामानाधिकरण्येन' इत्यस्य प्रकारान्तरेण सार्थक्यमुपपादयतां मतमनुवदति - **परे तु** [पृ.303] इत्यादिना। व्यधिकरणधर्मावच्छिन्नाभाववादिभिः यथा अत्यन्ताभावः प्रतियोग्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकः 'घटत्वेन पटो नास्ति' इत्यादिप्रतीतिबलात् अङ्गीक्रियते, तथा अन्योन्याभावोऽपि प्रतियोग्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकः अङ्गीक्रियते 'वह्निना जलवान् न' इति प्रतीतिबलात्। प्रतियोगी जलवान् तदवृत्तिः वह्निः

तदवच्छिन्नप्रतियोगिताकः अयमन्योन्याभावः। तदनुसारेण च प्रतियोगिवैयधिकरण्यघटितं लक्षणम् एवं परिष्क्रियते—

'स्वावच्छेदकविशिष्टावच्छिन्न-स्वाश्रयवन्निष्ठप्रतियोगिताक-भेदवद् - हेत्वधिकरणकं यत् प्रतियोगित्वं तदनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः'

स्वपदेन लक्षणघटकाभावीयप्रतियोगिता ग्राह्या। 'वह्निमान् धूमात्' इत्यादौ स्वपदेन वह्नित्वेन जलाभावीयप्रतियोगिता ग्राह्या। स्वावच्छेदकं वह्नित्वम्। तद्विशिष्टः वह्निः। तदवच्छिन्ना स्वाश्रयजलवन्निष्ठा च या प्रतियोगिता तन्निरूपको यो भेदः 'वन्हिना जलवान् न' इति प्रतीतिसिद्धो भेदः तद्वत् हेत्वधिकरणं पर्वतो भवति। तादृशभेदवत् हेत्वधिकरणकं यत्प्रतियोगित्वं वह्नित्वेन जलाभावीयप्रतियोगित्वम्। तदवच्छेदकमेव वह्नित्वम् इति अव्याप्तिर्भवति। तद्वारणाय 'सामानाधिकरण्येन' इति विशेषणम्। वह्नित्वस्य वह्नित्वेन जलाभावीयप्रतियोगितायाः सामानाधिकरण्येन अवच्छेदकत्वविरहात् नाव्याप्तिः। तथा च यादृशप्रतियोगितावच्छेदकविशिष्टावच्छिन्नयादृशप्रतियोगिताश्रयवन्निष्ठप्रतियोगिताकभेदवत्त्वं हेतुमतः तादृशप्रतियोगितायाः सामानाधिकरण्येन अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति पर्यवसितम्।

भेदीयप्रतियोगितायाम्-यादृशप्रतियोगितावच्छेदकविशिष्टावच्छिन्नत्वानिवेशे 'संयोगी द्रव्यत्वात्' इत्यत्र 'वह्निमान् धूमात्' इत्यत्र च सद्धेतौ यादृशप्रतियोगितापदेन संयोगत्वेन संयोगाभावीयप्रतियोगितां वह्नित्वेन वह्न्यभावीयप्रतियोगितां च गृहीत्वा तदाश्रयवन्निष्ठप्रतियोगिताकभेदपदेन 'गुणत्वेन संयोगवान् न' इति भेदं 'ह्रदत्वेन वह्निमान् न' इति भेदं च गृहीत्वा तद्वत्त्वस्य हेत्वधिकरणे द्रव्ये पर्वते च सत्त्वेन तादृशप्रतियोगितायां संयोगत्वेन

संयोगाभावीयप्रतियोगितायां वह्नित्वेन वह्न्यभावीयप्रतियोगितायां च अवच्छेदकत्वमेव साध्यतावच्छेदकस्य संयोगत्वस्य वह्नित्वस्य च अस्तीति अव्याप्तिः । तद्वारणाय यादृशप्रतियोगितावच्छेदकविशिष्टावच्छिन्नत्वनिवेशः । तन्निवेशे तु संयोगत्वेन संयोगाभावीयप्रतियोगितावच्छेदकसंयोगत्वविशिष्टावच्छिन्नप्रतियोगिताकभेदः 'गुणत्वेन संयोगवान् न' इति भेदः न भवति । एवं वह्नित्वविशिष्टावच्छिन्नप्रतियोगिताकभेदः 'ह्रदत्वेन वह्निमान् न' इति भेदः न संभवतीति नाव्याप्तिः ।

एवं भेदीयप्रतियोगितायां यादृशप्रतियोगिताश्रयवन्निष्ठत्वानिवेशे तत्रैव संयोगत्वावच्छिन्नसंयोगावच्छिन्नप्रतियोगिताकभेदः 'संयोगेन घटो न' इति भेदः । वह्न्यभावीयप्रतियोगितावच्छेदकवह्नित्वविशिष्टावच्छिन्नप्रतियोगिताकभेदः 'वह्निना घटो न' इति भेदश्च भवति । तद्वत्त्वं च हेत्वधिकरणस्य अस्तीति साध्यतावच्छेदकस्य तादृशप्रतियोगितावच्छेदकत्वमादाय अव्याप्तिः स्यात् । तद्वारणाय यादृशप्रतियोगिताश्रयवन्निष्ठत्वनिवेशः ।

लाघवादाह - **अथ वेति** [पृ.303] । यादृशप्रतियोगितावच्छेदकावच्छिन्न - यादृशप्रतियोगिताश्रयवृत्ति - अवच्छेदकताकप्रतियोगिताकभेदवत्त्वं हेतुमतः तादृशप्रतियोगितायां सामानाधिकरण्येन अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः ।

पूर्वं भेदीयप्रतियोगितायां यादृशप्रतियोगितावच्छेदकविशिष्टावच्छिन्नत्वं यादृशप्रतियोगिताश्रयवन्निष्ठत्वं च विशेषणम् । अत्र तु भेदप्रतियोगितावच्छेदकतायां यादृशप्रतियोगितावच्छेदकावच्छिन्नत्वं यादृशप्रतियोगिताश्रयवृत्तित्वं च विशेषणम् इति भेदः । एवं पूर्वं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकभेदो ग्राह्यः । अत्र

तु व्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदः ग्राह्य इति विशेषः।

'वह्निमान् धूमात्' इत्यादौ यादृशप्रतियोगिता वह्नित्वेन घटाभावीयप्रतियोगिता। तदवच्छेदकवह्नित्वावच्छिन्ना - तदाश्रयघटवृत्तिश्च या अवच्छेदकता 'वह्नित्वेन घटवान् न' इति प्रतीतिसिद्धभेदप्रतियोगितावच्छेदकता घटनिष्ठा। तन्निरूपकप्रतियोगिताको यो भेदः 'वह्नित्वेन घटवान् न' इति प्रतितोसिद्धो भेदः। तद्वत्त्वं हेतुमतः पर्वतादेर्वर्तते। तादृशप्रतियोगितायां वह्नित्वेन घटाभावीयप्रतियोगितायां व्यधिकरणतया अवच्छेदकत्वमादाय अव्याप्तेर्वारणाय सामानाधिकरण्येन अनवच्छेदकत्वं साध्यतावच्छेदके निवेशितम्। भेदप्रतियोगितावच्छेदकतायां यादृशप्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशे वह्नित्वेन वह्न्यभावीयप्रतियोगितामादाय अव्याप्तिः। तथा हि - यादृशप्रतियोगिता वह्नित्वावच्छिन्नवह्न्यभावीयप्रतियोगिता। तदाश्रयः वह्निः। तद्वृत्यवच्छेदकताकप्रतियोगिताको भेदः 'घटत्वेन वह्निमान् न' इति प्रतीतिसिद्धो भेदः। तादृशभेदवत्त्वं हेतुमतः पर्वतस्य अस्ति। तादृशप्रतियोगितायां वह्नित्वावच्छिन्नवह्न्यभावीयप्रतियोगितायां अवच्छेदकमेव वह्नित्वमिति यादृशप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशेऽपि वह्नित्वावच्छिन्नवह्न्यभावीयप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वं 'घटत्वेन वह्निमान् न' इति भेदस्य नास्ति। तस्य घटत्वावच्छिन्नवह्निनिष्ठावच्छेदकताकप्रतियोगिताकत्वात्। अतः नाव्याप्तिः। एवं यादृशप्रतियोगिताश्रयवृत्तित्वस्य अवच्छेदकतायाम् अनिवेशे 'वह्नित्वेन घटवान् न' इति प्रतीतिसिद्धम् भेदमादाय अव्याप्तिः। अतः तन्निवेशनम् इति भावः।

तादृशप्रतियोगितासमानाधिकरणेति [पृ.304]। तादृशप्रतियोगिताश्रयवृत्तिः या प्रतियोगितावच्छेदकता तत्कस्य इत्यर्थः।

व्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदसत्त्वे मिश्रग्रन्थं प्रमाणयति - **अत एवेति** । [पृ.304] । **तादृशप्रतियोगितावारणायेति** [पृ.304] । वह्नित्वेन घटाभावीयप्रतियोगितामादाय अव्याप्तिवारणाय इत्यर्थः ।

'महाकालो घटवान्' इत्यत्र समन्वयप्रकारमाह - **महाकालो घटवानिति** [पृ.304] । 'महाकालो घटवान् कालपरिमाणात्' इत्यत्र महाकालान्यत्वविशिष्टघटाभावीयप्रतियोगिता यादृशप्रतियोगितापदेन ग्राह्या । तदवच्छेदकमहाकालान्यत्वविशिष्टघटत्वावच्छिन्नतदाश्रयघटवृत्तिप्रतियोगिताकभेदस्य 'महाकालान्यत्वविशिष्टघटवान् न' इति प्रतीतिसिद्धस्य हेतुमति सत्त्वात् । तादृशप्रतियोगितायां सामानाधिकरण्येन अवच्छेदकं महाकालान्यत्वविशिष्टघटत्वम् । अनवच्छेदकं शुद्धघटत्वरूपं साध्यतावच्छेदकमिति लक्षणसमन्वयः ।

न च तत्रापि व्यधिकरणधर्मावच्छिन्नप्रतियोगितां गगनत्वेन घटाभावीयप्रतियोगितां यादृशप्रतियोगितापदेन गृहीत्वा तदवच्छेदकगगनत्वावच्छिन्नतदाश्रयघटवृत्यवच्छेदकताकप्रतियोगिताकभेदस्य 'गगनत्वेन घटवान् न' इति प्रतीतिसिद्धस्य हेतुमति सत्त्वात् तादृशप्रतियोगितानवच्छेदकत्वस्य घटत्वे सत्त्वात् कुतो न लक्षणसमन्वय इत्याशङ्क्याह—**न तु गगनत्वपटत्वादिना** [पृ.304] इति । गगनत्वेन घटाभावीयप्रतियोगितायाः ग्रहणे तस्यां सामानाधिकरण्येन अवच्छेदकस्य अप्रसिद्धया लक्षणसमन्वयः न संभवति । अतः सद्धेतौ सर्वत्र समानाधिकरणधर्मावच्छिन्नप्रतियोगितामादायैव समन्वयः कार्य इति भावः ।

'महाकालो घटवान् कालपरिमाणात्' इत्यत्र व्यधिकरणधर्मावच्छिन्नाभावमादायापि लक्षणसमन्वयं कर्तुं प्रकारान्तरेण परिष्करोति—**अथ वेति** [पृ.304] । यादृशप्रतियोगितावच्छेदका-

वच्छिन्न - यादृशप्रतियोगिताश्रयवृत्त्यवच्छेदकताकप्रतियोगिताक-भेदवत्त्वं हेतुमत: तादृशप्रतियोगितासामान्ये यद्धर्मसामानाधिकरण्य-यद्धर्मावच्छेद्यत्वोभयाभाव: तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्ति:। यद्धर्मपदेन साध्यतावच्छेदकं ग्राह्यम्। 'महाकालो घटवान् काल-परिमाणात्' इत्यत्र यादृशप्रतियोगितापदेन गगनत्वावच्छिन्नघटा-भावीयप्रतियोगिता गृह्यते। तदवच्छेदकगगनत्वावच्छिन्नतदाश्रय-घटवृत्त्यवच्छेदकताक प्रतियोगिताकभेदस्य 'गगनत्वेन घटवान् न' इति प्रतीतिसिद्धस्य हेतुमति काले सत्त्वात् तादृशप्रतियोगितायां गगनत्वेन घटाभावीयप्रतियोगितायां घटत्वसामानाधिकरण्य-सत्त्वेऽपि घटत्वावच्छेद्यत्वविरहात् घटत्वसामानाधिकरण्य - घटत्वावच्छेद्यत्वोभयाभाव: वर्तते। तद्धर्मघटत्वविशिष्टसामा-नाधिकरण्यं कालपरिमाणरूपहेतावस्तीति लक्षणसमन्वय:।

ननु 'वह्निमान् धूमात्' इत्यादौ यादृशप्रतियोगितापदेन वह्नि-धूमोभयाभावीयप्रतियोगिता गृह्यते। तदवच्छेदकवह्नित्वावच्छिन्ना तादृशप्रतियोगिताश्रयोभयनिष्ठा या अवच्छेदकता तन्निरूपक-प्रतियोगिताकभेदस्य 'वह्नित्वेन वह्निधूमोभयवान् न' इति प्रतीतिसिद्धस्य हेतुमति पर्वतादौ सत्त्वात्, तादृशप्रतियोगितायां सामानाधिकरण्येन अवच्छेदकमेव वह्नित्वम् इति अनवच्छेदकत्व-विरहात् अव्याप्तिरित्याशङ्क्य समाधत्ते - **वह्नित्वेन वह्निधूमोभयं नास्तीत्यादिना** [पृ.304]। 'वह्नित्वेन वह्निधूमोभयं नास्ति' इति प्रतीतिसिद्धाभावस्य न वह्नित्वमात्रं प्रतियोगितावच्छेदकम्। तथा सति वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रति-योगिमति पर्वते 'वह्नित्वेन वह्निधूमोभयं नास्ति' इति प्रतीति-सिद्धस्य अभावस्य असत्त्वप्रसंगात्। प्रतियोगितावच्छेदकविशिष्ट-प्रतियोगिना साकं अभावस्य विरोधात्। किन्तु वह्नित्वं वह्नि-धूमोभयत्वं च प्रतियोगितावच्छेदकम्। प्रतियोगितावच्छेदकता-पर्याप्त्यधिकरणधर्मावच्छिन्नेन साकमेव अभावस्य विरोध:।

वह्नित्व - वह्निधूमोभयत्वोभयविशिष्टस्य प्रतियोगिनः अप्रसिद्ध्या विरोधिविरहात् वह्निमति 'वह्नित्वेन वह्निधूमोभयं नास्ति' इति प्रतीतेः उपपत्तिः। एवञ्च प्रतियोगितानवच्छेदकपदेन' प्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वस्य विवक्षिष्यमाणतया वह्नित्वेन वह्निधूमोभयाभावीयप्रतियोगितायाः ग्रहणेऽपि तदवच्छेदकतापर्याप्त्यनधिकरणत्वं वह्नित्वरूपे साध्यतावच्छेदकेऽस्तीति नाव्याप्तिरिति भावः।

यदि चेति [पृ.305]। वह्नित्वेन वह्निधूमोभयाभावप्रतियोगितायामवच्छेदकं वह्नित्वमेव, न तु प्रतियोगिविशेषणतापन्नमुभयत्वमपि। तृतीयाविभक्त्या प्रतियोगिविशेषणतानापन्ने वह्नित्वे प्रतियोगितावच्छेदकत्वावगाहिन्या प्रतीत्या प्रतियोगिविशेषणतापन्ने तदनवगाहनात्। अन्यथा 'वह्नित्वेन घटो नास्ति' इति प्रतीत्यापि वह्नित्वघटत्वोभयोरपि प्रतियोगितावच्छेदकत्वावगाहनसंभवात् वह्नित्वेन घटाभावीयप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वस्य वह्नित्वघटत्वोभयोरेव सत्त्वेन वह्नित्वे प्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वस्य सत्त्वेन अव्याप्त्यप्रसक्त्या 'सामानाधिकरण्येन' इत्यस्य वैयर्थ्यापत्तेः।

न च वह्नित्वेन वह्निधूमोभयाभावीयप्रतियोगितायां यदि वह्नित्वमात्रमवच्छेदकं तदा प्रतियोगितावच्छेदकवह्नित्वविशिष्टवह्निमति 'वह्नित्वेन वह्निधूमोभयं नास्ति' इति प्रतीत्यनुपपत्तिरिति वाच्यम्। उभयाभावीयप्रतियोगितायाः व्यासज्यवृत्तित्वस्वीकारेण प्रतियोगितावच्छेदकविशिष्टप्रतियोगितापर्याप्त्यधिकरणेन साकमेव अभावस्य विरोधात् प्रतियोगितापर्याप्त्यधिकरणस्य वह्निधूमोभयस्य प्रतियोगितावच्छेदकवह्नित्वविशिष्टत्वासंभवात् विरोध्यभावेन वह्नित्वेन वह्निधूमोभयाभावस्य सार्वत्रिकत्वोपपत्तेः। एवञ्च यादृशप्रतियोगितापदेन वह्नित्वेन वह्निधूमोभयाभावीयप्रति-

योगितां गृहीत्वा तदवच्छेदकतापर्याप्त्यधिकरणत्वस्यैव वह्नित्वरूपे साध्यतावच्छेदके सत्वेन अव्याप्तिरिति यदि मन्यते, तदा प्रतियोगितायां सामानाधिकरण्येन अनवच्छेदकमित्यस्य प्रतियोगितापर्याप्त्यधिकरणवृत्तित्वेन अवच्छेदकं न भवति यत् साध्यतावच्छेदकम् इत्यर्थः। वह्नित्वेन वह्निधूमोभयाभावीयप्रतियोगितापर्याप्त्यधिकरणोभयवृत्तित्वेन वह्नित्वं न अवच्छेदकं धूमवृत्तित्वविरहात्। अतः नाव्याप्तिरिति समाधेयमिति भावः।

तदुभयमपि न युक्तमिति [पृ.305]। केचिन्मतं 'परे तु' मतं च न युक्तमित्यर्थः। प्रथमलक्षणेऽपि एतादृशप्रतियोगिवैयधिकरण्यनिरूपकत्वस्य साध्याभावीयप्रतियोगितायां निवेशसंभवेन तत्र प्रतियोगिवैयधिकरण्यानभिधानस्य निर्बीजत्वापत्तेः।

तथा हि - यादृशप्रतियोगितावच्छेदकविशिष्टसाध्यवृत्तियादृशप्रतियोगिताश्रय - उभयानधिकरणत्वं हेतुमतः तादृशप्रतियोगितानवच्छेदकं साध्यतावच्छेदके केचिन्मते निवेशनीयम्। यादृशप्रतियोगितापदेन घटत्वेन वह्न्यभावीयप्रतियोगितायाः ग्रहणे तदवच्छेदकघटत्वविशिष्टस्य प्रतियोगिताश्रयवह्नेश्च उभयोरनधिकरणं हेतुमद्भवति। तादृशप्रतियोगितायाम् अवच्छेदकं घटत्वम्, अनवच्छेदकं वन्हित्वमिति लक्षणसमन्वयः।

'परे तु' मते यादृशप्रतियोगितावच्छेदकविशिष्टावच्छिन्नसाध्यवन्निष्ठप्रतियोगिताकभेदवत्त्वं तादृशप्रतियोगितावच्छेदकावच्छिन्नसाध्यवृत्ति - अवच्छेदकताकप्रतियोगिताकभेदवत्त्वं वा हेतुमतः तादृशप्रतियोगितायाम् अनवच्छेदकं यत् साध्यतावच्छेदकम् इति विवक्षणीयम्। 'घटेन वह्निमान् न', 'घटत्वेन वन्हिमान् न' इत्याकारकभेदवत्त्वं हेतुमतोऽस्तीति समन्वयः कार्य इति भावः।

गादाधरी

[५०] स्वमतेन 'सामानाधिकरण्येन' इत्यस्य सार्थक्यम्

वस्तुतो यादृशप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदक-यत्किचिद्धर्मावच्छिन्नानधिकरणत्वं हेतुमतः, तदनवच्छेदकत्वं साध्यतावच्छेदकस्य विवक्षणीयम् । कपिसंयोगत्वाद्यवच्छिन्न-कपिसंयोगादिनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकं कपिसंयोगत्वादिकमेव । तदवच्छिन्नानधिकरणत्वं च न हेतुमत इति न 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादावव्याप्तिः । **घटत्वा-वच्छिन्नप्रतियोगिताकत्वसंबन्धेनैव** प्रमेयत्वादिना प्रतियोगिनो 'घटत्वेन प्रमेयं नास्ति' इत्यादिज्ञाने भानात् प्रमेयत्वाद्यवच्छिन्ना-नधिकरणत्वस्य हेतुमत्यसंभवात् घटत्वाद्यवच्छिन्नप्रतियोगिताया 'यादृशप्रतियोगिता' इत्यनेन उपादानासंभवात् तथाविधप्रतियो-गिताया अप्रसिद्धेः । अतो यत्किचिदित्युक्तम् ।

'दण्डिमान् दण्डिसंयोगात्' इत्यादौ तत्तद्दण्डावच्छिन्नानधि-करणत्वमादाय दण्डिसामान्याभावस्य प्रतियोगिवैयधिकरण्येऽपि न क्षतिः । तत्तद्दण्डावच्छिन्नात्यन्ताभावप्रतियोगितावच्छेदक-त्वमादाय दोषवारणाय तत्र परंपरासंबन्धेन दण्डत्वादेः साध्यता-वच्छेदकत्वस्वीकारस्य आवश्यकत्वात् । **तत्संयोगत्वतद्वह्नित्वादि-**विशिष्टप्रतियोगिविषयकाभावभाने संयोगत्ववह्नित्वादिरूपसामा-न्यधर्मावच्छिन्नप्रतियोगितायाः संसर्गतया भाने मानाभावात्, तत्सं-योगत्वतद्वह्नित्वाद्यवच्छिन्नानधिकरणत्वेऽपि हेतुमतो न क्षतिः । **संयोगत्ववह्नित्वावच्छिन्नप्रतियोगितायाः** 'घटत्वावच्छिन्नत्वेन घटो नास्ति' इति अभावबुद्धौ संसर्गतया भानोपगमे भ्रमानिरूपितत्वेन प्रकारता निवेशनीया ।

'विशिष्टसत्तावान् जातेः' इत्यादौ विशिष्टसत्तात्वाद्य-वच्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदकविशिष्टसत्ता-

त्वाद्यवच्छिन्नावधिकरणत्वस्य हेतुमति सत्त्वात् नातिव्याप्तिः। वह्नित्वाद्यवच्छिन्नघटादिनिष्ठव्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितासंबन्धाद्यवच्छिन्नप्रकारतावच्छेदकघटत्वाद्यवच्छिन्नावधिकरणत्वस्य हेतुमति सत्त्वात् सामानाधिकरण्येन इत्यस्य सार्थकता।

एकमात्रवृत्तिसाध्यकस्थले साध्यनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नानधिकरणत्वं न हेतुमत इति साध्यवृत्तितथाविधप्रतियोगिताया अप्रसिद्धया न पूर्वोक्तलक्षणे प्रतियोगिव्यधिकरणत्वं निवेशितम्। वह्नित्वादिना उभयाभावम् आदाय दोषस्तु पूर्ववदेव वारणीय इति।

विवरणम्

स्वमतेन 'सामानाधिकरण्येन' इत्यस्य सार्थक्यं वक्तुं प्रतियोगिवैयधिकरण्यघटितलक्षणं परिष्करोति-वस्तुत [पृ.313]। इत्यादिना। यादृशप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदक - यत्किंचिद्धर्मावच्छिन्नानधिकरणत्वं हेतुमतः तादृशप्रतियोगितावच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः। 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ यादृशप्रतियोगितापदेन 'कपिसंयोगो नास्ति' इति प्रतीतौ कपिसंयोगस्य अभावस्य च मध्ये भासमानायाः कपिसंयोगत्वावच्छिन्न - कपिसंयोगनिष्ठप्रतियोगितायाः ग्रहणे तत्संबन्धावच्छिन्नप्रकारतायाम् अवच्छेदकं यत् कपिसंयोगत्वं तदवच्छिन्नानधिकरणत्वं हेत्वधिकरणस्य वृक्षस्य न संभवति। अतः यादृशप्रतियोगितापदेन 'घटो नास्ति' इति प्रतीतौ घटस्य अभावस्य च मध्ये संसर्गतया भासमानघटत्वावच्छिन्नप्रतियोगिता ग्राह्या। तत्संबन्धावच्छिन्नघटनिष्ठप्रकारतायाम् अवच्छेदकं घटत्वम्। तदवच्छिन्नानधिकरणत्वं हेतुमतः वृक्षस्य वर्तते। तादृशप्रतियोगितायाः अवच्छेदकं घटत्वम्। अवनच्छेदकं कपिसंयोगत्वम् इति लक्षणसमन्वयः।

'वह्निमान् धूमात्' इत्यादौ 'वह्नित्वेन घटो नास्ति' इति प्रतीतौ प्रकारस्य घटस्य विशेष्यस्य अभावस्य च मध्ये भासमाना या वह्नित्वरूपव्यधिकरणधर्मावच्छिन्नघटनिष्ठप्रतियोगिता तस्याः यादृशप्रतियोगितापदेन ग्रहणे तत्संबन्धावच्छिन्नप्रकारतावच्छेदकं यत् घटत्वं तदवच्छिन्नानधिकरणत्वं हेतुमतः पर्वतस्य वर्तते। तादृशव्यधिकरणधर्मावच्छिन्नप्रतियोगितायां अवच्छेदकमेव वह्नित्वमिति अव्याप्तिः। तद्वारणाय 'सामानाधिकरण्येन' इत्युक्तम्। तदुक्तौ वह्नित्वावच्छिन्नघटनिष्ठप्रतियोगितायां वह्नित्वस्य सामानाधिकरण्येन अवच्छेदकत्वं नास्तीति नाव्याप्तिरिति भावः।

यत्किंचित्पदस्य प्रयोजनमाह-**घटत्वावच्छिन्नेति** [पृ.313]। 'घटत्वेन प्रमेयं नास्ति' इति प्रमेयत्वविशिष्टस्य घटत्वावच्छिन्नप्रतियोगितासंबन्धेन अभावांशे प्रकारत्वम्। 'घटत्वेन घटो नास्ति' इति प्रतीतौ घटत्वविशिष्टस्य घटत्वावच्छिन्नप्रतियोगितासंबन्धेन अभावांशे प्रकारत्वम्। तथा च यादृशप्रतियोगितापदेन घटत्वावच्छिन्नप्रतियोगितायाः ग्रहणे तत्संबन्धावच्छिन्नप्रकारतावच्छेदकं प्रमेयत्वं घटत्वं च। तत्र प्रमेयत्वावच्छिन्नानधिकरणत्वस्य अप्रसिद्ध्या 'वह्निमान् धूमात्' इत्यादौ तादृशप्रतियोगितायाः प्रसिद्धेरसंभवः। तद्वारणाय यत्किंचित्पदम्। तदुपादाने घटत्वावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदकयत्किंचिद्धर्मपदेन घटत्वं गृहीत्वा तदवच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वात् तादृशप्रतियोगितायाम् अनवच्छेदकत्वं वह्नित्वेऽस्तीति लक्षणसमन्वयः कार्य इति भावः।

ननु 'दण्डिमान् दण्डसंयोगात्' इत्यादौ यादृशप्रतियोगितापदेन दण्डसामान्याभावप्रतियोगितां गृहीत्वा तत्संबन्धावच्छिन्नप्रकारतावच्छेदकतत्तद्दण्डावच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वात् तादृशप्रतियोगितायाम् अवच्छेदकत्वमेव साध्यतावच्छेदके दण्डेऽ-

स्तीति अव्याप्तिरित्याशङ्क्य तत्र परंपरासंबन्धेन दण्डत्वस्य साध्यतावच्छेदकत्वस्वीकारात् तस्य च प्रतियोगितानवच्छेदकत्वमस्ति इति नाव्याप्तिरिति समाधत्ते - **दण्डिमान् दण्डिसंयोगात्** [पृ.313] इत्यादिना ।

ननु 'तत्संयोगो नास्ति', 'तद्वन्हिर्नास्ति', इति या प्रतीतिः तत्संयोगत्वविशिष्टस्य तद्वह्नित्वविशिष्टस्य च अभावांशे संयोगत्वरूपसामान्यधर्मावच्छिन्नप्रतियोगितायाः वह्नित्वरूपसामान्यधर्मावच्छिन्नप्रतियोगितायाश्च संसर्गत्वम् अवगाहते तादृशप्रतीतिविषयसंयोगत्ववह्नित्वरूपसामान्यधर्मावच्छिन्नप्रतियोगितायाः यादृशप्रतियोगितापदेन ग्रहणे तत्संबन्धावच्छिन्नप्रकारतावच्छेदक-तत्संयोगत्वतद्वह्नित्वावच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वात् तादृशसामान्यधर्मावच्छिन्नप्रतियोगितावच्छेदकत्वमेव साध्यतावच्छेदके संयोगत्वे वह्नित्वे च अस्तीति 'संयोगी द्रव्यत्वात्', 'वह्निमान् धूमात्' इत्यत्र अव्याप्तिः इत्याशङ्क्य विशेषधर्मविशिष्टप्रतियोगिप्रकारकाभावविशेष्यकप्रतीतौ सामान्यधर्मावच्छिन्नप्रतियोगितायाः संसर्गतया भाने प्रमाणाभावात् नाव्याप्तिरिति समाधत्ते **तत्संयोगत्वेत्यादिना** [पृ.313] ।

ननु 'घटो नास्ति' इति अभावबुद्धौ घटत्वावच्छिन्नत्वेन रूपेण वह्नित्वावच्छिन्नप्रतियोगितायाः भानसंभवात् यादृशप्रतियोगितापदेन वह्नित्वावच्छिन्नप्रतियोगितां गृहीत्वा तदवच्छिन्नप्रकारतावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वात् तादृशप्रतियोगितावच्छेदकत्वमेव वह्नित्वेऽस्तीति अव्याप्तिः इत्याशङ्क्य प्रकारतायां भ्रमानिरूपितत्वं निवेशनीयम् । 'घटो नास्ति' इति बुद्धौ अभावांशे वह्नित्वावच्छिन्नप्रतियोगितायाः घटत्वावच्छिन्नत्वेन संसर्गतया भाने संसर्गांशे घटत्वावच्छिन्नत्वशून्यप्रतियोगितायां घटत्वावच्छिन्नत्वावगाहितया तस्याः बुद्धेः

भ्रमत्वमावश्यकमिति तन्निरूपितघटनिष्ठप्रकारतायां भ्रमनिरूपितत्वात् भ्रमानिरूपितत्वं नास्तीति तादृशप्रकारतावच्छेदकधर्मावच्छिन्नानधिकरणत्वमादाय नोक्तदोषावकाश इत्याशयेन आह - **संयोगत्ववह्नित्वावच्छिन्नेति** [पृ.313] ।

यादृशप्रतियोगितासंबन्धावच्छिन्नप्रकारताश्रयानधिकरणत्वम् उपेक्ष्य यादृशप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदकधर्मावच्छिन्नानधिकरणत्व निवेशस्य प्रयोजनमाह - **विशिष्टसत्तावान् जातेरिति** [पृ.313] । यादृशप्रतियोगितासंबन्धावच्छिन्नप्रकारताश्रयानधिकरणत्वं हेतुमतः तादृशप्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकम् इत्युक्तौ 'विशिष्टसत्तावान् जातेः' इत्यत्र अतिव्याप्तिः । विशिष्टसत्तात्वावच्छिप्रतियोगितासंबन्धावच्छिन्नप्रकारताश्रयः शुद्धसत्तापि । तदनधिकरणत्वं हेतुमतः गुणस्य नास्तीति यादृशप्रतियोगितापदेन विशिष्टसत्तात्वावच्छिन्नप्रतियोगिता ग्रहीतुं न शक्यते । किन्तु घटत्वाद्यवच्छिन्नप्रतियोगितैव । तदनवच्छेदकत्वस्य साध्यतावच्छेदके विशिष्टसत्तात्वे सत्त्वात् अतिव्याप्तिः। तद्वारणाय प्रकारतावच्छेदकधर्मावच्छिन्नानधिकरणत्वनिवेशः। तन्निवेशे विशिष्टसत्तात्वावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदकं विशिष्टसत्तात्वमेव । 'विशिष्टसत्ता नास्ति' इति प्रतीतौ विशिष्टसत्तात्वावच्छिन्नप्रतियोगितासंबन्धेन विशिष्टसत्तात्वावच्छिन्नस्यैव अभावांशे प्रकारत्वात् । तथा च विशिष्टसत्तात्वावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदकविशिष्टसत्तात्वावच्छिन्नानधिकरणत्वस्य हेतुमति गुणे सत्त्वात् तादृशप्रतियोगितावच्छेदकमेव साध्यतावच्छेदकविशिष्टसत्तात्वमिति नातिव्याप्तिरिति भावः ।

'सामानाधिकरण्येन' इत्यस्य सार्थक्यमुपपादयति - **वह्नित्वाद्यवच्छिन्नेत्यादिना** [पृ.314] । स्पष्टीकृतमेतत् पूर्वमेव ।

प्रथमलक्षणे एतादृशप्रतियोगिवैयधिकरण्यं न निवेशयितुं शक्यम् इत्याह - **एकमात्रवृत्तिसाध्यकस्थले** [पृ.314] इति। प्रथमलक्षणे साध्यनिष्ठप्रतियोगिताकाभावस्य विशिष्य निवेशात् तत्र प्रतियोगिवैयधिकरण्यनिवेशे साध्यनिष्ठयादृशप्रतियोगिता-संबन्धावच्छिन्नप्रकारतावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतः तादृशप्रतियोगितायाम् अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वक्तव्यम्। तथा सति एकमात्रवृत्तिसाध्यकस्थले 'एतद्रूपवान् एतद्रसात्' इत्यादौ एतद्रूपनिष्ठप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदक - एतद्-रूपत्वावच्छिन्नानधिकरणत्वं हेतुमतः नास्तीति साध्यनिष्ठायाः प्रतियोगिवैयधिकरण्यनिरूपकप्रतियोगिताया अप्रसिद्धया अव्याप्तिः स्यात्। अतः प्रथमलक्षणे प्रतियोगिवैयधिकरण्यमनिवेशितमिति भावः।

ननु 'वह्निमान् धूमात्' इत्यादौ यादृशप्रतियोगितापदेन 'वह्नित्वेन वह्निघटोभयं नास्ति' इति प्रतीतिसिद्धाभावीयायाः वह्नित्वावच्छिन्नप्रतियोगितायाः ग्रहणे तत्संबन्धावच्छिन्नप्रकारता-वच्छेदकवह्निघटोभयत्वावच्छिन्नानधिकरणत्वस्य हेतुमति पर्वते सत्त्वात् तादृशप्रतियोगितावच्छेदकमेव वह्नित्वमिति अव्याप्तिः इत्याशङ्क्य प्रतियोगितायां सामानाधिकरण्येन अनवच्छेदकम् इत्यस्य प्रतियोगितापर्याप्त्यधिकरणवृत्तितया यदवच्छेदकं तद्भिन्न-मिति अर्थविवक्षणात् न दोष इति समाधत्ते - **वह्नित्वादिनेति** [पृ.314]। **उभयाभावम्** [पृ.314]। इत्यस्य वह्निघटोभयाभाव-मित्यर्थः।

गादाधरी

[५१] अन्येषां मतेन 'सामानाधिकरण्येन' इत्यस्य सार्थक्यम्

अन्ये तु - यदि 'घटत्वेन वह्निर्नास्ति', 'वह्नित्वेन घटो नास्ति' इत्यादौ वह्नित्वघटत्वादिरूपसमानाधिकरणधर्मस्यापि

प्रतियोगितावच्छेदकत्वं भासते, अन्यथा तादृशप्रतीतेः प्रतियोगिनिष्ठतत्तद्धर्माणाम् उपलक्षणतया भाने तद्विशिष्टवैशिष्ट्यानवगाहितया तन्निर्विकल्पकानन्तरम् उत्पत्त्यापत्तेः। न च - वह्नित्वघटत्वादेः प्रतियोगितावच्छेदकत्वानवगाहने तन्निर्विकल्पकानन्तरं तादृशाभावबुद्धिरिष्टैव, प्रतियोगितावच्छेदकतया यदवभासते तन्निर्विकल्पकानन्तरम् अभावप्रतीत्यनुपगमात् इति-वाच्यम्। वह्नित्वादिनिर्विकल्पकानन्तरं तथाविधप्रत्ययोपगमे विशेषाभावेन तदुत्तरं वह्नित्वाद्यंशे प्रतियोगितावच्छेदकत्वानवगाहि 'वह्निर्नास्ति' इत्याकारकसमानाधिकरणधर्मावच्छिन्नाभावप्रत्ययस्यापि स्वीकारापत्तेः इत्युच्यते, तदा व्याप्यवृत्तितानिवेशपक्षे वह्नित्वादेः व्याप्यवृत्तिघटत्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकत्वमादाय असंभवप्रसक्तिरित्यालोच्य प्रतियोगिवैयधिकरण्यमनुससार। तदर्थः प्रतियोगितावच्छेदकविशिष्टानधिकरणवृत्तित्वमेव। तथा सत्यपि हेतुमतो घटत्वादिविशिष्टानधिकरणतया वह्नित्वादिना घटाद्यभावमादाय दोषप्रसक्त्या 'सामानाधिकरण्येन' इत्यस्य सार्थक्यसंभवात्।

न च - **प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं** प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकभेदवत्त्वम्। तथा च संयोगत्वाद्यवच्छिन्नघटादिमद्भेदमादाय संयोगात्यन्ताभावस्य प्रतियोगिवैयधिकरण्यापत्तिः। भेदप्रतियोगितावच्छेदकतायां प्रकृतप्रतियोगितासामानाधिकरण्यनिवेशने च 'परे तु' इत्यादिना अभिहितद्वितीयकल्प एव पर्यवसानमिति घटत्वादिना वह्न्याद्यभावस्यापि प्रतियोगिवैयधिकरण्यापत्त्या वह्नित्वादेः तत्प्रतियोगितायां सामानाधिकरण्येन अवच्छेदकतया अव्याप्तेः इति वाच्यम्। व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेदानभ्युपगमेनैव उक्तापत्त्यसंभवात्। 'घटत्वेन पटवान् न' इत्यादौ घटत्वाद्यवच्छिन्नपटात्यन्ताभावस्यैव विषयत्वोपगमात्।

प्रतियोगितावच्छेदकं सामानाधिकरण्येन यत्र अवच्छेदकं तादृशप्रतियोगितावच्छेदकताक एव वा भेदो निवेश्यः ।

अथैवमपि घटत्वाद्यवच्छिन्नवह्न्याद्यभावस्य घटत्वाद्यवच्छिन्नघटादिव्यधिकरणस्य प्रतियोगितावच्छेदकत्वमादाय अव्याप्तिर्दुर्वारैवेति चेत्, न, **सामानाधिकरण्येन प्रतियोगितायाम्** अवच्छेदकं यत् तदवच्छिन्नतत्समानाधिकरणप्रतियोगितावच्छेदकताकभेदस्यैव निवेशनीयत्वात् ।

अथ **वह्नित्वादिना** घटाद्यभावस्य यदि घटत्वादिकं प्रतियोगितावच्छेदकम्, तदा घटादिमति तादृशाभावाप्रसंग इति वह्नित्वघटत्वाद्योरेव अवच्छेदकतापर्याप्तिरुपगन्तव्या । तथा च अनवच्छेदकपदस्य अवच्छेदकतापर्याप्त्यनधिकरणपरतया व्याख्येयतयैव तादृशाभावप्रतियोगितामादाय दोषाप्रसक्तेः 'सामानाधिकरण्येन' इत्यस्य वैयर्थ्यमशक्यवारणमेवेति चेत्, न। **प्रतियोगिविशेषणतापन्न**तदनापन्नयोः अवच्छेदकतावैलक्षण्येन प्रत्येकमेव अवच्छेदकतापर्याप्तेः पर्याप्तिविवक्षामात्रेण प्रतीकारासंभवात् 'सामानाधिकरण्येन' इत्यस्य सार्थक्यम् । तदपि प्रतियोगिविशेषणतापन्नस्य यादृशं विलक्षणमवच्छेदकत्वं तत्पर्याप्त्यनधिकरणत्वलाभायैव । व्यधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्यैव तत्प्रतियोगितावच्छेदकविशिष्टविरोधित्वोपगमेन उक्ताभावस्य घटादिमति वृत्तौ बाधकाभावात् ।

अस्तु वा विलक्षणावच्छेदकतात्वेन प्रत्येकं पर्याप्तयोरपि अवच्छेदकत्वयोः तत्तत्प्रतियोगितावच्छेदकतात्वेन अनुगतयोः समानाधिकरणधर्मव्यधिकरणधर्मद्वये पर्याप्त्यन्तरम् । तादृशानुगतरूपावच्छिन्नपर्याप्त्यधिकरणधर्मावच्छिन्नस्यैव अभावविरोधिता इति नानुपपत्तिः । एवं च ह्रदत्ववह्नित्वोभयावच्छिन्नवह्न्य-

भावमादाय पर्याप्तिनिवेशनव्यावृत्तिप्रदर्शनं समानाधिकरणधर्मस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकत्वपक्षीयव्याप्यवृतित्वघटितलक्षणाभिप्रायेण इति—वदन्ति ।

विवरणम्

व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावावगाहिप्रतीतौ समानाधिकरणधर्मस्यापि प्रतियोगितावच्छेदकत्वं भासत इति मतमवलम्ब्य 'सामानाधिकरण्येन' इत्यस्य सार्थक्यसंपादनार्थं प्रतियोगिवैयधिकरण्यं परिष्करोति - अन्ये तु [पृ.318] इत्यादिना । 'घटत्वेन वह्निर्नास्ति', 'वह्नित्वेन घटो नास्ति' इत्यादि प्रतीतौ तृतीयया व्यधिकरणधर्मस्य यथा प्रतियोगितावच्छेदकत्वं भासते, तथा प्रतियोगिविशेषणतापन्नस्य वह्नित्वघटत्वादिरूपसमानाधिकरणधर्मस्यापि प्रतियोगितावच्छेदकत्वं भासते । अन्यथा प्रतियोगिनिष्ठानां वह्नित्वादिधर्माणां तादृशप्रतीतौ उपलक्षणतया भानं वक्तव्यम् । तथा सति 'घटत्वेन वह्निर्नास्ति' इति प्रतीतेः वह्नित्वविशिष्टवह्निवैशिष्ट्यावगाहित्वं न स्यात् । न चेष्टापत्तिः । वह्नित्वनिर्विकल्पकानन्तरमपि 'घटत्वेन वह्निर्नास्ति' इति प्रतीतेः उत्पत्त्यापत्तेः । न च - तादृशप्रतीत्या वह्नित्वादेः प्रतियोगितावच्छेदकत्वानवगाहने वह्नित्वादिनिर्विकल्पकानन्तरं 'घटत्वेन वह्निर्नास्ति' इति बुद्धिरिष्टैव । प्रतियोगितावच्छेदकतया यद्भासते तन्निर्विकल्पकानन्तरमेव अभावप्रतीतेः अनङ्गीकारात् इति-वाच्यम् । वह्नित्वनिर्विकल्पकानन्तरं 'घटत्वेन वह्निर्नास्ति' इति बुद्धेरुपगमे वह्नित्वनिर्विकल्पकानन्तरं वह्नित्वांशे प्रतियोगितावच्छेदकत्वानवगाहिन्याः 'वह्निर्नास्ति' इत्याकारिकायाः समानाधिकरणधर्मावच्छिन्नाभावप्रतीतेरपि स्वीकारापत्तेः ।

किंच 'अभावबुद्धिः विशिष्टवैशिष्ट्यावगाहिमर्यादां नातिशेते' इति नियमात् विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदक-

प्रकारकनिश्चयस्य कारणत्वात् विशेषणतावच्छेदकविषयक-निर्विकल्पकानन्तरं अभावबुद्धेरसंभवः। तथा च 'घटत्वेन वह्नि-र्नास्ति' इत्यादौ समानाधिकरणधर्मस्यापि प्रतियोगितावच्छेदक-त्वम् आवश्यकमिति व्याप्यवृत्तित्वघटितप्रथमलक्षणे साध्या-भावपदेन घटत्वेन वह्न्यभावस्य ग्रहणेऽपि तत्प्रतियोगिता-वच्छेदकत्वं वह्नित्वस्याप्यस्तीति साध्यतावच्छेदके प्रतियोगितान-वच्छेदकत्वविरहात् 'वह्निमान् धूमात्' इत्यादौ अव्याप्ति इत्यालोच्य प्रतियोगिवैयधिकरण्यघटितलक्षणम् अनुससार। प्रति-योगिवैयधिकरण्यमित्यस्य प्रतियोगितावच्छेदकविशिष्टानधि-करणवृत्तित्वमित्यर्थः। 'वह्निमान् धूमात्' इत्यादौ अभाव-पदेन वह्नित्वेन घटाभावस्य ग्रहणे तस्य प्रतियोगितावच्छेदक-घटत्वविशिष्टानधिकरणपर्वतवृत्तितया लक्षणघटकत्वेन तादृशा-भावप्रतियोगितायां वह्नित्वस्य व्यधिकरणतया अवच्छेदकत्वस-त्वात् अव्याप्तिः। तद्वारणाय 'सामानाधिकरण्येन' इति विशेषणम् इति भावः।

न च प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वमिति [पृ.319]। प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं नाम प्रतियोगिता-वच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवत्त्वम्। इदं हेत्वधिकरणस्य विशेषणम्। 'संयोगी द्रव्यत्वात्' इत्यत्र संयोगा-त्यन्ताभावस्य प्रतियोगितावच्छेदकं यत् संयोगत्वम्, 'तदवच्छिन्ना-वच्छेदकताकभेद' इत्यनेन 'संयोगत्वेन घटवान् न' इति प्रतीति-सिद्धं संयोगत्वरूपव्यधिकरणधर्मावच्छिन्नघटनिष्ठावच्छेदकताक-प्रतियोगिताकभेदं गृहीत्वा तद्वत्त्वस्य हेतुमति वृक्षादौ सत्त्वात् तन्निष्ठाभावपदेन संयोगात्यन्ताभावस्यापि ग्रहीतुं शक्यतया तत्प्रतियोगितावच्छेदकत्वमेव साध्यतावच्छेदके संयोगत्वेऽस्तीति अव्याप्तिः। तद्वारणाय भेदप्रतियोगितावच्छेदकतायां हेत्वधि-करणवृत्त्यभावीयप्रतियोगितासामानाधिकरण्यं निवेश्यते चेत् यादृश-

प्रतियोगितावच्छेदकावच्छिन्नयादृशप्रतियोगिताश्रयवृत्त्यवच्छेदकताकप्रतियोगिताकभेदवत्त्वं हेतुमतः तादृशप्रतियोगितावच्छेदकं यत् साध्यतावच्छेदकमिति 'परे तु' कल्पेऽभिहितद्वितीयकल्प एव पर्यवसानात् 'वह्निमान् धूमात्' इत्यादौ घटत्वेन वह्न्यभावमादाय अव्याप्तिः । तत्प्रतियोगितावच्छेदकघटत्वावच्छिन्नतत्प्रतियोगिताश्रयवह्निनिष्ठावच्छेदकताकप्रतियोगिताको यो भेदः 'घटत्वेन वह्निमान् न' इति भेदः तद्वत्त्वस्य हेतुमति पर्वतादौ सत्त्वात् तादृशप्रतियोगितायां - घटत्वेन वह्न्यभावीयप्रतियोगितायाम् उक्तरीत्या समानाधिकरणधर्मस्य वह्नित्वस्यापि सामानाधिकरण्येन अवच्छेदकत्वात् अनवच्छेदकत्वं नास्तीति अव्याप्तिरिति 'न च' [पृ.319] इत्यादिना शंका ।

तत्समाधानं तु - व्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदः नाङ्गीक्रियते । 'घटत्वेन पटवान् न' इति प्रतीतावपि घटत्वावच्छिन्नपटात्यन्ताभाव एव विषय इति स्वीक्रियते । एवं च यादृशप्रतियोगितापदेन घटत्वेन वह्न्यभावीयप्रतियोगिता ग्रहीतुं न शक्यते । तदवच्छेदकघटत्वावच्छिन्नतदाश्रयवह्निनिष्ठावच्छेदकताकप्रतियोगिताकभेदस्य अप्रसिद्धेः । किं तु घटत्वावच्छिन्नघटाभावीयप्रतियोगितैव ग्राह्या । घटत्वावच्छिन्नघटनिष्ठावच्छेदकताकप्रतियोगिताकभेदस्य 'घटवान् न' इति प्रतीतिसिद्धस्य हेतुमति सत्त्वात् । तादृशप्रतियोगितायां सामानाधिकरण्येन अवच्छेदकं घटत्वम्, अनवच्छेदकं वह्नित्वमिति नाव्याप्तिः ।

व्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदाभ्युपगमेऽपि अव्याप्तिवारणार्थं पक्षान्तरमाह - **प्रतियोगितावच्छेदकं सामानाधिकरण्येन यत्र अवच्छेदकमिति** [पृ.320] । यत्र यस्यां भेदप्रतियोगितावच्छेदकतायां प्रतियोगितावच्छेदकं हेत्वधिकरणवृ-

त्यत्यन्ताभावीयप्रतियोगितावच्छेदकं सामानाधिकरण्येन अवच्छेदकम्, तादृशी या भेदप्रतियोगितावच्छेदकता तन्निरूपकप्रतियोगिताकभेदवत्त्वं हेत्वधिकरणे निवेशनीयम् इत्यर्थः । तथा च एवं निष्कृष्टं लक्षणं संपद्यते—

'यादृशप्रतियोगितावच्छेदकसमानाधिकरण - यादृशप्रतियोगितावच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवत्त्वं हेतुमतः तादृशप्रतियोगितायां सामानाधिकरण्येन अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति' ।

यादृशप्रतियोगितापदेन घटत्वावच्छिन्नघटाभावीयप्रतियोगिता ग्राह्या । तदवच्छेदकं घटत्वम् । तदवच्छिन्नतत्समानाधिकरणावच्छेदकताकप्रतियोगिताकभेदः 'घटवान् न' इति प्रतीतिसिद्धो भेदः । तद्वत्त्वं हेतुमतः अस्ति । तादृशप्रतियोगितायां घटत्वावच्छिन्नघटाभावीयप्रतियोगितायां अनवच्छेदकं वह्नित्वम् इति लक्षणसमन्वय इति भावः ।

अत्र शङ्कते **अथैवमपीति** [पृ.320] । यादृशप्रतियोगितापदेन घटत्वावच्छिन्नवह्न्यभावीयप्रतियोगितापि ग्रहीतुं शक्यते । तदवच्छेदकं यत् घटत्वं तदवच्छिन्नतदाश्रयघटवृत्ति-अवच्छेदकताकप्रतियोगिताकभेदस्य 'घटवान् न' इति प्रतीतिसिद्धस्य हेतुमति सत्त्वात् तादृशप्रतियोगितायां - घटत्वेन वह्न्यभावीयप्रतियोगितायां वह्नित्वस्य सामानाधिकरण्येन अवच्छेदकत्वात् 'वह्निमान् धूमात्' इत्यत्र अव्याप्तिर्दुर्वारा इति शंका ।

समाधत्ते - **सामानाधिकरण्येन प्रतियोगितायाम्** [पृ.320] इति । यादृशप्रतियोगितायां सामानाधिकरण्येन यत् अवच्छेदकं तदवच्छिन्ना तत्समानाधिकरणा च या भेदप्रतियोगितावच्छेदकता तन्निरूपकप्रतियोगिताकभेदवत्त्वं हेतुमति निवेशनीयम् । घटत्वेन

वह्न्यभावीयप्रतियोगितायाः ग्रहणे अस्यां सामानाधिकरण्येन अवच्छेदकं वह्नित्वम्। तदवच्छिन्नतदाश्रयवृत्त्यवच्छेदकताक-प्रतियोगिताकभेदः 'वह्निमान् न' इति प्रतीतिसिद्धभेदः। तद्वत्त्वं हेतुमतः पर्वतादेः नास्तीति यादृशप्रतियोगितापदेन घटत्वेन वह्न्यभावीयप्रतियोगिता ग्रहीतुं न शक्यते। किन्तु घटत्वा-वच्छिन्नघटाभावीयप्रतियोगितैव। तस्यां सामानाधिकरण्येन अवच्छेदकं यत् घटत्वं तदवच्छिन्नतत्समानाधिकरणावच्छेदकताक-प्रतियोगिताकस्य 'घटवान् न' इति भेदस्य हेतुमति सत्त्वात् तादृशप्रतियोगितानवच्छेदकत्वं वह्नित्वेऽस्तीति नाव्याप्तिरिति भावः।

अस्मिन् कल्पे 'सामानाधिकरण्येन' इत्यस्य वैयर्थ्यं शंकते— **अथ वह्नित्वादिनेति** [पृ.320]। वह्नित्वेन घटाभावस्य समा-नाधिकरणघटत्वमात्रं यदि प्रतियोगितावच्छेदकं तदा घटत्व-विशिष्टघटवति भूतले प्रतियोगितावच्छेदकविशिष्टप्रतियोगि-रूपविरोधिसत्त्वेन वह्नित्वेन घटाभावो न स्यात्। अतः वह्नि-त्वेन घटाभावस्य वह्नित्वं घटत्वम् उभयमपि प्रतियोगिता-वच्छेदकमिति वक्तव्यम्। तथा च वह्नित्वेन घटाभावस्य ग्रहणेऽपि तत्प्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वं केवल-वह्नित्वेऽस्तीति अव्याप्त्यप्रसक्तेः 'सामानाधिकरण्येन' इति विशेषणं व्यर्थम्। अनवच्छेदकपदस्य अवच्छेदकतापर्याप्त्यनधिकरणपरतया व्याख्यास्यमानत्वात् इति शंका।

समाधत्ते—**प्रतियोगिविशेषणतापन्नेति** [पृ.320]। वह्नि-त्वेन घटाभावस्य यद्यपि वह्नित्वं घटत्वं च प्रतियोगितावच्छेदकम्, अथापि उभयोः एकस्याः प्रतियोगितावच्छेदकतायाः पर्याप्तिः नाङ्गीक्रियते। एकस्य धर्मस्य प्रतियोगिविशेषणतापन्नत्वात् अपरस्य धर्मस्य प्रतियोगिविशेषणतानापन्नत्वाच्च उभयोः अवच्छे-

दकतावैलक्षण्यस्य आवश्यकत्वात् । एवं च वह्नित्वेन घटाभावस्य ग्रहणे तदीयप्रतियोगितावच्छेदकता या वह्नित्वनिष्ठा तत्पर्याप्त्यधिकरणत्वं वह्नित्वस्यैव अस्तीति वह्नित्वे प्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वविरहेण अव्याप्तिः दुर्वारा । तद्वारणार्थं सामानाधिकरण्येनेति विशेषणमावश्यकमेव । तद्विशेषणेन प्रतियोगिविशेषणतापन्ने प्रतियोगितासमानाधिकरणे धर्मे यादृशं विलक्षणमवच्छेदकत्वमस्ति तत्पर्याप्त्यनधिकरणत्वं साध्यतावच्छेदके लभ्यते । उभयोः एकावच्छेदकतापर्याप्त्यनङ्गीकारे घटत्वविशिष्टघटवति वह्नित्वेन घटाभावः कथं वर्तताम् इत्यत आह-**व्यधिकरणधर्मानवच्छिन्नेति** [पृ.320]। समानाधिकरणप्रतियोगितावच्छेदकविशिष्टः व्यधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्यैव विरोधी। अतः घटवति व्यधिकरणवह्नित्वावच्छिन्नप्रतियोगिताकाभाववृत्तौ न किंचिद्बाधकमिति भावः । अनेन तद्धर्मावच्छिन्नव्यधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्य तद्धर्मावच्छिन्नं विरोधि इति पर्यवस्यति ।

अस्तु वेति [पृ.320] । वह्नित्वेन घटाभावीयप्रतियोगितावच्छेदकता वह्नित्वनिष्ठा अन्या घटत्वनिष्ठा अन्या । तयोः अवच्छेदकतयोः तत्तदवच्छेदकतात्वेन प्रत्येकमेव पर्याप्तिः । परं तु द्वयोः अवच्छेदकतयोः वह्नित्वेन घटाभावीयप्रतियोगितावच्छेदकतात्वेन अनुगतरूपेण उभयत्र पर्याप्त्यन्तरं अङ्गीक्रियते । तादृशानुगतरूपावच्छिन्नपर्याप्त्यधिकरणधर्मावच्छिन्नमेव वह्नित्वेन घटाभावस्य विरोधि । तादृशानुगतरूपावच्छिन्नावच्छेदकतापर्याप्त्यधिकरणवह्नित्व - घटत्वरूपधर्मद्वयावच्छिन्नस्य कस्यचिदभावात् विरोध्यभावेन घटवत्यपि वह्नित्वेन घटाभावस्य सत्त्वमुपपद्यते । प्रकृतलक्षणे अवच्छेदकतापदेन वह्नित्वनिष्ठाम् अवच्छेदकतां गृहीत्वा तत्पर्याप्त्यधिकरणत्वमेव वह्नित्वेऽस्तीति

अव्याप्तेः वारणाय 'सामानाधिकरण्येन' इत्यस्य उपादानम्। अनुगतरूपावच्छिन्नावच्छेदकतापर्याप्त्यनधिकरणत्वं लक्षणे न विवेश्यत इति तात्पर्यम्।

ननु अवच्छेदकतापर्याप्त्यनधिकरणत्वं ह्रदत्ववह्नित्वाभ्यां वह्न्यभावमादाय अव्याप्तिवारणार्थं निवेशनीयमिति वक्ष्यति। तन्न संगच्छते। पर्याप्तिनिवेशेऽपि वह्नित्वनिष्ठा या विलक्षणावच्छेदकता तत्पर्याप्त्यधिकरणत्वस्य वह्नित्वे सत्त्वेन अव्याप्तेः अवारणात् इत्यत आह—**एवं चेति** [पृ.320]। समानाधिकरणधर्मस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकत्वं नास्तीति वदतां मतेन प्रवृत्तं यत् व्याप्यवृत्तित्वघटितं द्वितीयलक्षणं तन्मतानुसारेण पर्याप्तिनिवेशस्य व्यावृत्तिप्रदर्शनम्। तन्मते अवच्छेदकतायाः ह्रदत्ववह्नित्वोभयोः पर्याप्तिस्वीकारात् प्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वस्य वह्नित्वे सत्त्वेन पर्याप्तिं विवेश्य अव्याप्तेः वारयितुं शक्यत्वात् इति भावः।

अत्रेदम् अस्वरसबीजम् - अवच्छेदकतात्वेन व्यासज्यवृत्तित्वाङ्गीकारे 'सामानाधिकरण्येन' इत्यस्य वैयर्थ्यं दुर्वारम्। तदनुपादानेऽपि वह्नित्वेन घटाभावप्रतियोगितावच्छेदकतात्वेन तद्भेदस्य वह्नित्वे सत्त्वात्। न च - तादृशावच्छेदकत्वानि यावन्ति तत्तद्व्यक्त्यवच्छिन्नप्रतियोगिताकभेदकूटं प्रवेश्यैव सार्थक्यमानेयमिति वाच्यम्। तथा सति महानसीयवह्न्यभावमादाय अव्याप्तेः। एवं महानसीयवह्न्यभावप्रतियोगितावच्छेदकताया अपि तत्तदवच्छेदकतात्वेन प्रत्येकं पर्याप्तत्वात् अव्याप्तिः। अतः तत्तत्प्रतियोगितावच्छेदकतात्वेन पर्याप्तिनिवेशावश्यकतया अवच्छेदकतावैलक्षण्यस्य निष्प्रयोजनत्वात् वैयर्थ्यमिति।

दीधितिः

एवं च व्याप्तेः **अव्यभिचारिसंबन्धरूपतापि** संगच्छते। **हेतौ** साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्येव साध्यतावच्छेदके हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात्।

गादाधरी

[५२] व्याप्तेः अव्यभिचारिसंबन्धरूपत्वोपपादनम्

अव्यभिचारिसंबन्धरूपता—अवयवशक्त्या अव्यभिचारिसंबन्धपदप्रतिपाद्यता। तथा च पूर्ववत् नैव **तत्पदस्य** पारिभाषिकता इति भावः।

ननु साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वरूपस्य व्यभिचारपदार्थस्य **तच्छरीरे**ऽनिवेशात् **कथमेवम्** इत्यत आह—**हेताविति**। यथा हेत्वन्वयिसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वं व्यभिचारः, तथा साध्यतावच्छेदकान्वयिनो हेतुसमानाधिकरणाभावप्रतियोगितायाः सामानाधिकरण्येन अवच्छेदकत्वस्यापि **तथात्वादित्यर्थः**।

'वह्निः धूमस्य व्यभिचारी' इत्यत्र अभाववद्वृत्तित्वं व्यभिचारपदार्थः। तदेकदेशे च अभावे षष्ठ्यर्थप्रतियोगितायाः निरूपकत्वसंबन्धेन अन्वयः। प्रतियोगितायाम् आधेयतासंबन्धेन **धूमस्य** अवच्छिन्नत्वसंबन्धेन धूमविशेषणतापन्नधूमत्वस्यान्वय इति धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वलाभः। साध्यतावच्छेदकावच्छिन्नसाध्यान्तर्भावेण न व्यभिचारपदार्थता। **शक्त्यानन्त्यप्रसंगात्, साध्यवाचकपदवैयर्थ्यापाताच्च**। एवं **समानाधिकरणाभावप्रतियोगितायां** सामानाधिकरण्येन अवच्छेदकत्वं व्यभिचारपदार्थः। सामानाधिकरण्ये च व्युत्पत्तिवैचित्र्यात् **प्रथमान्तपदोपस्थाप्यस्यापि** वह्नेः निरूपकत्वेन अन्वयः। वह्न्या-

च्यन्तर्भावेणैव वा शक्तिः। धूमपदं लक्षणया धूमत्वपरम्। आधेयत्वं षष्ठ्यर्थः। अन्वयश्चास्य अवच्छेदकत्वे। निरूपकमिनिप्रत्ययार्थः। तथा च धूमत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगितावच्छेदकतानिरूपको वह्निरित्यन्वयबोधः।

यद्यपि लाघवरूपविनिगमकसत्त्वात् अभाववद्वृत्तित्व एव व्यभिचारपदशक्तिकल्पनमुचितम्, तथापि 'ज्ञेयत्वं वाच्यत्वस्य अव्यभिचारि' इति प्रामाणिकव्यवहारानुरोधात् **उपदर्शितगुरुरूपस्यापि** व्यभिचारपदार्थत्वमावश्यकम्। तत्र वाच्यत्वाभावाप्रसिद्ध्या तदभाववद्वृत्तित्वाभावबोधासंभवात्। उक्तरूपस्य व्यभिचारपदार्थत्वे व्यभिचारस्य अभावोऽव्यभिचारम् इति अव्ययीभावाश्रयणात् ज्ञेयत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वम् अव्यभिचारपदार्थः। इनिप्रत्ययार्थो निरूपकम्। वाच्यत्वपदं वाच्यत्वत्वपरम्। षष्ठ्यर्थश्च आधेयत्वम्। तथा च वाच्यत्वत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकता-निरूपकं ज्ञेयत्वम् इत्यन्वयबोधः।

विवरणम्

व्याप्तेः अव्यभिचारिसंबन्धरूपत्वम् उपपादयति **अव्यभिचारिसंबन्धरूपता** [पृ.328] इत्यादिना। **तत्पदस्येति** [पृ.328]। अव्यभिचारिसंबन्धपदस्य इत्यर्थः। **तच्छरीरे** इति [पृ.328]। चक्रवर्त्युक्तव्याप्तिलक्षणशरीरे इत्यर्थः। **तथात्वात्** [पृ.328] इति। व्यभिचारपदार्थत्वात् इत्यर्थः। **वह्निः धूमस्य व्यभिचारी** [पृ.328] इत्यादि। अभाववद्वृत्तित्वं व्यभिचारपदार्थः। धूमस्येति षष्ठ्याः प्रतियोगित्वमर्थः। तत्र आधेयतासंबन्धेन धूमपदार्थस्य धूमस्य, तद्विशेषणस्य धूमत्वस्य अवच्छिन्नत्वसंबन्धेन च अन्वयः। प्रतियोगितायाः निरूपकतासंबन्धेन व्यभिचारपदार्थैकदेशे अभावेऽन्वयः। इनिप्रत्ययस्य आश्रयतावान् अर्थः। तत्र व्यभिचार-

पदार्थस्य अभाववद्वृत्तित्वस्य निरूपकत्वसंबन्धेन अन्वयः । इनि-प्रत्ययार्थस्य आश्रयस्य अभेदेन वह्नौ अन्वयः । तथा च 'वह्निः धूमस्य व्यभिचारी' इति वाक्यात् धूमनिष्ठधूमत्वावच्छिन्नप्रति-योगितानिरूपकाभाववद्वृत्तित्वनिरूपिताश्रयतावान् वह्निः इति शाब्दबोधः ।

एवं व्यभिचारपदस्य समानाधिकरणाभावप्रतियोगितायां सामानाधिकरण्येन अवच्छेदकत्वम् अर्थः । समानाधिकरण-पदार्थैकदेशे समानाधिकरणत्वे प्रथमान्तार्थस्य वह्नेः निरूपितत्व-संबन्धेन अन्वयः ।

अथ वा वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वं व्यभिचारपदार्थः । धूमपदस्य लक्षणया धूमत्वमर्थः । षष्ठ्याः आधेयत्वमर्थः । तस्य व्यभिचारपदार्थे अवच्छेदकत्वेऽन्वयः । निरूपकं इनिप्रत्ययार्थः । तस्य प्रथमान्तार्थे वह्नौ अभेदेन अन्वयः । तथा च धूमत्वनिष्ठवह्निसमानाधिकरणाभावप्रतियोगितावच्छे-दकतानिरूपकः वह्निः इति शाब्दबोधः ।

उपदर्शितगुरुरूपस्यापीति [पृ.329] । समानाधिकरणा-भावप्रतियोगितायां सामानाधिकरण्येन अवच्छेदकत्वस्यापीत्यर्थः । 'ज्ञेयत्वं वाच्यत्वस्य अव्यभिचारि' इत्यत्र व्यभिचारस्य अभावः अव्यभिचारम्, अव्याभिचारमस्य अस्तीति अव्यभिचारि । अव्य-भिचारपदस्य ज्ञेयत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदक-त्वमर्थः । इनिप्रत्ययार्थः निरूपकत्वम् । वाच्यत्वपदं वाच्यत्व-त्वपरम् । षष्ठ्यर्थः आधेयत्वम् । तस्य अनवच्छेदकतायाम् अन्वयः । तथा च वाच्यत्वत्वनिष्ठं यत् ज्ञेयत्वसमानाधिकरणा-भावप्रतियोगितानवच्छेदकत्वं तन्निरूपकं ज्ञेयत्वमिति शाब्दबोधः ।

गादाधरी

[५३] अव्यभिचारिसंबन्धपदेन चक्रवर्त्युक्तव्याप्तेः लाभप्रकारोपपादनम्

अथ एवमपि अव्यभिचारिसंबन्धपदेन उक्तव्याप्तेः कथं लाभः? न च - अव्यभिचारिपदं तादृशप्रतियोगितानवच्छेदकत्वाश्रयपरम्। संबन्धश्च तदाश्रयसामानाधिकरण्यमिति तल्लाभ इति - वाच्यम्। 'वह्नित्वं धूमाव्यभिचारि' इति प्रयोगाभावात् उक्तधर्मबोधकाव्यभिचारपदसमभिव्याहृतमत्वर्थीयस्य आश्रयत्वाबोधकत्वात्। अव्यभिचारिपदार्थान्वयितावच्छेदकं यद्रूपं तदवच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वबोधकताया व्युत्पत्तिसिद्धत्वात्।

साध्यतावच्छेदकस्य अव्यभिचारिपदार्थत्वे हेतुसमानाधिकरणेत्यादिव्याप्तिबोधस्य अशक्यत्वाच्च इति चेत्, न। 'अव्याभिचारिसंबन्ध' इत्यस्य अव्यभिचारिहेतुनिष्ठसाध्यसामानाधिकरण्यमित्यर्थः। एवं च साध्यतावच्छेदकनिष्ठस्वसमानाधिकरणाभाव प्रतियोगितानवच्छेदकतानिरूपकहेतुनिष्ठसाध्यसामानाधिकरण्यमिति पर्यवसितम्। उक्तलक्षणस्यापि अत्रैवार्थे तात्पर्यम्। न तु यथाश्रुतविशेष्यविशेषणभावे। तदापन्नस्य अव्यभिचारिसंबन्धपदेन बोधयितुमशक्यतया पारिभाषिकताया दुर्वारत्वात्।

न च - यद्रूपावच्छिन्नस्य यस्य व्याप्तित्वं तदन्यरूपेण तस्य अव्यभिचारिसंबन्धपदार्थत्वेऽपि न क्षतिरिति - वाच्यम्। एवं सति साध्याभाववद्वृत्तित्वमात्रस्य व्यभिचारपदार्थेऽपि व्यतिरेकिसाध्यकोक्तव्याप्तेः अव्यभिचारिसंबन्धरूपतोपपत्तेः उक्तधर्मस्य व्यभिचारपदार्थत्वव्यवस्थापनाया अनुपयुक्तत्वात्। उक्तलक्षणेऽपि साध्यसामानाधिकरण्यमन्तर्भाव्य अव्यभिचारिसंबन्धरूपतायाः व्यवस्थापयितुं शक्यत्वात्। साध्यसामानधिकरण्यानन्तर्भावेऽपि प्रतियोगिसमानाधिकरण स्वसमानाधिकरणतादृशयावदभावकत्वरूपपर्यवसितपूर्वलक्षणार्थस्य अव्यभिचारिसंबन्धरूपतासंभवात्।

विवरणम्

अथ एवमपीत्यादि [पृ.331]। अव्यभिचारिसंबन्धपदेन उक्तव्याप्तेः कथं लाभः? न च अव्यभिचारिपदं हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वाश्रयपरम्। संबन्धपदं तदाश्रयसामानाधिकरण्यपरम्। तथा च अव्यभिचारिसंबन्धपदात् हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वाश्रयधर्माश्रयसामानाधिकरण्यम् इति व्याप्तिः लभ्यत इति वाच्यम्। अव्यभिचार पदोत्तर 'इनि' प्रत्ययस्य आश्रयत्वाबोधकत्वात्। यदि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वरूपधर्मबोधकाव्यभिचारपदोत्तर 'इनि' प्रत्ययस्य आश्रयबोधकत्वं स्यात्, तदा वह्नित्वं धूमाव्यभिचारि इति प्रयोगापत्तिः। धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वाश्रयत्वस्य वह्नित्वेऽबाधितत्वात्।

किं च अव्यभिचारिपदार्थः यद्धर्मावच्छिन्नेऽन्वेति तद्धर्मावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वबोधकत्वमेव अव्यभिचारिपदार्थस्य व्युत्पत्तिसिद्धम्। अनवच्छेदकत्वाश्रयस्य अव्यभिचारिपदार्थत्वे तस्य साध्यतावच्छेदके एव अन्वयो वक्तव्य इति अन्वयितावच्छेदकं यत् साध्यतावच्छेदकतावच्छेदकं तदवच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वमेव अव्यभिचारिपदेन बोध्येत। न तु हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वघटितव्याप्तिरित्याक्षेपः।

समाधानं तु—अव्यभिचारिसंबन्ध इत्यस्य अव्यभिचारिहेतुनिष्ठं साध्यसामानाधिकरण्यम् इत्यर्थः। साध्यतावच्छेदकनिष्ठं यत् हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं तन्निरूपको हेतुः अव्यभिचारिपदार्थः। तन्निष्ठं साध्यसामानाधिकरण्यं संबन्धपदार्थ इति फलितम्। हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्य-

मिति लक्षणस्यापि अव्यभिचारिसंबन्धपदलभ्ये साध्यतावच्छेदक-निष्ठेत्यादि पूर्वोक्तार्थे एव तात्पर्यम् । उक्तलक्षणघटकपदार्थानां यादृशो विशेषणविशेष्यभावः तादृशविशेषणविशेष्यभावापन्नस्य लक्षणस्य अव्यभिचारिसंबन्धपदेन अवयवशक्त्या बोधयितुमशक्य-तया पारिभाषिकत्वस्य दुर्वारत्वात् ।

न च - हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसा-ध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यत्वेन रूपेण व्याप्तित्वमस्तु। साध्यतावच्छेदकनिष्ठहेतुसमानाधिकरणाभावप्रतियोगितानवच्छे-दकतानिरूपकहेतुनिष्ठसाध्यसामानाधिकरण्यत्वेन रूपेण अव्यभि-चारिसंबन्धपदार्थत्वमस्तु इति - वाच्यम् ।

एवं सति साध्याभाववद्वृत्तित्वस्य व्यभिचारपदार्थत्वेऽपि साध्याभाववदवृत्तित्वविशिष्ट साध्यसामानाधिकरण्यस्य अव्यभि-चारिसंबन्धपदप्रतिपाद्यतासंभवात् साध्यतावच्छेदके हेतुसमा-नाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य व्यभिचारपदार्थत्व-व्यवस्थापनाया: अनुपयुक्तत्वात् । हेतुसमानाधिकरणाभावप्रति-योगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यत्वेन व्याप्तित्वम्, साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्य-त्वेन अव्यभिचारिसंबन्धपदप्रतिपाद्यत्वम् इत्यपि वक्तुं शक्यत्वात्।

ननु साध्यतावच्छेदकादिभेदेन व्याप्तित्वं नाना । एवं च व्यतिरेकिसाध्यकस्थले अभाववद्वृत्तित्वघटितरूपेण अव्यभिचारि-संबन्धपदप्रतिपाद्यत्वसत्त्वेन तत्र व्यतिरेकिसाध्यतावच्छेदकघटित-रूपान्तरेण व्याप्तित्वसंभवेऽपि केवलान्वयिस्थलीयव्याप्ते: केनापि रूपेण अव्यभिचारिसंबन्धपदप्रतिपाद्यत्वं न संभवतीति व्यभिचार-पदार्थान्तरव्यवस्थापनम् आवश्यकम् इति चेत्, न । यावद्व्याप्ते: अव्यभिचारिसंबन्धरूपता इति नियमाभावात् । अत एवाह - उक्त-लक्षणेऽपीति [पृ.331] । 'यत्समानाधिकरणा' इत्यादि [दीधि-

तिकारीयलक्षणेऽपीत्यर्थः । 'अव्यभिचारो' इत्यस्य यत्समानाधिकरणाः यावन्तोऽभावाः प्रतियोगिसमानाधिकरणाः स हेतुः अर्थः । संबन्धशब्दस्य तन्निष्ठसाध्यसामानाधिकरण्यमर्थः इति भावः ।

ननु साध्यसामानाधिकरण्यान्तर्भावे तत्पदस्य पारिभाषिकता नोच्यते । किं तु निष्प्रयोजनकस्य तस्य अन्तर्भाव एव नास्तीति पारिभाषिकत्वोक्तिसंगतिरित्यत आह - **साध्यसामानाधिकरण्यानन्तर्भावेऽपीति** [पृ.331] । यावदभावकत्वस्य हेतुनिष्ठाधेयत्वरूपत्वात् तस्य उक्तरीत्या अव्यभिचारिसंबन्धरूपत्वात् । तथा च पारिभाषिकमेव अव्यभिचरितत्वमित्यनेन तस्य पारिभाषिकत्वप्रतिपादनमसंगतमिति भावः ।

दीधितिः

अवच्छेदकत्वं च इह तत्पर्याप्त्यधिकरणत्वम् । तेन विशिष्टवह्न्यभावस्य ह्रदत्ववह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्य **न क्षतिः** ।

गादाधरी

[५४] अवच्छेदकत्वपरिष्कारः

अवच्छेदकत्वमिति । अनवच्छेदकमित्यत्र यदवच्छेदकपदं तत्तात्पर्यविषयावच्छेदकत्वमित्यर्थः । तत्पर्याप्त्यधिकरणत्वम् पर्याप्तिसंबन्धेन अवच्छेदकतावत्त्वम् । तथा च पर्याप्तिसंबन्धेनावच्छेदकत्वावच्छिन्नस्य भेदोऽनवच्छेदकपदेन विवक्षित इति भावः । विशिष्टवह्न्यभावस्य प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्य इत्यन्वयः । महानसीयत्वादिविशिष्टवह्न्यभावप्रतियोगितायां महानसीयत्वसहितस्य वह्नित्वस्य अवच्छेदकत्वेऽपि आश्रयत्वसंबन्धेन अवच्छेदकतावदन्यत्वस्य वह्नित्वे दुर्लभत्वात् इति भावः ।

प्रतियोगिविशेषणतापन्नधर्मान्तरसहितवह्नित्वावच्छिन्नाभावमादाय दोषं दर्शयित्वा प्रतियोगिविशेषणतापन्नधर्मस्यैव प्रतियोगितावच्छेदकत्वं प्रतीयत इति नियमानभ्युपगन्तुः व्यधिकरणधर्मावच्छिन्नाभाववादिनः प्रतियोग्यवृत्तिधर्मसहितप्रतियोगिवृत्तिधर्मपर्याप्तप्रतियोगितावच्छेदकताकोऽभावोऽस्ति इति **व्युत्पादनाय** तादृशाभावमादायापि दूषणं दर्शयति-ह्रदत्वेति । उभयावच्छिन्नाभावप्रतियोगितावच्छेदकोभयघटकप्रत्येकस्य अवच्छेदकताया अव्याहतत्वादिति भावः ।

न क्षतिरिति । अवच्छेद्याश्रयविशेषणभावापन्नेषु तदनापन्नेषु च नानाधर्मेषु पर्याप्तं यदवच्छेदकत्वम् पर्याप्तिसंबन्धेन तदवच्छिन्नभेदस्य तत्पर्याप्त्यनवच्छेदकप्रत्येकधर्ममात्रवृत्तिधर्मावच्छेदेन सत्त्वाद् वह्नित्वादेः तादृशप्रतियोगितानवच्छेदकत्वस्य पटत्वाद्यवच्छिन्ने घटपटोभयत्वाद्यवच्छिन्नभेदवत् निष्प्रत्यूहत्वादिति भावः ।

न च-वह्निनिष्ठ ह्रदत्ववह्नित्वोभयावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येन यदवच्छेदकत्वं तद्वह्नित्वमात्रे पर्याप्तम्, ह्रदत्वस्य व्यधिकरणतयैव अवच्छेदकत्वात् इति कथं वह्नित्वस्य तादृशावच्छेदकत्वावच्छिन्नान्यत्वनिर्वाह इति - वाच्यम् ।

यतः, सामानाधिकरण्येन अवच्छेदकम् इत्यस्य तत्प्रतियोगितासमानाधिकरणवृत्ति यत् प्रतियोगितावच्छेदकत्वं तदवच्छिन्नभेदकूटवत्त्वमर्थः ।

इत्थं च ह्रदत्ववह्नित्वोभयावच्छिन्नप्रतियोगितायाः समानाधिकरणवृत्त्यपि एकमेव अवच्छेदकत्वमुभयपर्याप्तम्, तदवच्छिन्नभेदो वह्नित्वेऽव्याहत एवेति ।

विवरणम्

अवच्छेदकत्वम् [पृ.334] इत्यस्य अवच्छेदकत्वपदार्थ इति नार्थः। अवच्छेदकत्वपदाभावात्। अतः व्याचष्टे - **अनवच्छेदकमित्यत्रेति** [पृ.334]।

अनवच्छेदकमित्यत्र यत् अवच्छेदकपदं तत्तात्पर्यविषयीभूतम् अवच्छेदकत्वं अवच्छेदकत्वपर्याप्त्यधिकरणत्वम्। पर्याप्तिसंबन्धेन अवच्छेदकतावत्त्वम्। पर्याप्तिसंबन्धावच्छिन्न-अवच्छेदकत्वनिष्ठ - अवच्छेदकताक - प्रतियोगिताकभेदः अनवच्छेदकपदेन विवक्षितः।

क्वचित् तत्तात्पर्यविषयतावच्छेदकम् इति पाठो दृश्यते। तत् अवच्छेदकत्वमित्यस्य विशेषणम्। तत्पाठेऽयमर्थः—अवच्छेदकपदस्य पर्याप्तिसंबन्धेन अवच्छेदकताविशिष्टतात्पर्यकत्वात् पर्याप्तिसंबन्धेन अवच्छेदकत्वम् अवच्छेदकपदतात्पर्यविषयतावच्छेदकम् इति।

तथा च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठपर्याप्तिसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवत् साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति फलितम्। एवम् अविवक्षणे 'वह्निमान् धूमात्' इत्यादौ हेतुसमानधिकरणः अभावः महानसीयत्वविशिष्टवह्न्यभावः। तत्प्रतियोगितावच्छेदकत्वं महानसीयत्वे वह्नित्वे चास्ति। अतः आश्रयतासंबन्धेन प्रतियोगितावच्छेदकतावान् न इति भेदः वह्नित्वे नास्ति इति अव्याप्तिः। पर्याप्तिविवक्षणे तु पर्याप्तिसंबन्धेन महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावान् न इति भेदः वह्नित्वे वर्तते। पर्याप्तिसंबन्धेन प्रतियोगितावच्छेदकतावत् महानसीयत्ववह्नित्वोभयम्। उभयभेदः प्रत्येकवह्नित्वेऽस्ति। 'एकं नोभयम्' इति प्रतीतेरिष्टत्वात् इति भावः।

पर्याप्त्यनिवेशे विशिष्टवह्न्यभावमादाय अव्याप्तेरुक्तत्वात् पुनः ह्रदत्ववह्नित्वाभ्यां वह्न्यभावमादाय अव्याप्तिकथनं किमर्थमित्यत आह - **प्रतियोगिविशेषणतापन्नेति** [पृ.335]। 'महानसीयवह्निर्नास्ति' इति प्रतीतौ महानसीयत्वं वह्नित्वं चेति उभयं प्रतियोगिविशेषणतापन्नम् । अतः प्रतियोगिविशेषणतापन्नमहानसीयत्वसहितसाध्यतावच्छेदकवह्नित्वावच्छिन्नाभावमादाय यथा अव्याप्तिः भवति, तथा प्रतियोग्यवृत्तिधर्मसहितप्रतियोगिवृत्तिधर्मपर्याप्तावच्छेदकताकप्रतियोगिताकाभावमादायापि अव्याप्तिरस्ति इति प्रदर्शनाय अभावान्तरानुसरणम् । 'ह्रदत्ववह्नित्वाभ्यां वह्निर्नास्ति' इत्यत्र प्रतियोग्यवृत्तिधर्मः ह्रदत्वम् । प्रतियोगिवृत्तिधर्मः वह्नित्वम् । तदुभयावच्छिन्नप्रतियोगिताकाभावः हेत्वधिकरणवृत्तिः । तत्प्रतियोगितावच्छेदकत्वं आश्रयतासंबन्धेन वह्नित्वरूपे साध्यतावच्छेदकेऽस्ति । अतः प्रतियोगितावच्छेदकतावद्भेदो वह्नित्वे नास्ति इति अव्याप्तिः । पर्याप्तिनिवेशे तु पर्याप्तिसंबन्धेन प्रतियोगितावच्छेदकतावत् ह्रदत्ववह्नित्वोभयम् । तद्भिन्नत्वं वह्नित्वेऽस्तीति नाव्याप्तिरिति भावः ।

इति व्युत्पादनाय इति [पृ.335] । अभावान्तरमादाय अव्याप्तिप्रदर्शनं प्रतियोग्यवृत्तिधर्मसहितप्रतियोगिवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावोऽप्यस्ति इति बोधनार्थमिति भावः ।

अवच्छेद्याश्रयेत्यादि [पृ.335] । अवच्छेद्या प्रतियोगिता-तदाश्रये प्रतियोगिनि वर्तमानेषु अवर्तमानेषु च नानाधर्मेषु ह्रदत्ववह्नित्वादिषु पर्याप्तं यत् अवच्छेदकत्वं पर्याप्तिसंबन्धेन तादृशावच्छेदकतावद्भेदः प्रत्येकधर्ममात्रवृत्तिः यो धर्मः तद्व्यक्तित्वरूपः तदवच्छेदेन वर्तते । तथा घटपटोभयपर्याप्तोभयत्वावच्छिन्नभेदः प्रत्येकवृत्तिपटत्वावच्छिन्ने वर्तते तद्वत् इति भावः ।

न च वह्निनिष्ठेत्यादि [पृ.335]। ह्रदत्ववह्नित्वाभ्यां यो वह्न्यभावः तदीयप्रतियोगितायां सामानाधिकरण्येन अवच्छेदकत्वं वह्नित्वमात्रे पर्याप्तम्। ह्रदत्वे सामानाधिकरण्येन अवच्छेदकत्वविरहात्। लक्षणे सामानाधिकरण्येनेति विशेषण-सत्त्वात् अनवच्छेदकपदेन सामानाधिकरण्येन अवच्छेदकतावच्छिन्न-त्वमेव विवक्षणीयम्। तादृशभेदस्तु वह्नित्वे नास्ति। तथा च पर्याप्तिनिवेशेऽपि अव्याप्तिर्दुर्वारा इति भावः।

समाधत्ते—यतः सामानाधिकरण्येनेति [पृ.335]। प्रति-योगितायाः सामानाधिकरण्येन अनवच्छेदकम् इत्यस्य प्रति-योगितासमानाधिकरणधर्मवृत्ति यत् प्रतियोगितावच्छेदकत्वम्, तदवच्छिन्नप्रतियोगिताकभेदवत् इत्यर्थः। प्रतियोगितासमानाधि-करणे वह्नित्वे पृथगवच्छेदकता नाङ्गीक्रियते। एकमेव प्रति-योगितावच्छेदकत्वं समानाधिकरणे वह्नित्वे व्यधिकरणे ह्रदत्वे च पर्याप्तम्। तथा च प्रतियोगितासमानाधिकरणवह्नित्ववृत्ति यत् प्रतियोगितावच्छेदकत्वं पर्याप्तिसंबन्धेन तदवच्छिन्नभेदः वह्नित्वेऽक्षत एव। पर्याप्तिसंबन्धेन प्रतियोगितावच्छेदकत्वा-वच्छिन्नह्रदत्ववह्नित्वोभयभेदस्य वह्नित्वे सत्त्वात् इति नाव्याप्ति-रिति भावः। पूर्वोक्त 'परे तु' मते समानाधिकरणे व्यधिकरणे च धर्मे पृथक् पृथगपि अवच्छेदकता स्वीक्रियत इति विशेषः।

दीधितिः

सत्त्ववति च गुणादौ संयोगाद्यभावोऽपि व्याप्यवृत्तिः। **वक्ष्यमाणं** वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छे-दकत्वमिहापि बोध्यम्। **भवति च** गुणत्वगुणावृत्तित्व द्रव्य-मात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रतियोगिता-वच्छेदकगुणत्वाद्यनतिरिक्तवृत्त्येव संयोगत्वमित्याहुः।

गादाधरी

५५. 'संयोगी सत्त्वात्' इत्यत्र अतिव्याप्तिवारणप्रकारः

ननु संयोगादिसाध्यकसद्धेतौ अव्याप्तिवारणाय तदभावव्यावर्तकव्याप्यवृत्तित्वादिविशेषणोपादाने तत्साध्यकसत्त्वादिरूपव्यभिचारिहेतौ अतिव्याप्तिप्रसङ्गः। अभावान्तरस्यैव लक्षणघटकत्वात् इत्याशंक्य व्यभिचारिहेतुकस्थले संयोगाद्यभावस्य लक्षणघटकत्वप्रदर्शनेन परिहरति - सत्त्ववतीति [पृ.338]। व्याप्यवृत्तिरित्युपलक्षणम्; प्रतियोगिव्यधिकरणश्चेत्यपि बोध्यम्।

अयं भावः - व्याप्यवृत्तित्वमत्र नावच्छिन्नवृत्तिकान्यत्वम्। न वा स्वसमानाधिकरणाभावप्रतियोगित्वसामान्याभावः। प्रतियोगिव्यधिकरणत्वं च न प्रतियोग्यधिकरणावृत्तित्वम्, किं तु अनवच्छिन्नवृत्तिकत्वम्। स्वाधिकरणयत्किंचिद्व्यक्तिनिष्ठाभावाप्रतियोगित्वं वा व्याप्यवृत्तित्वम्। प्रतियोग्यनधिकरणवृत्तित्वं च प्रतियोगिवैयधिकरण्यं संयोगाद्यभावसाधारणम्। हेत्वधिकरणे तथात्वस्य विवक्षितत्वात् सद्धेतुस्थले न तादृशाभावस्य लक्षणघटकता। तत्र गुणादेः हेत्वनधिकरणत्वात्। सत्त्वादिहेतुकस्थले तु तस्य हेत्वधिकरणतया तत्र व्याप्यवृत्तिः प्रतियोगिव्यधिकरणश्च साध्याभावो लक्षणघटक एवेति।

विवरणम्

'सत्त्ववति च गुणादौ' [पृ.338] इति दीधितिग्रन्थमवतारयति

ननु संयोगादिसाध्यकसद्धेताविति [पृ.338]। 'संयोगी द्रव्यत्वात्' इत्यत्र संयोगाभावमादाय अव्याप्तिवारणाय हेतुसमानाधिकरणाभावे व्याप्यवृत्तित्वस्य वा प्रतियोगिव्यधिकरणत्वस्य वा विशेषणस्य उपादाने संयोगसाध्यकव्यभिचारिणि 'संयोगी सत्त्वात्' इत्यत्रातिव्याप्तिः। तत्र साध्याभावस्य संयोगाभावस्य अव्याप्यवृत्तित्वेन लक्षणाघटकतया घटाद्यभावमादाय तत्प्रति-

योगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् इत्याशङ्क्य व्यभिचारिणि संयोगाभावस्य लक्षणघटकत्वं प्रदर्श्य अतिव्याप्तिं परिहरति दीधितिकारः। व्याप्यवृत्तित्वम् अनवच्छिन्नवृत्तिकत्वम्। हेत्वधिकरणे अनवच्छिन्नवृत्तिकत्वस्य विवक्षितत्वात् 'संयोगी सत्त्वात्' इत्यत्र संयोगाभावस्य हेत्वधिकरणे गुणे अनवच्छिन्नवृत्तिकत्वेन लक्षणघटकतया नातिव्याप्तिः। 'संयोगी द्रव्यत्वात्' इत्यत्र सद्धेतौ संयोगाभावस्य हेत्वधिकरणे द्रव्ये निरवच्छिन्नवृत्तिकत्वं नास्तीति तस्य लक्षणाघटकतया नाव्याप्तिः। एवं प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तित्वस्य अभावविशेषणतया नाव्याप्त्यतिव्याप्ती इति भावः।

गादाधरी

५३. पारिभाषिकावच्छेदकत्वनिवेशनेन परिष्कारः

वक्ष्यमाणमिति [पृ.338]। 'सिद्धान्तलक्षण' इत्यादिः। तदवच्छेदकत्वम् - प्रतियोगितावच्छेदकत्वम्। इहापि - एतल्लक्षणेऽपि। बोध्यम् - विवक्षणीयम्। अन्यथा **लघुरूपसमनियतगुरुधर्मावच्छिन्नसाध्यकव्यभिचारिणि अतिव्याप्तेरिति** भावः। **तथा च संयोगादिरूपसाध्याभावस्य व्याप्यवृत्तित्वादिरूपविशेषणेन व्यावर्तनेऽपि न** क्षतिः। व्याप्यवृत्त्यभावान्तरप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य संयोगत्वादौ सत्त्वेन तदवच्छिन्नसाध्यकव्यभिचारिणि अतिव्याप्त्यप्रसक्तेरिति यथाश्रुताशयोऽवगम्यते। स च न संगच्छते। 'सत्तावान् जातेः' इत्यादौ (सत्तात्वस्य) हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यनतिरिक्तवृत्तितायाः **सत्तात्वसाधारणतया** अव्याप्तेर्वारणाय स्व-विशिष्ट - संबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वरूपतदनतिरिक्तवृत्तित्वस्यैव विवक्षणीयतया तद्घटकाभावे व्याप्यवृत्तित्वनिवेशे प्रयोजनविरहेण संयोगादिसाध्यकसद्धेतौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसंयोगत्वादेः **निरुक्तानतिरिक्त-**

वृत्तित्वस्य संयोगत्वादिसाधारण्यविरहेण अव्याप्त्यनवकाशेन हेतुसमानाधिकरणाभावे व्याप्यवृत्तित्वनिवेशनवैयर्थ्यात् । न च-स्वविशिष्टसंबन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणादाने संयोगेन द्रव्यस्य अव्याप्यवृत्तितापक्षे संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसंबन्धावच्छिन्नाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबन्धिनिष्ठाभावीयसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकं तादृशधर्माप्रसिद्धिः । तादृशाभावप्रतियोगितावच्छेदकीभूतसकलधर्मावच्छिन्नानामेव संयोगेन अभावानां **केवलान्वयित्वात्** इति स्वविशिष्टसंबन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणस्य आवश्यकता इति - वाच्यम् ।

संयोगाद्यभावव्यावर्तकस्य **अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वस्य** निवेशने संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसंबन्धावच्छिन्नाभावो गुणादीनामेव व्याप्यवृत्तिः, न तु द्रव्यस्येति तादृशाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबन्धिनिष्ठतादृशाभावप्रतियोगितानवच्छेदकं तादृशधर्माप्रसिद्धितादवस्थ्यात् । प्रतियोगितायाः साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं परित्यज्य एकसंबन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विशेषणत्वपक्षात्वस्यैव अवलम्बनीयतया व्याप्यवृत्तित्वविशेषणवैयर्थ्यस्य दुरुद्धरत्वात् । तस्मात् **वक्ष्यमाणं वा** [पृ.338] । इति ग्रन्थस्य अभावे व्याप्यवृत्तित्वविशेषणं न देयमेव । **तददानेऽपि** संयोगत्वादौ द्रव्यत्वसमानाधिकरणाभावप्रतियोगित्वीयपारिभाषिकावच्छेदकत्वविरहेण अव्याप्त्यप्रसक्तेरित्याशयः ।

तत्र च पारिभाषिकावच्छेदकत्वशरीरनिविष्टस्वविशिष्टसंबन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणमावश्यकम् । अन्यथा तुल्ययुक्त्या सत्तादिहेतुकेऽपि संयोगत्वादौ पारिभाषिकावच्छेदकत्वानिर्वाहादिति हेतुमन्निष्ठाभावेऽपि तद्विशेषणमावश्यकम् ।

अन्यथा अव्याप्तेरित्याशंकां सत्तादिहेतुकस्थले **गुणत्वावच्छिन्न-प्रतियोगितायाः** पारिभाषिकावच्छेदकत्वं संयोगत्वादौ प्रदर्श्य वारयति - **भवति चेति** [पृ.338]। गुणत्वाद्यवच्छिन्नाभावानां व्याप्यवृत्तित्वाभिधानं तु गुणत्वादीनां संयोगत्वविशिष्टसंबन्धि-निष्ठाभावप्रतियोगितानवच्छेदकत्वसूचनाय। **जन्यद्रव्येऽपि** उत्पत्ति-कालावच्छेदेन गुणत्वावच्छिन्नाभावस्य नवीनैः उपगमात् तन्मते गुणत्वस्य संयोगत्वविशिष्टसंबन्धिनिष्ठाभावीयप्रतियोगितानवच्छे-दकत्वं न संभवतीति **गुणावृत्तित्वानुधावनम्**। **'संयोगी गुणान्यत्वे सति सत्त्वात्'** इत्यादौ गुणावृत्तित्वं न **विशिष्टहेतुसमानाधि-करणाभावप्रतियोगितावच्छेदकम्**। अतः संयोगसाध्यकव्यभिचारि-मात्रे यादृशप्रतियोगितावच्छेदकमुपादाय संयोगत्वस्य पारि-भाषिकावच्छेदकत्वं संभवति तादृशं धर्ममाह-**द्रव्यमात्रसमवेतत्वेति** [पृ.338]।

विवरणम्

तथा च संयोगादिरूपसाध्याभावस्येत्यादि [पृ.340]। अत्रायं प्रघट्टकार्थः - व्याप्यवृत्तित्वघटितलक्षणे 'संयोगी सत्त्वात्' इत्यत्र अव्याप्यवृत्तिसाध्यकव्यभिचारिणि साध्याभावस्य संयोगा-भावस्य व्याप्यवृत्तित्वविरहेण लक्षणाघटकतया अभावान्तरमादाय अतिव्याप्तिमाशंक्य सत्त्ववति च गुणादौ संयोगाद्यभावोऽपि व्याप्यवृत्तिः इति ग्रन्थेन हेत्वधिकरणे व्याप्यवृत्तित्वस्य विवक्षित-त्वात् हेत्वधिकरणगुणादौ संयोगाभावस्य व्याप्यवृत्तित्वमस्तीति संयोगाभावस्यापि लक्षणघटकतया नातिव्याप्तिरिति समाधान-मुक्त्वा 'वक्ष्यमाणं वा' इत्यादिग्रन्थेन प्रतियोगितावच्छेदकानति-रिक्तवृत्तित्वरूपस्य पारिभाषिकावच्छेदकत्वस्य गुरुधर्मावच्छिन्न-साध्यकव्यभिचारिणि अतिव्याप्तिवारणाय विवक्षणीयत्वात्, हेत्वधिकरणे व्याप्यवृत्तित्वमिति अविवक्षणेऽपि संयोगाभावस्य अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वविरहेण लक्षणाघटकत्वेऽपि

'संयोगो सत्त्वात्' इत्यत्र हेत्वधिकरणवृत्तिः अवच्छिन्नवृत्तिकान्यश्च यः साध्यनिष्ठप्रतियोगिताकोऽभावः गुणत्वावच्छिन्नाभावः गुणावृत्तित्वाद्यवच्छिन्नाभावश्च तत्प्रतियोगितावच्छेदकं यत् गुणत्वगुणावृत्तित्वादिकं तदनतिरिक्तवृत्तित्वरूपस्य पारिभाषिकावच्छेदकत्वस्य साध्यतावच्छेदके संयोगत्वे सत्त्वात् नातिव्याप्तिः इति समाधानान्तरं दीधितिकारेणोक्तमिति यथाश्रुतदीधितिग्रन्थाशयः अवगम्यते। स च न संगच्छते। तथा हि - अत्र प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वं न तावत् प्रतियोगितावच्छेदकशून्यावृत्तित्वम्। तथा सति 'सत्तावान् जातेः' इत्यादौ हेत्वधिकरणगुणादिवृत्तिः यः गुणकर्मान्यत्वविशिष्टसत्ताभावः तत्प्रतियोगितावच्छेदकं यद्विशिष्टसत्तात्वं तच्छून्यघटाद्यवृत्तित्वं सत्तात्वरूपे साध्यतावच्छेदकेऽस्तीति सत्तात्वस्य अनवच्छेदकत्वविरहात् अव्याप्तिः स्यात्। तद्वारणाय प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वं स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदक - हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वरूपं विवक्षणीयम्। स्वपदेन यस्य पारिभाषिकावच्छेदकत्वम् उपपादनीयम् तद्ग्राह्यम्। हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकम् इत्यनेन यस्य हेत्वधिकरणवृत्त्यभावीयप्रतियोगितानिरूपितस्वरूपसंबन्धरूपम् अवच्छेदकत्वं वर्तते तद्ग्राह्यम्। तथा च एवं लक्षणं संपद्यते - 'हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तत् पारिभाषिकावच्छेदकम्। तद्भिन्नं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः' इति। 'सत्तावान् जातेः' इत्यादौ हेत्वधिकरणगुणादिवृत्त्यभावप्रतियोगितावच्छेदकं गुणकर्मान्यत्वविशिष्टसत्तात्वं सत्तात्वविशिष्टसंबन्धिगुणादिनिष्ठः यः विशिष्टसत्ताभावः तत्प्रतियोगितावच्छेदकमेव भवति, न तु अनवच्छेदकम्। अतः स्वपदेन सत्तात्वं ग्रहीतुं न शक्यते, किंतु घटत्वादिकमेव। तद्विशिष्ट-

संबन्धिनि भूतलादौ घटाद्यभावविरहेण घटत्वादौ स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वसत्त्वात् । अतः पारिभाषिकावच्छेदकं घटत्वादिकम्, तद्भिन्नत्वं सत्तात्वरूपे साध्यतावच्छेदकेऽस्तीति नाव्याप्तिः । एतादृशपारिभाषिकावच्छेदकत्वविवक्षणे हेतुसमानाधिकरणाभावे व्याप्यवृत्तित्वविशेषणम् अनावश्यकम् । 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र अव्याप्तिवारणाय हि तदुपात्तम् । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य कपिसंयोगत्वस्य कपिसंयोगत्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वमस्तीति स्वपदेन कपिसंयोगत्वस्य ग्रहीतुमशक्यतया घटत्वादिकं स्वपदेन गृहीत्वा घटत्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदके घटत्वेऽस्तीत्येवं घटत्वस्य पारिभाषिकावच्छेदकत्वं संपाद्य तद्भिन्नत्वं साध्यतावच्छेदके कपिसंयोगत्वेऽस्तीत्येवं लक्षणसमन्वयात् अव्याप्त्यप्रसक्तेः व्याप्यवृत्तित्वविशेषणवैयर्थ्यात् । तथा च व्याप्यवृत्तित्वमस्तीति कृत्वा उच्यमानं समाधानान्तरं न संगच्छते ।

न च-स्वविशिष्टसंबन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणम् अवश्यं निवेशनीयम् । अन्यथा संयोगवत् संयोगेन द्रव्यमपि अव्याप्यवृत्तीति पक्षे संयोगसंबन्धेन साध्यकस्थले 'वह्निमान् धूमात्' इत्यादौ हेत्वधिकरणपर्वतादिवृत्ति संयोगसंबन्धावच्छिन्नाभावप्रतियोगितावच्छेदकस्य घटत्वादेः घटत्वादिविशिष्टसंबन्धिनि भूतलादौ किञ्चिदवच्छेदेन वर्तते यः संयोगेन घटाद्यभावः तत्प्रतियोगितावच्छेदकत्वमेवास्तीति स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदककस्य धर्मस्य अप्रसिद्धया तद्भिन्नत्वं साध्यतावच्छेदके दुर्घटमिति अव्याप्तिः

स्यात् । स्वविशिष्टसंबन्धिनिष्ठाभावे व्याप्यवृत्तित्वनिवेशे तु घटादिविशिष्टसंबन्धिनि भूतलादौ संयोगेन घटाद्यभावः अव्याप्यवृत्तिरिति व्याप्यवृत्त्यभावान्तरमादाय तत्प्रतियोगितानवच्छेदकत्वं घटत्वादावस्तीति घटत्वादेः पारिभाषिकावच्छेदकत्वोपपत्तिः । एवं च हेतुसमानाधिकरणाभावेऽपि व्याप्यवृत्तित्वम् अवश्यम् निवेशनीयम् । अन्यथा 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ हेतुसमानाधिकरणकपिसंयोगाभावप्रतियोगितावच्छेदकस्य कपिसंयोगत्वस्य कपिसंयोगत्वविशिष्टसंबन्धिनिष्ठव्याप्यवृत्त्यभावप्रतियोगितानवच्छेदकत्वसत्त्वेन कपिसंयोगत्वस्य पारिभाषिकावच्छेदकत्वापत्त्या अनवच्छेदकत्वविरहेण अव्याप्त्यापत्तेः । तथा च व्याप्यवृत्तित्वविशेषणमस्तीति कृत्वा प्रवृत्तस्य ग्रन्थस्य नासंगतिः इति—वाच्यम् ।

स्वविशिष्टसंबन्धिनिष्ठाभावे निवेश्यमानं व्याप्यवृत्तित्वं न निरवच्छिन्नवृत्तिकत्वम् । संयोगाभावस्य वा संयोगेन घटाद्यभावस्य वा गुणादौ निरवच्छिन्नवृत्तिकत्वेन तद्व्यावृत्त्यसंभवात् । किंतु अवच्छिन्नवृत्तिकान्यत्वमेव व्याप्यवृत्तित्वम् । तथा सति संयोगेन साध्यतायां 'वह्निमान् धूमात्' इत्यादौ पारिभाषिकावच्छेदकाप्रसिद्धिः । हेतुसमानाधिकरणाभावपदेन स्वविशिष्टसंबन्धिनिष्ठाभावपदेन वा साध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नघटाद्यभावस्यैव ग्राह्यतया तस्य सर्वस्यापि अवच्छिन्नवृत्तिकतया अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वविशिष्टाभावप्रतियोगितानिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदके अप्रसिद्धमिति पारिभाषिकावच्छेदकाप्रसिद्ध्या अव्याप्तेः दुर्वारत्वात् । अतः प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं परित्यज्य एकसंबन्धावच्छिन्नत्वं विशेषणताविशेषावच्छिन्नत्वं वा निवेशनीयम् । हेतुसमानाधिकरणाभावीययत्संबन्धावच्छिन्नप्रतियोगितावच्छेदकं

स्वविशिष्टसंबन्धिनिष्ठाभावीयतत्संबन्धावच्छिन्नप्रतियोगितानव-च्छेदकम्, अथ वा हेतुसमानाधिकरणाभावीयस्वरूपसंबन्धाव-च्छिन्नप्रतियोगितावच्छेदकं स्वविशिष्टसंबन्धिनिष्ठाभावीयस्वरूप-संबन्धावच्छिन्नप्रतियोगितानवच्छेदकं तत् पारिभाषिकावच्छेदकम्। तद्भिन्नं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः ।

'वह्निमान् धूमात्' इत्यादौ हेतुसमानाधिकरणाभावः घटवत्त्वप्रकारकप्रमाविशेष्यत्वाभावः । तदीयस्वरूपसंबन्धावच्छिन्न-प्रतियोगितायाम् अवच्छेदकं घटवत्त्वप्रकारकप्रमाविशेष्यत्वत्वम् । तच्च स्वविशिष्टेत्यादिविशेषणाक्रान्तम्। स्वं - घटत्वम्। स्वविशिष्ट-घटसंबन्धि घटवद्भूतलम् । तन्निष्ठो यः अभावः न हि घटवत्त्व-प्रकारकप्रमाविशेष्यत्वाभावः । अपि तु पटवत्त्वप्रकारकप्रमा-विशेष्यत्वाभावः । तदीयस्वरूपसंबन्धावच्छिन्नप्रतियोगितान-वच्छेदकं घटवत्त्वप्रकारकप्रमाविशेष्यत्वत्वमिति । तथा च पारि-भाषिकावच्छेदकं घटत्वादिकमेव प्रसिद्धमिति तादृशाप्रसिद्धि-निबन्धनः दोषः नास्तीति भावः ।

तस्मात् **वक्ष्यमाणं वा** [पृ.338] इति ग्रन्थस्य अभावे व्याप्यवृत्तित्वविशेषणं न देयमेव । तददानेऽपि 'संयोगी सत्वात्' इत्यत्र हेतुसमानाधिकरणगुणाद्यभावमादाय तत्प्रतियोगिता-वच्छेदकगुणत्वाद्यनतिरिक्तवृत्तित्वस्य संयोगत्वे सत्त्वेन अति-व्याप्त्यप्रसक्तेः । यदि व्याप्यवृत्तित्वविशेषणं नास्ति तर्हि दीधितौ व्याप्यवृत्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरिक्तवृत्तीति लेखनं कथं संगच्छत इति नाशंकनीयम् । हेतुसमानाधिकरणाभावप्रति-योगितावच्छेदकस्य गुणत्वस्य संयोगत्वविशिष्टसंबन्धिनिष्ठाभाव-प्रतियोगितानवच्छेदकत्वं अस्तीति सूचनार्थं गुणत्वावच्छिन्नाभावे व्याप्यवृत्तित्वकथनम् । संयोगाभाववद्गुणाद्यभावः यद्यव्याप्य-

वृत्तिः स्यात्, तदा गुणत्वादिकं संयोगात्ववत् संयोगत्वविशिष्ट-संबन्धिनिष्ठाभावप्रतियोगितावच्छेदकं स्यात्, न तु तथा अस्ति। गुणाद्यभावस्य व्याप्यवृत्तित्वात् संयोगाभावापेक्षया वैलक्षण्यात्। तथा च व्याप्यवृत्तित्वं न लक्षणघटकम्। अतः 'वक्ष्यमाणं वा' इत्यादेः समाधानान्तरत्वं साधु संगतम् इति।

लघुरूपसमनियतेति [पृ.340]। 'प्रमेयधूमवान् वह्नेः' इत्यादौ व्यभिचारिणि हेतुसमानाधिकरणः य प्रमेयधूमाभावः तत्प्रतियोगितावच्छेदकत्वं लघुनि धूमत्वे एव वर्तते। अनवच्छेदकत्वं साध्यतावच्छेदके गुरुधर्मे प्रमेयत्वविशिष्टधूमत्वेऽस्तीति अतिव्याप्तिः स्यात्। तद्वारणाय पारिभाषिकावच्छेदकत्वं विवक्षणीयमिति भावः।

व्याप्यवृत्तित्वादिरूपविशेषणेन व्यावर्तनेऽपीति [पृ.340]। संयोगाभावे अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वविरहेण हेतुसमानाधिकरणसाध्याभावपदेन संयोगादिरूपसाध्याभावस्य ग्रहीतुमशक्यत्वेऽपि न क्षतिः - नातिव्याप्तिः। व्याप्यवृत्ति यत् अभावान्तरं गुणाद्यभावरूपं तत्प्रतियोगितावच्छेदकगुणत्वाद्यनतिरिक्तवृत्तित्वस्य संयोगत्वादौ सत्त्वेन 'संयोगी सत्त्वात्' इत्यत्र अतिव्याप्त्यप्रसक्तेरिति भावः।

सत्तात्वसाधारणतया [पृ.340] इति। सत्ता विशिष्टसत्तात्वशून्या न भवति। विशिष्टसत्तायाः विशिष्टसत्तात्वाश्रयत्वे तदभिन्नायाः सत्ताया अपि विशिष्टसत्तात्वाश्रयत्वात्। किंतु घटादिकमेव विशिष्टसत्तात्वशून्यम्। तदवृत्तित्वं सत्तात्वेऽस्तीति भावः। **निरुक्तानतिरिक्तवृत्तित्वस्येति** [पृ.340]। स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वरूपस्य अनतिरिक्तवृत्तित्वस्येत्यर्थः। **केवलान्वयित्वात्** इति [पृ.341]। संयोगेन घटवत्यपि देशे किञ्चिदवच्छेदेन संयोगेन घटाभावस्य सत्त्वात्

तच्छून्ये सुतरां तस्य सत्त्वात् संयोगेन घटाद्यभावस्य केवलान्वयित्वमिति भावः ।

अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वस्येति [पृ.341] । निरवच्छिन्नवृत्तिकत्वरूपस्य व्याप्यवृत्तित्वस्य निवेशे व्याप्यवृत्तित्वविशेषणदानेऽपि संयोगाभावस्य वा संयोगेन द्रव्याभावस्य वा व्यावृत्तिः न संभवति । गुणादौ तस्य निरवच्छिन्नवृत्तिकत्वात् । अतः अवच्छिन्नवृत्तिकान्यत्वरूपं व्याप्यवृत्तित्वमेव स्वविशिष्टसंबन्धिनिष्ठाभावे निवेशनीयम् इति भावः ।

तददानेऽपीति [पृ.341] । हेतुसमानाधिकरणाभावे व्याप्यवृत्तित्वविशेषणादानेऽपि 'संयोगी द्रव्यत्वात्' इति सद्धेतौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य संयोगत्वस्य संयोगत्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वविरहेण स्वपदेन संयोगत्वस्य ग्रहीतुमशक्यतया तस्य पारिभाषिकावच्छेदकत्वविरहेण अव्याप्तिविरहात् इति भावः ।

गुणत्वावच्छिन्नाभावप्रतियोगितया [पृ.342] इति । गुणत्वावच्छिन्नाभावप्रतियोगितानिरूपितं पारिभाषिकावच्छेदकत्वम् इत्यर्थः । **जन्यद्रव्येऽपीति** [पृ.342] । 'संयोगी सत्त्वात्' इत्यत्र गुणत्वावच्छिन्नाभावप्रतियोगितानिरूपितं पारिभाषिकावच्छेदकत्वं संयोगत्वे दुर्घटम् । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदके गुणत्वे संयोगत्वविशिष्टसंयोगसंबन्धिजन्यद्रव्यनिष्ठः यः उत्पत्तिकालावच्छिन्नगुणसामान्याभावः तत्प्रतियोगितावच्छेदकत्वस्यैव सत्त्वेन स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वविरहात् संयोगत्वस्य इत्यालोच्य हेतुसमानाधिकरणाभावान्तरमादाय संयोगान्तस्य अवच्छेदकत्वमुपपादयति—**गुणावृत्तित्वेति** [पृ.342] हेत्वधिकरणगुणवृत्तिः यः गुणावृत्त्यभावः तत्प्रतियोगितावच्छेदके गुणावृत्तित्वे संयोगत्वविशिष्ट संबन्धिनिष्ठा-

भावप्रतियोगितानवच्छेदकत्वमस्ति। संयोगत्वविशिष्टसंबन्धिनि जन्यद्रव्येऽपि गुणावृत्तिघटत्वादेः सत्त्वेन गुणावृत्त्यभावविरहात् अभावान्तरमादाय तत्प्रतियोगितानवच्छेदकत्वात् गुणावृत्तित्वस्य। अतः संयोगत्वस्य पारिभाषिकावच्छेदकत्वं सुघटमिति भावः।

द्रव्यमात्रसमवेतत्वावच्छिन्नाभावानुसरणे हेतुमाह - **संयोगी गुणान्यत्वे सति सत्त्वादिति** [पृ.342] संयोगाभाववति कर्मणि गुणान्यत्वविशिष्टसत्तायाः सद्भावात् अयं हेतुः व्यभिचारी। अत्र गुणावृत्त्यभावमादाय संयोगत्वरूपसाध्यतावच्छेदकस्य पारिभाषिकावच्छेदकं दुर्घटम्। हेतुतावच्छेदकविशिष्टहेत्वधिकरणे कर्मणि गुणावृत्तिकर्मत्वस्य सत्त्वेन गुणावृत्त्यभावविरहात्। अतः संयोगसाध्यकव्यभिचारिसामान्ये 'संयोगी सत्त्वात्' इत्यत्र वा 'गुणान्यत्वे सति सत्त्वात्' इत्यत्र वा साध्यतावच्छेदकसंयोगत्वस्य हेतुसमानाधिकरणयादृशाभावप्रतियोगितावच्छेदकं गृहीत्वा पारिभाषिकावच्छेदकत्वं संभवति तादृशाभावं प्रदर्शयति—**द्रव्यमात्रसमवेतत्वेत्यादिना** [पृ.342] तथा च हेत्वधिकरणे गुणेकर्मणि वा द्रव्यमात्रसमवेतं किमपि नास्ति। अतः द्रव्यमात्रसमवेतत्वावच्छिन्नाभावः हेत्वधिकरणवृत्तिः। तत्प्रतियोगितावच्छेदकं द्रव्यमात्रसमवेतत्वं संयोगत्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकम्। संयोगत्वविशिष्टसंयोगसंबन्धिनि द्रव्ये द्रव्यमात्रसमवेतस्य द्रव्यत्वादेः सत्त्वेन द्रव्यमात्रसमवेतत्वावच्छिन्नाभावस्य असत्त्वात्। अतः संयोगत्वस्य द्रव्यमात्रसमवेतत्वमादाय पारिभाषिकावच्छेकत्वं सुघटमिति भावः।

॥ इति चतुर्दशलक्षण्यां चक्रवर्तिलक्षणम् ॥

॥ श्रीः ॥

प्रगल्भलक्षणम्

दीधितिः

'साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यावच्छेदकस्व-समानाधिकरणसाध्याभावत्वकत्वम्; यत्समानाधिकरणसाध्याभाव-प्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं वा व्याप्तिः' -इति तु न युक्तम् । सर्वत्र साध्याभावपदवैयर्थ्यात् ।

गादाधरी

प्रथमलक्षणम्

प्रगल्भस्य लक्षणद्वयम् एकदोषेण दूषयितुमुपन्यस्यति - **साध्यतावच्छेदकविशिष्टेत्यादिना । विशिष्टाभावो** विशेष्यविशेषण-संबन्धाभावरूपः । उभयाभावस्तु परंपरासंबन्धेन द्वित्वाभाव इति मतेन इदं लक्षणम् । अन्यथा व्यधिकरणधर्मावच्छिन्नाभावं विनापि लक्षणसमन्वयसंभवे 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थानुत्थिति-रिति बोध्यम् ।

विवरणम्

प्रगल्भस्य लक्षणद्वयम् [पृ.342] इति । प्रगल्भोक्तं व्याप्ति-लक्षणद्वयं साध्याभावपदवैयर्थ्यरूपेण एकेन दोषेण दूषयितुम् एकदैव उपन्यस्यति-**साध्यतावच्छेदकविशिष्टेत्यादिना** [पृ.350] । प्रथमलक्षणघटकम् अवच्छेदकत्वम् अनतिरिक्तवृत्तित्वरूपम् । स्वपदं हेतुतावच्छेदकावच्छिन्नपरम् । तथा च साध्यतावच्छेदक-विशिष्टसाध्यसामानाधिकरण्यानतिरिक्तवृत्ति यद्धर्मविशिष्टसमा-नाधिकरणसाध्याभावत्वं तद्धर्मवत्त्वं व्याप्तिः ।

सद्धेतौ 'वन्हिमान् धूमात्' इत्यदौ साध्यतावच्छेदकवह्नित्व-विशिष्टवह्न्यधिकरणवृत्तित्वानतिरिक्तवृत्ति धूमत्वविशिष्टसमा-नधिकरणसाध्याभावत्वं भवति । धूमत्वविशिष्टधूमाधिकरणवृत्तिः

साध्याभावः वह्नित्वेन घटाभावः । साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य विवक्षितत्वात् । वन्हित्वेन घटाभावश्च नियमेन साध्यसमानाधिकरणो भवति । अतः साध्यसामानाधिकरण्यानतिरिक्तवृत्तित्वं हेतुसमानाधिकरणवह्नित्वेन घटाभावत्वेऽस्तीति तद्धर्मवत्त्वस्य धूमत्ववत्त्वस्य धूमे सत्त्वात् लक्षणसमन्वयः।

'धूमवान् वह्नेः' इत्यादौ हेतुसमानाधिकरणसाध्याभावः धूमत्वेन धूमाभावोऽपि । स तु साध्यसमानाधिकरणो न भवति । धूमवति पर्वतादौ अवृत्तेः । अतः साध्यसामानाधिकरण्यशून्यधूमत्वेन धूमाभावे हेतुसमानाधिकरणसाध्याभावत्वसत्त्वेन साध्यसामानाधिकरण्यानतिरिक्तवृत्तित्वं हेतुसमानाधिकरणसाध्याभावत्वे नास्तीति नातिव्याप्तिः ।

मिश्रलक्षण एव साध्याभावस्य दीधितिकारैः द्वितीयरीत्या अभिधानात् इदानीं साध्यप्रतियोगिकाभाव एव निविष्ट इत्याशयेन आह - **विशिष्टाभाव** [पृ.350] इति ।

यद्यत्र साध्याभावपदेन साध्यप्रतियोगिकाभावः विवक्षितः, तर्हि सद्धेतौ व्यधिकरणधर्मावच्छिन्नाभावं विनापि विशिष्टाभावम् उभयाभावं वा आदाय लक्षणसमन्वयः भवति । तथा हि - धूमाधिकरणपर्वतवृत्तिः साध्यप्रतियोगिकः अभावः — महानसीयत्वविशिष्टवह्न्यभावः वह्निघटोभयाभावो वा । अस्य अभावद्वयस्य साध्यवह्न्यधिकरणपर्वतवृत्तितया साध्यसामानाधिकरण्यमस्ति । तथा च हेतुसमानाधिकरणसाध्याभावत्वे महानसीयत्वविशिष्टवह्न्यभावत्वे वह्निघटोभयाभावत्वे च साध्याधिकरणवृत्तित्वानतिरिक्तवृत्तित्वसत्त्वात् लक्षणसमन्वयः । इत्थं च व्यधिकरणधर्मावच्छिन्नाभावं विनापि लक्षणसमन्वयसंभवे 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थानुत्थितिशङ्का ।

विशिष्टाभावः विशेष्यविशेषणसंबन्धाभावरूपः । उभयाभावः परंपरासंबन्धेन द्वित्वाभावरूपः । अतः तयोरभावयोः साध्यप्रतियोगिकत्वं नास्ति । विशिष्टाभावस्य विशेष्यविशेषणसंबन्धप्रतियोगिकत्वात् उभयाभावस्य द्वित्वप्रतियोगिकत्वाच्च । अतः साध्यप्रतियोगिकाभावपदेन विशिष्टाभावस्य वा उभयाभावस्य वा ग्रहीतुमशक्यत्वात् वह्नित्वेन वह्न्यभावस्य च हेतुसमानाधिकरणत्वविरहात् व्यधिकरणधर्मावच्छिन्नसाध्यनिष्ठप्रतियोगिताकं घटत्वेन वह्न्यभावमादायैव समन्वयः संभवतीति 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थोत्थितिरिति भावः ।

यद्यपि 'वह्निमान् धूमात्' इत्यादौ तत्तद्व्यक्तित्वावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावमादाय समन्वयः संभवति, तथापि 'द्रव्यं पृथिवीत्वात्' इत्यादौ एकव्यक्तिसाध्यकस्थले तद्व्यक्तित्वावच्छिन्नसाध्याभावस्य हेतुसमानाधिकरणत्वविरहात् व्यधिकरणधर्मावच्छिन्नाभावमादायैव लक्षणसमन्वयः संभवतीति तात्पर्यम् ।

गादाधरी

अथवा साध्याभावपदं साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्न व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावपरमिति ।

विवरणम्

'अथ वा' [पृ.352] इति पक्षे साध्याभावपदेन साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावः विवक्षितः । महानसीयत्वविशिष्टवन्हित्वस्य वा वह्निघटोभयत्वस्य वा वह्निव्यापकतावच्छेदकत्वं नास्तीति तदवच्छिन्नप्रतियोगिताकाभावस्य साध्याभावपदेन ग्रहीतुम् अशक्यतया विशिष्टाभावम् अभयाभावं वा आदाय लक्षणसमन्वयासंभवात् वह्नित्वेन घटाभावमादायैव

समन्वयः कार्यः । तथा च 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थसंगतिरिति भावः ।

गादाधरी

अवच्छेदकत्वम् इह अनतिरिक्तवृत्तित्वम् । न तु स्वरूपसंबन्धविशेषः । यथोक्तधर्मयोः तादृशावच्छेद्यावच्छेदकभावे मानाभावात् । स्वपदं हेतुतावच्छेदकावच्छिन्नपरम् । तथा च साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यानतिरिक्तवृत्ति यद्धर्मविशिष्टसमानाधिकरणसाध्याभावत्वं तद्धर्मवत्त्वं व्याप्तिरिति समुदितार्थः ।

सद्धेतौ साध्यासामानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य हेत्वसमानाधिकरणत्वनियमात् तादृशसाध्याभावत्वं साध्यसामानाधिकरण्यानतिरिक्तवृत्तीति लक्षणसमन्वयः । व्यभिचारिणि तादृशसाध्याभावस्यापि हेतुसमानाधिकरणतया तदतिरिक्तवृत्त्येव तत् इति नातिव्याप्तिः ।

विवरणम्

अवच्छेदकत्वम् इहेत्यादि [पृ.353] । हेतुसमानाधिकरणसाध्याभावत्वे साध्यसामानाधिकरण्यावच्छेदकत्वं यत् लक्षणे विवक्षितम्, तत् न स्वरूपसंबन्धरूपम् । हेतुसमानाधिकरणसाध्याभावत्वसाध्यसामानाधिकरण्ययोः स्वरूपसंबन्धरूपावच्छेद्यावच्छेदकभावे प्रमाणाभावात् । 'धूमवान् वह्नेः' इत्यादौ साध्याभावत्वस्य धूमत्वावच्छिन्नधूमाभाव - धूमत्वावच्छिन्नघटाभाव-उभयसाधारणतया धूमत्वावच्छिन्नघटाभाववृत्तित्वेन साध्याभावत्वस्य साध्यसामानाधिकरण्यावच्छेदकत्वमस्तीति अतिव्याप्तिः स्यात् यदि उक्तधर्मयोः स्वरूपसंबन्धरूपावच्छेद्यावच्छेदकभावः स्वीक्रियेत इति भावः । अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वविवक्षायां तु साध्य-

सामानाधिकरण्यशून्ये धूमत्वेन धूमाभावेऽपि वह्निसमानाधिकरण-साध्याभावत्वसत्त्वात् साध्याभावत्वं न साध्यसामानाधिकरण्यानतिरिक्तवृत्ति। अतः 'धूमवान् वह्नेः' इत्यादौ नातिव्याप्तिरिति भावः।

यद्धर्मविशिष्टेत्यत्र [पृ.353] यद्धर्मपदेन हेतुतावच्छेदकीभूतो धर्मो ग्राह्यः। यद्धर्मविशिष्टसमानाधिकरणसाध्याभावत्वमित्यस्य यद्धर्मविशिष्टसमानाधिकरणत्वविशिष्टं साध्याभावत्वमित्यर्थः। यथाश्रुते साध्याभावे यद्धर्मविशिष्टसमानाधिकरणत्वसत्त्वेऽपि साध्याभावत्वे यद्धर्मविशिष्टसमानाधिकरणत्वविरहात्। समानाधिकरणत्ववैशिष्ट्यं च साध्याभावत्वे सामानाधिकरण्यसंबन्धेन। तथा च यद्धर्मविशिष्टसामानाधिकरण्यविशिष्टं साध्याभावत्वं साध्यसामानाधिकरण्यानतिरिक्तवृत्ति तद्धर्मवत्त्वं व्याप्तिरिति पर्यवसितोऽर्थः।

'वन्हिमान् धूमात्' इत्यादौ धूमत्वविशिष्टधूमसामानाधिकरण्यविशिष्टं साध्याभावत्वं वह्नित्वेन घटाभावत्वम्। तस्य वन्हित्वविशिष्टसामानाधिकरण्यानतिरिक्तवृत्तित्वमस्ति इति लक्षणसमन्वयः।

'धूमवान् वह्नेः' इत्यादौ हेतुतावच्छेदकवह्नित्वविशिष्टवन्हिसामानाधिकरण्यविशिष्टं साध्याभावत्वं धूमत्वावच्छिन्नधूमाभावत्वमपि। तस्य साध्यतावच्छेदकधूमत्वविशिष्टधूमसामानाधिकरण्यानतिरिक्तवृत्तित्वं नास्तीति नातिव्याप्तिरिति भावः।

तादृशसाध्याभावत्वमिति [पृ.353]। हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वमित्यर्थः। **तादृशसाध्याभावस्यापीति** [पृ.353]। साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापीत्यर्थः।

तदतिरिक्तवृत्येव तदिति [पृ.353] । साध्यसामानाधिकरण्याति-रिक्तवृत्येव हेतुसमानाधिकरणसाध्याभावत्वमित्यर्थः ।

गादाधरी

'**गुणान्यत्वविशिष्टसत्तावान्** जातेः' इत्यादौ अतिव्याप्ते-र्वारणाय **साध्यतावच्छेदकविशिष्टेति** [पृ.350] । **साध्याधिकरणत्वं साध्यतावच्छेदकसंबन्धेन** बोध्यम् । तेन संयोगादिना धूमादेर-भावस्य समवायादिना धूमादिमति स्वावयवे वृत्तावपि नाति-व्याप्तिः ।

विवरणम्

साध्यतावच्छेदकविशिष्टेत्यस्य प्रयोजनमाह-**गुणान्यत्वविशिष्टसत्तावान्** [पृ.355] इति । 'गुणान्यत्वविशिष्टसत्तावान् जातेः' इत्यत्र हेत्वधिकरणगुणवृत्तिः साध्याभावः गुणान्यत्वविशिष्टसत्ता-भावः । हेतुसमानाधिकरणसाध्याभावत्वं गुणान्यत्वविशिष्ट-सत्ताभावत्वम् । तस्य साध्यसामानाधिकरण्यानतिरिक्तवृत्ति-त्वमस्ति । साध्यपदेन विशिष्टशुद्धयोरनतिरेकात् शुद्धसत्ताया अपि ग्रहीतुं शक्यतया शुद्धसत्ताधिकरणगुणवृत्तौ गुणान्यत्वविशिष्ट-सत्ताभावे शुद्धसत्तासामानाधिकरण्यनियमात् शुद्धसत्तासामानाधि-करण्यानतिरिक्तवृत्त्येव विशिष्टसत्ताभावत्वमिति । तथा च अति-व्याप्तिः । तद्वारणाय साध्यतावच्छेदकविशिष्टेत्युक्तम् । गुणा-न्यत्वविशिष्टसत्ताभावत्वे गुणान्यत्वविशिष्टसत्तात्वावच्छिन्नसामा-नाधिकरण्यं नास्ति । गुणान्यत्वविशिष्टसत्तात्वावच्छिन्नाधिकरणे द्रव्ये गुणान्यत्वविशिष्टसत्ताभावस्य अवृत्तेः । तथा च गुणान्यत्व-विशिष्टसत्तात्वावच्छिन्नसामानाधिकरण्यातिरिक्तवृत्येव हेतुसमा-नाधिकरणविशिष्टसत्ताभावत्वमिति नातिव्याप्तिरिति भावः ।

साध्याधिकरणत्वं साध्यतावच्छेदकसंबन्धेनेति [पृ.355] । साध्याधिकरणतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेश-

नीयम्। अन्यथा 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि हेतुसमानाधिकरणस्य संयोगसंबन्धावच्छिन्नधूमत्वावच्छिन्नधूमाभावस्य, समवायसंबन्धेन धूमाधिकरणधूमावयववृत्तितया धूमसामानाधिकरण्यानतिरिक्तवृत्तित्वं संयोगसंबन्धावच्छिन्नधूमत्वावच्छिन्नधूमाभावत्वेऽस्तीति अतिव्याप्तिः स्यात्। तद्वारणाय साध्यसामानाधिकरण्यघटकसाध्याधिकरणतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। तन्निवेशे साध्यतावच्छेदकसंयोगसंबन्धेन साध्यस्य धूमस्य अधिकरणं न धूमावयवः। किं तु पर्वतादि। तद्वृत्तित्वं संयोगेन धूमाभावे नास्तीति साध्यसामानाधिकरण्यातिरिक्तवृत्त्येव साध्याभावत्वम् इति नातिव्याप्तिरिति भावः।

गादाधरी

'द्रव्यं विशिष्टसत्त्वात्' इत्यादौ अव्याप्तिवारणाय हेतुतावच्छेदकविशिष्टत्वोपादानम्। तद्विशिष्टाधिकरणत्वं हेतुतावच्छेदकसंबन्धेन बोध्यम्। तेन धूमादिसमवायिनिष्ठवन्हित्वाद्यवच्छिन्नवह्न्याद्यभावस्य वह्न्यादिसामानाधिकरण्यविरहेऽपि न क्षतिः।

विवरणम्

द्रव्यं विष्टिसत्त्वादिति [पृ.356]। हेतुतावच्छेदकविशिष्टत्वानुपादाने 'द्रव्यं विशिष्टसत्त्वात्' इत्यत्र सद्धेतौ हेतोः सत्तायाः अधिकरणे गुणे द्रव्यत्वत्वेन द्रव्यत्वाभावस्य वर्तमानतया तस्याभावस्य साध्यसामानाधिकरण्यं नास्तीति अव्याप्तिः स्यात्। तद्वारणाय हेतुतावच्छेदकविशिष्टत्वनिवेशः। तन्निवेशे हेतुतावच्छेदकगुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्नाधिकरणं न गुणः। अपि तु द्रव्यमेव। तद्वृत्तिः साध्याभावः न द्रव्यत्वत्वेन द्रव्यत्वाभावः, किन्तु द्रव्यत्वत्वेन घटाभावः। तस्य च साध्यसामानाधिकरण्यनियमात् नाव्याप्तिरिति भावः।

तद्विशिष्टाधिकरणत्वम् [पृ.356] इति । हेतुतावच्छेदकविशिष्टाधिकरणत्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वमपि निवेशनीयम् । अन्यथा 'वह्निमान् धूमात्' इत्यादौ धूमत्वविशिष्टधूमस्य समवायसंबन्धेन अधिकरणे धूमावयवे वह्नित्वेन वह्न्यभावस्य वर्तमानतया तस्य च वह्निरूपसाध्यसामानाधिकरण्यं नास्तीत्यव्याप्तिः स्यात् । हेतुतावच्छेदकसंबन्धनिवेशे तु संयोगसंबन्धेन धूमाधिकरणं न धूमावयवः, किं तु पर्वतादिः । तद्वृत्तिः साध्याभावः न वह्नित्वेन वह्न्यभावः, किं तु वह्नित्वेन घटाभाव एव । तस्य साध्यसामानाधिकरण्यमस्ति इति नाव्याप्तिरिति भावः ।

गादाधरी

साध्यहेतुसामानाधिकरण्यघटकवृत्तिद्वयं दैशिकविशेषणतासंबन्धेन बोध्यम् । तेन द्रव्यं सत्त्वादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य द्रव्यत्वत्वावच्छिन्नद्रव्यत्वाद्यभावस्य कालिकसंबन्धेन साध्यवन्महाकालादिवृत्तित्वेऽपि न क्षतिः ।

विवरणम्

साध्यहेतुसामानाधिकरण्यघटकेति [पृ.357] । साध्याधिकरणवृत्तित्वे हेत्वधिकरणवृत्तित्वे च स्वरूपसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा साध्याधिकरणनिरूपितवृत्तित्वे स्वरूपसंबन्धावच्छिन्नत्वानिवेशे 'द्रव्यं सत्वात्' इत्यत्र व्यभिचारिणि हेत्वधिकरणगुणे स्वरूपसंबन्धेन वर्तते यः साध्याभावः द्रव्यत्वत्वेन द्रव्यत्वाभावः तस्य साध्याधिकरणे महाकाले कालिकसंबन्धेन वर्तमानतया हेतुसमानाधिकरणसाध्याभावत्वे साध्यसामानाधिकरण्यानतिरिक्तवृत्तित्वमस्ति इति अतिव्याप्तिः स्यात् । साध्याधिकरणवृत्तित्वे स्वरूपसंबन्धावच्छिन्नत्वनिवेशे तु द्रव्यत्ववति महाकाले द्रव्यत्वत्वेन द्रव्यत्वाभावस्य कालिकसंबन्धेन वृत्तावपि स्वरूपसंबन्धेन अवृत्तेः नातिव्याप्तिः ।

एवं हेत्वधिकरणवृत्तित्वे स्वरूपसंबन्धावच्छिन्नत्वानिवेशे 'सत्तावान् द्रव्यत्वात्' इत्यत्र सद्धेतौ हेत्वधिकरणे द्रव्ये—काले सत्तात्वेन सत्ताभावस्य कालिकसंबन्धेन वर्तमानतया तस्य च साध्याधिकरणे स्वरूपसंबन्धेन वृत्तिर्नास्तीति अव्याप्तिः स्यात्। हेत्वधिकरणवृत्तित्वे स्वरूपसंबन्धावच्छिन्नत्वनिवेशे तु हेत्वधिकरणे काले सत्तात्वेन सत्ताभावस्य स्वरूपसंबन्धेन अवृत्तेः स न लक्षणघटकः। किं तु सत्तात्वेन घटाभाव एव लक्षणघटकः। तस्य च साध्यसामानाधिकरण्यमस्तीति नाव्याप्तिरिति भावः। तथा च यद्धर्मावच्छिन्नहेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावन्निरूपितस्वरूपसंबन्धावच्छिन्नवृत्तित्वत्वविशिष्टसाध्याभावत्वं साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणतावन्निरूपितस्वरूपसंबन्धावच्छिन्नवृत्तित्वानतिरिक्तवृत्ति तद्धर्मवत्त्वम् व्याप्तिरिति पर्यवस्यति।

गादाधरी

यद्यपि हेतुसमानाधिकरणसाध्याभावत्वघटकं अभावत्वरूपं विशेष्यं **व्यतिरेकिसाध्यके साध्यासमानाधिकरणाभावसाधारणम्** इति विशिष्टसाध्यसामानाधिकरण्यशून्यावृत्तित्वरूपं तदनतिरिक्तवृत्तित्वं दुर्वचम्। **तथापि** यावन्तः स्वसमानाधिकरणसाध्याभावाः विशिष्टसाध्यसमानाधिकरणा इत्यर्थस्य विवक्षणीयत्वात् न दोषः।

विवरणम्

यद्यपीत्यादि [पृ.397]। हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वघटकं यत् अभावत्वरूपं विशेष्यम्, तत्र साध्यसामानाधिकरण्यशून्यसमानाधिकरणधर्मावच्छिन्नसाध्याभाववृत्तित्वमस्ति। तथा च अभावत्वरूपे विशेष्ये साध्यसामानाधिकरण्यशून्यवृत्तित्वसत्त्वे हेतुसामानाधिकरण्यविशिष्टसाध्यव्यापकता-

वच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविशिष्टेऽभावत्वे साध्यसामानाधिकरण्यशून्यवृत्तित्वाभावः न संभवति । विशेष्यवृत्तिधर्मप्रतियोगिकविशिष्टानुयोगिकाभावानङ्गीकारात् । तथा च 'वह्निमान् धूमात्' इत्यादावव्याप्तिरिति भावः ।

व्यतिरेकिसाध्यकेति [पृ.358]। 'वह्निमान् धूमात्' इत्यादावित्यर्थः । केवलान्वयिसाध्यके समानाधिकरणधर्मावच्छिन्नसाध्याभावाप्रसिद्ध्या अभावत्वरूपं विशेष्यं व्यधिकरणधर्मावच्छिन्नाभाव एव अस्ति । तस्य च साध्यसामानाधिकरण्यनियमात् साध्यासमानाधिकरणाभावसाधारण्यम् अभावत्वस्य नास्तीति अनतिरिक्तवृत्तित्वस्य सुवचत्वात् नाव्याप्तिरित्यालोच्य व्यतिरेकिसाध्यकेत्युक्तम् । **साध्यासमानाधिकरणाभावसाधारणमिति** [पृ.358] । साध्यसामानाधिकरण्यशून्यः यः अभावः समानाधिकरणधर्मावच्छिन्नसाध्याभावः तद्वृत्तीत्यर्थः ।

तथापीत्यादि [पृ.358] । साध्यसामानाधिकरण्यशून्यावृत्तित्वं न-लक्षणघटकम् । किं तु यावन्तः यत्समानाधिकरणाः साध्याभावाः साध्यतावच्छेदकविशिष्टसाध्यसमानाधिकरणाः तत्त्वं व्याप्तिरिति विवक्षितम् । सद्धेतौ हेतुसमानाधिकरणानां व्यधिकरणधर्मावच्छिन्नाभावानां सर्वेषामपि साध्यसामानाधिकरण्यमस्तीति लक्षणसमन्वयः । असद्धेतौ 'धूमवान् वह्नेः' इत्यादौ हेतुसमानाधिकरणयावत्साध्याभावान्तर्गतस्य धूमत्वेन धूमाभावस्य धूमसामानाधिकरण्यं नास्तीति नातिव्याप्तिरिति भावः ।

गादाधरी

प्रगल्भद्वितीयलक्षणम्

यत्समानाधिकरणेति । यद्रूपविशिष्टसमानाधिकरणेत्यर्थः । तेन 'द्रव्यं गुणकर्मान्यत्वे सति सत्त्वात्' इत्यादौ सत्तासमानाधिकरणद्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वेऽपि न क्षतिः ।

विवरणम्

यत्समानाधिकरणसाध्याभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं व्याप्तिरिति द्वितीयलक्षणम्। यत्पदं यद्धर्मावच्छिन्नपरम्। यद्धर्मपदेन हेतुतावच्छेदकं ग्राह्यम्। प्रमापदं प्रमासामान्यपरम्। साध्यवत्ताज्ञानपदमपि साध्यवत्ताज्ञानसामान्यपरम्। तथा च यद्धर्मावच्छिन्नाधिकरणवृत्ति-साध्याभावविषयके-प्रमासामान्ये साध्यवत्ताज्ञानसामान्यप्रतिबन्धकत्वाभाव: तद्धर्मवत्त्वं व्याप्ति:।

'वह्निमान् धूमात्' इत्यादौ धूमत्वावच्छिन्नाधिकरणवृत्ति: साध्याभाव: साध्यनिष्ठप्रतियोगिताकाभाव: घटत्वेन वह्न्यभाव:। तद्विषयकप्रमायां 'पर्वत: घटत्वेन वह्न्यभाववान्' इत्याकारिकायां साध्यवत्ताज्ञानसामान्यान्तर्गत 'पर्वतो वन्हिमान्' इति ज्ञानं प्रति प्रतिबन्धकत्वं नास्ति। 'पर्वत: घटत्वेन वह्न्यभाववान्' इति प्रमायां सत्यामपि 'पर्वतो वह्निमान्' इति ज्ञानस्योत्पत्ते:। तद्धर्मवत्त्वं धूमत्ववत्त्वं धूमेऽस्तीति लक्षणसमन्वय:।

'धूमवान् वह्ने:' इत्यादौ हेतुतावच्छेदकवह्नित्वावच्छिन्नाधिकरणायोगोलकवृत्ति: य: धूमत्वेन धूमाभाव: तद्विषयकप्रमायां 'अयोगोलकं धूमाभाववत्' इत्याकारिकायां साध्यवत्ताज्ञानं 'अयोगोलकं धूमवत्' इत्याकारकं प्रति प्रतिबन्धकत्वमेव अस्ति, न तु तदभाव:। अत: नातिव्याप्ति:। यद्धर्मविशिष्टसमानाधिकरणेति विवक्षाया: प्रयोजनमाह - **तेन द्रव्यम्** इति [पृ.359]। 'द्रव्य गणकर्मान्यत्वविशिष्टसत्त्वात्' इत्यत्र सद्धेतौ हेतो: सत्ताया, अधिकरणे गुणे वर्तते य: साध्याभाव: द्रव्यत्वत्वेन द्रव्यत्वाभाव: तद्विषयकप्रमायां द्रव्यत्ववत्ताज्ञानं प्रति प्रतिबन्धकत्वमेवास्तीति अव्याप्ति: स्यात्। तद्वारणाय यद्धर्मविशिष्टेत्युक्तम्। तदुक्तौ च हेतुतावच्छेदकं यत् गुणकर्मान्यत्वविशिष्टसत्तात्वं तदवच्छि-

न्नाधिकरणं द्रव्यमेव । तद्वृत्तिः साध्याभावः घटत्वेन द्रव्यत्वाभावः । तद्विषयकप्रमायां द्रव्यत्ववत्ताज्ञातप्रतिबन्धकत्वं नास्ति । 'इदं घटत्वेन द्रव्यत्वाभाववत्' इति प्रमायां सत्यामपि 'इदं द्रव्यम्' इति ज्ञानस्योत्पत्तेः । अतः नाव्याप्तिः ।

माथाघरी

यद्धर्मावच्छिन्नसमानाधिकरण्यशरीरे च हेतुतावच्छेदकसंबन्धेन यद्धर्मावच्छिन्नाधिकरणत्वं निवेशनीयम् । तत्प्रयोजनं च स्फुटमेव ।

अधिकरणवृत्तित्वं च निरवच्छिन्नं ग्राह्यम् । तेन 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ हेतुसमानाधिकरणकपिसंयोगाभावादिविषयकप्रमाया **अव्याप्यवृत्तित्वज्ञानविरहकालिकायाः** साध्यवत्ताज्ञानप्रतिबन्धकत्वेऽपि न क्षतिः ।

विवरणम्

यद्धर्मावच्छिन्नसामानाधिकरण्यशरीरे इति [पृ.361] । यद्धर्मावच्छिन्नसामानाधिकरण्यं नाम यद्धर्मावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तित्वम् । तत्र आधेयतायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा 'वह्निमान् धूमात्' इत्यादौ समवायसंबन्धेन धूमत्वावच्छिन्नाधिकरणधूमावयववृत्तिः यः वह्नित्वेन वह्न्यभावः तत्प्रमायां वह्निमत्ताज्ञानप्रतिबन्धकत्वस्यैव सत्वात् तदभावविरहात् अव्याप्तिः स्यात् । हेतुतावच्छेदकसंबन्धनिवेशे संयोगसंबन्धेन धूमत्वावच्छिन्नाधिकरणं न धूमावयवः, किन्तु पर्वतादिरेव । तद्वृत्तिः साध्याभावः न वह्नित्वेन वह्न्यभावः, किन्तु घटत्वेन वह्न्यभावः । तद्विषयकप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वाभावसत्वात् नाव्याप्तिरिति भावः ।

अधिकरणवृत्तित्वञ्चेति [पृ.361] । यद्धर्मावच्छिन्नाधिकरणवृत्तित्वे निरवच्छिन्नत्वं विशेषणं देयम् । अन्यथा 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र हेत्वधिकरणवृक्षवृत्तिः यः साध्याभावः कपिसंयोगत्वेन कपिसंयोगाभावः तद्विषयकप्रमायां कपिसंयोगाभावस्य अव्याप्यवृत्तित्वज्ञानशून्यकाले कपिसंयोगवत्ताज्ञानप्रतिबन्धकत्वमेवास्ति इति अव्याप्तिः स्यात् । निरवच्छिन्नत्वनिवेशे तु हेत्वधिकरणवृक्षनिरूपितमूलावच्छिन्नवृत्तित्वमेव कपिसंयोगत्वेन कपिसंयोगाभावे वर्तते, न तु निरवच्छिन्नवृत्तित्वम् । तथा च वृक्षनिरूपितनिरवच्छिन्नवृत्तिकः साध्याभावः घटत्वेन कपिसंयोगाभाव एव । तद्विषयकप्रमायां कपिसंयोगवत्ताज्ञानप्रतिबन्धकत्वाभावसत्त्वात् नाव्याप्तिरिति भावः । कपिसंयोगाभावस्य अव्याप्यवृत्तित्वज्ञानकाले 'वृक्षः कपिसंयोगाभाववान्' इति प्रमायाः 'वृक्षः कपिसंयोगी' इति ज्ञानप्रतिबन्धकत्वविरहात् अव्याप्त्यप्रसक्तेः **अव्याप्यवृत्तित्वज्ञानविरहकालिकायाः** [पृ.361] इत्युक्तम् ।

गादाधरी

प्रमायाम् [पृ.350]-**प्रमासामान्ये** । तेन व्यभिचारिणि वातिव्याप्तिः । **समानाधिकरणधर्मावच्छिन्नाभावत्वेन** व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्यापि साध्यवत्ताज्ञानविरोधित्वात् सद्धेतावपि लक्षणगमनासंभव इत्यतो ज्ञानसामान्यमुपेक्ष्य प्रमासामान्यनिवेशनम् । **प्रमापदं च** यावद्भ्रमभिन्नज्ञानपरम् । अत उक्तभ्रमात्मकज्ञानस्य अभावत्वांशे प्रमात्वेऽपि न क्षतिः ।

विवरणम्

प्रमायां प्रमासामान्ये [पृ.361] । इत्यादि । सामान्यपदानुपादाने 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः । वह्न्यधिकरणायोगोलकवृत्तिः यः घटत्वेन धूमाभावः तद्विषयकप्रमायां धूमवत्ताज्ञानप्रतिबन्धकत्वाभावसत्त्वात् । अतः प्रमासामान्ये

इत्युक्तम् । तदुक्तौ च वह्निसमानाधिकरणसाध्याभावविषयक-प्रमासामान्यान्तर्गतायां 'अयोगोलकं धूमत्वेन धूमाभाववत्' इत्याकारिकायां समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयक-प्रमायां धूमवत्ताज्ञानप्रतिबन्धकत्वमेवास्तीति नातिव्याप्तिः । साध्याभावज्ञानसामान्ये इत्यनुक्त्वा साध्याभावप्रमासामान्ये इत्युक्तेः प्रयोजनमाह - **समानाधिकरणधर्मावच्छिन्नाभावत्वेनेति** [पृ.361] । 'वन्हिमान् धूमात्' इत्यादौ हेतुसमानाधिकरणः यः व्यधिकरण-धर्मावच्छिन्नसाध्याभावः घटत्वेन वह्न्यभावः तद्विषयकज्ञानपदेन समानाधिकरणधर्मावच्छिन्नाभावत्वेन रूपेण - वह्नित्वावच्छिन्न-वह्न्यभावत्वेन रूपेण घटत्वावच्छिन्नवह्न्यभावविषयकं यत् भ्रमात्मकज्ञानं तस्यापि ग्रहीतुं शक्यतया अस्य ज्ञानस्य साध्यवत्ता-ज्ञानप्रतिबन्धकत्वमेवास्तीति अव्याप्तिः स्यात् । अतः ज्ञानसामान्ये-त्यनुक्त्वा प्रमासामान्येत्युक्तम् इति भावः ।

ननु प्रमापदनिवेशेऽपि वह्नित्वावच्छिन्नवह्न्यभावत्वेन घटत्वावच्छिन्नवह्न्यभावविषयकभ्रमस्यापि अभावत्वांशे प्रमात्व-सत्त्वात् पुनः अव्याप्तिरित्यत आह-**प्रमापदं चेति** [पृ.362] । किञ्चिदंशेऽपि भ्रमरूपं न भवति यत् ज्ञानं तदेव अत्र प्रमापदेन विवक्षितम् । उक्तभ्रमात्मकज्ञानस्य अभावत्वांशे प्रमात्वेऽपि समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाभाववति समानाधि-करणधर्मावच्छिन्नप्रतियोगिताकत्वावगाहितया प्रतियोगितांशे भ्रमत्वात् भ्रमभिन्नत्वविरहात् न तज्ज्ञानमादाय अव्याप्तिरिति भावः । स्वव्यधिकरणप्रकारावच्छिन्ना या या विषयता तत्तद-निरूपकत्वं यावद्भ्रमभिन्नत्वम् ।

गादाधरी

साध्यवत्ताज्ञानपदमपि तत्सामान्यपरम् । अतः व्यधिकरण-धर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्य तद्धर्मवत्त्वेन साध्यवत्ताज्ञान-विरोधित्वेऽपि न क्षतिः ।

एवं च साध्यपदं साध्यतावच्छेदकविशिष्टपरम् । ज्ञानं च स्वसमानधर्मितावच्छेदककत्वेन स्वविषयीभूताभावप्रतियोगितावच्छेदकसंबन्धसंसर्गकत्वेन च विशेषणीयम् ।

अतः धूमत्वाद्यवच्छिन्नसंयोगसंबन्धावच्छिन्नप्रतियोगिताकधूमाद्यभाववत्ताज्ञानस्य साध्यवत्ताज्ञानसामान्यान्तर्गतं द्रव्यत्वादिना धूमादिप्रकारकं भिन्नधर्मावच्छिन्नविशेष्यकधूमत्वावच्छिन्नप्रकारकं समवायादिसंबन्धेन धूमत्वाद्यवच्छिन्नप्रकारकं च ज्ञानं प्रति अप्रतिबन्धकत्वात्, कामिनीजिज्ञासादेरेव तादृशज्ञानसामान्ये विरोधित्वात् अतिव्याप्तेरनवकाशः ।

विवरणम्

साध्यवत्ताज्ञानपदमपीति [पृ.363] । यथा प्रमापदं प्रमासामान्यपरम्, तथा साध्यवत्ताज्ञानपदं साध्यवत्ताज्ञानसामान्यपरम् । यत्किञ्चित्साध्यवत्ताज्ञानपरत्वे 'वह्निमान् धूमात्' इत्यादौ हेतुसमानाधिकरणघटत्वेन वह्न्यभावावगाहिप्रमायाः 'घटत्वेन वह्निमान्' इत्याकारकं व्यधिकरणधर्मप्रकारेण साध्यावगाहिज्ञानं प्रति प्रतिबन्धकत्वस्य सत्त्वात् प्रतिबन्धकत्वाभावविरहात् अव्याप्तिः स्यात् । साध्यवत्ताज्ञानसामान्यपरत्वे तु वह्नित्वेन वह्न्यवगाहिज्ञानस्यापि साध्यवत्ताज्ञानसामान्यान्तर्गततया तादृशज्ञानं प्रति प्रतिबन्धकत्वविरहात् नाव्याप्तिरिति भावः ।

एवञ्चेति [पृ.364] । साध्यवत्ताज्ञानपदस्य साध्यवत्ताज्ञानसामान्यपरत्वे चेत्यर्थः । साध्यपदं साध्यतावच्छेदकविशिष्टपरम् । अन्यथा 'धूमवान् वह्नेः' इत्यादौ द्रव्यत्वेन रूपेण धूमप्रकारकज्ञानस्यापि साध्यवत्ताज्ञानसामान्यान्तर्गततया तादृशज्ञानं प्रति धूमत्वावच्छिन्नधूमाभावप्रमायाः प्रतिबन्धकत्वाभावसत्त्वात् अतिव्याप्तिः स्यात् । साध्यतावच्छेदकविशिष्टपरत्वे 'द्रव्यवान्' इति ज्ञानस्य धूमत्वावच्छिन्नधूमप्रकारकत्वविरहेण 'धूमवान्' इति

ज्ञानस्यैव धूमत्वावच्छिन्नधूमप्रकारकत्वात् तादृशज्ञानं प्रति धूमाभावप्रकारकप्रमायाः प्रतिबन्धकत्वमेवास्तीति नातिव्याप्तिः । एवं साध्यवत्ताज्ञानं साध्याभावप्रमायां यत् धर्मितावच्छेदकं तत्कत्वेन विशेषणीयम् । अन्यथा 'अयोगोलकं धूमाभाववत्' इति प्रमायां 'पर्वतः धूमवान्' इति ज्ञानप्रतिबन्धकत्वविरहात् अतिव्याप्तिः स्यात् । समानधर्मितावच्छेदककत्वेन विशेषणे तु प्रतिबन्धकज्ञाने अयोगोलकत्वस्य धर्मितावच्छेदकतया तद्धर्मितावच्छेदककं 'अयोगोलकं धूमवत्' इति ज्ञानमेव प्रतिबध्यसाध्यवत्ताज्ञानपदेन ग्राह्यमिति नातिव्याप्तिः । एवं प्रतिबन्धकज्ञानविषयीभूतः यः साध्याभावः तत्प्रतियोगितावच्छेदको यः संबन्धः तत्संसर्गकत्वेन प्रतिबध्यं साध्यवत्ताज्ञानं विशेषणीयम् । अन्यथा 'अयोगोलकं संयोगसंबन्धेन धूमाभाववत्' इत्याकारकप्रमायां 'अयोगोलकं समवायेन धूमवत्' इत्याकारकज्ञानप्रतिबन्धकत्वविरहात् अतिव्याप्तिः स्यात् इति भावः । स्वपदं प्रतिबन्धकप्रमापरम् ।

'अत' [पृ:364] इत्यादिना त्रयाणामपि विशेषणानां प्रयोजनमुच्यते । तथा च यद्धर्मावच्छिन्नहेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतानिरूपित - अधिकरणतानिरूपित-निरवच्छिन्नवृत्तित्वाश्रयसाध्यनिष्ठप्रतियोगिताकाभावविषयकप्रमासामान्ये स्वसमानधर्मितावच्छेदककस्वविषयीभूताभावप्रतियोगितावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिज्ञानत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाभावः तद्धर्मवत्त्वं व्याप्तिरिति लक्षणं पर्यवसन्नम् ।

गादाधरि

प्रगल्भलक्षणद्वयदूषणम्

साध्याभावपदवैयर्थ्यादिति । अत्र च साध्यतावच्छेदकविशिष्टसामानाधिकरण्यावच्छेदकत्वं स्वव्यापकतादृशसामानाधि-

करण्यकत्वम् । तथा च साध्यतावच्छेदकविशिष्टसामानाधिकरण्यत्वं यत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकं तत्त्वं व्याप्तिः इत्येतादृशार्थकत्वे प्रथमलक्षणे न साध्याभावपदवैयर्थ्यम् । यत्समानाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपयत्सामानाधिकरण्यव्यापकतावच्छेदकत्वात् यत्समानाधिकरणसाध्याभावनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपस्य यत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकत्वस्य अतिरिक्ततया तद्घटितलक्षणे यत्सामानाधिकरण्यव्यापकतावच्छेदकत्वस्य अनिवेशात् तद्घटितलक्षणसंभवे प्रकृतलक्षणवैयर्थ्यानवकाशात् । एवं यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकः साध्यवत्ताज्ञानप्रतिबन्धकत्वाभावः तत्त्वम् इत्येतादृशार्थकत्वे द्वितीयलक्षणेऽपि न तद्वैयर्थ्यम् । यत्समानाधिकरणप्रमात्वव्यापकताघटकाभावात् यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकतायाम् अभावान्तरस्यैव निवेशात् इत्यवधेयम् ।

विवरणम्

लक्षणद्वयेऽपि दीधित्युक्तं साध्याभावपदवैयर्थ्यं नास्ति इति क्रमशः उपपादयति अत्र चेत्यादिना । [पृ.365] । प्रथमलक्षणे साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यावच्छेदकत्वं हेतुसमानाधिकरणसाध्याभावत्वे निवेशितम् । तच्च स्वव्यापकतत्कत्वरूपमिति पूर्वं निरूपितम् । तथा च साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यत्वं यद्धर्मविशिष्टसमानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकं तद्धर्मवत्त्वमिति प्रथमलक्षणनिष्कृष्टोऽर्थः। अत्र साध्याभावपदवैयर्थ्यं न संभवति । साध्याभावपदाघटितं व्यापकतावच्छेदकत्वं यद्धर्मविशिष्टसामानाधिकरण्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपम् । साध्याभावपदघटितं व्यापकतावच्छेदकत्वं तु यद्धर्मविशिष्टसमानाधिकरणसाध्याभावत्व-

वन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपम् । अनयोः अभावयोः प्रतियोगितावच्छेदकभेदेन भिन्नतया एकस्मिन् अभावे अपरस्य अभावस्य अप्रवेशात् लाघवानवकाशात् वैयर्थ्याप्रसक्तेः । अभावस्य अभावान्तरादूषकत्वमिति न्यायात् ।

एवं द्वितीयलक्षणे सामान्यपदस्य प्रवेशात् तस्य च व्यापकत्वार्थकत्वात् यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकः साध्यवत्ताज्ञानप्रतिबन्धकत्वाभावः तत्त्वम् इति निष्कृष्टं लक्षणम् । तत्र साध्याभावघटितं व्यापकत्वं यत्समानाधिकरणसाध्याभावविषयकप्रमात्ववन्निष्ठाभावप्रतियोगित्वाभावरूपम् । साध्याभावाघटितं व्यापकत्वं तु यत्समानाधिकरणविषयकप्रमात्ववन्निष्ठाभावप्रतियोगित्वाभावरूपम् । अनयोरपि अभावयोः विलक्षणत्वात् साध्याभावाघटितव्यापकत्वस्य साध्याभावघटितव्यापकत्वे अप्रवेशात् न वैयर्थ्यावकाश इति भावः ।

॥ इति प्रगल्भलक्षणम् ॥

अथ विशारदलक्षणम्

दीधितिः

यत्तु **साध्याभाववति** यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिरिति, तन्न। अनुमित्यविरोधित्वज्ञानस्य अनुमितिहेतुत्वे साध्याभाववद्वृत्तित्वज्ञानस्य अनुमित्यविरोधितया व्यभिचारिण्यतिप्रसङ्गात्।

गादाधरी

लक्षणसमन्वयप्रदर्शनं यन्निष्ठत्वप्रयोजनकथनं च

साध्याभाववतीति। यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः तत्त्वम् इत्यर्थः।

'वह्निमान् धूमात्' इत्यादौ हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिता व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वविषयितैव। सा च न वह्न्यनुमितिं प्रति प्रतिबन्धकतावच्छेदिका। तच्छालिज्ञानस्य अनुमित्यप्रतिबन्धकत्वात्।

व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितापि तादृशी। तद्वतो ज्ञानस्य च **व्यभिचारज्ञानविधया** अनुमितिप्रतिबन्धकत्वात् तादृशविषयितायाः अनुमितिप्रतिबन्धकतावच्छेदकत्वात् नातिव्याप्तिः।

यन्निष्ठत्वानुपादाने धूमाद्यंशे वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वावगाहिभ्रमनिष्ठवह्नित्वेन वह्न्यभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितायाः अपि अनुमितिप्रतिबन्धकतावच्छेदकत्वात् 'वह्निमान् धूमात्' इत्यादौ अव्याप्तिः। अतः तदुपादानम्। तथा च भ्रमविषयवह्न्यभाववद्वृत्तित्वस्य हेतुनिष्ठत्वाभावात् न दोषः।

विवरणम्

साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिः इति विशारदोक्तं लक्षणम्। साध्याभाववति इत्यत्र सप्तम्या निरूपितत्वमर्थः। तस्य वृत्तिपदार्थाधेयतायाम् अन्वयः। यत्पदं हेतुपरम्। अनुमितिविरोधित्वम् इत्यस्य अनुमितिप्रतिबन्धकज्ञानविषयत्वम् इत्यर्थः। तथा च यन्निष्ठसाध्याभाववन्निरूपितवृत्तित्वे प्रकृतानुमितिप्रतिबन्धकज्ञानविषयत्वं नास्ति तत्त्वं व्याप्तिरिति यथाश्रुतार्थः।

'वह्निमान् धूमात्' इत्यादौ धूमनिष्ठं साध्याभाववन्निरूपितवृत्तित्वं व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वमेव। न तु समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वम्। धूमे वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वविरहात्। एवं च धूमनिष्ठं यत् घटत्वेन वह्न्यभाववन्निरूपितवृत्तित्वं तस्य प्रकृतानुमितिप्रतिबन्धकज्ञानविषयत्वं नास्ति। 'धूमः घटत्वेन वह्न्यभाववद्वृत्तिः' इति ज्ञानसत्त्वेऽपि 'पर्वतो वह्निमान्' इति प्रकृतानुमितेः उत्पत्तेः इति लक्षणसमन्वयः।

'धूमवान् वह्नेः' इत्यादौ वह्निनिष्ठं साध्याभाववद्वृत्तित्वं धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वमपि। तस्य 'पर्वतो धूमवान्' इति प्रकृतानुमितिप्रतिबन्धकज्ञानविषयत्वमेवास्ति। 'वह्निः धूमाभाववद्वृत्तिः' इत्याकारकज्ञानदशायां 'पर्वतो धूमवान्' इति अनुमितेरनुत्पत्तेरिति नातिव्याप्तिः।

अस्मिन् यथाश्रुतलक्षणे 'वह्निमान् धूमात्' इत्यादावव्याप्तिः भवति। 'पर्वतो वह्निमान्' इति अनुमितिप्रतिबन्धकं यत् 'धूमः वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तिः', 'घटत्वावच्छिन्नवह्न्यभाववद्वृत्तिश्च' इति भ्रमात्मकं समूहालम्बनं ज्ञानं तद्विषय-

त्वस्यैव धूमनिष्ठघटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वे सत्त्वात् । अतः व्याचष्टे - **साध्याभाववति** [पृ.368] इत्यादिना ।

हेतुनिष्ठसाध्याभाववद्वृत्तित्वे प्रकृतानुमितिप्रतिबन्धकज्ञानविषयत्वाभावमनिवेश्य हेतुनिष्ठसाध्याभाववन्निरूपतवृत्तित्वनिरूपितविषयितायां प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः निवेशनीयः । तथा च यन्निष्ठसाध्याभाववद्वृत्तित्वनिरूपितविषयितायां प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः तत्त्वमिति व्याप्तिलक्षणम् । धूमनिष्ठघटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वस्य प्रकृतानुमितिप्रतिबन्धकपूर्वोक्तसमूहालम्बनज्ञानविषयत्वेऽपि धूमनिष्ठघटत्वावच्छिन्नवह्न्यभाववद्वृतित्वनिरूपितविषयितायाः प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वं नास्ति । 'पर्वतो वह्निमान्' इत्यनुमितिं प्रति वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वनिरूपितविषयिताशालिज्ञानत्वेनैव प्रतिबन्धकतया वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वनिरूपितविषयितायाः प्रतिबन्धकतावच्छेदकत्वेऽपि घटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वनिरूपितविषयितायाः प्रतिबन्धकतावच्छेदकत्वविरहात् । अतः नाव्याप्तिः ।

अत्र गादाधर्यां 'यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितासामान्ये' इत्यस्य यन्निष्ठत्वविशिष्टं साध्याभाववद्वृत्तित्वत्वं तद्विशिष्टनिरूपितविषयितासामान्ये इत्यर्थः । तत्र यन्निष्ठसाध्याभाववद्वृत्तित्वनिरूपितेत्यनुक्त्वा 'यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपिते'त्युक्तेः विषयितासामान्येत्यत्र सामान्यपदस्य च प्रयोजनं पश्चात् भट्टाचार्या एव वक्ष्यन्ति ।

व्यभिचारज्ञानविधया [पृ.368] इति । व्यभिचारज्ञानस्यापि साक्षादनुमितिप्रतिबन्धकत्वमस्ति इति मताभिप्रायेण इदं लक्षणमिति भावः । अथ वा अनुमितिपदम् अनुमितिजनकज्ञानपरम् इति वक्ष्यमाणत्वात् न दोषः ।

साध्याभाववद्वृत्तित्वे यन्निष्ठत्वनिवेशस्य प्रयोजनमाह - **यन्निष्ठत्वानुपादाने** [पृ.368] इति। यन्निष्ठत्वानुपादाने यद्विशेष्यकत्वावच्छिन्नायां साध्याभाववद्वृत्तित्वनिरूपितविषयितायां प्रकृतानुमितिप्रतिबन्धकत्वं नास्ति तत्त्वम्; अथ वा साध्याभाववद्वृत्तित्वनिरूपितविषयितायां यद्धेतुकानुमितिप्रतिबन्धकत्वं नास्ति तत्त्वं वा व्याप्तिलक्षणम्। तथा सति 'वह्निमान् धूमात्' इत्यादौ 'धूमः वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तिः' इत्याकारकं यत् धूमविशेष्यकं वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वप्रकारकं भ्रमात्मकज्ञानं – वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वाभाववति धूमे वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वप्रकारकं - तन्निष्ठायां वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वविशिष्ट - निरूपितविषयितायां धूमविशेष्यकत्वावच्छिन्नायां 'पर्वतो वह्निमान्' इत्याकारकानुमितिप्रतिबन्धकतावच्छेदकत्वमेवास्ति। न तु तदभाव इत्यव्याप्तिः स्यात्। अतः यन्निष्ठत्वं साध्याभाववद्वृत्तित्वे विशेषणम्। तन्निवेशे च भ्रमविषयीभूतं यत् वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वं तस्य धूमनिष्ठत्वाभावात् धूमनिष्ठं यत् घटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वं तन्निरूपितविषयितायाः प्रतिबन्धकतावच्छेदकत्वविरहाच्च नाव्याप्तिरिति भावः।

गादाधरी

विषयितायां साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वस्य प्रयोजनकथनम्

यन्निष्ठपदार्थनिरूपितविषयितासामान्ये यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्ये इति वा यद्युच्यते, तदा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वमेव यत्र समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन भातम्, तादृशज्ञानीयहेतुनिष्ठतथाविधसाध्याभाववद्वृत्तित्वविषयिताया अपि अनुमितिप्रतिबन्धकतावच्छेदकत्वादसंभवः अव्याप्तिर्वा इति। साध्याभाव-

वद्वृत्तित्वत्वविशिष्टनिरूपितत्वं विषयिताविशेषणम् । तादृशभ्रमविषयिता च न साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपिता । तादृशविषयितानिरूपकस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य विशेषणीभूतं यत् समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वं तद्विशिष्टत्वाभावात् ।

विवरणम्

यन्निष्ठपदार्थनिरूपितेत्यादि [पृ.371] । 'यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितासामान्ये' इत्यस्य स्थाने यन्निष्ठपदार्थनिरूपितविषयितासामान्ये इति वा यन्निष्ठसाध्याभाववद्वृत्तित्वनिरूपितविषयितासामान्ये इति वा उच्यताम् । यन्निष्ठस्य साध्याभाववद्वृत्तित्वस्य यन्निष्ठसाध्याभाववद्वृत्तित्वत्वेन निवेशः किमर्थं इति प्रश्नः ।

समाधानं तु - तथा निवेशे 'वह्निमान् धूमात्' इत्यादौ सर्वत्र असंभवः । वस्तुतः धूमनिष्ठं यत् घटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वं तदेव वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वेन रूपेण यस्मिन् ज्ञाने भासते, तादृशं यत् भ्रमात्कं 'वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तिः धूमः' इत्याकारकं ज्ञानं तस्यापि धूमनिष्ठघटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वविषयकत्वात् तस्मिन् ज्ञाने धूमनिष्ठसाध्याभाववद्वृत्तित्वनिरूपितविषयिता वर्तते । तस्याश्च विषयितायाः वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वावच्छिन्ननिरूपकताकत्वेन 'पर्वतो वह्निमान्' इत्याकारकानुमितिप्रतिबन्धकतावच्छेदकत्वमेवास्ति । अतः साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वं विषयिताविशेषणम् । तन्निवेशे भ्रमनिष्ठा या विषयिता सा न वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वविशिष्टनिरूपिता । तादृशविषयितायाः निरूपकं यत् व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वं अर्थात् घटत्वावच्छिन्नवह्न्यभाव-

वद्वृत्तित्वं तस्य वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वविशिष्टत्वविरहात् । तथा च एवं संपन्नम् - धूमनिष्ठस्य घटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वस्य घटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वविशिष्टत्वमेवास्ति । तद्विशिष्टनिरूपितविषयितायां प्रतिबन्धकतावच्छेदकत्वविरहात् न दोषः । प्रतिबन्धकतावच्छेदिकायां वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितायां हेतुनिष्ठतादृशविशिष्टनिरूपितत्वविरहात् न दोषः ।

यत्र विषयविशेषे भ्रमो न कस्यापि जातः, तत्रैव लक्षणसमन्वयादाह - **अव्याप्तिर्वेति** [पृ.371] ।

गादाधरी

न च तद्विशिष्टनिरूपितत्वं यदि तदवच्छिन्ननिरूपकताकत्वम्, तदा समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य तद्भ्रमविषयवृत्तौ असत्त्वेऽपि तन्निष्ठविषयितानिरूपकत्वे व्यधिकरणोभूयावच्छेदकत्वात् भ्रमविषयितायाः तद्विशिष्टनिरूपितत्वमक्षतमेव । यदि च वस्तुगत्या यत्र तद्वैशिष्ट्यं तन्निरूपितत्वमेव विशिष्टनिरूपितत्वम्, तदा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वमेव उक्तभ्रमविषयिताया अक्षतमिति कथं तद्व्यावृत्तिरिति **वाच्यम्** ।

विशेषणीभूतधर्मान्तरविशिष्टेन व्यावर्त्यमानस्य विशेष्यस्य भाने विशेषणांशे प्रकारीभवत्यां व्यक्तौ विशेष्यसंबन्धितावच्छेदकताया भानात् साध्याभाववद्वृत्तित्वत्वरूपविशेषणविशिष्ट **विषयेण निरूपकीभूय** विषयिताव्यावर्तने व्यावर्तकविषयस्य आश्रयतया व्यावर्तकं यत्साध्याभाववद्वृत्तितात्वं तस्यापि निरूपकतावच्छेदकीभूय विषयिताव्यावर्तकत्वात् उक्तभ्रमविषयिताव्यावृत्तिः । **तद्व्यावर्तकविषयाव्यावर्तकस्य** तन्निष्ठसाध्याभाववद्वृत्तितात्वस्य

तादृशविषयितानिरूपकतानवच्छेदकत्वात् इति तादृशविषयिताया लक्षणाघटकत्वात् ।

एवं च उक्तभ्रमविषयिताव्यावर्तकतयैव साध्याभाववत्पदसार्थ-क्यम् । तादृशविषयिताया उक्तक्रमेण हेतुनिष्ठसाध्याभाववद्-वृत्तित्वत्वविशिष्टानिरूपितत्वेऽपि हेतुनिष्ठाधेयतात्वविशिष्टनिरू-पितत्वानपायात् ।

विवरणम्

'न च तद्विशिष्टनिरूपितत्वम्' इत्यादि **'वाच्यम्'** [पृ.373]। इत्यन्तस्य अयं भावः - 'यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्ट-निरूपितविषयितासामान्ये' इत्यत्र विषयितायां साध्याभाववद्-वृत्तित्वत्वविशिष्टनिरूपितत्वं यदि साध्याभाववद्वृत्तित्वत्वाच्छिन्न-निरूपकताकत्वं तदा वह्नित्वत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वेन घटत्वावच्छिन्नवह्नयभाववद्वृत्तित्वावगाहि यत् भ्रमात्मकज्ञानं तन्निष्ठविषयितायां वह्नित्वावच्छिन्नवह्नयभाववद्वृत्तित्वत्वा-वच्छिन्ननिरूपकताकत्वम् अक्षतमेव । यथा रजतत्वेन शुक्त्यवगाहि-भ्रमे भ्रमविषयशुक्तौ रजतत्वासत्वेऽपि रजतत्वावच्छिन्नशुक्तिनिष्ठ-निरूपकताकत्वं शुक्तिनिरूपितविषयितायां भ्रमनिष्ठायां वर्तते । तद्वत् वह्नित्वावच्छिन्नवह्नयभाववद्वृत्तित्वत्वस्य भ्रमविषयीभूते घटत्वावच्छिन्नवह्नयभाववद्वृत्तित्वे असत्वेऽपि वह्नित्वावच्छिन्न-वह्नयभाववद्वृत्तित्वत्वावच्छिन्ना या घटत्वावच्छिन्नवह्नयभाव-वद्वृत्तित्वनिष्ठा निरूपकता तत्कत्वं भ्रमनिष्ठायां घटत्वावच्छिन्न-वह्नयभाववद्वृत्तित्वनिरूपितविषयितायाम् अस्त्येव । तथा च साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वविशेषणे दत्तेऽपि भ्रमीय-विषयितायाः व्यावृत्त्यसंभवात् अव्याप्तितादवस्थ्यम् । यदि च वस्तुगत्या यत् साध्याभाववद्वृत्तित्वत्वविशिष्टं तन्निरूपितत्वमेव विषयितायां विशिष्टनिरूपितत्वम्, तदापि भ्रमविषयितायाः व्या-

वृत्तिर्न संभवति । साध्याभाववद्वृत्तित्वत्वम् इत्यनेन व्यधिकरण-धर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वं गृहीत्वा वस्तुतः तद्विशिष्टं यत् घटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वं तन्निरूपितत्वस्य भ्रम-विषयितायां सत्त्वात् तस्याश्च अनुमितिप्रतिबन्धकतावच्छेदकत्वात् अव्याप्तितादवस्थ्यम् । तथा च उभयथापि दोष इति ।

विशेषणीभूतधर्मान्तरविशिष्टेनेत्यादि [पृ.373] ग्रन्थस्य अयम् आशयः - विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणान्तरविशि-ष्टेन विशेषणेन व्यावर्त्यमानं विशेष्यं भासते । तदानीं विशेषणांशे विशेषणीभूते धर्मे विशेष्यसंबन्धितावच्छेदकत्वं भासते । विशेष्यसंबन्धितावच्छेदकत्वं च विशेष्यनिरूपकतावच्छेदकत्वम् ।

यथा 'भूतलं घटवत्' इत्याकारिकायां घटत्वविशिष्टवैशि-ष्ट्यावगाहिन्यां बुद्धौ घटत्वरूपविशेषणान्तरविशिष्टेन घटेन व्यावर्त्यमानं विशेष्यं भूतलं भासते । तदा विशेषणांशे घटे प्रकारीभूते घटत्वे विशेष्यभूतलसंबन्धितावच्छेदकत्वं भासते । भूतलनिरूपकतावच्छेदकत्वं भासत इति यावत् । भूतलनिरूप-कतावच्छेदकत्वं नाम भूतलनिष्ठाधिकरणतानिरूपिताधेयतावच्छे-दकत्वम् । विशेषणे वस्तुतो यो धर्मः वर्तते, तस्यैव विशेष्यसंब-न्धितावच्छेदकत्वम् । प्रकृते साध्याभाववद्वृत्तित्वत्वविशिष्ट-निरूपितत्वं विषयितायां यदि विशेषणम्, तदा विषयिता विशेष्य-भूता । निरूपितत्वसंबन्धेन साध्याभाववद्वृत्तित्वं विषयितायां विशेषणम् । साध्याभाववद्वृत्तित्वे साध्याभाववद्वृत्तित्वत्वं विशेषणम् । तथा च साध्याभाववद्वृत्तित्वत्वरूपविशेषणान्तर-विशिष्टेन साध्याभाववद्वृत्तित्वरूपविशेषणेन व्यावर्त्यमानायाः विषयिताया भाने विशेषणे साध्याभाववद्वृत्तित्वे विशेषणं यत् साध्याभाववद्वृत्तित्वत्वं तत्र विशेष्यभूता या विषयिता तत्संबन्धि-तावच्छेदकत्वं तन्निरूपकतावच्छेकत्वरूपं भासते । साध्याभाववद्-

वृत्तित्वत्वपदेन समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य ग्रहणे तस्य विशेषणे व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेऽविद्यमानस्य विशेष्यभूतविषयितानिरूपकतावच्छेत्वं न संभवति। तथा च समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्ननिरूपकताकत्वं भ्रमीयविषयितायां नास्तीति तस्याः विशिष्टनिरूपितविषयितापदेन ग्रहीतुमशक्यतया तस्याः प्रतिबन्धकतावच्छेदकत्वेऽपि नाव्याप्तिः। साध्याभाववद्वृत्तित्वत्वपदेन व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य ग्रहणेऽपि तस्य वस्तुतः साध्याभाववद्वृत्तित्वरूपविशेषणवृत्तित्वेऽपि तत्र प्रकारतया अभानात् व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्ननिरूपकताकत्वं उक्तभ्रमीयविषयितायां नास्तीति तस्याः विशिष्टनिरूपितविषयितापदेन ग्रहणं न संभवतीति न तामादाय अव्याप्तिः। तथा च विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेष्यस्य वस्तुतः विशेषणे वर्तमानं विशेषणे प्रकारतया भासमानं च यद्विशेषणान्तरं तदवच्छिन्ननिरूपकताकत्वमेव अङ्गीक्रियते। तदनुसारेण प्रकृते एवं परिष्कारः कर्तव्यः—

यन्निष्ठ-साध्याभाववद्वृत्तित्वत्ववन्निष्ठसाध्याभाववद्वृत्तित्वत्वावच्छिन्ननिरूपकताकविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः तत्त्वं व्याप्तिः।

स्वाश्रयनिष्ठत्व - स्वावच्छिन्नत्वोभयसंबन्धेन साध्याभाववद्वृत्तित्वत्वविशिष्टा या निरूपकता तत्कविषयिता साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितापदेन विवक्षिता इति निर्गलितोऽर्थः।

विशेषणीभूतधर्मान्तरविशिष्टेनेति [पृ.373]। साध्याभाववद्वृत्तित्वत्वविशिष्टेनेत्यर्थः। व्यावर्त्यमानस्य - विशेषणीयस्य

प्रकृतविशेषणस्य । विशेष्यस्य - विषयितारूपस्य । भाने साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताशब्दाधीनबोधे इति शेषः । विशेषणांशे - साध्याभाववद्वृत्तित्वे प्रकारीभूतायां व्यक्तौ साध्याभाववद्वृत्तित्वत्वे विशेष्यसंबन्धितावच्छेदकतायाः भानात् इत्यर्थः । **विषयेण निरूपकीभूयेति** [पृ.373] । विषयेण साध्याभाववद्वृत्तित्वेन निरूपकतासंबन्धेन विषयितायाः व्यावर्तने । अत्र विषयितायाः व्यावर्तनं नाम विषयानिरूपितविषयितान्यत्वबोधनम् । व्यावर्तकविषयस्य - विषयिताव्यावर्तकस्य साध्याभाववद्वृत्तित्वरूपस्य विषयस्य आश्रयतासंबन्धेन व्यावर्तकं यत् साध्याभाववद्वृत्तित्वत्वम् तस्यापि निरूपकतावच्छेदकीभूय विषयिताव्यावर्तकत्वात् । स्वावच्छिन्ननिरूपकताकत्वसंबन्धेन विषयिताविशेषणत्वात् इत्यर्थः ।

अत्र 'व्यावर्तकविषयस्य' इत्यादिना साध्याभाववद्वृत्तित्वत्वस्य स्वाश्रये विषयिताविशेषणे विशेषणत्वं प्रदर्श्य 'तस्यापि' इत्यादिना तस्यैव विषयिताविशेषणत्वप्रदर्शनात् साध्याभाववद्वृत्तित्वत्वावच्छिन्नतदाश्रयनिष्ठनिरूपकताकविषयिता लक्षणे विवक्षितेति सूचितम् । **तद्व्यावर्तकविषयाव्यावर्तकस्येति** [पृ.373]। विषयिताव्यावर्तकं यत् व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वं तदविशेषणस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्येत्यर्थः।

अथ साध्याभाववत्पदसार्थक्यमुपपादयति **एवं चेति** [पृ.374] । यन्निष्ठाधेयतात्वविशिष्टनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः तत्त्वं व्याप्तिः इत्युक्तौ 'वन्हिमान् धूमात्' इत्यादौ वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वेन घटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वावगाहि यत् भ्रमात्मकं ज्ञानं 'धूमः वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तिः' इत्याकारकं तन्निष्ठायां आधेयतात्वविशिष्टाधेयत्वनिरूपितविषयितायां धूमनिष्ठं यत् आधेयत्वं तन्निरूपितत्वसत्त्वात् अनुमितिप्रतिबन्धकता-

वच्छेदकत्वसत्त्वाच्च अव्याप्तिः स्यात् । साध्याभाववत्पदोपादाने तु समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य धूमनिष्ठत्वविरहात् धूमनिष्ठं यत् व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वं तन्निरूपितभ्रमीयविषयतायाः पूर्वोक्तरीत्या धूमनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वविरहेण तस्याः ग्रहीतुमशक्यतया नाव्याप्तिरिति भावः ।

गादाधरी

साध्याभावपदप्रयोजनकथनम्

साध्याभावपदमनुपादाय अधिकरणवृत्तितात्वविशिष्टविषयितानिवेशे वृत्तौ समानाधिकरणधर्मावच्छिन्नाभावाधिकरणीयत्वभ्रमविषयितावारणेऽपि वृत्तिविशेषणे तन्निरूपकेऽधिकरणे समानाधिकरणधर्मावच्छिन्नाभावभ्रमविषयितावारणासंभवात् साध्याभावांशनिवेशस्यापि सार्थक्यात् ।

विवरणम्

साध्याभावपदप्रयोजनमाह-**साध्याभावपदमनुपादाय** इत्यादिना । तथा च साध्याभावपदमनुपादाय यन्निष्ठाधिकरणवृत्तित्वत्वविशिष्टनिरूपितविषयितासामान्ये इत्युक्तौ 'वन्हिमान् धूमात्' इत्यत्रैव घटत्वावच्छिन्नवह्न्यभावाधिकरणे वह्नित्वावच्छिन्नवह्न्यभावप्रकारकभ्रमात्मकं यत् 'धूमः वह्नित्वावच्छिन्नवह्न्यभावाधिकरणवृत्तिः' इति ज्ञानं, तन्निष्ठायां अधिकरणवृत्तित्वनिरूपितविषयितायां धूमनिष्ठाधिकरणवृत्तित्वत्वविशिष्टनिरूपितत्वमस्ति । धूमनिष्ठं यत् घटत्वावच्छिन्नवह्न्यभावाधिकरणवृत्तित्वं तस्मिन् अधिकरणवृत्तित्वत्वसद्भावात् धूमनिष्ठत्वविशिष्टाधिकरणवृत्तित्वत्वविशिष्टनिरूपितत्वस्य विषयितायाम् अक्षतत्वात् । तस्याश्च विषयितायाः अनुमितिप्रतिबन्धकतावच्छेदकत्वात् अव्याप्तिः स्यात् ।

साध्याभावपदोपादाने तु साध्याभावाधिकरणवृत्तित्वत्वपदेन वह्नित्वावच्छिन्नवह्न्यभावाधिकरणवृत्तित्वत्वग्रहणे धूमनिष्ठे व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वे तदाश्रयत्वविरहात् तदाश्रयनिष्ठनिरूपकताकत्वविरहात् भ्रमीयविषयिता ग्रहीतुं न शक्यते। घटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वस्य ग्रहणे तस्य धूमनिष्ठे आधेयत्वे विशेषणतया अभानात् तदवच्छिन्ननिरूपकताकत्वं भ्रमीयविषयितायां नास्तीति नाव्याप्तिरिति भावः।

गोदावरी

न च तावत्पर्यन्तनिवेशेऽपि वह्नित्वावच्छिन्नवह्निप्रतियोगिताकत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकवह्न्यभावमवगाह्य तादृशाभाववद्वृत्तित्वावगाहि यज्ज्ञानं तदीयतादृशसाध्याभाववद्वृत्तित्वविषयितापि साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितैव। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको यः साध्याभावः तद्वद्वृत्तित्वत्वस्यैव तद्विशेषणतया भानात् तद्विशिष्टत्वस्य च तादृशज्ञाननिष्ठविषयितानिरूपकसाध्याभाववद्वृत्तित्वे सत्त्वात् इति तद्दोषतादवस्थ्यमिति - वाच्यम्।

अभावांशे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यप्रकारकं व्यभिचारज्ञानमेव अनुमितिविरोधि। तथा च यत्र च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यं प्रकारः, तादृशज्ञानविषयघटकस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यविशिष्टस्य व्यधिकरणधर्मावच्छिन्नाभावस्य अप्रसिद्ध्या तादृशज्ञानविषयितायाः विशिष्टनिरूपितत्वासंभवात्। **साध्याभाववद्वृत्तित्वरूपविषयस्य** प्रतिबन्धकतावच्छेदककोटयप्रवेशात् अतिव्याप्तिः। अतो विषयितापर्यन्तानुधावनम्।

विवरणम्

साध्योपलक्षिताभावनिवेशम् अभिप्रेत्य शङ्कते - न च ताव-त्पर्यन्तनिवेशेऽपीति [पृ.379]। साध्याभावाधिकरणपर्यन्तनिवेशेऽ-पीत्यर्थः। घटत्वावच्छिन्नप्रतियोगिताकवह्न्यभावे वह्नित्वा-वच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वम् अवगाहमानं यत् 'धूमः वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकाभाववद्वृत्तिः' इति भ्रमा-त्मकज्ञानं तन्निष्ठायां धूमनिष्ठघटत्वावच्छिन्नवह्न्यभाववद्वृत्ति-त्वनिरूपितायां विषयितायां साध्याभाववद्वृत्तित्वत्वविशिष्ट-निरूपितत्वमस्ति। घटत्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगि-ताकः यः साध्याभावः तद्वद्वृत्तित्वत्वस्यैव धूमनिष्ठे साध्याभाव-ववद्वृत्तित्वे विशेषणतया भानात् साध्याभाववद्वृत्तित्वत्व-विशिष्टनिरूपितत्वस्य विषयितायां सत्त्वात् पुनः अव्याप्तिरिति शङ्का।

यथाश्रावं तु—

अभावांशे साध्यं न उपलक्षणम्; किं तु विशेषणमेव। एवम् अभावांशे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यप्रकारकं व्यभिचारज्ञानमेव अनुमितिप्रतिबन्धकम्। साध्यता-वच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यविशिष्टो योऽभावः तद्विशिष्टं यदधिकरणम्, तन्निरूपितवृत्तित्वत्वविशिष्टनिरूपित-विषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः विवक्षितः। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावे साध्-यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यप्रकारकभ्रमा-त्मकं यत् 'धूमः वह्न्यभाववद्वृत्तिः' इत्याकारकज्ञानं तदीयविषयि-तायां घटत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन वह्निविशिष्टाभाव-वद्वृत्तित्वत्वविशिष्टनिरूपितत्वसत्त्वेऽपि वन्हित्वावच्छिन्नप्रतियो-गिताकत्वसंबन्धेन वह्निविशिष्टाभाववद्वृत्तित्वत्वविशिष्टनिरू-पितत्वं नास्ति। अधिकरणे विशेषणतया भासमाने वस्तुतः

व्यधिकरणधर्मावच्छिन्नाभावे वह्नित्वावच्छिन्नप्रतियोगिताकत्व-संबन्धेन वह्निविशिष्टत्वविरहात् । तथा च तादृशज्ञानविषयितायाः उक्तविशिष्टनिरूपितत्वविरहात् नाव्याप्तिः । एवञ्च साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यविशिष्टाभावनिष्ठा या विषयता तन्निरूपिता तादृशाभावविशिष्टाधिकरणनिष्ठा या विषयता तन्निरूपिता वृत्तित्वत्वविशिष्टनिष्ठा या विषयता तन्निरूपितविषयितासामान्ये इति विवक्षितम् । अतः न कोऽपि दोष इति ।

ननु विषयितासंबन्धेन यन्निष्ठसाध्याभाववद्वृत्तित्वं अनुमितिप्रतिबन्धकतावच्छेदकत्वाभाववत् तत्त्वं व्याप्तिरित्येवास्तु । किं विषयितायां प्रतिबन्धकतावच्छेदकत्वाभावनिवेशनेन इत्याशङ्क्याह-**साध्याभाववद्वृत्तित्वरूपविषयस्येति** [पृ.379]। साध्याभाववद्वृत्तित्वविषयकत्वेन ज्ञानस्य प्रतिबन्धकत्वे एव विषयितासंबन्धेन साध्याभाववद्वृत्तित्वस्य प्रतिबन्धकतावच्छेदकत्वं संभवति । तथा प्रतिबन्धकत्वमेव न संभवति । साध्याभाववद्वृत्तित्वत्वेन घटावगाहिज्ञानस्यापि प्रतिबन्धकतया तत्साधारण्याय साध्याभाववद्वृत्तित्वनिष्ठविषयताकत्वेन प्रतिबन्धकत्वं विहाय साध्याभाववद्वृत्तित्वत्वावच्छिन्नविषयताकत्वेनैव प्रतिबन्धकतायाः वक्तव्यतया प्रतिबन्धकतावच्छेदककोटौ साध्याभाववद्वृत्तित्वस्य अप्रवेशात् । किञ्च विषयितायाः वृत्त्यनियामकतया तत्संबन्धेन प्रतिबन्धकतावच्छेदकत्वासंभवाच्च इति भाव ।

गादाधरी

हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टे प्रतिबन्धकतावच्छेदकविषयितापर्याप्त्यभावनिवेशापेक्षायां बीजकथनम्

हेतुनिष्ठसाध्याभाववद्वृत्तितात्वविशिष्टे प्रतिबन्धकतावच्छेदकविषयितापर्याप्त्यभावविवक्षणे साध्यप्रतियोगिकाभावमात्रनिवेशे व्यभिचारिण्यतिव्याप्तिः । प्रतियोगितायां साध्यतावच्छे-

दकावच्छिन्नत्वावगाहिन एव ज्ञानस्य अनुमितिप्रतिबन्धकतया तदघटितविषये प्रतिबन्धकतावच्छेदकविषयिताया अपर्याप्तेः। साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशश्च न संभवतीति तदुपेक्षितम्।

विवरणम्

ननु हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टे प्रकृतानुमितिप्रतिबन्धकतावच्छेदकविषयतापर्याप्त्यभाव एव निवेश्यताम्। किं तादृशवृत्तित्वत्वविशिष्टनिरूपितविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावनिवेशेन इत्याशङ्क्याह - **हेतुनिष्ठेत्यादिना**। [पृ.381]। यन्निष्ठसाध्याभाववद्वृत्तित्वे अनुमितिप्रतिबन्धकतावच्छेदकविषयत्वाभावः तत्त्वं व्याप्तिः इत्युक्तौ समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वावगाहि भ्रमात्मकज्ञानीयविषयितायाः अनुमितिप्रतिबन्धकतावच्छेदकत्वात् हेतुनिष्ठसाध्याभाववद्वृत्तित्वे अनुमितिप्रतिबन्धकतावच्छेदकविषयत्वमेवास्ति। न तु तदभाव इति 'वह्निमान् धूमात्' इत्यादावव्याप्तिः स्यात्। तद्वारणाय हेतुनिष्ठसाध्याभाववद्वृत्तित्वे अनुमितिप्रतिबन्धकतावच्छेदकविषयतापर्याप्त्यभावः निवेशनीयः। तथा निवेशे वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वघटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वोभयोरपि वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वावच्छिन्नायाः अनुमितिप्रतिबन्धकतावच्छेदकविषयतायाः पर्याप्तत्वात् हेतुनिष्ठसाध्यभाववद्वृत्तित्वमात्रे प्रतिबन्धकतावच्छेदकविषयतापर्याप्त्यभावसत्त्वात् नाव्याप्तिः। परं तु एवंरीत्या प्रतिबन्धकतावच्छेदकविषयतापर्याप्त्यभावघटितलक्षणकरणे साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावविवक्षणे केवलान्वयिसाध्यकस्थले तादृशाभावाप्रसिद्ध्या अव्याप्तिः। साध्याभावपदेन साध्यप्रतियोगिकाभावमात्रविवक्षणे 'धूमवान् वह्नेः' इत्यादौ

व्यभिचारिणि अतिव्याप्तिः । वह्निः धूमत्वावच्छिन्नप्रतियोगिताकाभाववद्वृत्तिः' इत्याकारकस्य प्रतियोगितायां धूमत्वावच्छिन्नत्वावगाहिन एव ज्ञानस्य प्रतिबन्धकतया प्रतिबन्धकतावच्छेदकविषयता धूमत्वावच्छिन्नत्वेऽपि पर्याप्ता । लक्षणे तु साध्यप्रतियोगिकाभाववद्वृत्तित्वत्वस्यैव निवेशात् साध्यतावच्छेदकावच्छिन्नत्वाघटिते तस्मिन् प्रतिबन्धकतावच्छेदकविषयतापर्याप्त्यभावसत्त्वात् वह्निनिष्ठधूमप्रतियोगिकाभाववद्वृत्तित्व अनुमितिप्रतिबन्धकतावच्छेदकविषयतापर्याप्त्यभावस्य अक्षततया अतिव्याप्तिः । अतः साध्याभाववद्वृत्तित्वत्वविशिष्टे प्रतिबन्धकतावच्छेदकविषयतापर्याप्त्यभावम् उपेक्ष्य साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावः निवेशितः । तथा निवेशे च धूमप्रतियोगिकाभाववद्वृत्तित्वनिरूपितविषयितायाः धूमत्वावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वनिरूपितविषयितात्वेन रूपेण प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वमेवास्ति, न तु प्रतिबन्धकतावच्छेदकत्वाभावः इति नातिव्याप्तिरिति भावः ।

तदघटितविषये इति [पृ.382] । साध्यतावच्छेदकावच्छिन्नत्वाघटिते साध्यप्रतियोगिकाभाववद्वृत्तित्वरूपे विषये इत्यर्थः । **न संभवतीति** [पृ.382] केवलान्वयिसाध्यकस्थले साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य अप्रसिद्धेरिति भावः ।

गादाधरी

प्रकृतानुमितिसामान्यविवक्षायाः प्रयोजनम्

व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावात् अतिव्याप्तिः । अतः सामान्ये इत्युक्तम् ।

प्रकृतानुमितिपदं प्रकृतानुमितिसामान्यपरम् । अन्यथा व्यधिकरणधर्मावच्छिन्न-साध्याभाववद्वृत्तित्वाभावविषयकसमूहालम्बनात्मकप्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वस्य हेतुनिष्ठतादृशसाध्याभाववद्वृत्तित्वविषयितायामपि सत्त्वात् सद्धेतावपि लक्षणगमनासंभवात् ।

एवं च प्रकृतेत्यनुपादाने कामिनीजिज्ञासादौ प्रसिद्धा या अनुमितिसामान्यप्रतिबन्धकता तदवच्छेदकत्वाभावो धूमाभाववद्वृत्तित्वादिविषयितायामक्षत एव । तद्विषयकज्ञानस्यापि अन्यलिङ्गकान्यसाध्यकान्यसंसर्गकानुमित्यप्रतिबन्धकत्वात् । अतः प्रकृतेतितत्साध्यकतद्धेतुकतत्संसर्गकपरम् ।

सद्धेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयिताया अनुमितिप्रतिबन्धकस्वरूपासिद्ध्यादिज्ञानवृत्तित्वादसंभवः स्यात् । अतः यन्निष्ठसाध्याभाववद्वृत्तित्वविषयकज्ञानसामान्यस्य अनुमित्यप्रतिबन्धकत्वमुपेक्ष्य निरुक्तविषयितासामान्ये अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावपर्यन्तानुधावनम् ।

विवरणम्

'विषयितासामान्ये' इत्यत्र सामान्यपदस्य प्रयोजनमाह - **व्यधिकरणधर्मावच्छिन्नेति** [पृ.383] । हेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयितायां प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावविवक्षणे 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः । वह्निनिष्ठं यत् घटत्वावच्छिन्नधूमाभाववद्वृत्तित्वं तन्निरूपितविषयितायां अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावसत्त्वात् । अतः 'विषयितासामान्ये' इत्युक्तम् । तदुक्तौ च वह्निनिष्ठधूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताया अपि सामान्यान्तर्गततया तस्यां च अनुमितिप्रतिबन्धकतावच्छेदकत्वमेवास्तीति नातिव्याप्तिरिति भावः ।

प्रकृतानुमितिपदमिति [पृ.384]। प्रकृतानुमितिपदस्य प्रकृतानुमितिसामान्यपरत्वाभावे 'वह्निमान् धूमात्' इत्यादौ धूमनिष्ठघटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितायां 'पर्वतो वह्निमान्, धूमः घटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वाभाववांश्च' इत्याकारिका या समहालम्बनरूपा प्रकृतपक्षसाध्यकानुमितिः तत्प्रतिबन्धकतावच्छेदकत्वमेवास्ति इति तदभावविरहादव्याप्तिः। तद्वारणाय प्रकृतानुमितिपदं प्रकृतानुमितिसामान्यपरम् इति वक्तव्यम्। तथा सति असमूहालम्बनरूपायाः 'पर्वतो वह्निमान्' इत्याकारकानुमितेरपि प्रकृतानुमितिसामान्यान्तर्गततया तत्प्रतिबन्धकतावच्छेदकत्वं धूमनिष्ठसाध्याभाववद्वृत्तित्वविषयितायां नास्तीति नाव्याप्तिरिति भावः। तथा च यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितासामान्ये प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वाभावः तत्त्वमिति लक्षणं संपन्नम्।

तत्र प्रकृतपदप्रयोजनमाह - **एवं चेति** [पृ.384]। एवं च —सामान्यपरत्वे च। प्रकृतेत्यनुपादाने अनुमितिसामान्यप्रतिबन्धकतावच्छेदकत्वाभावः लक्षणघटकः स्यात्। तथा सति 'धूमवान् वह्नेः' इत्यादौ वह्निनिष्ठधूमाभाववद्वृत्तित्वनिरूपितविषयितायां 'पर्वतो धूमवान्' इत्याकारकानुमितिप्रतिबन्धकतावच्छेदकत्वसत्त्वेऽपि 'पर्वतः वह्निमान्', 'भूतलं घटवत्' इत्याद्याकारकानुमितिप्रतिबन्धकतावच्छेदकत्वविरहात् तादृशानुमितीनामपि अनुमितिसामान्यान्तर्गतत्वात् अतिव्याप्तिः स्यात्।

न च - अनुमितिसामान्यप्रतिबन्धकत्वं कुत्रापि नास्तीति कथं तद्घटितलक्षणसंभव इति — वाच्यम्। कामिनीजिज्ञासादौ अनुमितिसामान्यप्रतिबन्धकत्वसत्त्वात्। तथा च अतिव्याप्तिवारणाय- प्रकृतपदं तत्साध्यक - तद्धेतुक - तत्संसर्गकपरम्।

अन्यसाध्यक-अन्यसंसर्गक - अन्यहेतुकानुमितिप्रतिबन्धकतावच्छेदकत्वाभावमादाय अतिव्याप्तिवारणाय साध्यहेत्वादेरपि विशिष्य निवेशः कर्तव्य इति भावः ।

ननु यन्निष्ठसाध्याभाववद्वृत्तित्वविषयकज्ञानसामान्यम् अनुमितिप्रतिबन्धकत्वाभाववत् तत्त्वम् इत्येव लक्षणमस्तु । किं विषयितासामान्ये अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावघटितलक्षणानुसरणेन इत्याशङ्क्याह - **सद्धेतुनिष्ठेत्यादिना** [पृ.384] । तथा च 'धूमः घटत्वावच्छिन्नवह्न्यभाववद्वृत्तिः, पर्वतः धूमाभाववांश्च' इत्याकारकं यत् स्वरूपासिद्धिविषयकं समूहालम्बनज्ञानं तस्यापि धूमनिष्ठसाध्याभाववद्वृत्तित्वविषयकज्ञानसामान्यान्तर्गततया तत्र च स्वरूपासिद्धिविषयकत्वेन अनुमितिप्रतिबन्धकत्वस्यैव सत्त्वात् 'वह्निमान् धूमात्' इत्यादौ प्रतिबन्धकत्वाभावघटितलक्षणस्य असंभवः स्यात् । तद्वारणाय यन्निष्ठसाध्याभाववद्वृत्तित्वविषयकज्ञानसामान्ये अनुमितिप्रतिबन्धकत्वाभावमनिवेश्य यन्निष्ठसाध्याभाववद्वृत्तित्वनिरूपितविषयितासामान्ये अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावो निवेशितः । तथा निवेशे पूर्वोक्तसमूहालम्बनज्ञाननिष्ठस्वरूपासिद्धिनिरूपितविषयितायाम् अनुमितिप्रतिबन्धकतावच्छेदकत्वसत्त्वेऽपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वनिरूपितविषयितायाम् अनुमितिप्रतिबन्धकतावच्छेदकत्वविरहात् न असंभव इति भावः ।

गादाधरी

स्वरूपसंबन्धरूपावच्छेदकत्वनिवेशनम्

अवच्छेदकत्वं च स्वरूपसंबन्धविशेषः । **न च—धूमाभाववद्वृत्तित्वत्वेन** घटादिविषयकज्ञानस्य अनुमितिप्रतिबन्धकतया धूमाभाववद्वृत्तित्वत्वविशिष्टविषयताशालिज्ञानत्वेन प्रतिबन्धकताकल्पनस्य असंभवात् तादृशविषयितायां प्रतिबन्धकतानिरूपितस्वरूपसंबन्धरूपावच्छेदकत्वासत्त्वेन अतिव्याप्तिरिति—वाच्यम्,

धूमाभाववद्वृत्तित्वत्व प्रकारतानिरूपितविषयिताशालिज्ञानत्वेन भ्रमसाधारणप्रतिबन्धकताकल्पनसंभवात्, तादृशविषयितात्वेन वास्तवधूमाभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताया अपि प्रतिबन्धकतावच्छेदकत्वस्य अक्षतत्वात् ।

विवरणम्

प्रकृतलक्षणघटकं प्रतिबन्धकतावच्छेदकत्वं स्वरूपसंबन्धविशेषरूपम्, न तु अनतिरिक्तवृत्तित्वरूपम् । स्वरूपसंबन्धरूपत्वेऽपि दोषाभावात् इत्याशयेनाह—**अवच्छेदकत्वं चेत्यादिना** [पृ.386] ।

शङ्कते—**न च धूमाभाववद्वृत्तित्वत्वेनेति** [पृ.386] । 'धूमवान् वह्नेः' इत्यत्र धूमाभाववद्वृत्तित्वत्वेन रूपेण घटमवगाहमानं यत् 'धूमाभाववद्वृत्तित्ववान् वह्निः' इत्याकारकं भ्रमात्मकं ज्ञानं तस्यापि 'पर्वतो धूमवान्' इति अनुमितिप्रतिबन्धकत्वमस्ति । तत्र च धूमाभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिता नास्ति । न हि घटः धूमाभाववद्वृत्तित्वत्वविशिष्टः । अतः धूमाभाववद्वृत्तित्वत्वविशिष्टविषयकज्ञानत्वं न स्वरूपसंबन्धरूपावच्छेदकतावत् प्रतिबन्धकत्वन्यूनवृत्तित्वात् । तथा च साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताशालिज्ञानत्वेन प्रतिबन्धकत्वकल्पनस्य असंभवात् साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितायां प्रतिबन्धकतानिरूपितस्वरूपसंबन्धरूपावच्छेदकत्वं नास्तीति आयातम् । तथा सति 'धूमवान् वह्नेः' इत्यादौ साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितायां प्रतिबन्धकतानिरूपितस्वरूपसंबन्धरूपावच्छेदकत्वाभावसत्त्वात् अतिव्याप्तिरिति भावः ।

समाधत्ते—**धूमाभाववद्वृत्तित्वत्वेत्यादिना** [पृ.387] । धूमाभाववद्वृत्तित्वत्वेन रूपेण धूमाभाववद्वृत्तित्वविषयकस्य

प्रमात्मकज्ञानस्य तेन रूपेण घटविषयकभ्रमात्मकज्ञानस्य च प्रतिबन्धकत्वमस्ति। तदनुसारेण धूमाभाववद्वृत्तित्वत्वनिष्ठप्रकारतानिरूपितविषयिताशालिज्ञानत्वेन प्रतिबन्धकत्वं कल्प्यते। धूमाभाववद्वृत्तित्वत्वनिष्ठप्रकारतानिरूपितविषयतानिरूपितविषयिताशालिज्ञानत्वेन प्रतिबन्धकत्वमिति यावत्। तादृशविषयितात्वं च धूमाभाववद्वृत्तित्वत्वविशिष्टतादृशवृत्तित्वनिरूपितविषयितायामप्यस्ति। एवं धूमाभाववद्वृत्तित्वत्वेन रूपेण घटावगाहिज्ञानीयविषयितायामप्यस्ति। तथा च तादृशविषयितात्वेन रूपेण वस्तुतः धूमाभाववद्वृत्तित्वत्वविशिष्टं यत् तन्निरूपितविषयितायामपि प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वं स्वरूपसंबन्धरूपमस्तीति नातिव्याप्तिरिति भावः।

गादाधरी

न च - एवं समानासमानाधिकरणधर्मावच्छिन्नसाध्याभावद्वयविशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य विषयितायां व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वात् समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपिताधेयत्वविषयितात्वेन च प्रतिबन्धकतावच्छेदकत्वात् अव्याप्तिरिति - वाच्यम्।

हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टविषयिताया प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षणीयत्वात्। उक्तभ्रमे च समानाधिकरणधर्मावच्छन्नाभावविषयितायाः तादृशविशिष्टनिरूपितत्वाभावेन तस्या एव च प्रतिबन्धकतावच्छेदकत्वेन अव्याप्त्यनवकाशात्।

विवरणम्

न चैवम् [पृ.388] इत्यादि। स्वरूपसंबन्धरूपावच्छेदकत्वनिवेशे 'वह्निमान् धूमात्' इत्यादावव्याप्तिः। तथा हि—धूमः वह्नि-

त्वावच्छिन्नवह्न्यभाव-घटत्वावच्छिन्नवह्न्यभावोभयाधिकरण-वृत्तिः' इत्याकारकं वह्नित्वावच्छिन्नवह्न्यभावांशे भ्रमरूपं घटत्वावच्छिन्नवह्न्यभावांशे प्रमारूपं च यज्ज्ञानं तन्निष्ठायां धूमनिष्ठ-घटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वनिरूपितविषयितायां वह्नित्वावच्छिन्नवह्न्यभावविषयितानिरूपिताधिकरणविषयितानिरूपिताधेयत्वनिरूपितविषयितात्वेन रूपेण अनुमितिप्रतिबन्धकतावच्छेदकत्वात् घटत्वावच्छिन्नवन्ह्यभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वाच्च अव्याप्तिरिति भावः ।

अत्र समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयितानिरूपितेत्यादौ प्रकारताविशेष्यतारूपविषयतयोः निरूप्यनिरूपकभाव-सत्त्वेऽपि प्रकारित्व - विशेष्यित्वरूपयोः विषयितयोः अवच्छेद्यावच्छेदकभाव एव वर्तते । न तु निरूप्यनिरूपकभावः । अतः कथं साध्याभावविषयितानिरूपिताधिकरणविषयितेत्यादिकं सङ्गच्छते इति शङ्का भवति । अस्य समाधानं तु - साध्याभावविषयतानिरूपितविषयता इत्येव पाठः स्यात्। विषयितेति पाठे तु निरूपित-शब्दस्य अवच्छिन्नेत्यर्थं स्वीकृत्य साध्याभावनिरूपितविषयित्वावच्छिन्नाधिकरणनिरूपितविषयित्वावच्छिन्नाधेयत्वनिरूपितविषयितात्वेनेति अर्थो वक्तव्यः ।

समाधत्ते—**हेतुसामानाधिकरण्यविशिष्टेत्यादिना** [पृ.388] । हेतुनिष्ठं साध्याभाववद्वृत्तित्वं यथा व्यभिचारः, तथा हेतुसामानाधिकरण्यविशिष्टः साध्याभावोऽपि व्यभिचारः । तदनुसारेण व्याप्तिलक्षणम् एवं वक्तव्यम्—

यत्सामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टनिरूपित-विषयितायां प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः तत्त्वमिति ।

'वह्निमान् धूमात्' इत्यादौ 'धूमाधिकरणपर्वतवृत्तौ घटत्वावच्छिन्नवह्न्यभाव - वह्नित्वावच्छिन्नवह्न्यभावौ' इत्याकारक-

भ्रमात्मकज्ञानवृत्तिः या वह्नित्वावच्छिन्नवह्न्यभावनिरूपिता विषयिता तस्याः प्रतिबन्धकतावच्छेदकत्वेऽपि हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टनिरूपितत्वं नास्ति । अतः सा विषयिता न ग्रहीतुं शक्यते । घटत्वावच्छिन्नवह्न्यभावनिरूपितविषयितायां हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टनिरूपितत्वेन तस्याः विषयितायाः ग्रहणेऽपि तस्यां प्रतिबन्धकतावच्छेदकत्वाभावसत्त्वात् नाव्याप्तिरिति भावः ।

तस्या एव चेति [पृ.388] । समानाधिकरणधर्मावच्छिन्नसाध्याभावनिरूपितविषयिताया एव इत्यर्थः ।

गादाधरी

सद्धेतौ अव्याप्त्याशङ्कापरिहारौ

अथ यत्र ज्ञाने हेतुसमानाधिकरणतया भासमाने व्यधिकरणधर्मावच्छिन्नाभावे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्व - साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वोभयसंबन्धेन साध्यस्य एका प्रकारतां तादृशज्ञानीयव्यधिकरणधर्मावच्छिन्नाभावीयविषयितायां साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य विषयीभवदभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वासत्त्वेन असंभवेऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धविषयितानिरूपितविषयितात्वेन अनुमितिप्रतिबन्धकतावच्छेदकत्वस्य चाक्षतत्वात् अव्याप्तिर्दुर्वारैवेति, चेत्—

न । **तादृशभ्रमस्य अप्रामाणिकत्वात्** । **प्रामाणिकत्वे च** संसर्गविषयताद्वयानिरूपकतया लक्षणघटकत्वेन अभावविषयताया विशेषणीयतया सामञ्जस्यात् ।

विवरणम्

पुनरपि सद्धेतौ अव्याप्तिमाशङ्क्ते - **अथ यत्र ज्ञाने इत्यादिना** [पृ.390] । 'वह्निमान् धूमात्' इत्यादौ यत्र ज्ञाने धूमाधिकरणवृत्तितया भासमाने व्यधिकरणधर्मावच्छिन्नाभावे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्व - समानाधिकरण धर्मावच्छिन्नप्रतियोगिताकत्वोभयसंबन्धेन साध्यस्य एका प्रकारता तादृशं यत् 'धूमाधिकरणपर्वतवृत्तिः वन्हिविशिष्टोऽभावः' इत्याकारकं ज्ञानं तन्निष्ठा या अभावनिरूपिता विषयिता तस्यां वह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन वह्निविशिष्टाभावनिरूपितत्वं यद्यपि नास्ति, विषयीभूते व्यधिकरणधर्मावच्छिन्नाभावे वस्तुतः वह्नित्वावच्छिन्नप्रतियोगिताकत्वविरहेण तेन संबन्धेन वह्निविशिष्टत्वाभावात् । तथापि व्यधिकरणघटत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन वह्निविशिष्टाभावनिरूपितत्वम् अस्ति । एवं वह्नित्वावच्छिन्नप्रतियोगिताकत्वनिष्ठसांसर्गिकविषयितानिरूपितविषयितात्वमस्ति । वास्तवव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसंसर्गवति अभावे समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसंसर्गावगाहिभ्रमस्यापि प्रकृतानुमितिप्रतिबन्धकत्वात् तत्साधारण्यानुरोधेन साध्यतावच्छेदकवह्नित्वावच्छिन्नप्रतियोगिताकत्वनिष्ठसांसर्गिकविषयितानिरूपितविषयितात्वेनैव हेतुसमानाधिकरणाभावविषयितायाः प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वम्, न तु साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यविशिष्टाभावनिरूपितविषयितात्वेन । तथा च पूर्वोक्तभ्रमीयाभावविषयितायां हेतुसमानाधिकरणः यः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यविशिष्टोऽभावः तन्निरूपितत्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिष्ठसांसर्गिकविषयितानिरूपितविषयितात्वेन रूपेण अनुमितिप्रतिबन्धकतावच्छेदकत्वस्य च सत्त्वात् प्रतिबन्धकतावच्छेदकत्वाभावो नास्तीति अव्याप्तिः दुर्वारा इति आक्षेपः ।

तम् आक्षेपं परिहरति - **तादृशभ्रमस्य अप्रामाणिकत्वात्** [पृ.390] इति । द्वाभ्यां संसर्गाभ्याम् एकस्य प्रकारतायाः क्वापि अदृष्टत्वात् ।

यदि च प्रमायां तथाविधप्रकारतायाः असंभवेऽपि भ्रमे संबन्धद्वयावच्छिन्नप्रकारतायां न किञ्चिद्बाधकम् इत्युच्यते तथाप्याह **प्रामाणिकत्वे च इति** [पृ.390] । हेतुसामानाधिकरण्यविशिष्टाभावनिरूपितविषयितायां संसर्गद्वयनिष्ठसांसर्गिकविषयताद्वयानिरूपकत्वं विशेषणं दीयते । उक्तभ्रमीयाभावविषयितायां संसर्गनिष्ठविषयताद्वयनिरूपकत्वमेवास्ति इति न तमादाय अव्याप्तिरिति भावः ।

स्वनिरूपकत्व - स्वनिरूपकतावच्छेदकप्रकरतात्वावच्छिन्ननिरूपकताक - स्वभिन्नसंसर्गतानिरूपकत्वोभयसंबन्धेन यत्किंचित्संसर्गताविशिष्टान्यत्वं संसर्गीयविषयताद्वयानिरूपकत्वम् ।

गादाधरी

साध्यतावच्छेदकविशेषितस्य अभावस्य निवेशो न संभवतीत्याक्षेपः

अथ **साध्यरूपविशेषणविशिष्टस्य अभावस्य विषयितानिरूपकतया** लक्षणघटकत्वे साध्याभावयोः संबन्धस्य संबन्धविधया लक्षणघटकत्वमावश्यकम् । स च संबन्धः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपश्च अननुगत इति **प्रथमस्य** निवेशे केवलान्वयिनि साध्यविशेषिताभावस्यैव अप्रसिद्धिः । व्यतिरेकिसाध्यकसद्धेतौ च **तादृशहेतुसमानाधिकरणा**भावाप्रसिद्धिरिति असंभवः । **चरमस्य** निवेशे च सर्वत्र व्यभिचारिण्यतिव्याप्तिः । प्रतियोगितावच्छेदकधर्माणां च उपलक्षणीभूतेन **केनचिद्रूपेण** अनुगमय्य निवेशः च संभवति । प्रतियोगितावच्छेदकोपलक्षणस्य संबन्धघटकतया **अभानात्** ।

विवरणम्

अथ साध्यरूपेत्यादि [पृ.392]। यन्निष्ठसाध्याभाववद्वृत्तित्वनिरूपितविषयितासामान्ये, अथ वा हेतुसमानाधिकरणसाध्याभावनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः तत्त्वमिति एतावता व्याप्तिलक्षणं पर्यवसितम्। तत्र साध्याभावपदेन साध्यविशिष्टोऽभावः बोध्यते। तत्र साध्याभावयोः संबन्धः संबन्धविधया लक्षणघटक इति वक्तव्यम्। विशकलिततया साध्याभावौ अवगाहमानस्य ज्ञानस्य अप्रतिबन्धकत्वात् साध्यविशिष्टाभावस्यैव विषयितानिरूपकतया लक्षणे निवेशः कार्यः। तत्र साध्य - अभावयोः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपो वा व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपो वा संबन्धः संसर्गविधया लक्षणघटक इति वक्तव्यम्। तत्र प्रथमस्य निवेशे केवलान्वयिसाध्यकस्थले साध्यतावच्छेदकवाच्यत्वत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन वाच्यत्वविशिष्टस्य अभावस्य अप्रसिद्धया अव्याप्तिः। एवं व्यतिरेकिसाध्यकसद्धेतौ 'वह्निमान् धूमात्' इत्यादौ साध्यतावच्छेदकवह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन वह्निविशिष्टस्य अभावस्य प्रसिद्धत्वेऽपि हेतुसमानाधिकरणस्य तादृशस्य अभावस्य अप्रसिद्धिरिति असंभवः।

द्वितीयस्य संबन्धस्य निवेशे सर्वत्र व्यभिचारिणि अतिव्याप्तिः। 'धूमवान् वह्नेः' इत्यादौ व्यधिकरणघटत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन धूमविशिष्टाभावनिरूपितविषयितायां प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावसत्त्वात्।

न च - व्यधिकरणसमानाधिकरणधर्मयोः अनुगतं यत् अवच्छेदकत्वं तदुपलक्षितधर्मावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यविशिष्टः अभावः निवेश्यते। अतः द्वयोरपि अभावयोः

संग्रहः संभवतीति व दोष इति-वाच्यम् । प्रतियोगितावच्छेदकोपलक्षणस्य धर्मस्य संबन्धघटकतया अभानात् इति भावः ।

प्रथमस्येति [पृ.392] । साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य इत्यर्थः । **तादृशहेतुसमानाधिकरणेति** [पृ.392] । तादृशः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यविशिष्टः हेतुसमानाधिकरणः अभावः तस्य अप्रसिद्धिरित्यर्थः । **चरमस्येति** [पृ.392] । व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वस्य इत्यर्थः । प्रतियोगितावच्छेदकधर्माणां समानाधिकरणानां वह्नित्वादीनां व्यधिकरणानां घटत्वादीनां च इत्यर्थः । **केनचिद्रूपेणेति** [पृ.392]। अवच्छेदकत्वप्रमेयत्वादिना इत्यर्थः । **अभानादिति** [पृ.392] । कूटाघटितलक्षणे भट्टाचार्यैः प्रतियोगितावच्छेदकोपलक्षणस्य संबन्धघटकतया अभानम् उपपादयिष्यते ।

गादाधरी

न च - **अवच्छेदकावच्छिन्नत्वाविशेषित**प्रतियोगितायाः संबन्धतया निवेशात् नाननुगमनिबन्धनो दोष इति - वाच्यम् ।

अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताविषयकाभावज्ञानस्य प्रतियोगिमत्ताज्ञानाविरोधितया **तज्ज्ञानाविरोधिनः** प्रतियोगिविशेषिताभावज्ञानस्य च अनुभवविरुद्धतया अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगितायाः संसर्गतया अभानात् ।

विवरणम्

न च अवच्छेदकावच्छिन्नत्वाविशेषितेति [पृ.394] । लक्षणे प्रतियोगितासंबन्धेन साध्यविशिष्टः अभावः निवेश्यते । संसर्गीभूतप्रतियोगितायां अवच्छेदकावच्छिन्नत्वं न विशेषणम् । प्रतियोगितात्वेन रूपेण समानाधिकरणव्यधिकरणधर्मावच्छिन्नप्रतियोगितयोः अनुगमात् अननुगमनिबन्धनो दोषो नास्तीति न च वाच्यम्।

अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगितासंसर्गकाभावज्ञानस्य प्रतियोगिमत्ताज्ञानं प्रति अप्रतिबन्धकतया प्रतिबन्धकतावच्छेदक-विषयितानिरूपकत्वेन अविशेषितप्रतियोगितासंबन्धेन साध्यविशिष्टस्य अभावस्य निवेशासंभवादिति भावः ।

तज्ज्ञानाविरोधिन [पृ.394] इति । अवच्छेदकावच्छिन्न-त्वविशेषितप्रतियोगितासंसर्गकं अभावज्ञानं प्रतियोगिमत्ताज्ञान-विरोधि । लक्षणे तु तदविशेषितप्रतियोगितासंसर्गः घटकः । तथा च व्यभिचारिणि अविशेषितप्रतियोगितासंसर्गघटित-विषयितायाः प्रतिबन्धकतावच्छेदकत्वाभावसत्वात् अतिव्याप्तिः । किञ्च अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगितासंसर्गकाभाव-ज्ञानम् अनुभवविरुद्धम् । अतः तादृशप्रतियोगितायाः संसर्गतया निवेशः न संभवतीति भावः ।

गादाधरी

न च - स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यता-वच्छेदकविशेषिताभावो निवेश्यः । न तु साध्यविशेषितः । वह्नित्वादिना घटाद्यभाव एव वह्न्यादिसाध्यकधूमादिहेतुकस्थले लक्षणघटक इति - वाच्यम् । प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थले तादृशाभावाप्रसिद्धेः ।

एवं स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन वह्नित्वादि-विशेषिते वह्नित्वादिना घटादेरभावे भासमाने यत्र संबन्धघटक-प्रतियोगितायां बाधितस्य वह्न्यादिनिष्ठत्वस्य भानं तादृश-ज्ञानीयाभावविषयिताया उक्तसंबन्धेन साध्यतावच्छेदकविशिष्टा-भावनिरूपिततया अनुमितिविरोधितया च अनुपपत्तेः दुर्वार-त्वात् । स्वावच्छिन्नसाध्यवृत्तित्वविशिष्टप्रतियोगितानिवेशे च सर्वत्र सद्धेताबप्रसिद्धिः ।

एवं प्रतियोगिविशेष्यतापन्न एवाभावे प्रतियोगिपारतन्त्र्येण समानाधिकरणधर्मस्य स्वातन्त्र्येण व्यधिकरणधर्मस्य स्वावच्छिन्न-प्रतियोगिताकत्वसंबन्धेन प्रकारत्वं प्रामाणिकम्, न तु प्रतियोगि-विशेष्यतानापन्ने। 'वह्निर्नास्ति', 'वह्नित्वेन घटो नास्ति' इत्येव प्रतीतेः। न तु वह्नित्वेन नास्तीति। तथा च विशिष्य प्रति-योग्यविशेषितस्य उक्तसंबन्धेन साध्यतावच्छेदकविशेषितस्य अभावस्य विषयित्वनिरूपकतया निवेशो न संभवत्येव इति चेत्—

विवरणम्

न च स्वावच्छिन्नेत्यादि [पृ.395]। लक्षणे साध्यविशिष्टः अभावः न निवेश्यते। किन्तु स्वावच्छिन्नप्रतियोगिताकत्व-संबन्धेन साध्यतावच्छेदकविशिष्ट एव अभावः निवेश्यते। 'वन्हिमान् धूमात्' इत्यादौ वह्नित्वावच्छिन्नप्रतियोगिताकत्व-संबन्धेन वह्नित्वविशिष्टः हेतुसमानाधिकरणः अभावः वह्नित्वेन घटाभावः। 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ स्वावच्छिन्नप्रति-योगिताकत्वसंबन्धेन वाच्यत्वत्वविशिष्टः अभावः वाच्यत्वत्वेन घटाभावः। तन्निरूपितविषयितायां प्रकृतानुमितिप्रतिबन्धकता-वच्छेदकत्वाभावसत्त्वात् लक्षणसमन्वयः।

'धूमवान् वह्नेः' इत्यादौ स्वावच्छिन्नप्रतियोगिताकत्व-संबन्धेन साध्यतावच्छेदकधूमत्वविशिष्टः अभावः धूमत्वेन धूमाभावः। तन्निरूपितविषयितायां प्रतिबन्धकतावच्छेदकत्वस्यैव सत्त्वात् नातिव्याप्तिः।

एवञ्च व्यधिकरणधर्मावच्छिन्नाभाव - समानाधिकरण-धर्मावच्छिन्नाभावयोः स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्य-तावच्छेदकविशिष्टत्वेन अनुगमात् न पूर्वोक्तो दोष इति शङ्का।

समाधानं तु - प्रमेयत्वावच्छिन्नसाध्यकस्थले 'प्रमेयवान् ज्ञेयत्वात्' इत्यादौ साध्यतावच्छेदकप्रमेयत्वावच्छिन्नप्रतियोगिता-

कत्वसंबन्धेन प्रमेयत्वविशिष्टः अभावः अप्रसिद्धः । प्रमेयत्वस्य प्रतियोगिताव्यधिकरणत्वाभावात् । तथा च तत्राव्याप्तिः । अतः स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यतावच्छेदकविशिष्टः अभावः न निवेशयितुं शक्यत इति ।

ननु प्रमेयत्वावच्छिन्नसाध्यकस्थले येन संबन्धेन प्रमेयत्वम् अवृत्ति तादृशसंयोगादिसंबन्धावच्छिन्नप्रमेयत्वनिष्ठावच्छेदकताक-प्रतियोगिताकत्वसंबन्धेन प्रमेयत्वविशिष्टः अभावः प्रसिद्ध एव । अतो नाव्याप्तिः इत्यत आह - **एवं स्वावच्छिन्नेत्यादि** [पृ.395] ।

यस्मिन् ज्ञाने वह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन वह्नित्वविशिष्टे वह्नित्वेन घटाभावे भासमाने सति संबन्धघटक-प्रतियोगितायां वस्तुतो घटनिष्ठायां वह्निनिष्ठत्वावगाहि यत् भ्रमात्मकं ज्ञानं तन्निष्ठा या अभावविषयिता तस्यां स्वावच्छिन्नप्रति-योगिताकत्वसंबन्धेन वह्नित्वविशिष्टाभावनिरूपितत्वसत्वात् वह्नि-निष्ठत्वविषयिताघटितत्वेन अनुमितिप्रतिबन्धकतावच्छेदकत्वाच्च अव्याप्तिः स्यात् । एतादृशभ्रमीयविषयिताव्यावर्तनाय स्वाव-च्छिन्नसाध्यनिष्ठत्वविशिष्टप्रतियोगिताकत्वसंबन्धेन साध्यतावच्छे-दकविशिष्टाभावनिरूपितविषयितायाः लक्षणे निवेशे केवलान्वयि-साध्यकस्थले वाच्यत्वत्वावच्छिन्नवाच्यत्ववृत्तिप्रतियोगितासंब-न्धेन वाच्यत्वत्वविशिष्टस्य अभावस्य अप्रसिद्ध्या अव्याप्तिः । 'वह्निमान् धूमात्' इत्यादौ व्यतिरेकिसाध्यकस्थले वह्नित्वा-वच्छिन्नवह्निनिष्ठप्रतियोगितासंबन्धेन वह्नित्वविशिष्टस्य वह्न्य-भावस्य प्रसिद्धावपि तस्य हेतुसमानाधिकरणत्वविरहात् अव्याप्तिः। अतः साध्यतावच्छेदकविशिष्टः अभावः न निवेशयितुं शक्यत इति भावः ।

ननु उक्तसंबन्धेन साध्यतावच्छेदकमात्राविशेषिताभावनिवे-शात् न दोषः । स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन अभावांशे

वह्नित्वभाने प्रतियोगितांशे बाधितवह्निनिष्ठत्वभाने अभावस्य वह्नि - वह्नित्वोभयविशेषितत्वनियमात् वह्नित्वमात्रविशेषित-त्वाभावात् इत्याह - **एवमिति** [पृ.396]।

प्रतियोगिविशेष्यतापन्नेऽभावे प्रतियोगिविशेषणतापन्नस्य समानाधिकरणस्य धर्मस्य स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन प्रतियोगिपारतन्त्र्येण भानम्। व्यधिकरणधर्मस्य स्वावच्छिन्न-प्रतियोगिताकत्वसंबन्धेन स्वातन्त्र्येण प्रकारतया भानम्, न तु प्रतियोगिविशेष्यतापन्नेऽभावे। 'वह्निर्नास्ति', 'वह्नित्वेन घटो नास्ति', इत्येवं प्रतियोगिविशेष्यतयैव अभावस्य प्रतीतेः। 'वह्नि-त्वेन नास्ति' इति प्रतीतिस्तु न कस्यापि भवति। तथा च साध्यतावच्छेदकविशिष्टस्य अभावस्य लक्षणे निवेशे हेतुसमा-नाधिकरणसाध्यतावच्छेदकविशिष्टाभावनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभाव एव व्याप्तिरिति पर्यव-स्यति। तादृशव्याप्तिज्ञानस्य च प्रतियोग्यविषयकसाध्यतावच्छेदक-विशिष्टाभावविषयकतया प्रतियोग्यविषयकप्रतियोगितावच्छेदक-विषयकाभावबुद्धेः अप्रसिद्ध्या तादृशव्याप्तिज्ञानमेव न संभवतीति भावः। तथा च साध्याभावस्य साध्यविशिष्टत्वेन वा साध्यता-वच्छेदकविशिष्टत्वेन वा निवेशो न संभवतीति 'अथ' इत्यादिना कृतस्य आक्षेपस्य सारः।

गादाधरी

मैवम्। प्रतियोग्यादिविशेषिताभावीयत्वेन विशिष्टनिरू-पितविषयिता लक्षणे न निवेश्यते। अपि तु स्वनिरूपकहेतुसमा-नाधिकरणाभावनिष्ठो यः संबन्धः तत्प्रतियोगिसाध्यनिष्ठतत्संब-न्धावच्छिन्ननिरूपकतावच्छेदकताकत्वेन। यत्र हेतुसमानाधिकरण-घटत्वावच्छिन्नवह्न्याद्यभावे वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्व-संबन्धेन वह्न्यादेः साध्यस्य प्रकारता तादृशज्ञानविषयितानिरूप-

काभावनिष्ठो न निरुक्ततन्निरूपकतावच्छेदकतावच्छेदकः संबन्ध इति तद्विषयिताव्युदासः। **यत्र वह्नित्वावच्छिन्नघटाद्यभावे** तन्निष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नेः संबन्धतया भासते, तत्र तत्संबन्धप्रतियोगी न वह्निः, अपि तु घट एव इति साध्ये **वास्तवतत्संबन्धप्रतियोगित्वनिवेशात्** तादृशज्ञानीयाभावविषयिताव्युदासः।

साध्यनिवेशात् यत्र **वह्नित्वेन घट एव वह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन** तत्संबन्धानुयोगिनि वह्नित्वावच्छिन्नप्रतियोगिताकघटाभावे प्रकारः तादृशज्ञानीयाभावविषयितायाः तत्संबन्धप्रतियोग्यवच्छिन्ननिरूपकताकत्वेऽपि अनुमितिविरोधित्वेऽपि च न दोषः।

यत्र घटत्वावच्छिन्नवह्न्यभावे घटत्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वेन वह्नेः संसर्गतया भासते तादृशज्ञानस्य प्रामाणिकत्वे साध्यप्रतियोगिको हेतुसमानाधिकरणाभावानुयोगिको यद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसंबन्धः तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसंबन्धावच्छिन्नसाध्यनिष्ठनिरूपकतावच्छेदकताकत्वं विवक्षणीयमिति दिक्।

विवरणम्

नैवम् [पृ.398] इत्यादिना तमाक्षेपं परिहरति। अयमाशयः — प्रतियोग्यविशेषिताभावनिरूपितत्वेन विषयितायाः लक्षणे न निवेशः। किन्तु स्वनिरूपकहेतुसमानाधिकरणाभावनिष्ठो यः संबन्धः तत्प्रतियोगिसाध्यनिष्ठतत्संबन्धावच्छिन्नावच्छेदकताकनिरूपकताकत्वेन विषयिता लक्षणे निवेश्यते। अत्र स्वं - विषयिता। तन्निरूपको योऽभावः तन्निष्ठो यः संबन्धः तद्धर्मावच्छिन्नप्रतियोगिताकत्वादिः। तादृशसंबन्धप्रतियोगि यत् साध्यं

तन्निष्ठा या तत्संबन्धावच्छिन्ना निरूपकतावच्छेदकता तन्निरूपक-निरूपकताकत्वेन इत्यर्थः। तथा च एवं लक्षणं संपन्नम्—

'स्वनिरूपक - यत्समानाधिकरणाभावनिष्ठ - संबन्धप्रति-योगि - साध्यनिष्ठ - तत्संबन्धावच्छिन्नावच्छेदकताकनिरूपकताक-विषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः तत्त्वम्' इति।

'वह्निमान् धूमात्' इत्यादौ घटत्वेन वह्न्यभावनिरूपिता 'घटत्वावच्छिन्नवह्न्यभावः धूमसमानाधिकरणः' इत्याकारक-ज्ञानीया विषयिता स्वपदेन ग्राह्या। तादृशविषयितायाः निरूपकः विषयः घटत्वेन वह्न्यभावः। तन्निष्ठः संबन्धः घटत्वावच्छिन्न-प्रतियोगिताकत्वरूपः तस्य संबन्धस्य प्रतियोगि वह्निरूपं साध्यम्। तन्निष्ठा घटत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धावच्छिन्ना निरूप-कतावच्छेदकता - साध्यविशिष्टः अभावः विषयिताया निरूपकः। निरूपकतावच्छेदकं साध्यं भवति। तत् घटत्वावच्छिन्नप्रति-योगिताकत्वसंबन्धेनैव निरूपकतावच्छेदकमिति कृत्वा साध्यनिष्ठा विषयितानिरूपकतावच्छेदकता घटत्वावच्छिन्नप्रतियोगिताकत्व-संबन्धावच्छिन्ना भवति। तादृशावच्छेदकताकनिरूपकताक-विषयिता घटत्वावच्छिन्नवह्न्यभावनिरूपितविषयिता। तस्याम् अनुमितिप्रतिबन्धकतावच्छेदकत्वस्याभावात् लक्षणसमन्वयः।

'धूमवान् वह्नेः' इत्यादौ स्वपदेन धूमत्वावच्छिन्नधूमाभाव-निरूपिता विषयितापि ग्राह्या। तन्निरूपकः यः हेतुसमानाधि-करणः अभावः धूमत्वेन धूमाभावः। तन्निष्ठः संबन्धः धूमत्वा-वच्छिन्नप्रतियोगिताकत्वम्। तत्प्रतियोगि साध्यं धूमः। तन्निष्ठा या धूमत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धावच्छिन्नावच्छेदकता तत्कनिरूपकताकविषयिता धूमत्वावच्छिन्नधूमाभावविषयिता। तस्यां प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वमेव अस्तीति नाति-व्याप्तिः।

अत्र विषयितायाः स्वनिरूपकाभावप्रतियोगिसाध्यनिष्ठनिरूपकतावच्छेदकत्वेन वा स्वनिरूपकाभावनिष्ठसंबन्धप्रतियोगिसाध्यनिष्ठयत्किंचित्संबन्धावच्छिन्ननिरूपकतावच्छेदकताकत्वेन वा निवेशे दोषमाह—**यत्रेति** [पृ.398]। 'वह्निमान् धूमात्' इत्यादौ हेतुसमानाधिकरणः यः घटत्वावच्छिन्नवह्न्यभावः तदवगाहिनि यस्मिन् ज्ञाने घटत्वावच्छिन्नप्रतियोगिताकत्ववति अभावे वह्नित्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेण वह्नेः प्रकारतया भाने सति तादृशभ्रमात्मकज्ञाननिष्ठायां विषयितायां स्वनिरूपकाभावप्रतियोगिसाध्यनिष्ठनिरूपकतावच्छेदकताकत्वसत्त्वेन वह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धावच्छिन्ननिरूपकतावच्छेदकताकविषयितात्वेन रूपेण अनुमितिप्रतिबन्धकतावच्छेदकत्वसत्त्वेन च अव्याप्तिः स्यात्। तद्वारणाय 'स्वनिरूपके'त्यादिरीत्या विषयितायाः निवेशः। तथा निवेशे घटत्वावच्छिन्नवह्न्यभावनिरूपितविषयितायाः निरूपकः यः घटत्वावच्छिन्नवह्न्यभावः तन्निष्ठः यः संबन्धः घटत्वावच्छिन्नप्रतियोगिताकत्वरूपः तत्प्रतियोगिसाध्यनिष्ठतत्संबन्धावच्छिन्नावच्छेदकताकनिरुपकताकत्वम् उक्तभ्रमीयविषयितायां नास्ति। वह्निनिष्ठायाः विषयितानिरुपकतावच्छेदकतायाः वह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धावच्छिन्नत्वात्। अतः विषयितापदेन उक्तभ्रमीयविषयितायाः ग्रहीतुमशक्यतया नाव्याप्तिरिति भावः।

'तत्प्रतियोगि' इति विशेषणस्य प्रयोजनमाह - **यत्र वह्नित्वावच्छिन्नघटाद्यभावे** इति [पृ.399]। यस्मिन् ज्ञाने वह्नित्वावच्छिन्नघटाभावे वह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन वह्निः प्रकारतया भासते, तादृशभ्रमनिष्ठायां वह्नित्वावच्छिन्नघटाभावनिरूपितविषयितायां स्वनिरूपकाभावनिष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वरूपसंबन्धावच्छिन्नवह्निनिष्ठनिरूपकतावच्छेदकताकत्वसत्त्वात् अनुमितिप्रतिबन्धकतावच्छेदकत्वमेव अस्तीति अव्या-

प्तिः स्यात् । तद्वारणाय साध्ये 'तत्प्रतियोगि' इति विशेषणं दत्तम् । तस्मिन् दत्ते तत्र स्वनिरूपकाभावनिष्ठसंबन्धप्रतियोगी न वह्निः, अपि तु घट एव । तथा च तत्प्रतियोगिसाध्यनिष्ठ-निरूपकतावच्छेदकत्वं विषयितायां नास्तीति न तां विषयिता-मादाय अव्याप्तिरिति भावः ।

प्रतियोगित्वेन भासमानत्वनिवेशभ्रमं निराकरोति - **वास्तवतत्संबन्धेति** [पृ.399] । वास्तवं तत्संबन्धप्रतियोगित्वमेव साध्ये निवेश्यते । न तु प्रतियोगित्वेन भासमानत्वम् । अन्यथा तत्प्रतियोगित्वनिवेशेऽपि अव्याप्तिवारणस्य अशक्यत्वात् इति भावः ।

'तत्प्रतियोगिनिष्ठे'त्यनुक्त्वा 'तत्प्रतियोगिसाध्यनिष्ठे'त्येवं साध्यपदनिवेशस्य प्रयोजनमाह - **साध्यनिवेशात् इत्यादिना** [पृ.399] । यस्मिन् ज्ञाने वह्नित्वावच्छिन्नघटाभावे भासमाने वह्नि-त्वावच्छिन्नप्रतियोगिताकत्वसंबन्धस्य अनुयोगिनि अभावे प्रति-योगिभूतः घटः वह्नित्वेन रूपेण तेन संबन्धेन प्रकारतया भासते, तादृशभ्रमात्मकज्ञाननिष्ठायां विषयितायां स्वनिरूपकाभावनिष्ठ-संबन्धप्रतियोगिघटनिष्ठतत्संबन्धावच्छिन्ननिरूपकतावच्छेदकत्वस-त्त्वात् वह्नित्वावच्छिन्नतत्संबन्धावच्छिन्ननिरूपकतावच्छेदकताक-त्वेन अनुमितिप्रतिबन्धकतावच्छेदकत्वाच्च अव्याप्तिः स्यात् । तद्वारणाय 'तत्प्रतियोगिसाध्यनिष्ठे'त्युक्तम् । उक्तज्ञानीयविषयिता-निरूपकतावच्छेदकतायाः घटनिष्ठत्वेन साध्यनिष्ठत्वविरहात् विषयितासामान्यपदेन तस्याः विषयितायाः ग्रहीतुमशक्यतया नाव्याप्तिरिति भावः ।

वह्नित्वेन घट एव [पृ.399] इत्यस्य प्रकारः इत्यत्र अन्वयः । 'एव' कारेण वह्नेः प्रकारत्वव्यवच्छेदः । केन संबन्धेन प्रकार इत्याकाङ्क्षायाम् उक्तम् - **वह्नित्वावच्छिन्नप्रतियोगिता-**

कत्वसंबन्धेनेति [पृ.399]। कुत्र प्रकार इत्याशङ्कायाम् उक्तं तत्संबन्धानुयोगिनि [पृ.399] इति। तत्संबन्धप्रतियोग्यवच्छिन्नेति [पृ.399]। तत्संबन्धप्रतियोगिनिष्ठावच्छेदकताकनिरूपकताकत्वेऽपि इत्यर्थः। अनुमितिविरोधित्वेऽपीति [पृ.399]। अनुमितिप्रतिबन्धकतावच्छेदकत्वेऽपीत्यर्थः। न दोष इति [पृ.399]। नाव्याप्तिरित्यर्थः।

ननु एवमपि यस्मिन् ज्ञाने घटत्वावच्छिन्नवह्न्यभावे घटत्वावच्छिन्नप्रतियोगिताकत्वं वह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वेन वह्निसंसर्गतया भासते तादृशज्ञानीयविषयितायाः स्वनिरूपकाभावनिष्ठसंबन्धप्रतियोगिसाध्यनिष्ठत्संबन्धावच्छिन्नावच्छेदकताकनिरूपकताकत्वात् अनुमितिप्रतिबन्धकतावच्छेदकत्वाच्च अव्याप्तिरित्याशङ्क्य प्रकारान्तरेण परिष्करोति - यत्र घटत्वावच्छिन्नवह्न्यभावे इत्यादिना [पृ.399]। संसर्गांशे भ्रमत्वस्य सविवादत्वात् प्रामाणिकत्वे इत्युक्तम्। साध्यप्रतियोगिकः यत्समानाधिकरणाभावानुयोगिकः यद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टः संबन्धः तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसंबन्धावच्छिन्नसाध्यनिष्ठावच्छेदकताकनिरूपकताकविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः तत्त्वमिति लक्षणम्।

वह्निप्रतियोगिकः धूमसमानाधिकरणाभावानुयोगिकश्च घटत्वावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टः संबन्धः तद्धर्मघटत्वावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसंबन्धावच्छिन्नसाध्यनिष्ठावच्छेदकताकनिरूपकताकत्वं उक्तभ्रमीयविषयितायां नास्ति। घटत्वावच्छिन्नप्रतियोगिताकत्वस्य वह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वेनैव उक्तभ्रमे भानादिति तादृशविषयितायाः उपादातुमशक्यतया नाव्याप्तिरिति भावः।

दिगिति [पृ.399]। दिगर्थस्तु - ननु हेतुसमानाधिकरणः यः वह्नित्वह्रदत्वाभ्यां वह्न्यभावः तदनुयोगिकसाध्यप्रतियोगिकः वह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धः तज्ज्ञानस्य उक्ताभावांशे तेन संबन्धेन वह्निप्रकारत्वेन प्रतिबन्धकत्वात् अव्याप्तिरिति चेत् - न। यद्धर्मपर्याप्तनिरूपकताकावच्छेद्यतावत्प्रतियोगिताकत्वं संबन्ध इति विवक्षणात्।

गादाधरी

व्यभिचारिण्यतिव्याप्तिशङ्कासमाधानम्

न च - व्यभिचारज्ञानस्य अनुमितिकारणव्याप्तिज्ञानं प्रत्येव प्रतिबन्धकत्वात् अनुमित्यप्रतिबन्धकत्वमिति व्यभिचारिण्यतिव्याप्तिरिति - वाच्यम्। तज्जनकज्ञानप्रतिबन्धकतावच्छेदकत्वाभावस्यैव विवक्षितत्वात्।

विवरणम्

ननु यन्निष्ठसाध्याभाववद्वृत्तित्वनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावः तत्त्वमिति लक्षणम् 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिण्यपि अस्ति। वह्निनिष्ठ-धूमाभाववद्वृत्तित्वरूपव्यभिचारनिरूपितविषयितायाः अनुमिति-कारणीभूतव्याप्तिज्ञानप्रतिबन्धकतावच्छेदकत्वेऽपि अनुमितिप्रति-बन्धकतावच्छेदकत्वाभावात् इत्याशङ्क्य प्रकृतलक्षणे अनुमिति-पदम् अनुमितिजनकज्ञानपरम्। अतः नातिव्याप्तिरिति समाधत्ते - न च व्यभिचारज्ञानस्येत्यादिना [पृ.404]।

दीधितिः

तन्न। अनुमित्यविरोधित्वज्ञानस्य अनुमितिहेतुत्वे साध्या-भाववद्वृत्तित्वज्ञानस्य अनुमित्यविरोधितया व्यभिचारिणि अति-प्रसङ्गात्।

गादाधरी

विशारदलक्षणदूषणम्

अनुमित्यविरोधित्वज्ञानस्येति [पृ.404]। **अनुमितिप्रति**बन्धकतावच्छेदकत्वाभावप्रकारकज्ञानस्यैव इत्यर्थः। **अनुमितिहेतुत्व इति** [पृ.404]। एतन्मते **निरुक्तविषयिता**निष्ठतादृशावच्छेदकत्वाभावघटितस्यैव अनुमितिकारणीभूतज्ञानविषयत्वादिति भावः।

अनुमित्यविरोधितया [पृ.404] — अनुमितिजनकज्ञानाप्रतिबन्धकतया। **साध्याभाववदवृत्तित्वज्ञानस्य** अनुमितिजनकत्वाभावादिति भावः।

अतिप्रसङ्गादिति [पृ.404]। हेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वविषयितासामान्ये अनुमितिजनकज्ञानप्रतिबन्धकतावच्छेदकत्वाभावस्य अक्षतत्वात् इति भावः।

न च - हेतुनिष्ठसाध्याभाववदृत्तित्वविषयिता अनुमितिप्रतिबन्धकतावच्छेदिका इत्येतादृशज्ञानीयहेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयिताया अपि तादृशविषयितासामान्यान्तर्गततया तत्र च प्रकृतव्याप्तिज्ञान**प्रतिबन्धकतावच्छेदकत्वस्यापि** सत्त्वेन अतिव्याप्त्यनवकाश इति वाच्यम्। **एवं सति** सद्धेतावपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नाभाव**वद्वृत्तित्वविषयित्वे** अनुमितिप्रतिबन्धकतावच्छेदकत्व**भ्रम**निष्ठतादृशसाध्याभाववद्वृत्तित्वविषयितायामनुमितिप्रतिबन्धकतावच्छेदकत्वसत्त्वेन **लक्षण**गमनासंभवात्। **इतराविशेषणत्वेन तादृशविषयिताया** एव लक्षणे निवेश्यतया विषयिताविशेषणत्वेन साध्याभाववद्वृत्तित्वविषयितायाः **प्रतिबन्धकतावच्छेदकत्वेन** अतिव्याप्तिवारणासंभवादिति ध्येयम्।

विवरणम्

अनुमित्यविरोधित्वज्ञानस्येत्यादि [पृ.404] दीधितिग्रन्थस्य अयमाशयः - व्यभिचारिणि हेतुनिष्ठसाध्याभाववद्वृत्तित्वनिरूपितविषयितायाः अनुमितिजनकव्याप्तिज्ञानप्रतिबन्धकतावच्छेदकतया तत्प्रतिबन्धकतावच्छेदकत्वाभावो नास्तीति नातिव्याप्तिरिति वक्तव्यम्। परन्तु एतन्मते हेतुनिष्ठं साध्याभाववदवृत्तित्वं न व्याप्तिः, येन तज्ज्ञानप्रतिबन्धकतावच्छेदकतया अतिव्याप्तिः वारयितुं शक्यते। किन्तु हेतुनिष्ठसाध्याभाववद्वृत्तित्वनिरूपितविषयितायां प्रकृतानुमितिजनकज्ञानप्रतिबन्धकतावच्छेदकत्वाभाव एव व्याप्तिः। तज्ज्ञानमेव च अनुमितिजनकम्। एवं च 'हेतुनिष्ठं साध्याभाववद्वृत्तित्वम्' इत्याकारकव्यभिचारज्ञानस्य 'हेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयिता अनुमितिप्रतिबन्धकतावच्छेदकत्वाभाववती' इत्याकारकव्याप्तिज्ञानं प्रति अप्रतिबन्धकतया हेतुनिष्ठसाध्याभाववद्वृत्तित्वनिरूपितविषयितायां अनुमितिजनक-उक्तव्याप्तिज्ञानप्रतिबन्धकतावच्छेदकत्वाभावसत्त्वात् व्यभिचारिणि उक्तव्याप्तिलक्षणस्य अतिव्याप्तिरिति।

गादाधर्याम् **अनुमितिप्रतिबन्धकतेति** [पृ.405]। हेतुनिष्ठसाध्याभाववद्वृत्तित्वनिरूपितविषयिताविशेष्यकस्य अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावप्रकारकज्ञानस्यैवेत्यर्थः। **निरूक्तविषयितेति** [पृ.405]। हेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयितानिष्ठः यः अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावः तद्धटितस्येत्यर्थः।

अत्रेदं बोध्यम् - अनुमितिप्रतिबन्धकतानवच्छेदक - स्वनिष्ठसाध्याभाववद्वृत्तित्वविषयिताकत्वम् एतन्मते व्याप्तिः। एतादृशव्याप्तिज्ञानं प्रति 'स्वनिष्ठं साध्याभाववद्वृत्तित्वम्' इत्याकारकव्यभिचारज्ञानस्य प्रतिबन्धकत्वं नास्तीति अतिव्याप्तिः।

साध्याभाववदवृत्तित्वज्ञानस्येति [पृ.405]। एतन्मते इति शेषः।

न च हेतुनिष्ठेत्यादि [पृ.405]। 'वह्निनिष्ठधूमाभाववद्वृत्तित्वविषयिता अनुमितिप्रतिबन्धकतानवच्छेदिका' इत्याकारकव्याप्तिज्ञानं प्रति 'वह्निनिष्ठधूमाभाववद्वृत्तित्वविषयिता अनुमितिप्रतिबन्धकतावच्छेदिका' इत्याकारकज्ञानस्य प्रतिबन्धकत्वात् तस्मिन् प्रतिबन्धकज्ञाने विषयिताविशेषणतया धूमाभाववद्वृत्तित्वस्य भानात् धूमाभाववद्वृत्तित्वनिरूपितविषयितायाः तस्मिन् ज्ञानेऽपि सत्त्वात् तस्यां च विषयितायां अनुमितिप्रतिबन्धकतावच्छेदकघटकत्वात् अनुमितिप्रतिबन्धकतावच्छेदकत्वमेवास्ति इति व्यभिचारिणि नातिव्याप्तिरिति शङ्का।

एवं सति[405] इत्यादिना तत्समाधानमुच्यते - 'वन्हिमान् धूमात्' इत्यादि सद्धेतौ यस्य धूमनिष्ठघटत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वनिरूपितविषयित्वं अनुमितिप्रतिबन्धकतावच्छेदकम्' इति भ्रमः वर्तते तदीयतादृशभ्रमे विषयित्वविशेषणतया हेतुनिष्ठसाध्याभाववद्वृत्तित्वस्य भानात् भ्रमनिष्ठतादृशवृत्तित्वनिरूपितविषयितायां अनुमितिप्रतिबन्धकतावच्छेदकत्वसत्त्वेन प्रतिबन्धकतावच्छेदकत्वाभावविरहात् अव्याप्तिः स्यात्। तद्वारणार्थम् इतराविशेषणतया साध्याभाववद्वृत्तित्वनिरूपितविषयिताया एव लक्षणे निवेशः कार्यः। तेन उक्तभ्रमे विषयिताविशेषणतया या साध्याभाववद्वृत्तित्वविषयिता सा ग्रहीतुं न शक्यते। किन्तु 'हेतुनिष्ठं व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वम्' इति ज्ञानीयवृत्तित्वविषयितैव ग्रहीतुं शक्यते। तस्यां च प्रतिबन्धकतावच्छेदकत्वाभावसत्त्वात् नाव्याप्तिः। एवमेव व्यभिचरिण्यपि इतराविशेषणतया वृत्तित्वविषयिता इत्यनेन 'वह्निनिष्ठं धूमाभाववद्वृत्तित्वम्' इत्याकारकज्ञानीयविषयिताया एव ग्राह्यतया तस्यां

च अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावसत्त्वात् अतिव्याप्तिरिति भावः ।

प्रतिबन्धकतावच्छेदकत्वस्यापीति [पृ.405] । हेतुनिष्ठ-साध्याभाववद्वृत्तित्वविषयिता 'अनुमितिप्रतिबन्धकतानवच्छेदिका' इति व्याप्तिज्ञानं प्रति 'निरूपितत्वसंबन्धेन साध्याभाववद्वृत्तित्वविशिष्टा विषयिता अनुमितिप्रतिबन्धकतावच्छेदिका' इति समानप्रकारकं ज्ञानं प्रतिबन्धकम् । तत्र वृत्तित्वस्य धर्मितावच्छेदकतया भानात् धर्मितावच्छेदकीभूतवृत्तित्वविषयितायाः अपि सामान्यान्तर्गतत्वात् तत्र प्रतिबन्धकतावच्छेदकत्वसत्त्वेन नातिव्याप्तिरिति भावः ।

वृत्तित्वविषयित्वे [पृ.405] इत्यत्र सप्तम्यर्थः विशेष्यत्वं **भ्रमे** [पृ.405] अन्वेति । हेतुनिष्ठव्यधिकरणधर्मावच्छिन्न-साध्याभाववद्वृत्तित्वविशिष्टविषयित्वविशेष्यकः अनुमितिप्रतिबन्धकतावच्छेदकत्वप्रकारकः यः भ्रमः तन्निष्ठाया धर्मितावच्छेदकविधया साध्याभाववद्वृत्तित्वविषयितायां अनुमितिप्रतिबन्धकतावच्छेदकत्वसत्त्वेन इत्यर्थः ।

इतराविशेषणत्वेन तादृशविषयितायाः इति [पृ.405] । किंचिन्निष्ठविशेष्यतानिरूपितप्रकारत्वानवच्छिन्नायाः वृत्तित्वविषयितायाः इत्यर्थः । **प्रतिबन्धकतावच्छेदकत्वेनेति** [पृ.405] । विषयिताविशेषणत्वेन साध्याभाववद्वृत्तित्वविषयिताया एव प्रतिबन्धकतावच्छेदकत्वेन लक्षणे निविष्टतया इतराविशेषणत्वेन वृत्तित्वविषयितायाः प्रतिबन्धकतावच्छेदकत्वाभावात् अतिव्याप्तिः दुर्वारा इति भावः ।

इति विशारदलक्षणम्

दीधितिः

केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीया ये तत्तदधिकरणवृत्तित्वाभावाः तद्वत्त्वं तत्त्वम् ।

गादाधरी

मिश्रोक्तप्रथमलक्षणस्य समन्वयादिप्रदर्शनम्

मिश्ररीत्या साजात्यघटनेन साध्याभाववदवृत्तित्वरूपामेव व्याप्तिं परिष्कृत्य उपन्यस्यति - केचित्तु इति । 'धूमवान् वह्नेः' इत्यादौ व्यधिकरणधर्मावच्छिन्नाभावसजातीयस्य घटत्वादिना तदधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिः अतो **यावन्त** इति । तथा च यावदन्तर्गतसमानाधिकरणधर्मावच्छिन्नाभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावसत्त्वात् नातिव्याप्तिः । तत्रैव समानाधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादाय अतिव्याप्तिवारणाय **प्रत्येकं तत्तत्सजातीया** इति । तथा च **वक्ष्यमाणरूपेण** व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वाभावात् न दोषः । **यावत्साध्याभावत्वेन** साध्याभावानां निरूपकतया साजात्ये अन्वये व्यतिरेकिसाध्यके 'वह्निमान् धूमात्' इत्यादौ यावत्साध्याभावनिरूपितत्वस्य क्वचिदपि साजात्ये असत्त्वात् यावत्साध्याभावसाजात्याप्रसिद्धया अव्याप्तिः । अतः तत्तद्व्यक्तित्वेन तेषां साजात्ये अन्वयलाभाय **तत्तदिति** ।

तत्तत्सजातीया इत्यनेन उपस्थितानां समानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावसजातीयानाम् एकस्मिन्नधिकरण-

वृत्तित्वाभावे 'एकत्र द्वयम्' इति रीत्या अभेदान्वये पुनर्व्यतिरेकिसाध्यके अव्याप्तिः । एकत्र **उभयसाजात्याभावात्**। अतः एकैकाभावे एकैकाभावसजातीयाभेदान्वय उपगन्तव्यः । एतदर्थतात्पर्यग्राहकं **'प्रत्येकम्'** इति प्रथमाबहुवचनान्तं तत्तदधिकरणवृत्तित्वाभावा इत्यस्य विशेषणम् । **यावत्साध्याभावत्वेन** साध्याभावानामधिकरणे अन्वये 'वह्निमान् धूमात्' इत्यादौ तत्तद्ध्रदावृत्तित्वावच्छिन्नसाध्याभावघटितसमुदायाधिकरणतायाः क्वचिदप्यसत्वेन अव्याप्तिः स्यात् । अतः तत्तद्व्यक्तित्वेनाभावानाम् अधिकरणे अन्वयलाभाय चरमं **तत्तदिति**। **तत्त्वमिति**—अव्यभिचरितत्वमित्यर्थः ।

विवरणम्

मिश्ररीत्या [पृ.409] इति । साध्याभाववदवृत्तित्वरूपा या व्याप्तिः तामेव साजात्यघटनेन परिष्कृत्य दर्शयति—**केचित्तु** [पृ.409]इत्यादिना दीधितौ । यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयाः ये तत्तदधिकरणवृत्तित्वाभावाः तद्वत्त्वं व्याप्तिः । साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावः विवक्षितः ।

'वह्निमान् धूमात्' इत्यादौ साध्याभावपदेन समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकः वन्हित्वेन वह्न्यभावः, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः वन्हित्वेन घटाद्यभावश्च ग्राह्यः । तत्र वह्नित्वेन वह्न्यभावसजातीयः वह्नित्वेन वह्न्यभावाधिकरणवृत्तित्वाभाव इत्यनेन निर्वह्निवृत्तित्वत्वेन निर्वह्निवृत्तित्वाभावः ग्राह्यः । तस्यैव समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपेण वह्नित्वेन वह्न्यभावसजातीयत्वात् । तद्वत्त्वं - निर्वह्निवृत्तित्वाभाववत्त्वं धूमेऽस्तीति लक्षणसमन्वयः ।

साध्याभावपदेन वह्नित्वेन घटाद्यभावस्य ग्रहणे तत्सजातीयः तदधिकरणवृत्तित्वाभाव इत्यनेन घटत्वेन जगद्वृत्तित्वाभावः ग्राह्यः । तस्यैव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन रूपेण वह्नित्वेन घटाभावसजातीयत्वात् । तद्वत्त्वं घटत्वेन जगद्वृत्तित्वाभाववत्त्वं धूमेऽस्तीति समन्वयः ।

'धूमवान् वह्नेः' इत्यादौ यावत्साध्याभावान्तर्गतः धूमत्वेन धूमाभावोऽपि । तत्सजातीयः तदधिकरणवृत्तित्वाभावः निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावः । तद्वत्त्वं वह्नौ नास्ति । तस्य निर्धूमायोगोलकवृत्तित्वात् इति नातिव्याप्तिः ।

तत्र साध्याभावे यावत्वविशेषणानुपादाने 'धूमवान् वह्नेः' इत्यत्र साध्याभावपदेन धूमत्वेन घटाभावं गृहीत्वा तत्सजातीयतदधिकरणवृत्तित्वाभाव इत्यनेन घटत्वेन जगद्वृत्तित्वाभावं गृहीत्वा तद्वत्वस्य वह्नौ सत्वात् अतिव्याप्तिः । तद्वारणाय यावत्पदोपादानम् । तदुपादाने यावदन्तर्गतसमानाधिकरणधूमत्वावच्छिन्नधूमाभावसजातीयस्य धूमाभावाधिकरणवृत्तित्वाभावस्य निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावस्य वह्नावसत्त्वात् नातिव्याप्तिः । तदाह - **धूमवान् वह्नेः इत्यादौ** [पृ.409] इत्यादिना ।

तत्तत्सजातीया इत्यस्य वृत्तित्वाभावविशेषणस्य प्रयोजनमाह - **तत्रैव** [पृ.409] इत्यादिना । 'धूमवान् वह्नेः' इत्यादावेव साध्याभावपदेन समानाधिकरणधूमत्वावच्छिन्नधूमाभावस्य ग्रहणेऽपि तदधिकरणवृत्तित्वाभाव इत्यनेन व्यधिकरणघटत्वादिना निर्धूमवृत्तित्वाभावं गृहीत्वा तद्वत्त्वस्य वह्नौ सत्त्वात् अतिव्याप्तिः स्यात् । तद्वारणाय तत्तत्सजातीया इति विशेषणम् । तथा सति व्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वविरहात् साध्याभावसजातीया-

भावपदेन समानाधिकरणनिर्धूमवृत्तित्वत्वावच्छिन्ननिर्धूमवृत्तित्वाभावस्यैव ग्राह्यत्वात् वह्नौ तद्वत्त्वविरहात् नातिव्याप्तिरिति भावः ।

ननु व्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावस्य अभावत्वेन रूपेण समानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वसत्त्वात् तत्तत्सजातीया इति विशेषणे दत्तेऽपि अतिव्याप्तिर्दुर्वारैव इत्याशङ्क्याह - **तथा च वक्ष्यमाणरूपेण** [पृ.409] इति । येन केनापि रूपेण साजात्यमत्र न विवक्षितम् । किन्तु समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्व - व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण । अतो नातिव्याप्तिरिति भावः ।

तत्तत्सजातीया इत्यत्र तत्तत्पदस्य प्रयोजनमाह-**यावत्साध्याभावत्वेनेत्यादिना** [पृ.409] । तत्तत्पदानुपादाने यावत्साध्याभावसजातीयाः ये तदधिकरणवृत्तित्वाभावाः तद्वत्त्वम् इत्युक्तौ साजात्ये यावत्साध्याभावत्वेन साध्याभावानां निरूपकतया अन्वयः स्यात् । तथा सति 'वह्निमान् धूमात्' इत्यादौ यावत्साध्याभावनिरूपितसाजात्यम् अप्रसिद्धम् । व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपसाजात्ये व्यधिकरणधर्मावच्छिन्नसाध्याभावनिरूपितत्वसत्त्वेऽपि समानाधिकरणधर्मावच्छिन्नसाध्याभावनिरूपितत्वविरहात्, एवं समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपसाजात्ये समानाधिकरणधर्मावच्छिन्नसाध्याभावनिरूपितत्वसत्त्वेऽपि व्यधिकरणधर्मावच्छिन्नसाध्याभावनिरूपितत्वविरहात् । तथा च अव्याप्तिः । अतः साध्याभावानां तत्तद्व्यक्तित्वेन रूपेण साजात्ये निरूपकतया अन्वयः । न तु यावत्साध्याभावत्वेन इति सूचनाय तत्तत्पदम् । अतः व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य तद्व्यक्तित्वेन ग्रहणे तन्निरूपितत्वं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपसाजात्येऽस्ति । एवं समानाधि-

करणधर्मावच्छिन्नसाध्याभावव्यक्तिनिरूपितत्वं समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपसाजात्येऽस्तीति न अप्रसिद्धिनिबन्धना अव्याप्तिरिति भावः।

केवलान्वयिसाध्यकस्थले व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावानामेव लक्षणघटकतया यावत्साध्याभावत्वेन तादृशसाध्याभावनिरूपितत्वं तदधिकरणवृत्तित्वाभावनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपे साजात्ये प्रसिद्धमिति तत्र अप्रसिद्धिनिबन्धनस्य दोषस्य अप्रसक्तेः व्यतिरेकिसाध्यके इत्युक्तम्।

प्रत्येकमित्यस्य प्रयोजनमाह - **तत्तत्सजातीया इत्यनेनेत्यादिना** [पृ.409]। 'प्रत्येकम्' इत्यस्य अनुपादाने तत्तत्सजातीयपदार्थस्य अभेदसंबन्धेन अधिकरणवृत्तित्वाभावेऽन्वयो वक्तव्यः। तत्तत्सजातीयपदार्थश्च समानाधिकरणधर्मावच्छिन्नवृत्तित्वाभावः व्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावश्च। तयोरुभयोः एकस्मिन् अधिकरणवृत्तित्वाभावे अभेदेनान्वयः न संभवति। एकस्मिन् अभावे सजातीयोभयाभिन्नत्वविरहात्। अतः एकैकस्मिन् वृत्तित्वाभावे साध्याभावसजातीयस्य एकैकस्य वृत्तित्वाभावस्य अभेदेनान्वय इति प्रतिपादनाय प्रत्येकमिति प्रथमाबहुवचनान्तं तत्तदधिकरणवृत्तित्वाभावा इत्यस्य विशेषणम्। तथा च यावन्तः साध्याभावाः तत्तत्सजातीयप्रत्येकाभिन्नाः ये तत्तदधिकरणवृत्तित्वाभावाः तद्वत्त्वं व्याप्तिः।

तत्तदधिकरणेत्यत्र तत्तत्पदस्य प्रयोजनमाह-**यावत्साध्याभावत्वेनेति** [पृ.409]। साध्याभावाधिकरणे यावत्साध्याभावत्वेन साध्याभावान्वये 'वह्निमान् धूमात्' इत्यादौ घटत्वेन वह्न्यभाववह्नित्वेन वह्न्यभाववत्तत्तद्ह्रदावृत्तित्वावच्छिन्नाभावानामपि वह्नित्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेन

साध्याभावान्तर्गततया तादृशाभावघटितसमुदायाधिकरणाप्रसिद्धिः। तद्ध्रदावृत्त्यभावस्य तद्ध्रदः अधिकरणम् । एतद्ध्रदावृत्त्यभावस्य एतद्ध्रदः अधिकरणम् । यावत्तदभावाधिकरणं तु एकं न प्रसिध्यति । तथा च अव्याप्तिः । तद्वारणाय तत्तद्व्यक्तित्वेन साध्याभावानाम् अधिकरणेऽन्वयलाभाय तत्तदधिकरणेत्युक्तम् । तथा च तत्तद्ध्रदं गृहीत्वा तद्वृत्तित्वाभावस्य धूमौ सत्त्वात् लक्षणसमन्वयः कार्यः । पूर्वं साजात्ये साध्याभावानां तत्तद्व्यक्तित्वेन अन्वय उक्तः। इदानीम् अधिकरणेऽपि साध्याभावानां तत्तद्व्यक्तित्वेन अन्वय उक्तः ।

उपस्थितानामिति [पृ.409] । वह्नित्वावच्छिन्नवह्न्यभावसजातीयः निर्वह्निवृत्तित्वत्वेन निर्वह्निवृत्तित्वाभावः । वह्नित्वेन घटाभावसजातीयः घटत्वेन जगद्वृत्तित्वाभावः तदुभयाभिन्नत्वम् एकस्मिन् वृत्तित्वाभावे नास्तीत्यव्याप्तिरिति भावः । **उभयसाजात्याभावादिति** [पृ.410] । सजातीयोभयाभिन्नत्वाभावात् इत्यर्थः ।

दीधितिः

साजात्यं च समानासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण ।

गादाधरी

सजातीयत्वपरिष्कारः

ननु तत्तत्सजातीयत्वं तत्तद्वृत्तिधर्मवत्त्वम् । **तथा च** समानाधिकरणधर्मावच्छिन्नाभाववृत्त्यभावत्वादिधर्मवत्त्वं व्यधिकरणधर्मावच्छिन्नाभावेऽपि वर्तत इति तस्यापि तत्सजातीयत्वात् व्यभिचारिण्यतिव्याप्तिः, अत आह - **साजात्यं चेति** । **समानासमानाधिकरणेति** । समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेणेत्यर्थः । तृतो-

यार्थश्च अभेदः। तस्य च साजात्ये अन्वयः। विवक्षणीयमिति शेषः। तथा च तत्तत्सजातीया इत्यस्य तत्तदभाववृत्तितादृशान्यतररूपवन्त इत्यर्थः।

यद्यपि वह्नित्वाद्यवच्छिन्नवह्न्यभावनिष्ठस्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं स्वसमानाधिकरणवह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वरूपम्। तच्च तदधिकरणवृत्तित्वाभावे असंभावितमेव; तथापि स्वासमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वं समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम्, स्वसमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वमेव च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमिह विवक्षणीयम्। तच्च साध्याभावतद्वद्वृत्तित्वाभावोभयसाधारणमेव। **समनियताभावैक्यमते** च स्वाधिकरणावृत्तिधर्मावच्छिन्ना या प्रतियोगिता तन्निरूपकत्वरूपः व्यधिकरण धर्मावच्छिन्नप्रतियोगिताकत्वेत्यस्य यथाश्रुतार्थ एव आदरणीयः। तन्मते व्यधिकरणधर्मावच्छिन्नसाध्याभावतथाविधतद्वद्वृत्तित्वाभावयोः ऐक्यात् **तादृशसाध्याभावस्य** यादृशप्रतियोगितानिरूपकत्वं तादृशप्रतियोगितानिरूपकत्वस्य तथाविधतद्वद्वृत्तित्वाभावेऽपि सत्त्वात्। **एतेन** समनियताभावैक्यमते व्यधिकरणधर्मावच्छिन्नाभावस्य समवायादिसंबन्धावच्छिन्नगगनत्वाद्यवच्छिन्नगगनाद्यभावाभिन्नतया तस्य समानाधिकरणधर्मावच्छिन्नगगनादिनिष्ठप्रतियोगितानिरूपकतया व्यधिकरणधर्मावच्छिन्नाभावस्य निरुक्तरूपवत्त्वानुपपत्त्या समानाधिकरणधर्मावच्छिन्नसमानाधिकरणसंबन्धावच्छिन्नप्रतियोगिताकत्वपर्यन्तनिवेशनायासो नोपादेयः। **समनियताभावैक्यमते** गगनाभावत्वगगनाभावभिन्नत्वान्यतररूपेणापि साजात्यविवक्षणं संभवतीति ध्येयम्।

विवरणम्

ननु तत्तत्सजातीयत्वमिति [पृ.414]। तत्तत्सजातीयत्वं तत्तद्वृत्तिधर्मवत्त्वम्। तथा च 'धूमवान् वह्नेः' इत्यत्र समानाधिकरणधूमत्वावच्छिन्नधूमाभाववृत्तिः यः अभावत्वरूपो धर्मः तद्वत्त्वं घटत्वेन निर्धूमवृत्तित्वाभावेऽस्तीति घटत्वेन निर्धूमवृत्तित्वाभावस्यापि साध्याभावसजातीयतया तद्वत्त्वस्य हेतौ सत्त्वात् अतिव्याप्तिः। तद्वारणाय साजात्यम् अन्यादृशं निर्वक्ति इत्यर्थः।

तथा चेति [पृ.414]। यावन्तः साध्याभावाः तत्तद्वृत्तिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्व - असमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपवन्तः ये तत्तदधिकरणवृत्तित्वाभावाः तद्वत्त्वं व्याप्तिः। 'धूमवान् वह्नेः' इत्यत्र साध्याभावपदेन धूमत्वावच्छिन्नधूमाभावस्य ग्रहणे तद्वृत्ति यत् समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं तद्वान् तदधिकरणवृत्तित्वाभावः निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभाव एव। घटत्वेन निर्धूमवृत्तित्वाभावस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वविरहात्। तद्वत्त्वं च वह्नौ नास्ति इति नातिव्याप्तिः।

यद्यपि इत्यादि [पृ.415]। 'वह्निमान् धूमात्' इत्यादौ साध्याभावपदेन वह्नित्वावच्छिन्नवह्न्यभावस्य ग्रहणे तद्वृत्तिस्वसमानाधिकरणधर्मावच्छिप्रतियोगिताकत्वं स्वसमानाधिकरणवह्नित्वावच्छिन्नप्रतियोगिताकत्वरूपम्। तद्वत्त्वं तदधिकरणवृत्तित्वाभावे निर्वह्निवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावे न संभवति। तस्य वह्नित्वावच्छिन्नप्रतियोगिताकत्वविरहात्। तथा च समानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य अप्रसिद्धया अव्याप्तिरिति शङ्का।

समाधानं तु - अत्र समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं स्वासमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता

तत्तदनिरूपकत्वम् । एवं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं स्वसमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वमिह विवक्षितम् । एतादृशं साजात्यं तत्तत्साध्याभाव - तद्वद्वृत्तित्वाभावोभयसाधारणम् । तथा हि - स्वपदेन प्रतियोगिता ग्राह्या । स्वं - वह्नित्वेन घटाभावीयप्रतियोगिता । स्वासमानाधिकरणधर्मः वह्नित्वम् । तदवच्छिन्ना वह्नित्वेन घटाभावीयप्रतियोगिता वह्नित्वेन पटाभावीयप्रतियोगिता च । तत्तदनिरूपकत्वं वह्नित्वेन वह्न्यभावेऽप्यस्ति, निर्वह्निवृत्तित्वत्वेन निर्वह्निवृत्तित्वाभावेऽप्यस्ति । अतः ईदृशं समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपं साजात्यं समानाधिकरणधर्मावच्छिन्नसाध्याभाव - समानाधिकरणधर्मावच्छिन्नतदधिकरणवृत्तित्वाभावोभयसाधारणम् । एवं स्वसमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता घटत्वेन घटाभावीयप्रतियोगिता पटत्वेन पटाभावीयप्रतियोगिता च । तत्तदनिरूपकत्वं वह्नित्वेन घटाभावे घटत्वेन जगद्वृत्तित्वाभावे चास्ति । अतः उभयोरभावयोः निरुक्तव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपं साजात्यम् अक्षतमिति नाव्याप्तिः ।

अत्र समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वशरीरे स्वासमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता इति वीप्सायाः अनुपादाने व्यधिकरणधर्मावच्छिन्नाभावेऽपि समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वापत्तिः । तथा हि - स्वं-घटत्वेन पटाभावीयप्रतियोगिता । स्वासमानाधिकरणधर्मः घटत्वम् । तदवच्छिन्ना प्रतियोगिता सैव । तदनिरूपकत्वं पटत्वेन घटाभावेऽस्ति इति । वीप्सोक्तौ तु पटत्वेन घटाभावीयप्रतियोगितापि या या प्रतियोगिता इत्यत्र अन्तर्गता । तदनिरूपकत्वं समानाधिकरणधर्मावच्छिन्नाभावे एव अस्तीति न दोषः । एवं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वशरीरे वीप्सायाः अनुक्तौ

समानाधिकरणधर्मावच्छिन्नाभावस्यापि व्यधिकरणधर्मावच्छिन्न-प्रतियोगिताकत्वापत्तिः । स्वसमानाधिकरणधर्मावच्छिन्ना या प्रतियोगिता घटत्वावच्छिन्नघटनिष्ठप्रतियोगिता । तदनिरूपकत्वं पटत्वावच्छिन्नपटाभावस्य अस्तीति ।

समनियताभावैक्यमते [पृ.415] इति । समनियताभावानाम् ऐक्यमिति मते साजात्यघटकं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं स्वाधिकरणावृत्तिधर्मावच्छिन्ना या प्रतियोगिता तन्निरूपकत्वरूपं यथाश्रुतमेव आदरणीयम् । न तु स्वसमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वरूपम् । यथाश्रुतार्थे दोषाभावात् ।

न च व्यधिकरणधर्मावच्छिन्नसाध्याभावे वह्नित्वेन घटाभावे स्वाधिकरणावृत्तिवह्नित्वावच्छिन्नप्रतियोगिताकत्वरूपं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमस्ति । तत्तु घटत्वेन जगद्वृत्तित्वाभावे नास्ति । तस्य स्वाधिकरणावृत्तिघटत्वावच्छिन्नप्रतियोगिताकत्वेन वह्नित्वावच्छिन्नप्रतियोगिताकत्वविरहात् । तथा च यथाश्रुतं साजात्यं कथं साध्याभाव - तद्वद्वृत्तित्वाभावयोः इति वाच्यम् । समनियताभावैक्यमते सर्वेषामपि व्यधिकरणधर्मावच्छिन्नाभावानां केवलान्वयित्वेन समनियततया एकत्वात् वह्नित्वेन घटाभावस्य यथा वह्नित्वावच्छिन्नप्रतियोगिताकत्वं तथा तदभिन्नस्य घटत्वेन जगद्वृत्तित्वाभावस्यापि वह्नित्वावच्छिन्नप्रतियोगिताकत्वमस्तीति उभयोरभावयोः यथाश्रुतसाजात्योपपत्तेरिति भावः ।

तथाविधेति [पृ.415] । व्यधिकरणधर्मावच्छिन्नेत्यर्थः । **तादृशसाध्याभावस्येति** [पृ.415] । व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य वह्नित्वेन घटाद्यभावस्येत्यर्थः ।

एतेनेति [पृ.415] । व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वस्य यथाश्रुतस्यैव आदरणेनेत्यर्थः । पूर्वोक्तस्य स्वसमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वरूपस्य अनुगतस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वस्य आदरणे व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य वह्नित्वेन घटाद्यभावस्य तादृशं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं समनियताभावैक्यमते दुर्घटम् । तथा हि - वह्नित्वेन घटाभावस्य समवायेन गगनत्वेन गगनाभावस्य च केवलान्वयितया समनियतत्वेन अभिन्नत्वात्, यथा गगनाभावस्य 'स्वसमानाधिकरणगगनत्वावच्छिन्नगगननिष्ठप्रतियोगितानिरूपकत्वं तथा तदभिन्नस्य वह्नित्वेन घटाभावस्यापि गगनत्वावच्छिन्नगगननिष्ठप्रतियोगितानिरूपकत्वमेवास्ति । न तु तदनिरूपकत्वम् । तदर्थं स्वसमानाधिकरणधर्मावच्छिन्ना - स्वसमानाधिकरणसंबन्धावच्छिन्ना च या या प्रतियोगिता तत्तदनिरूपकत्वमेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमिति वक्तव्यम् । समवायसंबन्धावच्छिन्नगगनत्वावच्छिन्नप्रतियोगितायाः व्यधिकरणसंबन्धावच्छिन्नत्वात् समानाधिकरणसंबन्धावच्छिन्नप्रतियोगितापदेन ग्रहीतुमशक्यतया स्वसमानाधिकरणघटत्वावच्छिन्नसंयोगसंबन्धावच्छिन्नप्रतियोगितां गृहीत्वा तदनिरूपकत्वं वह्नित्वेन घटाभावेऽस्तीति उपपादनीयम् । स च क्लेशः अनावश्यकः । यथाश्रुतस्यैव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वस्य उपपत्तेरिति भावः । तादात्म्यविषयत्वादिकं गगनस्य समानाधिकरणसंबन्धः । तदवच्छिन्नप्रतियोगिताकः अभावः न केवलान्वयी । अतः तस्य व्यधिकरणधर्मावच्छिन्नाभावसमनियतत्वं न संभवतीति आलोच्य समवायादिव्यधिकरणसंबन्धावच्छिन्न - गगनत्वावच्छिन्न - गगनाभावानुसरणम् इति ध्येयम् ।

समनियताभावैक्यमते[पृ.415]इति। यावन्तः साध्याभावाः प्रत्येकं गगनाभावत्व - गगनाभावभिन्नत्वान्यतररूपेण तत्सजातीयाः ये तदधिकरणवृत्तित्वाभावाः तद्वत्त्वं व्याप्तिः। गगनाभावस्य केवलान्वयितया व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य व्यधिकरणधर्मावच्छिन्नतद्वद्वृत्तित्वाभावस्य च गगनाभावाभिन्नतया गगनाभावत्वेन रूपेण साजात्यम्। समानाधिकरणधर्मावच्छिन्नसाध्याभावतद्वद्वृत्तित्वाभावयोः गगनाभावभिन्नत्वेन रूपेण साजात्यं संभवतीति भावः।

दीधितिः

साध्याभावश्च पूर्वोक्तद्वितीयरीत्या प्रत्येतव्यः।

गादाधरी

[साध्याभावपरिष्कारः]

ननु यावत्साध्याभावान्तर्गतानां तत्तत्साध्यव्यक्त्यभावादीनां अधिकरणे हेतोः वृत्तित्वात् 'वह्निमान् धूमात्' इत्यादौ अव्याप्तिः, अत आह - **साध्यभावश्चेति**। **द्वितोयरीत्येति**। 'यत्समानाधिकरणानाम्' इत्यादिद्वितीयलक्षणरीत्या इत्यर्थः। साध्यतावच्छेदकावच्छिन्न - व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाव एव साध्याभावपदेन विवक्षित इति भावः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावविवक्षणे तथाविधवह्निघटोभयाभावमादाय तद्दोषतादवस्थ्यम्। अतः प्रथमरीत्या इति नोक्तम्। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावविवक्षणे वाच्यत्वादिसाध्यकस्थले वाच्यत्वत्वादिना घटाद्यभावमादाय लक्षणसमन्वयेऽपि स्वरूपसंबन्धेन तादात्म्यसंबन्धेन वा प्रमेयमात्रसाध्यकस्थले तथाविधाभावाप्रसिद्ध्या अव्याप्तिः। अतः व्यापकतावच्छेदकपर्यन्तानुधावनम्। तथा च ज्ञेयत्वत्वादिना वाच्यत्वाभाव एव तथा इति न दोषः।

साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशे च वह्न्यादिसाध्यके तार्णतार्णोभयाभावादिकमादाय दोषस्य व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायां निवेश्य वारणेऽपि सत्तादिसाध्यकस्थले विशिष्टसत्ताद्यभावमादाय दोष इति तादृशाभावो न निवेशितः।

व्यापकतावच्छेदकावच्छिन्नप्रतियोगिता न्यूनवृत्तिधर्मावच्छिन्ना अतिरिक्तवृत्तिधर्मावच्छिन्ना वा या या प्रतियोगिता तत्तदन्यत्वेन विशेषणीया। तेन वह्न्यादिसाध्यकस्थले वह्नित्वादिना महानसीयवह्निघटान्यतराभावमादाय न दोषः। **न्यूनवृत्तित्वमतिरिक्तवृत्तित्वं च विरुद्धव्यावृत्तं** निर्वाच्यम्। नातो व्यधिकरणधर्मावच्छिन्नाभावासंग्रहः।

व्यापकता च साध्यतावच्छेदकसंबन्धावच्छिन्ना ग्राह्या। तेन संयोगादिना वह्न्यादिसाध्यके समवायादिना वह्न्याद्यभावमादाय असंभववारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेन प्रतियोगिताया विशेषणीयतया समवायादिना द्रव्यत्वादिसाध्यके विषयतादिसंबन्धेन साध्यव्यापकस्य ज्ञानादेः समवायादिना अभावमादाय दोषस्य नावकाशः। **तादात्म्यसंबन्धेन प्रमेयसाध्यकस्थले** समवायित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेद एव लक्षणघटकः। **समनियताभावैक्यमते** तादृशभेदस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावाभिन्नतया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन तत्साजात्यस्य प्रसिद्धिसंभवात्।

यत्तु - 'संयोगत्वेन प्रमेयत्ववान् न' इति प्रतीतिसाक्षिकः संयोगावच्छिन्नप्रमेयत्वनिष्ठप्रतियोगितावच्छेदकताकभेद एव लक्षणघटकः। अत्यन्ताभावस्येव येन संबन्धेन तदवृत्तिर्यो धर्मः तत्संबन्धेन तदवच्छिन्नप्रतियोगितावच्छेदकताकभेदस्यापि उक्तप्रतीतिबलात् सिद्धिरिति, **तन्न**। 'वह्निमान् धूमात्', 'गुणवान्

द्रव्यत्वात्', इत्यादौ विषयितादिसंबन्धेन वह्नित्वगुणत्वादिमतः साध्यतावच्छेदकसंबन्धावच्छिन्नाभावस्य व्यावर्तनाय व्यापकतावच्छेदकताघटकसंबन्धावच्छिन्नत्वेन प्रतियोगितावच्छेदकताया अवश्यनिवेशनीयतया तादृशाभावस्य प्रामाणिकत्वेऽपि लक्षणघटकत्वासंभवात् ।

विवरणम्

ननु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविवक्षणेऽपि 'वह्निमान् धूमात्' इत्यादौ वह्नित्वेन महानसीयवह्निघटान्यतराभावमादाय अव्याप्तिः । तस्याभावस्यापि वह्निव्यापकतावच्छेदकवह्नित्वावच्छिन्नप्रतियोगिताकत्वात् लक्षणघटकतया तदधिकरणपर्वतवृत्तित्वस्यैव धूमे सत्त्वात् इत्यत अह - **व्यापकतावच्छेदकावच्छिन्नप्रतियोगितेति** [पृ.421] । व्यापकतावच्छेदकावच्छिन्नप्रतियोगितायां न्यूनवृत्तिधर्मावच्छिन्ना या या प्रतियोगिता तत्तदन्यत्वं विशेषणं देयम् । न्यूनवृत्तित्वं च तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वम् । वह्नित्वेन महानसीयवह्निघटान्यतराभावीयप्रतियोगिता स्वन्यूनवृत्तिवह्नित्वावच्छिन्ना भवति, न तु तदन्या । महानसीयवह्निघटान्यतराभावीयप्रतियोगिताधिकरणघटवृत्तिः यः वह्निभेदः तत्प्रतियोगितावच्छेदकं वह्नित्वमिति वह्नित्वं प्रतियोगितान्यूनवृत्तिधर्मः । तदवच्छिन्नप्रतियोगितान्यत्वं उक्तान्यतराभावीयप्रतियोगितायां नास्तीति तन्निरूपकाभावस्य लक्षणाघटकतया नाव्याप्तिः । धूमत्वेन धूमाभावस्य धूमत्वेन प्रमेयसामान्याभावस्य च ऐक्यात् प्रमेयवृत्तिप्रतियोगितैव 'धूमो नास्ति' इत्यत्रापि भासत इति मते धूमत्वेन धूमाभावीयप्रतियोगितायाः स्वन्यूनवृत्तिधूमत्वावच्छिन्नतया धूमाभावस्य 'धूमवान् वह्नेः' इत्यत्र लक्षणघटकत्वं न स्यात्, व्यधिकरणधर्मावच्छिन्नाभावमादाय अतिव्याप्तिः स्यात् इत्यालोच्य अतिरिक्तधर्मावच्छिन्ना वा इत्युक्तम् ।

ननु एवं निवेशेऽपि व्यधिकरणधर्मावच्छिन्नाभावस्य संग्रहो न स्यात् । तथा हि - वह्नित्वेन घटाभावीयप्रतियोगितान्यूनवृत्तित्वं तदतिरिक्तवृत्तित्वं च वह्नित्वेऽस्ति । तादृशप्रतियोगिताधिकरणघटवृत्तिभेदप्रतियोगितावच्छेदकत्वात् तादृशप्रतियोगितानाश्रयवह्निवृत्तित्वाच्च वह्नित्वस्य । तथा च न्यूनवृत्तिधर्मावच्छिन्ना अतिरिक्तवृत्तिधर्मावच्छिन्ना च वह्नित्वेन घटाभावीयप्रतियोगिता । तदन्यप्रतियोगिताकत्वं वह्नित्वेन घटाभावस्य नास्ति । अतः कथमसौ लक्षणघटक इत्यत आह - **न्यूनवृत्तित्वम् अतिरिक्तवृत्तित्वं चेति** [पृ.421] ।

विरुद्धव्यावृत्तमिति [पृ.421] । व्यधिकरणधर्मव्यावृत्तमित्यर्थः । तथा च स्वसमानाधिकरणत्वे सति स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वं न्यूनवृत्तित्वम् । स्वसमानाधिकरणत्वे सति स्वानाश्रयवृत्तित्वं अतिरिक्तवृत्तित्वं प्रकृते विवक्षितम् । वह्नित्वस्य वह्नित्वेन घटाभावीयप्रतियोगितासमानाधिकरणत्वाभावात् समानाधिकरणत्वघटितं न्यूनवृत्तित्वम् अतिरिक्तवृत्तित्वं च नास्ति । अतः न्यूनवृत्तिधर्मावच्छिन्ना अतिरिक्तवृत्तिधर्मावच्छिन्ना च या प्रतियोगिता तदन्यत्वं व्यधिकरणधर्मावच्छिन्नप्रतियोगितायाम् अस्तीति तन्निरूपकस्य व्यधिकरणधर्मावच्छिन्नाभावस्य च संग्रहः ।

व्यापकता चेति [पृ.421] । व्यापकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा 'वह्निमान् धूमात्' इत्यादौ समवायेन वह्न्यभावमादाय असंभववारणाय प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य निवेशनीयतया समवायेन द्रव्यत्वसाध्यकस्थले 'इदं द्रव्यं पृथिवीत्वात्' इत्यत्र साध्यं द्रव्यत्वं प्रति विषयतासंबन्धेन ज्ञानस्य व्यापकतया साध्यव्यापकतावच्छेदकं ज्ञानत्वं भवति । तदवच्छिन्नसाध्यतावच्छेदकसम-

वायसंबन्धावच्छिन्नाभावस्यापि लक्षणघटकतया तदधिकरणघटादिवृत्तित्वमेव पृथिवीत्वेऽस्तीति अव्याप्तिः स्यात् । व्यापकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु द्रव्यत्वरूपसाध्यं प्रतिज्ञानस्य विषयतासंबन्धेन व्यापकत्वेऽपि साध्यतावच्छेदकसमवायसंबन्धेन व्यापकत्वविरहात् समवायसंबन्धघटितव्यापकतावच्छेदकं द्रव्यत्वत्वमेव । तदवच्छिन्नप्रतियोगिताकाभावाधिकरणं गुणादिकमेव । तद्वृत्तित्वाभावस्य पृथिवीत्वे सत्त्वात् नाव्याप्तिरिति भावः । वह्निसाध्यके विषयतया तद्व्यापकस्य ज्ञानस्य साध्यतावच्छेदकसंयोगसंबन्धेन अभावस्य केवलान्वयितया समनियताभावैक्यमते गगनाभावत्वेन तत्सजातीयं तदधिकरणवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वयः संभवतीति तत्साध्यकस्थलत्यागः ।

ननु व्यापकतायां प्रतियोगितायां च साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तादात्म्यसंबन्धेन प्रमेयसाध्यकस्थले तादात्म्यसंबन्धघटितव्यापकतावच्छेदकप्रमेयत्वावच्छिन्नतादात्म्यसंबन्धावच्छिन्न - प्रतियोगिताकभावाप्रसिद्धया अव्याप्तिः । प्रमेयसामान्याभावस्य कुत्राप्यवृत्तेः इत्याशङ्क्याह - **तादात्म्यसंबन्धेन प्रमेयसाध्यकस्थले** [पृ॰ 421] इति । तादात्म्यसंबन्धेन प्रमेयसाध्यकस्थले 'समवायित्वेन प्रमेयत्ववान् न' इति प्रतीतिसिद्धः समवायित्वावच्छिन्नप्रमेयत्वनिष्ठावच्छेदकताकप्रमेयनिष्ठतादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकभेद एव लक्षणघटकः । तस्य भेदस्य प्रमेयत्वावच्छिन्नतादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकत्वात् । तस्य च केवलान्वयित्वात् न अप्रसिद्धिनिबन्धनो दोष इति भावः ।

ननु समवायितया प्रमेयत्ववद्भेदस्य व्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वेऽपि व्यधिकरणधर्मावच्छि-

न्नप्रतियोगिताकत्वविरहात् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपं तत्साजात्यम् अप्रसिद्धमिति पुनरव्याप्तिरित्यत आह - **समनियताभावैक्यमत** [पृ.421] इति । समनियताभावानाम् ऐक्यमिति मते समवायितया प्रमेयत्ववद्भेदस्य घटत्वेन पटाभावस्य च समनियततया एकत्वात् घटत्वेन पटात्यन्ताभावस्य यथा व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं तथा तदभिन्नस्य समवायितया प्रमेयत्ववद्भेदस्यापि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमस्ति । अतः न तत्साजात्याप्रसिद्धिरिति भावः ।

यत्तु इत्यादि [पृ.421] । तादात्म्येन प्रमेयसाध्यकस्थले 'समवायित्वेन प्रमेयत्ववान् न' इति भेदमादाय लक्षणसमन्वय उक्तः । अन्ये तु 'संयोगेन प्रमेयत्ववान् न' इति प्रतीतिसिद्धः संयोगरूपव्यधिकरणसंबन्धावच्छिन्न - प्रमेयत्वनिष्ठावच्छेदकताकप्रमेयनिष्ठप्रतियोगिताकभेद एव लक्षणघटकः । तस्य प्रमेयत्वावच्छिन्नतादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकत्वात् । अत्यन्ताभावस्य यथा व्यधिकरणसंबन्धवच्छिन्नप्रतियोगिताकत्वं प्रतीतिबलादङ्गीक्रियते, तथा येन संबन्धेन प्रतियोग्यवृत्तिः यो धर्मः तत्संबन्धावच्छिन्नतद्धर्मनिष्ठावच्छेदकताकप्रतियोगिताकभेदस्यापि 'संयोगेन प्रमेयत्ववान् न' इति प्रतीतिबलात् अङ्गीकर्तव्यत्वात् इति 'यत्तु' काराणाम् आशयः । 'तदवच्छिन्नप्रतियोगितावच्छेदकताकभेदस्यापि' इत्यत्र तदवच्छिन्नत्वं प्रतियोगितायामन्वेति । प्रमेयत्वावच्छिन्ना या प्रतियोगिता तन्निरूपिता या तत्संबन्धावच्छिन्ना प्रमेयत्वनिष्ठा अवच्छेदकता तत्कभेदस्य इत्यर्थः । न तु तदवच्छिन्नेत्यस्य अवच्छेदकतायामन्वयः । प्रतियोगितावच्छेदकतायाः प्रमेयत्वावच्छिन्नत्वाभावात् ।

तन्नेत्यादि [पृ.421] । उक्तभेदस्य प्रामाणिकत्वेऽपि प्रकृतलक्षणघटकत्वं न संभवति । प्रतियोगितावच्छेदकतायाः व्याप-

कतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वम् अवश्यं निवेशनीयम्। अन्यथा 'वह्निमान् धूमात्' इत्यादौ वह्नित्वावच्छिन्नव्यापकतावच्छेदकं यत् वह्नित्वम्, तदवच्छिन्नप्रतियोगिताकाभावपदेन वह्नित्वनिष्ठविषयितासंबन्धावच्छिन्नावच्छेदकताकसाध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नप्रतियोगिताकस्य विषयितासंबन्धेन वह्नित्ववज्ज्ञानादिकं संयोगसंबन्धेन नास्ति इति प्रतीतिसिद्धस्य यावदभावान्तर्गततया तदधिकरणपर्वतवृत्तित्वमेव धूमेऽस्तीति अव्याप्त्यापत्तेः । व्यापकतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु वह्नित्वस्य व्यापकतावच्छेदकत्वं समवायसंबन्धेनैव भवतीति कृत्वा समवायसंबन्ध एव व्यापकतावच्छेदकतावच्छेदकसंबन्धः। तत्संबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकाभाव एव लक्षणघटकः, न तु विषयितासंबन्धेन वह्नित्ववदभावः । लक्षणघटकाभावाधिकरणं च ह्रदादिकमेव । तद्वृत्तित्वाभावस्य धूमे सत्त्वात् नाव्याप्तिः । एवं च प्रमेयसाध्यकस्थले प्रमेयत्वस्य स्वरूपसंबन्धेनैव साध्यव्यापकतावच्छेदकत्वात् व्यापकतावच्छेदकतावच्छेदकस्वरूपसंबन्धावच्छिन्नप्रमेयत्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावस्यैव लक्षणघटकत्वात् कथं संयोगसंबन्धावच्छिन्नप्रमेयत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदमादाय समन्वयः कर्तुं शक्यते। तस्य लक्षणघटकत्वविरहात् इति भावः । 'वह्निमान् धूमात्' इत्यादौ विषयितासंबन्धेन वह्नित्ववतः ज्ञानादेः संयोगसंबन्धेन अभावस्य केवलान्वयितया समनियताभावैक्यमते गगनाभावत्वेन तत्सजातीयं तदधिकरणवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वयः संभवतीति तत्साध्यकस्थलं परित्यज्य 'गुणवान् द्रव्यत्वात्' इति स्थलानुसरणम् । विषयितासंबन्धेन गुणत्ववज्ज्ञानादेः साध्यतावच्छेदकसमवायसंबन्धावच्छिन्नाभावस्य केवलान्वयित्वविरहात् न पूर्वोक्तरीत्या समन्वयः संभवतीति भावः। तथा च साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठात्यन्ताभावनिरूपित-

साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकधर्मनिष्ठ-व्यापकतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकसाध्यता-वच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावः साध्याभावपदेन विवक्षित इति सिद्धम् ।

दीधितिः

व्याप्यवृत्तिश्च

गादाधरी

[साध्याभावे व्याप्यवृत्तित्वनिवेशप्रयोजनम्]

ननु 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ कपिसंयोगत्वावच्छिन्नकपिसंयोगाद्यभावस्यापि लक्षणघटकतया तदधिकरणे हेतोर्वृत्तेरव्याप्तिः ।

न च - साध्यतावच्छेदकावच्छिन्नव्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्य निष्फलतया कपिसंयोगत्वादेः साध्यव्यापकतावच्छेदकत्वाभावात् तादृशाभावानां न लक्षणघटकता इति - वाच्यम् ।

संयोगेन वह्न्यादिसाध्यकस्थले वह्नित्वादीनां संयोगरूप-साध्यतावच्छेदकसंबन्धघटितव्यापकतावच्छेदकत्वसंपत्तये व्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्य आवश्यकत्वात् । अन्यथा साध्यवति उत्पत्तिकालावच्छेदेन वह्नित्व - द्रव्यत्वाद्यवच्छिन्नस्य संयोगसंबन्धेन अभावसत्त्वात् साध्यतावच्छेदकसंबन्धघटितव्यापकतावच्छेदकत्वस्यैव अप्रसिद्धिप्रसङ्गात् । तथा च तत्तदधिकरणपदेन तत्तदभावीयव्याप्यवृत्तित्वनिरूपकाधिकरणमेव विवक्षणीयम् । व्याप्यवृत्तित्वनिरूपकत्वं निरवच्छिन्नाधेयतानिरूपकत्वम् । **एवञ्च** संयोगाद्यभावस्य तथाविधाधिकरणं गुणादिरेवेति न दोषः । **इत्थं च 'कपिसंयोगाभाववान्, कपिसंयोगाधिकरणत्वाभाववान् वा मेयत्वात्'** इत्यादौ कपिसंयोगतदधिकरणत्वादि-

रूपाणां यावत्साध्याभावान्तःपातिनाम् अभावानां तथाविधाधिकरणाप्रसिद्ध्या अव्याप्तिः । अतः साध्याभावं व्याप्यवृत्तित्वेन विशिनष्टि - व्याप्यवृत्तिश्चेति । तथा च तादृशाभावस्य तथाविधयावदनन्तर्गततया तथविधाधिकरणाप्रसिद्धावपि न क्षतिः ।

विवरणम्

व्याप्यवृत्तिश्चेति ग्रन्थमवतारयति - **ननु कपिसंयोगीत्यादिना** [पृ.427] । 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ साध्यव्यापकतावच्छेदकं यत् कपिसंयोगत्वं तदवच्छिन्नकपिसंयोगनिष्ठप्रतियोगिताकाभावस्यापि लक्षणघटकतया तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावसत्त्वात् अव्याप्तिः । कपिसंयोगाभावाधिकरणे मूलावच्छिन्नवृक्षे एतद्वृक्षत्वस्य वृत्तेः ।

न च - साध्यतावच्छेदककपिसंयोगत्वावच्छिन्नाधिकरणे वृक्षे कपिसंयोगाभावस्य सत्त्वात् तत्प्रतियोगितावच्छेदकमेव कपिसंयोगत्वमिति कपिसंयोगत्वस्य साध्यव्यापकतावच्छेदकत्वविरहात् कथं तदवच्छिन्नाभावस्य लक्षणघटकत्वम् । व्यापकताशरीरप्रविष्टाभावे प्रयोजनविरहेण प्रतियोगिवैयधिकरण्यानिवेशात् इति - वाच्यम् ।

संयोगेन वह्निसाध्यकहेतौ संयोगेन द्रव्यस्यापि अव्याप्यवृत्तित्वमिति मते साध्यवति पर्वते किञ्चिदवच्छेदेन संयोगसंबन्धावच्छिन्नवह्न्यभावस्य सत्त्वात् प्रतियोगितावच्छेदकत्वमेव वह्नित्वेऽस्तीति वह्नित्वस्य व्यापकतावच्छेदकत्वाभावात् वह्नित्वावच्छिन्नाभावस्य लक्षणघटकत्वं न स्यात् । तस्य लक्षणघटकत्वसंपत्त्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यम् अवश्यं निवेशनीयम् । तन्निवेशे पर्वते विद्यमानस्य वह्न्यभावस्य प्रतियोगिसमानाधिकरणत्वात् प्रतियोग्यसमानाधिकरणं घटाद्यभावमादाय वह्नित्वादेः व्यापकतावच्छेदकत्वं संपद्यते । एवं च

'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्रापि साध्यवति एतद्वृक्षे कपिसंयोगाभावस्य सत्त्वेऽपि तस्य प्रतियोगिसमानाधिकरणतया प्रतियोग्यसमानाधिकरणघटाद्यभावमादाय उक्तप्रतियोगितानवच्छेदकत्वरूपं व्यापकतावच्छेदकत्वं कपिसंयोगत्वस्य उपपादनीयम् । तथा च कपिसंयोगत्वावच्छिन्नाभावस्यापि लक्षणघटकतया तदधिकरणवृक्षवृत्तित्वमेव हेतोरस्तीति अव्याप्तिः प्रसजति । तद्वारणाय तत्तदधिकरणपदेन तत्तदभावनिष्ठव्याप्यवृत्तित्वनिरूपकाधिकरणमेव विवक्षणीयम् । व्याप्यवृत्तित्वनिरूपकत्वं च निरवच्छिन्नाधेयतानिरूपकत्वम् । तथा च यावन्तः साध्याभावाः तत्तदभावनिष्ठनिरवच्छिन्नाधेयतानिरूपकाधिकरणवृत्तित्वाभाववत्त्वं व्याप्तिः । कपिसंयोगाभावस्य लक्षणघटकत्वेऽपि तन्निष्ठनिरवच्छिन्नाधेयतानिरूपकमधिकरणं न वृक्षः । वृक्षस्य कपिसंयोगाभावनिष्ठमूलावच्छिन्नाधेयतानिरूपकत्वात् । तथा च तन्निष्ठनिरवच्छिन्नाधेयतानिरूपकमधिकरणं गुणादिकमेव । तद्वृत्तित्वाभावस्य हेतौ सत्त्वात् नाव्याप्तिः । एवं सति 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र सद्धेतौ प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकं यत् कपिसंयोगाभावत्वं तदवच्छिन्नप्रतियोगिताकाभावस्य कपिसंयोगात्मकस्यापि लक्षणघटकतया कपिसंयोगस्य च सर्वत्र अव्याप्यवृत्तित्वेन तन्निष्ठनिरवच्छिन्नाधेयतानिरूपकाधिकरणाप्रसिद्ध्या अव्याप्तिः । अतः साध्याभावेऽपि व्याप्यवृत्तित्वं निवेशयति दीधितिकारः । तन्निवेशे कपिसंयोगात्मकस्य अभावस्य अव्याप्यवृत्तितया न लक्षणघटकत्वम् । किंतु व्यधिकरणधर्मावच्छिन्नाभावस्य कपिसंयोगाभावत्वेन घटाद्यभावस्यैव लक्षणघटकत्वात् । तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य घटत्वेन जगद्वृत्तित्वाभावरूपस्य हेतौ सत्त्वात् नाव्याप्तिरिति भावः ।

एवं चेति [पृ.427] । व्याप्यवृत्तित्वनिरूपकाधिकरणविवक्षणे चेत्यर्थः । **इत्थं च** [पृ.427] । इत्यस्य स एवार्थः ।

सत्तासाध्यकाव्याप्तिवारणयोपात्ते हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे वर्तमानत्वविशेषणे स्वरूपसंबन्धेन वर्तमानत्वविशेषणेत्वाह - **कपिसंयोगाधिकरणत्वाभाववान् वेति** [पृ.427]। **तथाविधाधिकरणाप्रसिद्धया** [पृ.428] इति । व्याप्यवृत्तित्वनिरूपकाधिकरणाप्रसिद्धया इत्यर्थः ।

गादाधरी

व्याप्यवृत्तित्वं च निरवच्छिन्नवृत्तिकत्वम्; न तु अवच्छिन्नवृत्तिकान्यत्वम् । तथा सति संयोगेन धूमादिसाध्यकव्यभिचारिणि संयोगेन धूमत्वाद्यवच्छिन्नधूमाभावस्य महानसादाववच्छिन्नवृत्तिकतया अयोगोलकान्यत्वाद्यभावे साध्यतावच्छेदकसंबन्धघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया अतिव्याप्तिः । **एवञ्च** वह्न्यभावसंयोगाभावादेरपि क्वचिन्निरवच्छिन्नवृत्तिकत्वेन लक्षणघटकतया तदीयाव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वाभावमादाय दोषवारणाय अधिकरणपदस्य व्याप्यवृत्तितानिरूपकाधिकरणपरत्वम् आवश्यकम् इत्यवधेयम् ।

विवरणम्

व्याप्यवृत्तित्वं चेति [पृ.430]। व्याप्यवृत्तित्वम् अत्र निरवच्छिन्नवृत्तिकत्वरूपम् । न तु तर्कालङ्कारोक्तरीत्या अवच्छिन्नवृत्तिकान्यत्वम् । तथा सति 'संयोगेन धूमवान् वह्नेः' इत्यत्र व्यभिचारिणि अतिव्याप्तिः । साध्याभावपदेन संयोगसंबन्धावच्छिन्नधूमत्वावच्छिन्नधूमाभावमादाय हि अतिव्याप्तिर्वारणीया । संयोगेन द्रव्यस्यापि अव्याप्यवृत्तित्वमिति मते संयोगसंबन्धावच्छिन्नधूमाभावस्य महानसादौ किञ्चिदवच्छेदेनैव वृत्तेः अवच्छिन्नवृत्तिकान्यत्वविरहात् लक्षणाघटकतया धूमत्वेन घटाभावस्यैव लक्षणघटकतया तत्सजातीयस्य तद्वद्वृत्तित्वाभावस्य हेतौ सत्त्वात् अतिव्याप्त्यापत्तेः ।

न च - तत्र धूमत्वावच्छिन्नधूमाभावस्य लक्षणाघटकत्वेऽपि अयोगोलकान्यत्वाभावमादाय तदधिकरणायोगोलकवृत्तित्वस्यैव वह्नौ सत्त्वात् नातिव्याप्तिरिति - वाच्यम् । व्यापकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य निवेशितत्वात् धूमं प्रति अयोगोलकान्यत्वस्य स्वरूपसंबन्धेन व्यापकतया अयोगोलकान्यत्वाभावस्य स्वरूपसंबन्धघटितव्यापकतावच्छेदक - अयोगोलकान्यत्वावच्छिन्नप्रतियोगिताकत्वेऽपि साध्यतावच्छेदकसंयोगसंबन्धघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण तस्य लक्षणाघटकतया तमादाय अतिव्याप्तिवारणासंभवात् ।

ननु साध्याभावे व्याप्यवृत्तित्वनिवेशे सति तत्तदधिकरणे व्याप्यवृत्तित्वनिरूपकत्वविशेषणं किमर्थम् ? 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य व्याप्यवृत्तित्वाभावेन लक्षणाघटकतया अव्याप्त्यप्रसक्तेः इत्याशङ्क्याह - एवं चेति [पृ.430] । प्रकृते निरवच्छिन्नवृत्तिकत्वमेव व्याप्यवृत्तित्वम् । तच्च कपिसंयोगत्वावच्छिन्न-कपिसंयोगाभावेऽस्ति । तस्य गुणादौ निरवच्छिन्नवृत्तिकत्वात् । तथा च कपिसंयोगाभावस्यापि लक्षणघटकतया तन्निष्ठाव्याप्यवृत्तितानिरूपकवृक्षवृत्तित्वमादाय अव्याप्तेर्वारणाय तत्तदधिकरणपदस्य व्याप्यवृत्तितानिरूपकाधिकरणपरत्वम् आवश्यकमिति भावः । 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र तु समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य कपिसंयोगरूपस्य कुत्रापि निरवच्छिन्नवृत्तिकत्वं नास्तीति व्यधिकरणधर्मावच्छिन्नाभाव एव लक्षणघटक इति ध्येयम् ।

दीधितिः

व्याप्यवृत्तिश्च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो वा;

गादाधरी

[साध्याभावे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिवेशनम्]

ननु कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावे साध्ये आत्मत्वादिहेतौ अव्याप्तिः। व्याप्यवृत्तेः साध्याभावस्य आकाशाभावरूपस्य व्याप्यवृत्तितानिरूपकाधिकरणात्मादौ हेतोः वृत्तेः। अतः साध्याभावीयप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणमेव तत्तदधिकरणपदेन विवक्षणीयम्। प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशात् 'एतद्रूपान्यत्वविशिष्टगुणत्ववान् गुणत्वात्' इत्यादौ समवायरूपसाध्यतावच्छेदकसंबन्धघटितविशिष्टसाध्यव्यापकतावच्छेदकविशिष्टगुणत्वत्वावच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्यनिरूपकताया हेतुमत्यसत्त्वेऽपि नातिव्याप्तिः। तथा च कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशत्वाभावाभावादिसाध्यकात्मत्वादिहेतौ अव्याप्तिः। तत्र व्याप्यवृत्तियावत्साध्याभावान्तःपातिनः आकाशत्वाभावादेः प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याप्रसिद्धेः। कालेऽपि आकाशावच्छेदेन तादृशसाध्यरूपतदभावीयप्रतियोगिसत्त्वात् सर्वत्रैव तादृशाभावस्य प्रतियोगिसमानाधिकरणत्वात्। अतः व्याप्यवृत्तित्वमुपेक्ष्य तादृशाभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेशयति - **प्रतियोगितावच्छेदकावच्छिन्नेति**।

विवरणम्

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो वा इति पक्षान्तरानुसरणे बीजं प्रदर्शयन् अवतारयति - **ननु** [पृ.432] इत्यादिना। 'कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् आत्मत्वात्' इत्यत्र सद्धेतौ साध्याभावः आकाशाभावरूपः। स च व्याप्यवृत्तिः। तन्निष्ठव्याप्यवृत्तितानिरूपकाधिकरणम् आत्मा। तद्वृत्तित्वमेव आत्मत्वरूपहेतौ अस्तीति अव्याप्तिः। तद्वारणाय व्याप्यवृत्तितानिरूपकत्वं परित्यज्य

तत्स्थाने प्रतियोगिवैयधिकरण्यनिरूपकत्वमेव अधिकरणे निवेशनीयम् । तन्निवेशे च आत्मनि आकाशाभावरूपस्य साध्यभावस्य तत्प्रतियोगिनः आकाशाभावनिष्ठकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य च सत्त्वेन साध्याभावनिष्ठप्रतियोगिसामानाधिकरण्यनिरूपकाधिकरणमेव आत्मा भवति । साध्याभावनिष्ठप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणं तु प्रतियोगिशून्यं घटादिकमेव । तद्वृत्तित्वाभावस्य आत्मत्वे सत्त्वात् नाव्याप्तिः ।

न च - प्रतियोगिवैयधिकरण्यनिरूपकत्वनिवेशे 'एतद्रूपान्यत्वविशिष्टगुणत्ववान् गुणत्वात्' इत्यत्र अतिव्याप्तिः । एतद्रूपान्यत्वविशिष्टगुणत्वाभाववति एतद्रूपे गुणत्वसत्त्वात् अयं हेतुर्व्यभिचारी । अत्र साध्यव्यापकतावच्छेदकं एतद्रूपान्यत्वविशिष्टगुणत्ववत्त्वम् । तदवच्छिन्नप्रतियोगिताकाभावस्य अधिकरणं यद्यपि एतद्रूपं भवति, तथापि एतद्रूपे तादृशाभावप्रतियोगिनः गुणस्य सत्त्वात् प्रतियोगिसामानाधिकरण्यनिरूपकमधिकरणमेव एतद्रूपम् । प्रतियोगिवैयधिकरण्यनिरूपकमधिकरणं कर्मादिकम् । तद्वृत्तित्वाभावस्य गुणत्वे सत्त्वात् अतिव्याप्तिः - इति वाच्यम् ।

प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणस्य विवक्षितत्वात् । तथा सति एतद्रूपे प्रतियोगितावच्छेदक - एतद्रूपान्यत्वविशिष्टगुणत्ववत्त्वावच्छिन्नस्य असत्त्वेन विशिष्टगुणत्वाभावनिष्ठप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणं एतद्रूपमेव भवति । तद्वृत्तित्वमेव गुणत्वेऽस्तीति नातिव्याप्तिः । इत्थं च तत्तदधिकरणपदेन प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणविवक्षायां 'कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशत्वाभावाभाववान् आत्मत्वात्' इत्यत्र अव्याप्तिः । अत्र व्याप्यवृत्तियावत्साध्याभावान्तर्गतः आकाशत्वाभावरूपः समानाधिकरणधर्मावच्छिन्नसाध्याभावः तस्य प्रतियोगि-

वैयधिकरण्यनिरूपकमधिकरणमप्रसिद्धम् । आत्मनि प्रतियोगिनः अभावस्य उभयोः सत्त्वात् । न च—काल एव तादृशमधिकरणम् । तत्र आकाशत्वाभावरूपस्य साध्याभावस्य सत्त्वेऽपिकालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशत्वाभावाभावरूपप्रतियोगिनः असत्त्वात् काले कालिकसंबन्धेन आकाशत्वाभावस्य वर्तमानतया तदभावस्य असंभवात् इति—वाच्यम् ।

काले घटाद्यवच्छेदेन कालिकसंबन्धेन आकाशत्वाभावस्य सत्त्वेऽपि आकाशावच्छेदेन आकाशत्वाभावः कालिकसंबन्धेन नास्ति । तदवच्छेदेन आकाशत्वस्यैव काले सत्त्वात् । तथा च आकाशावच्छेदेन साध्यरूपस्य प्रतियोगिनः आकाशत्वाभावरूपस्य साध्याभावस्य च काले सत्त्वात् कालोऽपि प्रतियोगिसामानाधिकरण्यनिरूपकमेव अधिकरणम् । तथा च तत्र साध्याभावनिष्ठप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्ध्या अव्याप्तिः । तद्वारणाय साध्याभावेऽपि व्याप्यवृत्तित्वम् उपेक्ष्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेशनीयम् । उक्तस्थले समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य प्रतियोगिसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभाव एव साध्याभावपदेन ग्राह्यः । अतो नाव्याप्तिरिति भावः ।

रूपान्यत्वविशिष्टगुणत्वसाध्यकस्थले यावत्साध्याभावान्तःपातिरूपासमवेतत्वावच्छिन्नाभावस्य रूपे प्रतियोगिवैयधिकरण्यसंभवात् नातिव्याप्तिरित्यालोच्य एतद्रूपान्यत्वविशिष्टेत्युक्तम् ।

आकाशत्वाभावाभावसाध्यकेति [पृ.432] । आकाशाभावस्य अवृत्तिप्रतियोगिकस्य कालिकसंबन्धेन व्याप्यवृत्तित्वात् तत्संबन्धावच्छिन्नतदभावस्य काले किञ्चिदवच्छेदेनापि असत्त्वात् काल एव प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणमिति प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धिः कालिकसंबन्धावच्छिन्ना-

काशाभावाभावसाध्यकस्थले न संभवतीति तत्स्थलं परित्यज्य आकाशत्वाभावाभावसाध्यकस्थलानुसरणम् ।

आकाशावच्छेदेनेति [पृ.432] । आकाशस्यापि कालिकसंबन्धेन महाकालवृत्तित्वात् अवच्छेद्याधिकरणसंबन्धित्वेन अवच्छेदकत्वमिति भावः ।

गादाधरी

[प्रतियोगितावच्छेदकावच्छिन्नस्य प्रयोजनम्]

अत्र च समनियताभावैक्यमते विश्वेषामेव व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितया तत्तत्प्रतियोग्यनधिकरणाप्रसिद्धया तदसंग्रहः । विशिष्टसाध्यव्यापकतावच्छेदकावच्छिन्नयत्किंचित्प्रतियोगिताश्रयवैयधिकरण्यनिवेशे च वाच्यत्वत्वादिना घटाद्यभावस्य घटादिवैयधिकरण्येन लक्षणघटकतानिर्वाहेऽपि प्रतियोगिभेदेन प्रतियोगिताभेदमते जन्यज्ञानविषयत्वादिसाध्यके यत्किंचित्कालावच्छेदेन परमाण्वादौ प्रसिद्धस्य साध्यतावच्छेदकावच्छिन्नाभावस्य यत्किञ्चित्प्रतियोग्यनधिकरणवृत्तेः प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धया अव्याप्तिः । **तत्रापि** यत्किंचित्प्रतियोगितान्तर्भावेन तादृशानधिकरणत्वप्रसिद्धिसंपादने यत्किञ्चित्प्रतियोगिताश्रयप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणे हेतोर्वृत्त्या अव्याप्तितादवस्थ्यम् । एवं 'वन्हिमान् धूमात्' इत्यादौ द्रव्यत्वाद्यवच्छिन्नस्य संयोगेन योऽभावः तस्य द्रव्येऽपि उत्पत्तिकालावच्छेदेन वर्तमानस्य गुणादौ प्रतियोगिव्यधिकरणस्य प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणगुणादौ हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्धया अव्याप्तिवारणाय **हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे प्रतियोगिवैयधिकरण्यम्** अभावे विशेषणं देयम् । एवञ्च 'एतद्रूपान्यत्वविशिष्टसत्तावान् जातेः' इत्यादौ समवायघटितसाध्यव्यापकतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नाभावस्य हेत्वधिकरणे

सत्तादिरूपप्रतियोगिसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकतया अतिव्याप्तिः । अतः प्रतियोगितावच्छेदकावच्छिन्नत्वोपादानम् ।

विवरणम्

साध्याभावनिष्ठप्रतियोगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशस्य प्रयोजनम् उपपादयति-**अत्र चेत्यादिना** [पृ.435] । अत्रायं पिण्डितार्थः - साध्याभावे प्रतियोग्यनधिकरणवृत्तित्वविशेषणे दत्ते सति समनियताभावानाम् ऐक्यात् व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोग्यनधिकरणाप्रसिद्ध्या अव्याप्तिः । वह्नित्वेन घटाभावस्य वह्नित्वेन पटाद्यभावस्य च समनियतत्वेन अभिन्नतया वह्नित्वेन घटाभावस्य विश्वं प्रतियोगि। अतः वह्नित्वेन घटाभावाधिकरणे सर्वत्र यो यः पदार्थः वर्तते तस्य सर्वस्यापि वह्नित्वेन घटाभावप्रतियोगितया तत्प्रतियोग्यनधिकरणमेव अप्रसिद्धमिति प्रतियोग्यनधिकरणवृत्तित्वं व्यधिकरणधर्मावच्छिन्नाभावस्य न संभवतीति तदसंग्रहापत्तिः । साध्यतावच्छेदकविशिष्टसाध्यव्यापकतावच्छेदकावच्छिन्नयत्किंचित्प्रतियोगिताश्रयानधिकरणवृत्तित्वं निवेश्य वाच्यत्वत्वेन घटाभावस्य वा वह्नित्वेन घटाभावस्य वा यत्किंचित्प्रतियोगिताश्रयघटानधिकरणभूतलवृत्तित्वेन लक्षणघटकत्वसंभवेऽपि प्रतियोगिभेदेन प्रतियोगिताया भेद इति मते जन्यज्ञानविषयत्वसाध्यकसद्धेतौ 'अयं जन्यज्ञानविषयः द्रव्यत्वात्' इत्यादौ अव्याप्तिः । तत्र जन्यज्ञानविषयत्वत्वावच्छिन्नाभावस्य महाप्रलयावच्छेदेन परमाण्वादौ प्रसिद्धस्य यत्किञ्चित्प्रतियोग्यनधिकरणवृत्तित्वमप्यस्ति । जन्यज्ञानविषयत्वस्य विषयभेदेन भिन्नस्य प्रतियोगितापि भिन्ना । अतः यत्किंचित्प्रतियोगितापदेन घटादिरूपजन्यज्ञानविषयत्वनिष्ठप्रतियोगितायाः ग्रहणे तदाश्रयतादृशविषयत्वानधिकरणत्वं परमा-

णावस्ति । तद्वृत्तित्वं च प्रलयावच्छेदेन जन्यज्ञानविषयत्ववत्वावच्छिन्नाभावस्य अस्ति । अतः तस्य लक्षणघटकतया तन्निष्ठप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धया अव्याप्तिः ।

न च - परमाणुरेव तादृशाधिकरणम् इति - वाच्यम् । परमाणौ सृष्टिकालावच्छेदेन जन्यज्ञानविषयत्वरूपप्रतियोगिसत्त्वात् ।

न च - प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणमित्यत्रापि यत्किंचित्प्रतियोगिताश्रयानधिकरणवृत्तित्वनिरूपकाधिकरणमेव विवक्षितम् । तथा च घटादिरूपजन्यज्ञानविषयत्वनिष्ठप्रतियोगिताश्रयानधिकरणत्वस्य परमाणौ सत्त्वात् परमाणुरेव तादृशाधिकरणम् इति—वाच्यम् ।

एवंरीत्या अधिकरणप्रसिद्धावपि अस्मिन् परमाणुरूपेऽधिकरणे द्रव्यत्वरूपहेतोः वृत्त्या अव्याप्तितादवस्थ्यात् ।

एवं 'वन्हिमान् धूमात्' इत्यादौ साध्यव्यापकतावच्छेदकद्रव्यत्वावच्छिन्नस्य संयोगसंबन्धेन योऽभावः तस्य गुणादौ प्रतियोगिव्यधिकरणस्य प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणगुणादौ हेतुतावच्छेदकसंयोगसंबन्धेन वृत्तेरप्रसिद्धया अव्याप्तिः । तद्वारणाय हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे प्रतियोगिवैयधिकरण्यं साध्याभावे विशेषणं देयम् । तथा च प्रतियोग्यनधिकरणीभूतहेतुतावच्छेदकसंबन्धावच्छिन्नकिञ्चिन्निष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तित्वं प्रतियोगिवैयधिकरण्यम् । द्रव्यत्वावच्छिन्नस्य संयोगसंबन्धेन योऽभावः सः प्रतियोग्यनधिकरणगुणवृत्तिः यद्यपि भवति, तथापि गुणस्य संयोगसंबन्धेन किंचिदधिकरणत्वविरहात् स गुणवृत्तिः अभावः संयोगसंबन्धेन किञ्चिदधिकरणवृत्तिर्न भवति । द्रव्यस्य संयोगसंबन्धेन किञ्चिदधिकरणत्वेऽपि उत्पत्तिकालावच्छेदेन

द्रव्ये वर्तमानः संयोगसंबन्धावच्छिन्नद्रव्यत्वावच्छिन्नाभावः प्रतियोग्यनधिकरणवृत्तिर्न भवति । द्रव्यस्य तत्प्रतियोग्यधिकरणत्वात् ।

अतः व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वयः कार्यः । एवं सति 'एतद्रूपान्यत्वविशिष्टसत्तावान् जातेः' इत्यत्र व्यभिचारिणि एतद्रूपान्यत्वविशिष्टसत्तात्वावच्छिन्नाभावस्य हेतुतावच्छेदकसमवायसंबन्धेन किञ्चिदधिकरणे गुणत्वाद्यधिकरणे एतद्रूपे वर्तमानस्य सत्तारूपप्रतियोग्यधिकरण - एतद्रूपवृत्तित्वमेवास्ति न तु प्रतियोग्यनधिकरणवृत्तित्वमिति व्यधिकरणधर्मावच्छिन्नाभावस्य एतद्रूपान्यत्वविशिष्टसत्तात्वेन घटाद्यभावस्यैव लक्षणघटकतया तत्सजातीयस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य तदधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वात् अतिव्याप्तिः । तद्वारणाय प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशः । तन्निवेशे प्रतियोगितावच्छेदकं यत् एतद्रूपान्यत्वविशिष्टसत्तात्वं तदवच्छिन्नानधिकरण - एतद्रूपवृत्तितया समानाधिकरणधर्मावच्छिन्नसाध्याभावस्यापि लक्षणघटकतया तदधिकरण - एतद्रूपवृत्तित्वमेव हेतावस्तीति नातिव्याप्तिः । समनियताभावभेदमते वाच्यत्वत्वादिना घटाभावस्य स्वप्रतियोगिभूतघटानधिकरणवृत्तित्वात् तत्संग्रहायाह- **समनियताभावैक्यमत** [पृ.435] इति ।

'संयोगाभाववान् मेयत्वात्' इत्यादौ स्वीययत्किञ्चित्प्रतियोगिताश्रयसमवेतसामान्याभावानधिकरणवृत्तित्वेन संयोगात्मकस्य साध्याभावस्य लक्षणघटकत्वसंभवात् विशिष्टसाध्यव्यापकतावच्छेदकावच्छिन्नेति यत्किंचित्प्रतियोगितायां विशेषणं दत्तम् । **तत्रापीति** [पृ.435] । तत्तदभावाधिकरणेऽपीत्यर्थः ।

द्रव्येऽपि उत्पत्तिकालावच्छेदेन वर्तमानस्येति [पृ.435] । इदं च हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे वर्तमानत्वरूपस्य

दीधितिकारवक्ष्यमाणस्य विशेषणस्य सत्त्वसूचनाय। **हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे प्रतियोगिवैयधिकरण्यमिति** [पृ.435]। प्रतियोग्यनधिकरणीभूतं यत् हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणं तद्वृत्तित्वमित्यर्थः।

'गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः' इत्यत्र द्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावस्य प्रतियोगिवैयधिकरण्यसंभवात् तदभावमादाय अतिव्याप्तिवारणसंभवात् तत्स्थलमुपेक्ष्य एतद्रूपान्यत्वविशिष्टसत्तासाध्यकस्थलानुसरणम्।

गादाधरी

[केवलान्वयिसाध्यकस्थले प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यं दुर्घटमित्याक्षेपः]

अथ **केवलान्वयिस्थले** लक्षणघटकानां वाच्यत्वत्वाद्यवच्छिन्नघटाद्यभावानां सर्वेषामेव प्रतियोगितावच्छेदकवाच्यत्वत्वावच्छिन्नानधिकरणाप्रसिद्धिः।

न च - **यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरण**वृत्तित्वमेव निवेशनीयम्। तथा च समनियताभावानामैक्योपगमेन **व्यतिरेकितावच्छेदकधर्मस्यापि उक्ताभावप्रतियोगितावच्छेदकतया** तदवच्छिन्नानधिकरणत्वस्य प्रसिद्ध्या तेषां लक्षणघटकता इति-वाच्यम्।

तथा सति संयोगाभावादिसाध्यकस्थले संयोगाद्यात्मकाभावस्य यत्किचित्प्रतियोगितावच्छेदकसमवेतसामान्याभावत्वावच्छिन्नानधिकरणवृत्तित्वात् तद्व्यावर्तनासंभवात्। **विशिष्टसाध्यव्यापकतावच्छेदकत्वेन** प्रतियोगितावच्छेदकविशेषणे **उक्तस्थले तादृशप्रतियोगितावच्छेदका**वच्छिन्नानधिकरणाप्रसिद्धेः दुर्वारत्वात्। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वनिवेशे च व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यप्रसिद्ध्या तादृशप्रतियोगिवैयधिकरण्यं दुर्घटमिति।

विवरणम्

अथ केवलान्वयिस्थल इति [पृ.439]। प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे केवलान्वयिसाध्यकस्थले 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ लक्षणघटकानां वाच्यत्वत्वेन घटाद्यभावानां प्रतियोगितावच्छेदकं यत् वाच्यत्वत्वं तदवच्छिन्नवाच्यत्वानधिकरणाप्रसिद्धया तद्वृत्तित्वघटितलक्षणस्य अव्याप्तिः।

न च - प्रतियोगितावच्छेदकयत्किंचिद्धर्मावच्छिन्नानधिकरणवृत्तित्वं साध्याभावस्य विशेषणम्। समनियताभावानाम् ऐक्यात् वाच्यत्वत्वेन घटाभावस्य घटत्वेन पटाभावस्य च अभिन्नतया वाच्यत्वत्वेन घटाभावस्य वाच्यत्ववत् घटत्वादिकमपि प्रतियोगितावच्छेदकम्। अतः प्रतियोगितावच्छेदकयत्किंचिद्धर्मपदेन घटत्वादिकं गृहीत्वा तदवच्छिन्नानधिकरणभूतलादिवृत्तित्वं वाच्यत्वत्वेन घटाभावेऽस्तीति तस्य लक्षणघटकत्वम्। अतः न अप्रसिद्धिनिबन्धना अव्याप्तिरिति - **वाच्यम्**।

तथा सति 'संयोगाभाववान् प्रमेयत्वात्' इत्यत्र सद्धेतौ समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य संयोगात्मकस्य लक्षणघटकत्वापत्तिः। संयोगात्मकाभावस्य संयोगाभावत्वं यथा प्रतियोगितावच्छेदकं तथा समवेतसामान्याभावत्वमपि प्रतियोगितावच्छेदकम्। समवेतसामान्याभावत्वं हि समवेतात्मकस्य समवेतसामान्याभावाभावस्य प्रतियोगितावच्छेदकम्। संयोगस्यापि समवेततया समवेतसामान्याभावत्वं प्रतियोगितावच्छेदकम्। तथा च यत्किंचित्प्रतियोगितावच्छेदकपदेन समवेतसामान्याभावत्वं गृहीत्वा तदवच्छिन्नानधिकरणद्रव्यवृत्तित्वं संयोगात्मकस्य अभावस्यास्तीति तस्य लक्षणघटकत्वं स्यात्। न चेष्टापत्तिः। तन्निष्ठप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धया अव्याप्त्यापत्तेः।

न च - प्रतियोगितावच्छेदके साध्यतावच्छेदकविशिष्ट-साध्यव्यापकतावच्छेदकत्वं विशेषणं देयम् । तथा च साध्यता-वच्छेदकविशिष्टसाध्यव्यापकतावच्छेदकप्रतियोगितावच्छेदकयत्किं-चिद्धर्मावच्छिन्नानधिकरणवृत्तित्वं प्रतियोगिवैयधिकरण्यम् । सम-वेतसामान्याभावत्वं न संयोगाभावव्यापकतावच्छेदकम् । संयोगा-भाववति द्रव्ये समवेतसामान्याभावस्य असत्त्वात् । समवेतस्य द्रव्यत्वादेः तत्र सत्त्वात् । किन्तु संयोगाभावत्वमेव व्यापकता-वच्छेदकम् । तदवच्छिन्नानधिकरणाप्रसिद्ध्या तद्वृत्तित्वरूपप्रति-योगिवैयधिकरण्यं संयोगात्मकाभावे नास्तीति स न लक्षण-घटकः । अतः तन्निष्ठप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणा-प्रसिद्धावपि न क्षतिः । संयोगाभावत्वरूपव्यधिकरणधर्मावच्छिन्न-घटाद्यभावमादाय लक्षणसंगमनात् इति - वाच्यम् ।

तथा सति केवलान्वयिसाध्यकस्थले प्रतियोगितावच्छेदक-पदेन घटत्वादिकं ग्रहीतुं न शक्यते । तस्य वाच्यत्वत्वावच्छिन्न-व्यापकतावच्छेदकत्वविरहात् । किंतु वाच्यत्वत्वज्ञेयत्वादिकमेव ग्राह्यम् । तदवच्छिन्नानधिकरणस्य अप्रसिद्ध्या तद्वृत्तित्वरूपं प्रतियोगिवैयधिकरण्यं वाच्यत्वत्वेन घटाद्यभावस्य दुर्घटमिति अव्याप्तेः दुर्वारत्वात् ।

न च - प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरण-वृत्तित्वं निवेश्यते । प्रतियोगिनः घटादेः अनधिकरणस्य प्रसिद्ध्या च नाव्याप्तिः इति—वाच्यम् ।

तथापि प्रतियोगिनः घटादेः वाच्यत्वत्वरूपप्रतियोगिता-वच्छेदकावच्छिन्नत्वविरहात् प्रतियोगितावच्छेदकावच्छिन्नप्रति-योग्यप्रसिद्ध्या तदनधिकरणवृत्तित्वरूपं प्रतियोगितावच्छेदका-वच्छिन्नप्रतियोगिवैयधिकरण्यं व्यधिकरणधर्मावच्छिन्नप्रतियोगिता-कस्य वाच्यत्वत्वेन घटाद्यभावस्य दुर्घटम् - इति आक्षेपः ।

यत्किञ्चिदिति [पृ.439] प्रतियोगितावच्छेदकेऽन्वेति । **व्यतिरेकितावच्छेदकधर्मस्यापीति** [पृ.439] । अत्यन्ताभावप्रतियोगितावच्छेदकधर्मस्य घटत्वादेरित्यर्थः । घटत्वाद्यवच्छिन्नानधिकरणं प्रसिद्धमिति ज्ञापनाय धर्मे व्यतिरेकितावच्छेदकत्वोक्तिः ।

उक्ताभावप्रतियोगितावच्छेदकतयेति [पृ.439] । वाच्यत्वत्वावच्छिन्नघटाद्यभावप्रतियोगितावच्छेदकतया इत्यर्थः । **विशिष्टसाध्यव्यापकतावच्छेदकत्वेनेति** [पृ. 439] । साध्यतावच्छेदकविशिष्टसाध्यव्यापकतावच्छेदकत्वेनेत्यर्थः । **उक्तस्थले इति** [पृ.439] । केवलान्वयिसाध्यकस्थले इत्यर्थः । **तादृशप्रतियोगितावच्छेदकेति** [पृ.439] तादृशं साध्यतावच्छेदकविशिष्टसाध्यव्यापकतावच्छेदकं यत् प्रतियोगितावच्छेदकं तदवच्छिन्नानधिकरणस्य अप्रसिद्धेरित्यर्थः ।

गादाधरी

[तस्य केषाञ्चिन्मतेन परिहारः]

अत्र केचित् - स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियगिसमानाधिकरणाः ये ये तदन्यत्वं व्यधिकरणान्तार्थः । न तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वम् । व्यधिकरणधर्मावच्छिन्नाभावस्य तादृशप्रतियोग्यप्रसिद्ध्या असङ्ग्रहात् ।

न च-एवं सति 'धूमवान् वह्नेः' इत्यादौ साध्यतावच्छेदकीभूतसंयोगसंबन्धघटितव्यापकतावच्छेदकधूमत्वाद्यवच्छिन्नसंयोगसंबन्धावच्छिन्नप्रतियोगिताकानां धूमाद्यभावानां उत्पत्तिकालावच्छेदेन धूमादिमति वृत्तेः व्यधिकरणधर्मावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणतया अतिव्याप्तिरिति - वाच्यम् ।

साध्यतावच्छेदकसंबन्धेन व्यापकतामनिवेश्य येन संबन्धेन व्यापकता तत्संबन्धावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावं निवेश्य **विषयतासंबन्धेन** साध्यव्यापकज्ञानस्य समवायसंबन्धावच्छिन्ना-

भावमादाय उक्तदोषस्य वारणीयतया अयोगोलकभेदादेरभाव-मादाय अतिव्याप्तिवारणसंभवात् ।

यादृशप्रतियोगितावच्छेदको यो धर्मः तद्विशिष्टतादृशप्रति-योगिताश्रयसामानाधिकरण्यं विवक्षणीयम् । तेन समनियता-भावैक्यमते तादृशवाच्यत्वत्वादिना घटाद्यभावस्यापि घटत्वादिना वाच्यत्वाभावाभिन्नतया वाच्यत्वादिप्रतियोगिकत्वेन प्रतियोगिता-वच्छेदकवाच्यत्वत्वादिविशिष्टवाच्यत्वादिरूपप्रतियोगिसमानाधि-करणत्वेऽपि न क्षतिः ।

न च - एवमपि वाच्यत्वादिसाध्यकस्थले सर्वेषाम् अभा-वानां पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधि-करणतया प्रतियोग्यसमानाधिकरणाभावाप्रसिद्धिरिति - वाच्यम् ।

स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणवृत्यभावीयप्रतियोगि-ताभिन्नत्वेन व्यापकतावच्छेदकावच्छिन्नप्रतियोगिता विशेषणीया इत्यत्रैव प्रतियोगितावच्छेदकेत्यादेः तात्पर्यात् वाच्यत्वत्वावच्छिन्न-घटादिनिष्ठप्रतियोगितायाः स्वावच्छेदकविशिष्टस्वाश्रयाप्रसिद्धया निरुक्तप्रतियोगिताभिन्नत्वेन तन्निरूपकमभावमादाय वाच्यत्वादि-साध्यके लक्षणसमन्वयसंभवात् ।

न च - तथापि 'एतदभावभिन्नं मेयत्वात्' इत्यादौ साध्य-व्यापकतावच्छेदकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव-स्य एतदभावमात्रवृत्तेः अभावमात्राधिकरणकतया अधिकरण-स्वरूपत्वात् एतदभावभेदादिरूपप्रतियोगिसमानाधिकरणतया **निरुक्तप्रतियोगिताभिन्न**व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकोऽ-भावः व्यधिकरणधर्मावच्छिन्नाभाव एव इति अतिव्याप्तिरिति वाच्यम् ।

स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणे स्वनिरूपकाभावत्वेन वर्तते योऽभावः तदीयप्रतियोगिताभिन्नत्वेन व्यापकतावच्छेदका-

वच्छिन्नप्रतियोगितायां विशेषणीयतया एतदभावाधिकरणे एतदभावभिन्ने एतदभावत्वेन एतदभावरूपैतदभावभेदाभावस्य वृत्तावपि तादृशाधिकरणे एतदभावभेदो नास्ति इत्यप्रतीत्या एतदभावभेदत्वावच्छिन्नप्रतियोगिताकाभावत्वेन तस्यावृत्तित्वात् एतदभावभेदत्वावच्छिन्नप्रतियोगितायां निरूक्तप्रतियोगिताभेदस्य अक्षतत्वादिति—आहुः ।

विवरणम्

उक्ताक्षेपं केषांचिन्मतेन परिहरति - **अत्र केचिदित्यादिना** [पृ.442] । साध्याभावविशेषणस्य प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणेत्यस्य स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणाः ये ये तत्तद्भिन्नेत्यर्थः । न तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तीत्यर्थः; येन व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्ध्या प्रतियोगिवैयधिकरण्यं दुर्घटं स्यात् । स्वपदेन अव्याप्यवृत्तयः कपिसंयोगाद्यभावाः ग्राह्याः । तेषां स्वप्रतियोगितावच्छेदककपिसंयोगत्वावच्छिन्नकपिसंयोगरूपप्रतियोगिसमानाधिकरणत्वात् । तद्भिन्नत्वं च वाच्यत्वत्वादिना घटाद्यभावस्य सुघटमिति भावः ।

न च एवं सतीति [पृ.442] । व्यापकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य प्रतियोगितायां तत्संबन्धावच्छिन्नत्वस्य पूर्वं निवेशितत्वात् 'धूमवान् वह्नेः' इत्यादौ साध्यतावच्छेदकसंयोगसबन्धावच्छिन्नधूमव्यापकतावच्छेदकधूमत्वावच्छिन्नसंयोगसंबन्धावच्छिन्नप्रतियोगिताकानां धूमाद्यभावानां प्रतियोगिधूमाद्यधिकरणे पर्वतादौ उत्पत्तिकालावच्छेदेन वर्तमानतया स्वप्रतियोगिसमानाधिकरणभिन्नत्वं नास्तीति धूमत्वावच्छिन्नधूमाभावस्य लक्षणाघटकतया धूमत्वेन घटाभावस्यैव लक्षणघटकतया तत्सजातीयतदधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वात् अतिव्याप्तिरिति भावः ।

साध्यतावच्छेदकसंबन्धेनेति [पृ.442] । साध्यतावच्छेदकसंबन्धेन व्यापकत्वमनिवेश्य येन संबन्धेन व्यापकता तदवच्छेदकावच्छिन्नतत्संबन्धावच्छिन्नप्रतियोगिताकाभावः साध्याभावपदेन विवक्षितः । 'धूमवान् वह्नेः' इत्यत्र अयोगोलकभेदस्य स्वरूपसंबन्धेन धूमव्यापकत्वात् व्यापकतावच्छेदकम् अयोगोलकभेदत्वम्, तदवच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावं साध्याभावपदेन गृहीत्वा तदधिकरणायोगोलकवृत्तित्वमेव वह्नावस्तीति अतिव्याप्तिवारणं संभवतीति भावः ।

ननु व्यापकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशे समवायादिना द्रव्यत्वसाध्यके पृथिवीत्वादिहेतौ विषयतासंबन्धेन साध्यव्यापकस्य ज्ञानस्य समवायसंबन्धावच्छिन्नाभावमादाय तद्वद्घटादिवृत्तित्वस्य हेतौ सत्त्वात् अव्याप्तिरित्याशङ्क्य येन संबन्धेन व्यापकता तत्संबन्धावच्छिन्नप्रतियोगिताकाभावस्य निवेशात् समवायसंबन्धावच्छिन्नज्ञानाभावः न लक्षणघटकः, किन्तु विषयतासंबन्धावच्छिन्नज्ञानाभाव एव ग्राह्यः । स तु अप्रसिद्धः । सर्वत्र विषयतासंबन्धेन ज्ञानस्य सत्त्वात् । अतः व्यधिकरणधर्मावच्छिन्नाभावमादाय अव्याप्तिर्वारणीया इत्याह - **विषयता संबन्धेनेति** [पृ.442] ।

ननु स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणाः ये ये तत्तदन्यत्वं व्यधिकरणान्तार्थः इत्युक्तावपि समनियताभावानाम् ऐक्यमिति मते वाच्यत्वत्वेन घटाभावस्य घटत्वेन वाच्यत्वाभावस्य च ऐक्यात् वाच्यत्वत्वेन घटाभावस्यापि वाच्यत्वप्रतियोगिकत्वमस्ति । तथा च स्वपदेन वाच्यत्वत्वेन घटाभावस्य ग्रहणे तत्प्रतियोगितावच्छेदकं यत् वाच्यत्वत्वं तद्विशिष्टं यत् वाच्यत्वरूपं प्रतियोगि तदधिकरणभूतलादिवृत्तित्वेन वाच्यत्वत्वेन घटाभावस्य तदन्यत्वरूपं प्रतियोगिवैयधिकरण्यं नास्तीति कथं लक्षणघटकत्वम् इत्याशङ्क्याह - **यादृशप्रति-**

योगितावच्छेदक इति [पृ.443]। यादृशप्रतियोगितावच्छेदको यो धर्मः तद्विशिष्टतादृशप्रतियोगिताश्रयाधिकरणवृत्तयः ये ये अभावाः तदन्यत्वं प्रतियोगिव्यधिकरणत्वम्। वाच्यत्वत्वेन घटाभावस्य घटत्वेन वाच्यत्वाभावस्य च अभिन्नत्वेऽपि तदीयप्रतियोगिता वाच्यत्वत्वावच्छिन्ना घटनिष्ठा अन्या। घटत्वावच्छिन्ना वाच्यत्वनिष्ठा अन्या। वाच्यत्वत्वं तु घटनिष्ठप्रतियोगितायाम् अवच्छेदकम्। तादृशप्रतियोगिताश्रयः घटः वाच्यत्वत्वविशिष्टो न भवति। अतः यादृशप्रतियोगितापदेन अव्याप्यवृत्त्यभावीयप्रतियोगिता ग्राह्या। अतः कपिसंयोगाद्यभावाः स्वप्रतियोगिसमाधिकरणाः। तदन्यत्वं वाच्यत्वत्वेन घटाभावस्य अस्तीति तस्य प्रतियोगिवैयधिकरण्योपपत्तिरिति भावः।

न चैवमपीत्यादि [पृ.443]। वाच्यत्वसाध्यकस्थले लक्षणघटकस्य वाच्यत्वत्वादिना घटाद्यभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति नाशङ्कनीयम्। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायां स्वावच्छेदकविशिष्ट - स्वाश्रयाधिकरणवृत्त्यभावीयप्रतियोगिताभिन्नत्वं निवेशनीयमित्यत्रैव अभावे प्रतियोगिवैयधिकरण्यनिवेशपरस्य दीधितिग्रन्थस्य तात्पर्यम्। स्वपदेन वाच्यत्वत्वावच्छिन्नघटनिष्ठप्रतियोगितायाः ग्रहणे तदवच्छेदकवाच्यत्वत्वविशिष्टस्य स्वाश्रयस्य घटस्य अप्रसिद्धिः। अतः स्वपदेन कपिसंयोगाद्यभावीयप्रतियोगितैव ग्राह्या। तद्भिन्नप्रतियोगिताकत्वं वाच्यत्वत्वेन घटाभावस्यास्तीति तमादाय लक्षणसमन्वयसंभवात्। तथा च स्वावच्छेदकविशिष्ट - स्वाश्रयाधिकरणवृत्त्यभावीयप्रयोगिताभिन्ना साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्ना च या प्रतियोगिता तन्निरूपकाभावः प्रतियोगिव्यधिकरणसाध्याभावपदेन विवक्षित इति सिद्धम्।

न च तथापि एतदभावभिन्नम् इत्यादि [पृ.443]। 'एतदभावभिन्नं प्रमेयत्वात्' इति व्यभिचारिहेतुः। एतदभावभेदरूपसाध्याभाववति एतदभावे प्रमेयत्वसत्त्वात्। एतदभावपदेन अभावविशेषः घटाभावादिः ग्राह्यः। अत्र साध्यतावच्छेदकं एतदभावभेदत्वम्। तदवच्छिन्नव्यापकतावच्छेदकमपि एतदभावभेदत्वमेव। तदवच्छिन्नप्रतियोगिताकाभावम् एतदभावभेदाभावं गृहीत्वा तदधिकरणे एतदभावे वृत्तित्वमेव हेतोरस्तीति अतिव्याप्तिर्वारणीया। परन्तु एतदभावभेदत्वेन एतदभावभेदाभावस्य प्रतियोगिवैयधिकरण्यं न संभवति। एतदभावभेदरूपप्रतियोग्यधिकरणे पटादौ एतदभावभेदाभावस्य सत्त्वात् अयमभावः प्रतियोगिसमानाधिकरणः। एतदभाव[=घटाभाव]भेदाधिकरणे पटे एतदभावभेदाभावः कथं स्यात् इति चेत् - श्रूयताम् - एतदभावभेदाभावः एतदभावमात्रवृत्तिः। अतः एतदभावरूपाभावाधिकरणकः अयं एतदभावभेदाभावः। अभावाधिकरणकाभावश्च अधिकरणीभूताभावस्वरूपः। तथा च एतदभावभेदाधिकरणे पटे एतदभावस्य [=घटाभावस्य] सत्त्वात् एतदभावात्मकः एतदभावभेदाभावोऽपि अस्ति। तथा च अस्य अभावस्य प्रतियोगिसमानाधिकरणत्वेन प्रतियोगिव्यधिकरणत्वविरहात् लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नाभावम् एतदभावत्वेन घटाद्यभावं गृहीत्वा तदधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वात् अतिव्याप्तिरिति शङ्का।

समाधानं तु—व्यापकतावच्छेदकावच्छिन्नप्रतियोगितायां स्वावच्छेदकविशिष्ट - स्वाश्रयाधिकरणे स्वनिरूपकाभावत्वेन वर्तते योऽभावः तदीयप्रतियोगिताभिन्नत्वं निवेशनीयम् इत्यत्रैव दीधितिग्रन्थस्य तात्पर्यम्। स्वपदेन एतदभावभेदाभावीयप्रतियोगिता ग्रहीतुं न शक्यते। तद्ग्रहणे स्वावच्छेदक - एतदभावभेदत्वविशिष्ट - स्वाश्रय - एतदभावभेदाधिकरणे पटादौ स्वनिरूपकाभावत्वेन एतदभावभेदत्वावच्छिन्नप्रतियोगितानिरूपकाभावत्वेन

एतदभावभेदाभावस्य अवृत्तेः। एतदभावस्वरूपः एतदभावभेदाभावः पटादौ एतदभावत्वेन रूपेण वर्तते। न तु एतदभावभेदत्वावच्छिन्नप्रतियोगिताकाभावत्वेन। एतदभावभिन्ने पटादौ एतदभावभेदो नास्ति इति प्रतीत्यभावात्। तथा च स्वपदेन कपिसंयोगाद्यभावीयप्रतियोगितैव ग्राह्या। तद्भिन्नप्रतियोगिताकत्वं एतदभावभेदत्वावच्छिन्न - एतदभावभेदनिष्ठप्रतियोगिताकाभावेऽपि अस्तीति तस्यापि लक्षणघटकतया तदधिकरण - एतदभाववृत्तित्वमेव प्रमेयत्वरूपहेतावस्तीति नातिव्याप्तिरिति।

'अभावभिन्नं मेयत्वात्' इत्युक्तौ भावरूपस्यापि अभावस्य सत्त्वात् साध्याभावस्य अभावमात्राधिकरणकत्वं न लभ्येत। अतः एतदभावभिन्नमित्युक्तम्। एतदभावपदेन भावातिरिक्तः घटाभावादिः ग्राह्यः। **निरुक्तप्रतियोगिताभिन्नेति** [पृ.443]। स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणवृत्त्यभावीयप्रतियोगिताभिन्नेत्यर्थः।

गादाधरी

केषाञ्चिन्मतस्य खण्डनम्

तच्चिन्त्यम्। व्यापकताघटकसंबन्धावच्छिन्नाभावनिवेशे व्यापकताशरीरे प्रतियोगिवैयधिकरण्यस्य अभावविशेषणत्वेऽपि संयोगादिना धूमादिसाध्यकव्यभिचारिणि अयोगोलकान्यत्वाद्यभावमादाय अतिव्याप्तिवारणसंभवात्। तत्र तन्निवेशे प्रयोजनाभावेन अव्याप्यवृत्तिसाध्याभावमादायाव्याप्त्यनवकाशात् तदभावे व्याप्यवृत्तित्वादिविशेषणव्यावृत्त्यसङ्गतेः।

अस्तु वा साध्यव्यापकतावच्छेदकस्यापि साध्यवन्निष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकतया तदभावव्यावर्तनाय व्यापकताशरीरे प्रतियोगिवैयधिकरण्यप्रवेशः। तथापि एतादृशप्रतियोग्यसामानाधिकरण्यविवक्षणे तस्याव्याप्तिवारणप्रयोजनकताभिधानासङ्गतिः। अभावे तदनिवेशे व्याप्यवृत्तिसाध्यकेऽपि

यावत्साध्यवद्विषयकजन्यज्ञानव्यक्तिविशेषस्य प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकताश्रयत्वात् कालविशेषावच्छेदेन हेतुमति तदभाववृत्तेरसंभवस्यैव प्रसङ्गात् ।

विवरणम्

केषांचिन्मतं खण्डयति - **तच्चिन्त्यम्** [पृ.448] इत्यादिना । एतेषां मते साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं व्यापकतायां न निवेशितम् । किन्तु येन संबन्धेन साध्यव्यापकत्वं संभवति तदवच्छेदकावच्छिन्न-तत्संबन्धावच्छिन्नप्रतियोगिताकाभाव एव साध्याभावपदेन विवक्षितः । तथा सति व्यापकताशरीरप्रविष्टाभावे प्रतियोगिवैयधिकरण्यम् एतेषां मते निष्फलम् । व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणस्य 'वन्हिमान् धूमात्' इत्यादौ वह्नित्वादेः साध्यतावच्छेदकसंबन्धघटितव्यापकतावच्छेदकत्वसंपत्तिः प्रयोजनमिति पूर्वमुक्तम् । एतन्मते तन्न संभवति । वह्नित्वादेः व्यापकतानवच्छेदकत्वेऽपि स्वरूपसंबन्धघटितव्यापकतावच्छेदकवाच्यत्वत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नघटादिनिष्ठप्रतियोगिताकाभावमादायैव लक्षणसमन्वयसंभवात् । परन्तु एतादृशरीत्या 'धूमवान् वह्नेः' इत्यादौ धूमत्वादेः संयोगसंबन्धेन साध्यं प्रति केनापि संबन्धेन घटितायां व्यापकतायाम् अनवच्छेदकतया स्वरूपसंबन्धघटितव्यापकतावच्छेदकवाच्यत्वत्वावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया अतिव्याप्तिः स्यात् । व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणे धूमत्वादेः संयोगसंबन्धघटितव्यापकतावच्छेदकतया तदवच्छिन्नसंयोगसंबन्धावच्छिन्नधूमनिष्ठप्रतियोगिताकाभावमादाय नातिव्याप्तिरिति वक्तव्यम् । तदपि न संभवति। धूमाभावस्य लक्षणघटकत्वाभावेऽपि अयोगोलकान्यत्वाभावमादाय अतिव्याप्तिवारणसंभवात् । तथा च व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यानिवेशे 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ कपिसंयोगाभावस्य

लक्षणाघटकत्वेऽपि स्वरूपसंबन्धघटितव्यापकतावच्छेदकवाच्यत्वत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नघटाद्यभावमादायैव लक्षणसमन्वयसंभवात् कपिसंयोगादिसाध्यकस्थले अव्याप्तिवारणाय उपात्तस्य व्याप्यवृत्तित्वादिविशेषणस्य असंगत्यापत्तिः ।

ननु वाच्यत्वत्वावच्छिन्नघटाद्यभावमादाय लक्षणसमन्वयः न संभवति । साध्यवति वृक्षे वाच्यत्वत्वेन घटाभावस्य सत्त्वात् तत्प्रतियोगितावच्छेदकत्वस्यैव वाच्यत्वत्वे सत्त्वेन तस्य व्यापकतावच्छेदकत्वासंभवात् । अतः तस्य व्यापकतावच्छेदकत्वसंपत्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यं निवेशनीयम् । तन्निवेशे कपिसंयोगत्वावच्छिन्नाभावमादाय अव्याप्तिर्भवति । तद्वारणाय साध्याभावेऽपि व्याप्यवृत्तित्वं प्रतियोगिवैयधिकरण्यं वा निवेशनीयमित्याशङ्क्याह - **अस्तु वा इत्यादिना** [पृ. 502] । साध्याभावे भवद्विवक्षितं प्रतियोगिवैयधिकरण्यं यदि निवेश्यते, तदा तस्य अव्याप्यवृत्तिसाध्यकस्थले अव्याप्तिवारणप्रयोजनकत्वाभिधानं न संगच्छते । व्याप्यवृत्तिसाध्यकस्थलेऽपि दोषवारणप्रयोजनकत्वसंभवेन असंभववारणप्रयोजनकत्वस्यैव वक्तव्यत्वात् ।

तथा हि - व्याप्यवृत्तिसाध्यके 'सत्तावान् जातेः' इत्यादौ साध्यं प्रति विषयतासंबन्धेन यावत्साध्यवद्विषयकजन्यज्ञानं प्रतियोगिवैयधिकरण्यघटितव्यापकताश्रयः तदवच्छेदकावच्छिन्नप्रतियोगिताकाभावः साध्यवद्विषयकजन्यज्ञानत्वावच्छिन्नविषयतासंबन्धावच्छिन्नाभावः । स च हेतुमति परमाण्वादौ प्रलयावच्छेदेन वर्तते । तथा च तादृशसाध्याभावाधिकरणवृत्तित्वात् हेतोः लक्षणसमन्वयः तत्र न भवति । अतः असंभववारणप्रयोजनकत्वे वक्तव्ये अव्याप्तिवारणप्रयोजनकत्वं दीधितिकारोक्तं न सङ्गच्छत इति एतेषां मतमयुक्तमिति भावः ।

गादाधरी

[मतान्तरेण प्रतियोगिवैयधिकरण्यपरिष्करणपूर्वकं तस्य केवलान्वयिनि सुघटत्वोपपादनम्]

अत्र वदन्ति - प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वमेव तदर्थः ।

न च - व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्धेः केवलान्वयिसाध्यके प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेः अव्याप्तिरिति - वाच्यम् ।

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वं हि स्वप्रतियोगितावच्छेदकावच्छिन्न - स्वप्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकभेदवद्वृत्तित्वम् । ज्ञेयत्वत्वादिना वाच्यत्वाद्यभावस्य तादृशभेदसमानाधिकरणतया प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं सुघटमेव । व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकज्ञेयत्वत्वादिना वाच्यत्ववद्भेदस्यैव तथात्वात् ।

'कपिसंयोगाभाववान् मेयत्वात्' इत्यादौ कपिसंयोगादिरूपसाध्याभावस्यापि ज्ञेयत्वत्वादिना कपिसंयोगाभावादिमद्भेदसामानाधिकरण्यसत्वात्, तस्य च स्वप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धया अव्याप्तिः । अतः प्रतियोगितावच्छेदकावच्छिन्नत्वं भेदप्रतियोगितावच्छेदकतायां विशेषणम् ।

तत्रैव कपिसंयोगात्मकाभावीयप्रतियोगितावच्छेदकीभूतसमवेतसामान्याभावत्वावच्छिन्नसमवेतसामान्याभाववद्भेदस्यापि निरुक्तप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनिष्ठप्रतियोगितावच्छेदकताकत्वात् **तत्सामानाधिकरण्यमादाय** कपिसंयोगाद्यात्मकाभावानां प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यवार-

णाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकं विशेषणीयम् । समवेतसामान्याभावत्वादेः कपिसंयोगाभावादिव्यापकतानवच्छेदकतया न दोषः ।

विवरणम्

मतान्तरेण केवलान्वयिसाध्यकस्थले व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यं परिष्कृत्य लक्षणघटकत्वम् उपपादयति - **अत्र वदन्ति इत्यादिना** [पृ.451] । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वमेव प्रतियोगिव्यधिकरणत्वम् ।

न च - 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ लक्षणघटकस्य ज्ञेयत्वत्वेन वाच्यत्वाभावस्य प्रतियोगितावच्छेदकज्ञेयत्वत्वविशिष्टवाच्यत्वरूपप्रतियोग्यप्रसिद्धया प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वं दुर्घटमिति कथं प्रतियोगिव्यधिकरणसाध्याभावप्रसिद्धिरिति - वाच्यम् ।

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वमित्यस्य स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिवृत्ति - अवच्छेदकताक - प्रतियोगिताकभेदवद्वृत्तित्वमित्यर्थः । स्वपदेन ज्ञेयत्वत्वेन वाच्यत्वाभावो ग्राह्यः । स्वप्रतियोगितावच्छेदकं ज्ञेयत्वत्वम् । तदवच्छिन्ना स्वप्रतियोगिवाच्यत्वनिष्ठा च या अवच्छेदकता तन्निरूपकप्रतियोगिताकभेदः 'ज्ञेयत्वत्वेन वाच्यत्ववान् न' इति प्रतीतिसिद्धः भेदः । तद्वद्घटादिवृत्तित्वं ज्ञेयत्वत्वेन वाच्यत्वाभावस्य अस्तीति तस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं घटत इति भावः ।

तत्र भेदप्रतियोगितावच्छेदकतायां प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशस्य प्रयोजनमाह - **कपिसंयोगाभाववान् मेयत्वात् इत्यादिना** [पृ.451] । अयं सद्धेतुः । कपिसंयोगाभावस्य केवलान्वयित्वेन हेतुमति सर्वत्र सत्त्वात् । 'स्वप्रतियोगिवृत्त्यवच्छेदकताक-

प्रतियोगिताकभेदवद्वृत्तित्वम्' इत्युक्तौ कपिसंयोगाभावत्वेन कपिसंयोगाभावाभावस्य कपिसंयोगरूपस्य साध्याभावस्यापि लक्षणघटकत्वापत्तिः । स्वं - कपिसंयोगात्मकः अभावः । स्वप्रतियोगी कपिसंयोगाभावः । तन्निष्ठावच्छेदकताकप्रतियोगिताकभेदः 'ज्ञेयत्वत्वेन कपिसंयोगाभाववान् न' इति प्रतीतिसिद्धः ज्ञेयत्वत्वरूपव्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदः । तादृशभेदवति वृक्षे कपिसंयोगस्य वृत्तेः । कपिसंयोगात्मकस्य अभावस्य लक्षणघटकत्वे सति तन्निष्ठप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धया अव्याप्तिः स्यात् । तद्वारणाय अवच्छेदकतायां स्वप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशः । तथा सति कपिसंयोगात्मकाभावस्य प्रतियोगितावच्छेदकं कपिसंयोगाभावत्वम्, न तु ज्ञेयत्वत्वम् । कपिसंयोगाभावत्वावच्छिन्नकपिसंयोगाभावनिष्ठावच्छेदकताकप्रतियोगिताकभेदः 'कपिसंयोगाभाववान् न' इति प्रतीतिसिद्धो भेदः । तद्वतः अप्रसिद्धया स्वपदेन कपिसंयोगात्मकः अभावः ग्रहीतुं न शक्यत इति नाव्याप्तिः ।

ननु स्वप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशेऽपि 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र कपिसंयोगात्मकस्य अभावस्य लक्षणघटकत्वापत्तिः । तथा हि - कपिसंयोगात्मकाभावस्य कपिसंयोगाभावत्वं यथा प्रतियोगितावच्छेदकं तथा समवेतसामान्याभावत्वमपि प्रतियोगितावच्छेदकम् । तदवच्छिन्नसमवेतसामान्याभावनिष्ठावच्छेदकताकप्रतियोगिताकस्य 'समवेतसामान्याभाववान् न' इति प्रतीतिसिद्धभेदस्य अधिकरणे द्रव्ये संयोगात्मकाभावस्य वृत्तेः तस्य प्रतियोगिवैयधिकरण्यं दुर्वारम् इत्याशङ्क्य आह **तत्रैवेत्यादिना** [पृ.451] । स्वप्रतियोगितावच्छेदके साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वं विशेषणं देयम् । तथा च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतस्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठावच्छेदकताकप्रतियोगिताकभेदवद्वृत्ति-

त्वं प्रतियोगिवैयधिकरण्यम् इत्युक्तं भवति । समवेतसामान्याभावत्वस्य कपिसंयोगप्रतियोगितावच्छेदकत्वेऽपि साध्यतावच्छेदककपिसंयोगाभावत्वावच्छिन्नव्यापकतावच्छेदकत्वं नास्ति । कपिसंयोगाभाववति द्रव्ये समवेतसामान्याभावस्य विरहात् । अतः साध्यव्यापकतावच्छेदकं स्वप्रतियोगितावच्छेदकं कपिसंयोगाभावत्वमेव । तदवच्छिन्नकपिसंयोगाभावनिष्ठावच्छेदकताकप्रतियोगिताकभेदः अप्रसिद्धः । कपिसंयोगाभावस्य केवलान्वयित्वात् । अतः स्वपदेन कपिसंयोगात्मकः अभावः ग्रहीतुं न शक्यते । किन्तु व्यधिकरणधर्मावच्छिन्नाभाव एवेति नाव्याप्तिरिति भावः ।

तत्सामानाधिकरण्यमिति [पृ. 451] - तादृशसमवेतसामान्याभाववद्भेदाधिकरणवृत्तित्वमित्यर्थः ।

गादाधरी

न च - अत्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदके विशेषिते तत्तत्साध्यव्यक्त्यभावादीनाम् ईदृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं न घटते । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतस्वप्रतियोगितावच्छेदकाप्रसिद्धेः । तथा च 'साध्याभावश्च' इत्यादिना साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविवक्षणासङ्गतिरिति - वाच्यम् ।

'साध्याभावश्च' इत्यादिग्रन्थस्य व्याप्यवृत्तित्वनिवेशकल्पे अभावे 'साध्यतावच्छेदकावच्छिन्ने'त्यादिविशेषणदानपरत्वात् । द्वितीयकल्पे च 'प्रतियोगितावच्छेदकावच्छिन्ने'त्यत्र प्रतियोगितावच्छेदकस्य तादृशव्यापकतावच्छेदकत्वेन विशेषणात् तादृशरूपावच्छिन्नप्रतियोगिताक एव अभावः लक्षणघटक इत्यर्थकत्वात् एतत्कल्पेऽभावांशे तादृशप्रतियोगिताकत्वविशेषणविरहेऽपि क्षतिविरहात् ।

तत्रैव कपिसंयोगाभावत्वादिना घटादिमद्भेदसामानाधिकरण्यमादाय तद्दोषवारणाय स्वप्रतियोगिवृत्तित्वं भेदप्रतियोगितावच्छेदकतायां विशेषणम् । **संयोगसामान्याभावादेरपि** संयोगात्मकाभावप्रतियोगितया कपिसंयोगात्मकाभावस्य प्रतियोगितावच्छेदककपिसंयोगाभावत्वादिना संयोगसामान्याभाववद्भेदसामानाधिकरण्यमादाय तद्दोषतादवस्थ्यवारणाय **यादृशप्रतियोगितावच्छेदको यो धर्मः** तदवच्छिन्नतादृशप्रतियोगिताश्रयवृत्तित्वमेव भेदप्रतियोगितावच्छेदकतायां निवेशनीयम् । कपिसंयोगाभावत्वं च कपिसंयोगाभावनिष्ठप्रतियोगितायामेव अवच्छेदकम् । संयोगसामान्याभावश्च न तादृशभेदप्रतियोगिताश्रय इति तादृशभेदमादाय न दोषः ।

विवरणम्

न च अत्रेति [पृ.454] प्रतियोगिवैयधिकरण्यघटके प्रतियोगितावच्छेदके साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वरूपविशेषणे दत्ते सति साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविवक्षणम् असंगतम् । साध्यनिष्ठप्रतियोगिताकाभावमात्रपरत्वेऽपि दोषाभावात् । 'वह्निमान् धूमात्' इत्यादौ महानसीयवह्न्याद्यभावमादाय अव्याप्तिवारणाय हि तथा विवक्षा कृता । प्रतियोगिवैयधिकरण्यस्य उक्तरीत्या परिष्कारे तु महानसीयवह्न्यभावस्य परिष्कृतं प्रतियोगिवैयधिकरण्यं न संभवति । महानसीयवह्न्यभावप्रतियोगितावच्छेदकस्य महानसीयवह्नित्वस्य वह्नित्वरूपसाध्यव्यापकतावच्छेदकत्वविरहात् । साध्यव्यापकतावच्छेदकीभूतस्वप्रतियोगितावच्छेदकस्य अप्रसिद्ध्या स्वपदेन महानसीयवह्न्यभावस्य ग्रहीतुमशक्यत्वात् तस्य लक्षणघटकत्वविरहात् - इति भावः ।

समाधत्ते - **साध्याभावश्चेत्यादिना** [पृ.454] । 'साध्याभावश्च द्वितीयरीत्या प्रत्येतव्यः' इति दीधितिग्रन्थस्य साध्याभाव

व्याप्यवृत्तित्वनिवेशकल्पे साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावः विवक्षणीय इति तात्पर्यम् । अन्यथा महानसीयवह्न्यभावस्य व्यावृत्त्यसंभवात् । तस्यापि व्याप्यवृत्तित्वात् । प्रतियोगिवैयधिकरण्यनिवेशरूपे द्वितीयकल्पे च प्रतियोगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदके साध्यव्यापकतावच्छेदकत्वविशेषणस्य आवश्यकत्वात् तद्घटितप्रतियोगिवैयधिकरण्यविरहादेव महानसीयवह्न्यभावस्य व्यावृत्तिसंभवात् साध्याभावपदं यथाश्रुतपरमेव । दीधितिग्रन्थस्य तु ईदृशप्रतियोगिवैयधिकरण्याश्रयः साध्यनिष्ठप्रतियोगिताकः अभावः अर्थात् साध्यव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभाव एव भवति इत्यर्थकत्वात् न कापि अनुपपत्तिः ।

प्रतियोगिवैयधिकरण्यशरीरे अवच्छेदकतायां स्वप्रतियोगिवृत्तित्वविशेषणस्य प्रयोजनमाह - **तत्रैव कपिसंयोगाभावत्वादिनेति** [पृ.455] । अवच्छेदकतायां स्वप्रतियोगिवृत्तित्वानिवेशे 'स्वप्रतियोगितावच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवद्वृत्तित्वं' 'प्रतियोगिवैयधिकरण्यमि'त्युक्तौ 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र कपिसंयोगात्मकाभावस्य लक्षणघटकत्वापत्तिः । स्वप्रतियोगितावच्छेदकं यत् कपिसंयोगाभावत्वम्, तदवच्छिन्नघटनिष्ठावच्छेदकताकप्रतियोगिताको यो भेदः 'कपिसंयोगाभावत्वेन घटवान् न' इति प्रतीतिसिद्धः भेदः तद्वति वृक्षे कपिसंयोगात्मकाभावस्य सद्भावात् । तस्य लक्षणघटकत्वे च तन्निष्ठप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्ध्या अव्याप्तिः । तद्वारणाय अवच्छेदकतायां स्वप्रतियोगिवृत्तित्वं विशेषणम् । तद्विशेषणे दत्ते कपिसंयोगात्मकाभावस्य प्रतियोगी घटः न भवतीति तन्निष्ठावच्छेदकता ग्रहीतुं न शक्यते । किन्तु कपिसंयोगाभावनिष्ठावच्छेदकतैव ग्राह्या । तन्निरूपकप्रतियोगिताकभेदः कपिसंयोगाभाववद्भेदः । स चाप्रसिद्ध इति स्वपदेन कपिसंयोगात्मकः अभावः

ग्रहीतुं न शक्यत इति नासौ लक्षणघटकः; किन्तु व्यधिकरणधर्मावच्छिन्नाभाव एव इति नाव्याप्तिरिति भावः ।

नन्वेवमपि 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र कपिसंयोगात्मकाभावस्य लक्षणघटकत्वापत्तिः । तथा हि - कपिसंयोगात्मकाभावस्य यथा कपिसंयोगाभावः प्रतियोगी, तथा संयोगसामान्याभावोऽपि । संयोगसामान्याभावः संयोगसामान्याभावाभावस्य प्रतियोगी । स च संयोगस्वरूपः । कपिसंयोगोऽपि संयोगान्तर्गतत्वात् संयोगसामान्याभावाभावरूप इति संयोगसामान्याभावः कपिसंयोगस्य प्रतियोगी । तथा च स्वं - कपिसंयोगः । स्वप्रतियोगितावच्छेदकं कपिसंयोगाभावत्वम् । तदवच्छिन्ना स्वप्रतियोगिसंयोगसामान्याभावनिष्ठा च या अवच्छेदकता तन्निरूपकप्रतियोगिताकभेदः 'कपिसंयोगाभावत्वेन संयोगसामान्याभाववान् न' इति प्रतीतिसिद्धो भेदः । तादृशभेदवति वृक्षादौ कपिसंयोगात्मकाभावस्य वर्तमानतया निरुक्तप्रतियोगिवैयधिकरण्याश्रयत्वात् लक्षणघटकत्वे सति तन्निष्ठप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्ध्या अव्याप्तिरित्याशङ्कयाह- **संयोगसामान्याभावादेरपि** [पृ.455] इत्यादिना ।

संयोगात्मकाभावप्रतियोगितया [पृ.455] इति । संयोगात्मकः यः अभावः तत्प्रतियोगितया इत्यर्थः । संयोगसामान्याभावस्य कपिसंयोगप्रतियोगित्वोपपादनाय एतदुक्तिः । **कपिसंयोगात्मकाभावस्येति** [पृ.455] । अस्य संयोगसामान्याभाववद्भेदसामानाधिकरण्यम् इत्यत्र अन्वयः ।

यादृशप्रतियोगितावच्छेदकेत्यादि [पृ. 455] । यादृशप्रतियोगितायाम् अवच्छेदको यो धर्मः, तदवच्छिन्ना तादृशप्रतियोगिताश्रयवृत्तिश्च या भेदप्रतियोगितावच्छेदकता तन्निरूपकप्रतियोगिताकभेदवद्वृत्तित्वं प्रतियोगिवैयधिकरण्यम् । यद्यपि कपिसंयोगस्य

कपिसंयोगाभावः संयोगसामान्याभावश्च प्रतियोगी, तथापि तदुभयनिष्ठा प्रतियोगिता भिन्नभिन्ना । स्वपदेन कपिसंयोगात्मकाभावस्य ग्रहणे तदीयकपिसंयोगाभावनिष्ठायां प्रतियोगितायां कपिसंयोगाभावत्वम् अवच्छेदकम् । न तु संयोगसामान्याभावनिष्ठायां प्रतियोगितायाम्। तथा च यादृशप्रतियोगिता - कपिसंयोगाभावनिष्ठप्रतियोगिता तदवच्छेदककपिसंयोगाभावत्वावच्छिन्ना तदाश्रयकपिसंयोगाभावनिष्ठा च या अवच्छेदकता तन्निरूपकप्रतियोगिताकभेदः 'कपिसंयोगाभावत्वेन कपिसंयोगाभाववान् न' इति भेद एव । तदधिकरणाप्रसिद्ध्या स्वपदेन कपिसंयोगात्मकाभावस्य ग्रहीतुमशक्यतया तस्य लक्षणघटकत्वाभावात् नाव्याप्तिरिति भावः ।

गादाधरी

भेदप्रतियोगितावच्छेदकतायां स्वप्रतियोगितावच्छेदकसंबन्धावच्छिन्नत्वमपि निवेशनीयम् । तेन कपिसंयोगाभावत्वाद्यवच्छिन्नकपिसंयोगाभावादिनिष्ठविषयितादिसंबन्धावच्छिन्न प्रतियोगितावच्छेदकताक भेदसामानाधिकरण्येऽपि न तद्दोषतादवस्थ्यम् ।

विवरणम्

भेदप्रतियोगितावच्छेदकतायामिति [पृ.458] । 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र स्वपदेन कपिसंयोगात्मकः अभावः गृह्यते । तत्प्रतियोगितावच्छेदककपिसंयोगाभावत्वावच्छिन्नतत्प्रतियोगिताश्रयकपिसंयोगाभावनिष्ठावच्छेदकताकप्रतियोगिताकभेदः इत्यनेन 'विषयितासंबन्धेन कपिसंयोगाभाववान् न' इति प्रतीतिसिद्धः भेदोऽपि ग्रहीतुं शक्यते । तदधिकरणं वृक्षः । तत्र विषयितासंबन्धेन कपिसंयोगाभाववत्त्वविरहात् । तद्वृत्तित्वं कपिसंयोगात्मकाभावेऽस्तीति तस्य प्रतियोगिवैयधिकरण्यसत्त्वात् लक्षणघटकत्वात् तन्निष्ठप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणा-

प्रसिद्ध्या पुनरपि अव्याप्तिः । तद्वारणाय स्वप्रतियोगितावच्छेदकसंबन्धावच्छिन्नत्वं भेदप्रतियोगितावच्छेदकतायां निवेशनीयम् । स्वं - कपिसंयोगात्मकाभावः । तत्प्रतियोगितावच्छेदकसंबन्धः स्वरूपसंबन्धः । न तु विषयितासंबन्धः । अतः विषयितासंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदः ग्रहीतुं न शक्यते । स्वरूपसंबन्धावच्छिन्नकपिसंयोगाभावनिष्ठप्रतियोगितावच्छेदकताकभेदस्तु अप्रसिद्ध इति कपिसंयोगात्मकाभावस्य स्वपदेन ग्रहीतुमशक्यतया नाव्याप्तिरिति भावः ।

गादाधरी

एवं प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकत्वं स्वनिष्ठं यत् स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठप्रतियोगितावच्छेदकताकभेदसामानाधिकरण्यं तन्निरूपकत्वम् । अतो व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्धावपि न तादृशाधिकरणाप्रसिद्धिः । 'कपिसंयोगि एतत्त्वात्' इत्यादौ हेत्वधिकरणेऽपि द्रव्यत्वादिना कपिसंयोगादिमतः कपिसंयोगत्वादिना च द्रव्यत्वादिमतः भेदसत्त्वात् तस्यापि तादृशाधिकरणत्वापत्तिः । अतः अवच्छिन्नान्तनिष्ठान्तयोरुपादानम् । पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावत्वादिरूपप्रतियोगितावच्छेदकरूपेण कपिसंयोगादिमद्भेदमादाय तद्दोषतादवस्थ्यम् । अतः तत्प्रतियोगिताश्रयनिष्ठप्रतियोगितावच्छेदकतायां तदवच्छेदकावच्छिन्नत्वं निवेशनीयम् ।

विवरणम्

अथ प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकत्वं साध्याभावाधिकरणे यद्विशेषणं दत्तं तत् परिष्करोति - **एवम्** [पृ.459] **इत्यादिना** । स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठावच्छेदकताकप्रतियोगिताकभेदवद्वृत्तित्वनिरूपकत्वं न

तु प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यनधिकरणवृत्तित्वनिरूपकत्वम् । व्यधिकरणधर्मावच्छिन्नाभावस्य वह्नित्वेन घटाभावस्य प्रतियोगितावच्छेदकं यत् वह्नित्वं तद्विशिष्टस्य प्रतियोगिनः घटस्य अप्रसिद्धचा तद्घटितप्रतियोगिवैयधिकरण्याप्रसिद्धेः अव्याप्तिप्रसंगात् । अवच्छेदकतायां स्वप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशे 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र कपिसंयोगत्वेन कपिसंयोगाभावं स्वपदेन गृहीत्वा तत्प्रतियोगिकपिसंयोगनिष्ठावच्छेदकताकप्रतियोगिताकभेद इत्यनेन 'द्रव्यत्वेन कपिसंयोगवान् न' इति भेदस्य ग्रहणेन तदधिकरणवृक्षवृत्तित्वं कपिसंयोगाभावस्य संपाद्य तन्निरूपकाधिकरणं वृक्षः तद्वृत्तित्वमेव हेतावस्तीति अव्याप्तिः प्रसज्यते । तद्वारणाय अवच्छेदकतायां स्वप्रतियोगितावच्छेदकावच्छिन्नत्वं निवेशनीयम् । तथा सति द्रव्यत्वं कपिसंयोगाभावप्रतियोगितावच्छेदकं न भवतीति तदवच्छिन्नावच्छेदकताकभेदः ग्रहीतुं न शक्यते । कपिसंयोगत्वावच्छिन्नावच्छेदकताकभेदवद्गुणादिवृत्तित्वनिरूपकाधिकरणं गुणादिरेव । तद्वृत्तित्वं तु हेतौ नास्तीति नाव्याप्तिः ।

एवम् अवच्छेदकतायां स्वप्रतियोगिवृत्तित्वानिवेशे कपिसंयोगाभावप्रतियोगितावच्छेदककपिसंयोगत्वावच्छिन्नद्रव्यत्वनिष्ठावच्छेदकताकं 'कपिसंयोगत्वेन द्रव्यत्ववान् न' इति भेदं गृहीत्वा तदधिकरणवृक्षवृत्तित्वस्य कपिसंयोगाभावे सत्त्वात् तन्निष्ठतादृशवृत्तित्वनिरूपकवृक्षवृत्तित्वस्यैव हेतौ सत्त्वात् अव्याप्तिः । स्वप्रतियोगिवृत्तित्वस्य निवेशे तु द्रव्यत्वस्य कपिसंयोगाभावप्रतियोगित्वं नास्तीति द्रव्यत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदः ग्रहीतुं न शक्यत इति नाव्याप्तिरिति भावः ।

एवं सत्यपि 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्रैव स्वपदेन कपिसंयोगत्वेन कपिसंयोगाभावं गृहीत्वा तत्प्रतियोगितावच्छेदकं

यत् पूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वं तदवच्छिन्नस्वप्रतियोगिताश्रयकपिसंयोगनिष्ठावच्छेदकताकप्रतियोगिताकभेदस्य वृक्षे सत्त्वात् तादृशभेदवद्वृक्षवृत्तित्वनिरूपकाधिकरणं वृक्षोऽपि भवतीति तद्वृत्तित्वस्यैव हेतौ सत्त्वात् अव्याप्तिः । तद्वारणाय प्रतियोगितयोः ऐक्यं विवक्षित्वा स्वीययादृशप्रतियोगितायाम् अवच्छेदको यो धर्मः तदवच्छिन्नस्वीयतादृशप्रतियोगिताश्रयनिष्ठावच्छेदकताकप्रतियोगिताकभेदवद्वृत्तित्वनिरूपकाधिकरणं प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणपदेन विवक्षणीयम् । पूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठप्रतियोगितायाम् अवच्छेदको यो धर्मः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वम् । तदवच्छिन्ना तादृशप्रतियोगिताश्रयस्वाभावनिष्ठावच्छेदकतैव ग्राह्या । तन्निरूपकप्रतियोगिताकभेदस्तु वृक्षे नास्तीति वृक्षः प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणं न भवतीति नाव्याप्तिरिति भावः ।

गादाधरी

एवं विशिष्टसाध्यव्यापकतावच्छेदकत्वेनापि प्रतियोगितावच्छेदकं विशेषणीयम् । तेन 'संयोगी द्रव्यत्वात्' इत्यादौ संयोगाभावस्य द्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावत्वावच्छिन्नद्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वस्य द्रव्ये सत्त्वात् तस्य न प्रतियोगिवैयधिकरण्यनिरूपकत्वापत्तिः । एवं संबन्धविशेषनिवेशनमपि **पूर्ववद्बोध्यम्** । तथा च स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्ना यावत्यः प्रतियोगिताः तत्तदवच्छेदकावच्छिन्नतत्तदाश्रयनिष्ठप्रतियोगितावच्छेदकताकभेदवदधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकतत्तत्प्रतियोगितानिरूपकाभावसजातीयाभाववत्त्वमिति **निष्कर्षः** ।

विवरणम्

एवं विशिष्टसाध्येत्यादि [पृ.461] । स्वप्रतियोगितावच्छेदके साध्यतावच्छेदकविशिष्टसाध्यव्यापकतावच्छेदकत्वं विशेषणं देयम् । अन्यथा 'संयोगी द्रव्यत्वात्' इत्यत्र सद्धेतौ साध्याभावस्य संयोगत्वेन संयोगाभावस्य प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणं द्रव्यमपि स्यात् । संयोगाभावप्रतियोगितावच्छेदकं यथा संयोगत्वम्, तथा द्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नप्रतियोगिताकाभावत्वमपि प्रतियोगितावच्छेदकम् । संयोगाभावस्य द्रव्यवृत्तित्वात् । तथा च द्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्ना द्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावनिष्ठा या अवच्छेदकता तन्निरूपकप्रतियोगिताकभेदः 'द्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभाववान् न' इति प्रतीतिसिद्धो भेदः । स च द्रव्ये वर्तते । अतः तादृशभेदवद्वृत्तित्वरूपप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणं द्रव्यमपि । तद्वृत्तित्वमेव द्रव्यत्वरूपहेतावस्तीति अव्याप्तिः । साध्यव्यापकतावच्छेदकत्वविशेषणे दत्ते तु द्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावत्वं न संयोगत्वविशिष्टव्यापकतावच्छेदकम् । संयोगत्वविशिष्टसंयोगवति द्रव्ये द्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नप्रतियोगिताकाभावस्य विरहात् । अतः तादृशाभावत्वावच्छिन्नप्रतियोगितावच्छेदकत्ताकभेदमादाय न दोषः । तथा च साध्यतावच्छेदकविशिष्टसाध्यव्यापकतावच्छेदकस्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठस्वप्रतियोगितावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवद्वृत्तित्वनिरूपकत्वं स्वप्रतियोगिवैयधिकरण्यनिरूपकत्वमिति फलितम् ।

पूर्ववद्बोध्यमिति [पृ.461] । कपिसंयोगत्वावच्छिन्नकपिसंयोगनिष्ठविषयितासंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदवद्वृत्तित्वनिरूपकत्वं वृक्षस्यास्तीति तद्वृत्तित्वस्यैव हेतौ सत्त्वात्

'कपिसंयोगि एतत्त्वात्' इत्यत्र अव्याप्तिवारणाय भेदप्रतियोगितावच्छेदकतायाः स्वप्रतियोगितावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् इति भावः ।

तथा चेत्यादि [पृ. 461] । स्वपदं लक्षणघटकीभूताभावप्रतियोगितापरम् । स्वाश्रयनिष्ठा या भेदप्रतियोगितावच्छेदकता तदवच्छेदकं यत् साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकं तदवच्छिन्नाः यावत्यः प्रतियोगिताः तत्तदवच्छेदकावच्छिन्ना तत्तदाश्रयनिष्ठा च या प्रतियोगितावच्छेदकता तत्कभेदवदधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकाः तत्तत्प्रतियोगितानिरूपकाभावसजातीयाः येऽभावाः तद्वत्त्वम् इत्यर्थः ।

'वन्हिमान् धूमात्' इत्यादौ स्वं - वह्नित्वेन घटाभावीय प्रतियोगिता । स्वाश्रयः घटः । तन्निष्ठा भेदप्रतियोगितावच्छेदकता 'वन्हित्वेन घटवान् न' इति प्रतीतिसिद्धभेदप्रतियोगितावच्छेदकता । तदवच्छेदकं वह्नित्वम् । तच्च साध्यव्यापकतावच्छेदकम् । तदवच्छिन्ना प्रतियोगिता वह्नित्वेन घटाभावीयप्रतियोगिता । तदवच्छेदकवन्हित्वावच्छिन्नतदाश्रयघटनिष्ठावच्छेदकताकप्रतियोगिताकभेदः 'वन्हित्वेन घटवान् न' इति भेदः तदधिकरणजगद्वृत्तित्वत्वव्यापकप्रतियोगिताकः घटत्वेन जगद्वृत्तित्वाभावः । स च वह्नित्वेन घटाभावीयप्रतियोगितानिरूपकः यः वह्नित्वेन घटाभावः तत्सजातीयो भवति । तद्वत्त्वं घटत्वेन जगद्वृत्तित्वाभाववत्त्वं धूमेऽस्तीति लक्षणसमन्वयः ।

दीधितिः

तेन तत्तत्साध्यव्यक्तेरव्याप्यवृत्तेर्वा साध्यस्य अभाववति वृत्तावपि हेतोर्नाव्याप्तिः ।

गादाधरी

व्याप्यवृत्तित्वादिविशेषणस्य प्रयोजनकथनम्

अभावे यथाश्रुतसाध्यप्रतियोगिकत्वं परित्यज्य स्वप्रतियोगितावच्छेदके साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वविशेष-

णस्य व्याप्यवृत्तित्वादिविशेषणस्य च व्यावृत्तिमाह - तेनेति [पृ.463] तत्तत्साध्यव्यक्तेरभाववति हेतोः वृत्तावपि नाव्याप्तिरिति योजना । 'एतद्रूपवान्, एतद्रसात्' इत्यादौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभाववन्निस्साध्यमेव । तत्र हेतोरवृत्तेः लक्षणगमनसंभवान्नासंभवः ।

विवरणम्

अभावे इत्यादि [पृ.463] । साध्याभावपदेन साध्यप्रतियोगिकः अभावः बोध्यते । तं यथाश्रुतार्थं परित्यज्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविवक्षायाः साध्याभावे व्याप्यवृत्तित्वविशेषणस्य च व्यावृत्तिं 'तेन' इत्यादिग्रन्थेन दीधितिकारः प्रदर्शयति । नानाव्यक्तिसाध्यकस्थले 'वह्निमान् धूमात्' इत्यादौ 'साध्यप्रतियोगिकाभावः' इत्यनेन तत्तत्साध्यव्यक्तिप्रतियोगिकः अभावः अर्थात् महानसीयवह्न्याद्यभावः गृह्यते । तद्वति पर्वतादौ हेतोः धूमस्य वृत्तित्वात् अव्याप्तिर्भवति । तद्वारणाय साध्यतावच्छेदकेत्यादि विशेषणम् । अव्याप्यवृत्तिसाध्यकस्थले 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ साध्यप्रतियोगिकाभावः कपिसंयोगाभावः । तद्वति वृक्षे हेतोः सत्त्वात् अव्याप्तिर्भवति । तद्वारणाय साध्याभावे व्याप्यवृत्तित्वविशेषणं दत्तम् इति भावः । **व्याप्यवृत्तित्वादिविशेषणस्येति** [पृ.464] । 'आदि' पदेन प्रतियोगिवैयधिकरण्यरूपविशेषणस्य परिग्रहः ।

असंभवानुक्तेः कारणमाह - **'एतद्रूपवान् एतद्रसात्'** [पृ.464] इत्यादिना । साध्याभावपदेन साध्यप्रतियोगिकाभावविवक्षायामपि एकव्यक्तिसाध्यकस्थले 'एतद्रूपवान् एतद्रसात्' इत्यादौ लक्षणसमन्वयः संभवति । प्रतियोगिव्यधिकरण - एतद्रूपाभाववत् एतद्रूपशून्यं वस्तु । तत्र एतद्रसस्य अवृत्तित्वात् । अतः असंभवमनुक्त्वा नानाव्यक्तिसाध्यके अव्याप्तिरुक्ता इति भावः ।

गादाधरी

अथ साध्यवति तद्रूपैतद्रूपोभयत्वावच्छिन्नाभावसत्त्वेन तत्रापि लक्षणगमनाभावादसंभवः ।

न च - नासौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः । प्रतियोगितावच्छेदकीभूतोभयत्वेन रूपेण उभयवद्भेदस्य उभयवतोऽसिद्धत्वेन अप्रसिद्धेरिति - वाच्यम् ।

उभयत्वेन अन्यतरवद्भेदस्य तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नतत्प्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकस्य उभयाभाववति सत्त्वात् तस्यापि तादृशभेदमादाय तत्त्वात् इति चेत् न ।

व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य स्वव्यापकसाध्यतावच्छेदककप्रतियोगिताकस्य वा अभावस्य निवेशे तादृशोभयाभावादिवारणं सम्भवतीत्यभिप्रायेण अव्याप्तिलिखनात् ।

विवरणम्

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभाववदित्युक्तेः तात्पर्यं शङ्कासमाधानव्याजेन स्पष्टयति - **अथ साध्यवतीत्यादिना** [पृ.465] । साध्यप्रतियोगिकाभावः एतद्रूप-तद्रूपोभयत्वावच्छिन्नाभावः । तस्यापि एतद्रूपात्मकसाध्यप्रतियोगिकत्वात् । तदधिकरणं साध्याधिकरणं एतत्फलमपि । तद्वृत्तित्वस्यैव हेतौ सत्त्वात् तद्वृत्तित्वाभावविरहात् एतल्लक्षणसमन्वयाभावात् असंभव एव कुतो नोक्तः ।

न च - साध्याभावे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणत्वविशेषणसत्त्वात् एतद्रूप - तद्रूपोभयत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिमद्भेदाधिकरणवृत्तित्वं नास्ति । प्रतियोगितावच्छेदकोभयत्वावच्छिन्नोभयवतः अप्रसिद्ध्या तद्भिन्नवृत्तित्वरूपप्रतियोगिवैयधिकरण्यासंभवात् ।

तथा च एतद्रूप - तद्रूपोभयत्वावच्छिन्नाभावस्य लक्षणाघटकतया तमादाय असंभवः वक्तुं न शक्यते इति - वाच्यम् ।

स्वप्रतियोगितावच्छेदकावच्छिन्न - स्वप्रतियोगिनिष्ठावच्छेदकताक-प्रतियोगिताकभेदवद्वृत्तित्वस्यैव प्रतियोगिवैयधिकरण्यरूपतया एतद्रूप-तद्रूपोभयाभावप्रतियोगितावच्छेदकं यत् एतद्रूप-तद्रूपोभयत्वं तदवच्छिन्ना तादृशोभयाभावप्रतियोगिवृत्तिः या अवच्छेदकता तन्निरूपकप्रतियोगिताकभेद इत्यनेन एतद्रूप-तद्रूपोभयत्वेन एतद्रूप-तद्रूपान्यतरवद्भेदः गृह्यते । अन्यतरस्यापि उभयाभावप्रतियोगित्वात् तन्निष्ठावच्छेदकतायाः उभयाभावप्रतियोगिवृत्तित्वात् । तथा च तादृशभेदाधिकरणं एतत्फलमपि भवति । तत्र एतद्रूप-तद्रूपान्यतरस्य अन्यतरत्वेन रूपेण सत्त्वेऽपि उभयत्वेन रूपेण असत्त्वात् । तथा च तादृशोभयाभावाधिकरण-एतत्फलवृत्तित्वस्यैव हेतौ सत्त्वेन लक्षणगमनाभावात् असंभव एव कुतो नोक्तः इत्याक्षेपः ।

साध्याभावे व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वं स्वव्यापकसाध्यतावच्छेदककप्रतियोगिताकत्वं [साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वम्] वा विशेषणं दत्त्वा एतद्रूप-तद्रूपोभयाभावस्य वारणं कर्तुं शक्यते । तस्य व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वात् तदनवच्छिन्नप्रतियोगिताकत्वविरहात् । एवं साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वं स्वव्यापकसाध्यतावच्छेदककप्रतियोगिताकत्वरूपं एतद्रूप-तद्रूपोभयाभावे नास्ति । तादृशोभयाभावीयप्रतियोगितायाः अधिकरणे तद्रूपे एतद्रूपत्वात्मकसाध्यतावच्छेदकस्य अभावात् । तथा च तत्रोभयाभावस्य लक्षणाघटकतया एतद्रूपत्वावच्छिन्नाभावस्यैव लक्षणघटकतया तद्वति वस्त्वन्तरे अवृत्तित्वं एतद्रसरूपहेतोरस्तीति लक्षणसमन्वयात् असंभवमनुक्त्वा अव्याप्तिः कथितेति भावः ।

गादाधरी

[अव्याप्यवृत्तेर्वा इत्यादिदीधितिग्रन्थस्य तात्पर्यकथनम्]

अव्याप्यवृत्तेरिति [पृ.463]। **यद्यप्येतद्ग्रन्थस्य** स्वयमुक्तस्याभावे व्याप्यवृत्तित्वादिनिवेशनस्य प्रयोजनप्रदर्शनपरत्वे साध्यपदं कपिसंयोगाभावादिपरमेव वाच्यम्, न तु कपिसंयोगादिपरम्। कपिसंयोगादिसाध्यकस्थले कपिसंयोगाद्यभावस्य लक्षणघटकत्वेऽपि स्वाधिकरणपदस्य व्याप्यवृत्तित्वादिनिरूपकाधिकरणपरताया अभावे व्याप्यवृत्तित्वादिनिवेशेऽपि आवश्यकत्वात् तदीयव्याप्यवृत्तितानिरूपकाधिकरणे गुणादौ हेतोरवृत्तेः अव्याप्त्यनवकाशात्, कपिसंयोगाभावादेः गुणादौ निरवच्छिन्नवृत्तिकत्वादिरूपव्याप्यवृत्तित्वादिसत्त्वेन तादृशविशेषणेन व्यावर्तनासंभवाच्च। तथा च कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावस्य लक्षणघटकत्वेऽपि तदीयव्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिरेव अव्याप्तिप्रयोजिका। न तु तादृशाभावीयव्याप्यवृत्तितानिरूपकाधिकरणे हेतोर्वृत्तिरिति 'वृत्तावपि हेतो'रिति न संगच्छते; **तथापि** अभावे व्याप्यवृत्तित्वविशेषणानुपादाने यावदन्तर्गतकपिसंयोगादीनां व्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिः स्यादिति तादृशाधिकरणपर्यन्तं न विवक्षणीयम्। तथा च सति अव्याप्यवृत्तिसाध्यकस्थले हेतोः साध्याभाववद्वृत्तित्वनिबन्धना अव्याप्तिः। सा च **व्याप्यवृत्तित्वाद्युपादानात्** न संभवतीत्यभिप्रायः।

विवरणम्

यद्यप्येतद्ग्रन्थस्येत्यादि [पृ.467]। अभावे व्याप्यवृत्तित्वनिवेशस्य प्रयोजनं 'अव्याप्यवृत्तेर्वा साध्यस्य अभाववति वृत्तावपि हेतोः नाव्याप्तिः' इति ग्रन्थेन प्रदर्श्यते इति प्रतीयते। तत्र साध्यपदेन कपिसंयोगरूपस्य साध्यस्य विवक्षायां 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र अव्याप्तिवारणप्रयोजनकत्वं व्याप्यवृत्तित्व-

विशेषणस्य प्रदर्शयत इति लभ्यते । तत्तु न संगतम् । उपरि तत्तदधिकरणपदेन व्याप्यवृत्तित्वनिरूपकाधिकरणस्य विवक्षिष्यमाणतया 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र साध्यस्य कपिसंयोगस्य यः अभावः तन्निष्ठव्याप्यवृत्तितानिरूपकाधिकरणे गुणादौ हेतोः एतद्वृक्षत्वस्य अवृत्तेः अव्याप्त्यनवकाशात् व्याप्यवृत्तित्वविशेषणे दत्तेऽपि कपिसंयोगाभावस्य व्यावर्तनासंभवाच्च । व्याप्यवृत्तित्वं हि निरवच्छिन्नवृत्तिकत्वम् । तच्च कपिसंयोगाभावस्य गुणादावस्त्येवेत्यतः साध्यपदं कपिसंयोगाभावपरम् । साध्याभावे व्याप्यवृत्तित्वविशेषणानुपादाने 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र अव्याप्तिः । तद्वारणाय व्याप्यवृत्तित्वं विशेषणमुपात्तमिति वक्तव्यम् । परन्तु तत्र अव्याप्तिः कथं भवतीति विचारे साध्याभावपदेन कपिसंयोगात्मकस्य अभावस्य ग्रहीतुं शक्यतया तस्य चाव्याप्यवृत्तित्वेन तन्निष्ठव्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्ध्या अव्याप्तिरिति वक्तव्यम् । तथा च तत्र अव्याप्तिप्रयोजिका साध्याभावीयव्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिरेव । दीधितौ तु 'साध्यस्याभाववति वृत्तावपि हेतोः' इति कथनात् हेतुनिष्ठं साध्याभाववद्वृत्तित्वं अव्याप्तिप्रयोजकमिति लभ्यते । तथा च साध्यपदस्य कपिसंयोगपरत्वे कपिसंयोगाभावपरत्वे च उभयथापि दीधितिग्रन्थासाङ्गत्यम् इति आशङ्कायाः साराशः ।

समाधत्ते - **तथापीत्यादिना** [पृ.467] । साध्याभावे व्याप्यवृत्तित्वविशेषणानुपादाने 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र यावत्साध्याभावान्तर्गतस्य कपिसंयोगात्मकाभावस्य व्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्ध्या अव्याप्तिः स्यादिति अधिकरणपदेन व्याप्यवृत्तितानिरूपकाधिकरणपर्यन्तं न विवक्षणीयम् । तदविवक्षणे च 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र साध्याभावस्य कपिसंयोगाभावस्य अधिकरणे एतद्वृक्षे हेतोः वृत्तित्वात् तन्निबन्धना अव्याप्तिर्भवति । तद्वारणार्थं अधिकरणपदेन व्याप्यवृत्तितानि-

रूपकाधिकरणं विवक्षणीयम् । तद्विवक्षणे च 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र तादृशाधिकरणाप्रसिद्ध्या अव्याप्तिः स्यादिति तद्वारणाय साध्याभावेऽपि व्याप्यवृत्तित्वं निवेशनीयमिति दीधितिकारस्य आशयः । **व्याप्यवृत्तित्वाद्युपादानात्** [पृ.467] इत्यत्र आदिपदेन तन्निरूपकाधिकरणपरिग्रहः ।

गादाधरी

अथ वा कपिसंयोगादिसाध्यकहेतोः साध्याभावीयाव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वं तत्स्थलीयाव्याप्तिवारकव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वनिवेशौपयिकम् । अतः तदधीना या कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावीयतादृशाधिकरणाप्रसिद्धिनिबन्धना अव्याप्तिः तत्संपादकमपीति न तादृशग्रन्थासंगतिः ।

एतेन कपिसंयोगाभावादिसाध्यकस्थले तादृशाधिकरणाप्रसिद्धिभयेन व्याप्यवृत्तितानिरूपकाधिकरणाविवेशे व्याप्यवृत्तिसाध्यकस्थलेऽपि क्षणविशेषवृत्तित्वविशिष्टसाध्याभावस्य प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकस्य अव्याप्यवृत्तेरधिकरणे हेतोः वृत्या लक्षणगमनासंभवात् असंभव एव संभवतीति अव्याप्तिरिति लिखनं न युज्यत इत्यपि **निरस्तम्** ।।

विवरणम्

ननु अव्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेन साध्याभाववद्वृत्तित्वनिबन्धनाव्याप्तेः साध्याभावे व्याप्यवृत्तित्वादिदानेन व्युदास इत्यसंगतम् । दीधितौ अव्याप्यवृत्तिकपिसंयोगादिभावसाध्यकसद्धेतौ अव्याप्तिवारकतया प्रोक्तस्य तदधिकरणपदार्थस्य सत्वात् कथंचित् तदुभयोपादानेऽपि हेतुनिष्ठसाध्याभाववद्वृत्तित्वमात्रं न व्याप्यवृत्तित्वादिद्वयनिवेशौपयिकम् इत्याशङ्कायाः

अनुद्धारात् 'एतेन' इत्यादि वक्ष्यमाणास्वरसाच्च आह - **अथवेति** [पृ. 469]।

एवं च 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र हेतुनिष्ठं साध्याभाववद्वृत्तित्वं व्याप्यवृत्तितानिरूपकाधिकरणविवक्षाद्वारा 'कपिसंयोगाभाववान् मेयत्वात्' इत्यत्र अव्याप्तेः प्रयोजकं भवतीति लभ्यते। यथा साक्षात् साध्याभाववद्वृत्तित्वप्रयुक्ता कपिसंयोगादिसाध्यकाव्याप्तिः अधिकरणे व्याप्यवृत्तितानिरूपकत्वविशेषणात् वार्यते, तथा परंपरया तत्प्रयुक्ता कपिसंयोगाभावसाध्यकाव्याप्तिरपि साध्याभावे व्याप्यवृत्तित्वविशेषणात् वार्यत इति भावः।

एतेनेति [पृ.469]। प्रथमव्याख्यानं परित्यज्य 'अथवा' इत्यादिना द्वितीयव्याख्यानकरणेनेत्यर्थः। साध्याभावे व्याप्यवृत्तित्वविशेषणाभावे सति तत्तदधिकरणपदेन व्याप्यवृत्तितानिरूपकाधिकरणं न विवक्षणीयम्। कपिसंयोगाभावसाध्यकस्थले कपिसंयोगात्मकसाध्याभावस्य व्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्ध्या व्याप्यवृत्तितानिरूपकाधिकरणपर्यन्तं न निवेश्यत इति प्रथमव्याख्यानानुसरणे साध्याभावे व्याप्यवृत्तित्वविशेषणस्य असंभववारणप्रयोजनकत्वस्यापि संभवात् अव्याप्यवृत्तिसाध्यकस्थले अव्याप्तिवारणप्रयोजनकत्वं दीधित्युक्तं न संगच्छते।

तथा हि - साध्याभावे व्याप्यवृत्तित्वानुपादाने अधिकरणपदेन व्याप्यवृत्तितानिरूपकाधिकरणस्य च अविवक्षणे व्याप्यवृत्तिसाध्यके 'सत्तावान् जातेः' इत्यादौ पूर्वक्षणवृत्तित्वविशिष्टसत्ताभावस्य उत्तरक्षणावच्छेदेन हेतुमति घटादौ सत्त्वात् साध्याभावाधिकरणवृत्तित्वमेव हेतोरस्तीति लक्षणसमन्वयः न संभवति।

न च - पूर्वक्षणवृत्तित्वविशिष्टसत्ताभावस्य कथं साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वम्। साध्यवति

घटादौ पूर्वक्षणवृत्तित्वविशिष्टसत्ताभावस्य सत्त्वेन पूर्वक्षणवृत्तित्वविशिष्टसत्तात्वस्य साध्यवन्निष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वात् इति - वाच्यम् ।

एतत्कल्पे साध्यवन्निष्ठाभावे प्रतियोगिवैयधिकरण्यस्य निवेशितत्वात् पूर्वक्षणवृत्तित्वविशिष्टसत्ताभावस्य प्रतियोगिसामानाधिकरणतया साध्यवन्निष्ठप्रतियोगिव्यधिकरणाभावान्तरप्रतियोगितानवच्छेदकत्वस्य पूर्वक्षणवृत्तित्वविशिष्टसत्तात्वे सत्त्वात् तदवच्छिन्नाभावस्य लक्षणघटकत्वात् । तथा च व्याप्यवृत्तिसाध्यके अव्याप्यवृत्तिसाध्यके उभयत्र लक्षणगमनासंभवात् असंभव एव संभवति इति 'अव्याप्ति'रिति लेखनं न युज्यत इति अस्वारस्यं पूर्वस्मिन् व्याख्याने वर्तते । अतः द्वितीयं व्याख्यानम् अनुसृतम् इति भावः ।

निरस्तमिति [पृ.469] । प्रथमव्याख्याने साध्याभाववद्वृत्तित्वनिबन्धनासंभवस्य अधिकरणे व्याप्यवृत्तित्वनिरूपकत्वनिवेशौपयिकत्वेऽपि साध्यभावे व्याप्यवृत्तित्वनिवेशानौपयिकतया, द्वितीयव्याख्याने तदुभयनिवेशौपयिकतया अव्याप्तिलेखनसामञ्जस्यात् इति भावः ।

दीधितिः

तद्वद्वृत्तित्वाभावस्तु तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताको बोध्यः ।

गादाधरी

[तद्वद्वृत्तित्वाभावपरिष्कारः]

तत्तत्साध्याभावाधिकरणवृत्तित्वस्य हेतुवृत्तितानवच्छेदकविशेषधर्मव्यासज्यवृत्तिधर्मावच्छिन्नाभावमादाय व्यभिचारिण्यतिव्याप्तिः तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावं निवेश्य चेद्वार्यते, तदा व्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीयस्य

तादृशस्य तद्वद्वृत्तित्ववत्वेन घटाद्यभावस्य प्रसिद्धिः गुरुधर्मस्य प्रतियोगित्वावच्छेदकत्वाङ्गीकार एव संभवति । **अन्यथा** तादृशाभाववद्वृत्तित्ववत्वस्य वृत्तित्ववत्वरूपलघुधर्मसमनियततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धेः । **अन्यूनानतिप्रसक्तरूपावच्छिन्नत्वनिवेशे** ह्रदवृत्तित्व - ह्रदान्यनिर्धूमवृत्तित्वोभयाभावादेः निर्धूमवृत्तित्ववत्वादिसमनियतधर्मावच्छिन्नप्रतियोगिताकतया तद्वति धूमादिसाध्यकवह्न्यादिहेतौ अतिव्याप्तेः । तत्तत्साध्याभाववद्वृत्तित्ववत्वविशिष्टव्यापकतावच्छेदकरूपावच्छिन्नाभावादिनिवेशे च निर्धूमवृत्तित्ववत्वादिना ह्रदवृत्तित्वघटान्यतराभावमादाय तद्दोषतादवस्थ्यम् इति अन्यादृशाभावं तत्तदधिकरणवृत्तित्वाभावपदेन विवक्षयति - **तद्वदिति** [पृ.471] । व्यापकान्तम् अनवच्छिन्नान्तं च प्रतियोगिताविशेषणम् ।

विवरणम्

तद्वद्वृत्तित्वाभावस्तु [पृ.471] । इति दीधितिमवतारयति- **तत्तत्साध्याभावाधिकरणवृत्तित्वस्य** [पृ.471] इत्यादिना । यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयाः ये तत्तदधिकरणवृत्तित्वभावाः तद्वत्त्वं व्याप्तिः । अत्र 'तत्तदधिकरणवृत्तित्वाभावः' इत्यनेन तत्तत्साध्याभावाधिकरणवृत्तित्वप्रतियोगिकाभावस्य यथाश्रुतस्य विवक्षणे 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिः । 'धूमत्वावच्छिन्नधूमाभावाधिकरणवृत्तित्वप्रतियोगिकाभावः' इत्यनेन ह्रदवृत्तित्वेन ह्रदवृत्तित्वाभावः गृह्यते । तस्यापि धूमाभावाधिकरणवृत्तित्वप्रतियोगिकत्वात् । तद्वत्त्वं ह्रदवृत्तित्वाभाववत्त्वं वह्नावस्तीति अतिव्यप्तिः । एवं धूमत्वावच्छिन्नधूमाभावाधिकरणवृत्तित्वघटोभयाभावस्यापि तादृशवृत्तित्वप्रतियोगिकत्वेन तादृशोभयाभाववत्त्वस्य वह्नौ सत्त्वात् अतिव्याप्तिः । तत्तत्साध्याभाववद्वृत्तित्ववत्वावच्छिन्नप्रतियोगिताकाभावं निवेश्य उभयत्वावच्छिन्नाभावस्य व्यावर्तने सद्धेतौ व्यधि-

करणधर्मावच्छिन्नसाध्याभावसजातीयः तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावः वह्नित्वेन घटाभाववज्जगद्वृत्तित्वत्वेन तादृशवृत्तित्वाभावः इति वक्तुं न शक्यते । तस्य व्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वाभावात् । किंतु व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन घटाभाव एव ग्राह्यः। सोऽपि गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वानङ्गीकारे न प्रसिध्यति । वृत्तित्वत्वरूपलघुधर्मापेक्षया व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य गुरुत्वात् । एतद्दोषवारणाय तत्तत्साध्याभाववद्वृत्तित्वत्वान्यूनानतिप्रसक्तधर्मावच्छिन्नप्रतियोगिताकाभावः तत्तत्साध्याभाववद्वृत्तित्वाभावपदेन विवक्षितः। अन्यूनानतिप्रसक्तत्वं च समनियतत्वम् । व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतधर्मः वृत्तित्वत्वम् । तदवच्छिन्नप्रतियोगिताकाभावः वृत्तित्वत्वेन घटाभावः । तद्वत्त्वं हेतावस्तीति नाव्याप्तिः ।

परं तु एवं विवक्षणे 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः। तत्र समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वं निर्धूमवृत्तित्वत्वम् । तत्समनियतो धर्मः ह्रदवृत्तित्वह्रदान्यनिर्धूमवृत्तित्वोभयत्वम् । निर्धूमः द्विविधः - ह्रदः ह्रदान्यश्चेति । निर्धूमवृत्तित्वत्वं ह्रदवृत्तित्वे ह्रदान्यनिर्धूमवृत्तित्वे चास्ति । उभयत्वमपि तत्रैव अस्ति । तथा च निर्धूमवृत्तित्वत्वसमनियतधर्मावच्छिन्नप्रतियोगिताकाभावः ह्रदवृत्तित्व-ह्रदान्यनिर्धूमवृत्तित्वोभयत्वावच्छिन्नाभावः । तद्वत्त्वं वह्नौ अस्ति । वह्नौ ह्रदान्यायोगोलकवृत्तित्वेऽपि ह्रदवृत्तित्वविरहात् । तथा चातिव्याप्तिः। यदि च तत्तत्साध्याभाववद्वृत्तित्वत्वविशिष्टव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावः तत्तत्साध्याभाववद्वृत्तित्वाभावपदेन विवक्षितः । ह्रदवृत्तित्व-ह्रदान्यनिर्धूमवृत्तित्वोभयत्वं तु न निर्धूमवृत्तित्वत्वविशिष्टव्यापकतावच्छेदकम् । निर्धूमवृत्तित्वत्वविशिष्टह्रदवृत्तित्वाधिकरणे ह्रदवृत्तिपदार्थे ह्रदान्यनिर्धूमवृत्तित्व-

विरहेण ह्रदवृत्तित्व-ह्रदान्यनिर्धूमवृत्तित्वोभयाभावसत्त्वेन तत्प्रतियोगितावच्छेदकत्वस्यैव तादृशोभयत्वे सत्त्वात् निर्धूमवृत्तित्वत्वविशिष्टव्यापकतावच्छेदकत्वविरहात् । उभयत्वावच्छिन्नाभावस्य ग्रहीतुमशक्यत्वात् न तमभावमादाय अतिव्याप्तिः इत्युच्यते, तथापि निर्धूमवृत्तित्वत्वविशिष्टव्यापकतावच्छेदकं यत् निर्धूमवृत्तित्वत्वं तदवच्छिन्नप्रतियोगिताकाभावः निर्धूमवृत्तित्वत्वेन ह्रदवृत्तित्व - घटान्यतराभावोऽपि भवति । तद्वत्त्वं वह्नौ अस्तीति अतिव्याप्तितादवस्थ्यम् । अतः तत्तदधिकरणवृत्तित्वाभावपदेन तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकाभावं विवक्षयतीति भावः ।

ह्रदवृत्तित्वत्वेन ह्रदवृत्तित्वाभावस्य धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वं नास्ति । ह्रदवृत्तित्वाभावीयप्रतियोगितायाः ह्रदवृत्तित्वे एव सत्त्वात् धूमाभाववद्वृत्तित्वस्य तु अयोगोलकवृत्तित्वेऽपि सत्त्वात् । निर्धूमवृत्तित्व - घटोभयाभावस्य तु व्यासज्यवृत्तिधर्मानवच्छिन्न - प्रतियोगिताकत्वं नास्ति । अतः तादृशाभावो आदाय अतिव्याप्तिः नास्तीति बोध्यम् ।

हेतुवृत्तितानवच्छेदकः विशेषधर्मः ह्रदवृत्तित्वत्वम् । ह्रदवृत्तित्वत्वे हेतुवृत्तितानवच्छेदकत्वकथनं ह्रदवृत्तित्वाभावस्य हेतुनिष्ठत्वमस्तीति सूचनाय । एवं व्यासज्यवृत्तिधर्मेऽपि हेतुवृत्तितानवच्छेदकत्वम् अन्वेति । **अन्यथेति** [पृ.472] । गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वानङ्गीकारे इत्यर्थः । **अन्यूनानतिप्रसक्तेति** [पृ.472] । तत्तत्साध्याभाववद्वृत्तित्वत्व - समनियतरूपावच्छिन्नप्रतियोगिताकाभावविवक्षणे इत्यर्थः । **अन्यूनानतिप्रसक्तरूपावच्छिन्नत्वनिवेशे** इत्यस्य तादृशरूपावच्छिन्नत्वस्य प्रतियोगितायां निवेशे इत्यर्थः । तथा च वृत्तित्वत्वेन घटाभाव-

प्रतियोगितावच्छेदकस्य वृत्तित्वत्वस्य जगद्वृत्तित्वत्वान्यूनवृत्तित्वात् वृत्तित्वत्वेन घटाभावस्य लक्षणघटकत्वम् । निर्धूमवृत्तित्वघटोभयाभाववारणाय अनतिरिक्तवृत्तित्वं रूपविशेषणम् ।

दीधितिः

तेन **तत्तत्साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशेषितस्य द्वित्वाद्यवच्छिन्नस्य** वा **साध्याभाववद्वृत्तित्वस्य अभावमादाय नातिप्रसङ्गः ।**

गादाधरी

प्रथमविशेषणप्रयोजनमाह - तत्तत्साध्याभाववद्व्यक्तिविशेषेति [पृ.475] यद्व्यक्तौ हेतुरपि न वर्तते तादृशह्रदादिव्यक्तीत्यर्थः । **व्यभिचारनिरूपक**हेत्वधिकरणमात्रवृत्तिर्यः अयोगोलकादिव्यक्तिविशेषावृत्तित्वादिरूपसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावः तद्व्यक्तिविशेषवृत्तित्वाभावस्य हेतावसंभवात् किंचिद्विशिष्टस्य तादृशाभाववद्वृत्तित्वस्य अभावमादाय अतिप्रसङ्गं दर्शयति - **पार्थिवत्वादिविशेषितस्येति** [पृ.475] । अग्रिमेण **साध्याभाववद्वृत्तित्वस्ये** [पृ.475] त्यनेन अन्वितम् । वह्न्यादौ पार्थिवत्वादिविशेषणाभावात् तद्विशिष्टनिर्धूमवृत्तित्वाभावमादायेत्यर्थः ।

द्वितीयविशेषणप्रयोजनं दर्शयति - **द्वित्वाद्यवच्छिन्नस्येति** [पृ.475] । घटनिर्धूमवृत्तित्वोभयत्वाद्यवच्छिन्नस्येत्यर्थः । **नातिप्रसङ्ग** [475] इति । **ह्रदादिवृत्तित्वत्व** - पार्थिवत्वादिविशिष्टनिर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगिताया वह्न्यादिवृत्तिनिर्धूमवृत्तित्वाद्यवृत्तितया तत्तत्साध्याभाववद्वृत्तित्वत्वाव्यापकत्वात् । द्वित्वाद्यवच्छिन्नाभावप्रतियोगिताया द्वित्वादिवत् व्यासज्यवृत्तिताविरहेण निर्धूमवृत्तित्वादिनिष्ठ - भेदप्रतियोगितानव-

च्छेदकत्वरूपनिर्धूमवृत्तित्वत्वादिव्यापकत्वसत्त्वेऽपि व्यासज्यवृत्तिधर्मविच्छिन्नत्वात् तादृशाभावानां लक्षणाघटकत्वादिति भावः ।

व्यासज्यवृत्तिधर्मस्य तत्तत्साध्याभाववद्वृत्तित्वनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वविरहात् तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकधर्मावच्छिन्नाभावनिवेशे द्वित्वावच्छिन्नाभावमादाय अतिप्रसङ्गस्य वारणसंभवेऽपि प्रतियोगितायां व्यापकत्वविशेषणाप्रवेशे निर्धूमवृत्तित्वत्वादिना ह्रदादिवृत्तित्वघटान्यतराभावमादाय अतिप्रसङ्गो न शक्यते वारयितुमिति तत्र तद्विशेषणप्रवेशनस्य आवश्यकत्वे व्यासज्यवृत्तिधर्मावच्छिन्नाभाववारणाय तादृशधर्मानवच्छिन्नत्वमेव तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकधर्मावच्छिन्नत्वापेक्षया लाघवात् निवेशयितुमुचितमिति तदेव निवेशितम् । **व्यासज्यवृत्तित्वं च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वम्** ।

विवरणम्

प्रथमविशेषणेति [पृ.475] । प्रतियोगितायां तत्तत्साध्याभाववद्वृत्तित्वत्वरूपस्य प्रथमविशेषणस्य प्रयोजनमाहेत्यर्थः । **व्यभिचारनिरूपकेति** [पृ.475] । 'धूमवान् वह्नेः' इत्यत्र धूमत्वावच्छिन्नव्यापकतावच्छेदकं यत् अयोगोलकव्यक्तिविशेषावृत्तित्वं तदवच्छिन्नप्रतियोगिताकाभावाधिकरणं यः अयोगोलकव्यक्तिविशेषः तद्वृत्तित्वाभावस्य वह्नौ असत्त्वात् अतिव्याप्तिवारणसंभवात् पार्थिवत्वविशिष्टस्येत्युक्तम् । वह्नौ अयोगोलकव्यक्तिविशेषवृत्तित्वस्य सत्त्वेऽपि पार्थिवत्वविरहात् पार्थिवत्वविशिष्टायोगोलकव्यक्तिविशेषवृत्तित्वाभावः अस्तीति अतिव्याप्तिः । तादृशविशिष्टाभावस्यापि तत्तत्साध्याभाववद्वृत्तित्वप्रतियोगिकत्वात् । साध्याभाववद्वृत्तित्वत्वव्यापकत्वविशेषणे प्रतियोगितायां दत्ते अयोगोलकव्यक्तिविशेषवृत्तित्वनिष्ठप्रतियोगितायां

साध्याभाववद्वृत्तित्वत्वव्यापकत्वं नास्ति । साध्याभाववद्वृत्तित्वत्वाधिकरणे अयोगोलकान्तरह्रदादिवृत्तित्वे प्रतियोगितायाः अभावात् । अतः व्यक्तिविशेषवृत्तित्वाभावस्य लक्षणाघटकत्वात् नातिव्याप्तिरिति भावः ।

अत्र वह्निरूपः प्रकृतहेतुः यस्मिन् अयोगोलके वर्तते स व्यक्तिविशेषपदेन ग्राह्यः ।

द्वितीयविशेषणप्रयोजनमिति [पृ. 475] । व्यासज्यवृत्तिधर्मानवच्छिन्नत्वरूपस्य द्वितीयविशेषणस्य प्रयोजनमित्यर्थः ।

घटनिर्धूमवृत्तित्वोभयाभावस्यापि साध्याभाववन्निर्धूमवृत्तित्वत्वव्यापकप्रतियोगिताकतया लक्षणघटकत्वात् तादृशोभयाभावस्य वह्निरूपहेतौ सत्त्वात् 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः । तद्वारणाय व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायां विशेषणं दत्तम् । द्वयोरपि विशेषणयोः दानानन्तरं अतिव्याप्तिवारणप्रकारं विशदयति - **ह्रदादिवृत्तित्वत्वेत्यादिना** [पृ.475] । ह्रदवृत्तित्वत्वावच्छिन्नाभावप्रतियोगितायाः पार्थिवत्वविशिष्टनिर्धूमवृत्तित्वत्वावच्छिन्नाभावप्रतियोगितायाश्च निर्धूमवृत्तित्वत्वव्यापकत्वं नास्ति । वह्निनिष्ठे अयोगोलकवृत्तित्वेऽपि निर्धूमवृत्तित्वत्वस्य सत्त्वेन तत्र उक्ताभावीयप्रतियोगितायाः अभावात् । द्वित्वावच्छिन्नाभावप्रतियोगितायाः व्यासज्यवृत्तिधर्मानवच्छिन्नत्वविरहाच्च तादृशाभावानां लक्षणाघटकतया तान् आदाय नातिव्याप्तिरिति भावः ।

ननु तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकाभावनिवेशापेक्षया तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकधर्मावच्छिन्नाभाव एव निवेश्यताम् । ह्रदवृत्तित्वत्व - पार्थिवत्वविशिष्टनिर्धूमवृत्तित्वत्वनिर्धूमवृत्तिघटोभयत्वानां निर्धूमवृत्तित्वत्वव्यापकत्वविरहात् । तादृशधर्मावच्छिन्नाभावानां लक्षण-

घटकत्वाभावात् तानादाय अतिव्याप्तेरप्रसक्तेः इत्याशङ्क्य तथा निवेशेऽपि निर्धूमवृत्तित्वत्वेन ह्रदवृत्तित्वघटान्यतराभावस्य साध्याभाववदवृत्तित्वत्वव्यापकनिर्धूमवृत्तित्वत्वावच्छिन्नप्रतियोगिताकतया तादृशान्यतराभाववत्त्वस्य वह्नौ सत्त्वात् अतिव्याप्तिर्दुर्वारा। तद्वारणाय प्रतियोगितायां साध्याभाववदवृत्तित्वत्वव्यापकत्वमवश्यं निवेशनीयम्। तन्निवेशे निर्धूमवृत्तित्वघटोभयाभावस्य साध्याभाववदवृत्तित्वत्वव्यापकप्रतियोगिताकस्य वारणाय व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायां निवेशयितुम् उचितम्। तस्य साध्याभाववदवृत्तित्वत्वव्यापकधर्मावच्छिन्नत्वापेक्षया लघुत्वात् इति भावः।

व्यासज्यवृत्तित्वं चेति [पृ.476]। **स्वं** [पृ.476] - प्रतियोगिता। तदधिकरणप्रत्येकवृत्तिः यः भेदः उभयभेदः। तत्प्रतियोगितावच्छेदकत्वात् उभयत्वस्य व्यासज्यवृत्तित्वम्।

दीधितिः

अत्र च हेतुतावच्छेदकसंबन्धेन साध्याभाववदवृत्तित्वं बोध्यम्। तेन वह्न्यभाववति स्वावयवे धूमस्य वृत्तावपि न दोषः।

गादाधरी

[साध्याभाववदवृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशप्रयोजनकथनम्]

साध्याभाववदवृत्तित्वमिति [पृ. 478]। **साध्याभाववत्संबन्धित्वमित्यर्थः**। तेन तादात्म्यसंबन्धेन वृत्तेरप्रसिद्धावपि न तत्संबन्धावच्छिन्नहेतुकाव्याप्तिः। संबन्धप्रतियोगित्वरूपसंबन्धित्वैकदेशसंबन्धे **हेतुतावच्छेदकसंबन्धेनेति** [पृ.478] तृतीयार्थाभेदान्वयः। **वृत्तावपीति** [पृ.478] संबन्धित्वेऽपीत्यर्थः। **न दोष इति** [पृ.478]। हेतुतावच्छेदकसंबन्धानिवेशे **'वह्निमान् धूमात्'** इत्यत्र वह्न्यभाववत्संयुक्तत्वत्वावच्छिन्नाभावप्रतियोगिताया वह्न्यभाववत्समवेतत्वाद्यवृत्तितया सामान्यतो वह्न्यभाववदवृत्तित्वत्वं प्रति अव्यापकत्वेन तादृशाभावस्य लक्षणघटक-

त्वानुपपत्तेः वह्न्यभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य तद्-**वृत्तित्वसामान्याभावस्य** वह्न्यभाववत्समवेतत्ववति धूमेऽसत्त्वात् अव्याप्तिः प्रसज्यते । हेतुतावच्छेदकसंबन्धनिवेशे च निर्वह्निसं-युक्तत्वत्वावच्छिन्नाभावस्यापि तादृशसंबन्धावच्छिन्नसाध्याभावव-द्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकतया तमादाय लक्षणसमन्वय इति भावः ।

विवरणम्

साध्याभाववद्वृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं नि-वेशनीयम् । अन्यथा 'वह्निमान् धूमात्' इत्यादौ वह्नित्वावच्छिन्न-वह्न्यभाववति धूमावयवे धूमस्य समवायसंबन्धेन वृत्तित्वात् अव्याप्तिरित्युक्तं दीधितौ । तादात्म्यसंबन्धेन हेतुकस्थले हेतु-तावच्छेदकतादात्म्यसंबन्धावच्छिन्नसाध्याभाववन्निरूपितवृत्तित्वम-प्रसिद्धम् । तादात्म्यसंबन्धस्य वृत्त्यनियामकत्वात् । तथा च तत्रा-व्याप्तिः । अतः साध्याभाववद्वृत्तित्वमित्यस्य साध्याभाववत्सं-बन्धित्वमित्यर्थः । साध्याभाववदनुयोगिकसंबन्धप्रतियोगित्वमिति यावत् । तदेकदेशसंबन्धे हेतुतावच्छेदकसंबन्धेनेति तृतीयार्थस्य अभेदस्य अन्वयः । तथा च साध्याभाववदनुयोगिकहेतुतावच्छेदक-संबन्धाभिन्नसंबन्धप्रतियोगित्वं साध्याभाववद्वृत्तित्वम् । तदभावो व्याप्तिरिति फलितम् । तदाह - **साध्याभाववत्संबन्धित्वम् इत्या-दिना** [पृ.478] ।

हेतुतावच्छेदकसंबन्धानिवेशे अव्याप्तिमुपपादयति-**वह्निमान् धूमात्** [पृ.478] **इत्यत्रेत्यादिना** । पूर्वं तत्तत्साध्याभाववद्वृत्ति-त्वाभावः इत्यस्य तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगि-ताकाभाव इत्यर्थः निर्णीतः । तत्र वृत्तित्वे हेतुतावच्छेदकसंबन्धा-वच्छिन्नत्वानिवेशे 'वह्निमान् धूमात्' इत्यत्र वह्नित्वेन वह्न्यभाव-सजातीयः तद्वद्वृत्तित्वाभावः वह्न्यभाववन्निरूपितसंयोगसंबन्धा-वच्छिन्नवृत्तित्वत्वावच्छिन्नाभावः अर्थात् वह्न्यभाववत्संयुक्तत्व-

त्वावच्छिन्नाभावः ग्रहीतुं न शक्यते । तस्य वह्न्यभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वविरहात् । वह्न्यभाववद्वृत्तित्वत्वं हि वह्न्यभाववत्संयुक्तत्वे इव वह्न्यभाववत्समवेतत्वेऽपि वर्तते । न हि तत्र वह्न्यभाववत्संयुक्तत्वाभावीयप्रतियोगिता अस्ति । अतः वह्न्यभाववद्वृत्तित्वत्वावच्छिन्नाभाव एव ग्राह्यः । स तु धूमे नास्ति । वह्न्यभाववन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तित्ववति धूमे वह्न्यभाववद्वृत्तित्वसामान्याभावस्य असंग्रहात् । तथा च अव्याप्तिः प्रसज्यते । हेतुतावच्छेदकसंबन्धनिवेशे च साध्याभाववन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वत्वव्यापकप्रतियोगिताकाभावस्यैव निवेशात् वह्न्यभाववत्संयुक्तत्वत्वावच्छिन्नाभावस्य वह्न्यभाववत्संयुक्तत्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकतया तस्य च धूमे सत्त्वात् नाव्याप्तिः । वह्न्यभाववति धूमावयवे समवेतस्यापि धूमस्य तत्संयुक्तत्वविरहात् इति भावः ।

अव्यापकत्वेनेति [पृ.478] वह्न्यभाववद्वृत्तित्वत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वेन इत्यर्थः । वह्न्यभाववद्वृत्तित्वत्ववति वह्न्यभाववत्समवेतत्वे वर्तते यः अत्यन्ताभावः वह्न्यभाववत्संयुक्तत्वाभावीयप्रतियोगितायाः अभावः । तत्प्रतियोगित्वात् तादृशप्रतियोगिताया इति भावः ।

तादृशाभावस्येति [पृ.478] । वह्न्यभाववत्संयुक्तत्वत्वावच्छिन्नाभावस्य इत्यर्थः । **तद्वृत्तित्वसामान्याभावस्येति** [पृ.478] । वह्न्यभाववद्वृत्तित्वत्वावच्छिन्नाभावस्येत्यर्थः ।

दीधितिः

इत्थं च साध्याभावोऽपि **हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे** वर्तमानो ग्राह्यः । तेन 'जातिमान् सत्त्वात्' इत्यादौ **हेतुतावच्छेदकसंबन्धेन साध्याभाववद्वृत्तित्वस्य** अप्रसिद्धावपि **न क्षतिः** ।

गादाधरी

इत्थं च [पृ.480] – हेतुतावच्छेदकसंबन्धेन साध्याभाववद्वृत्तित्वविवक्षणे च । 'सति' इति शेषः । **तदविवक्षणे च वक्ष्यमाणाप्रसिद्धिविरहात्** उपष्टम्भासङ्गतिः ।

हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरण इति [पृ.480] । **अनुयोगितासंबन्धेन** हेतुतावच्छेदकसंबन्धवद्वृत्तिरित्यर्थः । **अथ वा** हेतुतावच्छेदकसंबन्धेन धर्मवद्वृत्तिरित्यर्थः । विशिष्य हेतुतावच्छेदकपुरस्कारेण हेतुमत्त्वनिवेशनसम्भवेऽपि **बहुपदार्थघटितहेतुतावच्छेदकस्थले** धर्मत्वेन निवेशापेक्षया तेन रूपेण निवेशे गौरवमिति सामान्यतो निवेशलाभाय '**कस्यचित्**' [पृ.480] इत्यभिहितम् ।

अथ 'द्रव्यं गुणकर्मान्यत्वे सति सत्त्वात्' इत्यादौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि साध्याभावस्य सत्तादिरूपहेतुसमानाधिकरणत्वसंभवेऽपि हेतुतावच्छेदकविशिष्टहेतुसमानाधिकरणनिरुक्तसाध्याभावानां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वनियमात् तादृशहेतुसमानाधिकरणत्वेन अभावविशेषणे केवलव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपेणैव साजात्यविवक्षणं संभवतीति तन्निवेशनमेवोचितमिति चेत्, न ।

तथा सति तादृशयावत्साध्याभावसजातीयवत्त्वस्यैव लक्षणत्वं संभवति । व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नाभावस्यापि विशिष्टहेतुसमानाधिकरणत्वेन लक्षणघटकतया तद्घटकयावदभावसजातीयाप्रसिद्ध्यैव अतिव्याप्तिविरहात् सद्धेतौ तादृशयावदभावसजातीयव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयत्किंचिदभावमादायैव लक्षणसमन्वयसंभवादिति साध्याभाववद्वृत्तित्वाभावत्वविशेषणवैयर्थ्यापत्तेः । हेतुतावच्छेदकसंबन्धेनेति [पृ.480] । समवायादिसंबन्धेन इत्यर्थः । साध्याभाववद्वृत्ति-

त्वस्य [पृ.480] - समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्-वृत्तित्वस्य । न क्षतिरिति [पृ.480] । तादृशसाध्याभावस्य समवायादि संबन्धानुयोग्यवृत्तितया व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् तद्वति च तादृशसंबन्धेनापि वृत्तेः प्रसिद्धेरिति भावः ।

अत्र च 'द्रव्यं गुणकर्मान्यत्वे सति सत्त्वात्' इत्यादौ अव्याप्तिः विशेष्यविशेषणसंबन्धस्य परंपरया हेतुत्वमभ्युपेत्य वारणीया इत्यभिप्रेत्य हेतुतावच्छेदकसंबन्धेन किंचिद्व्यक्त्यधिकरणवृत्तित्वमभावे विवक्षितम् । **यदि च** सत्तादेरेव विशिष्टसत्तात्वादिना व्याप्यत्वं हेतुतावच्छेदकविशिष्टनिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नाधिकरणतासामान्ये तत्तत्साध्याभावसजातीय - तत्तदधिकरणानुयोगिकत्वाभावं तत्तत्साध्याभाववद्वृत्तितासामान्ये तत्तत्साध्याभावसजातीयहेतुतावच्छेदकसंबन्धावच्छिन्नत्वविशिष्टहेतुतावच्छेदकावच्छेद्यत्वाभावं वा निवेश्य निवार्यते, तदा 'जातिमान् सत्त्वात्' इत्यादौ **उपदर्शिताप्रसिद्धिनिबन्धनाव्याप्तेः उक्तविवक्षामन्तरेणैव निवारणं संभवतीत्यवधेयम्** ।

विवरणम्

तदविवक्षणे चेति [पृ.481] । हेतुतावच्छेदकसंबन्धेन साध्याभाववद्वृत्तित्वस्य अविवक्षणे चेत्यर्थः । **वक्ष्यमाणाप्रसिद्धिविरहादिति** [पृ.481] । 'जातिमान् सत्त्वात्' इत्यादौ जातित्वावच्छिन्नाभाववति सामान्यादौ हेतुतावच्छेदकसमवायसंबन्धेन वृत्तित्वस्य अप्रसिद्ध्या अव्याप्तेर्वारणाय साध्याभावे हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे वर्तमानत्वं विशेषणं वक्ष्यति । सा च अप्रसिद्धिः हेतुतावच्छेदकसंबन्धेन साध्याभाववद्वृत्तित्वविवक्षायामेव भवति । अन्यथा स्वरूपसंबन्धेन साध्याभाववद्वृत्तित्वप्रसिद्ध्या अप्रसिद्धिविरहात् इति भावः ।

तादात्म्यसंबन्धेन हेतुकस्थले तादात्म्यसंबन्धेन अधिकरणस्य अप्रसिद्ध्या व्याचष्टे - **अनुयोगितासंबन्धेनेति** [पृ.481]। हेतुतावच्छेदतसंबन्धानुयोगिवृत्तिरिति पर्यवसितोऽर्थः।

'कस्यचित्' [पृ.481] इति दीधित्यनुसारेण आह - **अथ वेति** [पृ.481]। ननु धर्मत्वेन नानापदार्थनिवेशमुपेक्ष्य हेतुतावच्छेदकरूपेणैव निवेशः उचितः। तथा च हेतुतावच्छेदकसंबन्धेन हेतुमद्वृत्तिः इत्येव कुतो न व्याख्यातम् इत्यत आह - **विशिष्येति।**

बहुपदार्थघटितहेतुतावच्छेदकस्थले [पृ.481] **इति**। 'इयं गौः सास्नादिमतः' इत्यत्र तादात्म्यसंबन्धेन सास्नादिमान् हेतुः। हेतुतावच्छेदकं सास्नादिरूपः बहुपदार्थः। एवं च 'जातिमान् सत्त्वात्' इत्यत्र समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य जातित्वावच्छिन्नजात्यभावस्य समवायसंबन्धेन धर्मवद्वृत्तित्वं नास्ति। समवायसंबन्धेन द्रव्यत्वादिधर्मवत् द्रव्यं गुणः कर्म च। तत्र जातित्वावच्छिन्नजात्यभावस्य असत्त्वात्। किंतु जातित्वेन घटाद्यभाव एव साध्याभावपदेन ग्राह्यः। तदधिकरणजगन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वस्य प्रसिद्धतया तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकं वृत्तित्वत्वेन घटाभावम् आदाय लक्षणसमन्वयात् नाव्याप्तिरिति भावः।

अथ द्रव्यमित्यादि [पृ.481]। साध्याभावे हेतुतावच्छेदकसंबन्धेन हेतुमद्वृत्तित्वरूपविशेषणदाने 'द्रव्यं गुणकर्मान्यत्वे सति सत्त्वात्' इत्यत्र सद्धेतौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य द्रव्यत्वाभावस्य सत्तारूपहेत्वधिकरणवृत्तितया लक्षणघटकत्वात् तादृशाभावाधिकरणगुणवृत्तित्वमेव सत्तारूपहेतावस्तीति अव्याप्तिः। तद्वारणाय हेतुतावच्छेदकविशिष्टहेतुमद्वृत्तित्वं साध्याभावे निवेशनीयम्। द्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावस्य हेतुतावच्छेदकगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टहेतुमद्द्रव्यवृत्ति-

त्वविरहात् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः द्रव्यत्ववत्वेन घटाद्यभाव एव साध्याभावपदेन धर्तव्यः। तत्सजातीयः तदधिकरणवृत्तित्वाभावश्च हेतावस्तीति नाव्याप्तिः। इत्थं च सद्धेतौ सर्वत्र व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव हेतुतावच्छेदकविशिष्टहेतुसमानाधिकरणतया लक्षणघटकत्वम्। एवं च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपेणैव साध्याभावसाजात्यं तद्वद्वृत्तित्वाभावे निवेशयितुमुचितम्। व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नसाध्याभावस्यापि हेतुतावच्छेदकविशिष्टहेतुसमानाधिकरणतया यावत्साध्याभावान्तर्गतत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपेण तत्सजातीयस्य तद्वद्वृत्तित्वाभावस्य अप्रसिद्धया नातिव्याप्तिः। सद्धेतौ व्यधिकरणधर्मावच्छिन्नाभावस्यैव हेतुसमानाधिकरणत्वेन लक्षणघटकतया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपेण तत्सजातीयस्य तद्वद्वृत्तित्वाभावस्य प्रसिद्धया नाव्याप्तिरिति चेत्, न—

तथा सति हेतुतावच्छेदकसंबन्धेन हेतुसमानाधिकरणयावत्साध्याभावसजातीयवत्त्वमेव लक्षणमस्तु। साजात्यं च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपेण। व्यभिचारिणि धूमत्वावच्छिन्नधूमाभावस्यापि हेतुसमानाधिकरणत्वेन लक्षणघटकतया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन तत्सजातीयाप्रसिद्धया नातिव्याप्तिः। सद्धेतौ हेतुसमानाधिकरणव्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीय - व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयत्किंचिदभाववत्त्वमादाय लक्षणसमन्वयः। तथा च साध्याभाववद्वृत्तित्वाभावनिवेशवैयर्थ्यात् इति भावः।

एवं च हेतुतावच्छेदकविशिष्टहेतुमद्वृत्तित्वं न निवेशनीयम्। किं तु हेतुतावच्छेदकसंबन्धेन धर्मवद्वृत्तित्वमेव निवेशनीयम्। सद्धेतौ समानाधिकरणधर्मावच्छिन्नसाध्याभावस्यापि हेतु-

तावच्छेदकसंबन्धेन यत्किचिद्धर्मवद्वृत्तित्वात् लक्षणघटकतया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन रूपेण तत्सजातीयस्य अप्रसिद्ध्या अव्याप्तिः स्यात् इति व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेणैव साध्याभावसाजात्यं विवक्षणीयम् इति स्थितम्। एवं सति 'द्रव्यं गुणकर्मान्यत्वे सति सत्त्वात्' इत्यत्र अव्याप्तिः अवशिष्यते। सा च 'अत्र च' इत्यादिना वारयिष्यते।

अत्र चेत्यादि [पृ.482]। 'द्रव्यं गुणकर्मान्यत्वे सति सत्वात्' इत्यत्र सत्ता न हेतुः। किन्तु गुणकर्मान्यत्वरूपविशेषणस्य सत्तारूपविशेष्यस्य च यः संबन्धः सामानाधिकरण्यरूपः स एव स्वाश्रमाश्रयत्वसंबन्धेन हेतुः। तदधिकरणं च द्रव्यमेव। तद्वृत्तित्वं द्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावस्य नास्ति। किन्तु द्रव्यत्वत्वेन घटाभावस्यैव अस्तीति तत्सजातीयस्य तदधिकरणजगद्वृत्तित्वाभावस्य हेतौ सत्त्वात् नाव्याप्तिरिति भावः।

यदि चेत्यादि [पृ.482]। विशेष्यविशेषणसंबन्धस्य हेतुत्वे 'सत्त्वात्' इति हेतुनिर्देशानुपपत्तेः सत्ताया एव विशिष्टसत्तात्वेन रूपेण हेतुत्वं वर्तते। तथा सति प्रसक्ता अव्याप्तिस्तु इत्थं परिहरणीया—

यद्धर्मविशिष्टनिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नाधिकरणतासामान्ये तत्तत्साध्याभावसजातीयतत्तदधिकरणानुयोगिकत्वाभावः तद्धर्मवत्त्वं लक्षणम्। 'द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्' इत्यत्र यद्धर्मः गुणकर्मान्यत्वविशिष्टसत्तात्वम्। तद्विशिष्टनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणता द्रव्यनिष्ठा। तस्यां तत्तत्साध्याभावसजातीयः द्रव्यत्वत्वेन द्रव्यत्वाभावसजातीयः तत्तदधिकरणानुयोगिकत्वाभावः द्रव्यत्वत्वेन द्रव्यत्वाभावाधिकरणगुणाद्यनुयोगिकत्वावच्छिन्नाभावः वर्तते। तादृशाधिकरणतायाः गुणादिवृत्ति-

त्वविरहात् तद्धर्मवत्त्वं - विशिष्टसत्तात्ववत्त्वं विशिष्टसत्तारूपहेतावस्तीति नाव्याप्तिः ।

यद्वा तत्तत्साध्याभाववद्वृत्तितासामान्ये तत्तत्साध्याभावसजातीयहेतुतावच्छेदकसंबन्धावच्छिन्नत्वविशिष्टयद्धर्मावच्छेद्यत्वाभावः तद्धर्मवत्त्वं व्याप्तिः । 'द्रव्यं विशिष्टसत्त्वात्' इत्यत्र द्रव्यत्वत्वावच्छिन्नाभाववद्वृत्तितायां सत्तानिष्ठायां समवायसंबन्धावच्छिन्नत्वस्य सत्त्वेऽपि विशिष्टसत्तात्वावच्छिन्नत्वरूपविशेष्यविरहात् साध्याभावसजातीयः हेतुतावच्छेदकसंबन्धावच्छिन्नत्वविशिष्टहेतुतावच्छेदकावच्छेद्यत्वत्वावच्छिन्नाभावः वर्तते इति नाव्याप्तिः ।

एवं च 'जातिमान् सत्त्वात्' इत्यादौ प्रथमलक्षणानुसारेण सत्तात्वविशिष्टनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणतायां द्रव्यादिनिष्ठायां सत्ताभावाधिकरणसामान्याद्यनुयोगिकत्वाभावस्य सत्त्वात् द्वितीयलक्षणानुसारेण जातित्वावच्छिन्नाभाववन्निरूपितवृत्तितायां सामान्यत्वादिनिष्ठायां समवायसंबन्धावच्छिन्नत्वाभावप्रयुक्तस्य सत्तात्वावच्छिन्नत्वाभावप्रयुक्तस्य च हेतुतावच्छेदकसंबन्धावच्छिन्नत्वविशिष्टहेतुतावच्छेदकावच्छेद्यत्वाभावस्य सत्त्वात् नाव्याप्तिः । तथा च एतदर्थं साध्याभावे हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे वर्तमानत्वरूपं विशेषणं न देयमिति भावः ।

अत्र प्रथमकल्पे सामान्यपदानुपादाने 'धूमवान् वह्नेः' इत्यत्र वह्नित्वावच्छिन्ननिरूपितसंयोगसंबन्धावच्छिन्नाधिकरणतायां पर्वतनिष्ठायां धूमत्वावच्छिन्नाभावाधिकरणह्रदाद्यनुयोगिकत्वाभावस्य सत्त्वात् अतिव्याप्तिः । अतः सामान्यपदम् । तदुपादाने तु अयोगोलकनिष्ठवह्निनिरूपिताधिकरणताया अपि अधिकरणतासामान्यान्तर्गततया तत्र च धूमाभावाधिकरणायोगोलकानुयोगिकत्वमेवास्तीति नातिव्याप्तिः ।

एवं द्वितीयकल्पे सामान्यपदानुपादाने घटनिष्ठायां धूमाभाववन्निरूपितवृत्तितायां संयोगसंबन्धावच्छिन्नत्वविशिष्टस्य वन्हित्वावच्छेद्यत्वस्य अभावः अस्तीति अतिव्याप्तिः। तद्वारणाय सामान्यपदोपादानम्। तदुपादाने वन्हिनिष्ठायाः धूमाभाववन्निरूपितवृत्तिताया अपि वृत्तितासामान्यान्तर्गततया तत्र संयोगसंबन्धावच्छिन्नत्वविशिष्टवन्हित्वरूपहेतुतावच्छेदकावच्छिन्नत्वमेव अस्ति न तु तदभाव इति नातिव्याप्तिः।

उपदर्शिताप्रसिद्धीति [पृ.482]। साध्याभाववन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धिनिबन्धनाव्याप्तेरित्यर्थः। **उक्तविवक्षामिति** [पृ.482]। हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे वर्तमानत्वरूपविशेषणविवक्षामन्तरेणेत्यर्थः।

दीधितिः

यद्वा यावन्तः तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वम् अवच्छिद्यते तद्रूपवत्त्वं तत्त्वम्।

गादाधरी

मिश्रोक्तद्वितीयलक्षणस्यावतरिका

मिश्रास्तु - साध्याभाववद्वृत्तित्वाभावरूपव्याप्तेः 'जातिमान् सत्त्वात्', 'द्रव्यं विशिष्टसत्त्वात्' इत्यादौ अव्याप्तिमालोच्य सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपामेव व्याप्तिं साजात्यादिघटनया परिष्कृतवन्तः, तत्परिष्कृते च यथाश्रुते वक्ष्यमाणदोषमुद्धर्तुम् अभावप्रतियोगित्वस्थले स्वावच्छिन्नाव्यापकतावच्छेदकप्रतियोगितावच्छेदककत्वरूपपारिभाषिकतत्प्रतियोगितावच्छेदकत्वाश्रयहेतुतावच्छेदकवत्त्वं निवेशयन् तादृशलक्षणमाह—**यद्वेति** [पृ.487] **तादृशाः** [पृ.487]—व्याप्यवृत्तयः। **साध्याभावाः** [पृ.487]। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छे-

दकरूपावच्छिन्नप्रतियोगिताकाभावाः । **प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य अभावस्य**—[पृ.487] । एकैकतदभावसजातीयस्य तत्तदभावव्यापकीभूतस्य व्याप्यवृत्तेरभावस्य, **प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते**—[पृ.487] । प्रतियोगितावच्छेदकं यद्धेतुतावच्छेदकावच्छिन्ननिरूपितव्यापकतावच्छेदकम् **तद्रूपवत्त्वं** [पृ. 545] । तेन रूपेण व्याप्यत्वम् ।

गादाधरी

लक्षणसमन्वयादिप्रदर्शनम्

'वह्निमान् धूमात्' इत्यादौ वह्नित्वाद्यवच्छिन्नवह्न्याद्यभावसजातीयः तद्व्यापकीभूतः धूमत्वाद्यवच्छिन्नधूमाभावः, वह्नित्वाद्यवच्छिन्नघटाभावसजातीयः तद्व्यापकीभूतः धूमत्वावच्छिन्नघटाद्यभावः तत्प्रतियोगितावच्छेदकं धूमत्वादिकं धूमत्वाद्यवच्छिन्नव्यापकावच्छेदकमिति लक्षणसमन्वयः ।

व्यभिचारिणि धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकधूमत्वाद्यवच्छिन्नघटाद्यभावतादृशवह्नित्वाद्यवच्छिन्नवह्न्याद्यभावसजातीयतत्तदभावव्यापकवह्नित्वाद्यवच्छिन्नघटाद्यभाववह्नित्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकवह्नित्वादेः वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वेऽपि **तादृशयावत्साध्याभावान्तर्गत**धूमत्वाद्यवच्छिन्नधूमाभावसजातीयतद्व्यापकाभावप्रतियोगितावच्छेदकस्य **कस्यापि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वाभावात्** नातिव्याप्तिः ।

विवरणम्

यद्वेति द्वितीयलक्षणमवतारयति - **मिश्रास्तु** [पृ.487] । इत्यादिना । मिश्रास्तु साध्याभाववद्वृत्तित्वाभावरूपव्याप्ति व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वसंपादनानुगुण्येन

परिष्कृत्य पूर्वोक्तरीत्या प्रथमलक्षणमूचुः । तत्र 'जातिमान् सत्त्वात्' इत्यादौ साध्याभाववन्निरूपित - हेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या अव्याप्तिः । 'द्रव्यं विशिष्टसत्त्वात्' इत्यादौ विशिष्टशुद्धयोः अनतिरेकात् हेतोः साध्याभाववद्वृत्तित्वमेवास्तीति च अव्याप्तिः प्रसजतीत्यालोच्य प्रथमलक्षणमुपेक्ष्य सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपं चतुर्थलक्षणं साजात्यादिघटनया परिष्कृतवन्तः । तस्य लक्षणस्य यथाश्रुतपरिष्कारस्तु - यावन्तः व्याप्यवृत्तयः साध्याभावाः प्रत्येकं तेषां सजातीयः व्यापकीभूतश्च यः व्याप्यवृत्तिः अभावः तत्प्रतियोगित्वमिति । तादृशयथाश्रुतपरिष्कारादरे 'द्रव्यं सत्त्वात्' इत्यत्र व्यभिचारिणि अतिव्याप्तिः । तत्र साध्याभावपदेन द्रव्यत्ववत्त्वेन द्रव्यत्वाभावस्य ग्रहणे तत्सजातीयः तद्व्यापकश्चाभावः गुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगिताकाभावः । तत्प्रतियोगित्वं विशिष्टसत्तायामस्ति । विशिष्टशुद्धयोरनतिरेकात् शुद्धसत्तारूपहेतावपि अस्तीति । अतः अभावप्रतियोगित्वस्थाने अभावप्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वं निवेशनीयम् । 'द्रव्यं सत्त्वात्' इत्यत्र विशिष्टसत्तात्वस्य उक्तरीत्या अभावप्रतियोगितावच्छेदकत्वेऽपि हेतुतावच्छेदकस्य सत्तात्वस्य अभावप्रतियोगितावच्छेदकत्वं नास्तीति नातिव्याप्तिः ।

परन्तु एवं विवक्षणेऽपि 'ज्ञेयं प्रमेयात्' इत्यत्र अव्याप्तिः । ज्ञेयत्ववत्त्वेन घटाभावसजातीयस्य हेतुतावच्छेदकावच्छिन्नाभावस्य अप्रसिद्धेः । हेतुतावच्छेदकं यत् प्रमेयत्वं तस्य केवलान्वयितया प्रमेयत्वव्यधिकरणप्रतियोगित्वाप्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नहेत्वभावस्य अप्रसिद्धेः । तथा च तत्र हेतुतावच्छेदकं प्रमेयत्वम् उक्ताभावप्रतियोगितावच्छेदकं न भवतीति अव्याप्तिः प्रसज्यते । तद्वारणाय पारिभाषिकं प्रतियोगितावच्छेदकत्वं निवेश्य चतुर्थलक्षणं परिष्कृतवन्तः । पारिभाषिकं प्रतियोगितावच्छेदकत्वं तु

स्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगितावच्छेदककत्वरूपम्। तथा च तादृशं परिष्कृतं लक्षणं , यद्वेत्यादिना दीधितौ अनूद्यते इति भावः ।

साजात्यादिघटयेति [पृ.487] । 'आदि'पदेन व्याप्यवृत्तित्वं गृह्यते ।

वक्ष्यमाणदोषमिति [पृ.487] । 'द्रव्यं सत्त्वात्' इत्यत्र अतिव्याप्ति, 'ज्ञेयं प्रमेयात्' इत्यत्र अव्याप्ति च इत्यर्थः । अतिव्याप्तिमुद्धर्तुं प्रतियोगित्वस्थाने प्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वनिवेशः । अव्याप्तिमुद्धर्तुं पारिभाषिकप्रतियोगितावच्छेदकत्वनिवेशः इति ध्येयम् ।

यावन्तः व्याप्यवृत्तयः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिप्रतियोगिताकाभावाः एकैकतदभावस्य तत्तदभावव्यापकीभूतस्य व्याप्यवृतेरभावस्य प्रतियोगितावच्छेदकेन धर्मेण अवच्छिन्नं यद्रूपावच्छिन्नव्यापकत्वं तादृशाभावप्रतियोगितावच्छेदकं यद्धर्मावच्छिन्नव्यापकतावच्छेदकम् इति यावत् । तद्धर्मवत्त्वं व्याप्तिरिति मिश्रोक्तं द्वितीयलक्षणम् ।

'वह्निमान् धूमात्' इत्यादौ समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य वह्नित्वेन वह्न्यभावस्य ग्रहणे तत्सजातीयः तद्व्यापकीभूतश्चाभावः धूमत्वेन धूमाभावः । यत्र यत्र वह्नित्वेन वह्न्यभावः तत्र धूमत्वेन धूमाभावस्य सत्त्वात् । तादृशाभावस्य प्रतियोगितावच्छेदकं धूमत्वं हेतुतावच्छेदकधूमत्वावच्छिन्नव्यापकतावच्छेदकं भवति । तद्धर्मवत्त्वं धूमेऽस्तीति लक्षणसमन्वयः । साध्याभावदेन व्यधिकरणधर्मावच्छिन्नाभावस्य वह्नित्वेन घटाभावस्य ग्रहणे तत्सजातीयः तद्व्यापकश्चाभावः धूमत्वेन घटाभावः । प्रतियोगितावच्छेदकं धूमत्वं धूमत्वावच्छिन्नव्यापकतावच्छेदकं भवतीति लक्षणसमन्वयः ।

'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि यावत्साध्याभावान्तर्गतस्य धूमत्वेन धूमाभावस्य सजातीयः तद्व्यापकश्च यः अभावः वह्नित्वेन वह्न्यभावः न भवति। धूमाभाववति अयोगोलके वह्न्यभावस्य विरहात्। किन्तु धूमत्वेन धूमाभावो वा अयोगोलकान्यत्वाद्यभावो वा। तत्प्रतियोगितावच्छेदकं धूमत्व - अयोगोलकान्यत्वादिकं हेतुतावच्छेदकवह्नित्वावच्छिन्नव्यापकतावच्छेदकं न भवतीति नातिव्याप्तिः।

साध्याभावे यावत्त्वानुपादाने 'धूमवान् वह्नेः' इत्यत्र साध्यतावच्छेदकधूमत्वावच्छिन्नव्यापकतावच्छेदकं यत् धूमत्वं तदवच्छिन्नप्रतियोगिताकः कश्चिदभावः इत्यनेन धूमत्वेन घटाभावं गृहीत्वा तत्सजातीयः तद्व्यापकश्चाभावः इत्यनेन वह्नित्वेन घटाभावस्य ग्रहणे तत्प्रतियोगितावच्छेदकं वह्नित्वं हेतुतावच्छेदकवन्हित्वावच्छिन्नव्यापकतावच्छेदकं भवतीति अतिव्याप्तिः स्यात्। अतः यावत्त्वोपादानम्। तदुपादाने च धूमत्वावच्छिन्नव्यापकतावच्छेदक - धूमत्वावच्छिन्नप्रतियोगिताकयावदभावान्तर्गतः धूमत्वेन धूमाभावोऽपि। तद्व्यापकः यः धूमत्वेन धूमाभावादिः तत्प्रतियोगितावच्छेदकं धूमत्वादिकं वह्नित्वावच्छिन्नव्यापकतावच्छेदकं न भवतीति नातिव्याप्तिः। तदाह—**वह्निमान् धूमात् इत्यादौ इत्यादिना** [पृ.488]। **तादृशवह्नित्वाद्यवच्छिन्नेति** [पृ.488]। धूमत्वावच्छिन्नव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नेत्यर्थः।

धूमत्वावच्छिन्नघटाभावसजातीयः व्यापकश्च वह्नित्वेन घटाभावः। वह्नित्वावच्छिन्नवह्न्यभावसजातीयः तद्व्यापकश्च वह्नित्वेन वह्न्यभावः इति यथाक्रमम् अन्वयः। **तादृशयावत्साध्याभावान्तर्गतेति** [पृ.488]। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकयावत्साध्याभावान्तर्गतेत्यर्थः। **कस्यापीति** [पृ.488]। धूमत्व - अयोगोलकान्यत्वादेः इत्यर्थः। **वन्हित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वाभावादिति**

[पृ.488] । वह्नित्वाद्यवच्छिन्नाधिकरणे अयोगोलके धूमाभावस्य अयोगोलकान्यत्वाभावस्य च सत्त्वेन तत्प्रतियोगितावच्छेदकत्वस्यैव धूमत्वायोगोलकान्यत्वादौ सत्त्वादिति भावः ।

गादाधरी

प्रथमाभावे व्याप्यवृत्तित्वविशेषणात् 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगाभावस्य केवलान्वयिनः सजातीयस्य व्यापकीभूतव्याप्यवृत्त्यभावस्य अप्रसिद्धावपि न क्षतिः । **व्याप्यवृत्तित्वविशिष्टतदभावं प्रति** एतद्वृक्षत्वाद्यभावस्य व्यापकत्वात् ।

साध्यतावच्छेदकसंबन्धेन साध्यव्यापकतया विवक्षणीयतया संयोगेन द्रव्यस्य अव्याप्यवृत्तितामते संयोगेन तत्साध्यके तादृशसंबन्धेन व्यापकताप्रसिद्ध्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यस्य अवश्यनिवेशनीयतया साध्यवन्निष्ठप्रतियोगिसमानाधिकरणाभावप्रतियोगितावच्छेदकस्यापि संयोगत्वादेः साध्यव्यापकतावच्छेदकत्वम् अक्षतमिति ध्येयम् ।

विवरणम्

साध्याभावे व्याप्यवृत्तित्वविशेषणस्यप्रयोजनमाह - **प्रथमाभावे इत्यादिना** [पृ. 492] । लक्षणे प्रथमतया निर्दिष्टः अभावः प्रथमाभावः । सः साध्याभावः । साध्याभावे व्याप्यवृत्तित्वविशेषणानुपादाने 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र यावत्साध्याभावान्तर्गतः यः समानाधिकरणकपिसंयोगत्वावच्छिन्नकपिसंयोगाभावः तत्सजातीयः व्याप्यवृत्तिश्च अभावः अप्रसिद्धः । कपिसंयोगाभावस्य केवलान्वयित्वात् । तत्सजातीयः व्यापकश्चाभावः कपिसंयोगत्वेन कपिसंयोगाभाव एव स्यात् । स तु व्याप्यवृत्तिः न भवति । घटत्वादिना घटाभावः कपिसंयोगाभावसजातीयः व्याप्यवृत्तिः सन्नपि कपिसंयोगा-

भावव्यापको न भवति । कपिसंयोगत्वेन घटाभाव: व्यापक: व्याप्यवृत्ति: सन्नपि कपिसंयोगत्वेन कपिसंयोगाभावसजातीयो न भवति । तथा च कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य सजातीय: व्यापकीभूत: व्याप्यवृत्तिश्च अभावोऽप्रसिद्ध इति अव्याप्तिः स्यात् । तद्वारणाय साध्याभावे व्याप्यवृत्तित्वविशेषणम् । तथा सति कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य व्याप्यवृत्तित्वविरहेण लक्षणाघटकतया कपिसंयोगत्वेन घटाद्यभाव एव साध्याभावपदेन ग्राह्य: । तत्सजातीय: व्यापकीभूत: व्याप्यवृत्तिश्च अभावः एतद्वृक्षत्ववत्त्वेन घटाद्यभाव: प्रसिद्ध: । तत्प्रतियोगितावच्छेदकं एतद्वृक्षत्ववत्वं हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकं भवतीति नाव्याप्तिरिति भाव: ।

नन्वत्र व्याप्यवृत्तित्वं यदि अवच्छिन्नवृत्तिकान्यत्वं तदा संयोगसंबन्धावच्छिन्न - समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य अव्याप्यवृत्तित्वेन अवच्छिन्नवृत्तिकत्वनियमात् अवच्छिन्नवृत्तिकान्यव्यधिकरणधर्मावच्छिन्नाभावमादाय 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्ति: । यदि च अनवच्छिन्नवृत्तिकत्वं व्याप्यवृत्तित्वं तदा 'कपिसंयोगी एतत्त्वात्' इत्यत्र अव्याप्तिः तदवस्थैव । कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य गुणादौ अनवच्छिन्नवृत्तिकत्वेन लक्षणघटकत्वानपायात् इति चेन्न - यावन्तः साध्याभावाः व्याप्यवृत्तय: तन्निष्ठव्याप्यवृत्तित्वावच्छिन्नव्याप्यतानिरूपितव्यापकत्वस्य विवक्षितत्वात् । व्याप्यवृत्तित्वं च अनवच्छिन्नवृत्तिकत्वमेव इत्याशयेनाह - **व्याप्यवृत्तित्वविशिष्टतदभावं प्रतीति** [पृ.492] ।

ननु साध्याभावे व्याप्यवृत्तित्वविशेषणं व्यर्थम् । प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकताया एव लक्षणघटकतया कपिसंयोगत्वस्य साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेन साध्यव्यापकतावच्छेदकत्वविरहात् कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य

साध्याभावपदेन ग्रहीतुमशक्यत्वात् इत्याशङ्क्याह - **साध्यता-वच्छेदकसंबन्धेनेति** [पृ.492] । व्यापकताघटकाभावे प्रतियोगि-वैयधिकरण्यम् अवश्यं निवेशनीयम् । अन्यथा संयोगेन द्रव्यस्य अव्याप्यवृत्तितामते संयोगेन द्रव्यसाध्यके 'वह्निमान् धूमात्' इत्यादौ साध्यतावच्छेदकसंबन्धेन व्यापकतायाः अप्रसिद्धेः अव्याप्त्यापत्तेः । तथा च 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ साध्यवन्निष्ठोऽपि कपिसंयोगाभावः प्रतियोगिसमानाधिकरणः, न तु प्रतियोगिव्यधिकरणः । साध्यवन्निष्ठः प्रतियोगिव्यधिकरणः अभावः घटाद्यभावः । तत्प्रतियोगितानवच्छेदकं कपिसंयोगत्वं भवति । तदवच्छिन्नप्रतियोगिताकयावदभावपदेन कपिसंयोगत्वेन कपिसंयोगाभावस्यापि ग्रहीतुं शक्यतया पूर्वोक्तरीत्या अप्रसिद्धि-निबन्धनाव्याप्तिः भवति । तद्वारणाय साध्याभावे व्याप्यवृत्ति-त्वविशेषणमावश्यकमिति भावः ।

गादाधरी

नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभावस्य नानाधिकरण-कैकव्यक्तिसाध्यके यत्किञ्चिदधिकरणवृत्तित्वविशिष्टसाध्याभावस्य व्यापकीभूताभावः न हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-रूपावच्छिन्नप्रतियोगिताक इति तादृशसाध्याभावव्यावर्तनाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगि - ताकत्वनिवेशनम् ।

विवरणम्

नानाव्यक्तिसाध्यकेत्यादि [पृ. 494] । साध्याभावपदेन साध्यनिष्ठप्रतियोगिताकाभावविवक्षायां नानाव्यक्तिसाध्यके 'वन्हि-मान् धूमात्' इत्यादौ तत्तत्साध्यव्यक्त्यभावस्य - महानसीय-वह्न्याद्यभावस्यापि साध्यनिष्ठप्रतियोगिताकतया तद्व्यापकाभाव-प्रतियोगितावच्छेदकस्य महानसीयवह्नित्वादेः धूमत्वावच्छिन्नव्या-

पकतावच्छेदकत्वं नास्तीति अव्याप्तिः स्यात् । एवं नानाधिकरणक-एकव्यक्तिसाध्यके 'सत्तावान् जातेः' इत्यादौ साध्यनिष्ठ-प्रतियोगिताकाभावपदेन द्रव्यवृत्तित्वविशिष्टसत्ताभावस्यापि ग्रहीतुं शक्यतया तद्व्यापकाभावप्रतियोगितावच्छेदकस्य द्रव्यवृत्तित्वविशिष्टसत्तात्वस्य हेतुतावच्छेदकजातित्वावच्छिन्न - व्यापकतावच्छेदकत्वं नास्ति । जातित्वावच्छिन्नाधिकरणगुणवृत्तिः यः द्रव्यवृत्तित्वविशिष्टसत्ताभावः तत्प्रतियोगितावच्छेदकत्वस्यैव द्रव्यवृत्तित्वविशिष्टसत्तात्वे सत्त्वादिति अव्याप्तिः । तद्वारणाय साध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदकरूपावच्छिन्न - प्रतियोगिताकाभावः साध्याभावपदेन विवक्षणीयः ।

'वह्निमान् धूमात्' इत्यादौ महानसीयवह्नित्वस्य वह्नित्वावच्छिन्नव्यापकतावच्छेदकत्वविरहात्, 'सत्तावान् जातेः' इत्यादौ द्रव्यवृत्तित्वविशिष्टसत्तात्वस्य सत्तात्वावच्छिन्नव्यापकतावच्छेदकत्वविरहात् महानसीयवह्नित्वावच्छिन्नाभावस्य वा द्रव्यवृत्तित्वविशिष्टसत्तात्वावच्छिन्नाभावस्य वा लक्षणघटकत्वं नास्तीति न तादृशाभावमादाय अव्याप्तिरिति भावः ।

गादाधरी

व्यापकता च साध्यतावच्छेदकसंबन्धघटिता । तेन समवायेन द्रव्यत्वादिसाध्यकगुणादिहेतौ विषयतया साध्यव्यापकज्ञानादेः साध्यतावच्छेदकसंबन्धावच्छिन्नाभावं प्रति हेतुतावच्छेदकसंबन्धावच्छिन्नहेत्वभावस्य अव्यापकत्वेऽपि न क्षतिः ।

विवरणम्

व्यापकता चेति [पृ.495] । समवायेन द्रव्यत्वसाध्यकगुणादिहेतौ 'इदं द्रव्यं गुणात्' इत्यत्र साध्यं द्रव्यत्वं प्रति विषयतासंबन्धेन ज्ञानस्य व्यापकत्वात् साध्यव्यापकतावच्छेदकं यत्

ज्ञानत्वं तदवच्छिन्नसाध्यतावच्छेदकसमवायसंबन्धावच्छिन्नप्रति-योगिताकाभावस्यापि लक्षणघटकतया तं प्रति समवायसंबन्धा-वच्छिन्नगुणरूपहेतुनिष्ठप्रतियोगिताकाभावस्य व्यापकत्वं नास्ति। यत्र यत्र समवायेन ज्ञानाभावः घटादौ तत्र समवायेन गुणाभावस्य विरहात्। किन्तु समवायेन ज्ञानाभाव एव साध्याभावव्यापकः। तत्प्रतियोगितावच्छेदकं ज्ञानत्वं हेतुतावच्छेदकीभूतगुणत्वावच्छिन्न-व्यापकतावच्छेदकं न भवतीति अव्याप्तिः। तद्वारणाय व्यापकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। तन्निवेशे द्रव्यत्वं प्रति ज्ञानस्य विषयतासंबन्धेन व्यापकत्वेऽपि साध्यतावच्छेदक-समवायसंबन्धेन व्यापकत्वविरहात् ज्ञानत्वावच्छिन्नाभावस्य लक्षणाघटकतया द्रव्यत्वत्वावच्छिन्नाभावस्यैव लक्षणघटकतया तं प्रति गुणत्वावच्छिन्नाभावस्य व्यापकत्वात् तत्प्रतियोगिता-वच्छेदकं गुणत्वं हेतुतावच्छेदकगुणत्वावच्छिन्नव्यापकतावच्छेदकं भवतीति नाव्याप्तिरिति भावः।

गादाधरी

साध्याभावश्च साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगि-ताको ग्राह्यः। तेन संयोगादिना वह्न्यादिसाध्यकधूमादिहेतौ समवायादिसंबन्धावच्छिन्नवह्न्यभावं प्रति संयोगादिना धूमादेर-भावस्य अव्यापकत्वेऽपि न क्षतिः।

व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नाभावव्यापकव्य-धिकरणहेतुतावच्छेदकाद्यवच्छिन्नप्रतियोगिताकाभावमादाय अति-प्रसङ्गवारणाय सजातीयत्वोपादानम्।

व्यतिरेकिसाध्यकस्थले यावत्साध्याभावसजातीयाप्रसिद्ध्या एकैकतत्सजातीयत्वनिवेशनम्।

साजात्यघटकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वा-दिकम् अनुगतनिरुक्तभेदकूटरूपमेव ग्राह्यम्। अन्यथा यत्र भिन्न-

भिन्नसंबन्धेन साध्यहेतुभावः, तत्र साध्यतावच्छेदकसंबन्धावच्छिन्न-प्रतियोगिताकसाध्याभावस्य यादृशप्रतियोगितानिरूपकत्वं तस्यैव तद्वृत्तया सजातीयत्वेन तत्सजातीयाभावनिरूपितहेतुतावच्छेदक-संबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः सजातीयस्यापि साध्यताव-च्छेदकसंबन्धावच्छिन्नाभावस्य निवेशे हेतुव्यापकताया अपि तत्संबन्धघटिताया विवक्षणे उक्ताप्रसिद्धिनिबन्धनदोषासंभवेऽपि व्यापकीभूतस्येत्यादेः वैयर्थ्यस्य दुर्वारत्वात् । तत्त्यागे च चरम-लक्षण एव पर्यवसानात् ।

व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावसजा-तीयहेतुतावच्छेदकावच्छिन्नहेत्वाद्यभावमादाय अतिप्रसङ्गस्य वारणाय **व्यापकीभूतस्येति**। **व्यभिचारिणोऽभावस्य** व्यभिचार-निरूपकाधिकरणे साध्याभावाव्यापकत्वात् **न दोषः**।

विवरणम्

साध्याभावस्येति [पृ. 496] । साध्यव्यापकतावच्छेदक-रूपावच्छिन्नप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा 'वह्निमान् धूमात्' इत्यादौ साध्यव्याप-कतावच्छेदकं यत् वह्नित्वम्, तदवच्छिन्नसमवायसंबन्धावच्छिन्न-वह्निनिष्ठप्रतियोगिताकाभावस्यापि यावत्साध्याभावान्तर्गततया तं प्रति हेत्वभावस्य संयोगेन धूमाभावस्य व्यापकत्वं नास्ति समवायेन वह्न्यभाववति पर्वतादौ संयोगेन धूमस्य सत्त्वात् इत्यव्याप्तिः। हेत्वभावस्य साध्याभावव्यापकत्वे सत्येव तत्प्रतियोगितावच्छेदकं हेतुव्यापकतावच्छेदकं भवतीति लक्षणसमन्वयः कर्तुं शक्यते । हेतु-तावच्छेदके एव पारिभाषिकस्य प्रतियोगितावच्छेदकत्वस्य निवे-शात् । अतः उक्ताव्याप्तिवारणाय प्रतियोगितायां साध्यतावच्छेदक-संबन्धावच्छिन्नत्वं निवेशनीयम् । तन्निवेशे संयोगसंबन्धेन वह्न्यभा-वस्यैव लक्षणघटकत्वात् तं प्रति संयोगेन धूमाभावस्य व्यापकत्वात्

नाव्याप्तिः । तथा च साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकरूपावच्छिन्नसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावः साध्याभावपदेन विवक्षित इति सिद्धम् ।

सजातीयत्वविशेषणोपादानस्य प्रयोजनमाह - **व्यभिचारिणि** [पृ.496] इति । द्वितीयाभावे साध्याभावसजातीयत्वानुपादाने 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि धूमत्वावच्छिन्नधूमाभावव्यापकः व्यधिकरणवह्नित्वावच्छिन्नघटाभावोऽपि भवति । तत्प्रतियोगितावच्छेदकं वह्नित्वं हेतुतावच्छेदकवह्नित्वावच्छिन्नव्यापकतावच्छेदकमिति अतिव्याप्तिः । तद्वारणाय सजातीयत्वोपादानम् । तदुपादाने वह्नित्वेन घटाभावस्य धूमत्वेन धूमाभावसाजात्यं नास्ति । समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वविरहात् । अतः द्वितीयाभावपदेन वह्नित्वेन घटाभावः साजात्यविरहात् ग्रहीतुं न शक्यते । व्यापकत्वविरहात् वह्नित्वेन वह्न्यभावोऽपि ग्रहीतुं न शक्यते । धूमत्वेन धूमाभावस्य ग्रहीतुं शक्यत्वेऽपि तत्प्रतियोगितावच्छेदकस्य धूमत्वस्य वह्निव्यापकतावच्छेदकत्वविरहात् नातिव्याप्तिरिति भावः ।

प्रत्येकपदस्य प्रयोजनमाह - **व्यतिरेकिसाध्यकस्थले इति** [पृ.496] । यावत्साध्याभावसजातीयत्वस्य निवेशे व्यतिरेकिसाध्यके 'वह्निमान् धूमात्' इत्यादौ समानाधिकरणव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयावत्साध्याभावसाजात्यं कुत्रापि नास्ति इति अप्रसिद्ध्या अव्याप्तिः । तद्वारणाय प्रत्येकमिति विशेषणम् । एकैकसाध्याभावसजातीय इति तदर्थः । तथा च समानाधिकरणधर्मावच्छिन्नसाध्याभावसाजात्यं समानाधिकरणधर्मावच्छिन्नहेत्वभावे वर्तते । व्यधिकरणधर्मावच्छिन्नसाध्याभावसाजात्यं व्यधिकरणधर्मावच्छिन्नहेत्वभावे वर्तत इति नाप्रसिद्धिनिबन्धना अव्याप्तिरिति भावः ।

केवलान्वयिसाध्यकस्थले व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावानामेव साध्याभावपदेन ग्राह्यतया तादृशयावदभावसाजात्यं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन रूपेण व्यधिकरणधर्मावच्छिन्नहेत्वभावे प्रसिद्धयतीत्याशयेन व्यतिरेकिसाध्यकस्थले इत्युक्तम् ।

साजात्यघटकेति [पृ.496] । अत्र द्वितीयलक्षणे निविष्टं साजात्यं प्रथमलक्षणवत् समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्व - व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण विवक्षणीयम् । तत्र समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं नाम स्वासमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वरूपम् । व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं नाम स्वसमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वरूपम् । न तु यथाश्रुतं स्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकत्वं स्वव्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकत्वं वा । यत्र भिन्नभिन्नसंबन्धेन साध्यहेतुभावः, तत्र 'कालिकसंबन्धेन वह्निमान्, संयोगसंबन्धेन धूमात्' इत्यादौ साध्यतावच्छेदककालिकसंबन्धावच्छिन्नवह्नित्वावच्छिन्नवह्न्यभावसाजात्यं संयोगसंबन्धावच्छिन्नधूमाभावे नास्ति संबन्धभेदात् इत्यव्याप्तिः ।

न च—द्वितीयाभावः न हेतुतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकः विवक्षितः । किन्तु साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताक एव । तथा च कालिकसंबन्धेन धूमाभावस्यैव द्वितीयाभावपदेन ग्राह्यतया तस्य कालिकसंबन्धावच्छिन्नवह्न्यभावसाजात्यमस्तीति न दोष इति वाच्यम् ।

तथा सति हेतुव्यापकतायामपि साध्यतावच्छेदकसंबन्धावच्छिन्नत्वमेव निवेशनीयम् । अन्यथा 'महाकालभिन्नः घटात्' इत्यादौ कालिकसंबन्धेन हेतौ अतिव्याप्तेः । स्वरूपसंबन्धा-

वच्छिन्नमहाकालभेदाभावव्यापकः यः महाकालभेदाभावः तत्प्रतियोगितावच्छेदकस्य महाकालभेदत्वस्य कालिकसंबन्धघटितहेतुव्यापकतावच्छेदकत्वमस्ति । कालिकसंबन्धेन घटवति महाकाले कालिकसंबन्धेन महाकालभेदस्य सत्त्वात् । एवं च हेतुव्यापकतायामपि साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे व्यापकीभूतस्य इति विशेषणस्य वैयर्थ्यं स्यात् । 'धूमवान् वह्नेः' इत्यत्र धूमत्वावच्छिन्नधूमाभावसजातीयः यः वह्नित्वावच्छिन्नवह्न्यभावः तत्प्रतियोगितावच्छेदकस्य हेतुव्यापकतावच्छेदकत्वमस्ति इति प्रसक्तायाः अतिव्याप्तेर्वारणाय हि व्यापकीभूतस्य इति विशेषणं दत्तम् । यथाश्रुतसाजात्यविवक्षणे तु धूमत्वावच्छिन्नधूमाभावस्य यादृशं समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं धूमत्वावच्छिन्नप्रतियोगितानिरूपकत्वरूपं तादृशं वह्नित्वावच्छिन्नवह्न्यभावे नास्ति इति तस्य साध्याभावसाजात्यविरहेणैव तमादाय अतिव्याप्त्यप्रसक्तेः ।

एवं व्याप्यवृत्तेः इति विशेषणमपि व्यर्थम् । 'धूमवान् वह्नेः' इत्यत्र अयोगोलकादावपि उत्पत्तिकालावच्छेदेन वर्तमानं धूमाभावव्यापकं वह्न्यभावमादाय अतिव्याप्तिवारणार्थं हि तदुपात्तम् । वह्न्यभावस्य धूमाभावसाजात्यविरहादेव अतिव्याप्त्यप्रसक्तेः तद्व्यर्थम् ।

एवं यथाश्रुतसाजात्यविवक्षणे साध्याभावसाजात्यं साध्याभावस्यैव वर्तत इति सजातीयस्येत्यपि अनावश्यकम् । तथा च यावन्तः साध्याभावाः तत्प्रतियोगितावच्छेदकं यद्रूपावच्छिन्नव्यापकतावच्छेदकं तद्रूपावच्छिन्नत्वमेव लक्षणं स्यात् । न चेष्टापत्तिः । तृतीयलक्षणाभेदप्रसङ्गात् इति भावः ।

'व्यापकीभूतस्य' इति विशेषणस्य प्रयोजनमाह व्यभिचारिणीति [पृ.497] । 'धूमवान् वह्नेः' इत्यादौ धूमत्वावच्छिन्न-

धूमाभावसजातीयः वह्नित्वावच्छिन्नवह्न्यभावोऽपि भवति । स्वासमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वरूपस्य साजात्यस्य तत्र सत्त्वात् । तथा च वह्नित्वावच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकं वह्नित्वं वह्नित्वावच्छिन्नव्यापकतावच्छेदकमिति अतिव्याप्तिः स्यात् । तद्वारणाय **व्यापकीभूतस्येति** [पृ. 497] विशेषणम् । तद्विशेषणे सति वह्नित्वावच्छिन्नवह्न्यभावस्य धूमाभावव्यापकत्वं नास्ति । धूमाभाववति अयोगोलके वह्न्यभावस्य असत्त्वात् । अतः तस्य लक्षणाघटकतया न तमादाय अतिव्याप्तिः ।

व्यभिचारिणः अभावस्य इति [पृ.497] धूमव्यभिचारी यः वह्निः तदभावस्य इत्यर्थः । **व्यभिचारनिरूपकाधिकरणे इति** [पृ.497] । अयोगोलके इत्यर्थः । **न दोषः** [पृ.497] नातिव्याप्तिः ।

गादाधरी

व्यापकत्वपरिष्कारः

व्यापकत्वं च न तत्समानाधिकरणाभावाप्रतियोगित्वम् । सर्वस्यैव तादृशद्वित्वावच्छिन्नाभावप्रतियोगितया असंभवात् ।

न च - तदधिकरणवृत्तित्वं हेतुतावच्छेदकसंबन्धेन अवश्यं वाच्यम् । तथा च वह्न्याद्यभाववति धूमाद्यभावस्य धूमाद्यभावात्मकद्वित्वाद्यवच्छिन्नाभावस्य संयोगादिरूपहेतुतावच्छेदकसंबन्धेन अवृत्त्या न तमादाय दोषावसर इति वाच्यम् ।

एवमपि यत्र स्वरूपसंबन्धेन हेतुता तत्र तादृशाभावप्रतियोगितया हेत्वभावस्य व्यापकतानुपपत्तेः दुर्वारत्वात् ।

नापि तादृशाभावप्रतियोगितानवच्छेदकरूपवत्त्वम् । **अभावत्वाद्यात्मकतादृशरूपमादाय अभावमात्रस्यैव** व्यापकतया व्यापकत्वस्य **अव्यावर्तकत्वापत्तेः** ।

विवरणम्

अथ द्वितीयं व्यापकत्वं परिष्कर्तुम् आरभते - व्यापकत्वं चेत्यादिना [पृ.501] हेत्वभावे प्रविष्टं साध्याभावव्यापकत्वं न यथाश्रुतं साध्याभाववन्निष्ठाभावाप्रतियोगित्वरूपम् । वह्न्यभाववति ह्रदादौ धूमाभावघटोभयाभावस्य सत्त्वेन तत्प्रतियोगित्वात् धूमाभावस्य अप्रतियोगित्वरूपव्यापकत्वासंभवात् ।

न च - व्यापकताशरीरप्रविष्टं साध्याभावाधिकरणवृत्तित्वं हेतुतावच्छेदकसंबन्धेन अवश्यं वक्तव्यम् । अन्यथा 'वह्निमान् धूमात्' इत्यादौ धूमाभावस्य वह्न्यभावव्यापकत्वं न स्यात् । वह्न्यभाववति ह्रदादौ धूमात्मकस्य धूमाभावाभावस्य कालिकसंबन्धेन वर्तमानतया साध्याभाववन्निष्ठधूमात्मकाभाव-प्रतियोगित्वस्यैव धूमाभावे सत्त्वात् । हेतुतावच्छेदकसंबन्धेन इत्युक्तौ तु वह्न्यभाववति ह्रदे संयोगसंबन्धेन धूमात्मकः धूमाभावाभावः नास्ति । किन्तु शैवालात्मकः शैवालाभावाभावः अस्ति । तत्प्रतियोगित्वं शैवालाभावस्य । अप्रतियोगित्वं धूमाभावस्य इति तस्य व्यापकत्वोपपत्तिः । एवञ्च धूमाभाव - घटोभयाभावः साध्याभाववन्निष्ठाभावपदेन ग्रहीतुं न शक्यते । धूमानात्मकस्य तस्य स्वरूपसंबन्धेनैव वह्न्यभाववति ह्रदादौ वृत्तेः हेतुतावच्छेदकसंयोगसंबन्धेन अवृत्तित्वात् न उभयाभावमादाय हेत्वभावस्य अव्यापकत्वापत्तिरिति वाच्यम् ।

एवमपि यत्र स्वरूपसंबन्धेन हेतुता तत्र 'पर्वतः वन्हिमान्, धूमप्रकारकप्रमाविशेष्यत्वात्' इत्यादौ हेत्वभावस्य व्यापकत्वानुपपत्तेः । तथा हि—साध्याभाववति ह्रदादौ हेतुतावच्छेदकस्वरूपसंबन्धेन वर्तते यः अभावः धूमप्रकारकप्रमाविशेष्यत्वाभाव - घटोभयाभावः । तत्प्रतियोगित्वस्यैव हेत्वभावे धूमप्रकारकप्रमाविशेष्यत्वाभावे सत्त्वात् इति भावः ।

मापीति [पृ.501]। हेत्वभावस्य साध्याभावव्यापकत्वं साध्याभाववन्निष्ठाभावप्रतियोगितानवच्छेदकरूपवत्त्वम्। इदं तु धूमाभावेऽप्यस्त्येव। वह्न्यभाववन्निष्ठः यः अभावः धूमाभावघटोभयाभावः तत्प्रतियोगितावच्छेदकम् उभयत्वम्। अनवच्छेदकं धूमाभावत्वम्। तद्वत्त्वस्य धूमाभावे सत्त्वात् इत्यपि न वाच्यम्। व्यापकत्वविशेषणस्य वैयर्थ्यापत्तेः। 'धूमवान् वह्नेः' इत्यत्र वह्न्यभावव्यावर्तनाय हि व्यापकत्वविशेषणं दत्तम्। व्यापकत्वं यदि उक्तरूपं स्यात् तर्हि वह्न्यभावः व्यावर्तयितुं न शक्यते। तथा हि - साध्याभाववति - धूमाभाववति अयोगोलकादौ वर्तते यः अभावः इत्युक्ते अभावाभावः न भवति। अभावस्य केवलान्वयित्वात्। किन्तु घटाद्यभावः। तत्प्रतियोगितावच्छेदकं घटत्वादिकम्। प्रतियोगितानवच्छेदकम् अभावत्वम्। तद्वत्त्वस्य वह्न्यभावे सत्त्वात् इति भावः।

अभावत्वाद्यात्मकतादृशरूपमिति [पृ.501]। 'आदि'पदेन प्रमेयत्वं गृह्यते। अभावत्वादिरूपं साध्याभाववन्निष्ठाभावप्रतियोगितानवच्छेदकधर्ममादाय इत्यर्थः। **अभावमात्रस्यैव** [पृ. 501] इत्यत्र 'मात्र' पदं कृत्स्नार्थकम्। **अव्यावर्तकतापत्तेरिति** [पृ.501]। वह्न्यभावव्यावर्तकत्वानुपपत्तेरिति भावः।

गादाधरी

एवं वह्न्याद्यभाववति धूमावयवादौ समवायादिना वर्तमानधूमादिरूपमभावमादाय तदभावव्यापकताभङ्गभिया हेतुतावच्छेदकसंबन्धेन सामानाधिकरण्यस्य निवेशनीयतया 'सत्तावान् जातेः' इत्यादौ सत्त्वाद्यभाववति सामान्यादौ हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्ध्या अव्याप्तिश्चेति तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमेव साध्याभावव्यापकत्वम्। 'निर्धूमो वह्निशून्यत्वात्' इत्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं धूमादिमन्निष्ठभेदप्रतियो-

गितावच्छेदकत्वेऽपि अखण्डस्य निर्धूमत्वप्रकारकप्रमाविषयत्वाद्यभावस्य तादृशव्यापकतासंभवात्, तत्प्रतियोगितावच्छेदकावच्छिन्नस्य हेतुव्यापकतयैव लक्षणसमन्वयः ।

तद्वन्निष्ठत्वं देशिकविशेषणतया ग्राह्यम् । अतो वह्न्याद्यभाववति धूमाद्यभाववद्भेदस्य कालिकादिसंबन्धेन वृत्तावपि न क्षतिः ।

अभावाभावस्य प्रतियोगिरूपत्वेऽपि अभाववद्भेदोऽतिरिक्त एव । अतो धूमाद्यभाववति अयोगोलकादौ देशिकविशेषणतया वह्न्याद्यभाववद्भेदस्य वृत्तिः अव्याहतैवेति न वह्न्याद्यभावस्य धूमाद्यभावव्यापकतापत्तिः ।

अथ वा यदीयदेशिकविशेषणतासंबन्धसामान्ये तत्तत्साध्याभाववद्यत्किंचिद्व्यक्त्यनुयोगिकत्वाभावः तदन्यत्वमेव तदभावव्यापकत्वम् ।

अभावस्येति भावभिन्नस्येत्यर्थकम् । तेन 'धूमवान् जलत्वाभावात्' इत्यादौ जलत्वादिनिरूपितदेशिकविशेषणताया अप्रसिद्ध्या तत्र निरुक्तभेदकूटात्मकव्यापकतासत्त्वेऽपि नातिव्याप्तिः । **अभावरूपसद्धेतौ हेतुमत्त्वप्रकारक प्रमाविषयत्वाद्यभावप्रतियोगितावच्छेदकावच्छिन्नव्यापकतामादायैव लक्षणसमन्वयः** । 'धूमवान् वह्नेः' इत्यादौ अयोगोलकादावपि उत्पत्तिकालावच्छेदेन वर्तमानस्य वह्न्याद्यभावस्य निरुक्तव्यापकतासत्त्वादतिव्याप्तिः । अतो व्याप्यवृत्तेरिति ।

विवरणम्

यद्धर्मावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावत्वं साध्याभाववन्निष्ठाभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वं साध्याभावव्यापकत्वमित्युक्तौ तु नोक्तानुपपत्तिरित्यत आह - एवं **वह्न्याद्यभाववतीति** [पृ. 503] । 'वन्हिमान् धूमात्' इत्यादौ

वह्न्यभाववति ह्रदे कालिकसंबन्धेन धूमस्य, वह्न्यभाववति धूमावयवे समवायसंबन्धेन धूमस्य वर्तमानतया साध्याभाववन्निष्ठः यः धूमरूपोऽभावः तत्प्रतियोगित्वमेव धूमाभावेऽस्तीति हेत्वभावस्य व्यापकत्वानुपपत्तिः । तद्वारणाय पूर्वोक्तरीत्या व्यापकताघटकं साध्याभाववद्वृत्तित्वं हेतुतावच्छेदकसंबन्धावच्छिन्नं विवक्षणीयम् । तथा सति 'सत्तावान् जातेः' इत्यादौ साध्याभाववति सामान्यादौ हेतुतावच्छेदकसमवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धया तद्घटितव्यापकत्वघटितलक्षणाव्याप्तिः । तस्मादत्र साध्याभावव्यापकत्वं न अत्यन्ताभावगर्भम् । किन्तु साध्याभाववन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपमेव साध्याभावव्यापकत्वम् । 'वन्हिमान् धूमात्' इत्यादौ साध्याभाववति ह्रदादौ विद्यमानः अन्योन्याभावः न धूमाभाववद्भेदः । किन्तु शैवालाभाववद्भेदः । तत्प्रतियोगितावच्छेदकः शैवालाभावः, अनवच्छेदकः धूमाभाव इति धूमाभावस्य वह्न्यभावव्यापकत्वोपपत्तिरिति भावः ।

न च - अन्योन्याभावघटितव्यापकत्वविवक्षणेऽपि साध्याभाववन्निष्ठः यः धूमाभावघटोभयवद्भेदः तत्प्रतियोगितावच्छेदकत्वमेव धूमाभावेऽस्तीति कथं तस्य व्यापकत्वोपपत्तिः इति वाच्यम् । साध्याभाववन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वरूपस्य व्यापकत्वस्य विवक्षितत्वात् । धूमाभावघटोभयवद्भेदप्रतियोगितावच्छेदकतायाः धूमाभावघटोभयपर्याप्ततया केवलधूमाभावे तादृशभेदप्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वरूपस्य व्यापकत्वस्याक्षतत्वात् ।

ननु 'निर्धूमः वन्हिशून्यत्वात्' इत्यादौ हेत्वभावः वन्हिशून्यत्वाभावः वह्न्यात्मकः । तस्य निर्धूमत्वाभावव्यापकत्वं न निर्वहति । चालिनीन्यायेन सर्वेषामेव वह्नीनां निर्धूमत्वाभाववत्पर्वतादिनिष्ठभेदप्रतियोगितावच्छेदकत्वात् इत्याशङ्क्याह—

निर्धूम इत्यादिना। तत्र हेत्वभावस्य वह्नेः साध्याभावव्यापकत्वासंभवेऽपि निर्धूमत्वप्रकारकप्रमाविषयत्वाभावः साध्याभावव्यापको भवति। साध्याभाववति - निर्धूमत्वाभाववति पर्वतादौ निर्धूमत्वप्रकारकप्रमाविषयत्वाभावस्य सत्त्वेन तद्वद्भेदस्य असत्त्वात् भेदान्तरमादाय तत्प्रतियोगितानवच्छेदकत्वस्य निर्धूमत्वप्रकारकप्रमाविषयत्वाभावे सत्त्वात्। तथा च साध्याभावव्यापकः अभावः निर्धूमत्वप्रकारकप्रमाविषयत्वाभावः। तत्प्रतियोगितावच्छेदकं निर्धूमत्वप्रकारकप्रमाविषयत्वत्वम्। तत्तु हेतुव्यापकतावच्छेदकम्। यत्र यत्र वन्हिशून्यत्वं तत्र निर्धूमत्वप्रकारकप्रमाविषयत्वस्य सत्त्वात्। अतः लक्षणसमन्वयात् नाव्याप्तिरिति भावः।

तद्वन्निष्ठत्वमिति [पृ.504]। साध्याभाववन्निष्ठत्वं स्वरूपसंबन्धावच्छिन्नं विवक्षणीयम्। अन्यथा 'वन्हिमान् धूमात्' इत्यादौ वह्न्यभाववति ह्रदादौ धूमाभाववद्भेदस्य कालिकसंबन्धेन वृत्तेः तत्प्रतियोगितावच्छेदकत्वस्यैव धूमाभावे सत्त्वेन तस्य वह्न्यभावव्यापकत्वानुपपत्त्या अव्याप्त्यापत्तेः। स्वरूपसंबन्धावच्छिन्नत्वनिवेशे तु वह्न्यभाववति ह्रदादौ स्वरूपसंबन्धेन धूमाभाववद्भेदो नास्ति। तस्य धूमाभाववत्त्वात्। किन्तु शैवालाभाववद्भेद एव स्वरूपसंबन्धेन ह्रदादिवृत्तिः। तत्प्रतियोगितावच्छेदकत्वं शैवालाभावस्य, अनवच्छेदकत्वं धूमाभावस्येति तस्य व्यापकत्वोपपत्तिः।

ननु अभावाभावः यथा प्रतियोगिस्वरूपः, तथा अभाववद्भेदोऽपि अभावप्रतियोगिस्वरूपः। एवं च 'धूमवान् वह्नेः' इत्यादौ साध्याभाववति अयोगोलकादौ वह्न्यभाववद्भेदस्य वृत्तित्वेऽपि तस्य स्वरूपसंबन्धेन वृत्तित्वं नास्ति। वह्न्यभाववद्भेदस्य वन्हिस्वरूपस्य स्वरूपसंबन्धेन अवृत्तेः। भावपदार्थस्य स्वरूप-

संबन्धेन वृत्त्यनङ्गीकारात् । एवञ्च भेदान्तरमादाय तत्प्रतियोगितानवच्छेदकत्वरूपव्यापकत्वं वह्न्यभावस्य प्रसजति । तत्प्रतियोगितावच्छेदकं तु वह्नित्वं हेतुव्यापकतावच्छेदकमिति अतिव्याप्तिरित्याशङ्क्य अभावाभावस्य अभावप्रतियोगिस्वरूपत्वेऽपि अभाववद्भेदस्य तत्स्वरूपत्वं नास्ति । स तु अतिरिक्तः । तस्य च दैशिकविशेषणतासंबन्धेन सत्त्वम् । अतः साध्याभाववति अयोगोलके स्वरूपसंबन्धेन वर्तते यो भेदः वह्न्यभाववद्भेदः तत्प्रतियोगितावच्छेदकत्वमेव वह्न्यभावस्य अस्तीति न तस्य धूमाभावव्यापकत्वम् इति समाधत्ते—**अभावाभावस्येत्यादिना** [पृ.504]।

अभाववद्भेदस्य प्रतियोगिस्वरूपत्वेऽपि वह्न्यभावस्य धूमाभावव्यापकत्वं वारयितुमाह—**अथ वेति** [पृ.504] । यदभावीयदैशिकविशेषणतासंबन्धसामान्ये तत्तत्साध्याभाववद्व्यक्तिकिचिद्व्यक्त्यनुयोगिकत्वाभावः तदन्यत्वमेव साध्याभावव्यापकत्वम् । वह्न्यभावीयस्वरूपसंबन्धे धूमाभाववदयोगोलकानुयोगिकत्वाभावः अस्तीति तदन्यत्वस्य वह्न्यभावे विरहात् न तस्य व्यापकत्वम् । अतो नातिव्याप्तिः । 'वन्हिमान् धूमात्' इत्यादौ धूमाभावप्रतियोगिकस्वरूपसंबन्धे वह्न्यभाववद्ध्रदानुयोगिकत्वस्यैव सत्त्वेन तदभावासत्त्वात् यदभावपदेन धूमाभावः ग्रहीतुं न शक्यते, किन्तु शैवालाद्यभावः । तत्प्रतियोगिकस्वरूपसंबन्धे ह्रदानुयोगिकत्वाभावसत्त्वात् । तदन्यत्वं शैवालाभावान्यत्वं धूमाभावे अस्तीति तस्य व्यापकत्वोपपत्तिरिति भावः ।

अभावस्येति भावभिन्नस्येत्यर्थकमित्यादि [पृ.504]। 'साध्याभावसजातीयस्य अभावस्य' इत्यत्र अभावपदं भावभिन्नार्थकम् । अन्यथा 'धूमवान् जलत्वाभावात्' इत्यत्र व्यभिचारिणि अतिव्याप्तिः । धूमाभाववति अयोगोलके जलत्वाभावसत्त्वात् अयं हेतुः व्यभिचारी । साध्याभावव्यापकत्वं यदीयदैशिकविशेषणता-

संबन्धसामान्ये तत्तत्साध्याभाववद्वर्तिकिंचिद्वृत्त्यनुयोगिकत्वाभावः तत्तदन्यत्वमेव इति पूर्वं परिष्कृतम्। 'धूमवान् जलत्वाभावात्' इत्यत्र हेत्वभावः जलत्वाभावाभावः जलत्वात्मकः यत्पदेन ग्रहीतुं न शक्यते। तन्निरूपितदैशिकविशेषणतासंबन्धस्य अप्रसिद्धेः। अतः यत्पदेन घटाद्यभाव एव ग्राह्यः। तदन्यत्वरूपं साध्याभावव्यापकत्वं जलत्वात्मकेऽभावे अस्ति। तत्प्रतियोगितावच्छेदके जलत्वाभावत्वे हेतुतावच्छेदकजलत्वाभावत्वावच्छिन्नव्यापकतावच्छेदकत्वसत्त्वात् अतिव्याप्तिः। तद्वारणाय 'अभावस्य' इत्यस्य भावभिन्नस्येति अर्थो वक्तव्यः। उक्तस्थले हेत्वभावस्य जलत्वात्मकभावरूपतया लक्षणाघटकत्वात् नातिव्याप्तिरिति भावः।

ननु अभावरूपसद्धेतौ 'निर्धूमः निर्वह्नित्वात्' इत्यादौ हेत्वभावस्य वह्न्यभावाभावस्य भावरूपतया लक्षणघटकत्वाभावात् कथं समन्वय इत्यत्राह—**अभावरूपसद्धेताविति** [पृ.504]। तत्र हेतुमत्त्वप्रकारकप्रमाविषयत्वाभावः निर्वह्नित्वप्रकारकप्रमाविषयत्वाभावः भावभिन्नः साध्याभावव्यापकः। यत्र यत्र निर्धूमत्वाभावः तत्र निर्वह्नित्वप्रकारकप्रमाविषयत्वाभावस्य सत्त्वात्। तथा च तत्प्रतियोगितावच्छेदकं निर्वह्नित्वप्रकारकप्रमाविषयत्वत्वं वह्न्यभावत्वरूपहेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकं भवति। यत्र यत्र वह्न्यभावः तत्र तत्र निर्वह्नित्वप्रकारकप्रमाविषयत्वस्य सत्त्वात्। तद्वत्त्वस्य वह्न्यभावत्ववत्त्वस्य वह्न्यभावरूपहेतौ सत्त्वात् लक्षणसमन्वय इति भावः।

द्वितीयाभावे व्याप्यवृत्तेरिति विशेषणस्य प्रयोजनमाह—**धूमवान् वह्नेरित्यादाविति** [पृ.504]। 'धूमवान् वह्नेः' इत्यादौ साध्याभावस्य धूमाभावस्य व्यापकः वह्न्यभावः। धूमाभाववति अयोगोलकादावपि उत्पत्तिकालावच्छेदेन वह्न्यभावस्य सत्त्वात्। तथा च तत्प्रतियोगितावच्छेदकं वह्नित्वं हेतुव्यापकतावच्छेदकं भवतीति

अतिव्याप्तिः । तद्वारणाय व्याप्यवृत्तेरिति विशेषणम् । संयोगवत् संयोगेन द्रव्यस्यापि अव्याप्यवृत्तितया तदभावोऽपि अव्याप्यवृत्तिरिति वह्न्यभावस्य व्याप्यवृत्तित्वविरहात् लक्षणाघटकतया न तमादाय अतिव्याप्तिः ॥

गादाधरी

[व्याप्यवृत्तित्वस्य प्रयोजनं परिष्कारश्च]

यद्यपि तादृशाभावा अपि ह्रदादौ व्याप्यवृत्तयः, तथापि व्याप्यवृत्तित्वविशिष्टस्य व्यापकत्वं विवक्षणीयम् । अनवच्छिन्नविशेषणतासंबन्धेन व्यापकतानिवेशलाभायैव तदुक्तम् । **अवच्छिन्नवृत्तिकान्यत्वरूपं** व्याप्यवृत्तित्वं तु न शक्यते निवेशयितुम् । संयोगेन सद्धेतौ हेतुतावच्छेदकसंबन्धावच्छिन्नहेत्वभावस्य अतथात्वात् ।

विवरणम्

यद्यपीति [पृ. 509] । व्याप्यवृत्तित्वं हि अनवच्छिन्नवृत्तिकत्वम् । वह्न्यभावस्य अयोगोलकादौ उत्पत्तिकालावच्छिन्नवृत्तिकतया यद्यपि अनवच्छिन्नवृत्तिकत्वं नास्ति, तथापि वह्न्यभावः ह्रदादौ अनवच्छिन्नवृत्तिक एवेति व्याप्यवृत्तित्वविशेषणे दत्तेऽपि वह्न्यभावमादाय अतिव्याप्तिरिति शङ्का ।

समाधानं तु—व्याप्यवृत्तित्वविशिष्टस्य व्यापकत्वं विवक्षणीयम् । निरवच्छिन्नवृत्तित्वविशिष्टयदभावत्वावच्छिन्ननिरूपितदैशिकविशेषणतासामान्ये तत्तत्साध्याभाववद्व्यक्तिकिञ्चिद्वृत्त्यनुयोगिकत्वाभावः तदन्यत्वं साध्याभावव्यापकत्वमिति फलितोऽर्थः । संबन्धमध्ये निरवच्छिन्नवृत्तित्वलाभायैव अभावे व्याप्यवृत्तित्वमुक्तम् । तथा च 'धूमवान् वह्नेः' इत्यत्र निरवच्छिन्नवृत्तित्वविशिष्टवह्न्यभावत्वावच्छिन्ननिरूपितदैशिकविशेषणतायां साध्याभाववदयोगोलकानुयोगिकत्वाभावः वर्तते । अयोगोलके उत्पत्ति—

कालावच्छिन्नवृत्तित्वविशिष्टस्यैव वह्न्यभावस्य दैशिकविशेषणतासंबन्धेन सत्त्वात्। तथा च यदभावपदेन वह्न्यभावस्यापि ग्रहीतुं शक्यतया तदन्यत्वरूपं व्यापकत्वं वह्न्यभावस्य नास्तीति न तमादाय अतिव्याप्तिरिति भावः।

ननु किमनेन क्लेशेन। अवच्छिन्नवृत्तिकान्यत्वरूपं व्याप्यवृत्तित्वमेव निवेश्यताम्। तावतापि वह्न्यभावस्य व्यावृत्तिसंभवात् इति अत आह—**अवच्छिन्नवृत्तिकान्यत्वरूपमिति** [पृ. 509]। संयोगसंबन्धेन सद्धेतौ 'वन्हिमान् धूमात्' इत्यादौ हेतुतावच्छेदकसंबन्धावच्छिन्नहेत्वभावस्य-संयोगसंबन्धेन धूमाभावस्य पर्वतादौ उत्पत्तिकालावच्छिन्नवृत्तिकस्य अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वविरहात् लक्षणाघटकतया अव्याप्तिः स्यादिति अवच्छिन्नवृत्तिकान्यत्वरूपं व्याप्यवृत्तित्वं न निवेशयितुं शक्यत इति भावः।

गादाधरी

प्रतियोगितावच्छेदकेत्यत्र प्रतियोगिता हेतुतावच्छेदकसंबन्धावच्छिन्ना ग्राह्या। अन्यथा व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकहेत्वभावस्य साध्याभावव्यापकस्य समनियताभावैक्यमते व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावरूपतया समानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वेन तमादाय अतिव्याप्तिविरहेऽपि आत्मत्वादिसाध्यके विषयतया हेतौ ज्ञानादौ साध्याभावव्यापकसमवायसंबन्धावच्छिन्नज्ञानाद्यभावमादाय अतिव्याप्तेः।

विवरणम्

व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकं यद्धर्मावच्छिन्नव्यापकतावच्छेदकम् इत्यत्र प्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशयति—**प्रतियोगितावच्छेदकेत्यत्रेत्यादिना**

[पृ. 510]। तथा च प्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशे 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः। दैशिकविशेषणतादि व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावस्य केवलान्वयिनः धूमाभावव्यापकतया तत्प्रतियोगितावच्छेदकवह्नित्वे हेतुव्यापकतावच्छेदकत्वसत्त्वात्। प्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु संयोगसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावस्यैव ग्राह्यतया तस्य साध्याभावव्यापकत्वविरहात् लक्षणाघटकतया नातिव्याप्तिः।

न च व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावस्य व्यधिकरणवह्नित्वरूपधर्मावच्छिन्नप्रतियोगिताकघटाभावसमनियततया ऐक्येन व्यधिकरणसंबन्धावच्छिन्नवह्न्यभावस्यापि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वात् स्वव्यधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वरूपस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वस्य विरहात् तेन रूपेण साध्याभावसाजात्यं नास्तीति कथं तस्य लक्षणघटकत्वप्रसक्तिः? कथं च तमादाय अतिव्याप्तिरिति—वाच्यम्। एवमपि समवायसंबन्धेन आत्मत्वसाध्यके विषयतासंबन्धेन हेतौ ज्ञाने अतिव्याप्तिः। साध्याभावं आत्मत्वत्वेन आत्मत्वाभावं प्रति समवायसंबन्धावच्छिन्नज्ञानाभावस्य व्यापकतया तस्य लक्षणघटकत्वेन तत्प्रतियोगितावच्छेदके ज्ञानत्वे हेतुव्यापकतावच्छेदकत्वसत्त्वात्। तद्वारणाय प्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। तथा सति समवायसंबन्धावच्छिन्नज्ञानाभावस्य लक्षणाघटकतया विषयतासंबन्धावच्छिन्नज्ञानाभावस्य च साध्याभावव्यापकत्वविरहात् नातिव्याप्तिः।

गादाधरी

अभावे हेतुतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकत्व-विशेषणं प्रवेश्य च नातिप्रसङ्गवारणसंभवः। समनियताभावैक्ये

समवायसंबन्धावच्छिन्नज्ञानाद्यभावस्यापि स्वसमवायिविषयकत्व-संबन्धेन ज्ञानादिविशिष्टज्ञानादेः विषयतासंबन्धावच्छिन्नाभाव-समनियतत्वेन तादृशसंबन्धावच्छिन्नप्रतियोगिताकत्वात् । धूमा-द्यभावव्यापकमहानसीयवह्न्यभावप्रतियोगिनो वह्नित्वादिना वह्नित्वाद्यवच्छिन्नव्यापकत्वात् अतिप्रसङ्ग इति प्रतियोगिनो व्यापकतामुपेक्ष्य प्रतियोगितावच्छेदकस्य तदवच्छेदकत्वपर्यन्ता-नुधावनम् ।

विवरणम्

ननु द्वितीयाभावे हेतुतावच्छेदकसंबन्धावच्छिन्नप्रतियोगि-ताकत्वरूपं विशेषणं निवेश्यापि आत्मत्वसाध्यकस्थले समवाय-संबन्धावच्छिन्नज्ञानाभावस्य व्यावर्तनसंभवात् अभावनिरूपित-प्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वविशेषणं मास्तु इत्यत आह—**अभावे** [पृ. 511] **इत्यादिना** । समनियताभावै-क्यमते समवायसंबन्धावच्छिन्नज्ञानाभावः स्वसमवायिविषयकत्व-संबन्धेन ज्ञानविशिष्टज्ञानस्य विषयतासंबन्धावच्छिन्नाभावश्च समनियततया अभिन्नौ । यत्र यत्र समवायसंबन्धेन ज्ञानाभावः घटादौ तत्र सर्वत्र स्वसमवायिविषयकत्वसंबन्धेन ज्ञानविशिष्ट-ज्ञानं विषयतासंबन्धेन नास्ति । स्वं—ज्ञानम् । स्वसमवायी—आत्मा । तद्विषयकत्वसंबन्धेत ज्ञानविशिष्टज्ञानं आत्मविषयक-ज्ञानमेव । तत्तु विषयतासंबन्धेन आत्मन्येव वर्तते न तु घटादौ । तथा च उभयोरभावयोः समनियतत्वात् एकत्वे सति यथा ज्ञान-विशिष्टज्ञानाभावस्य विषयतासंबन्धावच्छिन्नप्रतियोगिताकत्वम्, तथा समवायसंबन्धावच्छिन्नज्ञानाभावस्यापि विषयतारूपहेतुता-वच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकत्वात् लक्षणघटकत्वापत्त्या अतिव्याप्तिः ।

न च—प्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वोक्तावपि समवायसंबन्धावच्छिन्नज्ञानाभावीयप्रतियोगितायां विषयतासंबन्धावच्छिन्नत्वसत्त्वात् अतिव्याप्तितादवस्थ्यम् इति-वाच्यम् ।

समनियताभावैक्यमते अभावयोः ऐक्येऽपि तन्निरूपितप्रतियोगितयोः भेदः स्वीक्रियते । समवायसंबन्धावच्छिन्नज्ञानाभावनिरूपितायां स्वसमवायिविषयकत्वसंबन्धेन ज्ञानविशिष्टज्ञाननिष्ठायां प्रतियोगितायामेव विषयतासंबन्धावच्छिन्नत्वमस्ति । तदवच्छेदकं तु ज्ञानविशिष्टज्ञानत्वमेव । तत्तु न हेतुव्यापकतावच्छेदकम् । हेतोः ज्ञानस्य विषयतासंबन्धेन घटादावपि सत्त्वात् तत्र आत्मैकविषयकस्य उक्तविशिष्टज्ञानस्य विषयतासंबन्धेन विरहात् । अतः नातिव्याप्तिरित्याशयात् ।

ननु साध्याभावव्यापकाभावप्रतियोगिनि हेतुतावच्छेदकावच्छिन्नव्यापकत्वमेव निवेश्यताम् । लाघवात् । किं साध्याभावव्यापकाभावप्रतियोगितावच्छेदके हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वनिवेशेन इत्याशङ्क्य तथा निवेशे 'धूमवान् वह्नेः' इत्यत्र धूमाभावव्यापकः यः महानसीयवह्न्यभावः तत्प्रतियोगिनः महानसीयवह्नेः वह्नित्वेन रूपेण वह्निव्यापकत्वमस्तीत्यतिव्याप्तिः। अतः प्रतियोगितावच्छेदके हेतुव्यापकतावच्छेदकत्वं निवेशितम् । तन्निवेशे महानसीयवह्न्यभावप्रतियोगितावच्छेदकस्य महानसीयवह्नित्वस्य वह्नित्वावच्छिन्नाधिकरणपर्वतवृत्तिः यः महानसीयवह्न्यभावः तत्प्रतियोगितावच्छेदकत्वात् वह्नित्वावच्छिन्नाधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकत्वरूपं व्यापकतावच्छेदकत्वं नास्तीति नातिव्याप्तिरिति समाधत्ते—**धूमाद्यभावव्यापकेत्यादिना** [पृ. 512] ।

गादाधरी

'द्रव्यं विशिष्टसत्त्वात्' इत्यादौ साध्याभावव्यापकाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वादेः हेतुतावच्छेदकोपलक्षितहेतुव्यापकत्वासंभवात् 'यं प्रती' त्यनुक्त्वा 'यद्रूपावच्छिन्नं प्रति' इत्युक्तम् ।

विवरणम्

'यं प्रति' इत्यनुक्त्वा 'यद्रूपावच्छिन्नं प्रति' इति उक्तेः प्रयोजनमाह—**द्रव्यं विशिष्टसत्त्वात्** [पृ. 514] इति। तथा च साध्याभावव्यापकाभावप्रतियोगितावच्छेदके हेतुतावच्छेदकावच्छिन्नहेतुव्यापकतावच्छेदकत्वमनिवेश्य हेतुतावच्छेदकोपलक्षितहेतुव्यापकतावच्छेदकत्वं यदि निवेश्यते, तदा 'इदं द्रव्यम्, गुणकर्मान्यत्वविशिष्टसत्त्वात्' इत्यत्र अव्याप्तिः। साध्याभावस्य द्रव्यत्वत्वेन द्रव्यत्वाभावस्य व्यापकः यः अभावः गुणकर्मान्यत्वविशिष्टसत्ताभावः तत्प्रतियोगितावच्छेदकं गुणकर्मान्यत्वविशिष्टसत्तात्वं हेतुव्यापकतावच्छेदकं न भवति। हेतोः सत्तायाः अधिकरणे गुणादौ वर्तमानः यः गुणकर्मान्यत्वविशिष्टसत्ताभावः तत्प्रतियोगितावच्छेदकत्वात् इति अव्याप्तिः। तद्वारणाय हेतुतावच्छेदकावच्छिन्नेत्युक्तम्। तदुक्तौ च गुणकर्मान्यत्वविशिष्टसत्तात्वरूपहेतुतावच्छेदकावच्छिन्नाधिकरणं द्रव्यमेव न गुणः। तद्वृत्तिः अभावः न गुणकर्मान्यत्वविशिष्टसत्ताभावः। किन्तु गुणत्वाद्यभावः। तत्प्रतियोगितानवच्छेदकत्वं गुणकर्मान्यत्वविशिष्टसत्तात्वेऽस्तीति तस्य हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वात् नाव्याप्तिः इति भावः।

गादाधरी

व्यापकता च हेतुतावच्छेदकसंबन्धेन ग्राह्या। अतो 'महाकालभिन्नः कालत्वात्' इत्यादौ साध्याभावव्यापकाभावप्रतियोगितावच्छेदकस्य साध्यतावच्छेदकादेः कालिकादिसंबन्धेन हेतुव्या-

पकतायाम् अवच्छेदकत्वेऽपि नातिप्रसङ्गः। व्यापकतावच्छेदकताघटकसंबन्धभेदनिवेशनादिकं **स्वयमूह्यम्**।

विवरणम्

हेतुतावच्छेदकावच्छिन्नव्यापकतायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशयति—**व्यापकता चेत्यादिना** [पृ. 514]। 'महाकालभिन्नः कालत्वात्' इत्यत्र व्यभिचारिणि साध्याभावस्य महाकालभेदाभावस्य व्यापकः अभावः महाकालभेदाभावः महाकालभेदप्रकारकप्रमाविशेष्यत्वाभावो वा। तत्प्रतियोगितावच्छेदकं महाकालभेदत्वं महाकालभेदप्रकारकप्रमाविशेष्यत्ववत्त्वं च कालत्वरूपहेतुव्यापकतावच्छेदकम्। कालत्ववति महाकाले महाकालभेदादेः कालिकसंबन्धेन सत्त्वात् महाकालभेदादिनिष्ठायां कालिकसंबन्धावच्छिन्नायां हेतुव्यापकतायां महाकालभेदत्वादेः अवच्छेदकत्वात् इति अतिव्याप्तिः। तद्वारणाय हेतुव्यापकतायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। तथा सति महाकालभेदादेः हेतुतावच्छेदकस्वरूपसंबन्धेन कालत्वव्यापकत्वं नास्ति। महाकाले स्वरूपसंबन्धेन महाकालभेदस्य विरहात्। अतः महाकालभेदत्वादेः हेतुतावच्छेदकसंबन्धावच्छिन्नव्यापकतावच्छेदकत्वविरहात् नातिव्याप्तिरिति भावः।

स्वयमूह्यमिति [पृ. 515]। 'ज्ञानवान् द्रव्यत्वात्' इत्यादौ साध्याभावव्यापकः यः विषयितासंबन्धेन द्रव्यत्वत्वविशिष्टज्ञानाभावः तन्निरूपितप्रतियोगितायां विषयितासंबन्धेन अवच्छेदकस्य द्रव्यत्वत्वस्य द्रव्यत्वरूपहेतुव्यापकतावच्छेदकत्वात् अतिव्याप्तिः। तद्वारणाय साध्याभावव्यापकस्य अभावस्य प्रतियोगितावच्छेदकम् इत्यत्र अवच्छेदकतायां हेतुतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। 'धूमवान् वह्नेः' इत्यादौ धूमाभावव्यापकधूमाभावप्रतियोगितावच्छेदकस्य धूमत्वस्य कालिकसंबन्धेन वह्निव्या-

पकतावच्छेदकत्वमस्ति। वन्हिमति अयोगोलकादौ कालिक-संबन्धेन धूमत्ववतः वह्नेः सत्त्वात् इति अतिव्याप्तिः। तद्वारणाय हेतुव्यापकतावच्छेदकतायां हेतुतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् इत्यादिकम् ऊहनीयम् इत्यर्थः।

गादाधरी

न च धूमवान् वन्हिमत्वप्रकारकप्रमाविषयत्वादित्यादौ अतिव्याप्तिः। धूमाद्यभावव्यापकधूमाद्यभावस्य प्रतियोगितावच्छेदकजलादिवृत्तित्वविशिष्टधूमाभावाभावत्वादेः हेतुतावच्छेदकस्वरूपसंबन्धघटितव्यापकतावच्छेदकत्वात् इति-वाच्यम्। भाववृत्ति प्रतियोगितावच्छेदकस्य व्यापकतावच्छेदकताया विवक्षणीयत्वात्।

विवरणम्

न च धूमवान् इत्यादि [पृ. 516]। 'पर्वतः धूमवान् वह्निमत्वप्रकारकप्रमाविशेष्यत्वात्' इत्यत्र व्यभिचारिणि धूमाभावव्यापकः धूमाभावः तत्प्रतियोगितावच्छेदकं यथा धूमत्वं तद्वत् जलवृत्तित्वविशिष्टधूमाभावाभावत्वमपि। तद्धि जलवृत्तित्वविशिष्टधूमाभावाभावाभावप्रतियोगितावच्छेदकम्। स च तृतीयोऽभावः जलवृत्तित्वविशिष्टधूमाभावस्वरूपः। विशिष्टशुद्धयोरनतिरेकात् केवलधूमाभावस्वरूपोऽपि। तथा च धूमाभावप्रतियोगितावच्छेदकं जलवृत्तित्वविशिष्टधूमाभावाभावत्वम्। तत् हेतुतावच्छेदकस्वरूपसंबन्धावच्छिन्नहेतुव्यापकतायां अवच्छेदकम्। वन्हिमत्वप्रकारकप्रमाविषयत्वरूपहेतुमति अयोगोलके स्वरूपसंबन्धेन जलवृत्तित्वविशिष्टधूमाभावाभावस्य सत्त्वात् सः अभावः स्वरूपसंबन्धेन हेतुव्यापकः। तन्निष्ठं जलवृत्तित्वविशिष्टधूमाभावाभावत्वं हेतुव्यापकतावच्छेदकमिति अतिव्याप्तिः इति आशङ्कितुः आशयः।

तत्समाधानं तु—प्रतियोगितावच्छेदके भाववृत्तित्वं निवेश्यते । जलवृत्तित्वविशिष्टधूमाभावाभावत्वस्य धूमाभावप्रतियोगितावच्छेदकत्वेऽपि भाववृत्तित्वं नास्ति । अतः भाववृत्तिधूमाभावप्रतियोगितावच्छेदकं धूमत्वमेव । तत्तु न हेतुव्यापकतावच्छेदकमिति नातिव्याप्तिरिति भावः । एवं च यावन्तः व्याप्यवृत्तयः साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठात्यन्ताभावनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानिरूपितसाध्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताशून्यरूपावच्छिन्नसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाः अभावाः' एकैकतत्सजातीयः यः तत्तदभाववन्निरूपितस्वरूपसंबन्धावच्छिन्नवृत्तित्वाश्रयान्योन्याभावप्रतियोगितानवच्छेदकः व्याप्यवृत्तिः भावभिन्नः तन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानिरूपितहेतुतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नावच्छेदकत्वाश्रयभाववृत्तिधर्मः यद्धर्मावच्छिन्नाधिकरणनिष्ठात्यन्ताभावनिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानिरूपितहेतुतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताभाववान् तद्धर्मवत्त्वं व्याप्तिरिति मिश्रोक्तद्वितीयलक्षणविष्कर्षः ।

दीधितिः

साधनस्य तादृशव्यापकाभावप्रतियोगित्वं, तदवच्छेदकत्वं वा साधनतावच्छेदकस्य इति तु न वाच्यम् । 'द्रव्यं सत्त्वात्' इत्यादौ सत्त्वादेः तादृशाभावव्यापकगुणकर्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वादतिव्याप्तेः । 'ज्ञेयं प्रमेयात्' इत्यादौ प्रमेयत्वादेः तादृशप्रतियोगितानवच्छेदकत्वात् अव्याप्तेश्च । प्रमेयत्वव्यधिकरणप्रतियोगित्वाप्रसिद्धेः ।

गादाधरी

[यथाश्रुतमिश्रलक्षणदूषणम्]

यथाश्रुतमिश्रलक्षणमुपन्यस्य दूषयति—**साधनस्येति** । **तादृशेति** । ये ये साध्याभावाः प्रसिद्धाः तत्तत्सजातीयतत्तद्व्यापके-त्यर्थः । **तदवच्छेदकत्वम्**—तादृशप्रतियोगितावच्छेदकत्वम् । आद्ये द्रव्यं सत्त्वादित्यादाविति । द्वितीये ज्ञेयं प्रमेयादित्यादाविति ।

ननु **प्रमेयत्वादेः केवलान्वयितावच्छेदकत्वेऽपि** वाच्यत्व-त्वादेरिव साध्याभावव्यापकव्यधिकरणधर्मावच्छिन्नाभावप्रति-योगितावच्छेदकत्वम् अक्षतमेव इत्याशङ्कां निरस्यति—**प्रमेयत्व-व्यधिकरणेति** [पृ. 517] । **प्रमेयत्वस्य केवलान्वयित्वात्** इति भावः । **धूमाद्यभावं प्रति** विषयितादिसंबन्धेन वह्नित्वाद्यवच्छिन्नस्य यः अभावः तस्य व्यापकत्वात् तमादाय, समवायेन आत्मत्वे साध्ये समवायेन द्रव्यत्वे हेतौ आत्मत्वाभावं प्रति विषयितासंबन्धेन द्रव्य-त्वत्ववज्ज्ञानस्य यः समवायसंबन्धावच्छिन्नप्रतियोगिताकोऽभावः तस्य व्यापकत्वात् तमादाय अतिप्रसङ्गस्य वारणाय च प्रतियोगि-तावच्छेदकतायां हेतुतावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्य अवश्यं निवेशनीयतया व्यधिकरणसमवायादिसंबन्धेन प्रमेयत्वस्य अभाव-प्रतियोगितायाम् असमानाधिकरणतया अवच्छेदकत्वसंभवेऽपि न निस्तार इत्यवधेयम् ।

विवरणम्

यथाश्रुतमिश्रलक्षणमिति [पृ. 518] । यावन्तः तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्य-वृत्तेरभावस्य प्रतियोगित्वं व्याप्तिरिति वा, तादृशाभावस्य प्रतियोगितावच्छेदकं यत् हेतुतावच्छेदकं तद्वत्त्वं व्याप्तिः इति वा यथाश्रुतं लक्षणम् ।

तत्र प्रथमलक्षणस्य 'द्रव्यं सत्त्वात्' इत्यत्र अतिव्याप्तिः । द्रव्यत्वाभावव्यापकः यः गुणकर्मान्यत्वविशिष्टसत्ताभावः तत्प्रति-

योगित्वस्य सत्तारूपहेतौ सत्त्वात् । द्वितीयलक्षणस्य 'ज्ञेयं प्रमेयात्' इत्यत्र अव्याप्तिः । साध्याभावव्यापकाभावप्रतियोगितावच्छेदकत्वस्य प्रमेयत्वरूपहेतुतावच्छेदकेऽभावात् इति भावः ।

ननु प्रमेयत्वादेः केवलान्वयितावच्छेदकत्वेऽपीति [पृ. 518] । यथा वाच्यत्वस्य केवलान्वयित्वेऽपि वाच्यत्ववृत्तिवाच्यत्वत्वं न केवलान्वयि, अपि तु केवलान्वयितावच्छेदकम्, अत एव वाच्यत्वत्वव्यधिकरणप्रतियोगिताकः वाच्यत्वत्वेन घटाभावः प्रसिद्ध्यति, तद्वत् प्रमेयत्वस्य केवलान्वयिप्रमेयवृत्तितया केवलान्वयितावच्छेदकत्वात् तद्व्यधिकरणप्रतियोगिताकः प्रमेयत्वेन घटाद्यभावः प्रसिद्ध्यति; तत्प्रतियोगितावच्छेदकत्वं प्रमेयत्वस्य अक्षतमेव इत्याशङ्कां निरस्यतीत्यर्थः । **प्रमेयत्वस्य केवलान्वयित्वादिति** [पृ. 518] । वाच्यत्वत्वं वाच्यत्वमात्रवृत्तितया केवलान्वयितावच्छेदकमेव । न तु केवलान्वयि । प्रमेयत्वं तु सकलप्रमेयवृत्तितया केवलान्वय्यपि भवति । अतः प्रमेयत्वस्य यत्किंचिदभावप्रतियोगिताव्यधिकरणत्वं न संभवतीति प्रमेयत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या हेतुतावच्छेदकस्य प्रमेयत्वस्य साध्याभावव्यापकाभावप्रतियोगितावच्छेदकत्वं नास्तीति अव्याप्तिः इति भावः ।

ननु व्यधिकरणसमवायसंबन्धावच्छिन्नप्रमेयत्वनिष्ठावच्छेदकताकप्रतियोगिताकः 'समवायेन प्रमेयत्ववान् नास्ति' इति प्रतीतिसिद्धः प्रमेयत्वावच्छिन्नप्रतियोगिताकः प्रसिद्ध एव । तत्प्रतियोगितावच्छेदकं हेतुतावच्छेदकं प्रमेयत्वम् । तद्वत्त्वस्य हेतौ सत्त्वान् नाव्याप्तिरित्याशङ्क्याह—**धूमाद्यभावं प्रतीत्यादिना** [पृ. 518] । साध्याभावव्यापकाभावप्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वमिति व्याप्तौ प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वम् अवश्यं निवेशनीयम् । अन्यथा 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः । धूमत्वेन धूमाभावं प्रति

व्यापकः अभावः विषयितासंबन्धेन वह्नित्ववज्ज्ञानस्य संयोगसंबन्धेन अभावः । तत्प्रतियोगितायां वह्नित्वरूपं हेतुतावच्छेदकं अवच्छेदकं भवतीति अतिव्याप्तिः ।

एवं 'समवायेन आत्मत्ववान्, समवायेन द्रव्यत्वात्' इत्यत्र व्यभिचारिणि आत्मत्वाभावं प्रति विषयितासंबन्धेन द्रव्यत्वत्व-वज्ज्ञानस्य समवायसंबन्धेन अभावः व्यापकः । तत्प्रतियोगिता-वच्छेदकं द्रव्यत्वत्वरूपं हेतुतावच्छेदकं भवतीति अतिव्याप्तिः । तद्वारणाय प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकतावच्छेदक-संबन्धावच्छिन्नत्वं निवेशनीयम् । तन्निवेशे उक्तस्थलयोः वह्नि-त्वस्य द्रव्यत्वत्वस्य च उक्ताभावीयप्रतियोगितायां विषयिता-संबन्धेन अवच्छेदकत्वेऽपि हेतुतावच्छेदकतावच्छेदकसमवायसंबन्धेन अवच्छेदकत्वविरहात् नातिव्याप्तिः । एवं च 'ज्ञेयं प्रमेयात्' इत्यत्र साध्याभावव्यापकाभावपदेन समवायसंबन्धावच्छिन्नप्रमेय-त्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावस्य ग्रहणेऽपि तदीयप्रति-योगितायां प्रमेयत्वस्य समवायसंबन्धेन अवच्छेदकत्वेऽपि हेतुता-वच्छेदकतावच्छेदकस्वरूपसंबन्धेन अवच्छेदकत्वविरहात् अव्याप्तिः यथाश्रुतलक्षणे दुर्वारा इति भावः ।

गादाधरी

अन्योन्याभाव एव व्यधिकरणधर्मावच्छिन्नावच्छेदकताकः, न तु अत्यन्ताभाव इत्याशयेनेदम् । अन्यथा घटत्वावच्छिन्नप्रमेय-त्वावच्छिन्नप्रतियोगिताकात्यन्ताभावमादाय लक्षणगमनसंभवात् ।

एतदुपलक्षणम् । गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे कम्बुग्रीवादिमत्त्वाद्यवच्छिन्नहेतुकाव्याप्तिरपि द्रष्टव्या ।

एतेन व्यापकीभूताभावप्रतियोगितायां हेतुतावच्छेदकान-वच्छिन्नत्वव्यधिकरणधर्मानवच्छिन्नत्वोभयाभावविवक्षणे प्रमेयहेतु-कस्थले वाच्यत्वत्वादिना घटाद्यभावप्रतियोगितायां तादृशोभया-

भावसत्त्वेन लक्षणसमन्वयेऽपि न विस्तारः। उक्तस्थले हेतुतावच्छेदकावच्छिन्नत्वाप्रसिद्धया अप्रतीकारात्।

विवरणम्

ननु प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशेऽपि 'ज्ञेयं प्रमेयात्' इत्यत्र नाव्याप्तिः। साध्याभावस्य ज्ञेयत्ववत्त्वेन घटाभावस्य व्यापकः यः अभावः इत्यनेन घटत्वरूपव्यधिकरणधर्मावच्छिन्नप्रमेयत्वनिष्ठस्वरूपसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकात्यन्ताभावः 'घटत्वेन प्रमेयत्ववान् नास्ति' इति प्रतीतिसिद्धः गृह्यते। तत्प्रतियोगितानिरूपितहेतुतावच्छेदकतावच्छेदकस्वरूपसंबन्धावच्छिन्नावच्छेदकत्वं प्रमेयस्वरूपस्य हेतुतावच्छेदकस्य अस्तीति नाव्याप्तिरिति आशङ्क्य सिद्धान्ते व्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकान्योन्याभाव एव स्वीक्रियते, न तु तादृशात्यन्ताभाव इत्याशयेन यथाश्रुतलक्षणे दीधितिकारैरव्याप्तिरुक्ता। अन्यथा यथाश्रुतमेव साधु इति समाधत्ते—**अन्योन्याभाव एवेति** [पृ. 584]।

एतदुपलक्षणमिति [पृ. 584]। 'ज्ञेयं प्रमेयात्' इत्यत्र अव्याप्तिकथनं वक्ष्यमाणाव्याप्तेरपि प्रदर्शकम्। तथा हि—लघुधर्मसमनियतस्य गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वं नास्तीति मते यथाश्रुतमिश्रलक्षणस्य गुरुधर्मावच्छिन्नहेतुकसद्धेताव्याप्तिः। यथा 'इदं द्रव्यं कम्बुग्रीवादिमत्' इत्यत्र कम्बुग्रीवादिमदभावस्य साध्याभावव्यापकत्वेऽपि तत्प्रतियोगितावच्छेदकत्वं लघुधर्मस्य घटत्वस्यैव वर्तते। हेतुतावच्छेदकस्य गुरुधर्मस्य कम्बुग्रीवादिमत्त्वस्य प्रतियोगितावच्छेदकत्वं नास्तीति अव्याप्तिः। कम्बुग्रीवादिमत्त्वं घटत्वव्यञ्जकसंस्थानविशेषः। तत् घटत्वापेक्षया गुरु। संस्थानस्य विजातीयावयवसंयोगरूपस्य अनन्तत्वात् अनुगमकजातिविशेषसापेक्षत्वाच्च। घटत्वं तु एकं जातिरूपं

च न धर्मान्तरमपेक्षते । स्वरूपत एव अवच्छेदकत्वसंभवात् इति भावः ।

एतेनेति [पृ. 521] गुरुधर्मावच्छिन्नहेतुकस्थले अव्याप्तेरित्यर्थः । यद्यपि साध्याभावव्यापकीभूताभावप्रतियोगितायां हेतुतावच्छेदकानवच्छिन्नत्व-व्यधिकरणधर्मानवच्छिन्नत्वोभयाभावविवक्षणे 'ज्ञेयं प्रमेयात्' इत्यत्र अव्याप्तिर्वारयितुं शक्यते । साध्याभावव्यापकः यः वाच्यत्ववत्त्वेन घटाभावः तदीयप्रतियोगितायां हेतुतावच्छेदकप्रमेयत्वानवच्छिन्नत्वस्य सत्त्वेऽपि व्यधिकरणधर्मानवच्छिन्नत्वविरहात् उभयाभावसत्त्वेन अव्याप्तिः वारयितुं शक्यते, तथापि 'इदं द्रव्यम् कम्बुग्रीवादिमतः' इत्यत्र हेतुतावच्छेदककम्बुग्रीवादिमत्त्वावच्छिन्नत्वस्य अप्रसिद्ध्या अव्याप्तिः दुर्वारैवेति भावः ।

यद्यपि हेतुतावच्छेदकपदेन कम्बुग्रीवादिमत्त्वस्य ग्रहणात् तदवच्छिन्नत्वं हेतुतायामेव प्रसिद्धम्, तथापि हेतुतावच्छेदकावच्छिन्नत्वमित्यनेन हेतुतावच्छेदकनिष्ठावच्छेदकताकत्वस्य प्रतियोगितावच्छेदकतारूपावच्छेदकताघटितस्य विवक्षणीयतया कम्बुग्रीवादिमत्त्वनिष्ठायाः प्रतियोगितावच्छेदकतायाः अप्रसिद्ध्या अव्याप्तिरित्याशयः ।

दीधितिः

[मिश्रोक्ततृतीयलक्षणपरिष्कारः]

यद्वा यावन्तः तादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वमित्याहुः ।

गादाधरी

उक्तलक्षणे सजातीयादिपदपरित्यागेन लघुलक्षणमाह—यद्वेति [पृ. 522] । व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नाभावादिकमादाय अतिव्याप्तेर्वारणाय यावन्त इति [पृ. 522] ।

'वह्निमान् धूमात्' इत्यादौ महानसीयवह्नित्वाद्यवच्छिन्नाभाव-प्रतियोगितावच्छेदकस्य धूमत्वाद्यवच्छिन्नव्यापकतानवच्छेदकतया अव्याप्तिरिति तादृशा इति। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका इत्यर्थः। अत्र व्याप्यवृत्तित्वविशेषणं प्रयोजनाभावादनुपादेयम्। साध्याभावसजातीयत्वादिविशेषणावच्छिन्नस्यापि अभावान्तरस्य प्रक्रान्तत्वात् तादृशपदे तत्परत्वभ्रमस्य झडिति निरासाय अभावा इत्येतन्मात्रमनभिधाय साध्याभावा इत्युक्तम्। यावत्साध्याभावनिरूपिता न काचिदपि प्रतियोगिता इति प्रत्येकपदम्।

विवरणम्

तृतीयलक्षणमवतारयति—उक्तलक्षणे इत्यादिना [पृ. 522]। यावन्तः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाः अभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकं यद्रूपावच्छिन्नव्यापकतावच्छेदकं तद्रूपवत्त्वं व्याप्तिरिति लक्षणम्।

'वन्हिमान् धूमात्' इत्यादौ वह्नित्वेन वह्न्यभावः वह्नित्वेन घटाभावश्च गृह्यते। तत्प्रतियोगितावच्छेदकं वह्नित्वं हेतुव्यापकतावच्छेदकम् इति लक्षणसमन्वयः।

'धूमवान् वह्नेः' इत्यत्र यावदभावान्तर्गतस्य धूमत्वेन धूमाभावस्य प्रतियोगितावच्छेदकं धूमत्वं हेतुव्यापकतावच्छेदकं न भवतीति नातिव्याप्तिः।

यावत्त्वानुपादाने 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि साध्यतावच्छेदकधूमत्वावच्छिन्नव्यापकतावच्छेदकं यत् वह्नित्वं तदवच्छिन्नप्रतियोगिताकस्य वह्नित्वेन घटाभावस्य वा वह्नित्वेन वह्न्यभावस्य वा ग्रहणेन तत्प्रतियोगितावच्छेदके वह्नित्वे हेतुतावच्छेदकवन्हित्वावच्छिन्नव्यापकतावच्छेदकत्वसत्त्वात् अतिव्याप्तिः। तद्वारणाय यावत्त्वोपादानम्। तदुपादाने धूमत्वा-

वच्छिन्नधूमाभावस्यापि लक्षणघटकतया तत्प्रतियोगितावच्छेदकस्य धूमत्वस्य वह्नित्वावच्छिन्नव्यापकतावच्छेदकत्वं नास्तीति नातिव्याप्तिः। तदाह—**व्यभिचारिणीत्यादिना** [पृ. 522]। तादृशा इति विशेषणस्य प्रयोजनमाह—**वह्निमान् धूमात्** [पृ. 523] इति। 'वह्निमान् धूमात्' इत्यादौ साध्यनिष्ठप्रतियोगिताकाभावस्य महानसीयवह्न्यभावस्य यावदन्तर्गतस्य प्रतियोगितावच्छेदकं महानसीयवह्नित्वं धूमत्वावच्छिन्नव्यापकतावच्छेदकं न भवतीति अव्याप्तिः। तद्वारणाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकार्थकं तादृशा इति विशेषणम्।

प्रयोजनाभावादनुपादेयमिति [पृ. 523]। ननु 'कपिसंयोगाभाववान् मेयत्वात्' इत्यादौ कपिसंयोगात्मकाभावप्रतियोगितावच्छेदकस्य हेतुव्यापकतावच्छेदकतासंपत्तये हेतुव्यापकत्वं प्रतियोगिवैयधिकरण्यघटितमेव निवेश्यम्। एवं '**कपिसंयोग्येतत्त्वात्**' इत्यादौ साध्यतावच्छेदकस्य साध्यव्यापकतावच्छेदकत्वनिर्वाहाय साध्यव्यापकत्वमपि तथैव निवेश्यम्। एवं व्यधिकरणधर्मावच्छिन्नाभावानुपगमेऽपि पूर्वक्षणवृत्तित्वविशिष्टवाच्यत्वाद्यभावमादायैव लक्षणसङ्गतेः हेतुव्यापकत्वे प्रतियोगिवैयधिकरण्यानिवेशलाभात् अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वमावश्यकमिति चेत्, न। एतल्लक्षणे प्रतियोगितावच्छेदकसंबन्धेन व्यापकतयोः निवेशनीयतया प्रतियोगिवैयधिकरण्ययोः न निवेशः। न चैवं व्यधिकरणधर्मावच्छिन्नाभावस्य व्यापकताघटकतानिबन्धनदोष इति वाच्यम्। सामानाधिकरण्येन अवच्छेदकताविवक्षणात् तदपि प्रतियोगिविशेषणवृत्तित्वलक्षणावच्छेदकत्वमेव। तेन वह्नित्वेन महानसीयवह्निघटान्यतराभावमादाय न दोषः।' इति **कृष्णंभट्टीये**।

ननु यावन्तः तादृशाः अभावाः इत्येवास्तु तावतैव तत्तद्वह्न्यभावस्य व्यावृत्तिसंभवात् साध्यपदं किमर्थमित्यत आह—**साध्याभावसजातीयत्वादीति** [पृ. 523]। तादृशाः अभावाः

इत्युक्तौ मिश्रोक्तपूर्वद्वितीयलक्षणे साध्याभावातिरिक्तस्य साध्याभावसजातीयस्य तद्व्यापकीभूतस्य व्यावृत्तेरभावस्यापि प्रविष्टत्वात् पूर्वप्रक्रान्तवाचिना अन्नत्यतादृशपदेन साध्याभावसजातीयत्वादिविशेषणावच्छिन्नस्य अभावस्य भ्रान्त्या ग्रहणं भवेत्। तन्निरासाय अभावाः इत्यनुक्त्वा साध्याभावाः इत्युक्तम्।

झटितीति [पृ. 523]। पौनरुक्त्योन्नीतबाधग्रहं विना इत्यर्थः। अयमाशयः—तादृशपदेन द्वितीयलक्षणस्थितसाध्याभावसजातीयत्वादिविशेषणविशिष्टस्य अभावस्य यदि ग्रहणं भवेत् तदा द्वितीयतृतीयलक्षणयोः अभेदात् पौनरुक्त्यं स्यात्। अतः कथं भ्रान्तेः प्रसक्तिः इति नाशङ्कनीयम्। यस्य पुनरुक्तिहेतुकः तादृशपदस्य सजातीयत्वादिविशेषणाक्रान्ताभावपरत्वाभावरूपबाधग्रहो नास्ति तस्य भ्रमो भवितुमर्हति इति।

गादाधरी

अत्र च व्यभिचारिणं प्रत्यपि यत्किंचित्संबन्धेन साध्यतावच्छेदकावच्छिन्नस्य व्यापकतया अतिप्रसङ्गस्य वारणाय प्रतियोगितावच्छेदकसंबन्धेनैव हेतुव्यापकता निवेशनीया। इत्थं च समवायसंबन्धावच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकसमवायादिसंबन्धेन वह्नित्वाद्यवच्छिन्नस्य धूमाद्यव्यापकत्वात् असंभव इति प्रतियोगितावच्छेदकसंबन्धेनैव साध्यव्यापकता विवक्षणीया। तथा च केवलान्वयिसाध्यकस्थले व्यधिकरणसंबन्धावच्छिन्नसाध्याभावमादाय निर्वाहो न भवतीति व्यधिकरणधर्मावच्छिन्नाभावस्योपयोगिता बोध्या।

विवरणम्

अत्र चेत्यादि [पृ. 525] 'धूमवान् वह्नेः' इत्यादौ यावत्साध्याभावान्तर्गतधूमत्वावच्छिन्नधूमाभावप्रतियोगितावच्छेदकस्य धूमत्वस्य हेतुतावच्छेदकवह्नित्वावच्छिन्नव्यापकतावच्छेदकत्वमस्ति। वह्निमति सर्वत्र येन केनचित् संबन्धेन कालिकादिना

धूमत्वावच्छिन्नस्य वर्तमानत्वात् इति अतिव्याप्तिः। तद्वारणाय हेतुव्यापकता प्रतियोगितावच्छेदकसंबन्धेन निवेशनीया। तथा च संयोगसंबन्धावच्छिन्नधूमाभावस्यैव लक्षणघटकतया तत्प्रतियोगितावच्छेदकस्य धूमत्वस्य प्रतियोगितावच्छेदकसंयोगसंबन्धघटितवन्हिव्यापकतावच्छेदकत्वं नास्ति। वन्हिमति अयोगोलकादौ संयोगसंबन्धेन धूमस्य अवृत्तेरिति नातिव्याप्तिः।

एवं सति 'वन्हिमान् धूमात्' इत्यादौ साध्यतावच्छेदकवन्हित्वावच्छिन्न - व्यापकतावच्छेदकवन्हित्वावच्छिन्नसमवाय - संबन्धावच्छिन्न-प्रतियोगिताकाभावस्य यावत्साध्याभावान्तर्गततया तत्प्रतियोगितावच्छेदकस्य वह्नित्वस्य प्रतियोगितावच्छेदकसमवायसंबन्धघटितधूमव्यापकतावच्छेदकत्वं नास्ति। धूमवति पर्वतादौ समवायसंबन्धेन वन्हित्वावच्छिन्नस्य अवृत्तेरिति असंभवः। तद्वारणाय साध्यव्यापकतायामपि प्रतियोगितावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। एवं च केवलान्वयिसाध्यकस्थले व्यधिकरणसंयोगादिसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकवाच्यत्वाभावमादायैव लक्षणसमन्वयसंभवात् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावानङ्गीकारेऽपि क्षतिविरहात् 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थानुत्थितिः इति नाशङ्कनीयम्। प्रतियोगितावच्छेदकसंयोगसंबन्धेन वाच्यत्वस्य साध्यव्यापकत्वविरहात् तत्संबन्धावच्छिन्नाभावस्य लक्षणघटकताविरहात् व्यधिकरणधर्मावच्छिन्नाभावस्यैव स्वीकरणीयत्वात् इति भावः।

इत्थं चेति [पृ. 525]। हेतुव्यापकतायां प्रतियोगितावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे इत्यर्थः।

गाधाधरी

'धूमवान् वह्नेः' इत्यादौ धूमाद्यभावप्रतियोगितावच्छेदकजलादिवृत्तित्वविशिष्टधूमाद्यभावाभावत्वेन वह्न्यादिव्यापकत्वेऽपि नातिव्याप्तिः। साध्यतावच्छेदकावच्छिन्ननिरूपित-स्वावच्छेदक-

संबन्धघटित-व्यापकतावच्छेदकावच्छिन्ना यावत्यः प्रतियोगिताः प्रत्येकं तदवच्छेदरूपेण तदवच्छेदकसंबन्धेन यद्रूपावच्छिन्नं प्रति व्यापकत्वम् इत्येतादृशार्थस्यैव विवक्षणीयत्वात् साध्यव्यापकतावच्छेदकं यद्यद्रूपं तेन व्यापकत्वविवक्षणे व्यधिकरणधर्मावच्छिन्नाभावोपयोगिता न घटत इति साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकत्वेन व्यापकत्वावच्छेदकनिवेशः ।

विवरणम्

ननु 'धूमवान् वह्नेः' इत्यादौ यावत्साध्याभावान्तर्गतस्य धूमत्वेन धूमाभावस्य धूमत्वं यथा प्रतियोगितावच्छेदकं तथा जलवृत्तित्वविशिष्टधूमाभावाभावत्वमपि प्रतियोगितावच्छेदकम् । तच्च प्रतियोगितावच्छेदकस्वरूपसंबन्धघटितवन्हिव्यापकतावच्छेदकम् । यत्र यत्र वन्हिः तत्र अयोगोलकादौ जलवृत्तित्वविशिष्टधूमाभावाभावस्य स्वरूपसंबन्धेन सत्वात् अतिव्याप्तिः इत्याशङ्क्य प्रतियोगितायां यावत्वं निवेश्य लक्षणं परिष्करणीयम् इत्याह—धूमवान् वह्नेः इत्यादावित्यादिना [पृ. 526] । तथा च साध्यतावच्छेदकावच्छिन्नसाध्यनिरूपित - स्वावच्छेदकसंबन्धावच्छिन्नव्यापकतावच्छेदकावच्छिन्ना यावत्यः प्रतियोगिताः प्रत्येकं तदवच्छेदकं यद्रूपावच्छिन्ननिरूपितस्वावच्छिन्नव्यापकतावच्छेदकं तद्रूपावच्छिन्नत्वं व्याप्तिः ।

धूमाभावस्य धूमोऽपि प्रतियोगी, जलवृत्तित्वविशिष्टधूमाभावाभावोऽपि प्रतियोगी । तत्र यावत्प्रतियोगितापदेन संयोगसंबन्धावच्छिन्नधूमनिष्ठप्रतियोगिताया अपि ग्रहीतुं शक्यतया तदवच्छेदकस्य धूमत्वस्य तत्संबन्धावच्छिन्नवन्हिव्यापकतावच्छेदकत्वं नास्तीति नातिव्याप्तिरिति भावः ।

ननु साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावप्रतियोगितावच्छेदके हेतुव्यापकतावच्छेदकत्वं निवेशनीयम् । तादृशाभाव-

प्रतियोगितावच्छेदकं वस्तुतः साध्यव्यापकतावच्छेदकरूपमेव भवति । तथा च लाघवात् साध्यव्यापकतावच्छेदकं यद्यद्रूपं यद्धर्मावच्छिन्नव्यापकतावच्छेदकं तद्धर्मवत्वं व्याप्तिः इत्येव अस्तु इत्याशङ्क्याह—साध्यव्यापकतावच्छेदकमिति [पृ. 527] । तथा विवेशे केवलान्वयिसाध्यकस्थले व्यधिकरणधर्मावच्छिन्नाभावं विनापि लक्षणसमन्वयः भवति । वाच्यत्वव्यापकतावच्छेदकस्य वाच्यत्वत्वस्य ज्ञेयत्वव्यापकतावच्छेदकत्वात् । तथा च 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थानुत्थितिरिति अलोच्य साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितं गुरुभूतं लक्षणमाश्रितमिति भावः।

गादाधरी

यथासन्निवेशे न वैयर्थ्यम् । प्रतियोगितायाः स्वरूपसंबन्धरूपत्व वन्हित्वाद्यवच्छिन्नप्रतियोगिताया वह्न्यादिव्यक्तिभेदेन भिन्नाया धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वं न संभवतीति व्यापकतावच्छेदकावच्छिन्नप्रतियोगितायां व्यापकतावच्छेदकत्वं व निवेशितम् ॥

इति विमलक्षणम्

विवरणम्

तर्हि साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकमित्येव निवेश्यताम् । तावतापि व्यधिकरणधर्मावच्छिन्नाभावं विना प्रतियोगितायाः दुर्घटत्वात् व्यधिकरणधर्मावच्छिन्नाभावोपयोगिता सङ्गच्छते । किं साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकनिवेशेन इत्यत आह—यथा सन्निवेशे [पृ. 528] इति ।

ननु एवमपि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायां हेतुव्यापकतावच्छेदकत्वं निवेश्यताम् । किं व्यापकतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदके तन्निवेशेन ।

तावतापि दोषाभावात् इत्यत आह—**प्रतियोगितायाः स्वरूपसंबन्धरूपत्वे इति** [पृ॰ 528]। 'वन्हिमान् धूमात्' इत्यादौ वन्हित्वावच्छिन्नायाः प्रतियोगितायाः प्रतियोगिस्वरूपायाः वन्हिव्यक्तिभेदेन भिन्नतया चालिनोन्यायेन सर्वासामपि प्रतियोगितानां धूमत्वावच्छिन्नाधिकरणवृत्यत्यन्ताभावप्रतियोगितावच्छेदकतया धूमत्वावच्छिन्नव्यापकतावच्छेदकत्वं नास्तीति लक्षणस्य असंभवः। अतः साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगितायां हेतुव्यापकतावच्छेदकत्वं न निवेशितम् इति भावः॥

॥ इति मिश्रलक्षणम ॥

दीधितिः

परे तु—वृत्तिमद्वृत्तय: यावन्त: साध्याभाववद्वृत्तित्वाभावा: तद्वत्त्वं व्याप्ति: ।

गादाधरी

कूटघटितलक्षणे व्यभिचारिणि साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताक: न निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभाव:, अपि तु जगद्वृत्तित्वसामान्याभाव एव। स च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्ति: इति अतिव्याप्तिवारणाय कूटपदमुपात्तम् । तादृशातिव्याप्ति: समानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावसाधारणरूपेण साध्याभावस्य व्याप्यतावच्छेदककोटौ प्रवेशन एव प्रसज्यते, न तु विशिष्य साध्याभावनिवेशे । तथा सति निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्यापि लक्षणघटकतानिर्वाहादिति कूटपदमनुपादाय विशिष्य साध्याभावं निवेश्यैव लक्षणमुचितम् । **तदुपादाने** बहूनां दोषाणां वक्ष्यमाणत्वात् इति कूटघटितलक्षणवादिनमाक्षेप्तुं कूटाघटितं लक्षणं दर्शयति—**परे तु इत्यादिना** [पृ. 530] ।

विवरणम्

परे तु [पृ. 530] **इत्यादिना** दीधितिकारै: कूटाघटितलक्षणं प्रदर्शितम् । तत् वासुदेवसार्वभौमकृतस्य कूटघटितलक्षणस्य सदोषस्य आक्षेपरूपम् इत्याह–**कूटघटितलक्षणे** [पृ. 530] इत्यादिना । वृत्तिमद्वृत्तय: यावन्त: साध्याभावकूटाधिकरणवृत्तित्वत्वसमनियतप्रतियोगिताका: अभावा: तद्वत्त्वं व्याप्तिरिति कूटघटितं लक्षणम् । तत्र कूटपदानुपादाने व्यभिचारिणि

अतिव्याप्तिः । तथा हि—'धूमवान् वह्नेः' इत्यादौ निर्धूमवृत्तित्वत्वावच्छिन्नाभावमादाय अतिव्याप्तिः वारणीया । स तु साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः न भवति । कूटपदानुपादाने व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य घटत्वेन धूमाभावस्य साध्याभावपदेन ग्रहणसंभवात् तदधिकरणं जगदेव भवति । तद्वृत्तित्वत्वव्यापकत्वं निर्धूमवृत्तित्वाभावीयप्रतियोगितायां नास्ति । जगद्वृत्तित्वत्वस्य सधूमवृत्तित्वेऽपि सत्त्वात् । जगद्धि द्विविधम्—सधूमं निर्धूमं चेति । अतः जगद्वृत्तित्वत्वं सधूमवृत्तित्व-निर्धूमवृत्तित्वोभयसाधारणम् । तत्र सधूमवृत्तित्वे निर्धूमवृत्तित्वाभावीयप्रतियोगितायाः असत्त्वात् तस्याः व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणजगद्वृत्तित्वत्वव्यापकत्वं नास्तीति निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावः न लक्षणघटकः । किन्तु जगद्वृत्तित्वत्वव्यापकप्रतियोगिताकः घटत्वेन जगद्वृत्तित्वाभावो वा जगद्वृत्तित्वत्वेव जगद्वृत्तित्वाभावो वा । तत्र जगद्वृत्तित्वत्वेन जगद्वृत्तित्वाभावः वृत्तिमद्वृत्तिर्न भवति । वृत्तिमतां सर्वेषां यत्किञ्चिज्जगद्वृत्तित्वात् । अतः घटत्वेन जगद्वृत्तित्वाभावः एव ग्राह्यः । तद्वत्त्वं तु वन्हिरूपहेतावस्तीति अतिव्याप्तिः । तद्वारणाय कूटपदमुपात्तम् । तदुपादाने धूमत्वेन धूमाभाव-घटत्वेन धूमाभाव-एतदुभयघटितकूटाधिकरणं जगत्सर्वं न भवति । किन्तु निर्धूममेव । तद्वृत्तित्वत्वव्यापकप्रतियोगिताकः अभावः निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावोऽपि । तद्वत्त्वं वह्नौ नास्ति । वह्नेः निर्धूमायोगोलकवृत्तित्वात् इति नातिव्याप्तिः इति वक्तव्यम् । परन्तु कूटपदानुपादाने कथमतिव्याप्तेः प्रसक्तिः इत्यालोचनीयम् । साध्याभावस्य समानाधिकरणधर्मावच्छिन्नाभाव - व्यधिकरणधर्मावच्छिन्नाभाव - उभयसाधारणरूपेण निवेशे एव व्यधिकरणधर्मावच्छिन्नसाध्याभावं गृहीत्वा अतिव्याप्तिः प्रसज्यते । विशिष्य तत्तद्व्यक्तित्वेन साध्याभावस्य निवेशे तु धूमत्वेन धूमाभावं

गृहीत्वा तदधिकरणनिर्धूमवृत्तित्वत्वव्यापकप्रतियोगिताकाभाव-पदेन निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्यापि ग्रहीतुं शक्यतया तद्वत्त्वस्य हेतौ विरहात् अतिव्याप्तिः न प्रसजति। एवं च साधारणरूपेण साध्याभावं निवेश्य अतिव्याप्तिं संपाद्य तद्वारणाय कूटपदमुपादाय तद्घटितलक्षणकरणापेक्षया तत्तद्व्यक्तित्वेन साध्याभावं निवेश्य कूटाघटितलक्षणकरणमुचितम्। तावतापि अतिव्याप्तिवारणसंभवात् इति रीत्या कूटघटितलक्षणवादिनमाक्षेप्तुं कूटाघटितलक्षणं दीधितिकारैः प्रदर्शितम् इति भावः।

विशिष्य साध्याभावं निवेश्य लक्षणप्रकारस्तु - तदभाववद्-वृत्तित्वत्वसमनियतप्रतियोगिताको योऽभावः एतदभाववद्वृत्ति-त्वत्वसमनियतप्रतियोगिताको योऽभावः तद्वत्त्वे सति तद्वत्त्वम् इति पश्चात् वक्ष्यति॥

ननु विशिष्यनिवेशेऽपि गौरवमित्याशङ्क्य कूटपदोपादाने बहूनां दोषाणां वक्ष्यमाणत्वात् बुद्धिगौरवं सोढव्यम् इत्याह— **तदुपादाने इति** [पृ. 530]।

गादाधरी

लक्षणे यावत्पदवृत्तिमद्वृत्तित्वपदयोः प्रयोजनकथनम्

साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभाव-मादाय व्यभिचारिमात्रेऽतिव्याप्तिः, अतः **यावन्त इति**। तथा सति समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य समा-नाधिकरणधर्मावच्छिन्नाभावस्य यावत्तादृशाभावान्तर्गतस्य व्यभि-चारिण्यसत्त्वात् नातिव्याप्तिः।

वृत्तिमद्वृत्तित्वानुपादाने समानाधिकरणधर्मावच्छिन्नप्रति-योगिताकस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभा-वस्य असंयुक्ताकाशादौ प्रसिद्धस्य हेतावसत्त्वात् संयोगादिसंबन्धेन हेतौ अव्याप्तिः।

यादृशसंबन्धप्रतियोगित्वं वस्तुमात्र एव । तादात्म्यविषयितादिरूपतादृशसंबन्धेन हेतावेव परं लक्षणसमन्वयो भवति । तादृशसंबन्धेन जगत्संबद्धत्वस्य समानाधिकरणधर्मावच्छिन्नाभावस्य अप्रसिद्धेरिति तदुपादानम् ।

विवरणम्

यावत्पदस्य प्रयोजनमाह - **साध्याभाववद्वृत्तित्वस्येति** [पृ. 532] । यावत्पदानुपादाने 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिसामान्ये साध्याभावपदेन व्यधिकरणधूमत्वावच्छिन्नघटाभावं गृहीत्वा तद्वद्वृत्तित्वत्वव्यापकप्रतियोगिताकं वृत्तिमद्वृत्ति घटत्वेन जगद्वृत्तित्वाभावं गृहीत्वा तद्वत्त्वस्य हेतौ सत्त्वात् अतिव्याप्तिः प्राप्नोति । तद्वारणाय यावत्पदोपादानम् । तदुपादाने समानाधिकरणधूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वस्य यः समानाधिकरणधर्मावच्छिन्नाभावः निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावः तस्यापि यावदभावान्तर्गततया तद्वत्त्वस्य वन्हावभावात् नातिव्याप्तिः ।

वृत्तिमद्वृत्तित्वविशेषणस्य प्रयोजनमाह—**वृत्तिमद्वृत्तित्वानुपादाने इति** [पृ: 532] । वृत्तिः—आधेयता । वृत्तिमान्—आधेयतावान् । तन्निरूपितवृत्तित्वाश्रयाः इति वृत्तिमद्वृत्तयः इत्यस्य अर्थः । आधेयपदार्थवृत्तय इति यावत् ।

वृत्तिमद्वृत्तित्वानुपादाने संयोगादिसंबन्धेन हेतौ 'पर्वतो वन्हिमान् धूमात्' इत्यादौ अव्याप्तिः । साध्याभावपदेन व्यधिकरणधर्मावच्छिन्नाभावः वन्हित्वेन घटाभावः गृह्यते । तदधिकरणं जगत् । तन्निरूपितसंयोगसंबन्धावच्छिन्नवृत्तित्वत्वव्यापकप्रतियोगिताकाभावः ग्राह्यः । वृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वस्य निवेशयिष्यमाणत्वात् । स चाभावः जगत्संयुक्तत्वेन जगत्संयुक्तत्वाभावः समानाधिकरणधर्मावच्छिन्नप्रतियोगिता-

कोऽपि यावदभावान्तर्गतः। अयं असंयुक्ते-संयोगसंबन्धेन अवृत्तौ आकाशादौ प्रसिद्धः। प्रकृतहेतौ धूमे स नास्ति। पर्वतादि-रूपजगति धूमस्य संयुक्तत्वात् इति अव्याप्तिः।

वृत्तिमद्वृत्तित्वोपादाने तु अवृत्तौ आकाशादौ प्रसिद्धोऽपि जगत्संयुक्तत्वाभावः वृत्तिमद्वृत्तिर्न भवति। वृत्तिमतः घटादेः जगत्संयुक्तत्वात्। अतः वृत्तिमद्वृत्तिः अभावः व्यधिकरणघटत्वा-दिना जगत्संयुक्तत्वाभाव एव। तस्य केवलान्वयित्वेन हेतावपि सत्त्वात् नाव्याप्तिरिति भावः।

ननु वृत्तिमद्वृत्तित्वानुपादाने असंभवः कुतो नोक्तः? इत्यत आह—**यादृशसंबन्धप्रतियोगित्वमिति** [पृ. 533]। तादात्म्यसंबन्ध-प्रतियोगित्वं विषयितासंबन्धप्रतियोगित्वं च सर्ववस्तुवृत्ति। सर्वस्यापि स्वतादात्म्यात् ज्ञानविषयत्वाच्च। तादृशतादात्म्य-विषयितादिसंबन्धेन सद्धेतौ 'अयं वृक्षः शिंशपायाः', 'इदं वाच्यम् विषयितासंबन्धेन घटात्' इत्यादौ व्यधिकरणधर्मावच्छिन्न-**साध्याभाववन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वत्वाव-च्छिन्नप्रतियोगिताकः अभावः तादात्म्यसंबन्धेन** जगत्संबद्ध-त्वत्वावच्छिन्नाभावः, विषयितासंबन्धेन जगत्संबद्धत्वत्वाव-च्छिन्नाभावो वा अप्रसिद्धः। सर्वस्यापि तादात्म्यसंबन्धेन स्वात्मकजगत्संबद्धत्वात् विषयितासंबन्धेन ज्ञानरूपजगत्संबद्ध-त्वाच्च। अतः तत्र व्यधिकरणधर्मावच्छिन्नवृत्तित्वाभाव एव घटत्वादिना जगत्संबद्धत्वाभावरूपः ग्राह्यः। तस्य हेतौ सत्त्वात् वृत्तिमद्वृत्तित्वानुपादानेऽपि लक्षणसमन्वयो भवतीति असंभव-मनुक्त्वा अव्याप्तिरुक्तेति भावः।

दीधितिः

येन संबन्धेन हेतुता तेनैव संबन्धेन वृत्तिमत्वं बोध्यम्। तेन व्यधिकरणधर्मावच्छिन्नाभाववति संयोगेन या वृत्तिः तदभावस्य जात्यादौ वर्तमानस्य धूमादावसत्त्वेऽपि न क्षतिः।

गादाधरी

हेतुतावच्छेदकसंबन्धेन वृत्तिमत्त्वनिवेशनम्

ननु वृत्तिमद्वृत्तित्वोपादानेऽपि जगत्संयुक्तत्वत्वाद्यवच्छिन्नाभावस्य जात्यादिरूपवृत्तिमति वर्तमानस्य वारणासंभवात् 'वन्हिमान् धूमात्' इत्यादौ अव्याप्तिर्दुवारैव। निर्धूमसंयुक्तत्वाद्यभावस्य निर्धूमवृत्तित्वत्वाव्यापकप्रतियोगिताकतया वृत्तिमन्मात्रस्यैव निर्धूमकालादिवृत्तित्वेन च निर्धूमवृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वेन 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तेर्वारणाय हेतुतावच्छेदकसंबन्धेन साध्याभाववद्वृत्तित्वस्यैव निवेशनीयतया संयोगादिना यत्र हेतुत्वम्, तत्र जगत्संयुक्तत्वत्वाद्यवच्छिन्नाभावस्यापि हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकत्वात् वृत्तिमत्पदस्य यथाश्रुतार्थकत्वे कालिकसंबन्धेन गगनादेरवृत्तित्वमते तेन संबन्धेन यत्र हेतुता तत्रैव परमव्याप्तिवारकता। तेन संबन्धेन जगद्वृत्तित्वाभावस्य अवृत्तिमात्रे प्रसिद्धत्वात् इत्यत आह—**येन संबन्धेनेति** [पृ. 535]। **न क्षतिरिति** [पृ. 535]। नाव्याप्तिरित्यर्थः। न तु नासंभव इति। तादात्म्यकालिकादिसंबन्धेव हेतौ लक्षणसमन्वयसंभवादिति।

विवरणम्

येन संबन्धेन हेतुता इति दीधितिग्रन्थमवतारयति - **ननु वृत्तिमदिति** [पृ.535]। वृत्तिमद्वृत्तित्वोपादानेऽपि 'वन्हिमान् धूमात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववज्जगत्संयुक्तत्वत्वावच्छिन्नाभावमादाय अव्याप्तिर्दुर्वारा। तस्यापि वृत्तिमति जात्यादौ वर्तमानत्वात्। जात्यादौ जगत्समवेतत्वसत्त्वेऽपि जगत्संयुक्तत्वाभावात्।

न च - जगत्संयुक्तत्वाभावस्य साध्याभाववज्जगद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वविरहात् कथं लक्षणघटकत्वम् । जगद्वृत्तित्वत्वं हि जगन्निरूपितसंयोगसंबन्धावच्छिन्नवृत्तित्वे इव जगन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वेऽप्यस्ति । तत्र तु जगत्संयुक्तत्वाभावीयप्रतियोगिता नास्तीति जगत्संयुक्तत्वनिष्ठप्रतियोगितायाः जगद्वृत्तित्वत्वव्यापकत्वविरहात् इति वाच्यम् ।

साध्याभाववन्निरूपितवृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिः । तत्र हि निर्धूमसंयुक्तत्वाभावमादायैव अतिव्याप्तिः वारणीया । निर्धूमसंयुक्तत्वाभावस्य तु धूमत्वावच्छिन्नधूमाभाववन्निर्धूमवृत्तित्वत्वव्यापकप्रतियोगिताकत्वं नास्ति । निर्धूमवृत्तित्वत्वस्य निर्धूमसमवेतत्वेऽपि सत्त्वेन तत्र निर्धूमसंयुक्तत्वाभावीयप्रतियोगितायाः असत्त्वात् । तथा च निर्धूमसंयुक्तत्वाभावस्य लक्षणाघटकतया निर्धूमवृत्तित्वाभाव एव निर्धूमवृत्तित्वत्वव्यापकप्रतियोगिताकतया लक्षणघटको वाच्यः । तत्र समानाधिकरणनिर्धूमवृत्तित्वत्वावच्छिन्नाभावः वृत्तिमद्वृत्तिर्न भवति । वृत्तिमतां सर्वेषामपि निर्धूमे काले कालिकसंबन्धेन वृत्तित्वात् । अतः घटत्वादिरूपव्यधिकरणधर्मावच्छिन्ननिर्धूमवृत्तित्वाभाव एव लक्षणघटकः । स तु हेतौ वह्नावप्यस्तीति अतिव्याप्तिः । हेतुतावच्छेदकसंबन्धेन साध्याभाववद्वृत्तित्वनिवेशे तु निर्धूमसंयुक्तत्वत्वावच्छिन्नाभावस्यापि जात्यादिरूपवृत्तिमति वर्तमानतया लक्षणघटकत्वेन तस्य निर्धूमायोगोलकसंयुक्ते वन्हावभावात् नातिव्याप्तिः । इत्थं च 'वह्निमान् धूमात्' इत्यादौ जगत्संयुक्तत्वत्वावच्छिन्नाभावस्यापि हेतुतावच्छेदकसंबन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकत्वात् अव्याप्तेर्दुर्वारत्वात् ।

असंभवस्तु न भवति। 'इदं वाच्यं घटात्' इत्यादौ कालिकसंबन्धेन हेतौ साध्याभाववन्निरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वत्वावच्छिन्नाभावस्य वृत्तिमद्वृत्तित्वविरहेण व्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावस्यैव लक्षणघटकतया तस्य हेतौ सत्त्वेन लक्षणसमन्वयात्। वृत्तिमत्पदस्य संबद्धार्थकत्वे तु गगनादेरपि तादात्म्यसंबन्धप्रतियोगित्वेन संबद्धतया संबद्धे गगनादौ जगन्निरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वत्वरूपसमानाधिकरणधर्मावच्छिन्नाभावस्य वृत्तितया लक्षणघटकत्वेन तद्वत्त्वस्य हेतौ विरहात् असंभवोऽपि वक्तुं शक्यते। वृत्तिमत्पदस्य यथाश्रुताधेयतावदर्थकत्वे तु न असंभवः। किन्तु 'वन्हिमान् धूमात्' इत्यादौ पूर्वोक्तरीत्या अव्याप्तिः। तद्वारणाय येन संबन्धेन हेतुः तेन संबन्धेन वृत्तिमान् विवक्षणीयः। तथाविवक्षणे समवायसंबन्धेन वृत्तिमति जातौ जगत्संयुक्तत्वत्वावच्छिन्नाभावस्य सत्त्वेऽपि हेतुतावच्छेदकसंयोगसंबन्धेन वृत्तिमति घटादौ असत्त्वात् घटत्वादिना जगत्संयुक्तत्वाभाव एव संयोगसंबन्धेन वृत्तिमद्घटादिवृत्तितया लक्षणघटकः। तद्वत्त्वं हेतावप्यस्तीति नाव्याप्तिः इति प्रघट्टकार्थः।

दीधितिः

साध्याभावश्च पूर्ववद्बोध्यः

गादाधरी

साध्याभावपरिष्कारः

ननु नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभाववद्वृत्तित्वाभावस्य हेतावसत्त्वात् अव्याप्तिः। कूटघटितलक्षण इव अत्रापि साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशेऽपि तार्णतार्णदहनोभयत्वावच्छिन्नाभावमादाय वह्न्यादिसाध्यके गुणादिवृत्तित्वविशिष्टसत्ताद्यभावमादाय च सत्तादिसाध्यके अव्याप्तिर्दुर्वारैव। एवम् अव्याप्यवृत्तिकपिसंयोगादिसाध्यके हेत्वधि-

करणस्येव जगत एव कपिसंयोगत्वाद्यवच्छिन्नाभाववत्तया तद्वद्-वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभाव-स्यैव वृत्तिमद्वृत्तित्वेन अव्याप्तिविरहेऽपि तादृशकपिसंयोगाभावा-दिसाध्यकद्रव्यत्वादिहेतौ कपिसंयोगादिरूपसाध्याभाववद्वृत्तित्वा-भावासत्त्वादव्याप्तिरित्यत आह—**साध्याभावश्चेति** [पृ. 537]।

पूर्ववदिति [पृ. 537]। मिश्रलक्षणे यथा साध्यतावच्छेदका-वच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्ति-रभावः निवेश्यते, तथा अत्रापि निवेशनीय इत्यर्थः। तत्तद्वह्नित्व-कथितोभयत्वावच्छिन्नप्रतियोगिताकाभावानां प्रथमविशेषणेन, कपि-संयोगादिरूपाभावानां च द्वितीयविशेषणेन व्यावृत्तिः।

विवरणम्

साध्याभावश्चेति ग्रन्थमवतारयति—**ननु नानाव्यक्तिसाध्यके** [पृ. 537] इत्यादिना। साध्याभावपदेन साध्यनिष्ठप्रतियोगिता-काभावविवक्षणे नानाव्यक्तिसाध्यके 'वह्निमान् धूमात्' इत्यादौ महानसीयवह्न्यादिरूपतत्तत्साध्यव्यक्त्यभावस्यापि वह्निनिष्ठप्रति-योगिताकत्वेन लक्षणघटकतया तादृशाभाववत्पर्वतादिवृत्तित्वमेव धूमेऽस्तीति अव्याप्तिः। एतद्वारणाय कूटघटितलक्षणे इव अस्मिन् लक्षणेऽपि साध्याभावपदेन साध्यतावच्छेदकसमनियतप्रतियोगिता-काभावविवक्षणे 'वह्निमान् धूमात्' इत्यादौ एव तार्णातार्णवन्ह्यु-भयाभावमादाय अव्याप्तिः। तस्यापि वन्हित्वसमनियतप्रतियोगिता-कत्वात्। वन्हित्वं तार्णवह्नौ अतार्णवह्नौ च वर्तते। प्रतियोगितापि तत्रैव वर्तत इति तार्णातार्णवन्ह्युभयाभावः वह्नित्वसमनियत-प्रतियोगिताकः। तदधिकरणं पर्वतोऽपि। तद्वृत्तित्वस्यैव धूमे सत्त्वात् अव्याप्तः। साध्यतावच्छेदकसमनियतप्रतियोगितायां व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं निवेश्य उक्तदोषवारणेऽपि 'सत्ता-वान् जातेः' इत्यत्र सत्तात्वसमनियतप्रतियोगिताकः गुणवृत्ति-

त्वविशिष्टसत्ताभावोऽपि । विशिष्टशुद्धयोरनतिरेकेण सत्तात्ववत्यां सत्तायां विशिष्टसत्ताभावीयप्रतियोगितायाः सत्त्वात् गुणवृत्तित्वविशिष्टसत्ताभावाधिकरणं द्रव्यमपि । तद्वृत्तित्वमेव हेतावस्तीति ।

यदि तु प्रतियोगितायां वैशिष्ट्यानवच्छिन्नत्वं निवेश्य उक्तदोषः वार्यते, तदापि अव्याप्यवृत्तिसाध्यके सद्धेतौ 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ अव्याप्तिः । कपिसंयोगत्वावच्छिन्नकपिसंयोगाभाववद्वृक्षवृत्तित्वस्यैव हेतौ सत्त्वात् ।

न च—अव्याप्यवृत्तिकपिसंयोगाभावः कपिसंयोगवत्यपि वर्तमानतया केवलान्वयी । तदधिकरणं च जगदेव । जगद्वृत्तित्वत्वव्यापकप्रतियोगिताकः वृत्तिमद्वृत्तिः अभावस्तु घटत्वेन जगद्वृत्तित्वाभाव एव । तद्वत्त्वं हेतावस्तीति नाव्याप्तिः इति—वाच्यम् ।

एवमपि अव्याप्यवृत्तिकपिसंयोगाभावसाध्यकद्रव्यत्वहेतौ 'अयं कपिसंयोगाभाववान् द्रव्यत्वात्' इत्यत्र कपिसंयोगाभावत्वरूपसाध्यतावच्छेदकसमनियतप्रतियोगिताकः अभावः कपिसंयोगाभावाभावः कपिसंयोगात्मकः । तदधिकरणं वृक्ष एव । तद्वृत्तित्वत्वावच्छिन्नाभावः वृक्षावृत्तौ वृत्तिमति वर्तमानः हेतौ एतद्वृक्षत्वे नास्तीति अव्याप्तिः । अतः **साध्याभावश्च पूर्ववद्बोध्य** इति उक्तं **दीधितौ** [पृ. 537] ।

मिश्रलक्षणे यथा साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकः व्याप्यवृत्तिः अभावः निवेश्यते, तथा अत्रापि निवेशनीय इति तदर्थः । महानसीयवन्हित्व-तार्णातार्णवन्ह्युभयत्व-गुणवृत्तित्वविशिष्टसत्तात्वादीनां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वविरहेण तदवच्छिन्नप्रतियोगिता-

काभावानां लक्षणाघटकतया न तानादाय अव्याप्तिः। 'कपिसंयोगाभाववान् द्रव्यत्वात्' इत्यत्र कपिसंयोगात्मकाभावस्य व्याप्यवृत्तित्वविरहेण लक्षणाघटकतया कपिसंयोगाभावत्वेन घटाभावस्यैव लक्षणघटकतया तदधिकरणजगद्वृत्तित्वनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव वृत्तिमद्वृत्तित्वात् तद्वत्त्वस्य हेतौ सत्त्वात् नाव्याप्तिः।

एकव्यक्तिसाध्यके 'एतद्रूपवान् एतद्रसात्' इत्यादौ पूर्वक्षणवृत्तित्वविशिष्ट-एतद्रूपाभावस्य एतद्रूप-तद्रूप-उभयाभावस्य च ग्रहणेऽपि तदधिकरणं जगदेव भवतीति तद्वृत्तित्वनिष्ठघटत्वावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वात् तद्वत्त्वस्य हेतौ सत्त्वात् लक्षणसमन्वयः इत्यालोच्य **नानाव्यक्तिसाध्यके** [पृ. 537] इत्युक्तम्।

दीधितिः

तद्वद्वृत्तित्वाभावोऽपि **स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः।**

गादाधरी

तद्वद्वृत्तित्वाभावपरिष्कारः

ननु साध्याभाववद्वृत्तित्वप्रतियोगिकाभावमात्रनिवेशे **प्रकृत**हेतुसाधारणस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्व**विशेषस्य** समानाधिकरणधर्मावच्छिन्नाभावोऽपि वृत्तिमद्वृत्तिः सम्भवति इति यावत्तादृशाभावान्तर्गततद्वत्त्वस्य हेतावभावादसंभवः।

एवं समानाधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वस्य प्रकृतहेतुवृत्तितावच्छेदकीभूतकिञ्चिद्धर्मावच्छिन्नस्य अभावोऽपि यावत्तादृशाभावान्तर्गत इति तद्वत्त्वविरहादपि व्यतिरेकिसाध्यकहेतूनां अव्यभिचारित्वानुपपत्तिः। तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्न-

प्रतियोगिताकाभावश्च विवक्षितुमशक्यः। केवलान्वयिनि साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावस्य तादृशगुरुधर्मस्य प्रतियोगितावच्छेदकत्वमने प्रसिद्धावपि **तस्य अतथात्वमते** व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य स्वघटककेवलवृत्तित्वत्वसमनियततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धेः दुर्वारत्वात्।

विवरणम्

तद्वद्वृत्तित्वाभावोऽपीति [पृ. 540] दीधितिग्रन्थमवतारयति **ननु साध्याभाववदिति** [पृ. 540]। साध्याभाववद्वृत्तित्वाभावः इत्यस्य तत्तत्साध्याभाववद्वृत्तित्वनिष्ठप्रतियोगिताकोऽभावः इति यथाश्रुतार्थस्य स्वीकारे सद्धेतौ सर्वत्र असंभवः। तथा हि- 'वन्हिमान् धूमात्' इत्यादौ साध्याभावः वन्हित्वरूपव्यधिकरणधर्मावच्छिन्नघटाभावः। तदधिकरणं जगत्। तद्वृत्तित्वप्रतियोगिकोऽभावः महानसवृत्तित्वत्वेन महानसवृत्तित्वाभावोऽपि। तस्या अपि महानसरूपजगद्वृत्तित्वनिष्ठप्रतियोगिताकत्वात्। तादृशाभावः महानसावृत्तौ पर्वतादिवृत्तौ पदार्थे वर्तत इति वृत्तिमद्वृत्तिः। तद्वत्त्वं हेतौ नास्ति। धूमस्य महानसवृत्तित्वात्।

एतद्दोषवारणाय मिश्ररीत्या साध्याभावसाजात्यं वृत्तित्वाभावे निवेश्यते चेत् व्यतिरेकिसाध्यकसद्धेतुषु 'पर्वतो वन्हिमान्' इत्यादिषु अव्याप्तिः। साध्याभावपदेन वन्हित्वेन वन्ह्यभावः गृह्यते। तदधिकरणं निर्वन्हिः। तद्वृत्तित्वप्रतियोगिकः अभावः 'आलोकावृत्तिर्नास्ति' इति प्रतीतिसिद्धः आलोकावृत्तित्वरूपसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकः अभावः। आलोकावृत्यभावस्य आलोकावृत्ति प्रतियोगि। निर्वन्हिवृत्तित्वं च आलोकावृत्ति। आलोकस्य निर्वन्हिह्रदाद्यवृत्तित्वात्। अतः आलोकावृत्यभावः साध्याभावसजातीयः साध्याभाववद्वृत्तित्वप्रतियोगिकश्च। आलो-

करूपे वृत्तिमति वर्तमान: प्रकृतहेतौ धूमे नास्ति । धूमे आलोकाकावृत्तिन: धूमत्वस्य सत्त्वात् अव्याप्ति: इति भाव: ।

विशेषस्येति [पृ. 540] । जगद्वृत्तित्वविशेषस्य महानसवृत्तित्वस्येत्यर्थ: । **प्रकृतहेत्विति** [पृ. 540] । प्रकृतहेतुः धूमः तद्वृत्तितावच्छेदक: किंचिद्धर्म: आलोकावृत्तित्वम् । तदवच्छिन्नप्रतियोगिताकाभाव इत्यर्थ: । आलोकावृत्तित्वे धूमवृत्तितावच्छेदकत्वकथनं धूमे आलोकावृत्तित्वावच्छिन्नाभावो नास्तीति सूचनाय । केवलान्वयिसाध्यकस्थले एतादृशाभावस्य साध्याभाववद्वृत्तित्वप्रतियोगिकत्वं साध्याभावसाजात्यं च नास्तीति आशयेन व्यतिरेकिसाध्यकहेतूनामित्युक्तम् ।

ननु तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकोऽभाव: विवक्षणीय: । आलोकावृत्त्यभावस्य आलोकावृत्तित्वावच्छिन्नप्रतियोगिताकत्वेऽपि साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकत्वविरहात् न तमादाय अव्याप्ति: इत्याशङ्क्य तथाविवक्षणेऽपि केवलान्वयिसाध्यके 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धि: ।

न च-तत्र व्यधिकरणधर्मावच्छिन्नसाध्याभाववज्जगद्वृत्तित्वत्वेन घटाभाव एव साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताक: प्रसिद्ध इति-वाच्यम् । गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वमते वृत्तित्वत्वरूपसमनियतलघुधर्मापेक्षया गुरुभूतस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य अभावप्रतियोगितावच्छेदकत्वविरहेण तदवच्छिन्नाभावाप्रसिद्धे: अव्याप्ते: दुर्वारत्वात् इत्याह—**तत्तत्साध्याभाववदिति** [पृ. 540] । **तादृशस्येति** [पृ. 608] । तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकस्येत्यर्थः । प्रसिद्धावपीत्यत्र अन्वय: । **तस्य अतथात्वमते** [पृ. 540] । इति । गुरूधर्मस्य अभावप्रतियोगितानवच्छेदकत्वमते इत्यर्थः ।

गादाधरी

तत्तदभाववद्वृत्तित्वत्वघटकधर्मावच्छिन्नाभावनिवेशे च वन्हित्वाद्यवच्छिन्नवन्ह्याद्यभावव्यक्तेः तत्तदभावत्वावच्छिन्नाभावस्यापि तादृशतया तस्य च धूमादावसत्त्वात् अव्याप्तिः। **साध्याभाववद्वृत्तित्ववृत्तितादृशधर्मावच्छिन्नाभावनिवेशेऽपि** घटवृत्तित्वत्वाद्यवच्छिन्नसाध्यके तादात्म्येन घटत्वव्यापकादिहेतौ तादृशसाध्याभाववान् यो घटत्वाभावादिः तद्वृत्तित्वनिष्ठतादृशसाध्याभाववत्त्वरूपतथाविधधर्मावच्छिन्नाभावस्य घटादिमात्रवृत्तेः हेतावसत्त्वात् अव्याप्तिर्दुर्वारैव। साध्याभावादिव्यावृत्तघटकतानिवेशे च प्रयासगौरवमिति तत्तत्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकाभावं विवक्षयति—**तद्वदिति**। स्वं - प्रतियोगिता।

विवरणम्

ननु तत्तत्साध्याभाववद्वृत्तित्वत्वघटकधर्मावच्छिन्नाभावः विवक्षणीयः। केवलान्वयिसाध्यकस्थले व्यधिकरणधर्मावच्छिन्नसाध्याभाववंज्जगद्वृत्तित्वत्वघटकधर्मः केवलवृत्तित्वत्वम्। तदवच्छिन्नप्रतियोगिताकोऽभावः वृत्तित्वत्वेन घटाभावः। तद्वत्त्वं हेतावस्तीति नाव्याप्तिरिति, अत आह—**तत्तदभाववद्वृत्तित्वत्वघटकेति** [पृ. 543]।

तथा निवेशेऽपि 'वन्हिमान् धूमात्' इत्यादौ अव्याप्तिः। तत्र साध्याभावः वन्हित्वावच्छिन्नवह्न्यभावः। साध्याभाववद्वृत्वित्वत्वं वन्हित्वावच्छिन्नवन्ह्यभाववद्वृत्तित्वत्वम्। तदघटको धर्मः वन्हित्वावच्छिन्नवन्ह्यभावत्वमपि। तदवच्छिन्नप्रतियोगिताकः अभावः वन्ह्यभावाभावः वृत्तिमत्पर्वतादिवृत्तिः यावदन्तर्गतः। तद्वत्वं धूमे नास्ति। धूमे वन्ह्यभावस्यैव सत्त्वेन वह्न्यात्मकस्य वह्न्यभावाभावस्य असत्त्वात्।

ननु तत्तत्साध्याभाववद्वृत्तित्ववृत्तिः इति विशेषणं घटकधर्मे निवेश्यते । तथा च तत्तसाध्याभाववद्वृत्तित्ववृत्तिः तत्तत्साध्याभाववद्वृत्तित्वत्वघटकः यः धर्मः तदवच्छिन्नाभावः साध्याभाववद्वृत्तित्वाभावः इत्यनेन विवक्षणीयः । वन्ह्यभावत्वस्य वन्ह्यभाववद्वृत्तित्वत्वघटकत्वेऽपि वह्न्यभाववद्वृत्तित्ववृत्तित्वं नास्ति । अतः वन्ह्यभावत्वावच्छिन्नाभावः न लक्षणघटकः । किंतु वन्ह्यभाववद्वृत्तित्वत्वेन वन्ह्यभाववद्वृत्तित्वाभाव एव लक्षणघटक इति नाव्याप्तिरिति आशङ्क्य तथा निवेशेऽपि स्थलान्तरे अव्याप्तिमाह—**साध्याभाववद्वृत्तित्ववृत्तीति** [पृ. 543] । तथा च साध्याभाववद्वृत्तित्ववृत्ति-साध्याभाववद्वृत्तित्वत्वघटकधर्मावच्छिन्नाभावनिवेशेऽपि 'वाच्यत्वं घटवृत्ति तादात्म्यसंबन्धेन वाच्यत्वात्' इत्यत्र सद्धेतौ अव्याप्तिः । तादात्म्यसबन्धेन वाच्यत्वं वाच्यत्वेऽस्ति । तत्र स्वरूपसंबन्धेन घटवृत्तित्वं च अस्तीति सद्धेतुरयम् । अत्र घटवृत्तित्वं साध्यम् । साध्यतावच्छेदकं घटवृत्तित्वत्वम् । तथा च साध्यतावच्छेदकावच्छिन्नसाध्याभावः घटवृत्तित्वत्वावच्छिन्नघटवृत्तित्वाभावः । तदधिकरणं घटत्वाभावः । घटत्वाभावस्य घटवृत्तित्वविरहात् । तन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वं घटत्वाभावतादात्म्यरूपम् । तथा च घटत्वाभावतादात्म्यं साध्याभाववद्वृत्तित्वरूपम् । तद्वृत्तिः धर्मः प्रकृतसाध्याभाववत्त्वरूपो धर्मः-घटवृत्तित्वाभाववत्त्वम् इति यावत् । घटत्वाभावतादात्म्यं घटत्वाभाववृत्ति । न तु घटवृत्ति । अतः घटत्वाभावतादात्म्ये घटवृत्तित्वाभाववत्त्वं वर्तते । तथा च साध्याभाववद्वृत्तित्ववृत्तिः धर्मः घटवृत्तित्वाभाववत्त्वम् । तच्च साध्याभाववद्वृत्तित्वत्वघटकम् । घटवृत्तित्वाभाववद्वृत्तित्वत्वे घटवृत्तित्वाभाववत्त्वस्य प्रविष्टत्वात् । तदवच्छिन्नाभावः 'घटवृत्तित्वाभाववान् नास्ति' इति प्रतीतिसिद्धः अभावः वृत्तिमति घटे वर्तमानः । तद्वृत्त्वं वाच्यत्वे नास्ति । घटवृत्तित्वाभाववतः

वाच्यत्वत्वस्य वाच्यत्वे सत्त्वेन घटवृत्तित्वाभाववदभावस्य वाच्यत्वेऽसत्त्वात् इति अव्याप्तिः दुर्वारैव इति भावः।

ननु साध्याभाववद्वृत्तित्वत्वघटकत्वं स्वाविषयकप्रतीत्यविषयतत्कत्वरूपं यदि स्यात् तदैव साध्याभाववत्त्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वं भवति। स्वं—साध्याभाववत्त्वम्। तदविषयकप्रतीतिः—साध्याभाववद्वृत्तित्वत्वप्रतीतिः न भवति। तस्यां साध्याभाववत्त्वस्यापि विषयत्वात्। किन्तु उदासीनघटादिप्रतीतिः। तदविषयत्वात् साध्याभाववद्वृत्तित्वत्वस्य स्वाविषयकप्रतीत्यविषयतत्कत्वरूपं घटकत्वं साध्याभाववत्त्वे भवति। यदि तु स्वनिष्ठमुख्यविशेष्यताशून्यप्रतीत्यविषयतत्कत्वरूपं घटकत्वं लक्षणे निवेश्यते तदा ईदृशं घटकत्वं साध्याभाववत्त्वस्य न संभवति। साध्याभाववत्त्वनिष्ठमुख्यविशेष्यताशून्यप्रतीतिः साध्याभाववद्वृत्तित्वत्वप्रतीतिरपि। तद्विषयत्वस्यैव साध्याभाववद्वृत्तित्वत्वे सत्त्वेन स्वनिष्ठमुख्यविशेष्यताशून्यप्रतीत्यविषयतत्कत्वरूपस्य साध्याभाववद्वृत्तित्वत्वघटकत्वस्य साध्याभाववत्त्वे दुरुपपादत्वात्। एवं च साध्याभाववत्त्वावच्छिन्नाभावमादाय नाव्याप्तिरित्याशङ्क्य तादृशघटकतानिवेशे प्रयासगौरवं भवतीति आलोच्य पूर्वोक्तदोषाणां निरासार्थं तत्तत्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकाभावं विवक्षति दीधितिकारः।

केवलान्वयिसाध्यकस्थले वृत्तित्वत्वेन घटाभावमादाय समन्वयः। तस्य जगद्वृत्तित्वत्वसमनियतप्रतियोगिताकत्वात्। घटवृत्तित्वावच्छिन्नसाध्यकस्थले घटवृत्तित्वाभाववत्त्वावच्छिन्नप्रतियोगितायाः साध्याभाववद्वृत्तित्वत्वसमनियतत्वविरहात् न तस्य लक्षणघटकत्वम्। घटत्वाभावतादात्म्यत्वावच्छिन्नाभाव एव लक्षणघटकः। स च हेतौ वाच्यत्वे अस्ति इति नाव्याप्तिरित्याशयः।

गादाधरी

साध्याभावस्य तत्तद्व्यक्तित्वेन निवेशनम्

अत्र **साध्याभावस्य** साध्याभावत्वेन सामान्यतो निवेशे व्यभिचारिणि निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगिताया व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्साध्याधिकरणवृत्तित्वसाधारण - साध्याभाववद्वृत्तित्वत्वाव्यापकत्वेन तादृशाभावस्य लक्षणाघटकतया वृत्तित्वसामान्याभावस्य तथाविधप्रतियोगिताकस्य च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तितया अतिव्याप्तिरिति तत्तद्व्यक्तित्वेन अभावस्य **व्याप्यतावच्छेदककोटिनिवेशनलाभाय तत्तदिति** [पृ. 540] ।

विवरणम्

अत्र साध्याभावस्येत्यादि [पृ. 546] । अस्मिन् लक्षणे साध्याभावत्वेन सामान्यरूपेण साध्याभावस्य निवेशे 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः । तत्र हि निर्धूमवृत्तित्वत्वावच्छिन्ननिर्धूमवृत्तित्वनिष्ठ - प्रतियोगिताकाभावमादाय अतिव्याप्तिर्वारणीया । सामान्यरूपेण साध्याभावस्य निवेशे व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यापि साध्याभावपदेन ग्रहीतुं शक्यतया तदधिकरणजगद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वं निर्धूमवृत्तित्वाभावस्य न संभवति । जगद्वृत्तित्वत्वस्य सधूमवृत्तित्वेऽपि सत्त्वेन तत्र निर्धूमवृत्तित्वाभावीय - प्रतियोगितायाः असत्त्वात् । तथा च निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्य लक्षणाघटकतया वृत्तित्वत्वेन वृत्तित्वाभावस्य च वृत्तिमद्वृत्तित्वासंभवात् घटत्वेन वृत्तित्वाभाव एव लक्षणघटकः । स च हेतौ वन्हावप्यस्तीति अतिव्याप्तिः । तद्वारणाय साध्याभावस्य साध्याभावत्वेन सामान्यरूपेण न निवेशः । किन्तु तत्तद्व्यक्तित्वेनैव इति सूचनाय दीधितौ **तत्तत्पदम्** [पृ. 540] । तथा च **तत्तत्साध्याभाव** [पृ. 540] । इत्यनेन

धूमत्वेन धूमाभावं गृहीत्वा तदधिकरणवृत्तित्वत्वसमनियतप्रतियोगिताकः अभावः इत्यनेन निर्धूमवृत्तित्वत्वावच्छिन्नाभावं गृहीत्वा तद्वत्त्वस्य निर्धूमायोगोलकवृत्तौ वन्हौ विरहात् नातिव्याप्तिरिति अतिव्याप्तिर्वारणीया इति भावः।

व्याप्यतावच्छेदककोटीति [पृ. 546]। व्यापिका-प्रतियोगिता व्याप्यम्-साध्याभाववद्वृत्तित्वत्वम्। तदवच्छेदककोटौ प्रविष्टस्य साध्याभावस्य तत्तद्व्यक्तित्वेन निवेश इति भावः।

गादाधरी

यद्यपि यत्किञ्चित्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकवृत्तिमद्वृत्तियावदभाववत्त्वं व्यभिचारिसाधारणम्; यावन्तः साध्याभावाः प्रत्येकं तदधिकरणवृत्तित्वत्वसमनियतैकप्रतियोगितायाः नानाविपक्षके अप्रसिद्धिः। तत्तद्विपक्षावृत्तित्वावच्छिन्नाभाववत्तत्तद्विपक्षवृत्तित्वत्वव्याप्यैकप्रतियोगित्वाप्रसिद्धेः, तथापि यावतामभावानां प्रत्येकाधिकरणवृत्तित्वत्वसमनैयत्यस्य प्रत्येकं प्रतियोगितान्वयेन एतदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताको योऽभावः तदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकश्च योऽभाव तद्वत्त्वम् इत्येवंरीत्या निवेशान्नानुपपत्तिः। एतल्लक्षणे साध्याभावसमुदायः न समुदायत्वेन प्रविष्टः, अपि तु प्रातिस्विकरूपेण इति कूटघटिताद्विशेषः।

विवरणम्

ननु तत्तद्व्यक्तित्वेन निवेशेऽपि निवेशक्रमः कीदृशः? यत्किञ्चित्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकवृत्तिमद्वृत्तियावदभाववत्त्वमिति रीत्यादरे 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः। यत्किचित्साध्याभावपदेन धूमत्वेन घटाभावस्य ग्रहणे तद्वज्जगद्वृत्तित्वत्वसमनियतप्रतियोगिताकः अभावः घटत्वेन जगद्वृत्तित्वाभाव एव भवतीति तद्वत्त्वस्य हेतौ सत्वात्

अतिव्याप्तिः । यावन्तः साध्याभावाः प्रत्येकं तत्तदधिकरणवृत्तित्वत्वसमनियतैकप्रतियोगिताकः अभावः इति निवेश्यते चेत् 'वन्हिमान् धूमात्' इत्यादौ नानाविपक्षके तादृशप्रतियोगितायाः अप्रसिद्धिः । तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावानामपि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकयावदभावान्तर्गततया प्रत्येकं तत्तदधिकरणतत्तद्विपक्षवृत्तित्वत्वव्याप्यायाः एकस्याः प्रतियोगिताया अप्रसिद्धिरिति आशंका ।

समाधानं तु—यावन्तः साध्याभावाः प्रत्येकं तत्तदधिकरणवृत्तित्वत्वसमनियतत्वं प्रत्येकं प्रतियोगितायां निवेश्यते । तथा च एतदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकः यः अभावः तदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकश्च योऽभावः तत्समुदायवत्त्वं व्याप्तिः इति निवेशात् नानुपपत्तिः । एतदभावपदेन वन्हित्वेन वह्न्यभावस्य ग्रहणे तद्वद्वृत्तित्वत्वसमनियतप्रतियोगिताकः निर्वन्हिवृत्तित्वाभावः । तदभावपदेन तद्ध्रदावृत्यभावस्य ग्रहणे तदधिकरण-तद्ध्रदवृत्तित्वत्वसमनियतप्रतियोगिताकाभावः तद्ध्रदवृत्तित्वाभावः । तादृशाभावद्वयवत्त्वं धूमेऽस्तीति लक्षणसमन्वयः ।

एकविपक्षकस्थले तादृशैकप्रतियोगिता तद्विपक्षवृत्तित्वाभावीयैव प्रसिद्धा इति नानाविपक्षकेत्युक्तम् ।

ननु एवमपि सर्वेषामपि साध्याभावानां तत्तद्व्यक्तित्वेन लक्षणे निवेशात् कूटघटितलक्षणात् अस्य लक्षणस्य को विशेष इत्याशङ्क्य एतल्लक्षणे साध्याभावसमुदायः समुदायत्वेन रूपेण न निविष्टः । किन्तु तत्तद्व्यक्तित्वेन । कूटघटितलक्षणे तु समुदायत्वेन निविष्ट इति भेदः इत्याह—**एतल्लक्षणे इति** [पृ. 547] ।

गादाधरी

[वृत्तिमद्वृत्तित्वविशेषणवैयर्थ्यशङ्का तत्परिहारश्च]

अथात्र स्वपदं न तत्तदभावीयप्रतियोगितात्वरूपेण प्रतियोगितापरम्। साध्याभाववद्वृत्तित्वातिरिक्तेऽपि तदभावीयप्रतियोगितान्तरसत्त्वादिति तत्तत्प्रतियोगिताव्यक्तिपरं तद्वाच्यम्। तथा च यत्किञ्चित्प्रतियोगितानिरूपकाशेषस्याभावस्य अतिव्यापकतया यावत्यः तादृश्यः प्रतियोगिताः प्रत्येकं तन्निरूपकाभाववत्त्वं निवेशनीयम्। तथा च समानाधिकरणधर्मावच्छिन्न-जगद्वृत्तिसामान्याभाव - प्रतियोगितानिरूपकवृत्तिमद्वृत्त्यभावाप्रसिद्ध्या अव्याप्तिरिति वृत्तिमद्वृत्त्यभावीयत्वेन यावत्प्रतियोगिता निवेशनीया। तथा च तन्निरूपकाभावे वृत्तिमद्वृत्तित्वविशेषणं व्यर्थम्।

यावत्त्वविशेषणमपि तथा इति चेत्। नोपादीयत एव तत्र तद्विशेषणम्। वृत्तिमद्वृत्त्यभावीययावत्प्रतियोगितानिवेशलाभायैव प्रतियोगिताविशेष्यीभूताभावे वृत्तिमद्वृत्तित्वयावत्त्वाभिधानात्।

विवरणम्

अथात्रेति [पृ॰ 549] स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकाभावः साध्याभाववद्वृत्तित्वाभावपदेन विवक्षित इति दीधितौ उक्तम्। तत्र स्वपदं तत्तदभावीय-प्रतियोगितात्वेन सामान्यरूपेण प्रतियोगितापरं वा तत्तत्प्रतियोगिताव्यक्तिपरं वा। आद्ये साध्याभाववद्वृत्तित्वत्वसमनियतत्वं प्रतियोगितायां दुर्घटम्। तत्तत्साध्याभाववद्वृत्तित्वाभावीयप्रतियोगिता तत्तत्साध्याभाववद्वृत्तित्वे पूर्वक्षणवृत्तित्वविशिष्टतत्तत्साध्याभाववद्वृत्तित्वाभावाभावे च वर्तत इति प्रतियोगिताद्वयं भवति। तदुभयसाधारणं तत्तत्साध्याभाववद्वृत्तित्वाभावीयप्रतियोगितात्वं भवति।

एवं च साध्याभाववद्वृत्तित्वाभावीयप्रतियोगितात्वेन प्रतियोगिता पूर्वक्षणवृत्तित्वविशिष्टस्वाभावेऽप्यस्ति । तत्र तु साध्याभाववद्वृत्तित्वत्वं नास्तीति स्वव्यापकसाध्याभाववद्वृत्तित्वत्वकत्वरूपं साध्याभाववद्वृत्तित्वत्वव्याप्यत्वं प्रतियोगितायां दुर्घटमिति असंभवः ।

तत्तत्प्रतियोगिताव्यक्तिपरमिति द्वितीयपक्षे साध्याभाववद्वृत्तित्वनिष्ठप्रतियोगिताव्यक्तेः व्याप्यत्वसत्त्वात् न दोषः । परं तु 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि निर्धूमवृत्तित्वत्वसमनियत - व्यधिकरणघटत्वाद्यवच्छिन्ननिर्धूमवृत्तित्वनिष्ठप्रतियोगिताव्यक्तिनिरूपकाभावस्य वह्नौ सत्त्वात् अतिव्याप्तिर्भवति । तद्वारणाय तत्तत्साध्याभाववद्वृत्तित्वत्वसमनियताः यावत्यः प्रतियोगिताः प्रत्येकं तन्निरूपकाशेषभाववत्त्वं व्याप्तिरिति प्रतियोगितायां यावत्त्वं निवेश्य वक्तव्यम् । तथा सति निर्धूमवृत्तित्वत्वावच्छिन्ननिर्धूमवृत्तित्वनिष्ठप्रतियोगिताया अपि यावदन्तर्गतत्वात् तन्निरूपकाभावस्य वह्नौ अभावात् नातिव्याप्तिः ।

परं तु एवं सत्यपि 'वन्हिमान् धूमात्' इत्यादौ वन्हित्वेन घटाभावाधिकरणजगद्वृत्तित्वत्वसमनियतयावत्प्रतियोगितापदेन जगद्वृत्तित्वत्वरूपसमानाधिकरणधर्मावच्छिन्नजगद्वृत्तित्वनिष्ठ - प्रतियोगिताया अपि ग्रहीतुं शक्यतया तन्निरूपकस्य वृत्तिमद्वृत्तेरभावस्य अप्रसिद्धया अव्याप्तिः । जगद्वृत्तित्वत्वावच्छिन्नजगद्वृत्तित्वाभावस्य अवृत्तिगगनादिमात्रवृत्तेः वृत्तिमद्वृत्तित्वाभावात् । अतः प्रतियोगितायां वृत्तिमद्वृत्त्यभावनिरूपितत्वमपि विशेषणं देयम् । जगद्वृत्तित्वत्वावच्छिन्नजगद्वृत्तित्वनिष्ठप्रतियोगितायाः वृत्तिमद्वृत्त्यभावनिरूपितत्वं नास्ति इति घटत्वावच्छिन्नजगद्वृत्तित्वनिष्ठप्रतियोगितैव ग्राह्या । तन्निरूपकस्य घटत्वेन जगद्वृत्तित्वाभावस्य हेतौ सत्त्वात् नाव्याप्तिः ।

एवं च स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापिकाः यावत्यः वृत्तिमद्वृत्यभावनिरूपिताः प्रतियोगिताः तन्निरूपकवृत्तिमद्वृत्तियावदभाववत्त्वं लक्षणं पर्यवस्यति । तत्र अभावे यावत्त्वविशेषणं वृत्तिमद्वृत्तित्वविशेषणं च व्यर्थम् । प्रतियोगितायां तद्विशेषणादेव अभावे तद्विशेषणप्रयोजननिर्वाहात्—इति आक्षेपः ।

समाधानं तु - अभावे तद्विशेषणद्वयं न दीयत एव । 'वृत्तिमद्वृत्तयः यावन्तः' इति दीधितिग्रन्थस्यापि प्रतियोगितायां वृत्तिमद्वृत्यभावीयत्वयावत्वविशेषणदाने एव तात्पर्यम्—इति ।

गादाधरी

भेदकूटात्मकव्यापकत्वपुरस्कारेण व्यापकत्वनिवेशप्रकारः

अत्र च गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वे स्वव्यापकतदभाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वस्य अव्यावर्तकव्यापकतान्तघटितत्वेन अभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नान्योन्याभावरूपव्यापकत्वपुरस्कारेण न प्रतियोगितानिवेशः संभवतीति तादृशावच्छेदकभेदकूटात्मकव्यापकत्वपुरस्कारेणैव तन्निवेशः ।

विवरणम्

अत्र चेत्यादि [पृ.551] । स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः इति दीधितिग्रन्थात् प्रतियोगितायाः स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकत्वेन रूपेण निवेश इति लभ्यते । तत्तु न संगच्छते - स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकत्वं नाम स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकत्वं नाम स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदः । लघुधर्म-

समनियतगुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वं नास्तीति पक्षे स्वव्यापकत्वाघटितं यत् तत्तत्साध्याभाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वं तल्लघु। तदपेक्षया स्वव्यापकत्वविशिष्टतत्तत्साध्याभाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वं गुरुधर्मः। तस्य अभावप्रतियोगितानवच्छेदकत्वात् तादृशगुरुधर्मावच्छिन्नप्रतियोगिताकभेदाप्रसिद्धया तादृशभेदरूपव्यापकत्वपुरस्कारेण प्रतियोगितायाः निवेशः न संभवति। किन्तु स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकं यद्यत् तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदसमुदाय एव व्यापकत्वम्। तेन रूपेणैव प्रतियोगितायाः निवेशः। दीधितेरपि अत्रैव तात्पर्यम्।

गादाधरी

न च-स्वव्यापकतत्तदभाववद्वृत्तित्वत्वकत्वतदभाववद्वृत्तित्वत्ववन्निष्ठान्योन्याभावप्रतियोगितावच्छेकत्वावच्छिन्नैकभेदोभयरूपेण प्रतियोगितानिवेशसंभवात् अवच्छेदकभेदकूटनिवेशनमफलम् इति - वाच्यम्।

घटभेदादिसाध्यकस्थले तदभावव्यक्तित्वेन घटत्वादिघटितस्य तदभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य स्वरूपतो घटत्वादिघटितघटवृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमपेक्ष्य गुरुशरीरतया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नैकभेदनिवेशासंभवात्।

विवरणम्

न च स्वव्यापकेति [पृ. 552]। व्याप्यत्व-व्यापकत्वयोः एकस्मिन् दले निवेश्य तेन रूपेण प्रतियोगितायाः निवेशः न क्रियते। किंतु स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वकत्वरूपव्याप्यत्व - तत्तत्साध्याभाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगिता -

-वच्छेदकत्वावच्छिन्नप्रतियोगिताक-एकभेदरूपव्यापकत्व-उभयरूपेण प्रतियोगितायाः निवेशः क्रियते । तत्र तत्तत्साध्याभाववद्वृत्तित्व-त्वव्यापकत्वशरीरे स्वव्यापकत्वस्याप्रवेशात् न गौरवावकाशः ।

एवञ्च तत्तद्व्यक्तित्वावच्छिन्नभेदकूटनिवेशनम् अफलमिति न च वाच्यम् । तथा निवेशेऽपि घटभेदसाध्यकस्थले 'घटभिन्नं पटत्वात्' इत्यत्र घटभेदाभाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वस्य घटभेदाभावत्वेन घटत्वघटितस्य घटवृत्तित्वत्व-वन्निष्ठभेदप्रतियोगितावच्छेदकत्वात् स्वरूपतो घटत्वघटितात् गुरुत्वेन अभावप्रतियोगितानवच्छेदकतया तादृशगुरुधर्मावच्छिन्न-प्रतियोगिताक - एकभेदरूपेण निवेशः न संभवति । किंतु तत्तत्साध्याभाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकं यत् यत् तत्तद्भेदकूटरूपेणैव प्रतियोगितायाः निवेशः कार्यः । तथा सति पृथक् व्याप्यत्वदलनिवेशापेक्षया तद्घटकं स्वव्यापकत्वमपि अन्तर्भाव्य स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्ववन्निष्ठभेदप्रति-योगितावच्छेदकं यद्यत् तत्तद्भेदरूपेणैव प्रतियोगिताया निवेश उचित इति ।

दीधितिः

तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्मेण अनवच्छिन्नप्रतियोगिताको बोध्यः ।

गादाधरी

कल्पान्तरेण तद्वद्वृत्तित्वाभावस्य परिष्कारः

अत्र कल्पे व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्व-समनियतप्रतियोगिताकस्य पर्वतवृत्तित्व-पर्वतान्यवृत्तित्वोभय-त्वावच्छिन्नाभावस्य पर्वताद्यवृत्तिवृत्तिमद्वृत्तेर्धूमादौ अभावात् एकमात्रवृत्तिहेतावपि तादृशप्रतियोगिताकस्य एतल्लक्षणावच्छिन्न-

वृत्तित्व - एतदन्यक्षणावच्छिन्नवृत्तित्वोभयत्वाद्यवच्छिन्नाभावस्य एतत्क्षणावृत्तौ वृतिमति वर्तमानस्य अभावात् असंभवः । तादृशाभावव्यावर्तनाय व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वनिवेशे गौरवम् । पर्वतवृत्तित्वत्वादिना जगद्वृत्तित्वसामान्याभावस्य व्यावृत्त्यसंभवश्च इत्यतः कल्पान्तरमनुसरति-**तत्तत्साध्याभावेति** [पृ. 553] ।

विवरणम्

दीधितौ 'तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन' [पृ. 553] इत्यादिना कल्पान्तरम् अनुसृतम् । तदवतारयति **गादाधर्याम्— अत्र कल्पे इत्यादिना** [पृ. 553] । तत्तत्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशकल्पे 'वन्हिमान् धूमात्' इत्यादौ अव्याप्तिः । वन्हित्वेन घटाभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकाभावः पर्वतवृत्तित्व-पर्वतान्यवृत्तित्वोभयाभावः । जगत् द्विविधम्-पर्वतः पर्वतान्यच्चेति । जगद्वृत्तित्वत्वं पर्वतवृत्तित्वे पर्वतान्यवृत्तित्वे च अस्ति । उभयाभावीयप्रतियोगितापि तत्रैव अस्ति । तादृशोभयाभावः पर्वतावृत्तौ वृत्तिमति पदार्थे वर्तते । तत्र पर्वतवृत्तित्वविरहेण तदभावप्रयुक्तस्य उभयाभावस्य सत्वात् । धूमरूपहेतौ तु पर्वतवृत्तित्वपर्वतान्यमहानसादिवृत्तित्वोभयसत्त्वेन उभयाभावो नास्तीति अव्याप्तिः ।

एवं 'एकमात्रवृत्तिहेतौ 'एतद्रूपवान् एतद्ररसात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववज्जगद्वृत्तित्वत्वसमनियतप्रतियोगिताकः अभावः एतत्क्षणावच्छिन्नजगद्वृत्तित्व - एतदन्यक्षणावच्छिन्नजगद्वृत्तित्वोभयाभावोऽपि एतत्क्षणावृत्तौ वृत्तिमति पदार्थे प्रसिद्धः । हेतौ एतद्रसे नास्ति । तस्य एतत्क्षणावच्छेदेन एतदन्यक्षणावच्छेदेन च एतद्घटरूपजगद्वृत्तित्वात् । तथा च प्रथमकल्पे सद्धेतौ सर्वत्रासंभवः । तद्वारणाय साध्याभाववद्वृत्ति-

त्वत्वसमनियतप्रतियोगितायां व्यासज्यवृत्तिधर्मानवच्छिन्नत्वनिवेशे गौरवम् ।

अपि च 'वन्हिमान् धूमात्' इत्यादौ पर्वतवृत्तित्वत्वेन विशेषरूपेण जगद्वृत्तित्वसामान्याभावस्यापि व्यधिकरणधर्मावच्छिन्न-साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकतया पर्वतावृत्तौ महानसमात्रवृत्तौ घटादौ वर्तमानतया तद्वत्त्वस्य धूमेऽभावात् अव्याप्तिः । पर्वतवृत्तित्वत्वेन रूपेण पर्वतरूपजगद्वृत्तित्वस्य तत्र सत्त्वात् । अतः कल्पान्तरमनुसरति इत्यर्थः । तथा च तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तः समानाधिकरणश्च यो धर्मः तद्धर्मानवच्छिन्नप्रतियोगिताकोऽभावः तत्तत्साध्यभाववद्वृत्तित्वाभाव इत्यनेन विवक्षणीयः ।

पर्वतवृत्तित्व-पर्वतान्यवृत्तित्वोभयत्वस्य साध्याभाववद्वृत्तित्वत्वातिरिक्तत्वात् समानाधिकरणत्वाच्च तदनवच्छिन्नप्रतियोगिताकत्वं नास्तीति तादृशोभयाभावः न लक्षणघटकः ।

एवं पर्वतवृत्तित्वत्वस्य जगद्वृत्तित्वत्वातिरिक्तत्वात् समानाधिकरणत्वाच्च तदनवच्छिन्नप्रतियोगिताकत्वं पर्वतवृत्तित्वत्वेन जगद्वृत्तित्वाभावस्य नास्तीति न तस्य लक्षणघटकता इति भावः ।

गादाधरी

अतिरिक्तान्तानिवेशे व्यधिकरणधर्मावच्छिन्नाभावमात्रस्य संग्रहात् व्यभिचारिमात्रे अतिव्याप्तिरिति तन्निवेशितम् ।

यद्यपि यथाश्रुतेन अनेन महानसवृत्तित्वत्वादिना व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभाववारणं न संभवति, महानसादिनिरूपितत्वविशिष्टवृत्तित्वत्वस्य साध्याभाववन्निरूपितत्वविशिष्टवृत्तित्वत्वान्यत्वविरहात्, तथापि साध्याभाववद्वृत्ति-

त्वत्वानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्यत्वशून्यत्वस्य अनवच्छिन्नान्तेन विवक्षणात् न दोषः। महानसवृत्तित्वत्वादि-निरूपितावच्छेद्यत्वस्य साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्था-निरूपितत्वात्।

न च—एवमपि साध्याभाववन्महानसवृत्तित्वत्वावच्छिन्ना-भाववारणम् अशक्यम्। तादृशधर्मनिरूपितावच्छेद्यतायां तद्घट-कसाध्याभाववद्वृत्तित्वत्वनिरूपितत्वस्य 'अधिकं तु' इत्यादिन्यायेन अव्याहतत्वात् इति—वाच्यम्।

गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकतया महानसवृत्तित्व-समनियतोपदर्शितगुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वात्।

विवरणम्

अतिरिक्तान्तानिवेशे इति [पृ॰ 555]। अतिरिक्तान्तानिवेशे समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावः इत्येतावन्मात्र-निवेशे 'धूमवान् वह्नेः' इत्यत्र समानाधिकरणधर्मानवच्छिन्नप्रति-योगिताकः अभावः व्यधिकरणधर्मावच्छिन्नाभाव एव भवति। तद्वत्त्वं वह्निरूपहेतावस्तीति अतिव्याप्तिः। तद्वारणाय अतिरिक्ता-न्तनिवेशः। तन्निवेशे तु निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावोऽपि लक्षणघटकः। तदीयप्रतियोगितायां समानाधिकरणधर्मावच्छिन्न-त्वसत्त्वेऽपि साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मा-वच्छिन्नत्वविरहात् तस्य अभावस्य तदनवच्छिन्नप्रतियोगिता-कत्वात् इति नातिव्याप्तिः।

'समानाधिकरण' इति विशेषणानुपादाने केवलान्वयिसाध्य-कस्थले व्यधिकरणधर्मावच्छिन्नाभावस्य घटत्वेन जगद्वृत्तित्वा-भावस्य संग्रहो न स्यात्। तदीयप्रतियोगितायां साध्याभावव-द्वृत्तित्वत्वातिरिक्तघटत्वावच्छिन्नत्वसत्त्वात्। अतिरिक्तधर्मान-

वच्छिन्नत्वविरहात् । 'समानाधिकरणे'ति धर्मे विशेषिते तु तदीयप्रतियोगितायां समानाधिकरणधर्मावच्छिन्नत्वं नास्ति इति तस्य अभावस्य लक्षणघटकत्वोपपत्तिरिति भावः ।

यद्यपीति [पृ. 555] । साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावविवक्षणेऽपि 'वह्निमान् धूमात्' इत्यादौ महानसवृत्तित्वत्वेन वन्हित्वेन घटाभाववद्वृत्तित्वाभाववारणं न संभवति । महानसस्यापि वन्हित्वेन घटाभाववत्त्वात् वन्हित्वेन घटाभाववद्वृत्तित्वत्वातिरिक्तं महानसवृत्तित्वत्वं न भवति । अतः वन्हित्वेन घटाभाववद्वृत्तित्वत्वातिरिक्तो धर्मः घटत्वादिरेव । तदनवच्छिन्नप्रतियोगिताकत्वं उक्ताभावस्य वर्तते । तद्वत्त्वं च धूमे नास्तीति अव्याप्तिरिति शंका ।

समाधानं तु-साध्याभाववद्वृत्तित्वत्वानिरूपिता समानाधिकरणधर्मनिरूपिता च या अवच्छेद्यता तच्छून्यप्रतियोगिताकाभावः अत्र विवक्षितः । महानसवृत्तित्वत्वेन साध्याभाववद्वृत्तित्वाभावीयप्रतियोगितायां महानसवृत्तित्वत्वावच्छिन्नत्वमस्ति । महानसवृत्तित्वत्वनिरूपितावच्छेद्यत्वमस्तीति यावत् । अस्यां च अवच्छेद्यतायां साध्याभाववद्वृत्तित्वत्वानिरूपितत्वस्य महानसवृत्तित्वनिरूपितत्वस्य च सत्त्वात् तादृशावच्छेद्यताशून्यत्वं प्रतियोगितायां नास्तीति तस्य अभावस्य न लक्षणघटकत्वम् इति भावः ।

न च—साध्याभाववद्वृत्तित्वत्वस्य महानसवृत्तित्वत्वस्य च एकत्वात् कथं साध्याभाववद्वृत्तित्वानिरूपितत्वम् अवच्छेद्यतायाम् - इति वाच्यम् । साध्याभाववद्वृत्तित्वत्वानिरूपितत्वं नाम साध्याभावविशिष्टाधिकरणनिरूपितवृत्तित्वत्वानिरूपितत्वम् । साध्याभावाविशेषित-महानसवृत्तित्वत्वनिरूपितायाम् अवच्छेद्य-

तायां साध्याभावविशिष्टाधिकरणनिरूपितवृत्तित्वत्वानिरूपितत्वम् अस्तीत्याशयात्। तथा च साध्याभावनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपकवृत्तित्वत्वनिष्ठनिरूपकताकत्वाभाववत्त्वं साध्याभाववद्वृत्तित्वत्वानिरूपितत्वमिति हृदयम्।

पुनः शंकते—**न चैवमपीति** [पृ. 556]। 'साध्याभाववन्महानसवृत्तित्वं नास्ति' इति प्रतीतिसिद्धः योऽभावः तदीयप्रतियोगितानिष्ठायां अवच्छेद्यतायां साध्याभावविशिष्टाधिकरणवृत्तित्वत्वनिरूपितत्वं तादृशसमानाधिकरणधर्मनिरूपितत्वं च वर्तते। 'अधिकं तु प्रविष्टं चेत्' इति न्यायात्। न तु तादृशविशिष्टवृत्तित्वानिरूपितत्वमिति तदनिरूपितावच्छेद्यताशून्यप्रतियोगिताकाभावः उक्ताभावोऽपि भवति। तद्वत्त्वस्य धूमेऽभावात् अव्याप्तिः तदवस्थेति भावः।

समाधत्ते—**गुरुधर्मस्येति** [पृ. 556]। साध्याभाववन्महानसवृत्तित्वत्वस्य स्वसमनियतमहानसवृत्तित्वत्वापेक्षया गुरुत्वात् अभावप्रतियोगितावच्छेदकत्वं नास्तीति साध्याभाववन्महानसवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभाव एव अप्रसिद्ध इति न तमादाय अव्याप्तिरिति भावः।

गादाधरी

गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वेऽतिव्याप्तिशङ्का

अथ गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्याभावपदस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावपरतया 'धूमवान् वह्नेः' इत्यादावतिव्याप्तिः। धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वत्वस्य समनियतधूमत्वाद्यवच्छिन्नाभाववद्वृत्तित्वत्वापेक्षया गुरुत्वेन अभावप्रतियोगितावच्छेदकत्वविरहेण तदवच्छिन्नाभावाप्रसिद्धेः। धूमत्वाद्यवच्छिन्नाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च धूम-

त्वाद्यवच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वत्वरूप-विशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य निरुक्ताभाव-विशेषणानाक्रान्तत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभाववद्वृत्तित्वाभावस्यैव लक्षणघटकत्वात् ।

विवरणम्

पुनः शंकते—अथेति [पृ. 558] अत्र लक्षणे साध्याभाव-पदस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्न-प्रतियोगिताकाभावपरतायाः पूर्वमुक्तत्वात् साध्यतावच्छेदका-वच्छिन्न-व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविशि-ष्टाधिकरणनिरूपित - वृत्तित्वत्वानिरूपिता समानाधिकरणधर्म-निरूपिता च या अवच्छेद्यता तच्छून्यप्रतियोगिताकाभाव एव साध्याभाववद्वृत्तित्वाभाव इत्यनेन विवक्षित इति वक्तव्यम् । तथा सति 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः । तत्र हि निर्धू-मवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावमादाय अतिव्याप्तिर्वारिणीया । निर्धूमवृत्तित्वत्वं नाम धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वत्वम् । तथा च निर्धूमवृत्तित्वत्वावच्छिन्नाभावीयप्रतियोगितायां धूमत्वा-वच्छिन्नधूमाभाववद्वृत्तित्वत्वनिरूपिता अवच्छेद्यता अस्ति । तस्यां च अवच्छेद्यतायां धूमत्वावच्छिन्न-व्यापकतावच्छेदकत्व-विशिष्टरूपावच्छिन्न-प्रतियोगिताकाभाववद्वृत्तित्वत्वरूपविशिष्ट-पदार्थनिरूपितत्वं नास्ति । तथा च तदनिरूपितधूमाभावव-द्वृत्तित्वत्वरूपसमानाधिकरणधर्मनिरूपितावच्छेद्यतावत्प्रतियोगि-ताकः निर्धूमवृत्तित्वाभावः । न तु तादृशावच्छेद्यताशून्यप्रतियो-गिताकाभाव इति तस्य लक्षणाघटकतया न तमादाय अतिव्याप्ति-वारणं शक्यम् ।

न च—धूमत्वावच्छिन्नव्यापकतावच्छेदकत्वविशिष्टधूमत्वा-वच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताका -

भावमादाय अतिव्याप्तिर्वारणीया । तदीयप्रतियोगितानिष्ठावच्छेद्यतायां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थनिरूपितत्वस्यैव सत्त्वेन तदनिरूपितावच्छेद्यताशून्यप्रतियोगिताकत्वस्य उक्ताभावे सत्त्वात् इति-वाच्यम् ।

धूमत्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्न-प्रतियोगिताकाभाववद्वृत्तित्वत्वस्य धूमत्वावच्छिन्नव्यापकतावच्छेदकत्वाघटितं यत् धूमत्वावच्छिन्नाभाववद्वृत्तित्वत्वम्, तदपेक्षया गुरुत्वेन अभावप्रतियोगितावच्छेदकत्वविरहात् तदवच्छिन्नप्रतियोगिताकाभावस्य अप्रसिद्धया तमादायापि अतिव्याप्तिवारणासंभवात् । तथा च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभाववद्वृत्तित्वाभावस्य घटत्वेन धूमाभाववद्वृत्तित्वं नास्तीति प्रतीतिसिद्धस्य अभावस्यैव लक्षणघटकत्वम् । तदीयप्रतियोगितायां व्यधिकरणधर्मावच्छिन्नायां समानाधिकरणधर्मनिरूपितावच्छेद्यताशून्यत्वसत्त्वात् । तादृशाभावस्य वन्हिरूपहेतौ सत्त्वात् अतिव्याप्तिरित्याक्षेपः ।

गादाधरी

यदि च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य तेन रूपेण न निवेशः । अपि तु तत्तदभावत्वेनैव । एतदेव सूचयितुं तत्तत्पदमुपात्तम् ।

एवं च तत्तद्व्यक्तित्वेन धूमाभावघटिततदभाववद्वृत्तित्वत्वावच्छिन्नाभावस्य लक्षणघटकतया न धूमादिसाध्यके अतिव्याप्तिरित्युच्यते, तदापि 'घटभिन्नं' मेयत्वात् इत्यादौ अतिव्याप्तिः । तत्र तद्व्यक्तित्वेन रूपेण घटभेदाभावघटिततत्तद्व्यक्तिमद्वृत्तित्वत्वापेक्षया लघोः तत्समनियतस्य किञ्चि-

द्विशेषणानवच्छिन्नघटत्वघटितघटवृत्तित्वत्वस्यैव अभावप्रतियोगि-तावच्छेदकतया तद्व्यक्तिमद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः। घटवृत्तित्वत्वावच्छिन्नप्रतियोगितायाः साध्याभाववद्वृत्तित्वत्वरूप-विशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य लक्षणघटकत्वा-संभवात् व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छि-न्नाभावस्यैव तथात्वात्।

विवरणम्

यदि चेत्यादि [पृ. 560]। साध्यतावच्छेदकावच्छिन्नव्या-पकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावत्वेन रूपेण साध्यता-वच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभा-वस्य न निवेशः। किन्तु तत्तद्व्यक्तित्वेनैव निवेशः। एतत्सूच-नायैव दोधितौ तत्तत्साध्याभाववदिति तत्तत्पदमुपात्तम्। एवं च 'धूमवान् वह्नेः' इत्यत्र तत्तद्व्यक्तित्वेन रूपेण धूमत्वावच्छिन्नधूमा-भावघटितं यत् धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वत्वं तदवच्छिन्ना-भावः लक्षणघटकः। तदीयप्रतियोगितानिष्ठावच्छेद्यतायां तत्त-द्व्यक्तिमद्वृत्तित्वत्वानिरूपितत्वविरहेण तदनिरूपितावच्छेद्यता-शून्यप्रतियोगिताकत्वस्य तत्तद्व्यक्तिमद्वृत्तित्वत्वावच्छिन्नाभावे अक्षतत्वात् तस्य अभावस्य हेतौ वन्हौ विरहात् नातिव्याप्तिः इत्यपि नाशङ्कनीयम्। तत्तद्व्यक्तित्वेन साध्याभावनिवेशेऽपि तत्त-द्व्यक्तिमद्वृत्तित्वत्वानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्य-ताशून्यप्रतियोगिताकाभाव एव साध्याभाववद्वृत्तित्वाभाव इति फलितम्।

एवं सति 'धूमवान् वह्नेः' इत्यत्र उक्तरीत्या अतिव्याप्ति-वारणेऽपि 'घटभिन्नं मेयत्वात्' इत्यत्र व्यभिचारिणि अतिव्याप्तिः। घटभेदाभाववति-घटत्ववति घटे मेयत्वसत्त्वात् अयं व्यभिचारी। अत्र तद्व्यक्तित्वेन रूपेण घटभेदाभावरूपसाध्याभावघटितं वृत्तित्वत्वं

नाम तद्व्यक्तिमद्वृत्तित्वत्वम् । तद्व्यक्तिर्नाम घटभेदाभावः—घटत्वमिति यावत् । तद्व्यक्तिमद्वृत्तित्वत्वं तद्व्यक्तित्वानवच्छिन्नघटत्वघटितं यत् घटवृत्तित्वत्वं तदपेक्षया गुरु । तद्व्यक्तिमद्वृत्तित्वत्वं नाम तद्व्यक्तित्वविशिष्टघटत्ववद्वृत्तित्वत्वम् । घटवृत्तित्वत्वं नाम स्वरूपतः घटत्वघटितं तद्व्यक्तित्वानवच्छिन्नघटत्वघटितम् । तथा च तद्व्यक्तित्वानवच्छिन्नघटत्वघटितवृत्तित्वत्वापेक्षया तद्व्यक्तित्वावच्छिन्नघटत्वघटितं तद्व्यक्तिमद्वृत्तित्वत्वं गुरु । तच्छरीरे तद्व्यक्तित्वस्य अधिकस्य प्रवेशात् । तथा च तद्व्यक्तिमद्वृत्तित्वत्वस्य अभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नप्रतियोगिताकाभावः अप्रसिद्ध इति न तमादाय अतिव्याप्तिवारणसंभवः । घटवृत्तित्वत्वावच्छिन्नाभावस्य प्रसिद्धत्वेऽपि तदीयप्रतियोगितानिष्ठावच्छेद्यतायां तद्व्यक्तिमद्वृत्तित्वत्वरूपविशिष्टपदार्थनिरूपितत्वस्य समानाधिकरणधर्मनिरूपितत्वस्य च सत्त्वेन तद्व्यक्तिमद्वृत्तित्वत्वानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्यतावत्प्रतियोगिताकत्वमेव घटवृत्तित्वत्वावच्छिन्नाभावेऽस्ति । न तु तादृशावच्छेद्यताशून्यप्रतियोगिताकत्वमिति न तस्याभावस्यापि लक्षणघटकत्वम् । किं तु व्यधिकरणघटत्वेन घटवृत्तित्वाभावस्यैव समानाधिकरणधर्मनिरूपितावच्छेद्यताशून्यप्रतियोगिताकत्वेन लक्षणघटकतया तद्वत्त्वस्य मेयत्वरूपहेतौ सत्त्वात् अतिव्याप्तिरिति भावः ।

गादाधरी

यदि च अभावधर्मः विशेषणविधया न निवेश्यते, अपि तु अभावप्रभृतिरेव । अभावे तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वम् उपलक्षणविधया निवेश्यते । एतल्लाभायैव तत्तत्पदोपादानमपि, न तु तत्तद्व्यक्तित्वेन अभावनिवेशलाभार्थम् । उपलक्षणीभूतप्रतियोगिताविशेषणेक

अभावान्तरव्यावृत्तिसंभवे तत्तद्व्यक्तित्वस्य उपलक्षणतया निवेशे प्रयोजनविरहात् ।

एवञ्च घटवृत्तित्वावच्छिन्नाभावोऽपि उक्तस्थले लक्षणघटकः । घटभेदाभावस्य घटत्वस्य तत्प्रतियोगितावच्छेदकघटकत्वात् । प्रतियोगिताविशेषोपलक्षिताभाववद्वृत्तित्वपर्याप्तनिरूपकताकान्यत्वपर्यन्तानिवेशात् धूमादिसाध्यकस्थले निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकशरीरे अभावविशेषणस्य अधिकस्य निवेशेऽपि न क्षतिः ।

विवरणम्

यदि चेत्यादि [पृ. 562] । अभावधर्मः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वम् । तस्य विशेषणविधया लक्षणे न निवेशः । किं तु उपलक्षणविधयैव निवेशः । उपलक्षणस्यापि व्यावर्तकत्वात् अभावपदेन साध्याभावातिरिक्तस्य अभावस्य न ग्रहणप्रसक्तिः । एवं च अभाववद्वृत्तित्वत्वानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्यताशून्यप्रतियोगिताकाभाव एव साध्याभाववद्वृत्तित्वाभाव इत्यनेन विवक्षितः ।

एवं च 'घटभिन्नं मेयत्वात्' इत्यत्र घटवृत्तित्वत्वावच्छिन्नाभावोऽपि लक्षणघटकः । तदीयप्रतियोगितानिष्ठावच्छेद्यतायां घटत्वरूपाभाववद्वृत्तित्वत्वनिरूपितत्वस्य सत्त्वेन तदनिरूपितावच्छेद्यताशून्यप्रतियोगिताकत्वस्य घटवृत्तित्वत्वावच्छिन्नाभावे सत्त्वात् तस्यापि लक्षणघटकतया तद्वत्त्वस्य हेतावभावान्नातिव्याप्तिः ।

यद्यपि 'धूमवान् वह्नेः' इत्यत्र साध्याभावस्य जात्यतिरिक्तस्य स्वरूपतः भानासंभवात् लक्षणघटके निर्धूमवृत्तित्वत्वावच्छिन्नाभावे धूमाभावत्वविशिष्टाभाववद्वृत्तित्वत्वनिरूपितावच्छेद्यतावत्प्रतियोगिताके अभाववद्वृत्तित्वत्वपर्याप्तनिरूपकता-

कान्यत्वरूपस्य अनिरूपितत्वस्य अवच्छेद्यतायां सत्त्वेन तदनिरूपितावच्छेद्यताशून्यप्रतियोगिताकत्वविरहात् कथं निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्य लक्षणघटकत्वमिति शंका भवति, तथापि प्रतियोगिताविशेषोपलक्षिताभाववद्वृत्तित्वत्वपर्याप्तनिरूपकताकान्यत्वं अनिरूपितान्तेन न विवक्ष्यते । किं तु अभाववद्वृत्तित्वत्वनिष्ठनिरूपकताकान्यत्वमेव । निर्धूमवृत्तित्वत्वशरीरे धूमाभावविशेषणतया धूमाभावत्वस्य अधिकस्य प्रवेशेऽपि अभाववद्वृत्तित्वत्वरूपत्वमक्षतमिति तन्निष्ठनिरूपकताकान्यत्वं अवच्छेद्यतायां नास्तीति अभाववद्वृत्तित्वत्वानिरूपितावच्छेद्यताशून्यप्रतियोगिताकत्वं निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावेऽस्तीति तमादाय अतिव्याप्तिवारणं संभवतीति भावः ।

गादाधरी

न च—अभावप्रतियोगिकोटौ उपलक्षणतया भानस्य अनुभवविरुद्धत्वात् विशिष्टनिरूपितत्वाभावरूपस्य निरूपितत्वसंबन्धावच्छिन्नविशिष्टाभावरूपस्य वा विशिष्टानिरूपितत्वस्य प्रतियोगिकोटौ प्रतियोगिताविशेषस्य कथमुपलक्षणविधया निवेश इति—वाच्यम् ।

प्रतियोगितासंसर्गकज्ञान एव तादृशभानस्य तथात्वात् । 'जात्यवच्छिन्नप्रतियोगिताकोऽभावः' इत्याद्याकारस्य स्वरूपतो घटत्वाद्यवच्छिन्नप्रतियोगिताकाभावभानस्य सर्वसंमतत्वात् ।

प्रकृते च 'साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको योऽभावः तद्वद्वृत्तित्वत्वनिरूपितत्वप्रतियोगिकाभाववतः समानाधिकरणधर्मावच्छेद्यत्वस्य योऽभावः तद्वत्प्रतियोगिताकाः यावन्तोऽभावाः तद्वान् हेतुः' इत्याकारकव्याप्तिग्रहे प्रतियोगिताया विशेषणत्वेन अनुपपत्त्यभावात् । **अत एव** व्यापकतावच्छेदकत्वादेरपि उपलक्षणविधया भानोपपत्तिः ।

विवरणम्

न च अभावप्रतियोगिकोटाविति [पृ.564] । अभावप्रतियोगिशरीरे कस्यापि उपलक्षणतया भानं न संभवति । अनुभवविरुद्धत्वात् । प्रकृते च साध्याभाववद्वृत्तित्वत्वानिरूपितत्वं नाम साध्याभाववद्वृत्तित्वत्वनिरूपितत्वाभावः, निरूपितत्वसंबन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वाभावो वा । एतत्प्रतियोगिशरीरप्रविष्टे साध्याभावे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायाः उपलक्षणतया निवेशः कथं संभवतीति शङ्का ।

समाधानं तु—प्रतियोगितासंसर्गकाभावबुद्धावेव अभावप्रतियोगिशरीरे कस्यापि उपलक्षणतया भानं न संभवति । प्रतियोगिताप्रकारकाभावबुद्धौ तु प्रतियोगिशरीरे उपलक्षणतया भानं सर्वसंमतम् । यथा घटत्वावच्छिन्नप्रतियोगिताकाभावविषयकं 'जात्यवच्छिन्नप्रतियोगिताकोऽभावः' इत्याकारकं ज्ञानं भवति, तत्र ज्ञाने प्रतियोगिता प्रकारतया भासते, न तु संसर्गतया । तत्र च अभावप्रतियोगिकोटिप्रविष्टे घटत्वे जातित्वम् उपलक्षणतया भासते इति सिद्धान्तः । प्रकृतलक्षणेऽपि प्रतियोगितानां प्रकारविधया निवेशः क्रियते । तथा च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको योऽभावः तद्वद्वृत्तित्वत्वनिरूपितत्वनिष्ठप्रतियोगिताकाभाववत् समानाधिकरणधर्मनिरूपितं च यत् अवच्छेद्यत्वम्, तदभाववत्प्रतियोगिताकाः यावन्तोऽभावाः वृत्तिमद्वृत्तयः तद्वान् हेतुः' इत्याकारके व्याप्तिज्ञाने प्रतियोगितायाः प्रकारतया भानात् तत्र साध्याभावांशे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वम् उपलक्षणतया भातुमर्हतीति तात्पर्यम् ।

तथात्वादिति [पृ.564] । अनुभवविरुद्धत्वात् इत्यर्थः । **अत एवेति** [पृ.564] । प्रतियोगिताप्रकारकाभावबुद्धौ अभावप्रतियोगिकोटौ उपलक्षणतया भानस्य सर्वसंमतत्वादित्यर्थः ।

गादाधरी

न च—तादृशनिरूपितत्वप्रतियोगिकस्य तत्त्वावच्छिन्नप्रतियोगिताकस्य वा अभावस्य निवेशे निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगितानिष्ठावच्छेद्यतायामपि किंचिद्विशिष्टतादृशनिरूपितत्वत्वावच्छिन्नाभावसत्त्वात् तादृशाभावासंग्रह इति—वाच्यम् ।

तत्तदभाववद्वृत्तित्वत्वनिरूपितत्वत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावस्यैव निवेशनीयत्वात् । [एवं च तत्तद्व्यक्तित्वेन अभावनिवेशध्रौव्येण तत्तत्पदोपादानमपि साधु सङ्गच्छते - इति उच्यते], तदापि घटत्वभेदादिसाध्यके व्यभिचारिण्यतिव्याप्तिवारणमशक्यम् । निर्विशेषणकघटत्वादिवृत्तित्वत्वस्यैव तत्र घटत्वादिवृत्तित्वाभावं प्रति प्रतियोगितावच्छेदकतया घटत्वत्वादिरूपसाध्याभावस्य प्रतियोगितावच्छेदकशरीरे अनिवेशेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् ।

विवरणम्

न च तादृशनिरूपितत्वप्रतियोगिकस्येति [पृ.566] । साध्याभाववद्वृत्तित्वत्वानिरूपितत्वं हि साध्याभाववद्वृत्तित्वत्वनिरूपितत्वप्रतियोगिकः अभावः । अथ वा साध्याभाववद्वृत्तित्वत्वनिरूपितत्वत्वावच्छिन्नप्रतियोगिताकाभावः । उभयथापि निर्धूमवृत्तित्वाभावीयप्रतियोगितानिष्ठायां अवच्छेद्यतायां साध्याभाववद्वृत्तित्वत्वनिरूपितत्वस्य सत्त्वेऽपि पूर्वक्षणवृत्तित्वविशिष्टनिरूपितत्वस्य अभावात् तादृशनिरूपितत्वाभाववदवच्छेद्यताकप्रतियोगिताकत्वमेव निर्धूमवृत्तित्वत्वावच्छिन्नाभावेऽस्ति इति कथमसौ लक्षणघटक इति शङ्का ।

समाधानं तु—साध्याभाववद्वृत्तित्वत्वानिरूपितत्वं नाम साध्याभाववद्वृत्तित्वत्वनिरूपितत्वत्वावच्छिन्नप्रतियोगिताका-

भावः । तत्र अवच्छेदकतायां पर्याप्तिर्निवेश्यते । तथा च साध्याभाववद् वृत्तित्वत्वनिरूपितत्वत्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभावः साध्याभाववद्वृत्तित्वत्वानिरूपितत्वम् । निर्धूमवृत्तित्वाभावीयप्रतियोगितानिष्ठावच्छेद्यतायां पूर्वक्षणवृत्तित्वविशिष्टं यत् धूमाभाववद्वृत्तित्वत्वनिरूपितत्वम्, तदभावस्य सत्त्वेऽपि धूमाभाववद्वृत्तित्वत्वनिरूपितत्वत्वपर्याप्तावच्छेदकताकनिरूपितत्व - निष्ठप्रतियोगिताकः अभावः नास्ति । अधिके पूर्वक्षणवृत्तित्ववैशिष्टयेऽपि अवच्छेदकतायाः पर्याप्तेः । तथा च उक्ताभावरूपानिरूपितत्वविरहेण तदनिरूपितावच्छेद्यताशून्यप्रतियोगिताकत्वं निर्धूमवृत्तित्वत्वावच्छिन्नाभावेऽक्षतमिति तमादाय अतिव्याप्तिवारणं संभवतीति । तथा च अभावधर्मस्य उपलक्षणतया निवेशे न कोऽपि दोष इति **'यदि च अभावधर्म'** [पृ. 566] इत्यारभ्य **'इत्युच्यते'** [पृ: 566] इत्यन्तस्य सारांशः ।

तदापीत्यादि [पृ.566] । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वोपलक्षिताभाववद्वृत्तित्व - त्वानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्यत्वाभाववत्प्रतियो - गिताकाभावः इति विवक्षणेऽपि 'घटत्वभिन्नं प्रमेयत्वात्' इत्यत्र व्यभिचारिण्यतिव्याप्तिः । घटत्वभेदाभाववति घटत्वे प्रमेयत्वसत्त्वात् अयं व्यभिचारी । अत्र साध्याभावः घटत्वभेदाभावः घटत्वत्वस्वरूपः । साध्याभावमारभ्य विशेषणतयैव निवेशात् घटत्वत्वविशिष्टघटत्ववृत्तित्वत्वानिरूपितसमानाधिकरणधर्मनिरूपिताव - च्छेद्यत्वाभाववत्प्रतियोगिताकाभाव इत्यनेन कः अभावः गृह्यते इति विचारणीयम् । घटत्वत्वरूपविशेषणविशिष्टघटत्ववृत्तित्वत्वावच्छिन्नाभावः गृह्यते वा, निर्विशेषणकघटत्ववृत्तित्वत्वावच्छिन्नाभावः गृह्यते वा इति ।

आद्ये निर्विशेषणक घटत्ववृत्तित्वत्वापेक्षया घटत्वत्वविशिष्ट-घटत्ववृत्तित्वत्वस्य गुरूत्वेन अभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्धया तस्य अभावस्य ग्रहणमेव न संभवति ।

द्वितीये निर्विशेषणकघटत्ववृत्तित्वाभावीयप्रतियोगिता - निष्ठावच्छेद्यतायां घटत्वत्वविशिष्टघटत्ववृत्तित्वत्वानिरूपितत्व - सत्त्वेन निर्विशेषणकघटत्ववृत्तित्वत्वरूपसमानाधिकरणधर्मनिरूपि - तत्वस्य च सत्त्वेन साध्याभाववद्वृत्तित्वत्वानिरूपितसमा-नाधिकरणधर्मनिरूपितावच्छेद्यताशून्यप्रतियोगिताकत्वं घटत्व-वृत्तित्वत्वावच्छिन्नाभावस्य नास्तीति न तस्य लक्षणघटकता । अन्ततः व्यधिकरणधर्मावच्छिन्नाभावस्य घटत्वादिवा घटत्ववृत्ति-त्वाभावस्यैव लक्षणघटकतया तस्य च केवलान्वयित्वेन हेतावपि सत्त्वात् अतिव्याप्तिरिति भावः ।

गादाधरी

न च—जातेः समवायेनैव स्वरूपतोऽवच्छेदकत्वम् । न तु संबन्धान्तरेण । अत एव गोत्वादिजातिनिष्ठव्याप्तौ पदविशेष-प्रवृत्तिनिमित्तत्वगवेतरासमवेतत्वादेः अवच्छेदकत्वं स्वीकुर्वन्ति । न तु तादात्म्यसंबन्धेन लघोरपि गोत्वादिजातेः इति निर्विशेषण-घटत्वादिघटितस्य अभावप्रतियोगितावच्छेदकत्वं न संभवतीति—वाच्यम् ।

तादृशनियमे मानाभावात् । यदि च अभावांशस्यापि उपलक्षणत्वं स्वीक्रियते, तदा महानसवृत्तित्वत्वाद्यवच्छिन्नाभाव-वारणमशक्यमेव । यदि च साध्याभावातिरिक्तविशेषणाविशेषि-ताधिकरणवृत्तित्वत्वाद्यवच्छेद्यताभिन्नसमानाधिकरणधर्मावच्छेद्य - त्वाभावं निवेश्य अविशेषितघटत्वादिवृत्तित्वाभावः सङ्गृह्यते,

तदा तादृशाभावमादाय जातिसाधारणसद्धेतौ अव्याप्तिः वज्रले-पायते ।

एवं साध्याभाववद्वृत्तितात्वशरीरे अभावादेर्विशेषणतया प्रवेशे वृत्तिमद्वृत्तिपदमनर्थकमापद्यते । व्यधिकरणधर्मावच्छिन्न-साध्याभाववद्वृत्तित्वस्य यः समानाधिकरणधर्मावच्छिन्नाभावः तत्प्रतियोगितायाः लाघवेन वृत्तित्वत्वेन अवच्छिन्नतया तदवच्छेद्य-तायाः अभावघटितविशिष्टपदार्थानिरूपितत्वात् ।

विवरणम्

न च जातेः इत्यादि [पृ. 568] । जातेः समवायसंबन्धेनैव स्वरूपतः अवच्छेदकत्वम् । न तु समवायातिरिक्तसंबन्धेन । अत एव 'सास्नादिमान् गोत्वात्' इत्यादौ गोत्वनिष्ठायां साध्यव्याप्तौ गोत्वनिष्ठं गोपदप्रवृत्तिनिमित्तत्वं वा गवेतरासमवेतत्वं वा अवच्छेदकमिति स्वीकुर्वन्ति । यदि तु समवायातिरिक्तसंबन्धे-नापि जातेः स्वरूपतः अवच्छेदकत्वं स्यात्, तदा गोत्वरूपहेतोः स्वरूपतः तादात्म्यसंबन्धेन व्याप्यतावच्छेदकत्वसंभवात् गोपद-प्रवृत्तिनिमित्तत्वादेः व्याप्यतावच्छेदकत्वस्वीकारः अनावश्यकः ।

इत्थं च निर्विशेषणकघटत्ववृत्तित्वत्वमेव न संभवति । घटत्वस्य वृत्तित्वे समवायातिरिक्तनिरूपितत्वसंबन्धेन विशेषण-त्वात् स्वरूपतः विशेषणत्वासंभवात् । घटत्वत्वेनैव प्रवेशस्य आवश्यकत्वात् । तथा च घटत्वत्ववद्वृत्तित्वाभावप्रतियोगिता-वच्छेदकत्वं घटत्वत्ववद्वृत्तित्वत्वस्यैव । घटत्वत्वाघटितस्य लघुधर्मस्य अभावात् । घटत्वत्ववद्वृत्तित्वत्वावच्छिन्नप्रतियोगि-तायां घटत्वत्वरूपः यः साध्याभावः तद्वद्वृत्तित्वत्वनिरूपिता-वच्छेद्यतायाः सत्त्वेऽपि तदनिरूपितावच्छेद्यता नास्तीति तदनिरू-पितावच्छेद्यताशून्यप्रतियोगिताकाभावः घटत्वत्ववद्वृत्तित्वत्वा-वच्छिन्नाभावः तद्वत्त्वं प्रमेयत्वरूपहेतौ नास्तीति न च वाच्यम् ।

जातेः समवायेनैव स्वरूपतोऽवच्छेदकत्वम् इति नियमे प्रमाणाभावात् । 'गोत्वप्रकारकज्ञानवानहम्' इत्याकारके गोत्व-प्रकारिताप्रकारकज्ञानविशेष्यकानुव्यवसाये प्रकारितायां समवाया-तिरिक्तनिरूपितत्वसंबन्धेन गोत्वजातेः स्वरूपत एव प्रकारत्वात् । तथा च समवायनिरूपितत्व-एतदुभयातिरिक्तसंबन्धेन जातेः न स्वरूपतो भानमित्येव नियमः । प्रकृते घटत्ववृत्तित्वत्वावच्छिन्ना-भावबुद्धौ वृत्तित्वांशे निरूपितत्वसंबन्धेनैव घटत्वस्य भानात् तस्य स्वरूपतः भानं संभवतीति निर्विशेषणकघटत्ववृत्तित्वत्वरूपः लघुधर्मः संभवतीति तदपेक्षया गुरुधर्मस्य घटत्वत्ववद्वृत्तित्वत्वस्य अभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नाभावमादाय अति-व्याप्तिवारणासंभवात् पूर्वोक्तरीत्या व्यधिकरणधर्मावच्छिन्नाभाव-मादाय अतिव्याप्तिर्दुर्वारा इति भावः ।

यदि च अभावांशस्यापीति [पृ. 568] । अभावस्यापि उपलक्षणतयैव प्रवेशः । तथा च साध्यतावच्छेदकावच्छिन्नव्यापकता-वच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावोपलक्षिताधिकरणवृत्तित्व-त्वानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्यताशून्यप्रतियोगि-ताकाः वृत्तिमद्वृत्तयः यावन्तोऽभावाः तद्वत्त्वं व्याप्तिः ।

'घटत्वभिन्नं प्रमेयत्वात्' इत्यत्र घटत्ववृत्तित्वत्वावच्छिन्ना-भाव एव तादृशः । तद्वत्त्वं हेतौ नास्तीति नातिव्याप्तिरिति यदुच्यते, तदा 'वन्हिमान् धूमात्' इत्यादौ महानसवृत्तित्वत्वा-वच्छिन्नाभावस्य वारणमशक्यम् । तस्यापि व्यधिकरणधर्मा-वच्छिन्नसाध्याभावोपलक्षितमहानसवृत्तित्वत्वानिरूपितसमानाधि-करणधर्मनिरूपितावच्छेद्यताशून्यप्रतियोगिताकत्वेन लक्षणघटक-त्वात् । तद्वत्त्वं धूमे नास्ति । महानसवृत्तित्वस्यैव तत्र सत्त्वात् इत्यव्याप्तिः दुर्वारा इति भावः ।

यदि च साध्याभावातिरिक्तेति [पृ.568]। साध्याभावातिरिक्तविशेषणाविशेषिताधिकरणवृत्तित्वत्वनिरूपितावच्छेद्यताभिन्ना या समानाधिकरणधर्मनिरूपितावच्छेद्यता तच्छून्यप्रतियोगिताकाभावः साध्याभाववद्वृत्तित्वाभाव इत्यनेन विवक्षितः। महानसवृत्तित्वत्वावच्छिन्नाभावीयप्रतियोगितानिष्ठा अवच्छेद्यता महानसवृत्तित्वत्वरूपसमानाधिकरणधर्मनिरूपिता। साध्याभावातिरिक्तं यत् विशेषणं महानसत्वं तद्विशेषितमहानसरूपाधिकरणवृत्तित्वत्वनिरूपिता इति कृत्वा साध्याभावातिरिक्तविशेषणाविशेषिताधिकरणवृत्तित्वत्वनिरूपितावच्छेद्यतारूपा न भवतीति तद्भिन्ना च भवतीति उक्तावच्छेद्यताभिन्नसमानधिकरणधर्मनिरूपितावच्छेद्यतावत्प्रतियोगिताक एव महानसवृत्तित्वत्वावच्छिन्नाभावः, न तु तच्छून्यप्रतियोगिताक इति तस्य लक्षणाघटकतया न तमादाय अव्याप्तिः।

'घटत्वभिन्नं प्रमेयत्वात्' इत्यत्र घटत्ववृत्तित्वत्वावच्छिन्नाभावप्रतियोगितावच्छेदककोटौ घटत्वस्य स्वरूपतः प्रवेशात् घटत्वांशे साध्याभावोऽपि न विशेषणम्, साध्याभावातिरिक्तमपि च किञ्चिद्विशेषणम्। अतः साध्याभावातिरिक्तविशेषणाविशेषितघटत्ववृत्तित्वत्वनिरूपितावच्छेद्यतैव प्रतियोगितायामस्ति। तद्भिन्नावच्छेद्यता नास्ति इति कृत्वा तच्छून्यप्रतियोगिताकत्वेन घटत्ववृत्तित्वत्वावच्छिन्नाभावस्यापि लक्षणघटकतया तद्वत्त्वस्य हेतावभावात् नातिव्याप्तिरिति भावः।

तदा तादृशाभावमादाय इति [पृ. 569]। साध्याभावातिरिक्तेत्यादिरीत्या निवेशेऽपि 'इदं वाच्यं घटत्वत्वात्' इत्यत्र व्यधिकरणधर्मावच्छिन्नसाध्याभावोपलक्षितं अधिकरणं घटत्वम्, तद्वृत्तित्वत्वावच्छिन्नः अभावः लक्षणघटकः स्यात्। घटत्वांशे साध्याभावस्य तदतिरिक्तस्य च अविशेषणत्वेन घटत्ववृत्तित्वत्वा-

वच्छिन्नाभावस्य उक्तविशेषणाक्रान्ततया लक्षणघटकत्वात् तद्वत्त्वस्य घटत्वत्वरूपहेतौ विरहात् अव्याप्तिः। घटत्वत्वे घटत्ववृत्तित्वस्यैव सत्त्वात्।

ननु समवायसंबन्धेन प्रकारित्वनिष्ठनिरूपितत्वसंबन्धेन च जातेः स्वरूपतः भानम्। तदतिरिक्तसंबन्धेन तु स्वरूपतः भानं नास्ति। घटत्ववृत्तित्वाभावशरीरे वृत्तित्वनिष्ठनिरूपितत्वसंबन्धेनैव घटत्वस्य प्रकारत्वात् किंचिद्रूपेणैव भानमावश्यकमिति न पूर्वोक्तदोषः अभावप्रभृतिविशेषणत्वपक्षे इत्यतः दोषान्तरमाह—**एवं साध्याभाववद्वृत्तितात्वशरीरे इति** [पृ. 564]। अभावप्रभृतिविशेषणत्वपक्षे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वोपलक्षिताभावविशिष्टाधिकरणवृत्तित्व-त्वानिरूपित-समानाधिकरणधर्मनिरूपितावच्छेद्यताशून्यप्रतियोगिताकाः यावन्तोऽभावाः वृत्तिमद्वृत्तयः तद्वत्त्वमिति लक्षणम्। तत्र वृत्तिमद्वृत्तित्वविशेषणं व्यर्थम्। 'वन्हिमान् धूमात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य यः समानाधिकरणधर्मावच्छिन्नाभावः जगत्संयुक्तत्वत्वेन जगत्संयुक्तत्वाभावः अवृत्तौ आकाशादौ प्रसिद्धः, तद्वत्त्वस्य हेतौ विरहात् प्रसक्तायाः अव्याप्तेर्वारणाय हि वृत्तिमद्वृत्तित्वमुपात्तम्।

उक्तविवक्षायां तु जगत्संयुक्तत्वाभावीयप्रतियोगितानिष्ठायां अवच्छेद्यतायां संयुक्तत्वत्वरूपलघुधर्मनिरूपितत्वमेवास्ति। न तु साध्याभावविशिष्टजगत्संयुक्तत्वत्वनिरूपितत्वम् इति तदनिरूपितसंयुक्तत्वत्वरूपसमानाधिकरणधर्मनिरूपितावच्छेद्यतावत्प्रतियोगिताक एव जगत्संयुक्तत्वाभावः, न तु तच्छून्यप्रतियोगिताक इति तस्य लक्षणाघटकतया तमादाय अव्याप्त्यप्रसक्तेः वृत्तिमद्वृत्तित्वरूपविशेषणं व्यर्थं स्यात् इति भावः।

गादाधरी

गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वमतावलम्बनम्

अत्र वदन्ति—गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वमतेन इदमभिहितम् । व्यधिकरणधर्मावच्छिन्नसाध्याभाववन्महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणाय च साध्याभाववद्वृत्तित्वत्वपर्याप्तावच्छेदकताभिन्नसमानाधिकरणधर्मनिष्ठावच्छेदकत्वानिरूपकत्वमेव प्रतियोगितायां विशेषणं देयम् ।

विवरणम्

उक्ताक्षेपे समाधानं वक्तुमारभते—**अत्र वदन्तीत्यादिना** [पृ.573] । गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वमतानुसारेण इदं लक्षणमभिहितम् । अतः व्यभिचारिणि नातिव्याप्तिः । परन्तु 'वह्निमान् धूमात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववन्महानसवृत्तित्वत्वावच्छिन्नाभावमादाय अव्याप्तिः प्रसजति । तद्वारणाय साध्याभाववद्वृत्तित्वत्वपर्याप्तावच्छेदकताभिन्नसमानाधिकरणधर्मनिष्ठावच्छेदकत्वानिरूपकप्रतियोगिताकाभावः साध्याभाववद्वृत्तित्वाभावः इत्यनेन विवक्षितः । व्यधिकरणधर्मावच्छिन्नसाध्याभाववन्महानसवृत्तित्वत्वनिष्ठायां अवच्छेदकतायां साध्याभाववद्वृत्तित्वत्वपर्याप्तत्वं नास्ति । महानसस्य अधिकस्य प्रवेशात् । तथा च साध्याभाववद्वृत्तित्वत्वापर्याप्तावच्छेदकताभिन्नसमानाधिकरणधर्मनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकत्वमेव उक्ताभावस्य वर्तते । न तु तदनिरूपितप्रतियोगिताकत्वम् इति तस्य लक्षणाघटकतया न तमादाय अव्याप्तिरिति भावः ।

गादाधरी

न च—एवं घटत्वादिना साध्याभाववद्वृत्तित्वाभावसंग्रहफलकं समानाधिकरणपदोपादानं निषेधद्वयनिवेशनं च विफलम् ।

तादृशाभावस्यासंग्रहेऽपि केवलान्वयिनि साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावमादाय लक्षणसमन्वयसंभवात् इति—वाच्यम् ।

विषयितादिसंबन्धेन यत्र हेतुता तत्र हेतुतावच्छेदकसंबन्धेन साध्याभाववति वृत्तेः साध्याभाववद्विषयतादिरूपाया विषयादि-स्वरूपत्वेन साध्याभाववद्विषयतात्वादिरूपसाध्याभाववद्वृत्तित्व-त्वस्य केवलान्वयितया तदवच्छिन्नाभावाप्रसिद्धेः तादृशाभाव-घटितलक्षणानुपपत्तेः ।

विवरणम्

न च एवमिति [पृ॰ 573] । एवं रीत्या विवक्षणे समानाधि-करणपदोपादानं निषेधद्वयनिवेशनं च व्यर्थम् । साध्याभाववद्वृत्ति-त्वत्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभावस्यैव निवेशयितुमुचि-तत्वात् । व्यधिकरणधर्मावच्छिन्नाभावस्य घटत्वेन जगद्वृत्तित्वा-भावस्य असंग्रहेऽपि साध्याभाववद्वृत्तित्वत्वेन घटाभावस्यापि व्यधिकरणधर्मावच्छिन्नाभावस्य साध्याभाववद्वृत्तित्वत्वपर्याप्ता-वच्छेदकताकप्रतियोगिताकत्वेन लक्षणघटकतया तमादायैव केवला-न्वयिसाध्यकस्थले लक्षणसमन्वयसंभवात् इति भावः ।

समाधत्ते—विषयितासंबन्धेनेति [पृ. 574] । 'इदं वाच्यम्, विषयितासंबन्धेन घटात्' इत्यत्र ज्ञानं पक्षः । वाच्यत्वं साध्यम् । घटः हेतुः । स च विषयितासंबन्धेन पक्षे वर्तत इति हेतुतावच्छेद-कसंबन्धः विषयितासंबन्धः । अत्र व्यधिकरणधर्मावच्छिन्नसाध्या-भाववन्निरूपितविषयितासंबन्धावच्छिन्नवृत्तित्वं साध्याभाववन्निरू-पितविषयत्वरूपम् । साध्याभाववद्वृत्तित्वत्वं साध्याभाववन्नि-रूपितविषयतात्वरूपम् । विषयतायाः विषयस्वरूपत्वमिति मते विषयतावृत्ति विषयतात्वं विषयवृत्तीति वक्तव्यम् । सर्वमपि विषय इति कृत्वा विषयतात्वं सर्ववृत्ति, अत एव केवलान्वयि ।

तत्तु कस्या अपि प्रतियोगितायाः व्यधिकरणं न भवतीति साध्याभाववद्विषयतात्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या अत्र अव्याप्तिः। तद्वारणाय समानाधिकरणपदं निषेधद्वयं च आवश्यकम्। तन्निवेशे व्यधिकरणधर्मावच्छिन्नयत्किंचिदभावमादाय लक्षणसमन्वयः संभवतीति भावः।

गादाधरी

न च - साध्याभाववद्विषयतात्वादिकं येन संबन्धेन अवृत्ति तेन संबन्धेन तदवच्छिन्नाभावमादाय लक्षणसमन्वयः संभवतीति-वाच्यम्।

कालिकसंबन्धेन साध्याभाववद्वृत्तित्वत्वावच्छिन्नस्य योऽभावः तस्य ध्वंसाद्यधिकरणहेत्वव्यापकतया स्वरूपसंबन्धावच्छिन्नप्रतियोगितावच्छेदकाभावस्य अवश्यं निवेशनीयतया व्यधिकरणसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्य लक्षण-घटकत्वासंभवात्।

विवरणम्

न च साध्याभाववदिति [पृ. 575]। 'वाच्यं विषयितया घटात्' इत्यत्र साध्याभाववद्विषयतात्वं येन संबन्धेन अवृत्ति तादृशसंयोगादिरूपव्यधिकरणसंबन्धावच्छिन्नसाध्याभाववद्विषयत्व-त्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावमादाय लक्षणसमन्वयः संभवति। अतः समानाधिकरणपदं निषेधद्वयं च मास्तु इति नाशङ्कनीयम्। साध्याभाववद्वृत्तित्वत्वपर्याप्तावच्छेदकताकप्रति-योगिताकाभावः इत्यत्र अवच्छेदकतायां स्वरूपसंबन्धावच्छिन्नत्वम् अवश्यं निवेशनीयम्। अन्यथा 'इदं कपालम्' समवायसंबन्धेन घटात् इत्यत्र अव्याप्तिः। अत्र साध्याभावः कपालत्वाभावः। तद्वद्वृत्तित्वत्वावच्छिन्नाभावः इत्यनेन कालिकसंबन्धेन कपालत्वा-भाववद्वृत्तित्वत्वविशिष्टस्य योऽभावः स गृह्यते। स च ध्वंसान-

धिकरणे वृत्तिमति वर्तमानतया लक्षणघटकः। हेतौ नास्ति। कालिकसंबन्धेन साध्याभाववद्वृत्तित्वत्वविशिष्टस्य संयोगादिध्वंसस्य घटे सत्त्वात्। ध्वंसमात्रं कालोपाधिरिति नये ध्वंसः कालिकसंबन्धेन साध्याभाववद्वृत्तित्वत्वविशिष्टो भवति। प्रतियोगितावच्छेदकतायां स्वरूपसंबन्धावच्छिन्नत्वनिवेशे तु स्वरूपसंबन्धेन साध्याभाववद्वृत्तित्वत्वविशिष्टस्य साध्याभाववद्वृत्तित्वस्य अभाव एव लक्षणघटकः। स च हेतौ घटे अस्त्येव। कपालत्वाभाववद्वृत्तित्वविरहात् इति नाव्याप्तिः।

इत्थं च 'वाच्यं विषयितया घटात्' इत्यत्रापि व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्विषयतात्वनिष्ठस्वरूपसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकाभाव एव ग्राह्यः। स च अप्रसिद्ध इति अव्याप्तिः स्यात्। तद्वारणाय समानाधिकरणपदं निषेधद्वयं च आवश्यकमिति भावः।

गादाधरी

विषयताया जात्यादिरूपत्वेऽपि विषयतात्वविशिष्टस्य न समवायादिना वृत्तिः। तादृशस्य स्वस्मिन्नेव वृत्तेः। जात्यादौ च समवायाभावात्। किन्तु स्वरूपसंबन्धेनैव। एवं च समवायादिसंबन्धावच्छिन्नप्रतियोगिताक एव विषयतात्वाद्यवच्छिन्नाभावो लक्षणघटको भविष्यति—इत्यपि न।

कालज्ञानादिरूपहेतौ कालिकविषयितादिसंबन्धावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावस्यासत्त्वेन स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावस्यैव निवेशनीयत्वात्।

विवरणम्

'इदं वाच्यम्, विषयितासंबन्धेन घटात्' इत्यत्र प्रकारान्तरेण अव्याप्तिं वारयतां मतम् अनूद्य दूषयति—**विषयताया जात्यादि-**

रूपत्वेऽपि इत्यादिना। 'इदं वाच्यम्, विषयितासंबन्धेन घटात्' इत्यत्र साध्याभाववद्वृत्तित्वत्वं साध्याभाववद्विषयतात्वरूपम्। विषयताया विषयस्वरूपत्वेन विषयतात्वस्य केवलान्वयित्वात् तदवच्छिन्नप्रतियोगिताकः अभावः कथं प्रसिद्ध्यतीत्याशङ्कायां केचिदेवं वदन्ति—विषयतायाः जात्यादिविषयस्वरूपत्वेऽपि विषयतात्वेन रूपेण जात्यादेः न समवायसंबन्धेन वृत्तिः। विषयतात्वविशिष्टविषयतायाः जात्यादावपि सत्त्वेन तत्र जातिस्वरूपविषयतायाः समवायसंबन्धेन अवृत्तेः। तथा च विषयतात्वविशिष्टविषयता स्वरूपसंबन्धेनैव वर्तते। समवायसंबन्धस्तु व्यधिकरणसंबन्धः। एवं च साध्याभाववद्विषयतात्वावच्छिन्नविषयतानिष्ठसमवायसंबन्धावच्छिन्नप्रतियोगिताकाभाव एव लक्षणघटकः। तद्वत्त्वस्य हेतौ सत्त्वात् नाव्याप्तिरिति।

स्वस्मिन्नेवेति। विषयतात्मकजात्यादावेवेत्यर्थः। एतेन जातेः घटादौ समवायेन सत्त्वात् समवायसंबन्धावच्छिन्नविषयत्वाभावस्य घटादिवृत्तित्वं कथमिति शङ्का निरस्ता।

तेषां मतं दूषयति—**इत्यपि न इति। कालज्ञानादिरूपहेताविति।** अत्र कालपदं क्रियापरम्। 'वन्हिमान् तत्क्रियातः', 'आत्मा ज्ञानात्' इत्यादौ अव्याप्तिः। तथा हि—प्रथमस्थले साध्याभाववद्वृत्तित्वत्वावच्छिन्नसाध्याभाववद्वृत्तित्वनिष्ठकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावोऽपि यावदन्तर्गतः। अयं च कालभिन्ने वृत्तिमति नित्यगुणादौ प्रसिद्धः। तत्र साध्याभाववद्वृत्तित्वस्य स्वरूपसंबन्धेन सत्त्वेऽपि कालिकसंबन्धेन तदभावात्। तद्वत्त्वं तत्क्रियारूपहेतौ नास्ति। 'क्रियामात्रं कालोपाधिः' इति सिद्धान्ते तत्क्रियायां साध्याभाववद्वृत्तित्वस्य कालिकसंबन्धेन सत्त्वात् साध्याभाववद्वृत्तित्वनिष्ठकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य तत्क्रियायां विरहात् अव्याप्तिः।

'अयम् आत्मा ज्ञानात्' इति द्वितीयस्थले साध्याभाववद्वृत्तित्वत्वावच्छिन्नसाध्याभाववद्वृत्तित्वनिष्ठविषयितासंबन्धावच्छिन्नप्रतियोगिताकाभावोऽपि यावदन्तर्गतः। स च ज्ञानभिन्ने वृत्तिमति निर्विषयके घटादौ वर्तते। घटादौ साध्याभाववद्वृत्तित्वस्य विषयितासंबन्धेन अभावात्। तादृशाभाववत्त्वं ज्ञानरूपहेतौ नास्ति। सविषयके ज्ञाने साध्याभाववद्वृत्तित्वस्यैव विषयितासंबन्धेन सत्त्वात् इत्यव्याप्तिः। तद्वारणाय प्रतियोगितायां स्वरूपसंबन्धावच्छिन्नत्वं निवेशनीयम्। क्रियाज्ञानादिरूपहेतौ कालिकविषयितादिसंबन्धेन साध्याभाववद्वृत्तित्वस्य सत्त्वेऽपि स्वरूपसंबन्धेन असत्त्वात् स्वरूपसंबन्धावच्छिन्नवृत्तित्वाभावः अस्तीति नाव्याप्तिः।

एवं च 'वाच्यं विषयितया घटात्' इत्यत्र साध्याभाववद्विषयतात्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभाव एव लक्षणघटको वाच्यः। स च अप्रसिद्ध इति पूर्वोक्तरीतिरेव आदरणीया इति भावः।

कालिकविषयितादीति। कालिकविषयितादिसंबन्धावच्छिन्नप्रतियोगिताकः यः साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावः तस्येत्यर्थः।

गादाधरी

न च - एवं साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मावच्छिन्नाभावस्यापि तत्राप्रसिद्धिः। घटत्वादेः साध्याभाववद्विषयतादिनिष्ठप्रतियोगितावैयधिकरण्यासम्भवात् इति— वाच्यम्।

घटत्वादिना पटाद्यभावस्यैव तथात्वात्।

विवरणम्

न च एवमिति। निषेधद्वयसमानाधिकरणपदयोः उपादानेऽपि वाच्यत्वसाध्यके विषयितादिसंबन्धेन घटादिहेतौ अव्याप्तिः।

घटत्वेन साध्याभाववद्विषयत्वाभावम् आदाय समन्वयः कार्यः। परन्तु घटत्वं साध्याभाववद्वृत्तित्वत्वातिरिक्तं भवति। घटात्मकविषयतानिष्ठतया समानाधिकरणं च भवति। साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताक - तया घटत्वेन साध्याभाववद्विषयत्वाभावस्य तदनवच्छिन्नप्रतियोगिताकत्वविरहात् इति न च वाच्यम्।

घटत्वादिना पटाद्यभावस्यैव तथात्वात्। घटत्वस्य पटावृत्तितया घटत्वेन पटाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकतया समानाधिकरणधर्मानवच्छिन्न प्रतियोगिताकाभावरूपत्वात् घटत्वेन पटाभावस्य, तमादायैव लक्षणसमन्वयात् नाव्याप्तिरिति भावः।

गादाधरी

अथ एवमपि सामानाधिकरण्यमुपेक्ष्य साध्याभाववद्वृत्तित्वनिष्ठत्वेन धर्मविशेषणकल्पे घटत्वादेः घटादिस्वरूपसाध्याभाववद्विषयतानिष्ठत्वेन गगनादेरपि स्वनिष्ठविषयतात्मकत्वेन साध्याभाववद्विषयतानिष्ठतया साध्याभाववद्वृत्तित्वत्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नाभावाप्रसिद्धया उक्तस्थले अव्याप्तिर्दुर्वारैव।

येन रूपेण यत् साध्याभाववद्वृत्तित्ववृत्तितद्रूपविशिष्टतदनवच्छिन्नप्रतियोगिताकाभावविवक्षणेन गगनत्वविशिष्टगगनाद्यवच्छिन्नाभावस्य लक्षणघटकतानिर्वाहेऽपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वव्यक्तेः किञ्चिदविशेषिततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावस्य तथाविधस्य हेतावसत्त्वात् असंभवप्रसङ्ग इति चेत्, न।

येन संबन्धेन यद्वर्तते तेन संबन्धेन तन्निष्ठावच्छेदकताकान्यत्वस्य तदनवच्छिन्नत्वस्य विवक्षणीयतया संयोगादिसंबन्धावच्छि-

न्नघटत्वादिनिष्ठावच्छेदकताकाभावमादाय उक्तस्थले लक्षणसमन्वयसंभवात् । उक्तार्थलाभायैव साध्याभाववद्वृत्तित्वोपादानम् । न तु तदपि लक्षणघटकम्, प्रयोजनाभावात् । सर्वत्र दर्शिताभावमादायैव लक्षणसमन्वयसंभवेन समवायादिसंबन्धेन घटत्वाद्यवच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभावस्य लक्षणाघटकत्वेऽपि क्षतिविरहात् ।

विवरणम्

पुनः शङ्कते—**अथ एवमपीति** । साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकः अभावः इति प्रथमः कल्पः । समानाधिकरणपदस्थाने साध्याभाववद्वृत्तित्ववृत्तिपदं निक्षिप्य साध्याभाववद्वृत्तित्वत्वातिरिक्तसाध्याभाववद्वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकः अभावः इति द्वितीयः कल्पः । तत्र द्वितीयकल्परीत्या 'इदं वाच्यं विषयितासंबन्धेन घटात्' इत्यत्र अव्याप्तिः । प्रथमकल्पे इव घटत्वेन पटाभावमादाय द्वितीयकल्पे समन्वयः कर्तुं न शक्यते । घटत्वेन पटाभावस्य उक्तविशेषणानाक्रान्तत्वात् । घटत्वं हि साध्याभाववद्वृत्तित्वत्वातिरिक्तोधर्मः । एवं साध्याभाववद्वृत्तित्ववृत्तिश्च । साध्याभाववद्वृत्तित्वं साध्याभाववद्विषयत्वरूपम् । विषयत्वस्य विषयस्वरूपतया घटस्वरूपमपि साध्याभाववद्विषयत्वं भवति । तत्र घटत्वस्य वृत्तित्वात् घटत्वं साध्याभाववद्वृत्तित्ववृत्ति । तदनवच्छिन्नप्रतियोगिताकः घटत्वेन पटाभावो न भवतीति तस्याभावस्य लक्षणाघटकतया तमादायापि समन्वयः न संभवति ।

न च 'गगनेन साध्याभाववद्विषयत्वं नास्ति' इति प्रतीतिसिद्धः अभावः लक्षणघटकः । गगनस्य साध्याभाववद्वृत्तित्वत्वातिरिक्तत्वेऽपि साध्याभाववद्वृत्तित्ववृत्तित्वं नास्ति, तस्य अवृत्तिपदार्थत्वात् । तथा च गगनावच्छिन्नप्रतियोगिताकः उक्ताभावः

साध्याभाववद्वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताक इति लक्षण घटकः। तद्वत्त्वस्य हेतौ सत्त्वात् नाव्याप्तिः इति वाच्यम्।

गगनस्यापि विषयतारूपवृत्तित्वनिष्टत्वात्। विषयतायाः विषयस्वरूपत्वमते गगनं गगननिष्ठविषयत्वस्वरूपम्। विषयत्वं गगननिष्ठं चेत् गगनमपि विषयत्वनिष्ठमेव। विषयविषयत्वयोः ऐक्यात्। तथा च गगनावच्छिन्नप्रतियोगिताकाभावस्यापि लक्षणाघटकतया उक्ताभावाप्रसिद्धया अव्याप्तिः।

न च—येन रूपेण यत् साध्याभाववद्वृत्तित्ववृत्ति तद्रूपविशिष्टतदनवच्छिन्नप्रतियोगिताकाभावः विवक्षितः। गगनं विषयतायां विषयतात्वरूपेणैव वर्तते न तु गगनत्वेन रूपेण। तद्रूपविशिष्टतदनवच्छिन्नप्रतियोगिताकः विषयतात्वविशिष्टगगनानवच्छिन्नप्रतियोगिताकः अभावः गगनत्वविशिष्टगगनावच्छिन्नप्रतियोगिताकः 'गगनत्वविशिष्टगगनेन साध्याभाववद्विषयत्वं नास्ति' इति प्रतीतिसिद्धः अभावः। तद्वत्त्वं हेतावस्तीति नाव्याप्तिः इति—वाच्यम्।

एवमपि सर्वत्र सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य - जगद्वृत्तित्वस्य तद्व्यक्तित्वेन रूपेण योऽभावः तमादाय असंभवः स्यात्। तत्र तद्व्यक्तित्वं साध्याभाववद्वृत्तित्वत्वातिरिक्तम्। तथापि येन रूपेणेत्यादि विशेषणानाक्रान्तम्। स्वरूपत एव तस्य साध्याभाववद्वृत्तित्ववृत्तित्वात् किञ्चिद्रूपेण अवृत्तेः। स च अभावः अवृत्तौ प्रसिद्धः हेतौ नास्तीति असंभवः स्यात्—इति 'अथ' इत्यादिना आक्षेपः।

येन रूपेण इत्यादि। साध्याभाववद्वृत्तित्वनिरूपित—स्वनिष्ठवृत्तितावच्छेदकधर्मनिष्ठावच्छेदकताकसाध्याभाववद्वृत्ति - त्वत्वातिरिक्तनिष्ठावच्छेदकत्वानिरूपकप्रतियोगिताकाभावः सा-

-ध्याभाववद्वृत्तित्वाभाव इति निष्कर्षः। स्वपदं साध्याभाववद्वृत्तित्वत्वातिरिक्तपरम्।

उक्ताक्षेपं समाधत्ते—**येन संबन्धेन यद्वर्तत इत्यादिना**। साध्याभाववद्वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकः इत्यस्य अयमर्थः—येन संबन्धेन यद्वर्तते तत्संबन्धावच्छिन्नतन्निष्टावच्छेदकताकान्यप्रतियोगिताक इति। एवं च संयोगसंबन्धेन 'घटत्ववान् नास्ति' इति प्रतीतिसिद्धः संयोगसंबन्धावच्छिन्नघटत्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावः पूर्वोक्तस्थले लक्षणघटकः। संयोगसंबन्धेन घटत्वं न वर्तते। अतः तन्निष्ठावच्छेदकतापदेन संयोगसंबन्धावच्छिन्नघटत्वनिष्ठावच्छेदकता न ग्रहीतुं शक्यते। संयोगसंबन्धेन घटः वर्तते। अतः संयोगसंबन्धावच्छिन्ना घटनिष्टा अवच्छेदकता। तन्निरूपकप्रतियोगिताभिन्नत्वं संयोगसंबन्धावच्छिन्नघटत्वनिष्ठावच्छेदकताकप्रतियोगितायामस्तीति तन्निरूपकमभावमादाय लक्षणसमन्वयः कार्यः। तथा च साध्याभावपदेन व्यधिकरणधर्मावच्छिन्नाभावग्रहणे तद्वृत्तित्वाभाव इत्यनेन व्यधिकरणसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावो ग्राह्य इति सिद्धम्।

साध्याभाववद्वृत्तित्वाभावेत्यस्य पर्यवसितार्थस्तु साध्याभाववद्वृत्तित्वत्वनिष्ठस्वरूपसंबन्धावच्छिन्नावच्छेदकताभिन्नसमानाधिकरणसंबन्धावच्छिन्नावच्छेदकत्वानिरूपकप्रतियोगिताकाभाव इति। **साध्याभाववद्वृत्तित्ववृत्तिना** इति दीधितेरपि अत्रैव तात्पर्यम्। न तु तस्य लक्षणघटकत्वम्। सर्वत्र सद्धेतौ व्यधिकरणसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावमादायैव लक्षणसमन्वयसंभवात् घटत्वेन जगद्वत्तित्वाभावस्य लक्षणाघटकत्वेऽपि क्षतिविरहात्। तस्य लक्षणघटकत्वावश्यकत्वे हि साध्याभाववद्वृत्तित्ववृत्तित्वस्य आवश्यकता इति भावः।

गादाधारी

एतेन धूमत्वत्वाद्यवच्छिन्नधूमत्वाद्यभावस्य धूमत्वप्रकारकप्रमाविषयत्वत्वाद्यवच्छिन्नाभानस्य च साध्याभाववद्वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य वारणाय साध्याभाववद्वृत्तित्वप्रतियोगिकत्वविशेषणमप्यनादेयम् । अत एव स्वसमानाधिकरणत्वस्य प्रतियोगितावच्छेदकविशेषणत्वकल्पापेक्षया लाघवमेव एतत्कल्पानुसरणबीजभूतं निष्प्रत्यूहमिति ।

विवरणम्

एतेनेति । येन संबन्धेन यद्वर्तते इत्यादिविवक्षणेनेत्यर्थः । साध्याभाववद्वृत्तित्वातिरिक्तसाध्याभाववद्वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकः अभावः इत्यस्य यथाश्रुतार्थस्वीकारे 'वन्हिमान् धूमात्' इत्यादौ धूमत्वत्वावच्छिन्नधूमत्वाभावस्यापि लक्षणघटकत्वापत्तिः । धूमत्वत्वस्य साध्याभाववद्वृत्तित्वत्वातिरिक्तत्वेऽपि साध्याभाववद्वृत्तित्ववृत्तित्वविरहात् वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वस्य अक्षतत्वात् धूमत्वत्वावच्छिन्नधूमत्वाभावश्च हेतौ धूमे नास्ति । तत्र धूमत्वस्यैव सत्त्वात् इति अव्याप्तिः ।

प्रतियोगितायां स्वरूपसंबन्धावच्छिन्नत्वनिवेशे उक्ताभावस्य वारणेऽपि धूमत्वप्रकारकप्रमाविषयत्वत्वावच्छिन्न स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावमादाय अव्याप्तिः स्यात् । तद्वारणाय साध्याभाववद्वृत्तित्वप्रतियोगिकत्वमपि अभावे निवेशनीयम् । उक्ताभावयोः धूमत्वप्रतियोगिकत्व - धूमत्वप्रकारकप्रमाविषयत्वप्रतियोगिकत्वसत्त्वेऽपि साध्याभाववद्वृत्तित्वप्रतियोगिकत्वविरहात् तयोः लक्षणाघटकतया नाव्याप्तिरित्यपि अनादेयम् । साध्याभाववद्वृत्तित्वत्वनिष्ठावच्छेदकताभिन्नसमानाधिकरणसंबन्धावच्छिन्नावच्छेदकत्वानिरूपकप्रतियोगिताकत्वविरहेणैव तयोः वार-

णसंभवात् साध्याभाववद्वृत्तित्वं प्रतियोगिकत्वविशेषणस्य अनावश्यकत्वात् इति भावः ।

लाघवमिति । घटत्वेन पटाद्यभावसंग्रहानुरोधेन अवच्छेदकताघटकसंबन्धावच्छिन्नत्वं स्वसमानाधिकरणत्वे निवेशनीयमिति समानाधिकरणत्वकल्पे गौरवमिति भावः ।

गादाधरी

यदि च गुरुधर्मो नाभावप्रतियोगितावच्छेदकः, तदा महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणाय साध्याभाववद्वृत्तित्वत्वातिरिक्तेत्यनेन साध्याभाववद्वृत्तित्वत्वाघटकत्वमेव विवक्षणीयम् । तदर्थश्च स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्वृत्तितात्वरूपविशिष्टनिरूपितविषयिताकत्वम् ।

विवरणम्

एतावता गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वमतेन परिष्कारः कृतः । अथ गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वमतानुसारेण परिष्कारं करोति - यदि चेत्यादिना । महानसवृत्तित्वत्वेन व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावस्यापि लक्षणघटकतया तद्वत्त्वस्य धूमरूपहेतावभावात् अव्याप्तिः प्रसक्ता । तद्वारणाय साध्याभाववद्वृत्तित्वत्वातिरिक्तेत्यनेन साध्याभाववद्वृत्तित्वत्वाघटकत्वं विवक्षणीयम् । तथा च साध्याभाववद्वृत्तित्वत्वाघटकसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाः यावन्तोऽभावाः वृत्तिमद्वृत्तयः तद्वत्त्वं लक्षणम् । साध्याभाववद्वृत्तित्वत्वाघटकत्वं नाम स्वाविषयकप्रतीतिवृत्तिः या साध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपिता विषयिता तत्कत्वम् । यस्य अघटकत्वमुपपादनीयं स स्वपदार्थः । स्वं - महानसवृत्तित्वत्वम् । स्वाविषयकप्रतीतिः - पर्वतवृत्तित्वविषयकप्रतीतिः । तस्यां साध्याभाव-

वद्वृत्तित्वत्वरूपविशिष्टनिरूपिता विषयिता वर्तते । पर्वतस्यापि व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्त्वात् । एवं च महानसवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वाघटकत्वमस्ति । प्रतियोगितासमानाधिकरणत्वं च अस्ति। अतः साध्याभाववद्वृत्तित्वत्वाघटकसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकः महानसवृत्तित्वत्वावच्छिन्नाभावः न भवतीति न तमादाय अव्याप्तिरिति भावः ।

गादाधरी

स्वाविषयकत्वं च इतरविशेषणतानापन्नस्वविषयताशून्यत्वम् । अतो विशेषणविधया साध्याभाववद्वृत्तित्वत्वघटकसाध्याभावत्वादेरपि तदघटकत्वनिर्वाह इति पूर्वोक्तदोषानवकाशः ।

विवरणम्

ननु एवमपि 'वन्हिमान् धूमात्' इत्यादौ वन्ह्यभावत्वावच्छिन्नाभाववारणम् अशक्यम् । वन्ह्यभावत्वस्य उक्ताघटकत्वविरहात् साध्याभाववद्वृत्तित्वत्वविषयकप्रतीतौ वन्ह्यभावत्वस्य विषयत्वात् वन्ह्यभावत्वाविषयकप्रतीतिः घटादिप्रतीतिः । तत्र साध्याभाववद्वृत्तित्वत्वनिरूपितविषयितायाः अवृत्तेः स्वपदेन वन्ह्यभावत्वं ग्रहीतुं न शक्यते । अतः साध्याभाववद्वृत्तित्वत्वाघटकधर्मानवच्छिन्नप्रतियोगिताकत्वात् वह्न्यभावत्वावच्छिन्नाभावस्यापि लक्षणघटकतया तद्वत्त्वं धूमे नास्तीति अव्याप्तिरित्याशङ्क्याह—**स्वाविषयकत्वं** चेति [पृ. 585] । स्वाविषयकत्वं च इतरविशेषणतानापन्नस्वविषयताशून्यत्वम् । इतरविशेषणतानापन्नत्वं च किंचिन्निष्ठविशेष्यतानिरूपितप्रकारताशून्यत्वम् । 'वन्ह्यभाववद्वृत्तित्वम्' इति प्रतीतौ वन्ह्यभावत्वस्य वन्ह्यभावविशेषणतया भानात् इतरविशेषणतानापन्नवन्ह्यभावत्वविषयताशून्यत्वं तादृशप्रतीतौ अक्षतम् । तद्वृत्तित्वं साध्याभाववद्वृत्तित्वत्वनिरूपितविषयितायाम् अस्तीति वह्न्यभावत्वस्य साध्या-

भाववद्वृत्तित्वत्वाघटकत्वोपपत्तिः । एवं च अघटकधर्मानवच्छिन्न-प्रतियोगिताकत्वविरहात् वह्न्यभावाभावः न लक्षणघटकः । अतः वह्न्यभावत्वावच्छिन्नाभावमादाय धूमादौ अव्याप्तिरूपदोषस्य नावकाश इति भावः ।

गादाधरी

चरमापि विषयिता इतरविशेषणतानापन्ननिरूपितैव ग्राह्या । तेन वृत्तित्वत्वादिविशेषणकज्ञाने साध्याभाववद्वृत्तित्व-त्वादेः विशेषणतया विषयत्वेऽपि वृत्तित्वत्वादेः न साध्याभाव-वद्वृत्तित्वत्वाघटकत्वम् ।

विवरणम्

ननु एवमपि 'धूमवान् वह्नेः' इत्यादौ 'निर्धूमवृत्तित्वत्ववान्' इति प्रतीतौ निर्धूमवृत्तित्वत्वनिष्ठमुख्यविशेष्यताशून्यत्वसत्त्वेन तादृशप्रतीतौ च साध्याभाववद्वृत्तित्वत्वनिरूपितविषयितायाः वृत्तेः निर्धूमवृत्तित्वत्वस्यापि साध्याभाववद्वृत्तित्वत्वाघटकत्वापत्त्या तद-वच्छिन्नप्रतियोगिताकाभावस्य लक्षणाघटकतया घटत्वादिना पटाद्य-भावमादाय अतिव्याप्तिरित्याशङ्क्याह—**चरमापि विषयितेति** [पृ॰ 586] । एवं च स्वाविषयकप्रतीतिपदेन 'निर्धूमवृत्तित्वत्व-वान्' इति प्रतीतिः यदि गृह्यते, तदा तत्र मतुबर्थविशेषणतापन्न-साध्याभाववद्वृत्तित्वत्वनिरूपितविषयितैव अस्ति । न तु इतर-विशेषणतानापन्ननिरूपितविषयिता इति निर्धूमवृत्तित्वत्वस्य न साध्याभाववद्वृत्तित्वत्वाघटकत्वम् । तथा च स्वनिष्ठमुख्य-विशेष्यताशून्यप्रतीतिवृत्ति - इतरविशेषणतानापन्नसाध्याभाववद्-वृत्तित्वत्वनिरूपितविषयिताकत्वं साध्याभाववद्वृत्तित्वत्वाघटक-त्वम् ।

गादाधरी

एवं च शुद्धवृत्तित्वत्वावच्छिन्नाभावोऽपि लक्षणघटक इति वृत्तिमद्वृत्तिपदसार्थक्यम् ॥

विवरणम्

एवं चेति [पृ. 586] । चरमविषयितायाम् इतरविशेषणतानापन्ननिरूपितत्वनिवेशे च इत्यर्थः । अवृत्तौ प्रसिद्धं जगद्वृत्तित्ववत्त्वेन जगद्वृत्तित्वाभावं वा वृत्तित्ववत्त्वेन वृत्तित्वाभावं वा आदाय प्रसक्तायाःअव्याप्तेः वारणाय वृत्तिमद्वृत्तित्वविशेषणम् उपात्तम् । यदि तु चरमविषयितायां मुख्यत्वं न निवेश्यते, तदा जगद्वृत्तित्वत्वनिष्ठमुख्यविशेष्यताशून्ये 'जगद्वृत्तित्ववत्त्ववान्' इति ज्ञाने जगद्वृत्तित्वत्वनिरूपितविषयितायाः सत्त्वेन स्वनिष्ठमुख्यविशेष्यताशून्यप्रतीतिवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्वरूपं साध्याभाववद्वृत्तित्वत्वाघटकत्वमेव जगद्वृत्तित्वत्वे केवलवृत्तित्वत्वे च अस्तीति जगद्वृत्तित्वत्वावच्छिन्नाभावस्य वा वृत्तित्वत्वावच्छिन्नभावस्य वा साध्याभाववद्वृत्तित्वत्वाघटकधर्मानवच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकतया घटत्वादिना पटाद्यभावमादाय लक्षणसंगतेः वृत्तिमद्वृत्तित्ववैयर्थ्यं स्यात् । अतः चरमविषयितायामपि इतरविशेषणतानापन्ननिरूपितत्वरूपं मुख्यत्वं निवेशनीयम् । तथा च 'जगद्वृत्तित्ववत्त्ववान्' इति ज्ञाने जगद्वृत्तित्वत्वनिरूपितमुख्यविषयिताविरहेण स्वपदेन जगद्वृत्तित्वत्वस्य ग्रहीतुमशक्यतया तस्य साध्याभाववद्वृत्तित्वत्वाघटकत्वं नास्तीति तदघटकधर्मानवच्छिन्नप्रतियोगिताकत्वात् जगद्वृत्तित्वत्वावच्छिन्नाभावस्य तमादाय अव्याप्तिवारकतया वृत्तिमद्वृत्तित्वं सार्थकमिति भावः ।

गादाधरी

न च - साध्याभाववद्वृत्तित्वत्वघटकधर्मपर्याप्तप्रतियोगितावच्छेदकताकोऽभावः निवेश्यताम् । घटकान्तार्थश्च स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्वम् । तेन साध्याभाववद्वृत्तित्वत्वकेवलवृत्तित्वत्वयोरेव घटक-

तानिर्वाहः । न तु स्वाविषयकप्रतीत्यविषयतादृशविशिष्टकत्वम् । तत्तदभाववद्वृत्तितात्वाविषयकप्रतीतौ केवलाधेयतात्वस्य विषयतया तदभाववन्निरूपितत्वविशिष्टाधेयतात्वे तदविषयकप्रतीत्यविषयत्वस्य दुर्घटतया तदभाववद्वृत्तित्वत्वादेः तद्घटकत्वानिर्वाहात् केवलाधेयतात्वस्य च तद्घटकतया वृत्तिमद्वृत्ति तेन रूपेण घटाद्यभावमादाय अतिव्याप्त्यापत्तेरिति - वाच्यम् ।

तथा सति उक्तरीत्या विषयितासंबन्धेन यत्र हेतुता तत्र तादृशाभावाप्रसिद्ध्यापत्तेः ।

विवरणम्

नञ्द्वयोपादानाभावप्रयुक्तलाघवमवलम्ब्य शङ्कते—**न च साध्याभाववद्वृत्तित्वत्वेति** [पृ. 587] । साध्याभाववद्वृत्तित्वत्वघटकधर्मपर्याप्तावच्छेदकताकप्रतियोगिताकाभावः साध्याभाववद्वृत्तित्वाभाव इत्यनेन विवक्षणीयः । धर्मे साध्याभाववद्वृत्तित्वत्वघटकत्वं च स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्वम् । स्वपदेन यस्य घटकत्वम् उपपादनीयं स धर्मो ग्राह्यः । एतादृशघटकत्वं व्यधिकरणधर्मावच्छिन्नसाध्याभाववज्जगद्वृत्तित्वत्वे केवलवृत्तित्वत्वे चास्ति । स्वम्-जगद्वृत्तित्वत्वम् । स्वाविषयकप्रतीतिः - घटादिविषयकप्रतीतिः । तदवृत्तिः विषयिता जगद्वृत्तित्वत्वनिरूपितविषयिता । तत्कत्वं जगद्वृत्तित्वत्वेऽस्ति । एवं स्वं—वृत्तित्वत्वम् । तदविषयकप्रतीतिः—घटादिप्रतीतिः । तदवृत्तिः विषयिता वृत्तित्वत्वनिरूपिता विषयिता । तत्कत्वं वृत्तित्वत्वेऽस्ति । तथा च साध्याभाववद्वृत्तित्वत्वघटकधर्मः जगद्वृत्तित्वत्वम्, केवलवृत्तित्वत्वं च । तत्पर्याप्तावच्छेदकताकप्रतियोगिताकाभावः जगद्वृत्तित्वत्वेन जगद्वृत्तित्वाभावः, वृत्तित्वत्वेन वृत्तित्वाभावश्च यावदन्तर्गतः अवृत्तिगगनादौ प्रसिद्धः हेतौ नास्तीति अव्याप्तिः ।

तद्वारणाय वृत्तिमद्वृत्तित्वोपादानम् । अत्र स्वाविषयकप्रतीत्यविषयसाध्याभाववद्वृत्तित्वत्वकत्वं साध्याभाववद्वृत्तित्वत्वघटकत्वं यथाश्रुतं न निवेशयितुं शक्यते । तथा सति 'धूमवान् वह्नेः' इत्यादौ निर्धूमवृत्तित्वत्वस्य घटकत्वं न स्यात् । तथा हि—स्वम्-निर्धूमवृत्तित्वत्वम् । तदविषयकप्रतीतिः—केवलवृत्तित्वत्वविषयकप्रतीतिः । तस्यां प्रतीतौ केवलवृत्तित्वत्वस्य विषयत्वात् निर्धूमनिरूपितत्वविशिष्ट-वृत्तित्वत्वस्यापि विषयत्वमावश्यकम् । विशिष्टशुद्धयोरनतिरेकात् । अतः स्वाविषयकप्रतीत्यविषयसाध्याभाववद्वृत्तित्वत्वकत्वं निर्धूमवृत्तित्वत्वे नास्तीति तदवच्छिन्नाभावस्य लक्षणघटकत्वं न स्यात् । वृत्तित्वत्वं यद्यपि साध्याभाववद्वृत्तित्वत्वघटकम्, वृत्तित्वत्वाविषयकप्रतीतौ - घटादिप्रतीतौ साध्याभाववद्वृत्तित्वत्वस्य अविषयत्वात्, तथापि 'वृत्तित्वत्वावच्छिन्नाभाव' इत्यनेन वृत्तित्वत्वेन वृत्तित्वाभावः ग्रहीतुं न शक्यते । तस्य वृत्तिमद्वृत्तित्वविशेषणविरहात् । किन्तु वृत्तित्वत्वेन घटाद्यभाव एव ग्राह्यः । स च वन्हिरूपहेतावस्तीति अतिव्याप्तिः । तद्वारणाय यथाश्रुतार्थः परित्यक्तः ।

उक्तनिष्कृष्टार्थे तु निर्धूमवृत्तित्वत्वाविषयककेवलाधेयतात्वविषयकप्रतीतौ साध्याभाववन्निरूपितत्वविशिष्टवृत्तित्वत्वरूपविशिष्टपदार्थनिरूपितविषयितायाः असत्त्वात् स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्व-रूपघटकत्वस्य निर्धूमवृत्तित्वत्वेऽपि सत्त्वेन तदवच्छिन्नाभावस्यापि लक्षणघटकतया 'धूमवान् वह्नेः' इत्यादौ नातिव्याप्तिः ।

अत्र स्वाविषयकत्वं स्वनिरूपितमुख्यविशेष्यताशून्यत्वम् । मुख्यत्वानुपादाने स्वं - वन्ह्यभावत्वम् । तद्विषयिताशून्या 'वह्न्यभाववद्वृत्तित्वत्वम्' इत्याकारिकाप्रतीतिः न भवति । किन्तु 'घट' इत्याकारिकाप्रतीतिः । तदवृत्तिविशिष्टनिरूपितविषयिता-

-कत्वेन वह्न्यभावत्वस्य घटकतया तदवच्छिन्नाभावस्यापि लक्षण-घटकतया तद्वत्त्वस्य धूमरूपहेतावभावात् अव्याप्तिः स्यात् । अतः मुख्यत्वोपादानम् ।

एवं साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितायामपि मुख्यत्वं निवेशनीयम् । अन्यथा 'साध्याभाववद्वृत्तित्वत्ववान्' इति ज्ञाने साध्याभाववद्वृत्तित्वत्वनिष्ठमुख्यविशेष्यताशून्यत्वसत्त्वेन तादृशप्रतीत्यवृत्तित्वस्य साध्याभाववद्वृत्तित्वत्वनिरूपित-विषयितायाम् असत्त्वेन घटकधर्माप्रसिद्धिप्रसङ्गात् । महानसवृत्तित्वत्वव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वोभयरूपेण साध्याभाववद्वृत्तित्वाभावमादाय अव्याप्तिवारणाय पर्याप्तिनिवेशः ।

दुर्घटतयेति [पृ. 588] । विशिष्टाधेयतात्वस्य शुद्धाधेयतात्वानतिरिक्ततया विशेष्यवृत्तिधर्मप्रतियोगिकविशिष्टानुयोगिकाभावानङ्गीकारात् इति भावः । **अतिव्याप्त्यापत्तेरिति** [पृ. 588]। 'धूमवान् वह्नेः' इत्यादाविति शेषः ।

समाधत्ते—**तथा सतीति** [पृ. 588] । साध्याभाववद्वृत्तित्वत्वघटकधर्मपर्याप्तप्रतियोगितावच्छेदकताकाभावनिवेशे 'इदं वाच्यं विषयितासंबन्धेन घटात्' इत्यादौ साध्याभाववद्वृत्तित्वत्वस्य साध्याभाववद्विषयतात्वरूपस्य केवलान्वयितया तदवच्छिन्नाभावाप्रसिद्ध्या अव्याप्तिः स्यात् । अतः तथा निवेशो न कार्यः । किन्तु नञ्द्वयमुपादाय साध्याभाववद्वृत्तित्वत्वाघटकसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभाव एव निवेशनीय इति भावः ।

गादाधरी

'घटत्वभिन्नं प्रमेयत्वात्' इत्यादौ निर्विशेषणघटत्वादिवृत्तितात्वस्य यथा समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तिता-

त्वघटकत्वं तथा 'वाच्यं ज्ञेयत्वात्' इत्यादावपि तादृशस्य स्वाविषयकप्रतीत्यवृत्तिव्यधिकरणधर्मावच्छिन्नसाध्याभावविशेषितघटत्वादिघटिततदभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकतया तदभाववद्वृत्तित्वत्वघटकतया वृत्तिमद्वृत्तितदवच्छिन्नाभावस्य हेतावसत्त्वेन अव्याप्त्यापत्तेः तत्तदभाववद्वृत्तित्वत्वाघटकधर्मानवच्छिन्नाभावनिवेशेनैव वारणसंभवाच्च तादृशधर्मे निरुक्तसाध्याभाववद्वृत्तित्वत्वघटकत्वसत्त्वेऽपि स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्धर्म्यन्तरवृत्तित्वत्वविषयिताकत्वेन साध्याभाववद्वृत्तित्वत्वाघटकत्वस्यापि सत्त्वेन तदवच्छिन्नाभावस्य यथानिरुक्ताभावानात्मकत्वात् ।

विवरणम्

विषयितायाः अतिरिक्तत्वेऽपि नञ्द्वयाद्युपादानस्य प्रयोजनमाह - **घटत्वभिन्नमिति** [पृ. 590] । साध्याभाववद्वृत्तित्वत्वघटकधर्मावच्छिन्नाभाव एव निवेश्यते । घटकत्वं च स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्वम् । नञ्द्वयोपादानं मास्तु इति यद्युच्यते, तदा 'इदं वाच्यम् ज्ञेयत्वात्' इत्यत्र 'घटत्ववृत्तित्वत्वेन घटत्ववृत्तित्वं नास्ति' इति प्रतीतिसिद्धाभावमादाय तद्वत्त्वस्य हेतौ विरहात् अव्याप्तिः । तथा हि - स्वं-घटत्ववृत्तित्वत्वम् । तदविषयकप्रतीतिः व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वम् इति प्रतीतिः न भवति । तस्यां प्रतीतौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववत् यत् घटत्वम् तद्वृत्तित्वत्वस्यापि विषयत्वात् । किन्तु घटत्ववृत्तित्वत्वाविषयिणी प्रतीतिः उदासीनपटादिप्रतीतिः । तदवृत्तिः साध्याभाववद्वृत्तित्वत्वनिरूपितविषयिता । तत्कत्वरूपं घटकत्वं घटत्ववृत्तित्वत्वेऽस्ति । अतः तदवच्छिन्नाभावोऽपि लक्षणघटक इति तमादाय अव्याप्तिः ।

यदि तु विशेषणरहितघटत्ववृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वं नेष्यते, तर्हि 'घटत्वभिन्नं प्रमेयत्वात्' इत्यत्र अतिव्याप्तिः स्यात् । तत्र हि घटत्ववृत्तित्वत्वेन घटत्ववृत्तित्वाभावमादाय अतिव्याप्तिः वारणीया । घटत्वभेदाभावरूपसमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वघटकत्वं साध्याभावाविशेषितघटत्ववृत्तित्वत्वस्य यदि स्यात्, तदेव तदवच्छिन्नाभावमादाय अतिव्याप्तिर्वारयितुं शक्यते । तथा च 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ घटत्ववृत्तित्वत्वावच्छिन्नाभावमादाय अव्याप्तिः प्रसजति । तद्वारणाय नञ्द्वयम् उपादेयमेव । तदुपादाने घटत्ववृत्तित्वत्वस्य यथा साध्याभाववद्वृत्तित्वत्वघटकत्वमस्ति, तथा साध्याभाववद्वृत्तित्वत्वाघटकत्वमप्यस्ति । साध्याभाववद्वृत्तित्वत्वाघटकत्वं हि स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्वम् । स्वं - घटत्ववृत्तित्वत्वम् । स्वाविषयकप्रतीतिः—व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्पटत्वादिवृत्तित्वत्वविषयकप्रतीतिः । तद्वृत्तिः - साध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिता, तत्कत्वरूपम् अघटकत्वं घटत्ववृत्तित्वत्वे अस्ति । तदनवच्छिन्नप्रतियोगिताकत्वविरहात् घटत्ववृत्तित्वत्वावच्छिन्नाभावस्य लक्षणाघटकतया नाव्याप्तिरिति भावः ।

निरुक्तेति [पृ. 591] । स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वनिरूपितविषयिताकत्वरूपघटकत्वसत्त्वेऽपि इत्यर्थः ।

गादाधरी

न च - स्वाविषयकप्रतीत्यवृत्तितदभाववद्वृत्तित्वत्वनिरूपितविषयितासामान्यकत्वरूपतत्तदभाववद्वृत्तित्वत्वघटकतानिवेशे निर्विशेषणकघटत्वादिवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वघट-

कत्वाप्रसक्त्या तद्घटकधर्मावच्छिन्नाभावनिवेशोऽपि संभवतीति-वाच्यम् ।

तथा सति व्यापकताघटितसामान्यपदार्थनिवेशेन तदघटक-धर्मानवच्छिन्नाभावनिवेशापेक्षया गौरवात् । समानाधिकरण-पदसार्थक्यं तु उक्तरीत्यैवेति ध्येयम् ।

विवरणम्

पुनः शङ्कते—न च स्वाविषयकेति [पृ. 592] । सामान्यपदं निवेश्य स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वनिरूपित-विषयितासामान्यकत्वं साध्याभाववद्वृत्तित्वत्वघटकत्वम् । घटत्व-वृत्तित्वत्वाविषयकप्रतीतिः व्यधिकरणधर्मावच्छिन्नसाध्याभाव-वत्पटत्ववृत्तित्वत्वप्रतीतिः । तदवृत्तित्वं यद्यपि व्यधिकरणधर्मा-वच्छिन्नसाध्याभाववद्घटत्ववृत्तित्वत्वनिरूपितविषयितायामस्ति, तथापि तादृशविषयितासामान्यान्तर्गतायां व्यधिकरणधर्मावच्छिन्न-साध्याभाववत्पटत्ववृत्तित्वत्वनिरूपितविषयितायां तदवृत्तित्वं नास्तीति स्वपदेन घटत्ववृत्तित्वत्वस्य ग्रहीतुमशक्यतया न घटत्ववृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वमिति तद-वच्छिन्नाभावः न लक्षणघटकः । किन्तु घटत्वादिना पटाद्यभाव एव इति नाव्याप्तिः । एवं च नञ्द्वयमनुपादाय साध्याभाव-वद्वृत्तित्वत्वघटकधर्मावच्छिन्नाभाव एव निवेश्यतामिति शङ्का ।

समाधानं तु—घटकताशरीरे विषयितासामान्यनिवेशे तस्य व्यापकत्वे पर्यवसानेन अतिगौरवं स्यात् । तथा हि - साध्याभाव-वद्वृत्तित्वत्वनिरूपितविषयितात्वव्यापकस्वाविषयकप्रतीत्यवृत्ति-त्वकत्वं साध्याभाववद्वृत्तित्वत्वघटकत्वम् । तादृशघटकधर्म-पर्याप्तावच्छेदकताकप्रतियोगिताकाभावः साध्याभाववद्वृत्तित्व-त्वाघटकसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावापेक्षया गुरुभूत इति भावः ।

उक्तरीत्यैवेतीति [पृ. 593] । 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नाभावस्य घटत्वादिना पटाद्यभावस्य संग्रहाय समानाधिकरणपदम् । अन्यथा जगद्वृत्तित्वत्वेन जगद्वृत्तित्वाभावस्य वा वृत्तित्वत्वेन वृत्तित्वाभावस्य वा साध्याभाववद्वृत्तित्वत्वाघटकधर्मानवच्छिन्नप्रतियोगिताकस्य वृत्तिमद्वृत्तित्वविरहेण वृत्तिमद्वृत्तितादृशाभावाप्रसिद्धया केवलान्वयिसाध्यकस्थले अव्याप्तिः स्यादिति भावः ।

गादाधरी

केचित्तु - व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन पर्वतवृत्तित्वघटान्यतराद्यभाववारणाय एतन्मतेऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वकत्वं प्रतियोगिताविशेषणमावश्यकम् । तथा च साध्याभाववद्वृत्तित्वत्वेन घटाभावस्य लक्षणघटकता न संभवतीति निषेधद्वयनिवेशनसमानाधिकरणपदोपादानयोः सार्थकता इति - आहुः ।

विवरणम्

केचित्तु [पृ. 594] इत्यादि । साध्याभाववद्वृत्तित्वत्वघटकधर्मावच्छिन्नाभावनिवेशमतेऽपि 'वह्निमान् धूमात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन पर्वतवृत्तित्वघटान्यतराभावमादाय अव्याप्तिवारणाय घटकधर्मावच्छिन्नप्रतियोगितायां स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वकत्वरूपं तत्तत्साध्याभाववद्वृत्तित्वत्वव्याप्यत्व निवेशनीयम् । अन्यतराभावप्रतियोगितायाः घटेऽपि सत्त्वेन तत्र साध्याभाववद्वृत्तित्वत्वविरहात् न तस्याः व्याप्यत्वम् । एवं च साध्याभाववद्वृत्तित्वत्वेन घटाभावस्य साध्याभाववद्वृत्तित्वत्वव्याप्यप्रतियोगिताकत्वविरहेण लक्षणघटकता न संभवति । घटत्वेन साध्याभाववद्वृत्तित्वाभावस्य साध्याभाववद्वृत्तित्वत्वव्याप्यप्रतियोगिताकत्वेऽपि

साध्याभाववद्वृत्तित्वत्वघटकधर्मावच्छिन्नप्रतियोगिताकत्वं नास्तीति सोऽपि न लक्षणघटकः। तथा च तादृशाभावाप्रसिद्धचा अव्याप्तिः प्राप्नोति। तद्वारणाय निषेधद्वयनिवेशनं समानाधिकरणपदोपादानं च आवश्यकम्। तन्निवेशे च घटत्वेन साध्याभाववद्वृत्तित्वाभावस्य लक्षणघटकत्वं निर्वहति। घटत्वस्य साध्याभाववद्वृत्तित्वत्वाघटकत्वेऽपि समानाधिकरणत्वविरहेण साध्याभाववद्वृत्तित्वत्वाघटकसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकत्वस्य घटत्वेन साध्याभाववद्वृत्तित्वाभावेऽक्षतत्वात् इति भावः।

दीधितिः

तेन **आलोकाद्यवृत्तित्वेन** रूपेण यो वन्हिसामान्याभाववद्वृत्तित्वस्य **यश्च इन्धनत्वाद्यवच्छिन्न**वन्ह्यभावाधिकरणीभूत**महानस**वृत्तित्वादेरभावः तस्य धूमादौ **स्वनिष्ठ**साध्याभाववद्वृत्तित्वविरहस्य च **हेत्वन्तरवृत्तेः स्वस्मिन्** अवृत्तित्वेऽपि न क्षतिरिति आहुः।

गादाधरी

[प्रतियोगितायां साध्याभाववद्वृत्तित्वत्वव्याप्यत्वादिनिवेशप्रयोजनम्]

प्रतियोगितायां साध्याभाववद्वृत्तित्वत्वव्याप्यत्वनिवेशनप्रयोजनमाह - **आलोकाद्यवृत्तित्वेनेति** [पृ.595]। वन्हिसामान्याभाववद्वृत्तित्वस्य योऽभावः तस्य धूमादौ असत्त्वेऽपि इत्यन्वयः। वन्हिसामान्याभावः वन्हित्वावच्छिन्नवन्ह्यभावः।

साध्याभाववद्वृत्तित्वत्वव्यापकतानिवेशनप्रयोजनमाह — **यश्चेति** [पृ.595]।

इन्धनत्वाद्यवच्छिन्नेति [पृ.595] **साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघ-**

टकतया घटत्वाद्यवच्छिन्नवन्ह्यभावोपेक्षणम् । पृ.595] इत्यत्र महानसवृत्तित्वत्वादिनेति बोध्यम् ।

यत्तु - तादृशाभावाधिकरणमहानसवृत्तित्वत्वाद्यवच्छिन्नस्येति षष्ठ्यन्तव्याख्यानम्, तदसत् । गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वेऽपि तादृशाभावाविशेषितमहानसवृत्तित्वत्वाद्यवच्छिन्नाभावमादाय दोषप्रसक्तेः तद्विशेषितमहानसवृत्तित्वत्वावच्छिन्नाभावपर्यन्तानुसरणे सन्दर्भविरोधात् । अधिकरणान्तस्य उपलक्षणतया शेषांशस्य विशेषणतया भानस्य व्युत्पत्तिविरुद्धतया तथा विवक्षयितुमशक्यत्वात् ।

अधिकरणविशेषानुपरक्तवृत्तेरभावमादायापि दोषं दर्शयति **स्वनिष्ठेति** [पृ.595] । धूमादिनिष्ठसाध्याभाववद्वृत्तित्वव्यक्तेः तद्व्यक्तित्वावच्छिन्नाभावस्य इत्यर्थः ।

हेत्वन्तरवृत्तेः [पृ.595] - आलोकादिवृत्तेः । एतेन वृत्तिमद्वृत्तित्वमस्तीति सूचितम् । **स्वस्मिन्** [पृ.595] - धूमादौ ।

विवरणम्

आलोकावृत्तित्वेनेति [पृ.595] दीधितिमवतारयति - **प्रतियोगितायामिति** [पृ.595] । पूर्वं दीधितौ तद्वद्वृत्तित्वाभावोऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताक इत्युक्तम् । तत्र साध्याभाववद्वृत्तित्वत्वव्याप्यत्वं साध्याभाववद्वृत्तित्वत्वव्यापकत्वं च प्रविष्टम् । तत्र व्याप्यत्वनिवेशस्य प्रयोजनमुच्यते - **आलोकाद्यवृत्तित्वेनेति** [पृ.595] । तथा च व्याप्यत्वविशेषणानुपादाने 'तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः' इत्येतावन्मात्रोक्तौ 'वन्हिमान् धूमात्' इत्यादौ समवायाधिकरणवन्हित्वावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः आलोकावृत्तित्वावच्छिन्नाभावोऽपि भवति । वन्ह्य–

भाववद्वृत्तित्वस्य आलोकावृत्तित्वेन आलोकावृत्त्यभावीयप्रतियोगितायां वह्न्यभाववद्वृत्तित्वत्वव्यापकत्वसत्त्वात् । तथा च आलोकावृत्तित्वावच्छिन्नाभावः आलोकरूपे वृत्तिमति प्रसिद्धः । हेतौ धूमे नास्ति । तत्र आलोकावृत्तिधूमत्वस्य सत्त्वात् आलोकावृत्त्यभावस्य असंभवात् । अतः व्याप्यत्वनिवेशः । तन्निवेशे तु आलोकावृत्त्यभावीयप्रतियोगितायाः आलोकावृत्ति-धूमत्वघटत्वादावपि सत्त्वेन तत्र साध्याभाववद्वृत्तित्वत्वविरहेण स्वव्यापकसाध्याभाववद्वृत्तित्वत्वकत्वरूपं व्याप्यत्वं नास्तीति आलोकावृत्त्यभावस्य लक्षणाघटकतया न तमादाय अव्याप्तिः ।

एवं प्रतियोगितायां साध्याभाववद्वृत्तित्वत्वव्यापकत्वानिवेशे 'वन्हिमान् धूमात्' इत्यादौ इन्धनत्वेन वह्न्यभावं साध्याभावपदेन गृहीत्वा तदधिकरणजगद्वृत्तित्वत्वव्याप्यप्रतियोगिताकाभाव इत्यनेन महानसवृत्तित्वत्वेन महानसवृत्तित्वाभावं गृहीत्वा तस्य च धूमेऽभावात् अव्याप्तिः प्रसजति । अतः व्यापकत्वनिवेशः । तन्निवेशे व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वत्वं पर्वतवृत्तित्वेऽप्यस्ति । तत्र महानसवृत्तित्वाभावीयप्रतियोगिता नास्तीति साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वविरहेण महानसवृत्तित्वाभावस्य लक्षणाघटकतया नाव्याप्तिः ।

एवं प्रतियोगितायां व्यापकत्वानुपादाने धूमनिष्ठस्य महान-सवृत्तित्वस्य यः तद्व्यक्तित्वावच्छिन्नाभावः तमादायापि अव्याप्तिः ।

घटत्वेन वह्न्यभावोपेक्षायाः बीजमाह—**साध्यतावच्छेदका-वच्छिन्नेति** [पृ. 596] ।

गादाधरी

[कूटाघटितकूटघटितलक्षणयोः विशेषस्य कथनम्]

अत्र च लक्षणे 'सत्ताभाववान् द्रव्यत्वात्' इत्यादौ सत्ता-वत्समवेतत्वाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव

समवेतवृत्तित्वेऽपि द्रव्यावृत्तित्वाद्यवच्छिन्नाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि तद्वत्समवेतत्वाभावस्य समवेतगुणत्वादिवृत्तितया द्रव्यत्वादेः तद्वत्त्वाभावात् नातिव्याप्तिः ।

एवम् अवृत्तिसाध्यकस्थलेऽपि साध्यतावच्छेदकावच्छिन्नव्यापकत्वाप्रसिद्ध्या नातिव्याप्तिः ।

कूटघटितलक्षणे च तत्र तत्र अतिव्याप्तिवारणाय साध्यसमानाधिकरणत्वे सतीति विशेषणं देयम् । एतल्लक्षणे च अवृत्तिहेतुके अतिव्याप्तिवारणाय वृत्तिमत्त्वमात्रमुपादेयम् । कूटघटितलक्षणवदत्रापि 'महाकालान्यो घटात्' इत्यादौ अतिव्याप्तिर्द्रष्टव्या । किन्तु तदन्यदोषाणामेव अत्र अनवकाश इत्यवधेयम् ।

इति कूटाघटितलक्षणम्

विवरणम्

कूटाघटितकूटघटितलक्षणयोः विशेषमाह - **अत्र चेत्यादिना** [पृ॰597] । कूटाघटितलक्षणे 'सत्ताभाववान्, द्रव्यत्वात्' इत्यत्र व्यभिचारिणि साध्याभावपदेन सत्ताभावत्वेन सत्ताभावाभावस्य सत्तारूपस्य ग्रहणे तद्वद्वृत्तित्वाभावाः यावन्तः इत्यनेन सत्तावन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावस्य सत्तावत्समवेतत्वाभावरूपस्य ग्रहणं न संभवति । तस्य समवायसंबन्धेन वृत्तिमद्वृत्तित्वविरहात् । समवायसंबन्धेन वृत्तिमतां सर्वेषामपि सत्तावत्समवेतत्वात् । अतः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः घटत्वादिना सत्तावत्समवेतत्वाभाव एव ग्राह्यः । स च हेतावप्यस्तीति अतिव्याप्तिरित्याशङ्का ।

समाधानं तु - साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्यैव विवक्षितत्वात् द्रव्यावृत्तित्वावच्छिन्नाभावोऽपि साध्याभावपदेन ग्रहीतुं शक्यते। यत्र यत्र सत्ताभावः सामान्यादौ, तत्र द्रव्यावृत्तित्वावच्छिन्नं सामान्यत्वादिकं वर्तते। अतः साध्यव्यापकतावच्छेदकं द्रव्यावृत्तित्वम्। तदवच्छिन्नप्रतियोगिताकाभावः द्रव्यावृत्त्यभावः। तदधिकरणं द्रव्यम्। तन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वत्वावच्छिन्नाभावः द्रव्यावृत्तौ समवायेन वृत्तिमति गुणत्वादौ वर्तमानतया लक्षणघटकः। तद्वत्त्वं द्रव्यत्वरूपहेतौ नास्ति। तस्य द्रव्यसमवेतत्वात्। अतः नातिव्याप्तिः।

कूटघटितलक्षणे तु साध्याभावपदेन साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावस्यैव विवक्षिततया द्रव्यावृत्तित्वावच्छिन्नाभावस्य सत्ताभावत्वसमनियतप्रतियोगिताकत्वविरहेण साध्याभावपदेन ग्रहीतुमशक्यतया सत्ताभावत्वावच्छिन्नप्रतियोगिताकाभावघटितकूटाधिकरणवृत्तित्वाभावः इत्यनेन सत्तावत्समवेतत्वत्वावच्छिन्नाभावः ग्रहीतुं न शक्यते। तस्य वृत्तिमद्वृत्तित्वविरहात्। किन्तु घटत्वेन सत्तावत्समवेतत्वाभाव एव ग्राह्यः। तद्वत्त्वं हेतावस्तीति 'सत्ताभाववान् द्रव्यत्वात्' इत्यत्र अतिव्याप्तिर्भवति। तद्वारणाय हेतौ साध्यसामानाधिकरण्यरूपं विशेषणं देयम्। द्रव्यत्वस्य सत्ताभावसामानाधिकरण्यविरहात् नातिव्याप्तिः। कूटाघटितलक्षणे तु तद्विशेषणं न देयमिति लाघवम्।

एवम् अवृत्तिसाध्यकव्यभिचारिणि 'गगनवान् द्रव्यत्वात्' इत्यादौ साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणं जगदेव भवति। तद्वृत्तित्वाभावः इत्यनेन घटत्वादिना जगद्वृत्तित्वाभाव एव ग्राह्यः। तस्यैव वृत्तिमद्वृत्तित्वात्। तद्वत्त्वं च हेतावस्तीति अतिव्याप्तिः कूटघटितलक्षणे।

कूटाघटितलक्षणे तु साध्यतावच्छेदकगगनत्वावच्छिन्नव्यापकत्वमेव अप्रसिद्धम् । गगनत्वावच्छिन्नाधिकरणाप्रसिद्धेः । अतः नातिव्याप्तिः ।

यद्यपि कूटाघटितलक्षणेऽपि अवृत्तिहेतुके 'वन्हिमान् गगनात्' इत्यादौ साध्याभाववद्वृत्तित्वाभावस्य हेतौ सत्त्वात् अतिव्याप्तिः, तथापि तद्वारणाय हेतौ वृत्तिमत्त्वविशेषणं देयम् । कूटघटितलक्षणे तु 'सत्ताभाववान् द्रव्यत्वात्' इत्यत्र अतिव्याप्तिवारणाय हेतौ साध्यसामानाधिकरण्यरूपविशेषणस्य दातव्यत्वात् तेनैव 'वह्निमान् गगनात्' इत्यत्र अतिव्याप्तिवारणं संभवति ।

एवं 'महाकालान्यो घटात्' इत्यत्र लक्षणद्वयेऽपि अतिव्याप्तिः । साध्याभावाधिकरणे महाकाले हेतुतावच्छेदककालिकसंबन्धेन वृत्तिमन्मात्रस्य वृत्तेः साध्याभाववन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वत्वरूपसमानाधिकरणधर्मावच्छिन्नाभावः लक्षणघटको न भवति । किन्तु घटत्वादिना महाकालवृत्तित्वाभाव एव लक्षणघटकः । तस्य च हेतौ सत्त्वात् । परन्तु एतदतिरिक्ता अपि बहवो दोषाः कूटघटितलक्षणे प्रदर्शयिष्यन्ते । ते कूटाघटितलक्षणे न सन्ति इत्येव तात्पर्यम् । न तु कूटाघटितलक्षणस्य सर्वथा निर्दोषत्वमिति ।

॥ इति कूटाघटितलक्षणम् ॥

कूटघटितलक्षणम्

दीधितिः

अन्ये तु—वृत्तिमद्वृत्तयः यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावाः तद्वत्त्वं तत्त्वम्। **तादृशवृत्तित्वाभावः** स्वव्यापकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताको बोध्यः। **प्रयोजनं च उक्तप्रायम्।**

साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य **व्यधिकरणधर्मावच्छिन्नाभावस्यैव** वृत्तिमद्वृत्तित्वात् **व्यभिचारिण्यतिव्याप्तिः।** अतः **समुदायेति।**

गादाधरी

कूटघटितलक्षणे दलप्रयोजनप्रतिपादनम्

अन्ये त्विति [पृ. 601]। **घटत्वादिना** निर्धूमवृत्तित्वाभावमादाय व्यभिचारिण्यतिव्याप्तिवारणाय यावत्त्वोपादानम्। **एवं च केवलान्वयिनः** साध्यस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव अभावस्य प्रसिद्ध्या तत्समुदायाधिकरणजगद्वृत्तित्वस्य अवृत्तौ **प्रसिद्धः समानाधिकरणधर्मा**वच्छिन्नाभावोऽपि यावदभावान्तर्गत इति तद्वत्त्वविरहात् तादृशसाध्यके विषयिताद्यतिरिक्तसंबन्धेन हेतौ अव्याप्तिः। **साधनसमानाधिकरणत्वेन** साध्याभावविशेषणपक्षे च व्यतिरेकिणोऽपि साध्यस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव अभावस्य सद्धेतौ लक्षणघटकतया जगत एव तत्कूटाधिकरणतया व्यतिरेकिसाध्यकेऽपि विषयितातिरिक्तसंबन्धेन हेतावव्याप्तिरिति वृत्तिमद्वृत्तित्वमभावविशेषणम्।

तादृशवृत्तित्वेति [पृ. 601]। साध्याभावसमुदायाधिकरणवृत्तित्वेत्यर्थः।

प्रयोजनं चेति [पृ. 601]। **पूर्वदलप्रयोजनं** आलोकाद्यवृत्तित्वेन निर्वन्हिवृत्तित्वाभावमादाय 'वन्हिमान् धूमात्' इत्यत्र अव्याप्तिवारणरूपं पूर्वलक्षणे उक्तमेव। चरमदलप्रयोजनं तु साधनसमानाधिकरणत्वस्य साध्याभावाविशेषणत्वे केवलान्वयिसाध्यके ज्ञेयत्वादिहेतौ घटादिवृत्तित्वाभावमादाय अव्याप्तिवारणमेव। न तु 'वन्हिमान् धूमात्' इत्यादौ महानसवृत्तित्वाद्यभावव्यावर्तनम्। तत्र महानसादेः वन्हित्वाद्यवच्छिन्नवन्ह्यभावानधिकरणत्वेन साध्याभावकूटानधिकरणत्वात्। एतस्य प्रागनुक्तत्वात् **उक्तप्रायमिति** [पृ. 601]।

समुदायपदप्रयोजनमाह–साध्याभावाधिकरणेति [पृ. 601]। **व्यधिकरणधर्मावच्छिन्नाभावस्यैवेति** [पृ. 601]। निर्धूमवृत्तित्वत्वाद्यवच्छिन्ननिर्धूमवृत्तित्वाभावस्य प्रतियोगितया व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणमहानसादिवृत्तित्वावृत्तितया साध्याभावाधिकरणवृत्तित्वत्वाव्यापकतया जगद्वृत्तित्वसामान्याभावस्यैव तद्व्यापकप्रतियोगिताकतया तस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य अवृत्तावेव प्रसिद्धत्वात् इति भावः।

व्यभिचारिण्यतिव्याप्तिरिति [पृ. 601]। तादृशस्य जगद्वृत्तित्वाभावस्य सर्वत्र सत्त्वादिति भावः।

विवरणम्

वृत्तिमद्वृत्तयः यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावाः तद्वत्त्वं व्याप्तिरिति कूटघटितलक्षणम्। साध्याभावपदेन साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावः विवक्षित इति वक्ष्यति।

'वन्हिमान् धूमात्' इत्यादौ साध्यतावच्छेदकवन्हित्वसमनियतप्रतियोगिताकः 'वन्हित्वेन वन्ह्यभावः', 'घटत्वादिना वह्न्यभाव'श्च। तत्समुदायाधिकरणं निर्वन्हिः। तद्वृत्तित्वा-

भावः निर्वन्हिवृत्तित्वत्वेन निर्वन्हिवृत्तित्वाभावः सवन्हिपर्वतादि-वृत्तौ प्रसिद्धः हेतौ धूमेऽप्यस्तीति लक्षणसमन्वयः।

'धूमवान् वह्नेः' इत्यादौ धूमत्वसमनियतप्रतियोगिताकः अभावः 'धूमत्वेन धूमाभावः', 'घटत्वेन धूमाभाव'श्च। तद्घटित-कूटाधिकरणं निर्धूमः। तद्वृत्तित्वाभावः निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावः हेतौ वह्नौ नास्ति। तस्य निर्धूमायोगोलक-वृत्तित्वात् इति नातिव्याप्तिः।

अत्र यावत्पदानुपादाने घटत्वेन निर्धूमवृत्तित्वाभावमादाय 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः। तद्वारणाय यावत्पदोपा-दानम्। तदुपादाने समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावस्यापि यावदन्तर्गततया तद्वत्त्वस्य हेतौ विरहात् नातिव्याप्तिः। तदाह—**घटत्वादिनेति**। [पृ. 601]।

वृत्तिमद्वृत्तित्वविशेषणस्य प्रयोजनमाह—**एवं चेति** [पृ. 601]। यावत्त्वोपादाने चेत्यर्थः। यावत्त्वानुपादाने वृत्तिमद्-वृत्तित्ववैयर्थ्यात् 'एवं च' इत्युक्तम्। अभावे वृत्तिमद्वृत्तित्व-विशेषणानुपादाने 'यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वा-भावाः तद्वत्त्वं व्याप्ति'रित्युक्तौ केवलान्वयिसाध्यकसद्धेतौ 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ साध्याभावपदेन व्यधिकरणधर्मावच्छिन्न-प्रतियोगिताकः साध्याभाव एव ग्राह्यः। तदधिकरणं जगदेव भवति। तद्वृत्तित्वाभावाः यावन्तः इत्यनेन जगद्वृत्तित्वत्वेन जगद्वृत्तित्वाभावोऽपि ग्रहीतुं शक्यते। तस्य अवृत्तौ गगनादौ प्रसिद्धत्वात् तादृशाभाववत्त्वं ज्ञेयत्वरूपहेतौ नास्तीति अव्याप्तिः। तद्वारणाय वृत्तिमद्वृत्तित्वविशेषणम्। जगद्वृत्तित्वत्वेन जगद्-वृत्तित्वाभावस्य वृत्तिमद्वृत्तित्वविरहेण लक्षणाघटकतया व्यधि-

करणघटत्वादिना जगद्वृत्तित्वाभाव एव लक्षणघटकः। तद्वत्त्वं हेतावस्तीति नाव्याप्तिः।

यद्यपि - वृत्तिमद्वृत्तित्वानुपादाने केवलान्वयिसाध्यके विषयितासंबन्धेन हेतौ 'इदं वाच्यम्, विषयितया घटात्' इत्यत्र नाव्याप्तिः। व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणजगन्निरूपितविषयितासंबन्धावच्छिन्न-वृत्तित्वाभावस्य समानाधिकरण-धर्मावच्छिन्नप्रतियोगिताकस्य जगद्विषयत्वाभावरूपस्य अप्रसिद्धेः। अवृत्तिगगनादेरपि ज्ञानरूपजगद्विषयत्वात्। तथा च व्यधिकरण-धर्मावच्छिन्नजगद्विषयत्वाभावस्यैव लक्षणघटकतया तद्वत्त्वस्य हेतौ सत्वात् नाव्याप्तिः - तथापि विषयितातिरिक्तस्वरूपादिसंबन्धेन हेतौ 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ पूर्वोक्तरीत्या अव्याप्तिरिति भावः।

वृत्तिमद्वृत्तित्वविशेषणस्य व्यतिरेकिसाध्यकस्थलेऽपि अव्याप्तिवारणरूपं प्रयोजनं संभवतीत्याह—**साधनसमानाधिकरणत्वेनेति** [पृ. 601]। 'सत्तावान् जातेः' इत्यत्र साध्याभावबन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धया अव्याप्तेः वारणाय साध्याभावे साधनसमानाधिकरणत्वं विशेषणं देयमिति वक्ष्यति। तत्पक्षे व्यतिरेकिसाध्यके 'वन्हिमान् धूमात्' इत्यादावपि वृत्तिमद्वृत्तित्वानुपादाने अव्याप्तिः प्रसजति। तथा हि - हेतुसमानाधिकरणः साध्याभावः समानाधिकरणवन्हित्वावच्छिन्न-वह्न्यभावो न भवति। किन्तु व्यधिकरणघटत्वादिना वह्न्यभाव एव। तत्कूटाधिकरणं जगदेव। 'तद्वृत्तित्वाभावाः यावन्तः' इत्यनेन जगद्वृत्तित्वत्वेन जगद्वृत्तित्वाभावोऽपि ग्रहीतुं शक्यते। तस्य अवृत्तिगगनादिवृत्तित्वात्। तद्वत्त्वं च हेतौ नास्तीति अव्याप्तिः। तद्वारणाय वृत्तिमद्वृत्तित्वविशेषणम्। तद्विशेषणे च घटत्वादिना जगद्वृत्तित्वाभावस्यैव लक्षणघटकतया तद्वत्त्वस्य हेतौ सत्वात् नाव्याप्तिः।

व्यतिरेकिसाध्यकेऽपि 'ज्ञानं गुणः विषयितासंबन्धेन घटात्' इत्यादौ साधनसमानाधिकरणव्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणजगन्निरूपितविषयितासंबन्धावच्छिन्नवृत्तित्वत्वावच्छिन्न - प्रतियोगिताकाभावस्य अप्रसिद्धया व्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावस्यैव लक्षणघटकतया तद्वत्त्वस्य च हेतौ सत्त्वात् असंभवो न भवतीति विषयित्वातिरिक्तसंबन्धेन हेतौ 'वन्हिमान् धूमात्' इत्यादौ अव्याप्तिरुक्ता ।

पूर्वदलप्रयोजनमित्यादि [पृ. 602] । 'साध्याभावसमुदायाधिकरणवृत्तित्वाभावः' इत्यनेन साध्याभावसमुदायाधिकरणवृत्तित्वत्वसमनियतप्रतियोगिताकाभावः विवक्षणीयः । समनैयत्यशरीरे साध्याभाववद्वृत्तित्वत्वव्याप्यत्वरूपस्य पूर्वदलस्य अनुपादाने 'वन्हिमान् धूमात्' इत्यादौ साध्याभावसमुदायाधिकरणनिर्वन्हिवृत्तित्वत्वव्यापकप्रतियोगिताकाभावः आलोकावृत्तित्वावच्छिन्नाभावोऽपि भवति । निर्वन्हिवृत्तित्वत्वाधिकरणे निर्वन्हिवृत्तित्वे आलोकावृत्त्यभावीयप्रतियोगितायाः सत्त्वात् । आलोकावृत्त्यभावीयप्रतियोगिता आलोकावृत्तौ वर्तते । निर्वन्हिवृत्तित्वमपि आलोकावृत्ति इति कृत्वा निर्वन्हिवृत्तित्वेऽपि वर्तते । अतः निर्वन्हिवृत्तित्वत्वव्यापकप्रतियोगिताकः आलोकावृत्त्यभावः आलोकरूपे वृत्तिमति वर्तमानः हेतौ धूमे नास्ति । तत्र आलोकावृत्तेः धूमत्वस्य सत्त्वात् आलोकावृत्त्यभावस्य असंभवात् इति अव्याप्तिः । तद्वारणाय व्याप्यत्वरूपं पूर्वदलम् । तन्निवेशे आलोकावृत्त्यभावीयप्रतियोगितायाः निर्वन्हिवृत्तित्वत्वव्याप्यत्वं नास्ति । निर्वन्हिवृत्तित्वत्वशून्ये आलोकावृत्ति घटत्वादावपि आलोकावृत्त्यभावीयप्रतियोगितायाः सत्त्वात् । तथा च साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्याप्यप्रतियोगिताकत्वम् आलोकावृत्तित्वावच्छिन्नाभावस्य नास्तीति तस्य लक्षणाघटकतया न

तमादाय अव्याप्तिः। इदं तु प्रयोजनं **कूटाघटितलक्षणे** उक्तमेव अत्रापि ग्राह्यम्।

साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वरूपस्य समनैयत्यघटकस्य चरमदलस्य अनुपादाने कूटाघटितलक्षणे 'वन्हिमान् धूमात्' इत्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणजगद्वृत्तित्वत्वव्याप्यप्रतियोगिताकं महानसवृत्तित्वत्वेन महानसवृत्तित्वाभावम् आदाय अव्याप्तिरित्युक्तम्। अस्मिन् कूटघटितलक्षणे तु साध्याभावे साधनसमानधिकरणत्वविशेषणे सत्येव तादृशाव्याप्तिः संभवति। तद्विशेषणासत्वे तु समानाधिकरणधर्मावच्छिन्नवह्न्यभावस्यापि साध्याभावपदेन ग्रहीतुं शक्यतया तद्घटितकूटाधिकरणनिर्वन्हिवृत्तित्वत्वव्याप्यप्रतियोगिताकत्वविरहेण महानसवृत्तित्वत्वावच्छिन्नाभावस्य लक्षणाघटकतया अव्याप्त्यप्रसक्तेः। तथा च साधनसमानाधिकरणत्वविशेषणासत्त्वपक्षे 'वन्हिमान् धूमात्' इत्यादौ नाव्याप्तिः। किन्तु केवलान्वयिसाध्यकस्थले 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य अप्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव साध्याभावपदेन ग्राह्यतया तत्कूटाधिकरणजगद्वृत्तित्वत्वव्याप्यप्रतियोगिताकयावदभावान्तर्गतः घटवृत्तित्वत्वेन घटवृत्तित्वाभावोऽपि। तद्वत्त्वं हेतौ नास्तीति अव्याप्तिः। तद्वारणाय व्यापकत्वविशेषणम्। तदुपादाने च घटवृत्तित्वाभावीयप्रतियोगितायाः जगद्वृत्तित्वत्वव्यापकत्वं नास्ति। पटादिवृत्तित्वेऽपि जगद्वृत्तित्वत्वसत्त्वात्। तथा च घटवृत्तित्वत्वावच्छिन्नाभावस्य लक्षणाघटकतया नाव्याप्तिः। एतादृशस्य विशेषस्य पूर्वमनुक्तत्वात् **उक्तप्रायम्** इत्युक्तम् [पृ. 602] इति भावः।

समुदायपदप्रयोजनमिति [पृ. 602]। समुदायपदानुपादाने साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावाधिकरणवृत्तित्वत्व-

समनियतप्रतियोगिताकाः यावन्तः वृत्तिमद्वृत्तयः अभावाः तद्वत्त्वं व्याप्तिरित्युक्तौ 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः । तत्र हि निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावमादाय अतिव्याप्ति-र्वारणीया । स च अभावः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः यः साध्याभावः घटत्वेन धूमाभावः तदधिकरणजगद्वृत्तित्वत्व-व्यापकप्रतियोगिताकः न भवति । जगद्वृत्तित्वत्वस्य धूमवन्महा-नसवृत्तित्वेऽपि सत्त्वेन तत्र निर्धूमवृत्तित्वाभावीयप्रतियोगितायाः असत्त्वात् । अतः जगद्वृत्तित्वत्वव्यापकप्रतियोगिताकः वृत्ति-मद्वृत्तिः अभावः घटत्वेन जगद्वृत्तित्वाभाव एव । स तु वन्हिरूप-हेतावस्तीति अतिव्याप्तिः । तद्वारणाय समुदायपदोपादानम् । तदुपादाने साध्याभावसमुदायः समानाधिकरणधर्मावच्छिन्नसाध्या-भाव [धूमत्वेन धूमाभाव] व्यधिकरणधर्मावच्छिन्नसाध्याभाव [घटत्वादिना धूमाभाव] एतद्घटितसमुदायः। तदधिकरणं न जगत्, किंतु निर्धूमः । तद्वृत्तित्वत्वव्यापकप्रतियोगिताकः निर्धूम-वृत्तित्वत्वेन निर्धूमवृत्तित्वाभावोऽपि । स च हेतौ नास्तीति नाति-व्याप्तिः ।

तस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्येति । [पृ. 602] । तस्य - जगद्वृत्तित्वसामान्याभावस्य । समानाधि-करणधर्मावच्छिन्नप्रतियोगिताकस्य - जगद्वृत्तित्वत्वावच्छिन्नप्रति-योगिताकस्य । तथा च जगद्वृत्तित्वत्वावच्छिन्नजगद्वृत्तित्वाभा-वस्य अवृत्तिगगनादावेव सत्त्वेन वृत्तिमद्वृत्तित्वं नास्ति इति लक्षणाघटकतया घटत्वेन जगद्वृत्तित्वाभाव एव लक्षणघटकः । तस्य हेतौ सत्त्वात् अतिव्याप्तिरिति भावः ।

तादृशस्य जगद्वृत्तित्वाभावस्येति [पृ. 602] । व्यधि-करणधर्मावच्छिन्नप्रतियोगिताकस्य जगद्वृत्तित्वाभावस्य इत्यर्थः ।

गादाधरी

समुदायपदप्रयोजनविचारः

अत्र च स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वे सति साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वं प्रतियोगिताविशेषणम् । तत्र च **शेषदले** समुदायानिवेशेऽपि निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावस्य लक्षणाघटकत्वेऽपि नातिव्याप्तिस्संभवति । व्यतिरेकिसाध्यके **तादृशप्रतियोगितायाः** एव अप्रसिद्धेः । जगद्वृत्तित्वसामान्याभावप्रतियोगितायाः साध्याभावाधिकरणवृत्तित्वत्वव्यापकत्वेऽपि स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वरूपपूर्वदलविरहात् धूमाद्यभावसमुदायाधिकरणवृत्तित्वत्वशून्ये महानसादिवृत्तित्वेऽपि तादृशप्रतियोगितासत्त्वात् इति पूर्वपक्षयित्वा **शेषदले** समुदायाप्रवेशे **पूर्वदलमेव** नोपादेयम् । तदनुपादानेऽपि 'वन्हिमान् धूमात्' इत्यादौ आलोकाद्यवृत्तित्वाद्यवच्छिन्नाभावप्रतियोगित्वस्य **आलोकादिनिष्ठ**पर्वतादिवृत्तित्वसाधारणसाध्याभावाधिकरणवृत्तित्वत्वाव्यापकतया तादृशाभावमादाय दोषाप्रसक्तेः । **तदुपादाने** व्यतिरेकिसाध्यकमात्र एव उक्तरीत्या तादृशप्रतियोगित्वाप्रसिद्धया अव्याप्तिप्रसङ्गाच्च । **तथा च** 'धूमवान् वह्नेः' इत्यादौ घटत्वेन जगद्वृत्तित्वाभावमादाय अतिव्याप्तिरित्याशयेन दीधितिकृता इदमभिहितम् । अतिव्याप्तिवारणाय शेषदले समुदायप्रवेशने च निर्वन्हिवृत्तित्वत्वव्यापकप्रतियोगिताकस्य आलोकावृत्तित्वावच्छिन्नाभावस्य 'वन्हिमान् धूमात्' इत्यत्र शेषदलाक्रान्ततया पूर्वदलोपादानमावश्यकम् । तत्र च समुदायाप्रवेशे व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वत्वव्याप्यप्रतियोगिताकस्य आलोकावृत्ति वृत्तित्वत्वावच्छिन्नाभावस्य **धूमे** असत्त्वात् अव्याप्तिरिति **तत्रापि तत्प्रवेशनमिति केचित् समादधते** ।

विवरणम्

समुदायपदाप्रवेशे व्यभिचारिणि 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिः दीधितौ उक्ता। इदम् अतिव्याप्तिवारणरूपं समुदायपदप्रयोजनं न सङ्गच्छत इत्याक्षिप्य समाधानं वदतां केषाञ्चिन्मतम् अनुवदति—अत्र चेत्यादिना [पृ. 608]। साध्याभावसमुदायाधिकरणवृत्तित्वत्वसमनियतत्वं प्रतियोगितायां विशेषणं दत्तम्। समनियतत्वं च स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वे सति साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वम्। सत्यन्तं साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्याप्यत्वस्य परिष्काररूपम्। तत्र शेषदले—व्यापकत्वदले समुदायपदस्य अनिवेशे 'धूमवान् वह्नेः' इत्यत्र अतिव्याप्तिः न संभवति। यद्यपि निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावीयप्रतियोगितायाः साध्याभावाधिकरणवृत्तित्वत्वव्यापकत्वं न संभवति—घटत्वेन धूमाभावाधिकरणजगद्वृत्तित्वत्वस्य पर्वतादिवृत्तित्वेऽपि सत्त्वेन तत्र निर्धूमवृत्तित्वाभावीयप्रतियोगितायाः असत्त्वात्। तथा च घटत्वेन जगद्वृत्तित्वाभावस्यैव साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकतया तस्य च वह्नौ सत्त्वात् अतिव्याप्तिरिति शङ्का भवति - तथापि व्यतिरेकिसाध्यके 'धूमवान् वह्नेः' इत्यादौ समुदायपदाघटितसाध्याभावाधिकरणवृत्तित्वत्वव्यापिकायाः समुदायपदघटितसाध्याभावसमुदायाधिकरणवृत्तित्वत्वव्याप्यायाश्च प्रतियोगितायाः अप्रसिद्ध्या नातिव्याप्तिः। तथा हि—घटत्वेन जगद्वृत्तित्वाभावीयप्रतियोगितायाः घटत्वेन धूमाभावरूपसाध्याभावाधिकरणजगद्वृत्तित्वत्वव्यापकत्वेऽपि स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वरूपव्याप्यत्वदलविरहात्। घटत्वेन जगद्वृत्तित्वाभावीयप्रतियोगितायाः महानसवृत्तित्वेऽपि सत्त्वेन तत्र साध्याभावसमुदायाधिकरणनिर्धूमवृत्तित्वत्वविरहात्। तथा च व्यापकत्वदले समुदायपदाप्रवेशेऽपि प्रतियोगित्वाप्रसिद्ध्यैव

'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिवारणसंभवात् दीधित्युक्तम् अतिव्याप्तिवारणरूपं समुदायपदप्रयोजनं न सङ्गच्छत इत्याक्षेपः ।

समाधानं तु—व्यापकत्वशरीरे समुदायपदं न निवेश्यते चेत् व्याप्यत्वदलं व्यर्थं स्यात् । 'वन्हिमान् धूमात्' इत्यादौ आलोकावृत्तित्वावच्छिन्नाभावमादाय अव्याप्तिवारणाय हि व्याप्यत्वदलम् उपात्तम् । व्यापकत्वशरीरे समुदायपदाप्रवेशे आलोकावृत्यभावस्य व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणजगद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वं न संभवति । आलोकनिष्ठे पर्वतवृत्तित्वेऽपि जगद्वृत्तित्वत्वस्य सत्त्वेन तत्रालोकावृत्यभावीयप्रतियोगितायाः अभावात् । तथा च आलोकावृत्तित्वावच्छिन्नाभावस्य लक्षणाघटकतया तमादाय अव्याप्तेः अप्रसक्त्या पूर्वदलं - व्याप्यत्वदलं व्यर्थं भवेत् ।

किञ्च व्याप्यत्वदलोपादाने व्यतिरेकिसाध्यकसद्धेतौ 'वन्हिमान् धूमात्' इत्यादौ घटत्वेन जगद्वृत्तित्वाभावीयप्रतियोगितायाः साध्याभावाधिकरणवृत्तित्वत्वव्यापकत्वेऽपि स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वरूपव्याप्यत्वविरहात् । निर्वन्हिवृत्तित्वाभावीयप्रतियोगितायांसाध्याभावसमुदायाधिकरणवृत्तित्वत्वव्याप्यत्वसत्त्वेऽपि साध्याभावाधिकरणवृत्तित्वत्वव्यापकत्वं न संभवति । पर्वतादिवृत्तित्वेऽपि साध्याभावाधिकरणजगद्वृत्तित्वत्वसत्त्वात् । तथा च प्रतियोगितायाः अप्रसिद्धया अव्याप्तिः । एवं च पूर्वदलं परित्यज्य समुदायाघटितं व्यापकत्वं प्रतियोगितायो निवेश्यते चेत्—

'धूमवान् वह्नेः' इत्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणजगद्वृत्तित्वत्वव्यापकप्रतियोगिताकं घटत्वेन जगद्वृत्तित्वाभावं गृहीत्वा तस्य हेतौ सत्त्वात् अतिव्याप्तिः प्रसजति । तद्वारणाय व्यापकत्वदले समुदायपदं प्रवेशनीयम् । तन्निवेशे

साध्याभावसमुदायाधिकरणं निर्धूमः । तद्वृत्तित्वत्वव्यापकप्रतियोगिताकः निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावोऽपि । स च वह्नौ नास्तीति नातिव्याप्तिः ।

एवं च अतिव्याप्तिवारणाय व्यापकत्वदले समुदायपदप्रवेशे सति 'वन्हिमान् धूमात्' इत्यादौ साध्याभावसमुदायाधिकरणनिर्वन्हिवृत्तित्वत्वव्यापकप्रतियोगिताकः आलोकावृत्तित्वावच्छिन्नाभावोऽपि । स च धूमे नास्ति, आलोकावृत्तिधूमत्वस्यैव तत्र सत्त्वादिति अव्याप्तिः प्रसजति । तद्वारणाय व्याप्यत्वदलोपादानमावश्यकम् । तदुपादाने च आलोकावृत्त्यभावीयप्रतियोगितायाः आलोकावृत्तिघटत्वादावपि सत्त्वेन तत्र साध्याभावाधिकरणवृत्तित्वत्वविरहात् स्वव्यापकसाध्याभावाधिकरणवृत्तित्वत्वकत्वरूपं व्याप्यत्वं नास्तीति न तमादाय अव्याप्तिः ।

परन्तु व्याप्यत्वशरीरे समुदायाप्रवेशे 'वन्हिमान् धूमात्' इत्यादौ 'आलोकावृत्तिवृत्तित्वं नास्ति' इति प्रतीतिसिद्धस्य आलोकावृत्तिवृत्तित्वत्वावच्छिन्नाभावस्य लक्षणघटकत्वं स्यात् । आलोकावृत्तिवृत्तित्वे व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वत्वसत्त्वेन प्रतियोगितायां व्याप्यत्वदलस्य, साध्याभावसमुदायाधिकरणनिर्वन्हिवृत्तित्वत्वव्यापकत्वं आलोकावृत्तिवृत्तित्वनिष्ठप्रतियोगितायामस्तीति व्यापकत्वदलस्य च सत्त्वेन आलोकावृत्तिवृत्तित्वाभावस्यापि लक्षणघटकतया तस्य धूमे विरहात् अव्याप्तिः । धूमे आलोकावृत्तेः पर्वतवृत्तित्वस्य सत्त्वादिति अव्याप्तिः । तद्वारणाय व्याप्यत्वदले समुदायपदं निवेशनीयम् । तन्निवेशे आलोकावृत्तिवृत्तित्वाभावीयप्रतियोगितायाः धूमनिष्ठपर्वतवृत्तित्वेऽपि सत्त्वेन तत्र साध्याभावसमुदायाधिकरणनिर्वन्हिवृत्तित्वत्वं नास्ति इति स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वरूपव्याप्यत्वदलविरहात् आलोकावृत्तिवृत्तित्वत्वा-

वच्छिन्नाभावस्य लक्षणाघटकतया न तमादाय अव्याप्तिः इति दीधितिकाराशय इति ।

शेषदले इति [पृ. 608] । व्यापकत्वदले इत्यर्थः । **तादृशप्रतियोगितायाः इति** [पृ. 608] । साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्याप्यायाः साध्याभावाधिकरणवृत्तित्वत्वव्यापिकायाश्च प्रतियोगिताया इत्यर्थः । **पूर्वदलमिति** [पृ. 608] । व्याप्यत्वदलमित्यर्थः । **आलोकादिनिष्ठेत्यादि** [पृ. 608] । आलोकादिनिष्ठं यत् पर्वतादिवृत्तित्वं तत्साधारणं यत् साध्याभावाधिकरणवृत्तित्वत्वं तदव्यापकतयेत्यर्थः । **तदुपादाने इति** [पृ. 608] । व्याप्यत्वरूपपूर्वदलोपादाने इत्यर्थः । **तथा चेति** [पृ. 608] । व्यापकत्वदले समुदायपदानुपादाने व्याप्यत्वरूपपूर्वदलानुपादाने च इत्यर्थः । **धूमेऽसत्त्वात् इति** [पृ. 608] । आधेयतावच्छेदकभेदेन आधेयभेदेन च आधेयतायाः भिन्नत्वात् आलोकावृत्ति यत् वृत्तित्वं पर्वतवृत्तित्वं तत् धूमेऽस्ति । अतः आलोकावृत्तिवृत्तित्वाभावः धूमे नास्तीति भावः । **तत्रापि तत्प्रवेशनमिति** [पृ. 608] । शेषदलेऽपि समुदायपदप्रवेशनम् इत्यर्थः ।

गादाधरी

मतान्तरेण समुदायपदप्रयोजनकथनम्

परे तु - प्रतियोगित्वव्यापकताविशेष्यतापन्नमेव साध्याभावसमुदायाधिकरणवृत्तित्वत्वं व्यापकत्वविशेषणविधया विवेश्यते । न तु तद्दलस्य उक्तरीत्या द्विधा निवेशः । एवं च पूर्वपक्ष एवायं नावतरति ।

न च - गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वे प्रतियोगित्वे प्रतियोगित्वव्यापकत्वविशेषितसाध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्ववत्त्वं नाभावप्रतियोगितावच्छेदकमिति तादृशावच्छेदकत्वत्वावच्छिन्नाभाव-

रूपव्यापकतानिवेशासंभवात् तद्दलस्य द्विधा निवेशनमावश्यकमिति - वाच्यम् ।

व्यापकान्तस्य उपलक्षणविधया साध्याभावसमुदायाधिकरणवृत्तित्ववत्त्वरूपव्याप्यांशे निवेशनसंभवात् । 'व्यापकतावच्छेदकावच्छिन्नाभाववान्' इत्यादिज्ञाने व्यापकतावच्छेदकत्वांशस्येव उक्तावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकाभावबुद्धौ व्यापकताया उपलक्षणतया भाने अविरोधात् ।

वस्तुतस्तु गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वे साध्याभावसमुदायाधिकरणवृत्तित्ववत्त्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्ववत्त्वमपि नाभावप्रतियोगितावच्छेदकम् । वन्हित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वादिरूपसमनियतधर्मापेक्षया व्यधिकरणधर्मावच्छिन्नसाध्याभावेन अधिकेन घटितस्य तस्य गुरुत्वात् इति तादृशधर्मावच्छिन्नाभावो निवेशयितुमशक्यः । किन्तु तादृशान्योन्याभावप्रतियोगितावच्छेदकं यद्यत् तत्तद्भेदकूटमेव निवेशनीयम् । एवं च प्रतियोगिताव्यापकत्वघटितोक्तधर्मस्य प्रतियोगितानवच्छेदकत्वम् अकिंचित्करमेवेति - आहुः ।

विवरणम्

साध्याभावसमुदायाधिकरणवृत्तित्ववत्त्वसमनियतप्रतियोगिताका अभावाः इत्यत्र समनैयत्यघटकव्याप्यत्वव्यापकत्वयोः पृथक् पृथक् निवेशे उभयत्रापि समुदायपदनिवेशस्य प्रयोजनं न घटत इत्याक्षिप्य केषाञ्चित् समाधानं पूर्वमुक्तम् । तथा समाधाने क्लेशो भवतीति आलोच्य व्याप्यत्वव्यापकत्वयोः एकधैव निवेशात् समुदायपदप्रयोजनकथने क्लेशो नास्तीति आलोचयता परेषां मतम् अनुवदति—परे तु [पृ. 612] । इत्यादिना ।

अयमाशयः—स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्व-त्वव्यापकप्रतियोगिताकाः यावन्तोऽभावाः इत्येवं निवेश्यते। स्वव्यापकत्वं साध्याभावसमुदायाधिकरणवृत्तित्वत्वे विशेषणम्। साध्याभावसमुदायाधिकरणवृत्तित्वत्वं च व्यापकत्वे विशेषणम्। तत्र समुदायपदानिवेशे 'धूमवान् वह्नेः' इत्यादौ घटत्वेन जगद्-वृत्तित्वाभावमादाय अतिव्याप्तिः। समुदायपदनिवेशे च निर्धूम-वृत्तित्वत्वेन निर्धूमवृत्तित्वाभावस्यापि लक्षणघटकतया नाति-व्याप्तिरिति स्पष्टमेवेति।

न च गुरुधर्मस्येत्यादि [पृ. 612]। स्वव्यापकसाध्याभाव-समुदायाधिकरणवृत्तित्वत्वव्यापकत्वं नाम स्वव्यापकसाध्याभाव-समुदायाधिकरणवृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वत्वा-वच्छिन्नप्रतियोगिताकाभावः। तत्र साध्याभावसमुदायाधिकरण-वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वत्वापेक्षया स्वव्यापक-त्वविशिष्टसाध्याभावसमुदायाधिकरणवृत्तित्वत्ववन्निष्ठभेदप्रति-योगितावच्छेदकत्वत्वं गुरुधर्म इति तस्य प्रतियोगितानवच्छेदकतया तदवच्छिन्नप्रतियोगिताकाभावरूपव्यापकत्वाप्रसिद्धया व्याप्यत्व-व्यापकत्वयोः सकृत् उक्तरीत्या निवेशस्य असंभवात् द्विधा निवेशः आवश्यकः। तत्र च समुदायपदप्रयोजनं न घटत इति पूर्वपक्षः भवत्येव इति तत्समाधानार्थं क्लेशः सोढव्य एव इति शङ्का।

तत्समाधानं तु - व्यापकतान्तस्य उपलक्षणविधया साध्या-भावसमुदायाधिकरणवृत्तित्वत्वांशे निवेशः कर्तव्यः। उपलक्षणस्य च अभावप्रतियोगितावच्छेदककोटावनन्तर्भावात् स्वव्यापकत्वोप-लक्षितसाध्याभावसमुदायाधिकरणवृत्तित्वत्ववन्निष्ठभेदप्रतियोगि-तावच्छेदकत्वत्वं न गुरुधर्म इति तदवच्छिन्नाभावस्य प्रसिद्धया सकृदेव व्याप्यत्वव्यापकत्वयोः निवेशः संभवतीति।

उक्तरीत्येति [पृ.612] । स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वे सति साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वं प्रतियोगिताविशेषणमिति पूर्वोक्तरीत्येत्यर्थः । **प्रतियोगित्वव्यापकत्वविशेषितेति** [पृ.612] । प्रतियोगित्वव्यापकत्वविशिष्टं यत् साध्याभावसमुदायाधिकरणवृत्तित्वत्वं तदधिकरणेत्यर्थः । **तद्दलस्येति** [पृ.613] । समनियतत्वदलस्येत्यर्थः । **व्याप्यांशे इति** । [पृ.613] साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वं प्रतियोगितायां विशेषणम् । तत्र साध्याभावसमुदायाधिकरणवृत्तित्वत्वं व्याप्यम् । तदंशे स्वव्यापकत्वम् उपलक्षणमिति भावः । अभावप्रतियोगितावच्छेदककोटौ उपलक्षणतया भानं न संभवतीति आशङ्क्य प्रतियोगितासंसर्गकाभावबुद्धावेव उपलक्षणतया भानं न संभवति, प्रतियोगिताप्रकारकाभावबुद्धौ तु 'साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववान्' इत्याकारिकायां व्यापकतावच्छेदकत्वस्य यथा उपलक्षणतया भानम्, तथा 'स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्ववत्त्वावच्छिन्नप्रतियोगिताकाभाववान्' इत्याकारकप्रतियोगिताप्रकारकबुद्धौ स्वव्यापकत्वस्य उपलक्षणतया भानं संभवत्येव । एतत्तत्त्वं **कूटाघटितलक्षणे** निरूपितम् ।

ननु लाघवात् प्रतियोगितासंसर्गकव्याप्तिज्ञानस्यैव अनुमितिहेतुत्वम्, तत्र च स्वव्यापकत्वस्य उपलक्षणतया निवेशः न संभवति इत्यभिप्रायेण आह—**वस्तुतस्तु** [पृ. 613] इत्यादिना । गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वे व्याप्यत्वव्यापकत्वयोः द्विधा निवेशेऽपि अप्रसिद्धिरस्त्येव । तथा हि - साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वं नाम साध्याभावसमुदायाधिकरणवृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकाभावः । साध्याभावसमुदयाधिकरणवृत्तित्वत्वं वन्हित्वा-

-वच्छिन्नवह्न्यभाव-घटत्वावच्छिन्नवह्न्यभावोभयघटितसमुदाया-धिकरणवृत्तित्ववत्त्वम्। तच्च निर्वन्हिवृत्तित्वे एव अस्ति। निर्वह्निवृत्तित्वं नाम वन्हित्वावच्छिन्नवह्न्यभावाधिकरणवृत्तित्वम्। एवं च वह्नित्वावच्छिन्नवह्न्यभावाधिकरणवृत्तित्वनिष्ठभेदप्रतियोगितावच्छेदकत्ववत्त्वं यत्रास्ति, तत्रैव साध्याभावसमुदायाधिकरणवृत्तित्ववत्त्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्ववत्त्वमपि अस्ति। अतः समनियतः यः लघुधर्मः वन्हित्वावच्छिन्नवह्न्यभावाधिकरणवृत्तित्वनिष्ठभेदप्रतियोगितावच्छेदकत्ववत्त्वरूपः तदपेक्षया गुरुणः व्यधिकरणधर्मावच्छिन्नसाध्याभावघटितस्य साध्याभावसमुदायाधिकरणवृत्तित्वनिष्ठभेदप्रतियोगितावच्छेदकत्ववत्त्वस्य प्रतियोगितानवच्छेदकतया तदवच्छिन्नाभावरूपस्य व्यापकत्वस्य अप्रसिद्धिः। तत्परिहाराय द्विधानिवेशवादिना साध्याभावसमुदायाधिकरणवृत्तित्ववत्त्ववन्निष्ठभेदप्रतियोगितावच्छेदकं यत् यत् तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटमेव व्यापकत्वमिति तदेव निवेशनीयम्। तथा सति व्याप्यत्वव्यापकत्वयोः सकृन्निवेशवादिनापि स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्ववत्त्ववन्निष्ठभेदप्रतियोगितावच्छेदकं यद्यत् तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटरूपमेव व्यापकत्वं निवेश्यते। अतः न कोऽपि दोषः।

प्रतियोगिताव्यापकत्वघटितोक्तधर्मस्येति [पृ. 613] प्रतियोगिताव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्ववत्त्ववन्निष्ठभेद-प्रतियोगितावच्छेदकत्ववत्त्वस्य इत्यर्थः।

दीधितिः

साध्याभावश्च साध्यतावच्छेदकसंबन्धेन बोध्यः। तेन समवायेन वह्नेः साध्यत्वे धूमे, संयोगेन च तथात्वे वह्न्यवयवत्वे, पर्वतवह्न्यवयवसंयोगे च, **पर्वतस्य वह्न्यवयवस्य च संबन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वे**ऽपि नातिव्याप्तिः।

गादाधरी

साध्याभावे साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकत्वविशेषणप्रयोजनकथनम्

तेनेति [पृ. 616] समवायेन वह्नेः साध्यत्वे पर्वतस्य संबन्धद्वयावच्छिन्नवन्ह्यभावद्वयानधिकरणत्वेऽपि धूमे नातिव्याप्तिः। संयोगेन वह्नेः तथात्वे वह्न्यवयवस्य तादृशाभावद्वयानधिकरणत्वेऽपि वह्न्यवयवत्वे नातिव्याप्तिः। समवायेन वह्नेः साध्यत्वे संयोगेन तस्य तथात्वे च पर्वतस्य वह्न्यवयवस्य च तादृशाभावद्वयानधिकरणत्वेऽपि पर्वतवह्न्यवयवसंयोगे नातिव्याप्तिरिति योजना।

संबन्धद्वयावच्छिन्नवह्न्यभावद्वयम् — संयोगसंबन्धावच्छिन्नवह्न्यभाव-समवायसंबन्धावच्छिन्नवह्न्यभावद्वयम्। साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकत्वानिवेशने तादृशाभावद्वयानधिकरणस्य पर्वतादेः साध्याभावकूटानधिकरणतया तत्कूटाधिकरणवृत्तित्वाभावा यावन्तः तद्वत्त्वं धूमादौ अव्याहतमेव इति अतिव्याप्तिः स्यात् इति भावः।

विवरणम्

दीधितौ **साध्याभावश्चेत्यादि** [पृ. 616]। अत्र लक्षणे साध्याभावपदेन साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावः विवक्षणीयः। साध्यतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशे त्रिषु स्थलेषु अतिव्याप्तिः। तथा हि—

१. पर्वतः समवायेन वन्हिमान् धूमात् इत्यत्र,

२. पर्वतः संयोगेन वन्हिमान् वह्न्यवयवत्वात् इत्यत्र,

३. पर्वतः संयोगेन समवायेन वा वन्हिमान् पर्वतवह्न्यवयवसंयोगात् इत्यत्र च।

प्रथमस्थले साध्याभावपदेन समवायसंबन्धावच्छिन्नवह्न्यभाव-संयोगसंबन्धावच्छिन्नवह्न्यभावौ गृहीत्वा तद्घटितसमुदायाधिकरणह्रदादिवृत्तित्वाभावस्य धूमे सत्त्वात् अतिव्याप्तिः। प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु समवायसंबन्धावच्छिन्नवह्न्यभावस्यैव साध्याभावपदेन ग्राह्यतया तद्घटितकूटाधिकरणं पर्वतोऽपि भवतीति तद्वृत्तित्वाभावस्य धूमेऽसत्त्वात् नातिव्याप्तिः।

एवं द्वितीयस्थले प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशे संयोगसमवायसंबन्धद्वयावच्छिन्नवह्न्यभावाधिकरणं ह्रदादिकमेव। तद्वृत्तित्वाभावस्य वह्न्यवयवत्वे सत्त्वात् अतिव्याप्तिः। साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु संयोगसंबन्धावच्छिन्नवह्न्यभावस्यैव साध्याभावपदेन ग्राह्यतया तदधिकरणं वह्न्यवयवोऽपि भवति। तद्वृत्तित्वाभावस्य वह्न्यवयवत्वे असत्त्वात् नातिव्याप्तिः।

एवं तृतीयस्थले संबन्धद्वयावच्छिन्नवह्न्यभावाधिकरणह्रदादिवृत्तित्वाभावस्य पर्वतवह्न्यवयवसंयोगे सत्त्वात् अतिव्याप्तिः। साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु संयोगसंबन्धेन वह्नेः साध्यत्वे संयोगसंबन्धावच्छिन्नवह्न्यभावस्यैव ग्राह्यतया तदधिकरणवह्न्यवयववृत्तित्वमेव पर्वतवह्न्यवयवसंयोगेऽस्ति। एवं समवायेन वह्नेः साध्यत्वे समवायेन वह्न्यभावस्यैव ग्राह्यतया तदधिकरणपर्वतवृत्तित्वमेव पर्वतवह्न्यवयवसंयोगेऽस्तीति नातिव्याप्तिः।

गादाधरी

न च—साध्यतावच्छेदकसंबन्धावच्छिन्नाभावनिवेशनेऽपि समवायेन वह्नौ साध्ये संयोगेन हेतौ धूमे न अतिव्याप्तिः वारयितुं शक्यते। समवायसंबन्धावच्छिन्नवह्न्यभावकूटाधिकरणसंयुक्तत्वस्य

व्यधिकरणधर्मावच्छिन्नाभावस्यैव संयुक्तवृत्तित्वात् वह्न्यवयव-मात्रसंयुक्तपदार्थाप्रसिद्धेः संयुक्तमात्रस्यैव तादृशाभावकूटाधिकरण-गगनसंयुक्तत्वात् इति कथमत्र व्यावृत्तिप्रदर्शनम् ? **समवायेन धूमहेतुकस्थलपरता च न युज्यते । समवायेन धूमवतः साध्या-भावकूटाधिकरणत्वानिराकरणात्** इति—वाच्यम् ।

संयुक्तमात्रस्य गगनादिसंयुक्तत्वेऽपि **तादृशस्य संयोगस्य** वृत्त्यनियामकतया **यस्य द्रव्यस्य** वन्ह्यवयव एव अधिकरणत्वप्रत्ययः प्रामाणिकः न त्वन्यत्र, तत्र संयोगेन गगनादिवृत्तित्वप्रतीत्य-प्रसिद्ध्या संयोगेन वह्न्यवयवान्यवृत्तित्वाभावस्य संयोगेन वृत्ति-मद्वृत्तेः सुलभतया वृत्तिपदस्य **यथाश्रुतपरतामते तादृशव्यावृत्ति-**दानसङ्गतेः । **वृत्त्यनियामकतादात्म्यादिसंबन्धेन** व्याप्तिस्वीकारे वृत्तिपदस्य सम्बद्धार्थकत्वमावश्यकम् । तथा च 'इदं महाकाला-न्यो घटात्' इत्येतत्समशीलमित्यभिप्रायेण एतदुपेक्ष्य द्वितीयस्थलानु-सरणम् ।

विवरणम्

गादाधर्यां **न च साध्यतावच्छेदकसंबन्धावच्छिन्नाभावनि-**वेशनेऽपीत्यादि [पृ. 618] । साध्यतावच्छेदकसंबन्धावच्छिन्न-साध्यनिष्ठप्रतियोगिताकाभावनिवेशेऽपि 'समवायेन वन्हिमान्, संयोगेन धूमात्' इत्यत्र अतिव्याप्तिः वारयितुं न शक्यते । साध्याभाववन्निरूपितवृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वस्य अग्रे निवेशनीयतया साध्यतावच्छेदकसमवायसंबन्धावच्छिन्नवन्ह्य-भावघटितकूटाधिकरणनिरूपितसंयोगसंबन्धावच्छिन्नवृत्तित्वाभाव एव यावदभावपदेन ग्राह्यः । स च समानाधिकरणधर्मावच्छिन्न-प्रतियोगिताकः न प्रसिद्ध्यति । सर्वेषामेव संयोगसंबन्धेन वृत्तिमतां समवायसंबन्धावच्छिन्नवह्न्यभावघटितकूटाधिकरणं यत् वह्न्यवय-वान्यजगत् तत्संयुक्तत्वस्यैव सत्त्वात् ।

न च - वह्न्यवयवमात्रे संयोगसंबन्धेन वृत्तिमति पदार्थे वह्न्यवयवान्यजगत्संयुक्तत्वाभावः प्रसिद्ध इति - वाच्यम् । वन्ह्यवयवसंयुक्तस्यापि पदार्थस्य वह्न्यवयवान्यगगनरूपजगत्संयुक्तत्वात् । तथा च तत्र घटत्वादिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः वह्न्यवयवान्यजगत्संयुक्तत्वाभाव एव वृत्तिमद्वृत्तिः । तस्य अभावस्य केवलान्वयितया तद्वत्त्वं हेतावस्ति इति अतिव्याप्तिरिति भावः ।

ननु समवायेन वह्नौ साध्ये समवायेन हेतौ धूमे अतिव्याप्तिः साध्यतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशे विवक्षिता । साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशेन सा वारयितुं शक्यते । तथा हि - साध्यतावच्छेदकसमवायसंबन्धावच्छिन्नवह्न्यभावघटितकूटाधिकरणं वह्न्यवयवान्यजगत् । तन्निरूपितहेतुतावच्छेदकसमवायसंबन्धावच्छिन्नवृत्तित्वाभावः समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकः 'वह्न्यवयवान्यजगत्समवेतत्वं नास्ति' इति प्रतीतिसिद्धः वह्न्यवयवमात्रसमवेते रूपादिपदार्थे प्रसिद्धः । स तु धूमे नास्ति । धूमस्य वन्ह्यवयवान्यधूमावयवरूपजगत्समवेतत्वात् । अतः समवायेन धूमहेतुकस्थले व्यावृत्तिप्रदर्शनम् अभिप्रेतम् इत्यत्राह— **समवायेन धूमहेतुकस्थलपरता च इति** [पृ. 619] ।

समवायेन धूमवतः साध्याभावकूटाधिकरणत्वानिराकरणादिति [पृ. 619] । तादृशस्थलपरत्वे सति **'पर्वतस्य वह्न्यवयवस्य च संबन्धद्वयावच्छिन्नवन्ह्यभावद्वयानधिकरणत्वेऽपि** [पृ. 619]' इति दीधितौ 'पर्वतस्य' इत्यस्य स्थाने 'धूमावयवस्य' इति भवितव्यम् । पर्वतस्य समवायसंबन्धेन धूमानधिकरणत्वात् इति भावः ।

समाधत्ते—**संयुक्तमात्रस्येति** [पृ. 619] । '**पर्वतः समवायेन** वन्हिमान्, संयोगेन धूमात्' इत्यत्रैव व्यावृत्तिः अभिप्रेता । यद्यपि-साध्यतावच्छेदकसमवायसंबन्धावच्छिन्नवह्न्यभावाधिकरणवह्न्य-

वयवान्यजगत्संयुक्तत्वाभावः अप्रसिद्धः, वह्न्यवयवसंयुक्तस्य पदार्थस्य वह्न्यवयवान्यगगनसंयुक्तत्वात् - तथापि अत्र लक्षणे साध्याभावकूटाधिकरणनिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाभावः यथाश्रुतः निवेश्यते न तु तादृशकूटाधिकरणसंबद्धत्वाभावः। एवं च सर्वेषामपि संयुक्तपदार्थानां गगनसंयुक्तत्वेऽपि गगनानुयोगिकसंयोगस्य वृत्त्यनियामकतया तेन संबन्धेन संबद्धत्वं यद्यपि भवति, तथापि तेन संबन्धेन वृत्तित्वं नास्ति। तथा च वन्ह्यवयवमात्रसंयुक्ते पदार्थे वह्न्यवयवातिरिक्तनिरूपितसंयोगसंबन्धावच्छिन्नवृत्तित्वत्वरूपसमानाधिकरणधर्मावच्छिन्नाभावस्य सत्त्वेन लक्षणघटकतया तद्वत्त्वं धूमे नास्तीति नातिव्याप्तिः। धूमस्य वन्ह्यवयवान्यपर्वतनिरूपितसंयोगसंबन्धावच्छिन्नवृत्तित्वादिति भावः।

तादृशस्य संयोगस्येति [पृ. 619]। गगनानुयोगिकसंयोगस्येत्यर्थः। **यस्य द्रव्यस्येति** [पृ. 619]। यादृशद्रव्यनिरूपिताधिकरणत्वप्रत्ययः वह्न्यवयवे एव प्रामाणिकः, तादृशद्रव्ये संयोगसंबन्धेन गगनादिवृत्तित्वप्रतीत्यप्रसिद्ध्या इत्यर्थः। **यथाश्रुतपरतामते** [पृ. 619] इति। आधेयत्वार्थकतामते इत्यर्थः। **तादृशव्यावृत्तिदानसङ्गतेरिति** [पृ. 619]। 'पर्वतः समवायेन वन्हिमान् संयोगेन धूमात्' इत्यत्र अतिव्याप्तिवारणरूपप्रयोजनोक्तेः सङ्गतत्वात् इत्यर्थः।

ननु तादात्म्यादिवृत्त्यनियामकसंबन्धेन हेतोः साध्यव्याप्तिस्वीकारमते तादात्म्यरूपहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या कूटघटितलक्षणस्य तत्र अव्याप्तिः स्यात्। तद्वारणाय लक्षणघटकवृत्तित्वपदेन संबद्धत्वमेव विवक्षणीयम्। न तु आधेयत्वम्। एवं च 'समवायेन वन्हिमान् संयोगेन धूमात्' इत्यत्र साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य साध्यनिष्ठप्रतियोगितायां निवेशेऽपि समवायसंबन्धावच्छिन्नवह्न्यभावघटितकूटाधिकरण-

संबद्धत्वाभावः समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकः न प्रसिद्ध्यति । संयुक्तमात्रस्य संयोगसंबन्धेन गगनसंबद्धत्वात् । तथा च व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकतया तद्वत्त्वस्य हेतौ सत्त्वात् अतिव्याप्तिः दुर्वारा इत्याशङ्क्य द्वितीयस्थलानुसरणम् इत्याह - वृत्त्यनियामकतादात्म्यादिसंबन्धेनेत्यादिना [पृ.619] ।

गादाधरी

साधनसामानाधिकरण्यस्य साध्याभावविशेषणत्वपक्षे समवायादिसंबन्धावच्छिन्नवह्न्यभावस्य वह्न्यवयवत्वरूपसाधनसामानाधिकरण्याभावेन न तत्रातिव्याप्तिसंभवः ।

एवं 'सत्ताभाववान् द्रव्यत्वात्' इत्यादौ अतिव्याप्तिवारणाय साध्यसामानाधिकरण्ये सतीति विशेषणप्रवेशस्य आवश्यकतया बन्हिमति अवर्तमाने वह्न्यवयवत्वादौ तेनापि अतिव्याप्तिः वारयितुं शक्यत इति अतः **पर्वतवह्न्यवयवसंयोगहेतुकानुसरणम्।**

विवरणम्

तृतीयस्थलानुसरणस्य बीजमाह - **साधनसामानाधिकरण्यस्य** [पृ.719] इति। कूटघटितलक्षणे साध्याभावे साधनसमानाधिकरणत्वं विशेषणं देयम् इति वक्ष्यति । तत्पक्षे 'पर्वतः संयोगेन वह्निमान् वह्न्यवयवत्वात्' इत्यत्र साध्यतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशेऽपि अतिव्याप्तिः न संभवति । समवायसंबन्धावच्छिन्नवह्न्यभावस्य वह्न्यवयवत्वरूपसाधनसमानाधिकरणत्वविरहात् । साधनाधिकरणे वह्न्यवयवे समवायेन वह्नेरेव सत्त्वात् । अतः साधनसमानाधिकरणः साध्याभावः संयोगसंबन्धावच्छिन्नवह्न्यभाव एव । तद्घटितकूटाधिकरणं वह्न्यवयवोऽपि । तद्वृत्तित्वस्यैव वह्न्यवयवत्त्वे सत्त्वात् ।

एवं हेतौ 'साध्यसमानाधिकरणत्वे सति' इत्यपि विशेषणं दातव्यम्। अन्यथा 'सत्ताभाववान् द्रव्यत्वात्' इत्यत्र साध्याभावकूटाधिकरणसत्तावत्समवेतत्वावच्छिन्नाभावः वृत्तिमद्वृत्तिः न भवति। समवायेन वृत्तिमतां सर्वेषां सत्तावत्समवेतत्वात्। अतः व्यधिकरणधर्मावच्छिन्नसत्तावत्समवेतत्वाभाव एव लक्षणघटकः। तस्य हेतौ सत्त्वात् अतिव्याप्तिः। तद्वारणाय हेतौ साध्यसामानाधिकरण्ये दत्ते द्रव्यत्वे सत्ताभावरूपसाध्यसामानाधिकरण्यं नास्तीति नातिव्याप्तिः।

इत्थं च 'संयोगेन वन्हिमान् वह्न्यवयवत्वात्' इत्यत्र नातिव्याप्तिः। वह्न्यवयवत्वे संयोगेन वन्हिसामानाधिकरण्यविरहात्। तथा च साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशस्य तत्र अतिव्याप्तिवारणरूपं प्रयोजनं न संभवतीति आलोच्य तृतीयस्थलानुधावनम् इति भावः।

गादाधरी

संयोगेन द्रव्यस्य अव्याप्यवृत्तितापक्षे पर्वतस्य संबन्धद्वयावच्छिन्नवन्ह्यभावद्वयाधिकरणत्वेऽपि न तस्य व्याप्यवृत्तित्वविशिष्टसाध्याभावकूटाधिकरणत्वम्। विवक्षणीयश्च अवश्यं तादृशसाध्याभावकूटाधिकरणत्वम्। अन्यथा अव्याप्यवृत्तिसंयोगादिसाध्यके व्यभिचारिणि जगत एव साध्याभावकूटाधिकरणत्वेन अतिव्याप्तिरिति दर्शितहेतोः पर्वतवृत्तित्वेऽपि तादृशाभावकूटाधिकरणवृत्तित्वाभावोऽक्षत एव इत्यतिव्याप्तिप्रसङ्गः।

विवरणम्

ननु 'संयोगेन वह्निमान् पर्वतवह्न्यवयवसंयोगात्' इत्यत्र तृतीयस्थलेऽपि व्यावृत्तिदानं न सङ्गच्छते। संयोगसमवायसंबन्धद्वयावच्छिन्नवह्न्यभावाधिकरणं पर्वतोऽपि भवति। संयोगवत् संयोगसंबन्धेन द्रव्यस्यापि अव्याप्यवृत्तित्वमिति पक्षे पर्वते शिख-

रावच्छेदेन संयोगसंबन्धावच्छिन्नवह्न्यभावस्य सत्त्वात् सुतरां समवायसंबन्धावच्छिन्नवह्न्यभावस्यापि तत्र सत्त्वम् । पर्वतवृत्तित्वाभावस्तु पर्वतवह्न्यवयवसंयोगे नास्ति इति अतिव्याप्तेः अप्रसक्तेः इत्याशङ्क्य अत्र लक्षणे अव्याप्यवृत्तिसंयोगादिसाध्यके व्यभिचारिणि 'संयोगी सत्त्वात्' इत्यत्र साध्याभावकूटाधिकरणं जगदेव भवति । संयोगस्य अव्याप्यवृत्तित्वेन तदभावस्य सर्वत्र सत्त्वात् । जगद्वृत्तित्वाभावश्च घटत्वादिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिः । तद्वत्त्वं सत्तारूपहेतावस्तीति अतिव्याप्तिः । तद्वारणाय व्याप्यवृत्तित्वविशिष्टसाध्याभावकूटाधिकरणत्वं निवेशनीयम् । व्याप्यवृत्तित्वविशिष्टसंयोगाभावघटितकूटाधिकरणं द्रव्यं न भवति, किन्तु गुणादिकमेव । गुणादिवृत्तित्वत्वेन गुणादिवृत्तित्वाभावः द्रव्यमात्रवृत्तौ द्रव्यत्वादौ प्रसिद्धः । सत्तारूपहेतौ नास्तीति 'संयोगी सत्त्वात्' इत्यत्र नातिव्याप्तिः ।

एवञ्च व्याप्यवृत्तित्वविशिष्टसंयोगसंबन्धावच्छिन्नवह्न्यभावघटितकूटाधिकरणं पर्वतः न भवति । अत्र विद्यमानस्य संयोगेन वन्ह्यभावस्य अव्याप्यवृत्तित्वात् । किन्तु ह्रदादिकमेव । तद्वृत्तित्वाभावश्च पर्वतवह्न्यवयवसंयोगेऽस्तीति तत्र अतिव्याप्तेः प्रसक्त्या तद्वारणाय साध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयमेव इत्याह—**संयोगेन द्रव्यस्य अव्याप्यवृत्तितापक्षे** [पृ. 623] इत्यादिना ।

दीधितिः

तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोऽपि ।

गादाधरी

पूर्ववदत्र साध्याभावपदेन साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकरूपावच्छिन्नाभावविवक्षणे नानाविपक्षके तथाविधतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिः ।

साध्यतावच्छेदकविशिष्टसमव्यापकतावच्छेदकावच्छिन्नाभावनिवेशने गौरवमिति साध्यतावच्छेदकसमव्याप्तप्रतियोगिताकाभाव एव विवक्षितुमुचितः । तार्णातार्णदहनवृत्तिद्वित्वावच्छिन्नप्रतियोगिताकानां तथाविधसाध्याभावानाम् अधिकरणे धूमादेः वृत्तावपि वह्नित्वावच्छिन्नवह्न्यभावघटिततादृशाभावकूटवत्यवृत्तेः अव्याप्त्यनवकाशात् इत्याशयेन तथाविधमेव अभावं निवेशयति तथेति [पृ. 624]। स्वं - प्रतियोगिता । समनियताभावैक्यमते साध्याभावप्रतियोगितायाः साध्याभावसमनियताभावप्रतियोगिपदार्थान्तरवृत्तित्वेऽपि साध्यतावच्छेदकेन व्यधिकरणेन वा धर्मेण अवच्छिन्नायाः साध्यमात्रवृत्तिप्रतियोगितायाः साध्यतावच्छेदकसमनैयत्यमक्षतमेव ।

विवरणम्

तथा स्वव्यापकीभूतेत्यादि दीधितिग्रन्थम् अवतारयति—**पूर्ववदिति** [पृ. 624]। नानाव्यक्तिसाध्यके 'वन्हिमान् धूमात्' इत्यादौ तत्तद्वह्न्यभावमादाय प्रसक्तायाः अव्याप्तेर्वारणाय कूटाघटितलक्षण इव अस्मिन् कूटघटितलक्षणेऽपि साध्याभावपदेन साध्यतावच्छेदकविशिष्टसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविवक्षणे पुनरपि नानाविपक्षके 'वन्हिमान् धूमात्' इत्यादौ अव्याप्तिः। तत्तद्ह्रदादिरूपविपक्षावृत्तित्वस्यापि वन्हित्वविशिष्टव्यापकतावच्छेदकतया तदवच्छिन्नप्रतियोगिताका ये अभावाः 'तद्ह्रदावृत्तिर्नास्ति', 'एतद्ह्रदावृत्तिर्नास्ति' इत्यादिप्रतीतिसिद्धाः तत्कूटाधिकरणम् अप्रसिद्धम्। तद्ह्रदावृत्त्यभावाधिकरणं तद्ह्रद एव। एतद्ह्रदावृत्त्यभावाधिकरणं एतद्ह्रद एव। तदुभयाधिकरणं न किमपि। तथा च अप्रसिद्ध्या अव्याप्तिर्भवति। तद्वारणार्थं साध्यतावच्छेदकविशिष्टसमव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावः निवेशनीयः। स्वावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकं यद्रूपं तद-

वच्छिन्नाभावः साध्याभाव इति फलितम् । स्वपदेन तत्तद्ह्रदा-
वृत्तित्वं ग्रहीतुं न शक्यते । तदवच्छिन्नव्यापकतावच्छेदकत्वस्य
साध्यतावच्छेदके वन्हित्वेऽभावात् । तद्ह्रदावृत्त्यधिकरणे एतद्ह्रदे
वह्नेरभावात् । किन्तु वन्हित्वादिकमेव स्वपदेन ग्राह्यम् । तदव-
च्छिन्नव्यापकतावच्छेदकं वन्हित्वम् । तदवच्छिन्नव्यापकतावच्छे-
दकवन्हित्वावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणं निर्वन्हिः ।
तद्वृत्तित्वाभावस्य धूमे सत्त्वात् नाव्याप्तिः । परन्तु तथानिवेशे
गौरवम् । तदपेक्षया लाघवात् साध्यतावच्छेदकसमनियतप्रतियो-
गिताकाभाव एव साध्याभावपदेन अत्र लक्षणे विवक्षितुमुचितः ।
तत्तद्विपक्षावृत्त्यभावीयप्रतियोगितायां वन्हित्वव्याप्यत्वविरहात्
तादृशाभावो न लक्षणघटकः । किन्तु वन्हित्वेन वह्न्यभावः
घटत्वेन वह्न्यभावश्च लक्षणघटकः । तत्कूटाधिकरणनिर्वन्हिवृत्ति-
त्वाभावस्य धूमे सत्त्वात् नाव्याप्तिः ।

न च—तथा निवेशे तार्णातार्णदहनोभयाभावस्य वन्हित्व-
समनियतप्रतियोगिताकतया तदधिकरणे पर्वते धूमस्य सत्त्वात्
अव्याप्तिरिति—वाच्यम् । अस्मिन् लक्षणे कूटपदस्य निवेशात्
वन्हित्वावच्छिन्नवह्न्यभावस्यापि वन्हित्वसमनियतप्रतियोगिता-
कत्वेन तद्घटितकूटाधिकरणत्वस्य पर्वतादावभावात् । तथा च
तद्घटितकूटाधिकरणं निर्वन्हिह्रदादिकमेव । तद्वृत्तित्वाभावस्य
धूमे सत्त्वात् अव्याप्तेः अनवकाशात् इति भावः ।

तथाविधसाध्याभावानामिति [पृ. 625] । साध्यतावच्छे-
दकसमनियतप्रतियोगिताकाभावानाम् इत्यर्थः । **अव्याप्त्यनवका-
शादिति** [पृ. 625] । ननु साधनसमानाधिकरणत्वस्य साध्या-
भावविशेषणत्वपक्षे वन्हित्वेन वह्न्यभावघटितकूटस्य लक्षणाघट-
कत्वात् तार्णातार्णदहनोभयाभावघटितकूटमादाय अव्याप्तिः
अस्त्येवेति चेन्न । साधनसामानाधिकरण्यविशेषणपक्षे साध्याभावे

साध्यसमानाधिकरणसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्व-विशेषणस्य वक्ष्यमाणत्वात् दर्शितोभयाभावस्य तादृशविशेषणानाक्रान्ततया तद्घटितकूटस्य लक्षणघटकत्वविरहात् ।

स्वं—प्रतियोगिता इति [पृ. 625] । साध्यतावच्छेदक-समनियतत्वं च प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वे सति साध्यतावच्छेदकव्याप्यत्वम् । साध्यतावच्छेदकव्याप्यत्वं च न साध्यतावच्छेदकाभाववदवृत्तित्वम् । प्रमेयसाध्यकस्थले साध्यतावच्छेदकप्रमेयत्वाभावस्य अप्रसिद्ध्या अव्याप्त्यापत्तेः । किन्तु स्वव्यापकसाध्यतावच्छेदककत्वम् । तत्र व्यापकत्वव्याप्यत्वयोः पृथङ्निवेशापेक्षया लाघवात् स्वव्यापकसाध्यतावच्छेदकव्यापकत्वं प्रतियोगितायां निवेशितम् । तत्र स्वपदेन प्रतियोगिता गृह्यते । वह्नित्वेन वह्न्यभावीयप्रतियोगिता 'वह्निमान् धूमात्' इत्यत्र स्वपदेन ग्राह्या । तद्व्यापकं वह्नित्वम् । तद्व्यापिका प्रतियोगिता भवतीति वह्नित्वेन वह्न्यभावस्य लक्षणघटकत्वम् ।

ननु समनियताभावानाम् ऐक्यमिति मते वह्नित्वेन वह्न्यभावस्य वह्निमत्त्वप्रकारकप्रमाविषयत्वाभावस्य च समनियतत्वेन अभिन्नतया वह्नित्वेन वह्न्यभावीयप्रतियोगिता वह्निमत्त्वप्रकारकप्रमाविषयत्वेऽप्यस्ति । तत्र च वह्नित्वं नास्तीति वह्नित्वरूपसाध्यतावच्छेदकस्य वह्न्यभावीयप्रतियोगिताव्यापकत्वं नास्तीति कथं वह्न्यभावः लक्षणघटक इत्याशङ्क्य तत्तत्प्रतियोगितात्वावच्छिन्नव्यापकत्वं साध्यतावच्छेदके विवक्षितम् । वह्नित्वेन वह्न्यभावस्य वह्निमत्त्वप्रकारकप्रमाविषयत्वाभावस्य च अभिन्नत्वेऽपि तदीयप्रतियोगिता वह्नित्वावच्छिन्ना वह्निवृत्तिरन्या । वह्निमत्त्वप्रकारकप्रमाविषयत्वत्वावच्छिन्ना तादृशप्रमाविषयत्वनिष्ठा प्रतियोगिता अन्या । वह्निमात्रवृत्तिः या प्रतियोगिता तद्व्यक्तित्वावच्छिन्नव्यापकत्वं वह्नित्वेऽक्षतमिति तत्प्रतियोगिता-

त्वावच्छिन्नव्यापकवन्हित्वव्यापकप्रतियोगिताकत्वं वन्हित्वेन वन्ह्यभावस्य वर्तत इति तस्य लक्षणघटकत्वमिति समाधत्ते—**समनियताभावैक्यमते** [पृ. 625] इत्यादिना।

साध्याभावसमनियतेति । [पृ. 625] वह्न्यभावसमनियतः यः वन्हिमत्त्वप्रकारकप्रमाविषयत्वाभावः तत्प्रतियोगि यत् पदार्थान्तरं वन्हित्वातिरिक्तं वन्हिमत्त्वप्रकारकप्रमाविषयत्वं तद्वृत्तित्वेऽपीत्यर्थः ।

साध्यतावच्छेदकेनेति [पृ. 625] । वन्हित्वरूपसमानाधिकरणधर्मेण अवच्छिन्ना या वन्हिमात्रवृत्तिः प्रतियोगिता । अथ वा घटत्वरूपेण व्यधिकरणधर्मेण अवच्छिन्ना या वन्हिमात्रवृत्तिः प्रतियोगिता तस्या इत्यर्थः । तथा च समनैयत्यघटकं व्यापकत्वं तदभावीयप्रतियोगितात्वरूपसामान्यधर्मावच्छिन्नम् । व्याप्यत्वं तु तत्तत्प्रतियोगितात्वरूपविशेषधर्मावच्छिन्नम् इति भावः ।

गादाधरी

घटत्वेन वाच्यत्वाभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वोपपादनम्

अथ घटत्वाद्यवच्छिन्ना या वाच्यत्वनिष्ठप्रतियोगिता **सा घटादिभिन्नयावद्वस्तुवृत्तिरेव** स्वीक्रियते, न तु **वाच्यत्वादिमात्रवृत्तिः** । तथा सति 'घटत्वेन प्रमेयत्वं नास्ति' इत्यादि प्रतीतिविषय**प्रतियोगितान्तरकल्पने गौरवादिति** तादृशप्रतियोगिताया न वाच्यत्वत्वादिरूपसाध्यतावच्छेदकसमनैयत्यमिति चेत्—

का क्षतिः ? 'वाच्यत्वभिन्नत्वेन वाच्यत्वं नास्ति' इत्यादि प्रतीतिविषयमभावमादायैव तत्र लक्षणसमन्वयसंभवात् । स्वव्यधिकरणवाच्यत्वभिन्नत्वावच्छिन्नायाः प्रतियोगितायाः वाच्यत्वभिन्नवृत्तित्वस्य असम्भावितत्वात् ।

विवरणम्

अथ घटत्वाद्यवच्छिन्ना इत्यादि [पृ. 628]। साध्याभावपदेन स्वव्यापकसाध्यतावच्छेदकव्यापकप्रतियोगिताकाभावविवक्षणेऽपि 'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र घटत्वेन वाच्यत्वाभावस्य लक्षणघटकत्वं न संभवति। 'घटत्वेन वाच्यत्वं नास्ति,' 'घटत्वेन प्रमेयत्वं नास्ति' इत्यादि प्रतीतिसिद्धानां घटत्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावानां समनियतत्वेन ऐक्यात् असति बाधके अभावैक्ये अवच्छेदकैक्ये प्रतियोगिताया अपि ऐक्यमिति न्यायात् घटत्वावच्छिन्ना वाच्यत्वनिष्ठाप्रतियोगितैव प्रमेयत्वादावपि अस्तीति स्वीकरणीयम्। तथा च घटत्वेन वाच्यत्वाभावीयप्रतियोगितायाः प्रमेयत्वेऽपि सत्त्वात् तत्र च वाच्यत्वत्वरूपसाध्यतावच्छेदकं नास्तीति प्रतियोगिताव्यापकं साध्यतावच्छेदकं न भवति। अतः कथं घटत्वेन वाच्यत्वाभावः लक्षणघटक इत्याक्षेपः।

घटादिभिन्नयावद्वस्तुवृत्तिरिति [पृ. 628] घटत्वेन वाच्यत्वाभावस्य घटत्वेन घटाभावस्य च समनियतत्वविरहात् घटत्वावच्छिन्ना वाच्यत्वनिष्ठा प्रतियोगिता घटवृत्तिः न भवितुमर्हति इत्याशयेन एवमुक्तम्। **प्रतियोगितान्तरकल्पने गौरवादिति** [पृ. 628]। तथा च तत्तत्प्रतियोगितात्वेन व्याप्यत्वनिवेशेऽपि वाच्यत्वनिष्ठप्रतियोगितायाः तद्व्यक्तित्वेन प्रमेयत्वेऽपि सत्त्वात् स्वव्यापकतत्कत्वरूपं व्याप्यत्वं न भवतीति भावः।

समाधत्ते – **का क्षतिरित्यादिना** [पृ. 628]। 'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र घटत्वादिना वाच्यत्वाभावस्य लक्षणाघटकत्वेऽपि 'वाच्यत्वभिन्नत्वेन वाच्यत्वं नास्ति' इति प्रतीतिसिद्धः वाच्यत्वभिन्नत्वरूपव्यधिकरणधर्मावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकः अभावः लक्षणघटकः। तदीयप्रतियोगितायाः वाच्यत्वमात्रवृत्ति-

त्वात् । तद्व्यापकत्वस्य च वाच्यत्वत्वे संभवात् । न हि घटत्वेन वाच्यत्वाभाव - घटत्वेनप्रमेयत्वाभावयोरिव वाच्यत्वभिन्नत्वेन वाच्यत्वाभाव - वाच्यत्वभिन्नत्वेन प्रमेयत्वाभावयोः समनियतत्वं संभवति । येन प्रतियोगितायाः प्रमेयत्ववृत्तित्वं शङ्क्येत । दृष्टान्ते उभयोरप्यभावयोः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन केवलान्वयित्वात् समनियतत्वम् । दार्ष्टान्तिके वाच्यत्वभिन्नत्वेन वाच्यत्वाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम् । वाच्यत्वभिन्नत्वेन प्रमेयत्वाभावस्य च समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम् । प्रमेयत्वे वाच्यत्वभिन्नत्वसत्त्वात् । तथा च अनयोरभावयोः समनियतत्वम् असंभावितमिति वाच्यत्वभिन्नत्वावच्छिन्ना वाच्यत्ववृत्तिः प्रतियोगिता प्रमेयत्वे न संभवतीति तादृशप्रतियोगिताव्यापकत्वं साध्यतावच्छेदकेऽक्षतमिति वाच्यत्वभिन्नत्वेन वाच्यत्वाभावस्य लक्षणघटकत्वम् इति तमादाय समन्वयः कार्य इति भावः ।

गादाधरी

वस्तुतस्तु—घटत्वावच्छिन्नवाच्यत्वाभावप्रतियोगितायां व्यधिकरणघटत्वादेरिव समानाधिकरणवाच्यत्वत्वादेरपि अवच्छेदकत्वम् आवश्यकम् । 'घटत्वेन वाच्यत्वं नास्ति' इत्यादि प्रतीत्या वाच्यत्वत्वादेः प्रतियोगितावच्छेदकत्वानवगाहने तादृशप्रतीतेः वाच्यत्वत्वादिविशिष्टवैशिष्ट्यानवगाहित्वेन तत्र वाच्यत्वत्वादिप्रकारकज्ञानानपेक्षापत्तेः । एवं च 'घटत्वेन प्रमेयत्वं नास्ति' इत्यादि प्रतीतिविषयप्रतियोगिताया अतिरिक्तत्वमावश्यकम् । अवच्छेदकभेदात् इति 'घटत्वेन वाच्यत्वं नास्ति' इत्यादि प्रतीतिविषयप्रतियोगिता वाच्यत्वादावेव वर्तते, न तु अन्यत्रापि, मानाभावात् । अतः घटत्वादिना वाच्यत्वाभावोऽपि लक्षणघटकः ।

विवरणम्

'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र समवायितया वाच्यत्वाभावस्य घटत्वादिना वाच्यत्वाभावस्य वा लक्षणाघटकत्वे 'अथ समवायितया' इति मणिग्रन्थासाङ्गत्यम् इत्यालोच्य घटत्वादिना वाच्यत्वाभावस्यैव लक्षणघटकत्वं संपादयति—**वस्तुतस्तु** इत्यादिना [पृ. 630] 'घटत्वेन वाच्यत्वं नास्ति' इति प्रतीत्या घटत्वस्येव वाच्यत्वविशेषणतापन्नस्य वाच्यत्वत्वस्यापि प्रतियोगितावच्छेदकत्वम् अवगाह्यते । तादृशप्रतीत्या वाच्यत्वत्वे प्रतियोगितावच्छेदकत्वानवगाहने तादृशप्रतीतेः वाच्यत्वत्वविशिष्टवैशिष्ट्यानवगाहित्वात् वाच्यत्वत्वप्रकारकज्ञानं विनापि तादृशप्रतीतेरापत्तेः ।

एवं च 'घटत्वेन वाच्यत्वं नास्ति' इति प्रतीतिसिद्धाभावीयप्रतियोगितावच्छेदकत्वं घटत्वरूपव्यधिकरणधर्मे वाच्यत्वत्वरूपसमानाधिकरणधर्मे च वर्तते । 'घटत्वेन प्रमेयत्वं नास्ति' इति प्रतीतिसिद्धाभावीयप्रतियोगितावच्छेदकत्वं घटत्वे प्रमेयत्वत्वे च वर्तते । एवं च अवच्छेदकभेदात् प्रतियोगितायाः भेदः आवश्यक इति घटत्वेन वाच्यत्वाभावीयप्रतियोगिता वाच्यत्वे एव वर्तते, न तु प्रमेयत्वादौ । वाच्यत्वे च साध्यतावच्छेदकस्य वाच्यत्वत्वस्य सत्त्वात् प्रतियोगिताव्यापकत्वं साध्यतावच्छेदकेऽस्ति, तद्व्यापकत्वं च प्रतियोगितायामस्तीति घटत्वेन वाच्यत्वाभावोऽपि लक्षणघटक इति भावः ।

गादाधरी

अथैवं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितलक्षणे वह्नित्वाद्यवच्छिन्नसाध्यकस्थले वह्नित्वादिना घटाद्यभावो लक्षणघटको न स्यात् । व्यापकतावच्छेदकवह्नित्वादिपर्याप्तप्रतियोगितावच्छेदकताकत्वविरहात्, महानसीयवह्नित्वाद्यवच्छिन्नाभाववारणाय अवच्छेदकतापर्याप्तिविवक्षणस्य आवश्यकत्वात् इति चेत्, न—

व्यापकतावच्छेदकपर्याप्तत्वं हि व्यापकतानवच्छेदकावृत्तित्वम्। तच्च इन्धनत्वाद्यवच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकतायाम् अक्षतमिति तादृशाभावमादायैव तल्लक्षणसमन्वयसंभव इति। अत एव **'यश्च इन्धनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावः'** इति दीधितिग्रन्थः सङ्गच्छते। अन्यथा इन्धनत्वादिना घटाद्यभावोपेक्षाया निर्बीजता आपद्येत। एवं च सार्वभौमाणामेतल्लक्षणाभिप्रायकतया **'समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः'** इति मूलग्रन्थोपवर्णनमपि संगच्छते।

विवरणम्

अथैवमिति [पृ. 631]। व्यधिकरणधर्मावच्छिन्नाभावविषयकप्रतीतौ प्रतियोगिविशेषणतापन्नस्य समानाधिकरणधर्मस्यापि प्रतियोगितावच्छेदकत्वं भासते इति स्वीकारे कूटाघटितलक्षणे मिश्रलक्षणे च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्यैव साध्याभावपदेन विवक्षिततया 'वन्हिमान् धूमात्' इत्यादौ वन्हित्वावच्छिन्नव्यापकतावच्छेदकं यत् वन्हित्वं तदवच्छिन्नप्रतियोगिताकं महानसीयवन्हित्वावच्छिन्नाभावम् आदाय अव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपपर्याप्तावच्छेदकताकप्रतियोगिताकाभाव एव विवक्षणीयः। तथा सति महानसीयवह्न्यभावस्य वन्हित्वनिष्ठावच्छेदकताकप्रतियोगिताकत्वेऽपि वन्हित्वपर्याप्तावच्छेदकताकप्रतियोगिताकत्वं नास्तीति अस्य लक्षणाघटकतया नाव्याप्तिः। एवं च वन्हित्वेन घटाभावः लक्षणघटको न स्यात्। तस्य वन्हित्वघटत्वोभयपर्याप्तावच्छेदकताकप्रतियोगिताकस्य वन्हित्वपर्याप्तावच्छेदकताकप्रतियोगिताकत्वविरहात्।

न च - तस्य लक्षणघटकत्वेऽपि वन्हित्वेन वह्न्यभावमादाय समन्वयः संभवति इति - वाच्यम्। तथापि मिश्रलक्षणे साध्याभावे

हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे वर्तमानत्वविशेषण-दानात् तदाक्रान्तयावदभावाप्रसिद्धिः। वन्हिव्यापकतावच्छेदक-द्रव्यत्वावच्छिन्नाभावस्य यावदन्तर्गतस्य तादृशविशेषणविरहात्। अतः तल्लक्षणे वन्हित्वेन घटाभावस्यैव लक्षणघटकत्वमावश्यकम्। तच्च न संभवति। वन्हित्वपर्याप्तप्रतियोगितावच्छेदकताकत्व-विरहात् इति शङ्काग्रन्थस्य भावः।

समाधत्ते—व्यापकतावच्छेदकपर्याप्तत्वमिति [पृ. 632]। तथा च व्यापकतानवच्छेदकावृत्तित्वं व्यापकतावच्छेदकपर्याप्त-त्वम्। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकभिन्नावृत्ति-अवच्छेदकताकप्रतियोगिताकाभावः साध्याभाव इति फलितम्। वन्हित्वेन घटाभावस्य वन्हिव्यापकतावच्छेदकभिन्नघटत्ववृत्ति-अवच्छेदकताक-प्रतियोगिताकत्वेन लक्षणाघटकत्वेऽपि इन्धनत्वेन वन्ह्यभावमादाय 'वन्हिमान् धूमात्' इत्यत्र लक्षणसमन्वयः कार्यः। अयम् अभावोऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः। परन्तु इन्धनत्वं वन्हित्वं च उभयमपि वन्हित्वावच्छिन्नव्यापक-तावच्छेदकम्। वन्हिमति इन्धनस्य वन्हेश्च सत्वात्। तथा च तादृशाभावीयप्रतियोगितावच्छेदकता व्यापकतावच्छेदके इन्धनत्वे वन्हित्वे च वर्तते। न तु व्यापकतानवच्छेदके इति व्यापकतान-वच्छेदकावृत्ति-अवच्छेदकताक-प्रतियोगिताकत्वम् इन्धनत्वा-वच्छिन्नवन्ह्यभावस्य अक्षतम्। एतादृशपर्याप्तिनिवेशादेव कूटा-घटितलक्षणे 'यश्च इन्धनत्वाद्यवच्छिन्नवन्ह्यभावाधिकरणीभूते' [पृ. 595] त्यादि दीधितिग्रन्थः सङ्गच्छते। अन्यथा इन्धनत्वेन वन्हित्वेन वा घटाभावस्य उपेक्षायां निमित्ताभावात्। एवं च कूटघटितलक्षणे पूर्वोक्तरीत्या साध्यतावच्छेदकसमनियतप्रतियोगि-ताकाभाव एव साध्याभावपदेन विवक्षणीयः। समवायितया वाच्यत्वाभावस्य समवायितया प्रमेयत्वाभावस्य च समनियतत्वेऽपि

उभयत्रापि वाच्यत्वत्वस्य प्रमेयत्वत्वस्य च समवायित्वातिरिक्तस्य क्रमशः अवच्छेदकत्वात् । अवच्छेदकभेदेन प्रतियोगितायाः भेदात् 'समवायित्वेन वाच्यत्वं नास्ति' इति प्रतीतिसिद्धाभावीयप्रतियोगिता वाच्यत्वे एवास्तीति तादृशाभावस्य साध्यतावच्छेदकवाच्यत्वत्वसमनियतप्रतियोगिताकत्वेन लक्षणघटकतया एतल्लक्षणाभिप्रायकः 'समवायितया वाच्यत्वाभावः घट एव प्रसिद्धः' इति मणिग्रन्थोऽपि संगच्छत इति भावः ।

गादाधरी

उभयत्वावच्छिन्नसाध्यकस्थले प्रतियोगितायाः साध्यतावच्छेदकव्याप्यद्वयोपपादनम्

अथ पर्याप्तिसंबन्धेन यत्र उभयत्वादिकं साध्यतावच्छेदकं तत्र प्रतियोगिताया अव्यासज्यवृत्तित्वेन तत्पर्याप्त्यधिकरणप्रत्येकव्यक्तौ पर्याप्तिसंबन्धेन उभयत्वादेरत्यन्ताभावस्य तदवच्छिन्नभेदस्य च सत्त्वात् तस्य प्रतियोगिताव्यापकत्वं न संभवति ।

न च - अव्याप्यवृत्तिसंयोगादेः यत्र साध्यतावच्छेदकता तत्र प्रतियोगिताव्यापकत्वविवहाय प्रतियोग्यसमानाधिकरण्यं व्यापकताघटकाभावे निवेशनीयम् । तावता उभयत्वस्यापि व्यापकत्वं निर्वहति । पर्याप्तिसंबन्धेन उभयत्वपर्याप्त्यधिकरणस्य प्रत्येकानतिरिक्ततया प्रत्येकवृत्तेरुभयत्वाभावस्यापि प्रतियोगिसमानाधिकरणत्वात् इति वाच्यम् ।

पृथिवीत्वघटत्वोभयत्वादिना यत्र साध्यता तत्र जातित्वाद्यवच्छिन्नाभावप्रतियोगितासमानाधिकरणस्य तादृशसाध्यतावच्छेदकाभावस्य प्रतियोग्यधिकरणावृत्तित्वविरहेण तादृशसाध्यतावच्छेदकस्य तादृशप्रतियोगिताव्यापकतापत्त्या तादृशाभावमादाय तदवच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतौ अतिव्याप्त्यापत्तेः प्रतियोग्यनधिकरणवृत्तित्वस्यैव अभावे निवेशनीयतया

उभयत्वाभावव्यावर्तनासंभवात् । तदभाववतः प्रत्येकं तदनधिकरणत्वात् तस्यैव तदधिकरणताया अपि व्यासज्यवृत्तित्वात् इति चेत्—न ।

सामानाधिकरण्यस्य अव्याप्यवृत्तितापक्षे प्रतियोगिसामानाधिकरण्याभावविशिष्टाभाववत्ताघटितव्यापकताया एव निवेशसंभवात् । पृथिवीत्वादौ उक्तोभयत्ववति पृथिवीत्वत्वावच्छेदेन तदभावस्य प्रतियोगिसमानाधिकरणत्वेऽपि जलत्वादेः सत्सामानाधिकरण्याभावविशिष्टतदभाववत्त्वेन अतिप्रसङ्गाभावात् उभयत्वाद्यभावस्य तदभाववति एकस्मिन्नपि तत्सामानाधिकरण्याभावानभ्युपगमात् तत्सामानाधिकरण्यावच्छेदकस्य प्रत्येकानतिरिक्तत्वात् ।

विवरणम्

अथ पर्याप्तिसंबन्धेनेत्यादि [पृ. 634] । यत्र पर्याप्तिसंबन्धेन उभयत्वं साध्यतावच्छेदकम्, तत्र 'वह्निधूमोभयवान् धूमात्' इत्यत्र सद्धेतौ वह्निधूमोभयत्वावच्छिन्नाभावस्य लक्षणघटकत्वं न स्यात् । स्वव्यापकसाध्यतावच्छेदकव्यापकप्रतियोगिताकाभावस्यैव साध्याभावपदेन विवक्षिततया साध्यतावच्छेदके उभयत्वे वह्निधूमोभयाभावीयप्रतियोगिताव्यापकत्वं न संभवति । प्रतियोगिताव्यापकत्वं नाम प्रतियोगिताधिकरणवृत्ति-अत्यन्ताभावाप्रतियोगित्वम्, प्रतियोगित्वाधिकरणवृत्तिभेदप्रतियोगितानवच्छेदकत्वं वा । उभयमपि साध्यतावच्छेदके उभयत्वे दुर्घटम् । उभयाभावीयप्रतियोगितायाः अव्यासज्यवृत्तित्वेन तदधिकरणे प्रत्येकस्मिन् वह्नौ धूमे च वह्निधूमोभयत्वनिष्ठपर्याप्तिसंबन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य पर्याप्तिसंबन्धावच्छिन्न-उभयत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदस्य च सत्त्वेन उभयत्वस्य तादृशात्यन्ताभावप्रतियोगित्वात् तादृशभेदप्रतियोगितावच्छेदक-

त्वाच्च । तथा च स्वव्यापकसाध्यतावच्छेदकव्यापकप्रतियोगित-कत्वविरहात् कथम् उभयाभावः तत्र लक्षणघटक इत्याक्षेपः ।

तदवच्छिन्नभेदस्येति [पृ. 634] । उभयत्ववद्भेदस्य इत्यर्थः । 'पर्याप्तिसंबन्धेन' इत्यत्र तृतीयार्थावच्छिन्नत्वस्य अत्यन्ताभावीय-प्रतियोगितायां भेदप्रतियोगितावच्छेदकतायां च अन्वयः ।

अस्मिन् आक्षेपे समाधानं शङ्कते—**न च अव्याप्यवृत्ति-संयोगादेरिति** [पृ. 634] । 'संयोगिमान् द्रव्यत्वात्' इत्यत्र अव्याप्यवृत्तिः संयोगः साध्यतावच्छेदकः । अत्र 'साध्यतावच्छेद-कसमनियतप्रतियोगिताकाभावः' इत्यनेन संयोग्यभावः ग्राह्यः । परन्तु संयोग्यभावीयप्रतियोगिताव्यापकत्वं साध्यतावच्छेदके संयोगे न संभवति । संयोग्यभावीयप्रतियोगिताधिकरणे संयोगिनि वृक्षादौ अव्याप्यवृत्तिसंयोगस्य अभावसत्त्वात् । संयोगे प्रतियोगि-ताधिकरणवृत्त्यभावप्रतियोगित्वस्यैवसत्त्वेन तदप्रतियोगित्व-विरहात् । अतः तत्र साध्यतावच्छेदके प्रतियोगिताव्यापकतानिर्वा-हार्थं व्यापकताघटके प्रतियोगिताधिकरणवृत्त्यभावे प्रतियोग्य-सामानाधिकरण्यं निवेशनीयम् । तथा च प्रतियोग्यसमानाधिकरणः प्रतियोगिताधिकरणवृत्तिश्च यः अभावः तदप्रतियोगित्वं प्रतियोगि-ताव्यापकत्वम् ।

संयोग्यभावीयप्रतियोगिताधिकरणवृत्तेः संयोगाभावस्य संयोगरूपप्रतियोगिसमानाधिकरणतया तद्वृत्तिः प्रतियोग्यसमाना-धिकरणः अभावः घटाद्यभावः । तदप्रतियोगित्वं संयोगस्यास्तीति तस्य प्रतियोगिताव्यापकत्वनिर्वाहः । एवं वन्हिधूमोभयाभावीय-प्रतियोगिताधिकरणे वह्नौ विद्यमानस्य पर्याप्तिसंबन्धेन उभयत्वा-भावस्य उभयत्वरूपप्रतियोग्यधिकरणवन्हिवृत्तितया प्रतियोगिसमा-नाधिकरणत्वात् प्रतियोग्यसमानाधिकरणं घटाद्यभावमादाय तद-प्रतियोगित्वरूपं व्यापकत्वम् उभयत्वस्य निर्वहणीयम् इति भावः ।

पृथिवीत्वघटत्वोभयत्वादिनेति [पृ. 634] व्यापकताघटकाभावे प्रतियोग्यसामानाधिकरण्यं तु निवेशनीयमेव । परन्तु तत् न प्रतियोग्यधिकरणावृत्तित्वरूपम् । किन्तु 'प्रतियोग्यनधिकरणवृत्तित्वरूपम् । 'पृथिवीत्वघटत्वोभयवान्, द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्यत्र प्रतियोग्यधिकरणावृत्तित्वनिवेशे अतिव्याप्त्यापत्तेः । तथा हि - पृथिवीत्वघटत्वोभयाभाववति जलादौ द्रव्यत्वप्रकारकप्रमाविषयत्वसत्त्वात् अयं व्यभिचारी । तत्र जातित्वावच्छिन्नजात्यभावोऽपि लक्षणघटकः स्यात् । तस्यापि स्वव्यापकसाध्यतावच्छेदकव्यापकप्रतियोगिताकत्वात् यद्यपि जातित्वावच्छिन्नजात्यभावीयप्रतियोगिताधिकरणे जलत्वादौ पृथिवीत्वघटत्व - उभयत्वाभावसत्त्वात् तत्प्रतियोगित्वमेव उभयत्वेऽस्तीति कथम् उभयत्वस्य जात्यभावीयप्रतियोगिताव्यापकत्वमिति शङ्का भवति । तथापि व्यापकताघटकाभावे प्रतियोग्यधिकरणावृत्तित्वनिवेशे पृथिवीत्वघटत्वोभयत्वाभावस्य प्रतियोग्युभयत्वाधिकरणप्रत्येकवृत्तितया प्रतियोग्यधिकरणावृत्तित्वविरहेण प्रतियोग्यधिकरणावृत्तिघटाद्यभावं गृहीत्वा तदप्रतियोगित्वरूपस्य व्यापकत्वस्य पृथिवीत्वघटत्वोभयत्वे संपादनीयस्वात् । तथा च साध्यतावच्छेदकसमनियतप्रतियोगिताकः जातित्वावच्छिन्नजात्यभावोऽपि । तद्घटितकूटाधिकरणं सामान्यादिकम् । तन्निरूपितवृत्तित्वाभावस्य द्रव्यत्वप्रकारकप्रमाविषयत्वे सत्त्वात् अतिव्याप्तिः प्रसजति । तद्वारणाय प्रतियोग्यनधिकरणवृत्तित्वमेव व्यापकताघटकाभावे निवेशनीयम् । पृथिवीत्वघटत्वोभयत्वाभावस्य प्रतियोगि यत् उभयत्वं पर्याप्तिसंबन्धेन तदधिकरणभिन्नं प्रत्येकं पृथिवीत्वं घटत्वं च । तद्वृत्तित्वं उभयत्वाभावेऽस्तीति उभयत्वाभावोऽपि व्यापकताघटकः अभावः तत्प्रतियोगित्वमेव उभयत्वेऽस्तीति तदप्रतियोगित्वरूपं प्रतियोगिताव्यापकत्वं नास्तीति जातित्वावच्छिन्नजात्यभावस्य लक्षणाघटकतया 'पृथिवीत्वघटत्वोभयवान्' इत्यत्र नातिव्याप्तिः । तुल्यन्यायेन

'वन्हिधूमोभयवान् धूमात्' इत्यत्रापि वन्हिधूमोभयाभावीयप्रतियोगिताव्यापकत्वं वन्हिधूमोभयत्वरूपे साध्यतावच्छेदके न निर्वहति। प्रत्येकवृत्तेः उभयत्वाभावस्य उभयत्वानधिकरणप्रत्येकवृत्तितया प्रतियोग्यनधिकरणवृत्तित्वात्। तथा च उभयाभावस्य लक्षणाघटकतया अव्याप्तिर्दुर्वारा इति आक्षेपः।

तादृशसाध्यतावच्छेदकाभावस्येति [पृ. 634]। पृथिवीत्वघटत्वोभयत्वाभावस्येत्यर्थः। **तादृशप्रतियोगिताव्यापकतापत्त्या** [पृ. 634] इति। जातित्वावच्छिन्नाभावीयप्रतियोगिताव्यापकतापत्त्येत्यर्थः। **तादृशाभावम्** इति। जातित्वावच्छिन्नजात्यभावम् इत्यर्थः। द्रव्यत्वस्यैव हेतुत्वे हेतुतावच्छेदकसमवायसंबन्धेन सामान्यादिनिरूपितवृत्तित्वाप्रसिद्ध्यैव अतिव्याप्त्यप्रसक्तेः द्रव्यत्वप्रकारकप्रमाविषयत्वस्य हेतुत्वानुसरणम्। **प्रतियोग्यनधिकरणवृत्तित्वस्यैवेति** [पृ. 634]। प्रतियोग्यनधिकरणीभूतप्रतियोगितावन्निष्ठात्यन्ताभावाप्रतियोगित्वं प्रतियोगिताव्यापकत्वमिति फलितोऽर्थः।

समाधत्ते—**सामानाधिकरण्यस्येत्यादिना** [पृ. 635]। साध्यतावच्छेदके प्रतियोगिताव्यापकत्वं प्रतियोगिसामानाधिकरण्याभावविशिष्टयदभाववत्त्वं प्रतियोगितावतः तदन्यत्वरूपम्। 'पृथिवीत्वघटत्वोभयवान् द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्यत्र प्रतियोगितापदेन जात्यभावीयप्रतियोगितायाः ग्रहणे तद्गतः जलत्वस्य प्रतियोगिसामानाधिकरण्याभावविशिष्टः यः पृथिवीत्वघटत्वोभयाभावः तद्वत्त्वमस्ति। जलत्वे विद्यमानस्य तादृशोभयत्वाभावस्य प्रतियोगिसामानाधिकरण्यविरहात्। तथा च तदन्यत्वरूपं व्यापकत्वं साध्यतावच्छेदके नास्ति इति जात्यभावस्य लक्षणाघटकतया नातिव्याप्तिः।

'वन्हिधूमोभयवान् धूमात्' इत्यत्र वन्हिधूमोभयाभावीयप्रतियोगितावति वह्नौ विद्यमानः यः वन्हिधूमोभयत्वाभावः सः प्रतियोगिसामानाधिकरण्यविशिष्टः, न तु तदभावविशिष्ट इति यत्पदेन वह्निधूमोभयत्वं ग्रहीतुं न शक्यते। किन्तु घटत्वादिकमेव ग्राह्यम्। प्रतियोगिसामानाधिकरण्याभावविशिष्टस्य घटत्वाभावस्य वह्नौ सत्त्वात्। तदन्यत्वं वन्हिधूमोभयत्वरूपे साध्यतावच्छेदके अस्तीति अस्य वन्हिधूमोभयाभावीयप्रतियोगिताव्यापकत्वनिर्वाहः।

तत्सामानाधिकरण्यावच्छेदकस्येति [पृ. 635]। वन्हिधूमोभयत्वाभावनिष्ठं यत् वन्हिधूमोभयत्वरूपप्रतियोगिसामानाधिकरण्यं तत् वह्न्यवच्छेदेन भवति। वन्हिः प्रतियोगिसामानाधिकरण्यावच्छेदकः। स तु प्रतियोगिसामानधिकरण्याभावावच्छेदकः न भवति। प्रतियोग्यनवच्छेदकस्यैव अभावावच्छेदकत्वात्। एवं च वह्न्यवच्छेदेन प्रतियोगिसामानाधिकरण्याभावविशिष्टोभयत्वाभाववत्त्वं प्रतियोगितावतः न संभवतीति यत्पदेन उभयत्वं ग्रहीतुं न शक्यत इति भावः।

गादाधरी

अथ वा यन्निरूपितसाध्यतावच्छेदकताघटकसंबन्धसामान्ये प्रतियोगित्वाधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वाभावः तदन्यत्वमेव प्रतियोगिताव्यापकत्वम्। उभयत्वनिरूपितपर्याप्तौ च न प्रत्येकानुयोगिकत्वाभावः। तदनुयोगिनः प्रत्येकानतिरिक्तत्वादिति।

विवरणम्

सामानाधिकरण्यस्य व्याप्यवृत्तित्वे तु आह—**अथवेति** [पृ. 639]। तथा च यन्निरूपितसाध्यतावच्छेदकतावच्छेदकसंबन्धसामान्ये प्रतियोगित्वाधिकरणयत्किंचिद्व्यक्त्यनुयोगिकत्वाभावः तदन्यत्वं प्रतियोगिताव्यापकत्वम्। 'वन्हिधूमोभयवान्

धूमात्' इत्यत्र यत्पदेन वन्हिधूमोभयत्वं ग्रहीतुं न शक्यते। तन्निरूपिते पर्याप्तिरूपे साध्यतावच्छेदकतावच्छेदकसंबन्धे उभयत्वाभावीयप्रतियोगित्वाधिकरणप्रत्येकानुयोगिकत्वस्यैव सत्त्वात्। उभयानुयोगिकत्ववति पर्याप्तिसंबन्धे तदनतिरिक्तप्रत्येकानुयोगिकत्वस्य आवश्यकत्वात्। अतः यत्पदेन घटपटोभयत्वं ग्राह्यम्। तन्निरूपितपर्याप्तिसंबन्धे प्रतियोगित्वाधिकरणव्यक्त्यनुयोगिकत्वाभावः वर्तते। तदन्यत्वं घटपटोभयत्वान्यत्वम् वन्हिधूमोभयत्वेऽस्तीति तस्य वन्हिधूमोभयाभावीयप्रतियोगिताव्यापकत्वनिर्वाहः।

'पृथिवीत्वघटत्वोभयवान्, द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्यत्र प्रतियोगित्वपदेन जात्यभावीयप्रतियोगित्वग्रहणे तदधिकरणजलत्वानुयोगिकत्वाभावस्य पृथिवीत्वघटत्वोभयत्वनिरूपितपर्याप्तिसंबन्धे सत्त्वात् तदन्यत्वरूपं प्रतियोगिताव्यापकत्वं साध्यतावच्छेदके नायाति। अतः तत्र जातित्वावच्छिन्नाभावः न लक्षणघटकः। किन्तु पृथीवीत्वघटत्वोभयाभाव एव लक्षणघटकः। तद्घटितकूटाधिकरणपृथिवीवृत्तित्वस्यैव द्रव्यत्वप्रकारकप्रमाविषयत्वे सत्त्वात् नातिव्याप्तिः। अत्र सामान्यपदानुपादाने 'दण्डिमान् दण्डिसंयोगात्' इत्यत्र दण्डत्वस्य साध्यतावच्छेदकत्वमते तन्निरूपितपरम्परासंबन्धे तद्दण्ड्यनुयोगिके प्रतियोगित्वाधिकरणएतद्दण्डिरूपयत्किंचिद्व्यक्त्यनुयोगिकत्वाभावस्य सत्त्वात् दण्डयभावस्य लक्षणघटकत्वानुपपत्तिः। अतः सामान्यपदोपादानमिति कृष्णंभट्टः। तदुपादाने तु एतद्दण्ड्यनुयोगिकसंबन्धस्यापि सामान्यान्तर्गततया तत्र एतद्दण्ड्यनुयोगिकत्वाभावविरहात् न दोषः।

न्यायरत्ने तु सामान्यपदानुपादाने संयोगेन वन्हिमतः तादात्म्येन साध्यतायां साध्यतावच्छेदकताघटकपर्वतानुयोगिकवन्हिसंयोगे प्रतियोगित्वाधिकरणयत्किंचिन्महानसानुयोगिकत्वा-

भावसत्त्वेन वन्हिमद्भेदीयप्रतियोगिताव्यापकत्वस्य वन्हिरूपसाध्यतावच्छेदके अनुपपत्तिः । अतः तदुपादानमिति ।

पृथिवीत्वघटत्वपर्याप्तौ जातिसामान्याभावीयप्रतियोगिताधिकरणानुयोगिकत्वसामान्याभावासत्त्वेन तादृशोभयत्वस्यापि तादृशप्रतियोगिताव्यापकत्वापत्तिः । अतः यत्किञ्चित्त्वनिवेशः ।

गादाधरी

[रूपध्वंसवान् रूपादित्यत्र अतिव्याप्तिशङ्कातत्परिहारौ]

यत्तु—प्राचीनमते रूपादिसामान्याभावस्य रूप-तद्ध्वंस-तत्प्रागभावत्रयप्रतियोगिकतया रूपध्वंसादिसाध्यकरूपादिहेतौ अतिव्याप्तिः । रूपादिसामान्याभावीयरूपध्वंसत्वावच्छिन्नप्रतियोगितायाः साध्यतावच्छेदकसमनियतत्वेन तद्घटिताभावकूटाधिकरणे वायौ रूपादेरवृत्तेः ।

न च - रूपस्यापि रूपध्वंसाभावरूपतया तद्घटितस्य रूपसामान्याभावाघटितकूटस्यापि यावतामैकाधिकरण्यमिति विवक्षया लक्षणघटकत्वात् तद्वति हेतोर्वृत्त्या नोक्तातिव्याप्तिरिति-वाच्यम् ।

रूपादीनां प्रत्येकं स्वस्वध्वंसाभावरूपत्वेऽपि स्वान्यरूपादिध्वंसाद्यभावानात्मकतया साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहेण लक्षणाघटकत्वादिति—

तन्न । जलपरमाण्वादौ रूपध्वंसत्वावच्छिन्नाभावबुद्धिनिर्वाहाय अन्यरूपत्वावच्छिन्नाभावे रूपध्वंसत्वावच्छिन्नप्रतियोगिताकत्वकल्पनस्य आवश्यकतया तत एव रूपादिसामान्याभाववत्यपि तत्प्रतीतिनिर्वाहात् रूपादिसामान्याभावस्य रूपध्वंसादिप्रतियोगिकत्वानभ्युपगमात् ।

साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापक्षे तेनापि उक्तस्थले रूपादिसामान्याभावव्यावर्तनात् स्वनिरूपकाभाववत्त्व-

संबन्धेन साध्यतावच्छेदकसमनियतप्रतियोगिताकूटाधिकरणत्वमेव निवेश्य लक्षणस्य परिष्करणीयतया रूपादिसामान्याभावानधिकरणस्यापि जलपरमाण्वादेः उक्तस्थले तत्कूटाधिकरणत्वेन अतिव्याप्तेरनवकाशाच्च ।

विवरणम्

यत्तु इत्यादि [पृ. 641] । साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावविवक्षणेऽपि 'रूपध्वंसवान् रूपात्' इत्यत्र अतिव्याप्तिः । रूपध्वंसाभाववति जलपरमाणौ रूपसत्त्वात् अयं हेतुः व्यभिचारी । पृथिवीपरमाणौ पाकवशात् पूर्वरूपपरावृत्तिपूर्वकं रूपान्तरोत्पत्त्यभ्युपगमात् यद्यपि रूपध्वंसः संभवति, जलपरमाणौ तु पाकविरहात् रूपं नित्यमेव । अतः तत्र रूपध्वंसः नास्ति इति जलपरमाण्वन्तर्भावेण व्यभिचारी अयं हेतुः ।

प्राचीनानां मते रूपसामान्याभावः रूप-रूपध्वंस-रूपप्रागभाव-एतत्त्रितयप्रतियोगिकः । तैः ध्वंसप्रागभावाधिकरणे अत्यन्ताभावानङ्गीकारात् रूपवत् तद्ध्वंसप्रागभावयोरपि रूपात्यन्ताभावविरोधित्वात् । प्रकृते साध्यतावच्छेदकं रूपध्वंसत्वम् । तत्समनियता रूपसामान्याभावीया रूपध्वंसत्वावच्छिन्ना प्रतियोगिता भवति । तस्याः रूपध्वंसमात्रवृत्तित्वात् । तथा च रूपध्वंसत्वसमनियतप्रतियोगिताकः रूपसामान्याभावः । तद्घटितकूटाधिकरणं रूपशून्यं वाय्वादिकम् । तद्वृत्तित्वाभावस्य रूपात्मकहेतौ सत्त्वात् अतिव्याप्तिरिति भावः ।

न च रूपस्यापीति [पृ. 641] । रूपध्वंसात्यन्ताभावः रूपात्मकोऽपि भवति । ध्वंसप्रागभावयोः अत्यन्ताभावस्य तत्प्रतियोगिरूपतायाः अनवस्थाभयेन स्वीकारात् । तथा च रूपध्वंसत्वरूपसाध्यतावच्छेदकसमनियता या रूपनिरूपिता रूपध्वंसत्वावच्छिन्ना प्रतियोगिता तन्निरूपकाभावः रूपात्मकः रूपध्वंसाभावः ।

तद्घटितकूटमपि साध्याभावकूटपदेन ग्रहीतुं शक्यते । तदधिकरणं रूपवद्द्रव्यम् । तद्वृत्तित्वाभावः रूपात्मके हेतौ नास्तीति नातिव्याप्तिः ।

न च—रूपात्मकाभावघटितकूटस्य रूपात्यन्ताभावघटितकूटस्य च उभयोः लक्षणघटकत्वे तदधिकरणं कथं प्रसिद्धयति । रूपतदत्यन्ताभावयोः एकत्र असंभवात् इति—वाच्यम् ।

यावतामभावानाम् एकाधिकरणवृत्तित्वं संभवति तावदभावकूटमेव ग्राह्यमिति उपरिष्टात् वक्ष्यमाणतया रूपात्मकः यः रूपध्वंसत्वावच्छिन्नप्रतियोगिताकः अभावः, यश्च व्यधिकरणघटत्वाद्यवच्छिन्नरूपध्वंसनिष्ठप्रतियोगिताकः अभावः अनयोः ऐकाधिकरण्यं संभवतीति तद्घटितं कूटमपि लक्षणघटकम् ।

एवं रूपध्वंसत्वावच्छिन्नप्रतियोगिताकः यः रूपात्यन्ताभावः यश्च व्यधिकरणधर्मावच्छिन्नरूपध्वंसनिष्ठप्रतियोगिताकाभावः तयोः ऐकाधिकरण्यं संभवतीति तद्घटितकूटमपि लक्षणघटकम् । तत्र रूपात्मकाभावघटितं कूटं गृहीत्वा तदधिकरणवृत्तित्वत्वावच्छिन्नाभावस्य यावदन्तर्गतस्य हेतावभावात् नातिव्याप्तिरिति 'न च' इत्यादिग्रन्थस्य आशयः ।

रूपध्वंसाभावरूपतया इति [पृ. 641] । रूपध्वंसत्वसमवियतप्रतियोगिताकाभावरूपतया इत्यर्थः । **तद्घटितस्य इति** [पृ. 641] । रूपघटितस्येत्यर्थः ।

समाधत्ते—रूपादीनामिति [पृ. 641] । विशेषरूपातिरिक्तं सामान्यतः रूपम् इति किञ्चिन्नास्ति । तथा च तत्तद्रूपध्वंसाभावः तत्तद्रूपात्मकः । घटीयरूपध्वंसाभावः घटीयरूपात्मकः । पटीयरूपध्वंसाभावः पटीयरूपात्मकः । घटीयरूपात्मकाभावीयप्रतियोगिता घटीयरूपध्वंसमात्रनिष्ठा । साध्यतावच्छेदकं रूपध्वं-

सत्त्वं तु पटीयरूपध्वंसेऽपि वर्तते । तत्र घटीयरूपनिरूपितप्रतियोगिताविरहात् साध्यतावच्छेदकव्यापकत्वं घटीयरूपध्वंसनिष्ठप्रतियोगितायां नास्ति । तथा च साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वं घटीयरूपादेः न संभवतीति रूपात्मकाभावस्य लक्षणाघटकतया पूर्वोक्तरीत्या रूपसामान्याभावघटितकूटस्यैव लक्षणघटकतया तदधिकरणवाय्वादिवृत्तित्वाभावस्य रूपात्मकहेतौ सत्त्वात् अतिव्याप्तिरिति यत्तु इत्यादि ग्रन्थकृतस्य आक्षेपस्य अभिप्रायः ।

तत्र [पृ. 641] इत्यादि । रूपध्वंसत्वावच्छिन्नप्रतियोगिताकत्वं जन्यरूपत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाव एव स्वीक्रियते । न तु रूपसामान्याभावे । रूपसामान्याभावशून्ये जलपरमाणावपि 'रूपध्वंसो नास्ति' इति प्रतीतेः । तथा च जन्यरूपसामान्याभाव एव रूपध्वंसाभावात्मकः । रूपसामान्याभाववति वाय्वादावपि जन्यरूपाभावादेव 'रूपध्वंसो नास्ति' इति प्रतीतेर्निर्वाहात् । तथा च रूपध्वंसत्वरूपसाध्यतावच्छेदकसमनियत-रूपध्वंसत्वावच्छिन्नप्रतियोगिताकाभावः जन्यरूपत्वावच्छिन्नाभावः व्यधिकरणधर्मावच्छिन्नसाध्याभावश्च । तद्घटितकूटाधिकरणं जलपरमाण्वादिकमपि । तद्वृत्तित्वत्वावच्छिन्नाभावोऽपि यावदन्तर्गततया लक्षणघटकः । तद्वत्त्वं हेतौ नास्ति । रूपस्य जलपरमाण्वादिवृत्तित्वात् इति 'रूपध्वंसवान् रूपात्' इत्यत्र नातिव्याप्तिरिति भावः ।

जन्यरूपत्वावच्छिन्नाभावे [पृ. 641] इति । यद्यपि जन्यजले पटादौ च 'रूपध्वंसो नास्ति' इति प्रतीतेः जन्यरूपाभावेऽपि रूपध्वंसत्वावच्छिन्नप्रतियोगिताकत्वं न संभवति, जन्यजले जन्यरूपस्यैव सत्त्वात्, तथापि जन्येत्यस्य पाकजन्येत्यर्थः ग्राह्यः ।

ननु जलपरमाणौ 'रूपध्वंसो नास्ति' इति प्रतीत्यनुरोधेन जन्यरूपाभावे रूपध्वंसप्रतियोगिकत्वम् आस्ताम् । परन्तु 'वायौ

रूपध्वंसो नास्ति' इति प्रतीतेः रूपसामान्याभावविषयकत्वमपि संभवति। घटसामान्याभावस्य घटध्वंसप्रतियोगिकत्वेन 'घटध्वंसो नास्ति' इति प्रतीतिविषयत्ववत्। एवञ्च रूपसामान्याभावघटित-कूटाधिकरणं वायुरेवेति तद्वृत्तित्वाभावस्य हेतौ सत्त्वात् अतिव्याप्तिरित्यत आह—**साधनसमानाधिकरणत्वस्येति** [पृ.641]। रूपसामान्याभावस्य समानाधिकरणवृत्तित्वं नास्ति। रूपवति रूपसामान्याभावस्य असत्त्वात्। तथा च साधनसमानाधिकरण-साध्याभावपदेन रूपसामान्याभावः ग्रहीतुं न शक्यते। किन्तु पाकजन्यरूपसामान्याभाव एव। तद्घटितकूटाधिकरणजलपर-माण्वादिवृत्तित्वाभावस्य हेतावभावात् नातिव्याप्तिरिति भावः।

स्वनिरूपकाभाववत्त्वसंबन्धेनेति [पृ. 641]। समनियता-भावानाम् ऐक्यमिति मते केवलान्वयिसाध्यकसद्धेतौ घटत्वपट-त्वादिव्यधिकरणधर्मावच्छिन्नसाध्याभावानामेव ग्राह्यतया तद्घटित-कूटाप्रसिद्धिः। कूटस्य भिन्नपदार्थघटितत्वनियमात्। अतः स्वनि-रूपकाभाववत्त्वसंबन्धेन साध्यतावच्छेदकसमनियतप्रतियोगिता-घटितकूटाधिकरणवृत्तित्वाभावाः इति परिष्करणीयम्। स्वं—प्रतियोगिता। व्यधिकरणधर्मावच्छिन्नाभावानाम् ऐक्येऽपि तन्नि-रूपिता वाच्यत्वनिष्ठप्रतियोगिता घटत्वपटत्वाद्यवच्छेदकभेदेन भिन्ना इति तद्घटितकूटं प्रसिद्ध्यति। तथा च केवलान्वयिसाध्य कस्थले स्वनिरूपकाभाववत्त्वसंबन्धेन वाच्यत्वत्वसमनियतघटत्व-पटत्वाद्यवच्छिन्नप्रतियोगिताघटितकूटाधिकरणं जगदेव। तद्वृत्ति-त्वाभावोऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः वृत्तिमद्वृत्तिः। तद्वत्त्वं हेतावस्तीति लक्षणसमन्वयः।

एवञ्च 'रूपध्वंसवान् रूपात्' इत्यत्र रूपध्वंसत्वसमनियता या प्रतियोगिता रूपध्वंसत्वावच्छिन्ना प्रतियोगिता। स्वनिरूपक-जन्यरूपाभाववत्त्वसंबन्धेन तत्प्रतियोगिताकूटाधिकरणं जलपर-

माण्वादिः । तद्वृत्तित्वस्यैव हेतौ सत्त्वात् नातिव्याप्तिः । तथा च रूपसामान्याभावात्मकसाध्याभावीयरूपध्वंसत्वावच्छिन्नप्रतियोगितायाः साध्यतावच्छेदकसमनैयत्यम् । जन्यरूपाभावद्वारा तत्कूटाधिकरणत्वं जलपरमाण्वादेरिति भावः ।

गादाधरी

[प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते तस्याः साध्यतावच्छेदकसमनैयत्योपपादनम्]

प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते नानाव्यक्तिसाध्यकस्थले साध्यतावच्छेदकसमनैयत्यस्य प्रत्येकं प्रतियोगितायाम् असत्त्वेऽपि स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्यविवक्षणात् न दोषः । तत्तद्वन्हितत्तद्धूमादि स्वरूपप्रतियोगितानामपि स्वावच्छेदकवन्हित्वधूमत्वाद्यवच्छिन्नतदभावप्रतियोगितात्वेन वन्हित्वधूमत्वादिसमनैयत्यात् वन्हित्वाद्यवच्छिन्नवह्न्यादिस्वरूपप्रतियोगितानां द्रव्यत्वाद्यवच्छिन्नाभावीयवह्न्यादिस्वरूपप्रतियोगितात्मकतया तदवच्छेदकद्रव्यत्वाद्यवच्छिन्नप्रतियोगिताया घटादावपि सत्त्वात् न तत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितात्वेन वन्हित्वादि समनैयत्यमिति तदभावीयत्वविशेषणम् । तथा सति वन्हित्वाद्यवच्छिन्नाभावप्रतियोगिताया घटादावसत्त्वात् नानुपपत्तिः ।

विवरणम्

ननु साध्याभावपदेन साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावविवक्षणेऽपि नानाव्यक्तिसाध्यके 'वन्हिमान् धूमात्' इत्यादौ अव्याप्तिः । प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते वन्हिसामान्याभावीयप्रतियोगितायाः तत्तद्वन्हिस्वरूपत्वेन तत्तद्वन्हिमात्रवृत्तितया साध्यतावच्छेदकस्य वन्हित्वस्य सकलवन्हिवृत्तितया साध्यतावच्छेदकव्यापकत्वं वन्हिसामान्याभावीयप्रतियोगितायां न संभवतीति कथं वन्हित्वेन वह्न्यभावो वा घटत्वेन वह्न्यभावो वा

लक्षणघटकः। एवं नानाव्यक्तिसाध्यकव्यभिचारिणि 'धूमवान् वह्नेः' इत्यादौ धूमत्वेन धूमाभावः कथं लक्षणघटक इत्याशङ्क्य आह—**प्रतियोगितायाः** इति [पृ 646]। प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते तत्तत्प्रतियोगितात्वेन साध्यतावच्छेदकव्यापकत्वं न विवक्ष्यते, किंतु स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेन। स्वं–प्रतियोगिता। तथा च वह्न्यभावीयप्रतियोगितावच्छेदकं वह्नित्वम्, तदवच्छिन्नवह्न्यभावीयप्रतियोगितात्वेन प्रतियोगितात्वं वन्हिनिष्ठसकलप्रतियोगितासाधारणो धर्मः। तेन रूपेण प्रतियोगितायाः साध्यतावच्छेदकव्यापकत्वं संभवत्येव। अत्र 'तदभीवीये' त्यनुक्त्वा स्वावच्छेदकावच्छिन्नप्रतियोगितात्वेन व्यापकत्वम् इत्युक्तौ 'वन्हिर्नास्ति' इति प्रतीतिसिद्धानां वन्हित्वावच्छिन्नवन्हिस्वरूपप्रतियोगितानां 'द्रव्यं नास्ति' इति प्रतीतिसिद्धानां द्रव्यत्वावच्छिन्नवन्हिस्वरूपप्रतियोगितानां च अभिन्नतया स्वपदेन 'द्रव्यं नास्ति' इति प्रतीतिसिद्धाभावीयवन्हिस्वरूपप्रतियोगितायाः ग्रहणे तदवच्छेदकद्रव्यत्वावच्छिन्नप्रतियोगितात्वस्य घटादिनिष्ठप्रतियोगितास्वपि सत्त्वेन तेन रूपेण प्रतियोगितायाः घटादावपि सत्त्वात् तत्र च साध्यतावच्छेदकवन्हित्वविरहात् स्वव्यापकतत्कत्वरूपं व्याप्यत्वं प्रतियोगितायां न स्यात्। अतः 'तदभावीय' इति विशेषणम्। तथा च वन्हिस्वरूपवह्न्यभावीयप्रतियोगितां स्वपदेन गृहीत्वा तदवच्छेदकवन्हित्वावच्छिन्नवह्न्यभावीयप्रतियोगितात्वेनैव साध्यतावच्छेदकसमनियतत्वं विवक्षणीयम् इति तेन रूपेण प्रतियोगितायाः वन्हिमात्रवृत्तितया प्रतियोगितायां साध्यतावच्छेदकसमनियतत्वं निर्वहतीति भावः।

गादाधरी

यद्यप्येवमपि वाच्यत्वत्वादिसमनियतप्रतियोगित्वाप्रसिद्धिः दुर्वारैव। व्यधिकरणधर्मावच्छिन्नाभावानाम् अभिन्नतया वाच्यत्वादिस्वरूपवाच्यत्वभिन्नत्वाद्यवच्छिन्नाभावीयप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नप्रतियोगितानां पटादावपि सत्त्वात्। यत्किं–

चिदेकधर्मावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्यघटकव्याप्यत्वविवक्षणे च पृथिवीत्वाद्यभावादिसाध्यकस्थले घटावृत्तित्वाद्यवच्छिन्नाभाववारणमशक्यम् । तदभावीयपृथिवीत्वाभावादिरूपप्रतियोगितानां पृथिवीत्वाभावत्वाद्यवच्छिन्नाभावीयप्रतियोगितात्मकतया पृथिवीत्वाभावत्वादिरूपतदवच्छेदकावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वाभावत्वादिसमनैयत्यसत्त्वात्—

तथापि यद्धर्मावच्छिन्नप्रतियोगितात्वेन यदभावनिरूपितत्वं तादृशधर्मावच्छिन्नतदभावीयप्रतियोगितात्वेनैव व्याप्यत्वनिवेशान्न दोषः । पृथिवीत्वाभावत्वावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वादिरूपाभावमात्रनिरूपितत्वम् । न तु घटावृत्तित्वावच्छिन्नाभावनिरूपितत्वमिति ।

विवरणम्

यद्यप्येवमपि इत्यादि [पृ.647]। स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेन साध्यतावच्छेदकसमनियतत्वविवक्षायां वह्नित्वावच्छिन्नवह्न्यभावद्रव्यत्वावच्छिन्नाभावयोः भेदात् 'वह्निमान् धूमात्' इत्यत्र समनैयत्योपपादनसंभवेऽपि केवलान्वयिसाध्यके 'इदं वाच्यं ज्ञेयत्वात्' इत्यादौ साध्यतावच्छेदकवाच्यत्वत्वसमनियतप्रतियोगितायाः अप्रसिद्धिः । तत्र 'वाच्यत्वभिन्नत्वेन वाच्यत्वं नास्ति', 'घटत्वेन वाच्यत्वं नास्ति' इत्यादिप्रतीतिसिद्धानाम् अभावानामेव साध्याभावपदेन ग्राह्यतया तेषां च 'घटत्वेन पटो नास्ति', 'पटत्वेन घटो नास्ति' इत्यादिप्रतीतिसिद्धव्यधिकरणधर्मावच्छिन्नाभावसमनियतत्वेन तदभिन्नतया स्वपदेन वाच्यत्वभिन्नत्वेन वाच्यत्वाभावीयप्रतियोगितायाः ग्रहणेऽपि तस्याः घटादिष्वपि वर्तमानतया तदवच्छेदकघटत्वावच्छिन्नवाच्यत्वभिन्नत्वेन वाच्यत्वं नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगितात्वेन प्रतियोगितायाः पटादावपि सत्त्वात् तत्र वाच्यत्वत्वविरहात् व्याप्यत्वदलं न निर्वहति ।

यदि तु - यत्किंचिदेकधर्मावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्यघटकं व्याप्यत्वं विवक्षणीयम्। यत्किंचिदेकधर्मः— वाच्यत्वभिन्नत्वम्। तदवच्छिन्ना या तदभावीयप्रतियोगिता वाच्यत्वभिन्नत्वेन वाच्यत्वाभावीयप्रतियोगिता। तत्त्वेन रूपेण प्रतियोगितायाः वाच्यत्वे एव सत्त्वात् प्रतियोगिताव्यापकत्वं वाच्यत्वत्वस्य संभवति इति - उच्यते, तदापि 'पृथिवीत्वाभाववान् जलत्वात्' इत्यत्र अव्याप्तिः। तत्र साध्यतावच्छेदकं पृथिवीत्वाभावत्वम्। तद्व्यापकप्रतियोगिताकाभावः घटावृत्त्यभावः पटावृत्त्यभाव इत्यादिः तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावः। तद्घटितकूटाधिकरणाप्रसिद्ध्या अव्याप्तिवारणाय प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वनिवेश इति वक्ष्यति। उक्तरूपेण व्याप्यत्वविवक्षायां तु यत्किंचिदेकधर्मपदेन पृथिवीत्वाभावत्वं गृहीत्वा तदवच्छिन्नप्रतियोगितात्वेन रूपेण तत्तद्विपक्षावृत्त्यभावीयप्रतियोगितायाः पृथिवीत्वाभावे एव सत्त्वेन तत्र च पृथिवीत्वाभावत्वरूपसाध्यतावच्छेदकसत्त्वात् तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावानामपि लक्षणघटकतापत्त्या तत्कूटाधिकरणाप्रसिद्धिनिबन्धना अव्याप्तिः दुर्वारा इति 'यद्यपि' इत्यादि शङ्काग्रन्थस्य तात्पर्यम्।

तदभावीयेति [पृ. 648]। घटावृत्तित्वाद्यवच्छिन्नाभावनिरूपितानां पृथिवीत्वाभावरूपप्रतियोगितानाम् इत्यर्थः। **पृथिवीत्वाभावत्वादिरूपेति** [पृ. 648]। पृथिवीत्वाभावत्वादिरूपं यत् घटावृत्तित्वाद्यवच्छिन्नाभावीयप्रतियोगितावच्छेदकं तदवच्छिन्नप्रतियोगितात्वेन इत्यर्थः।

समाधत्ते—**तथापीत्यादिना** [पृ. 648]। यद्धर्मावच्छिन्नप्रतियोगितात्वेन रूपेण यदभावनिरूपितत्वं प्रतियोगितायाः तादृशधर्मावच्छिन्नतदभावनिरूपितप्रतियोगितात्वेन रूपेणैव व्याप्यत्वं निवेश्यते। पृथिवीत्वाभावत्वावच्छिन्नप्रतियोगितात्वेन रूपेण

पृथिवीत्वाभावनिष्ठप्रतियोगितायाः पृथिवीत्वाभावाभावमात्रनिरूपितत्वम् । घटावृत्त्यभावनिरूपितप्रतियोगितायाः घटावृत्तिपृथिवीत्वाभावनिष्ठत्वेऽपि घटावृत्तित्वावच्छिन्नप्रतियोगितात्वरूपेणैव घटावृत्त्यभावनिरूपितत्वम् ।

एवञ्च पृथिवीत्वाभावत्वावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वात्मकाभावनिरूपितत्वं तादृशपृथिवीत्वाभावत्वावच्छिन्नपृथिवीत्वात्मकाभावनिरूपितप्रतियोगितात्वेन रूपेण व्याप्यत्वं घटावृत्त्यभावीयप्रतियोगितायाः न संभवति । अतः घटावृत्त्यभावः लक्षणघटको न संभवति । किंतु पृथिवीत्वात्मकः समानाधिकरणधर्मावच्छिन्नसाध्याभावः व्यधिकरणधर्मावच्छिन्नसाध्याभावश्च लक्षणघटकः । तद्घटितकूटाधिकरणपृथिवीवृत्तित्वाभावस्य जलत्वे सत्त्वात् नाव्याप्तिः ।

यद्यपीति [पृ. 647] आशङ्कासमये स्वपदेन घटावृत्त्यभावनिरूपितां प्रतियोगितां गृहीत्वा तदवच्छेदकावच्छिन्नप्रतियोगितापदेन पृथिवीत्वात्मकाभावनिरूपितप्रतियोगितां गृहीत्वा व्याप्यत्वं न संभवतीति पृष्टम् ।

समाधाने तु स्वपदेन यन्निरूपिता प्रतियोगिता गृह्यते, तदवच्छिन्नप्रतियोगितापदेनापि तन्निरूपितां प्रतियोगितामेव गृहीत्वा तत्त्वेन रूपेण समन्वयस्यम् उपपादनीयम् इति विशेषः अवगन्तव्यः ।

दीधितिः

तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपक्षावृत्तित्वाद्यवच्छिन्नप्रतियोगिताकाभावकूटाधिकरणमप्रसिद्धम् । तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववति सामान्यादौ अवर्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिः, अतिव्याप्तिर्वा ।

गादाधरी

[साध्यतावच्छेदकव्याप्यत्वदलप्रयोजनविचारः]

यद्यपि पूर्वदलाप्रवेशे वह्न्यादिसाध्यके धूमादिहेतौ साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकव्यापकप्रतियोगिताक-तत्तद्धवावृत्तित्वावच्छिन्नाभावकूटाधिकरणत्वस्य गुणादौ प्रसिद्धत्वेऽपि तत्र हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्धया अव्याप्तिसंभवः, तथापि साध्याभावकूटवति तादृशवृत्तेरप्रसिद्धया अव्याप्तिः । **तद्दलनिवेशेऽपि** 'सत्तावान् जातेः' इत्यादौ **वक्ष्यत** इति स्थलान्तरे कूटाधिकरणाप्रसिद्धया अव्याप्तिवारणरूपं तत्प्रयोजनमाह—**यत्र पृथिवीत्वाभावादाविति** [पृ. 650] । **तत्तद्विपक्षेति** [पृ. 650] । घटपटादिरूपेत्यर्थः । **तत्र सद्धेताविति** [पृ. 650] । **तत्र—साध्ये** यः सद्धेतुः जलत्वादिः तत्रेत्यर्थः । **नाव्याप्तिरित्यनेन** अन्वयः ।

विवरणम्

एतावता वृत्तिमद्वृत्तयः यावन्तः साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावाः तद्वत्त्वं व्याप्तिरिति स्थितम् । तत्र समनैयत्यघटकसाध्यतावच्छेदकव्याप्यत्वनिवेशस्य 'पृथिवीत्वाभाववान् जलत्वात्' इत्यत्र अव्याप्तिवारणरूपं प्रयोजनमुक्तं दीधितौ ।

तथा हि—साध्यतावच्छेदकं पृथिवीत्वाभावत्वम् । तद्व्यापकप्रतियोगिताकः अभावः तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावोऽपि । तत्र घटपटादिः विपक्षः । घटपटाद्यवृत्त्यभावीयप्रतियोगिता घटपटाद्यवृत्तौ वर्तते । पृथिवीत्वाभावोऽपि घटपटाद्यवृत्तिः । तथा च साध्यतावच्छेदकपृथिवीत्वाभावत्ववति पृथिवीत्वाभावे घटपटाद्यवृत्त्यभावीयप्रतियोगितायाः सत्त्वात् ताः प्रतियोगिताः साध्यतावच्छेदकव्यापिकाः । तन्निरूपकाभावाः 'घटावृत्तिर्नास्ति,' 'पटावृत्तिर्नास्ति' इत्यादि प्रतीतिसिद्धाः अभावाः । तत्कूटाधि-

करणम् अप्रसिद्धम् । घटपटादिप्रत्येकस्य प्रत्येकतत्तदवृत्त्यभावाधिकरणत्वेऽपि तादृशाभावकूटाधिकरणं घटो वा पटो वा न भवति । घटे पटावृत्तेः पटत्वाभावस्य सत्त्वात् तदभावाधिकरणत्वासंभवात् । तथा च साध्यतावच्छेदकसमनियततत्तद्विपक्षावृत्तित्वावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिः । तद्वारणाय साध्यतावच्छेदकव्याप्यत्वनिवेशः। तन्निवेशे च साध्यतावच्छेदकपृथिवीत्वाभावत्वशून्ये घटत्वाभावेऽपि घटावृत्त्यभावीयप्रतियोगितायाः सत्त्वात् तस्याः साध्यतावच्छेदकव्याप्यत्वविरहात् तन्निरूपकाभावो न लक्षणघटकः । किं तु पृथिवीत्वाभावाभावादिरेव लक्षणघटकः। तद्घटितकूटाधिकरणं पृथिवी । तद्वृत्तित्वाभावस्य जलत्वे सत्त्वात् नाव्याप्तिः ।

अत्रेयमाशङ्का भवति—साध्यतावच्छेदकव्याप्यत्वानिवेशे 'वन्हिमान् धूमात्' इत्यादावपि अव्याप्तिः संभवति । तथा हि-साध्यतावच्छेदकवन्हित्वव्यापकप्रतियोगिताकः तत्तद्ह्रदावृत्तित्वावच्छिन्न संयोगसंबन्धावच्छिन्नप्रतियोगिताकाभावः । प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशात् । तादृशाभावकूटाधिकरणं गुणादिकमेव प्रसिद्धम् । तत्र तत्तद्ह्रदावृत्तेः गुणत्वादेः समवायसंबन्धेन सत्त्वेऽपि संयोगसंबन्धेन अभावात् । तथा च साध्याभावकूटाधिकरणगुणादिनिरूपितहेतुतावच्छेदकसंयोगसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या अव्याप्तिः । व्याप्यत्वदलनिवेशे तु वन्हित्वशून्ये शैवालादावपि तत्तद्ह्रदावृत्त्यभावीयप्रतियोगितायाः सत्त्वात् तेषाम् अभावानां साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वविरहेण लक्षणाघटकतया वन्हित्वावच्छिन्नवह्न्यभावादीनामेव लक्षणघटकतया तत्कूटाधिकरणह्रदादिनिरूपितसंयोगसंबन्धावच्छिन्नवृत्तित्वस्य प्रसिद्धतया तदभावस्य हेतौ सत्त्वात् नाव्याप्तिः। तथा च 'वन्हिमान् धूमात्' इति स्थलमुपेक्ष्य पृथिवीत्वाभावादिसाध्यकस्थलानुधावनं किमर्थमिति ।

तत्र समाधानं तु—'वन्हिमान् धूमात्' इत्यत्र हि न साध्याभावकूटाधिकरणाप्रसिद्धया अव्याप्तिः। किन्तु कूटाधिकरणनिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धया अव्याप्तिः। इयं च अव्याप्तिः साध्यतावच्छेदकव्याप्यत्वदलनिवेशेऽपि 'सत्तावान् जातेः' इत्यादौ भवतीति वक्ष्यमाणतया कूटाधिकरणाप्रसिद्धिनिबन्धनाव्याप्तिवारणरूपमेव प्रयोजनं वक्तव्यम् इत्याशयेन स्थलान्तरानुधावनमिति। तदेतदाह—प्रयोजनाविना [पृ. 651]।

पूर्वदलाप्रवेशे इति [पृ. 651]। साध्यतावच्छेदकव्याप्यत्वरूपदलाप्रवेशे इत्यर्थः। **तद्दलनिवेशेऽपीति** [पृ. 651]। साध्यतावच्छेदकव्याप्यत्वदलनिवेशेऽपीत्यर्थः।

गादाधरी

यावतामेकाधिकरण्यं सम्भवति तावदभावसमुदायाधिकरणविवक्षायां तद्दोषासंभवेन स्थलान्तरे व्यावृत्तिमाह—**पृथिवीत्वादाविति** [पृ. 650]। द्रव्यत्वादेः समवायेन हेतुत्वे जातित्वाद्यवच्छिन्नाभावघटितकूटाधिकरणे समवायेन वृत्तेरप्रसिद्धया अतिव्याप्तेरनवकाशात् स्वरूपसंबन्धेन हेतुत्वानुसरणम्। **साधनसमानाधिकरणत्वस्य** साध्याभावविशेषणतापक्षे जातित्वाद्यवच्छिन्नाभावस्य साधनासमानाधिकरणतया वारणसम्भवेऽपि प्रत्येकं साधनसमानाधिकरणजलावृत्तित्वतेजोऽवृत्तित्वाद्यवच्छिन्नसमवायावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणतायाः सामान्यादावेव सत्त्वात् अतिव्याप्तिर्दुर्वारैव इति ध्येयम्।

विवरणम्

साध्यतावच्छेदकव्याप्यत्वनिवेशस्य 'पृथिवीत्वादौ साध्ये' इत्यादिना स्थलान्तरेऽतिव्याप्तिवारणरूपं प्रयोजनमुक्तं दीधितौ। तत्र पृथिवीत्वाभावसाध्यकस्थलपरित्यागे कारणमाह—**यावतामेकाधिकरण्यं संभवतीति** [पृ. 653] 'पृथिवीत्वाभाववान् जलत्वात्'

इत्यत्र घटपटावृत्तित्वावच्छिन्नाभावानां साध्यतावच्छेदकव्यापक-प्रतियोगिताकत्वेऽपि तेषाम् एकाधिकरणवृत्तित्वं न संभवतीति यावतामैकाधिकरण्यं संभवति तावदभावकूटाधिकरणविवक्षायां एकैकविपक्षावृत्त्यभावघटितकूटस्यैव ग्राह्यतया तदधिकरणं घटादि-रेव प्रसिद्ध इति कूटाधिकरणाप्रसिद्धिनिबन्धनाव्याप्तिः न संभवती-त्यालोच्य पृथिवीत्वसाध्यकस्थलानुधावनम् ।

'इयं पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्ययं व्यभिचारी हेतुः । पृथिवीत्वरूपसाध्याभाववति जलादौ द्रव्यत्व-प्रकारकप्रमाविषयत्वस्य सत्त्वात् । अत्र साध्यतावच्छेदकं पृथिवी-त्वत्वम् । तद्व्यापकप्रतियोगिताकः अभावः जातित्वाद्यवच्छिन्ना-भावोऽपि । तादृशाभावीयप्रतियोगिता जातावस्ति । पृथिवी-त्वमपि जातिः इति तत्राप्यस्ति । तथा च पृथिवीत्वत्वव्यापकप्रति-योगिताकः जातित्वावच्छिन्नजात्यभावः पृथिवीत्वत्वावच्छिन्न-पृथिवीत्वाभाव इत्यादिः । तत्कूटाधिकरणं न जलादिकम् । तत्र पृथिवीत्वाभावस्य सत्त्वेऽपि जातिसामान्याभावस्य असत्त्वात् । किन्तु सामान्यादिकमेव । तन्निरूपितवृत्तित्वाभावः द्रव्यत्वप्रकार-कप्रमाविषयत्वेऽस्ति । 'सामान्यं द्रव्यम्' इत्याकारकप्रमायाः अभावात् द्रव्यत्वप्रकारकप्रमाविषयत्वस्य सामान्यावृत्तित्वात् । तथा च अतिव्याप्तिः । तद्वारणाय साध्यतावच्छेदकव्याप्यत्व-निवेशः । तन्निवेशे जात्यभावीयप्रतियोगितायां पृथिवीत्वत्व-व्याप्यत्वं नास्ति । पृथिवीत्वत्वशून्ये जलत्वादावपि जात्यभावीय-प्रतियोगितायाः सत्त्वात् । तथा च जातित्वावच्छिन्नाभावस्य लक्षणाघटकतया पृथिवीत्वत्वावच्छिन्नाभावकूटस्यैव लक्षणघटकतया तदधिकरणजलादिवृत्तित्वमेव द्रव्यत्वप्रकारकप्रमाविषयत्वेऽस्तीति नातिव्याप्तिः ।

अत्र द्रव्यत्वस्य समवायसबन्धेन हेतुत्वे जातित्वावच्छिन्ना-भावकूटाधिकरणसामान्यादिनिरूपितसमवायसंबन्धावच्छिन्नवृत्ति -

त्वाप्रसिद्धया अतिव्याप्ते: अनवकाशात् स्वरूपसंबन्धेन द्रव्यत्व-प्रकारकप्रमाविषयत्वस्य हेतुत्वानुसरणम् । सामान्यादिनिरूपित-स्वरूपसंबन्धावच्छिन्नवृत्तित्वस्य सामान्यत्वादौ प्रसिद्धस्य अभाव: तावस्तीति अतिव्याप्ते: प्रसक्ति: ।

ननु साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वपक्षे जातित्वावच्छिन्नाभावस्य द्रव्यत्वप्रकारकप्रमाविषयत्वरूपसाधन-वति पृथिव्यादिद्रव्येऽवृत्ते: साधनसामानाधिकरण्यं नास्तीति लक्षणाघटकतया तमादाय अतिव्याप्ते: अप्रसक्त्या कथम् अतिव्याप्ति: दीधितौ उक्ता इत्याशङ्क्य जातित्वावच्छिन्नाभावस्य लक्षणाघटकत्वेऽपि पृथिवीत्वत्वव्यापकप्रतियोगिताका: अभावा: जलावृत्तित्व-तेजोऽवृत्तित्वाद्यवच्छिन्नसमवायसंबन्धावच्छिन्नप्रति-योगिताकाभावा अपि भवन्ति । ते च प्रत्येकं साधनाधिकरण-जलादौ वर्तन्त इति साधनसमानाधिकरणा: । तत्कूटाधिकरणं सामान्यादिकम् । तत्र जलावृत्ति-तेजोऽवृत्त्यादे: समवायसंबन्धेन अभावसत्त्वात् । तथा च कूटाधिकरणं सामान्यादिकम् । तद्वृत्ति-त्वाभाव: द्रव्यत्वप्रकारकप्रमाविषयत्वेऽस्तीति अतिव्याप्ति: इत्याह—**साधनसमानाधिकरणत्वस्य** [पृ. 653] इत्यादिना ।

दीधिति:

नापि अभावत्वादिना अभावादौ साध्ये **तत्तत्साध्याभाव-**कूटाधिकरणाप्रसिद्धया अव्याप्तिरिति—आहु: ।

गादाधरी

द्वितीयदलप्रयोजनमाह—नापीति [पृ. 655] । घटत्वाभाव-त्वादिना साध्यतायां घटादावेव साध्याभावकूटाधिकरणत्व-प्रसिद्धि: । अत उक्तम् **अभावत्वादिना** इति [पृ. 655] । आदि-पदात् प्रमेयत्वादिपरिग्रह: । **तत्तत्साध्येति** । [पृ. 655] । घट-त्वाभावपटत्वाभावरूपसाध्यस्य य: साध्यतावच्छेदकव्याप्यप्रतियो-

गिताकः घटत्वपटत्वादिरूपाभावः तत्समुदायाधिकरणाप्रसिद्धया इत्यर्थः ।

यावतामैकाधिकरण्यं संभवति इति विवक्षायामपि तादृशाभावसमुदायवति घटादौ हेतोर्वृत्तेरव्याप्तिरेव ।

न च—यावतामैकाधिकरण्यसंभवः तादृशतादृशाभावकूटाधिकरणं यद्यत् तावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकोऽभावः विवक्षणीयः । घटवृत्तित्वत्वाद्यवच्छिन्नाभावश्च उपदर्शितस्थले न तथा । जगत एव तावदन्यतमान्तर्गतत्वात् । अपि तु घटत्वादिना जगद्वृत्तित्वसामान्याभाव एव वृत्तिमद्वृत्तिः तथाविधोऽभावः । तत्तदधिकरणान्यतमत्वं च तत्तदधिकरणावृत्तिशून्यत्वम् । न तु तत्तदधिकरणान्यान्यत्वम् । अतो नाप्रसिद्धिरिति—वाच्यम् ।

एवमपि 'जातिप्रतियोगिकाभाववान् मेयत्वात्' इत्यादौ जातिमतामेव प्रत्येकं घटत्वपटत्वघटिततादृशकूटाधिकरणतया जातिमद्वृत्तित्वत्वावच्छिन्नाभावस्यापि तादृशतया अव्याप्तेर्दुर्वारत्वात् इति ।

विवरणम्

द्वितीयदलप्रयोजनमिति [पृ. 655] । साध्यतावच्छेदकव्यापकत्वदलस्य प्रयोजनमित्यर्थः । तथा च साध्यतावच्छेदकव्यापकत्वमनिवेश्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावाः इत्युक्तौ 'अभाववान् मेयत्वात्' इत्यत्र सद्धेतौ अव्याप्तिः । यत्र यत्र मेयत्वम् तत्र सर्वत्र यः कोऽप्यभावः अस्तीति अयं सद्धेतुः । अत्र साध्यतावच्छेदकम् अभावत्वम् । तद्व्याप्यप्रतियोगिताकः अभावः घटत्वाभावाभावः, पटत्वाभावाभावः इत्यादिः घटत्वपटत्वादिरूपः अभावः । तत्समुदायाधिकरणम् अप्रसिद्धम् । घटत्वपटत्वादिसमुदायस्य एकत्रासत्त्वात् इति अव्याप्तिः ।

यावताम् ऐकाधिकरण्यं संभवति तावतां समुदाये विवक्षितेऽपि घटत्वादिएकैकाभावघटितसमुदायवति घटादौ प्रमेयत्वरूपहेतुसत्त्वात् साध्याभावसमुदायाधिकरणवृत्तित्वाभावः हेतौ नास्तीति अव्याप्तिः। अतः प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वं निवेशनीयम्। घटत्वाभावपटत्वाभावादिनिष्ठप्रतियोगितायाः अभावत्वव्याप्यत्वेऽपि अभावत्वव्यापकत्वं नास्ति। अतः तन्निरूपकाणां घटत्वाभावाभावादीनां लक्षणाघटकतया अभावत्वरूपसमानाधिकरणधर्मावच्छिन्नाभावस्य अप्रसिद्ध्या 'घटत्वेन अभावो नास्ति,' 'पटत्वेन अभावो नास्ति' इत्यादिप्रतीतिसिद्धघटत्वपटत्वादिरूपव्यधिकरणधर्मावच्छिन्नाभावनिष्ठप्रतियोगिताकाभावा एव लक्षणघटकाः। तत्कूटाधिकरणं जगत्। तद्वृत्तित्वाभावोऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः वृत्तिमद्वृत्तिः। तद्वत्त्वं हेतावस्तीति नाव्याप्तिरिति भावः।

न च यावतामित्यादि [पृ. 656]। यावतामभावानाम् ऐकाधिकरण्यं संभवति तादृशतादृशाभावकूटाधिकरणं यद्यत् तावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकाः यावन्तोऽभावाः वृत्तिमद्वृत्तयः तद्वत्त्वं व्याप्तिरिति विवक्षणीयम्। तथा सति साध्यतावच्छेदकव्यापकत्वदलाप्रवेशेऽपि 'अभाववान् मेयत्वात्' इत्यत्र अव्याप्तिः न संभवति। घटत्वरूपाभावकूटाधिकरणं घटः। पटत्वरूपाभावकूटाधिकरणं पट इत्येवं घटपटादिरूपस्य सर्वस्यापि जगतः संभवदैकाधिकरण्यकघटत्वादिरूपसाध्याभावकूटाधिकरणत्वं वर्तते। घटपटादिरूपकूटाधिकरणयावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकत्वं घटवृत्तित्वाभावे पटवृत्तित्वाभावे वा नास्ति। किन्तु जगद्वृत्तित्वाभाव एव अस्ति। स च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिरिति तद्वत्त्वस्य हेतौ सत्त्वात् लक्षणसमन्वयसंभवात् कथम् अव्याप्तिरिति न चेत्यादिना शङ्का।

तत्र समाधानं तु—'अभाववान् मेयत्वात्' इत्यत्र उक्तरीत्या लक्षणसमन्वयेऽपि 'जातिप्रतियोगिकाभाववान् मेयत्वात्' इत्यत्र जातिप्रतियोगिकाभावत्वव्याप्यप्रतियोगिताकाः ये घटत्वपटत्वादि-तत्तज्जात्यभावाभावाः प्रत्येकं तत्कूटाधिकरणं यद्यत् इत्यनेन घटत्वपटत्वादिजातिमदेव ग्राह्यम् । तावदन्यतमवृत्तित्वत्वसम-नियतप्रतियोगिताकाभावः जातिमद्वृत्तित्वत्वेन जातिमद्वृत्तित्वा-भावः । स च जातिमदवृत्तौ वृत्तिमति सामान्यत्वादौ प्रसिद्धः । हेतौ मेयत्वे नास्ति । तस्य जातिमद्वृत्तित्वात् इत्यव्याप्तिः प्रसजति । तद्वारणार्थं प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वं निवेशनीय-मेवेति भावः ।

गादाधरी

[साध्याभाववत्तायां साध्यवत्ताग्रहविरोधितानियामकसंबन्धनिवेशनम्]

अत्र साध्याभाववत्तायां संबन्धविशेषानिवेशे 'कालपरि-माणवान् मेयत्वात्' इत्यादौ अतिव्याप्तिः । कालस्यापि कालिक-संबन्धेन कालपरिमाणाभावाधिकरणतया जगत एव साध्याभाव-कूटवत्त्वात् ।

दैशिकविशेषणतासंबन्धनिवेशे च 'घटत्वाभाववान् पट-त्वात्' इत्यादौ अव्याप्तिः । घटत्वादेः तेन संबन्धेन अवृत्तेः । तेन संबन्धेन तद्घटितकूटाधिकरणाप्रसिद्धेः ।

तेन संबन्धेन वृत्तिमत्त्वस्य अभावविशेषणत्वे तु घटत्वा-भावादिसाध्यके व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नाभाव-मादाय अतिव्याप्तिः ।

कालिकसंबन्धावच्छिन्नप्रतियोगिताके घटत्वाभावाभावे साध्ये आत्मत्वादिहेतौ अव्याप्तिश्च । घटातिरिक्तवस्तुमात्रस्यैव दैशिक-विशेषणतया साध्याभावकूटवत्त्वात् ।

साध्यनिरूपितप्रतियोगितावच्छेदकसंबन्धनिवेशेऽपि अयमेव दोषः। किञ्चिद्विशिष्टस्य **तादृशसाध्यस्य** योऽभावः तस्य दैशिकविशेषणतासंबन्धावच्छिन्नाभावः तद्रूप इति दैशिकविशेषणताया अपि निरुक्तसाध्यनिरूपितप्रतियोगितावच्छेदकसंबन्धत्वात्।

स्वनिष्ठतादृशप्रतियोगितावच्छेदकसंबन्धेन स्वाधिकरणत्वनिवेशे च व्यधिकरणधर्मावच्छिन्नाभावस्य **साध्याप्रतियोगितया** तदसङ्ग्रहप्रसङ्ग इति साध्यतावच्छेदकसंबन्धेन **स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताज्ञानं** प्रति यत्संबन्धावगाहि यदभाववत्ताज्ञानं प्रतिबन्धकं तेन संबन्धेन तदभावाधिकरणत्वं विवक्षणीयम्। व्यधिकरणधर्मावच्छिन्नाभाववत्ताबुद्धिरपि **व्यधिकरणधर्मावच्छिन्नप्रतियोगिप्रकारकबुद्धि** प्रतिबध्नाति इति तादृशाभावस्य लक्षणघटकतानिर्वाहः।

यदि च—अभाववत्ताज्ञानं प्रति दैशिकविशेषणतासंसर्गकमपि तदभावाभावत्वावच्छिन्नप्रकारकज्ञानं प्रतिबन्धकम्। अभावाभावस्य अतिरिक्ततामते तादृशज्ञानप्रतिबन्धकताया आवश्यकत्वात्। तस्य प्रतियोगिस्वरूपतामतेऽपि फलसाम्यानुरोधेन तदावश्यकत्वात्। अभावाभावस्य अतिरिक्तत्वग्रहदशायां तत्प्रतिबन्धकताया दुरपह्नवत्वाच्च। एवञ्च कालिकसंबन्धावच्छिन्नप्रतियोगिताके घटत्वाभावजातित्वादेरभावे साध्ये आत्मत्वजातित्वादौ अव्याप्तिर्दुर्वारैव। दैशिकविशेषणतासंबन्धस्यापि निरुक्तरूपाक्रान्तत्वात्।

न च—एवं तादृशसाध्यवत्यपि पक्षे तादृशसाध्याभावत्वावच्छिन्नप्रकारकप्रमारूपप्रतिबन्धकज्ञानसंभवात् तद्विषयस्य हेत्वाभासतापत्तिरिति—वाच्यम्। तत्र पक्षे 'साध्यं नास्ति' इति ज्ञानस्य भ्रमत्वं निर्विवादमिति **तदुपपादनाय तादृशसाध्यप्रतियोगिनः** तादृशसाध्याभावत्वेन दैशिकविशेषणतया **वृत्त्यनभ्युपगमात्** इत्युच्यते,

तदा—निरुक्तसंबधेन साध्याभावत्वावच्छिन्नाधिकरणता-कूटवत्त्वमेव विवक्षणीयम् । हेतुमति तादृशाधिकरणताविरहात् नोक्ताव्याप्तिः ।

विवरणम्

साध्याभाववत्तायां संबन्धविशेषं निवेशयितुम् आरभते—**अत्र साध्याभाववत्तायाम्** [पृ॰ 658] इत्यादिना । अस्मिन् कूटघटितलक्षणे साध्याभावसमुदायाधिकरणत्वे संबन्धविशेषमनि-वेश्य येन केनापि संबन्धेन साध्याभावसमुदायाधिकरणत्वविवक्षायां समवायसंबन्धेन कालपरिमाणसाध्यके 'कालपरिमाणवान् प्रमेय-त्वात्' इत्यत्र व्यभिचारिणि अतिव्याप्तिः । कालपरिमाणाभाव-वति पृथिव्यादौ प्रमेयत्वसत्त्वात् अयं व्यभिचारी । अत्र साध्याभावः कालपरिमाणत्वेन कालपरिमाणाभावः, घटत्वादिना कालपरिमाणा-भावश्च । तत्कूटाधिकरणं जगदेव भवति । कालपरिमाणाभावो हि कालिकसंबन्धेन काले वर्तते । स्वरूपसंबन्धेन कालातिरिक्ते सर्वत्र जगति वर्तते । अतः साध्याभावकूटाधिकरणजगद्वृत्तित्वत्व-समनियतप्रतियोगिताकः अभावः घटत्वेन जगद्वृत्तित्वाभाव एव वृत्तिमद्वृत्तिरिति तद्वत्त्वस्य प्रमेयत्वरूपहेतौ सत्त्वात् अतिव्याप्तिः ।

यदि तु स्वरूपसंबन्धेन साध्याभाववत्त्वं निवेश्यते, तदा स्वरूपसंबन्धेन कालपरिमाणाभावकूटाधिकरणं कालातिरिक्तं जगदेव । तद्वृत्तित्वभावः कालातिरिक्तजगद्वृत्तित्वत्वावच्छिन्ना-भावः कालमात्रवृत्तिपदार्थे प्रसिद्धः प्रमेयत्वरूपहेतौ नास्तीति यद्यपि 'कालपरिमाणवान् मेयत्वात्' इत्यत्र नातिव्याप्तिः, तथापि 'घटत्वाभाववान् पटत्वात्' इत्यत्र सद्धेतौ अव्याप्तिः । अत्र हि साध्याभावः घटत्वाभावाभावः घटत्वात्मकः । स्वरूपसंबन्धेन तदधिकरणम् अप्रसिद्धम् । भावानां स्वरूपसंबन्धेन वृत्तेः अप्रा-माणिकत्वात् । तथा च स्वरूपसंबन्धेन साध्याभावकूटाधिकरणा-प्रसिद्ध्या अव्याप्तिः ।

यदि तु—साध्याभावे स्वरूपसंबन्धेन वृत्तिमत्त्वं विशेषणं दीयते। घटत्वात्मकस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य स्वरूपसंबन्धेन वृत्तिमत्त्वं नास्ति इति स न लक्षणघटकः। किन्तु घटत्वाभावनिष्ठपटत्वादिरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव एव स्वरूपसंबन्धेन वृत्तिमत्त्वात् लक्षणघटकः। स्वरूपसंबन्धेन तादृशाभावकूटाधिकरणं जगत्। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य तद्वृत्तित्वाभावस्य पटत्वरूपहेतौ सत्त्वात् नाव्याप्तिरित्युच्यते, तदापि घटत्वाभावसाध्यके व्यभिचारिणि 'घटत्वाभाववान् मेयत्वात्' इत्यत्र अतिव्याप्तिः।

तत्र हि साध्याभावपदेन घटत्वात्मकम् अभावं गृहीत्वा तद्वद्घटवृत्तित्वमेव हेतावस्तीति अतिव्याप्तिर्वारणीया। स्वरूपसंबन्धेन वृत्तिमत्त्वस्य साध्याभावविशेषणत्वे तु घटत्वस्य स्वरूपसंबन्धेन अवृत्तेः साध्याभावपदेन तत् ग्रहीतुं न शक्यत इति व्यधिकरणधर्मावच्छिन्नसाध्याभावमादाय अतिव्याप्तिः प्राप्नोति।

भावानां दैशिकविशेषणतासंबन्धेन वृत्तिस्वीकारेण पूर्वोक्ताप्रसिद्धिवारणेऽपि 'कालिकसंबन्धावच्छिन्नप्रतियोगिताक-घटत्वाभाववान् आत्मत्वात्' इत्यत्र सद्धेतौ अव्याप्तिः। साध्यतावच्छेदकसमनियतप्रतियोगिताकः अभावः तत्र घटत्वाभावात्मकः तृतीयाभावः। अस्य स्वरूपसंबन्धेन अधिकरणं घटातिरिक्तं सर्वं जगत्। तद्वृत्तित्वाभावः घटमात्रवृत्तिपदार्थे प्रसिद्धः हेतौ आत्मत्वे नास्ति, तस्य घटातिरिक्तात्मवृत्तित्वात् इति अव्याप्तिः।

यदि तु—साध्यात्मकाभावनिरूपितप्रतियोगितावच्छेदकसंबन्धेन साध्याभाववत्त्वं विवक्षितम्, तदापि 'कालिकसंबन्धावच्छिन्नघटत्वाभावनिष्ठप्रतियोगिताकाभाववान् आत्मत्वात्' इत्यत्र साध्यनिरूपितप्रतियोगितावच्छेदकसंबन्धः कालिकसंबन्धः। तेन संबन्धेन साध्याभावस्य घटत्वाभावस्य अधिकरणम् आत्मा न

भवति, नित्येषु कालिकायोगात् । किन्तु जन्यजगदेव । तद्वृत्तित्वाभावः आत्मत्वेऽस्तीति नाव्याप्तिरित्युच्यते, तथापि प्रकारान्तरेण तत्रैव अव्याप्तिः ।

तथा हि—पूर्वक्षणवृत्तित्वविशिष्टस्य तादृशसाध्यस्य यः अभावः तस्य यः दैशिकविशेषणतासंबन्धावच्छिन्नाभावः, सोऽपि विशिष्टशुद्धयोरनतिरेकात् साध्यस्वरूप इति तन्निरूपितप्रतियोगितावच्छेदकसंबन्धः दैशिकविशेषणतासंबन्धोऽपि । तेन संबन्धेन साध्याभावस्य घटत्वाभावस्य अधिकरणम् आत्मापि भवति । तद्वृत्तित्वाभावः हेतौ नास्तीति अव्याप्तिः ।

यदि तु साध्याभावनिष्ठा या साध्यनिरूपितप्रतियोगिता तदवच्छेदकसंबन्धेन साध्याभावाधिकरणत्वं निवेशनीयम् । स च संबन्धः कालिकसंबन्ध एव इति तेन संबन्धेन साध्याभावाधिकरणं आत्मा न भवतीति नाव्याप्तिः इत्युच्यते, तदा व्यधिकरणधर्मावच्छिन्नाभावस्य सद्धेतुस्थले साध्याभावपदेन ग्राह्यतया तन्निष्ठायाः साध्यनिरूपितप्रतियोगितायाः अप्रसिद्धया साध्यनिरूपितसाध्याभावनिष्ठप्रतियोगितावच्छेदकसंबन्धस्यापि अप्रसिद्धेः अव्याप्तिः ।

न हि व्यधिकरणधर्मावच्छिन्नाभावः साध्यं प्रति प्रतियोगी ; व्यधिकरणधर्मावच्छिन्नसाध्याभावसत्त्वेऽपि साध्यसत्त्वात् । अतः साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन साध्याभावाधिकरणत्वमेव अत्र लक्षणे निवेशनीयम् । साध्यतावच्छेदकसंबन्धेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यप्रकारकज्ञानं प्रति यत्संसर्गकयदभावप्रकारकज्ञानं प्रतिबन्धकं तेन संबन्धेन तदभावाधिकरणत्वं विवक्षणीयम् इति यावत् ।

साध्यतावच्छेदकसंबन्धावच्छिन्न-स्वप्रतियोगितावच्छेदकावच्छिन्न-साध्यनिष्ठप्रकारताशालिबुद्धित्वावच्छिन्नप्रतिबध्यतानि—

रूपित प्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसंबन्धेन साध्याभावाधिकरणत्वं विवक्षणीयम् इति फलितोऽर्थः ।

'वन्हिमान् धूमात्' इत्यत्र 'संयोगसंबन्धेन वन्हिमान्' इति बुद्धिं प्रति स्वरूपसंबन्धेन वह्न्यभावप्रकारकज्ञानं प्रतिबन्धकम् । एवं 'संयोगसंबन्धेन घटत्वेन वन्हिमान्' इति भ्रमात्मकबुद्धिं प्रति 'स्वरूपसंबन्धेन घटत्वावच्छिन्नवन्ह्यभाववान्' इति ज्ञानं प्रतिबन्धकम् । अतः स्वरूपसंबन्धः तत्र साध्यवत्ताग्रहविरोधितानियामकसंबन्धः । तेन संबन्धेन साध्याभावकूटाधिकरणं निर्वह्निः । तद्वृत्तित्वाभावस्य हेतौ सत्वात् लक्षणसमन्वयः ।

'घटत्वाभाववान् पटत्वात्' इत्यत्र स्वरूपसंबन्धेन घटत्वाभावरूपसाध्यप्रकारकबुद्धिं प्रति समवायसंबन्धेन घटत्वरूपसाध्याभावप्रकारकबुद्धेः प्रतिबन्धकतया तत्र समवायसंबन्धस्य साध्यवत्ताग्रहविरोधितानियामकत्वम् । तेन संबन्धेन साध्याभावकूटाधिकरणं घटः । तद्वृत्तित्वाभावस्य पटत्वे सत्वात् नाव्याप्तिः ।

'कालिकसंबन्धावच्छिन्नघटत्वाभावाभाववान् आत्मत्वात्' इत्यत्र स्वरूपसंबन्धेन साध्यप्रकारकज्ञानं प्रति कालिकसंबन्धेन घटत्वाभावरूपसाध्याभावप्रकारकबुद्धिः प्रतिबन्धिका । अतः तत्र कालिकसंबन्धः साध्यवत्ताग्रहविरोधितानियामकः । तेन संबन्धेन साध्याभावाधिकरणं न आत्मा ; किन्तु जन्यपदार्थः । तद्वृत्तित्वाभावस्य आत्मत्वरूपहेतौ सत्वात् नाव्याप्तिरिति भावः ।

तादृशसाध्यस्येति [पृ. 659] । कालिकसंबन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभावस्येत्यर्थः । **तद्रूप इति** [पृ. 659] साध्यस्वरूप इत्यर्थः । **स्वनिष्ठतादृशप्रतियोगितावच्छेदकसंबन्धेनेति** [पृ. 659] । साध्याभावनिष्ठा या साध्यनिरूपिता प्रतियोगिता तदवच्छेदकसंबन्धेन इत्यर्थः । **साध्याप्रतियोगितया इति** [पृ. 659] । साध्यनिरूपितप्रतियोगित्वविरहेण इत्यर्थः ।

स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताज्ञानमिति [पृ. 659]। स्वप्रतियोगितावच्छेदकावच्छिन्नसाध्यनिष्ठप्रकारताशालिज्ञानम् इत्यर्थः। यथाश्रुते व्यधिकरणधर्मविशिष्टस्य साध्यस्य अप्रसिद्धेः। **व्यधिकरणधर्मावच्छिन्नप्रतियोगिप्रकारकबुद्धिमिति** [पृ. 659]। व्यधिकरणधर्मावच्छिन्ना या प्रतियोगिनिष्ठा प्रकारता तन्निरूपकबुद्धिम् इत्यर्थः।

शङ्कते—**यदि चेत्यादिना** [पृ. 659]। तदभाववत्ताज्ञानं प्रति दैशिकविशेषणतासंसर्गकमपि तदभावाभावत्वावच्छिन्नप्रकारकं ज्ञानं प्रतिबन्धकम्। यथा 'घटत्वाभाववान्' इति बुद्धिं प्रति घटत्ववत्वेन घटत्वप्रकारकज्ञानस्य समवायसंसर्गकस्यैव प्रतिबन्धकत्वेऽपि घटत्वाभावाभावत्वेन घटत्वप्रकारकं यज्ज्ञानं 'अयं घटत्वाभावाभाववान्' इत्याकारकं तत् स्वरूपसंसर्गकमपि प्रतिबन्धकमेव। अभावाभावः अतिरिक्त इति मते स्वरूपसंसर्गकं ज्ञानं प्रतिबन्धकम् इति अवश्यं वक्तव्यत्वात्। एवञ्च अभावाभावः प्रतियोगिस्वरूप इति मतेऽपि प्रतिबन्धरूपफलसाम्यमनुसृत्य स्वरूपसंसर्गकज्ञानस्य प्रतिबन्धकत्वम् आवश्यकम्।

किञ्च 'अभावाभावः अतिरिक्तः' इति ग्रहदशायां स्वरूपसंसर्गकस्य अभावाभावप्रकारकज्ञानस्य प्रतिबन्धकतायाः अवर्जनीयता।

एवञ्च 'कालिकसंबन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभाववान् आत्मत्वात्' इत्यत्र साध्यवत्ताबुद्धिं प्रति कालिकसंबन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभावाभावत्वावच्छिन्नसाध्याभावप्रकारकज्ञानस्य स्वरूपसंसर्गकस्य प्रतिबन्धकत्वेन स्वरूपसंबन्धोऽपि साध्यवत्ताग्रहविरोधितानियामकसंबन्ध इति तेन संबन्धेन साध्याभावाधिकरणं आत्मापि भवति। तद्वृत्तित्वस्यैव हेतौ सत्वात् अव्याप्तिरिति भावः।

ननु तादृशदैशिकविशेषणतासंबन्धेन साध्याभाववत् यथा घटभिन्नम्, तथा तादृशकालिकविशेषणतासंबन्धेन साध्याभाववान् घटोऽपि। जन्यमात्रस्य कालोपाधित्वात् जगत एव साध्याभाववत्त्वात् घटत्वावच्छिन्नजगद्वृत्तित्वाभावस्यैव लक्षणघटकत्वात् नाव्याप्तिः इत्यतः जातित्वाभावसाध्यकजातित्वहेतुकस्थलानुधावनम्। अत्र कालजात्यन्यतरवृत्तित्वत्वावच्छिन्नाभावस्य वृत्तिमति रूपवत्स्वप्रकारकप्रमाविषयत्वे प्रसिद्धस्य जातित्वरूपहेतौ असत्त्वात् अव्याप्तिः।

न चैवं तादृशसाध्यवत्यपीति [पृ. 659]। कालिकसंबन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभाववति आत्मनि तादृशसाध्याभावत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रकारताशालिप्रमात्मक - ज्ञानस्य प्रतिबन्धकस्य सद्भावात् तद्विषयस्य अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वरूपहेत्वाभासलक्षणमस्तीति हेतुदोषत्वापत्तिः इति न च वाच्यम्। तादृशप्रतिबन्धकज्ञानस्य भ्रमत्वेन प्रमात्वविरहात् प्रमात्वघटितहेत्वाभासलक्षणविरहात्।

तदुपपादनायेति [पृ. 659]। भ्रमत्वोपपादनायेत्यर्थः। **तादृशप्रतियोगिन इति** [पृ. 659]। तादृशसाध्यं प्रति प्रतियोगिन इत्यर्थः। **वृत्त्यनभ्युपगमात् इति** [पृ. 659]। वृत्त्यभ्युपगमे विषयस्य अबाधात् भ्रमत्वं नोपपद्येत इति भावः।

समाधत्ते—**तदा निरुक्तसंबन्धेनेति** [पृ. 659]। साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन साध्याभावत्वावच्छिन्नाधिकरणताकूटवद्वृत्तित्वाभावः लक्षणघटकतया विवक्षितः। आत्मनि उक्तसाध्याभावः घटत्वाभावत्वेनैव रूपेण स्वरूपसंबन्धेन वर्तते, न तु उक्तसाध्याभावत्वेन रूपेण। तथा च स्वरूपसंबन्धेन साध्याभावत्वावच्छिन्नाधिकरणताकूटवत् आत्मातिरिक्तमेव। तद्वृत्तित्वाभावस्य हेतौ सत्त्वात् नाव्याप्तिरिति भावः।

गादाधरी

[साध्याभाववत्तायां दैशिकविशेषणतासंबन्धनिवेशनम् भावानामपि तेन संबन्धेन वृत्तेः उपपादनं च]

परे तु—घटत्वादेरपि दैशिकविशेषणतास्वीकार आवश्यकः। अन्यथा 'घटे न घटत्वाभावः' इत्यादिनञुल्लेख्यप्रतीतिव्यवहारयोः अनुपपत्तिः। 'काले न द्रव्यत्वम्' इत्यादिप्रयोगाभावेन दैशिकविशेषणतासंबन्धावच्छिन्नाधेयतान्वितस्वार्थावगाहिबोधजनकत्वस्यैव नञ्पदे व्युत्पन्नत्वात्।

न च - **भावरूप**प्रतियोगिवाचकपदसमभिव्याहृतनञा दैशिकविशेषणता, अभावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञा च प्रतियोगिभूताभावप्रतियोगितावच्छेदकसंबन्धः प्रत्याय्यत इति व्युत्पत्तिरिति—वाच्यम्।

प्रतियोगितावच्छेदकसंबन्धत्वेन संबन्धताविरहात् विशिष्य समवायकालिकादिसंबन्धभानस्यैव उपगन्तव्यतया प्रतियोगिनि अभावे संबन्धविशेषावच्छिन्नप्रतियोगिताकत्वाबोधकात् 'अत्र अयमभावो नास्ति' इत्यादितः संबन्धविशेषावच्छिन्नाधेयतायाः प्रतीतौ नियामकाभावात्।

समभिव्याहारविशेषनिरपेक्षस्य तात्पर्यस्य नियामकत्वे कालिकादिसंबन्धावच्छिन्नप्रतियोगिताकात्मत्वाभावाभावस्य समवायादिसंसर्गतात्पर्येण 'आत्मनि अयमभावो नास्ति' इति प्रयोगप्रसङ्गात्।

वास्तवतत्संबन्धावच्छिन्नप्रतियोगिताकाभावरूपप्रतियोगिवाचकपदसमभिव्याहारस्य तत्संबन्धभाननियामकत्वे वस्तुतः कालिकसंबन्धावच्छिन्नप्रतियोगिताके अस्मिन्नभावे कालिकसंबन्धावच्छिन्नप्रतियोगिताकत्वसंशयदशायां 'अत्र अयम् अभावो नास्ति' इति वाक्यात् अधिकरणे एतदभावाभावप्रतीतावपि अधिकरणे

कालिकसंबन्धेन एतदभावाभाववत्त्वादिसंशयस्य सर्वानुभवसिद्धस्य उच्छेदापत्तेः।

अथ - एवं कालादावपि 'कालिकसंबन्धावच्छिन्नघटत्वाभावो नास्ति' इति प्रतीत्यनुरोधेन घटत्वादेः दैशिकविशेषणतास्वीकारावश्यकतया तत्र 'समवायावच्छिन्नघटत्वाभावो नास्ति' इति व्यवहारापत्तिरिति चेत्—न।

प्रतियोगिमति तदभावत्वेन वृत्तेरनभ्युपगमात्। इत्थं च दैशिकविशेषणतासंबन्धेन साध्याभावत्वावच्छिन्नवत्त्वं लक्षणे निवेशनीयम्। 'कालिकसंबन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभाववान् आत्मत्वात्' इत्यादौ घटत्वाभावस्य तादृशसाध्याभावत्वेन आत्मन्यवृत्तेः नाव्याप्तिः।

एतेन यादृशसाध्यकस्थले साध्याधिकरणे साध्याभावस्य तदधिकरणे च साध्यस्य च न भ्रमः सिद्धः, तत्र प्रतिबध्यप्रतिबन्धकभावकल्पनाया असंभवेन प्रतिबन्धकताघटितलक्षणाव्याप्तिरिति निरस्तम् इति—वदन्ति।

विवरणम्

भावानामपि दैशिकविशेषणतासंबन्धं स्वीकृत्य तेन संबन्धेन साध्याभाववत्त्वं निवेश्य पूर्वोक्तदोषान् उद्धरतो मतमनुवदति—परे तु इत्यादिना [पृ. 666]। घटत्वादेरपि भावपदार्थस्य दैशिकविशेषणतासंबन्धेन वृत्तित्वम् अवश्यं स्वीकरणीयम्। 'घटे न घटत्वाभावः' इत्याकारकयोः नञुल्लेख्ययोः प्रतीतिव्यवहारयोरनुसारात्।

तथा हि—सप्तम्यन्तसमभिव्याहृतनञः दैशिकविशेषणतासंबन्धावच्छिन्नाधेयत्वान्विताभावबोधकत्वम् इति व्युत्पत्तिः स्वीकरणीया। अन्यथा 'काले न द्रव्यत्वम्' इति प्रयोगप्रसङ्गात्।

कालनिरूपितकालिकसंबन्धावच्छिन्नाधेयत्वस्य द्रव्यत्वाभावे सत्वेन विषयाबाधात् तादृशव्यवहारस्य प्रामाणिकत्वं स्यात्। दैशिकविशेषणतासंबन्धावच्छिन्नाधेयत्वान्विताभावबोधकत्वव्युत्पत्तिस्वीकारे तु कालनिरूपितदैशिकविशेषणतासंबन्धावच्छिन्नाधेयत्वस्य द्रव्यत्वाभावे विरहात् बाधितार्थकतया 'काले न द्रव्यत्वम्' इति व्यवहारो न प्रामाणिकः। एवं च 'घटे न घटत्वाभावः' इति वाक्यादपि घटनिरूपितदैशिकविशेषणता संबन्धावच्छिन्नाधेयत्वमेव घटत्वाभावाभावे घटत्वात्मके बोधनीयम् इति घटत्वादेः भावस्यापि दैशिकविशेषणतासंबन्धेन वृत्तिः सिद्ध्यतीति भावः।

न च भावरूपेति [पृ. 666]। 'काले न द्रव्यत्वम्' इति प्रयोगवारणाय भावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञः दैशिकविशेषणतासंबन्धावच्छिन्नाधेयतान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिः स्वीक्रियते। अभावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञा तु प्रतियोगिभूतः यः अभावः तत्प्रतियोगितावच्छेदकसंबन्धावच्छिन्नाधेयत्वान्वितोऽभावः बोध्यत इति व्युत्पत्तिः।

'घटे न घटत्वाभावः' इत्यत्र यः नञ् अभावरूपः यः प्रतियोगी तद्वाचकघटत्वाभावपदसमभिव्याहृतः। अतः तेन नञा नञर्थस्य प्रतियोगिभूतः यः घटत्वाभावः तत्प्रतियोगितावच्छेदकसंबन्धः समवायसंबन्धः तदवच्छिन्नाधेयत्वान्वितः घटत्वाभावाभाव एव बोध्यते। तावता घटत्वस्य दैशिकविशेषणतासंबन्धावच्छिन्नवृत्तिः न सिद्ध्यतीति न च वाच्यम्।

प्रतियोगितावच्छेदकसंबन्धत्वेन रूपेण समवायादेः न संबन्धत्वम्, किन्तु समवायत्व-कालिकसंबन्धत्वादिना विशिष्यैव संबन्धत्वम्। तथा च संबन्धविशेषावच्छिन्नप्रतियोगिताकत्वाबोधकात् 'अत्र अयमभावो नास्ति' इत्यादि वाक्यात् संबन्धविशेषावच्छिन्नाधेयत्वान्विताभावप्रतीतौ नियामकस्य अभावात्। अतः सामान्यतः

नञः दैशिकविशेषणतासंबन्धावच्छिन्नाधेयत्वान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिरेव स्वीकरणीया। तेन घटत्वादेरपि 'घटे न घटत्वाभावः' इत्यादिव्यवहारात् दैशिकविशेषणतासंबन्धेन वृत्तिः सिद्ध्यतीति भावः।

गगनाभावादेः केवलान्वयितया 'अभावो नास्ति' इति प्रत्ययानुपपत्तेः 'अत्र अयमभावो नास्ति' इति 'अयं' पदघटितव्यवहारानुसरणम्।

ननु यत्संबन्धावच्छिन्नप्रतियोगिताकत्वेन अभावं तात्पर्यविषयतया ज्ञात्वा प्रयुज्यमानम् अभावबोधकं यत्संबन्धावच्छिन्नप्रतियोगिताकाभावबोधकं वा यत्पदं तत्पदघटितवाक्यघटकनञः तत्संबन्धावच्छिन्नाधेयत्वान्वितस्वार्थबोधजनकत्वम् इत्येव नियमः। तथा च प्रतियोगिवाचकपदासमभिव्याहारेऽपि न क्षतिः। तात्पर्यविशेषस्यैव नियामकत्वोपगमात् इत्याशङ्क्य तत्राद्यं पक्षं दूषयति—**समभिव्याहारेति** [पृ. 666]। **समभिव्याहारविशेषनिरपेक्षस्य** [पृ. 666] इत्यस्य अभावरूपप्रतियोगिबोधकपदसमभिव्याहारं विनैव इत्यर्थः।

कालिकसंबन्धावच्छिन्नेति [पृ. 666]। वस्तुतः कालिकसंबन्धावच्छिन्नाभावस्य समवायसंबन्धावच्छिन्नप्रतियोगिताकत्वेन बोधेच्छायां तथाविधाभावबोधक 'अयं' पदसत्त्वे तादृशाभावाभावनिष्ठसमवायसंबन्धावच्छिन्नाधेयत्वप्रतीतिप्रसङ्गात् इत्यर्थः। इष्टापत्तेर्वारणाय **आत्मनेति** [पृ. 666]। समभिव्याहारविशेषसापेक्षतात्पर्यस्यैव बोधनियामकतया तत्र बोधानुदयस्यैव इष्टत्वात् इति भावः।

द्वितीयपक्षं दूषयति—**वास्तवेति** [पृ. 666]। प्रकृते च 'अयं' पदमेव वास्तवकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभाव-

रूपप्रतियोगिवाचकं पदम्। **संशयदशायाम्** [पृ. 666] इत्यस्य **एतदभावाभाववत्त्वादिसंशस्य** [पृ. 667] इत्यत्र अन्वयः।

उच्छेदापत्तेरिति [पृ. 667]। कालिकसंबन्धावच्छिन्नाधेयत्वबोधदशायां तेन प्रतिबन्धात् संशयः न स्यात् इति भावः। नञः दैशिकविशेषणतासंबन्धावच्छिन्नाधेयत्वान्वितस्वार्थबोधकत्वम् इति व्युत्पत्तिस्वीकारे तु दैशिकविशेषणतासंबन्धेन आत्मनि एतदभावाभाववत्त्वप्रत्ययः कालिकसंबन्धेन एतदभावाभाववत्त्वसंशयाविरोधीति न दोष इति भावः।

अथैवमिति [पृ. 667]। भावानां दैशिकविशेषणतासंबन्धेन वृत्तिस्वीकारे काले कालिकसंबन्धावच्छिन्नघटत्वनिष्ठप्रतियोगिताकाभावः नास्तीति प्रतीत्यनुरोधेन कालेऽपि घटत्वस्य दैशिकविशेषणतासंबन्धेन वृत्तिः स्वीकरणीया। तथा सति काले समवायसंबन्धावच्छिन्नघटत्वनिष्ठप्रतियोगिताकाभावो नास्तीति व्यवहारः प्रसज्यते। तेन व्यवहारेण कालनिरूपितदैशिकविशेषणतासंबन्धावच्छिन्नाधेयत्वान्वितस्य घटत्वाभावाभावस्यैव बोधात् तस्य च अबाधितत्वात्। काले कालिकसंबन्धेन घटत्वस्य सद्भावेन 'कालिकसंबन्धावच्छिन्नघटत्वाभावो नास्ति' इति व्यवहारः प्रामाणिकः। काले समवायसंबन्धेन घटत्वस्य असत्त्वात् समवायसंबन्धावच्छिन्नघटत्वाभावो वर्तत इति 'समवायसंबन्धावच्छिन्नघटत्वाभावो नास्ति' इति व्यवहारः अप्रामाणिकः। अतः इष्टापत्तिः वक्तुमशक्या इति भावः।

प्रतियोगिमति इत्यादि [पृ. 667]। समवायसंबन्धावच्छिन्नघटत्वाभावरूपप्रतियोगिमति काले समवायसंबन्धावच्छिन्नघटत्वाभावाभावत्वेन घटत्वस्य स्वरूपसंबन्धेनापि वृत्तिः नाङ्गीक्रियते। अतः काले 'समवायसंबन्धावच्छिन्नघटत्वाभावो नास्ति' इति प्रयोगो न प्रामाणिकः।

कालिकसंबन्धावच्छिन्नघटत्वाभावरूपप्रतियोगिशून्ये काले कालिकसंबन्धावच्छिन्नघटत्वाभावाभावत्वेन घटत्वस्य स्वरूपसंबन्धेन वृत्तेरङ्गीकारात्, 'काले कालिकसंबन्धावच्छिन्नघटत्वाभावो नास्ति' इति व्यवहारः प्रामाणिक इति समाधानस्य तात्पर्यम् ।

ननु एतावता भावानामपि दैशिकविशेषणतासंबन्धेन वृत्तेः समर्थनात् तेन संबन्धेन साध्याभाववत्त्वनिवेशे 'घटत्वाभाववान् पटत्वात्' इत्यत्र अप्रसिद्धिनिबन्धनाव्याप्तेः वारणेऽपि 'कालिकसंबन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभाववान् आत्मत्वात्' इत्यत्र साध्याभावस्य - घटत्वाभावस्य दैशिकविशेषणतासंबन्धेन अधिकरणम् आत्मा भवतीति तद्वृत्तित्वस्यैव हेतोः सत्त्वात् अव्याप्तिः इत्याशङ्क्याह—इत्थं चेति [पृ. 667]। दैशिकविशेषणतासंबन्धेन साध्याभावत्वावच्छिन्नाधेयतानिरूपिताधिकरणत्वं लक्षणे निवेशनीयम् । आत्मनि घटत्वाभावत्वेन रूपेण स्वरूपसंबन्धेन साध्याभावस्य सत्त्वेऽपि साध्याभावत्वेन रूपेण कालिकसंबन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभावत्वेन घटत्वाभावः नास्ति । आत्मनि 'कालिकसंबन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभावो नास्ति' इति प्रतीतिविरहात् । तथा च तत्र दैशिकविशेषणतासंबन्धावच्छिन्नसाध्याभावत्वावच्छिन्नाधेयतानिरूपिताधिकरणतावत् जन्यजगत् । तद्वृत्तित्वाभावः आत्मन्यस्तीति नाव्याप्तिः इति भावः ।

साध्यवत्ताग्रहविरोधितानियामकसंबन्धं परित्यज्य दैशिकविशेषणतासंबन्धनिवेशपक्षानुसरणे बीजमाह—एतेनेति [पृ. 667]। सद्धेतुस्थले व्यधिकरणधर्मावच्छिन्नसाध्याभावघटितस्य कूटस्य साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन अधिकरणं तदेव लक्षणघटकं भवति, यदा तादृशाभाववति व्यधिकरणधर्मप्रकारेण साध्यस्य

भ्रमः भवति । एवं समानाधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणं तदैव लक्षणघटकम्, यदा साध्यवति तादृशसाध्याभावस्य भ्रमः संभवति । यदा तु भ्रमरूपं प्रतिबध्यज्ञानं वा प्रतिबन्धकज्ञानं वा यादृशसाध्यकस्थले न प्रसिद्धं तत्र प्रतिबध्यप्रतिबन्धकभावकल्पनाया असंभवेन प्रतिबन्धकताघटितसंबन्धघटितस्य लक्षणस्य अव्याप्तिर्भवतीत्यालोच्य दैशिकविशेषणताघटितलक्षणानुसरणम् इति भावः ।

दीधितिः

तत्र—'द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वात्' इत्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति द्रव्यत्वादेः अवृत्तेः अतिव्याप्तेः ।

अपि च 'इदं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यादौ द्रव्यत्वत्वाद्यवच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्त्वात् अतिव्याप्तिः । द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात् ।

गादाधरी

तदुभयेति । द्रव्यत्वपृथिवीत्वान्यतरत्वावच्छिन्नप्रतियोगितायाः अपि तदुभयत्वसमनियततया तादृशाभाववतः गुणादेरेव निरुक्तसाध्याभावकूटाधिकरणत्वादिति भावः ।

प्रतियोगिवैयधिकरण्याघटितस्य व्यापकत्वस्य साध्यतावच्छेदकविशेषणत्वमुपगम्य तदुभयत्ववति प्रत्येकमुभयत्वाभावसत्त्वेन तस्य प्रतियोगिताव्यापकत्ववारणे तु तद्रूपावच्छिन्नसाध्यकसद्धेतावव्याप्तिः द्रष्टव्या ।

व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररूपेण साध्यतावच्छेदकसजातीयो यो धर्मः तदवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वोपगमे नैतादृशातिव्याप्त्यवकाशः इत्यतः स्थलान्तरे अतिव्याप्तिमाह—अपि चेति । द्रव्यत्वत्वाद्यवच्छिन्नेति । शुद्धद्रव्यत्वत्वाद्य-

वच्छिन्नेत्यर्थः। पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वादिति। विशेषणावच्छिन्नस्य शुद्धविशेष्यानतिरिक्तत्वात् इति भावः। तदवच्छिन्नाभाववतो गुणादेरेव यथोक्तसाध्याभावकूटाधिकरणत्वादिति भावः।

विवरणम्

एतावता सार्वभौमोक्तं कूटघटितलक्षणं परिष्कृत्य अनूदितम्। अथ तल्लक्षणं दूषयितुम् आरभते दीधितौ—तन्न इत्यादिना [पृ. 672]। अत्र प्रथमं दूषणं 'द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वात्' इत्यादौ अतिव्याप्तिः। द्रव्यत्वपृथिवीत्वोभयाभाववति जलादौ द्रव्यत्वसत्त्वात् अयं हेतुः व्यभिचारी। अत्र साध्यतावच्छेदकं द्रव्यत्वपृथिवीत्वोभयत्वम्। तत्समनियतप्रतियोगिताकः अभावः द्रव्यत्व-पृथिवीत्वोभयाभावः द्रव्यत्वपृथिवीत्वान्यतराभावश्च। तत्कूटाधिकरणं जलादिद्रव्यं न भवति। तत्र द्रव्यत्वपृथिवीत्वोभयाभावस्य सत्त्वेऽपि द्रव्यत्वपृथिवीत्वान्यतराभावस्यासत्त्वात्। तदन्यतरस्य द्रव्यत्वस्यैव सत्त्वात्। तथा च द्रव्यत्वपृथीवीत्वान्यतराभावघटितकूटाधिकरणं द्रव्यभिन्नं गुणादिकमेव। तद्वृत्तित्वाभावः द्रव्यत्वरूपहेतावस्तीति अतिव्याप्तिः। तदाह गादाधर्याम्—द्रव्यत्वपृथिवीत्वेत्यादि [पृ.672]। 'अपि'ना द्रव्यत्वपृथिवीत्वोभयत्वावच्छिन्नप्रतियोगितायाः समुच्चयः।

ननु स्वव्यापकतत्कत्वरूपव्याप्यत्वघटकाभावे प्रतियोगिवैयधिकरण्यं न निवेश्यते, प्रयोजनाभावात्। तथा च प्रतियोगित्वाधिकरणे प्रत्येकं द्रव्यत्वपृथिवीत्वोभयत्वाभावस्य सत्त्वात् तत्प्रतियोगित्वमेव उभयत्वेऽस्तीति साध्यतावच्छेदके प्रतियोगिताव्यापकत्वविरहात् व्याप्यत्वबलाभावेन कथं द्रव्यत्वपृथिवीत्वान्यतराभावस्य लक्षणघटकत्वम् इत्याशङ्क्य प्रतियोगिवैयधिकरण्याघटितस्य प्रतियोगिताव्यापकत्वस्य साध्यतावच्छेदके निवेशे

'द्रव्यत्वपृथिवीत्वोभयवान् पृथिवीत्वात्' इत्यत्र अव्याप्तिः । तत्रापि उभयाभावीयप्रतियोगिताव्यापकत्वम् अन्यतराभावीय-प्रतियोगिताव्यापकत्वं वा साध्यतावच्छेदके उभयत्वे न संभवति । प्रतियोगितावति प्रत्येकस्मिन् उभयत्वाभावस्य सत्त्वात् । तथा च साध्यतावच्छेदकव्याप्यप्रतियोगिताकाभावाप्रसिद्ध्या अव्याप्तिः स्यात् इत्याह—**प्रतियोगिवैयधिकरण्याघटितस्य** इत्यादिना [पृ. 672] ।

व्यासज्यवृत्तित्वेत्यादि [पृ. 672] । साध्यतावच्छेदकसम-नियतप्रतियोगितायां साध्यतावच्छेदकसजातीयधर्मावच्छिन्नत्वमपि विशेषणं दीयते । साध्यतावच्छेदकसाजात्यं च व्यासज्यवृत्तित्वा-व्यासज्यवृत्तित्वान्यतररूपेण । साध्यतावच्छेदकवृत्ति - व्यासज्य-वृत्तित्व - अव्यासज्यवृत्तित्वान्यतररूपवद्धर्मावच्छिन्नत्वं विशेषण-मिति यावत् । 'द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वात्' इत्यत्र द्रव्यत्वपृथिवीत्वान्यतराभावीयप्रतियोगितावच्छेदकस्य अन्यतर-त्वस्य निरुक्तरूपेण उभयत्वरूपसाध्यतावच्छेदकसाजात्यं नास्ति । उभयत्वस्य व्यासज्यवृत्तित्वात् अन्यतरत्वस्य अव्यासज्यवृत्ति-त्वाच्च । अतः व्यासज्यवृत्तित्व-अव्यासज्यवृत्तित्वान्यतररूपेण साध्यतावच्छेदकसजातीयधर्मावच्छिन्नप्रतियोगिताकः द्रव्यत्वपृथि-वीत्वान्यतराभावो न भवति । किन्तु द्रव्यत्वपृथिवीत्वोभयत्वा-वच्छिन्नाभाव एव भवति । तत्कूटाधिकरणं जलादिकमपि । तद्वृत्तित्वाभावः द्रव्यत्वे नास्तीति नातिव्याप्तिः इति स्थलान्तरे अतिव्याप्तिमाह इत्यर्थः ।

'इदं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यत्र कूटघटितलक्षणस्य अतिव्याप्तिः । पृथिव्यन्यत्वविशिष्टद्रव्यत्वा-भाववत्यां पृथिव्यां द्रव्यत्वसत्त्वात् अयं हेतुः व्यभिचारी । अत्र साध्यतावच्छेदकं पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वम् । तत्समनियत-

प्रतियोगिताकः अभावः विशिष्टद्रव्यत्वाभाववत् शुद्धद्रव्यत्वाभावोऽपि। शुद्धद्रव्यत्वाभावीयप्रतियोगिता शुद्धद्रव्यत्वे वर्तते। साध्यतावच्छेदकं विशिष्टद्रव्यत्वे वर्तते। तथापि विशिष्टशुद्धयोः अनतिरेकात् शुद्धद्रव्यत्वेऽपि साध्यतावच्छेदकमस्तीति साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावः शुद्धद्रव्यत्वत्वावच्छिन्नाभावोऽपि। तत्कूटाधिकरणं गुणादिकमेव। तद्वृत्तित्वाभावस्य द्रव्यत्वरूपहेतौ सत्त्वात् अतिव्याप्तिरित्यर्थः।

दीधितिः

किञ्च रूपाभावसाध्यकसद्धेतौ साध्याभावसमुदायनिविष्टसकलरूपव्यक्त्यधिकरणाप्रसिद्धिः।

यावतामैकाधिकरण्यं संभवति तावतां समुदाये विवक्षितेऽपि 'इदं पृथिवीवृत्तिगुणशून्यम्, सत्तान्यपृथिवीवृत्तिशून्यं वा वायुत्वात् रूपवदन्यत्वाद्वा' इत्यादौ अतिव्याप्तिः। तत्र तादृशसाध्याभावस्तोमस्य नियमतो रूपादिघटितत्वेन तद्वति हेतोरवृत्तेः।

गादाधरी

[रूपसामान्याभावसाध्यकसद्धेतावव्याप्त्युद्भावनम्]

विशिष्टस्य अतिरिक्तत्वेन साध्यतावच्छेदकस्य प्रतियोगिताव्यापकत्वस्थले प्रतियोगितावच्छिन्नव्यापकतावच्छेदकत्वनिवेशेन वा विशिष्टद्रव्यत्वादिसाध्यकस्थले शुद्धद्रव्यत्वाभावस्य वारणसंभवात् दूषणान्तरमाह—**किञ्चेति। रूपाभावेति।** रूपत्वाद्यवच्छिन्नाभाव इत्यर्थः। **सद्धेतौ** इति अव्याप्तिसूचनाय। **सकलरूपव्यक्त्यधिकरणाप्रसिद्धिरिति।** तथा च तद्घटितसाध्याभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरिति भावः।

[संभवदैकाधिकरण्यकसाध्याभावसमुदायाधिकरणविवक्षायामपि स्थलान्तरेऽतिव्याप्त्युपपादनम्]

यावतामिति। तथा च प्रकृते सकलरूपघटितसमुदायस्य न लक्षणघटकता। सकलरूपाणाम् ऐकाधिकरण्यविरहात्। किन्तु

एकैकरूपव्यधिकरणधर्मावच्छिन्नाभावघटितकूटानामेव, प्रत्येकं तदधिकरणता च रूपवत्स्वेव प्रसिद्धा इति नाव्याप्त्यवकाश इति भावः ।

इदमिति । वायौ पृथिवीवृत्तिद्वित्वसंयोगादिसत्त्वात् वायुत्वादेः उक्तसाध्यव्यभिचारिता । **गुणसामान्याभावस्य साध्यत्वे** वायवीयस्पर्शादिरपि साध्याभावः । तद्घटितनिरुक्ताभावकूटवदवृत्तित्वाभावस्य यावदन्तर्गतस्य वायुत्वादावभावात् नातिव्याप्तिसंभव इति पृथिवीवृत्तीति । घटतद्वायुद्वित्व-पटतद्वायुद्वित्वादिरूपपृथिवीवृत्तिगुणाभावाभावानां यावतां वायौ ऐकाधिकरण्यसंभवेन तद्घटितकूटस्यापि लक्षणघटकतया तद्वति वायौ हेतोः वृत्या नातिव्याप्तिसंभवः ।

न च - **द्वित्वादिरूपसाध्याभावस्य** उत्पत्तिकाले असत्त्वेन कालिकाव्याप्यवृत्तितया व्याप्यवृत्तित्वविशेषणेन तद्व्यावृत्तिः । पार्थिवपरमाण्वेकत्वादिरेव लक्षणघटक इति अतिव्याप्तिर्दुर्वारैव इति - वाच्यम् ।

प्राचीनमते द्वित्वादिमति तत्प्रागभावादिकालावच्छेदेन तदत्यन्ताभावासत्त्वात् द्वित्वादेरपि व्याप्यवृत्तित्वात् इति पृथिवीपदमेतत्पृथिवीपरम् । इदम्पदपृथिवीपदयोः कर्मधारयो वा अभिमतः ।

न च - **स्वसमानाधिकरणा**भावाप्रतियोगित्वम् अनवच्छिन्नवृत्तिकत्वं वा व्याप्यवृत्तित्वम्, न तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम् । तच्च न द्वित्वादिसाधारणमिति पृथिवीपदस्य पृथिवीसामान्यपरत्वेऽपि न क्षतिरिति - वाच्यम् ।

एतदतिव्याप्तिवारणानुरोधेन अत्यन्ताभावघटितव्याप्यवृत्तित्वस्यैव निवेशयितुम् उचितत्वात् । 'एतद्रूपात्यन्ताभाववान् मेयत्वात्' इत्यादौ एतद्रूपात्मकाभावस्य लक्षणाघटकत्वे अतिव्याप्त्या-

-पत्या प्राचीनमते अत्यन्ताभावघटितव्याप्यवृत्तित्वनिवेशस्य आवश्यकत्वाच्च। अत एव च अग्रेतनं रूपादिघटितत्वेन इत्यपि साधु-संगच्छते। पार्थिवरूपमात्रस्यैव अनित्यतया अत्यन्ताभावघटित-व्याप्यवृत्तित्वानिवेशे तदसाङ्कर्यापत्तेः।

'पृथिवीवृत्ति' इत्यत्र वृत्तिः समवायेन बोध्या। तेन स्पर्शादेः कालिकसंबन्धेन पृथिवीवृत्तित्वेऽपि न क्षतिः। पृथिवीसमवेतत्वावच्छिन्नाभावः गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे अप्रसिद्धः। पृथिवीसमवेतत्वाद्यवच्छिन्नत्वेन अभिमतायां प्रतियोगितायां केवल-समवेतत्वस्यैव अवच्छेदकत्वसंभवेन पृथिवीसमवेतत्वस्य अभाव-प्रतियोगितानवच्छेदकत्वात्।

न च - पृथिवीसमवेतत्वावच्छिन्नाया जलत्वादिव्यावृत्तप्रति-योगितायाः अतिप्रसक्तसमवेतत्वे न अवच्छेदकत्वसंभव इति—वाच्यम्।

समवेतत्वावच्छिन्नप्रतियोगितातः अतिरिक्तायाः जलत्वादि-व्यावृत्तप्रतियोगिताया एव अप्रसिद्धेः। गुरुधर्मस्य अभाव-प्रतियोगितावच्छेदकत्वेऽपि पृथिवीसमवेतत्वावच्छिन्नाभावसाध्यके नातिव्याप्तिसंभवः। तादृशाभावस्य समवेतत्वावच्छिन्नाभावसम-नियततया तदभिन्नत्वेन समवेतमात्रस्यैव तदभावतया वायुत्वादेरपि तथात्वात्।

न च—पृथिवीसमवेतत्वविशिष्टाभाववति जलादौ समवेत-त्वावच्छिन्नाभावविरहात् न तयोः समनैयत्यम्। एवं च गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वमतेऽपि पृथिवीसमवेतत्वस्य तादृश-विशिष्टाभावप्रतियोगितावच्छेदकत्वम् आवश्यकम्। समवेतत्व-विशिष्टवति जलादौ तत्सत्त्वेन तन्मात्रस्य तत्प्रतियोगितावच्छेदक-त्वासंभवात् इति—वाच्यम्।

विशिष्टाभावस्य साध्यत्वे तस्य वायुसाधारणतया सद्धेतुत्व-प्रसङ्गेन पृथिवीसमवेतत्वोपलक्षिताभावस्यैव अत्र साध्यतया उपगन्तव्यत्वात् इति गुणपदोपादानम् । पृथिवीसमवेतगुणत्वावच्छिन्नाभावो गुणादिसाधारणत्वात् न समवेतत्वावच्छिन्नाभाव-समनियत इति न उक्तदोषावसरः ।

ध्वंसप्रागभावावच्छिन्ने सामान्याभावमुपगच्छतो वाय्वादे-रपि उत्पत्तिकालावच्छेदेन पृथिवीवृत्तिगुणसामान्याभाववत्त्वात् तत्साध्यको वायुत्वादिः सद्धेतुरेव इत्यतः नातिव्याप्तिसंभव इत्यतः साध्यान्तरमाह—सत्तान्येति । सत्तान्यत्वनिवेशनप्रयोजनं पूर्ववत् । वायुत्वादेरपि समवेताभावाभावत्वात् पृथिवीति । अत्र पृथिवीपदं पृथिवीसामान्यपरमेव । घटवायुद्वित्वादेः स्वसमानाधिकरणात्य-न्ताभावप्रतियोगित्वेन व्याप्यवृत्तित्वविशेषणव्यावर्त्यत्वात् । रूपादि-घटितत्वेन इत्यत्र रूपपदोपादानं प्राचीनमताभिप्रायेण पूर्वसाध्य-मभिप्रेत्य । हेतौ साध्यसामानाधिकरण्यविशेषणे च वायुत्वेऽति-व्याप्तिः । अतो द्वितीयहेत्वनुसरणम् ।

विवरणम्

एतत्स्थलं परित्यज्य किं च इत्यादिना स्थलान्तरानुधावने बीजमाह - **विशिष्टस्यातिरिक्तत्वेनेत्यादिना** [पृ. 675] । 'विशिष्टं शुद्धात् अतिरिक्तम्' इति स्वीकारे उक्तस्थले नातिव्याप्तिः । साध्यतावच्छेदकस्य पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वस्य विशिष्टद्र-व्यत्वे सत्त्वात् द्रव्यत्वाभावीयप्रतियोगितायास्तु शुद्धद्रव्यत्वे सत्त्वात् विशिष्टशुद्धयोः अतिरेकात् साध्यतावच्छेदकसमनियत-प्रतियोगिताकः शुद्धद्रव्यत्वाभावो न भवति । किन्तु पृथिव्यन्य-त्वविशिष्टद्रव्यत्वाभाव एव । तत्कूटाधिकरणं पृथिवी । तद्वृत्ति-त्वमेव द्रव्यत्वेऽस्तीति नातिव्याप्तिः ।

अथ वा व्याप्यत्वदले साध्यतावच्छेदके प्रतियोगिताव्यापकत्वस्थाने प्रतियोगित्वावच्छिन्नव्यापकतावच्छेदकत्वं निवेश्यते। प्रतियोगित्वावच्छिन्नव्यापकतावच्छेदकत्वं च प्रतियोगित्वावच्छिन्नाधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकत्वम् । शुद्धद्रव्यत्वाभावीयप्रतियोगितावच्छिन्नं यत् द्रव्यत्वं तदधिकरणपृथिवीनिष्ठः यः पृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावः तत्प्रतियोगितावच्छेदकत्वमेव पृथिव्यन्यत्वविशिष्टद्रव्यत्वस्वरूपे साध्यतावच्छेदकेऽस्ति इति व्याप्यत्वदलविरहात् द्रव्यत्वाभावस्य न लक्षणघटकता । किन्तु पृथिव्यन्यत्वविशिष्टद्रव्यत्वाभाव एव लक्षणघटक इति नातिव्याप्तिः । एवञ्च—

वृत्तिमद्वृत्तयः यावन्तः प्रतियोगित्वावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदकव्यापकप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावाः तद्वत्त्वं व्याप्तिः ।

अतः न कोऽपि दोष इत्याशङ्क्य 'किञ्च' इत्यादिना दूषणान्तरमाह इत्यर्थः ।

अत्र यद्यपि साध्यतावच्छेदके प्रतियोगित्वावच्छिन्नव्यापकतावच्छेदकत्वनिवेशे 'पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यत्र विशिष्टाभावोऽपि न लक्षणघटकः । विशिष्टाभावीयप्रतियोगितायाः विशेष्यमात्रपर्याप्तत्वात् । साध्यतावच्छेदकस्य प्रतियोगिताश्रयद्रव्यत्वव्यापकतानवच्छेदकत्वेन प्रतियोगित्वाप्रसिद्ध्यैव नातिव्याप्तिरित्युक्तौ तु तुल्यन्यायेन 'पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् जलत्वात्' इत्यत्र सद्धेतौ अप्रसिद्ध्या अव्याप्तिः, तथापि विशिष्टाभावीयप्रतियोगिता वैशिष्ट्यान्तर्भावेन पर्याप्ता इत्याशयेन एवमुक्तम् ।

'विशेष्यमात्रपर्याप्ता' इति पक्षे तु प्रतियोगितावच्छेदक-विशिष्टव्यापकतावच्छेदकत्वं साध्यतावच्छेदके निवेश्य विशिष्ट-द्रव्यत्वाभावस्य सद्धेतौ असद्धेतौ च लक्षणघटकत्वं संपादनीयम् ।

किञ्च इत्यादिना दीधितौ 'रूपसामान्याभाववान् वायुत्वात्' इत्यत्र कूटघटितलक्षणस्य अप्रसिद्धिनिबन्धना अव्याप्तिः उच्यते । तथा हि - यत्र यत्र वायुत्वम्, तत्र रूपसामान्याभावसत्त्वात् अयं सद्धेतुः । अत्र साध्यतावच्छेदकं रूपसामान्याभावत्वम् । तत्सम-नियतप्रतियोगिताकाभावः रूपसामान्याभावाभावः नीलपीतादि-निखिलरूपात्मकः । तत्समुदायाधिकरणम् एकम् अप्रसिद्धम् । नीलपीतादिसकलरूपाणां एकत्र असत्त्वात् इति साध्याभावकूटाधि-करणाप्रसिद्ध्या अव्याप्तिरिति भावः ।

यावतामैकाधिकरण्यं सम्भवति [पृ. 675] इत्यादिना उक्ताव्याप्तेः उद्धारमाशङ्क्य स्थलान्तरे अव्याप्तिरूपं दूषणमुक्तं दीधितौ । यावताम् अभावानाम् ऐकाधिकरण्यम् - एकाधिकरण-वृत्तित्वं संभवति तावतामभावानां समुदायः विवक्षितः । तथा च संभवदैकाधिकरण्यकसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभाव-कूटाधिकरणवृत्तित्वाभावाः यावन्तः तद्वत्त्वं लक्षणं विवक्षितम् । 'रूपसामान्याभाववान् वायुत्वात्' इत्यत्र रूपाभावत्वसमनियत-प्रतियोगिताकानां समानाधिकरणधर्मावच्छिन्नसाध्याभावानां निखिलरूपात्मकानाम् एकाधिकरणवृत्तित्वं न संभवतीति कृत्वा नीलादि - एकरूपात्मकसमानाधिकरणधर्मावच्छिन्नसाध्याभावसा-ध्यनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावयोःनीलघटादि-एकाधिकरणवृत्तित्वं संभवतीति तादृशाभावद्वयकूटं साध्याभाव-कूटपदेन गृहीत्वा तदधिकरणं यत् नीलघटादि तद्वृत्तित्वाभावस्य वायुत्वरूपहेतौ सत्त्वात् लक्षणसमन्वयः कार्यं इति शङ्कितुराशयः । तदाह गादाधर्यम्—तथा च प्रकृतेत्यादिना [पृ. 675] ।

किन्तु एकैकरूपेति [पृ. 675]। नीलरूपात्मकः यः समानाधिकरणधर्मावच्छिन्नसाध्याभावः, यश्च घटत्वेन रूपाभावाभावः एतत्कूटम्। पीतरूप - व्यधिकरणधर्मावच्छिन्नसाध्याभावयोश्च कूटम् इत्येवं एकैकरूप-व्यधिकरणधर्मावच्छिन्नाभाव-उभयघटितकूटानि साध्याभावकूटपदेन ग्राह्याणि। प्रत्येकं तादृशकूटानाम् अधिकरणं प्रत्येकरूपवद्वस्तु प्रसिद्धमिति न अप्रसिद्धिनिबन्धनाव्याप्तेः अवकाश इति भावः।

यावतामेकाधिकरण्यं संभवति तावतां समुदाय इति विवक्षायामपि 'इदं पृथिवीवृत्तिगुणशून्यम् वायुत्वात्' इत्यत्र 'इदं सत्तान्यपृथिवीवृत्तिशून्यम् वायुत्वात्' इत्यत्र च अतिव्याप्तिः। तथा हि—आद्ये पृथिवीवृत्तिगुणशून्यत्वरूपसाध्यं वायौ नास्ति। पृथिवीवृत्तेः पृथिवीवायुद्वित्वस्य पृथिवीवायुसंयोगस्य च गुणस्य वायौ सत्त्वात्। अतः साध्याभाववति वायौ वायुत्वसत्त्वात् अयं हेतुः व्यभिचारी।

अत्र समानाधिकरणधर्मावच्छिन्नसाध्याभावः पृथिवीवृत्तिगुणाभावाभावः पृथिवीवृत्तिगुणस्वरूपः। पृथिवीवृत्तिगुणः रूपमपि भवति। तथा च रूपात्मकः यः समानाधिकरणधर्मावच्छिन्नसाध्याभावः यश्च घटत्वादिना व्यधिकरणधर्मेण पृथिवीवृत्तिगुणाभावाभावः उभयोः घटादिरूपैकाधिकरणवृत्तित्वं सम्भवतीति रूपघटितकूटाधिकरणे रूपवति पदार्थे वायुत्वरूपहेतोरवृत्त्या अतिव्याप्तिरिति भावः।

गुणसामान्याभावस्यैव साध्यत्वमस्तु। किं पृथिवीवृत्तिगुणाभावस्य साध्यत्वानुसरणेन इत्यत्राह—गुणसामान्याभावस्य साध्यत्वे इति [पृ. 676]। गुणसामान्याभावः यदि साध्यः स्यात् तर्हि साध्याभावः गुणात्मकः वायुगतस्पर्शादिरपि। तद्घटितकूटाधिकरणं वायुः। तद्वृत्तित्वाभावस्य यावदन्तर्गतस्य वायुत्वेऽभावात्

अतिव्याप्तिः न प्रसजतीत्यालोच्य गुणसामान्याभावस्य साध्यत्व-मुपेक्ष्य पृथिवीवृत्तिगुणसामान्याभावस्य साध्यत्वानुसरणम् । तथा सति साध्याभावः पृथिवीवृत्तिगुणात्मकः । वायवीयस्पर्शस्तु न पृथिवीवृत्तिगुण इति वायवीयस्पर्शघटितसमुदायः ग्रहीतुं न शक्यते । किन्तु पृथिवीवृत्तिरूपादिगुणघटितसमुदाय एव ग्राह्यः । तदधिकरणपृथिवीवृत्तित्वाभावस्य वायुत्वे सत्त्वात् अतिव्याप्तिरिति भावः ।

अथ साध्यघटकं पृथिवीपदं एतत्पृथिवीपरम् इति वक्तु-मारभते - घटतद्वायुद्वित्वेत्यादिना । [पृ. 676] पृथिवीपदं पृथिवी-व्यक्तिविशेषपरं यदि न स्यात् तदा घट-तद्वायुद्वित्व - पटतद्वायुद्वित्व-कुड्य - तद्वायुद्वित्वान्यपि घटपटकुड्यरूपपृथिवीवृत्तिगुणाः । ते च साध्याभावरूपाः । तेषां द्वित्वानाम् एकस्मिन् वायौ सामाना-धिकरण्यं संभवतीति तादृशद्वित्वरूपाणां साध्याभावानां समुदायस्य अधिकरणं तद्वायुः । तद्वृत्तित्वमेव वायुत्वेऽस्तीति अतिव्याप्तिः न प्रसज्यते । पृथिवीपदस्य एतत्पृथिवीपरत्वे तु एतद्घटतद्वायुद्वित्वम्, एतद्घटवृत्तिरूपादिकं च एतत्पृथिवीवृत्तिगुणपदेन ग्रहीतुं शक्यन्ते । न तु पटतद्वायुद्वित्वादिकम् । तेषाम् एतद्घटवृत्तित्वाभावात् । तथा च एतत्पृथिवीवृत्तिगुणात्मकाः संभवदेकाधिकरण्यकाः साध्याभावाः एतद्घट-तद्वायुद्वित्व-एतद्घटवृत्तिरूपादयः । तेषाम् एतद्घटे सामा-नाधिकरण्यसंभवात् । तत्समुदायाधिकरणम् एतद्घट एव । न तु तद्वायुः । तत्र एतद्घटरूपाभावात् । तथा च साध्याभावसमुदा-याधिकरणम् एतद्घटः । तद्वृत्तित्वाभावः वायुत्वेऽस्तीति अतिव्याप्ति-प्रसक्तिरिति भावः । एकाधिकरणवृत्तित्वसूचनाय 'वायुः' इत्यनुक्त्वा 'तद्वायुः' इत्युक्तम् ।

पृथिवीपदस्य एतत्पृथिवीपरत्वाभावेऽपि अतिव्याप्तिसंभवं शङ्कते—न च द्वित्वादिरूपसाध्याभावस्येति [पृ. 676] । पृथिवी-

वृत्तिगुणपदेन घटतद्वायुद्वित्वादिकं ग्रहीतुं न शक्यते। साध्याभावे व्याप्यवृत्तित्वविशेषणस्य अव्याप्यवृत्तिसाध्यकसद्धेतौ अव्याप्तिवारणाय आवश्यकत्वात् घटतद्वायुद्वित्वस्य व्याप्यवृत्तित्वविरहात्। घटतद्वायुद्वित्वं हि उत्पत्तिकालावच्छेदेन घटे-तद्वायौ च नास्ति इति कालिकाव्याप्यवृत्ति। अतः व्याप्यवृत्तित्वविशिष्टः साध्याभावः पार्थिवपरमाण्वेकत्वादिकमेव। तदधिकरणं पार्थिवपरमाणुः। तद्वृत्तित्वाभावस्य वायुत्वे सत्त्वात् अतिव्याप्तिः संभवति। अतः पृथिवीपदम् एतत्पृथिवीपरमिति किमर्थं वक्तव्यमिति शङ्का।

समाधत्ते—**प्राचीनमते** [पृ. 676] इति। प्राचीनमते ध्वंसप्रागभावाधिकरणे अत्यन्ताभावः नाङ्गीक्रियते। द्वित्ववति घटे वायौ च उत्पत्तिकालावच्छेदेन द्वित्वप्रागभावः वर्तते। अतः तेन विरोधात् द्वित्वात्यन्ताभावो नास्तीति स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपम् अव्याप्यवृत्तित्वं नास्तीति तदप्रतियोगित्वरूपं व्याप्यवृत्तित्वं वर्तते। अतः व्याप्यवृत्तित्वविशिष्टसाध्याभावपदेन घट-तद्वायुद्वित्वादीनामपि ग्रहीतुं शक्यतया नातिव्याप्तिः संभवतीति पृथिवीपदम् एतत्पृथिवीपरं वाच्यम् इति भावः।

इदंपदपृथिवीपदयोरिति [पृ. 676]। 'इदं पृथिवीवृत्तिगुणशून्यम्' इति दीधितौ 'इदम्' इति न पक्षवाचकं व्यस्तं पदम्। किन्तु साध्यघटकपृथिवीपदेन समस्तम् 'इदं' पदम्। इयं च सा पृथिवी च इदंपृथिवीति कर्मधारयसमासः। इदंपृथिव्यां वृत्तिः यस्य सः इदंपृथिवीवृत्तिः। इदंपृथिवीवृत्तिश्चासौ गुणश्च इदंपृथिवीवृत्तिगुणः तेन शून्यम् इदंपृथिवीवृत्तिगुणशून्यम्। तथा च इदंपृथिवीवृत्तिपदेन एतत्पृथिवीवृत्तित्वं लक्षणां विनैव लभ्यतेऽस्मिन् पक्षे। परन्तु 'इद' मिति पक्षवाचकं पदान्तरम् अस्मिन्

पक्षेऽध्याहर्तव्यम् । पूर्वस्मिन् पक्षे 'इद'मिति पक्षवाचकम् । पृथिवी-पदस्य एतत्पृथिव्यां लक्षणा इति विशेषः ।

न च स्वसमानाधिकरणेति [पृ. 676] । स्वाधिकरण-वृत्त्यभावाप्रतियोगित्वं व्याप्यवृत्तित्वम् । न तु स्वसमानाधिकरणा-त्यन्ताभावाप्रतियोगित्वम् । घट-तद्वायुद्वित्वस्य स्वसमानाधिकरण-प्रागभावप्रतियोगित्वात् स्वसमानाधिकरणाभावाप्रतियोगित्वरूपं व्याप्यवृत्तित्वं नास्ति इति न तत् साध्याभावपदेन ग्रहीतुं शक्यम् । किन्तु पार्थिवपरमाण्वेकत्वादिकमेव इति पृथिवीपदस्य एतत्पृथिवी-परत्वाभावेऽपि अतिव्याप्तिः संभवतीति शङ्का ।

तत्समाधानं तु पार्थिवपरमाण्वेकत्वमादाय प्रसक्तायाः अतिव्याप्तेः वारणार्थमेव अत्यन्ताभावघटितव्याप्यवृत्तित्वमेव निवेशयितुम् उचितम् । तथा च प्राचीनमतानुसारेण अतिव्याप्त्य-संभवात् तत्संभवार्थम् एतत्पृथिवीपदम् इति अवश्यं वाच्यम् इति ।

किञ्च 'एतद्रूपात्यन्ताभाववान् प्रमेयत्वात्' इत्यत्र व्यभि-चारिणि एतद्रूपात्मकः यः साध्याभावः तस्य उत्पत्तिकालावच्छेदेन स्वसमानाधिकरणः यः एतद्रूपप्रागभावः तत्प्रतियोगित्वात् स्वसमा-नाधिकरणाभावाप्रतियोगित्वरूपव्याप्यवृत्तित्वविरहात् लक्षण-घटकत्वं न स्यात् । किन्तु व्यधिकरणधर्मावच्छिन्नसाध्याभाव-मादाय अतिव्याप्तिः स्यात् । तद्वारणाय प्राचीनमतेऽपि स्वसमा-नाधिकरणात्यन्ताभावाप्रतियोगित्वमेव व्याप्यवृत्तित्वम् । तथा च घटतद्वायुद्वित्वादिकूटमादाय अतिव्याप्तेरप्रसक्त्या पृथिवीपदम् एतत्पृथिवीपरमेव इति भावः ।

अत एव चेति [पृ. 677] । अत्यन्ताभावघटितव्याप्यवृत्ति-त्वनिवेशस्य आवश्यकत्वादेव इत्यर्थः । **पार्थिवरूपमात्रस्यैव अनित्यतया इति** [पृ. 677] । पृथिवीवृत्तिरूपं सर्वं पाकजत्वात्

अनित्यम् । अतः तस्य स्वसमानाधिकरणप्रागभावप्रतियोगित्वं वा तादृशध्वंसप्रतियोगित्वं वा अनिवार्यमिति स्वसमानाधिकरणाभावाप्रतियोगित्वरूपव्याप्यवृत्तित्वविरहात् रूपस्य साध्याभावसमुदायघटकत्वोक्तिः न संगच्छते । अत्यन्ताभावघटितव्याप्यवृत्तित्वनिवेशे तु प्राचीनमते ध्वंसप्रागभावाधिकरणे अत्यन्ताभावाङ्गीकारात् स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपं व्याप्यवृत्तित्वं पार्थिवरूपस्य सङ्गच्छते इति व्याप्यवृत्तित्वविशिष्टसाध्याभावसमुदाये तस्यापि घटकत्वोक्तिः संगच्छत इति भावः ।

पृथिवीवृत्तीत्यत्र वृत्तिः समवायेन बोध्या [पृ. 677] इति । वायवीयस्पर्शवारणाय हि पृथिवीवृत्ति इति विशेषणं दत्तम् । वायवीयस्पर्शस्यापि कालिकसंबन्धेन पृथिवीवृत्तितया साध्याभावपदेन ग्रहीतुं शक्यतया तत्कूटाधिकरणवायुवृत्तित्वाभावस्य वायुत्वेऽभावात् अतिव्याप्तिः न प्रसजति । अतः वृत्तिः समवायसंबन्धावच्छिन्ना बोध्या । तथा च वायवीयस्पर्शस्य समवायसंबन्धेन पृथिवीवृत्तित्वं नास्तीति साध्याभावपदेन तस्य ग्रहीतुमशक्यतया रूपादिकमादाय अतिव्याप्तिः प्रसजतीत्यर्थः । **न क्षतिः** [पृ. 677] इत्यस्य नातिव्याप्त्यप्रसक्तिरित्यर्थः ।

साध्ये गुणपदस्य प्रयोजनं वक्तुमारभते - **पृथिवीसमवेतत्वावच्छिन्नाभाव** [पृ. 677] इत्यादिना । तथा च साध्ये गुणपदानुपादाने 'पृथिवीसमवेतशून्यम्, वायुत्वात्' इति स्थलविवक्षायां पृथिवीसमवेतत्वावच्छिन्नाभावः साध्यः । स चाप्रसिद्धः । गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वेन समवेतत्वरूपलघुधर्मापेक्षया गुरुधर्मस्य पृथिवीसमवेतत्वस्य गुरुत्वेन प्रतियोगितानवच्छेदकत्वात् पृथिवीसमवेतत्वावच्छिन्नप्रतियोगिताकाभावस्य अप्रसिद्धेः ।

न च—पृथिवीसमवेतत्वावच्छिन्ना प्रतियोगिता पृथिवीसमवेते पृथिवीत्वादावेव वर्तते । समवेतत्वं तु पृथिवीसमवेतत्वावच्छिन्न-

प्रतियोगिताशून्ये जलत्वादावपि वर्तते। तथा च प्रतियोगिताशून्यवृत्तित्वेन अतिप्रसक्तस्य समवेतत्वस्य अवच्छेदकत्वमेव न संभवतीति पृथिवीसमवेतत्वमेव अवच्छेदकं वाच्यम् इति कथं तदवच्छिन्नाभावाप्रसिद्धिरिति—वाच्यम् ।

समवेतसामान्यवृत्तिः या समवेतत्वावच्छिन्ना प्रतियोगिता तदतिरिक्ता जलत्वादौ अविद्यमाना पृथिवीसमवेतत्वावच्छिन्ना प्रतियोगिता नाङ्गीक्रियते। पृथिवीसमवेतस्य पृथिवीत्वस्य समवेतत्वात् तदवच्छिन्नप्रतियोगिताया एव 'पृथिवीसमवेतं नास्ति' इति प्रतीतौ भानसंभवात्। तथा च समवेतत्वावच्छिन्नप्रतियोगितानतिप्रसक्तस्य समवेतत्वस्य अवच्छेदकत्वसंभवेन गुरुधर्मस्य पृथिवीसमवेतत्वस्य अनवच्छेदकतया तदवच्छिन्नाभावाप्रसिद्धिरेव।

किञ्च गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वस्वीकारेऽपि पृथिवीसमवेतत्वावच्छिन्नाभावसाध्यकस्थले अतिव्याप्तिः न संभवति। पृथिवीसमवेतत्वावच्छिन्नाभावः समवेतत्वावच्छिन्नाभावश्च समनियतः। समवेतसामान्याभाववति सामान्यादावेव 'पृथिवीसमवेतं नास्ति' इति प्रतीतेः। तथा च तयोरभावयोः समनियततया प्रकृतसाध्याभावः पृथिवीसमवेताभावाभावः समवेतस्वरूपः। वायुत्वमपि समवेतमिति साध्याभावान्तर्गतम्। तदधिकरणवायुवृत्तित्वस्य वायुत्वे सत्त्वात् कथमतिव्याप्तिः स्यात्।

न च - पृथिवीसमवेतत्वावच्छिन्नाभावः जलादावपि वर्तते। पृथिवीसमवेतत्वोपलक्षितस्य द्रव्यत्वस्य जलादौ सत्त्वेऽपि पृथिवीसमवेतत्वविशिष्टं द्रव्यत्वं जलादौ नास्ति। एवं च पृथिवीसमवेतत्वावच्छिन्नाभाववति जलादौ समवेतत्वावच्छिन्नाभावविरहात् कथं तयोरभावयोः समनियतत्वम्। एवं पृथिवीसमवेतत्वविशिष्टाभावप्रतियोगितावच्छेदकं पृथिवीसमवेतत्वमेव, न तु समवेतत्वम्।

प्रतियोगितावच्छेदकसमवेतत्वविशिष्टजलत्ववति जले विरोधात् 'पृथिवीसमवेतत्वविशिष्टं नास्ति' इति प्रतीतेरनुपपत्तेः इति वाच्यम् ।

यदि पृथिवीसमवेतत्वविशिष्टाभावः साध्यः स्यात् तर्हि तस्य हेतुमति वायावपि सत्त्वेन वायुत्वहेतोः सद्धेतुत्वप्रसङ्गात् अतिव्याप्तिः इति दोषस्य वक्तुमशक्यत्वात् । अतः पृथिवीसमवेतत्वोपलक्षिताभाव एव साध्यम् । हेतुमति वायौ पृथिवीसमवेतत्वोपलक्षितस्य द्रव्यत्वस्य सत्त्वेन उपलक्षिताभावरूपं साध्यं नास्तीति वायुत्वस्य न सद्धेतुत्वम् । साध्याभावस्तु पृथिवीसमवेतत्वोपलक्षितस्वरूपः । तदधिकरणं वायुरपि । तत्र पृथिवीसमवेतत्वोपलक्षितस्य द्रव्यत्वस्य सत्त्वात् वायुवृत्तित्वाभावः हेतौ नास्तीति अतिव्याप्तेरप्रसक्त्या गुणपदोपादानम् । पृथिवीसमवेतत्वोपलक्षितगुणस्तु वायौ नास्तीति पृथिवीसमवेतत्वोपलक्षितगुणात्मकसाध्याभावाधिकरणं पृथिवी एव । तद्वृत्तित्वाभावः वायुत्वेऽस्तीति अतिव्याप्तिः संगच्छत इति भावः ।

ननु पृथिवीसमवेतत्वोपलक्षितगुणत्वावच्छिन्नाभावस्य साध्यत्वेऽपि पृथिवीसमवेतत्वोपलक्षितगुणत्वावच्छिन्नाभावस्य समवेतत्वावच्छिन्नाभावस्य च समनियततया अभिन्नत्वेन समवेतमात्रस्यैव साध्याभावरूपतया वायुत्वादेरपि तथात्वात् कथम् अतिव्याप्तिप्रसक्तिः इत्याशङ्क्य समवेतत्वोपलक्षितगुणत्वावच्छिन्नाभावः निर्गुणे गुणादावपि वर्तते । तत्र तु समवेतत्वावच्छिन्नाभावः नास्ति । समवेतस्य गुणत्वादेः सत्त्वात् । तथा च तयोरभावयोः समनियतत्वमेव नास्ति इति नोक्तदोष इत्याह—**पृथिवीसमवेतगुणत्वावच्छिन्नाभाव इति** [पृ. 678] ।

स्थलान्तरानुधावने बीजमाह—**ध्वंसप्रागभावावच्छिन्ने इति** [पृ. 678] । ध्वंसप्रागभावाधिकरणे अत्यन्ताभावमनभ्युपगच्छतां

प्राचीनानां मते 'इदं पृथिवीवृत्तिगुणशून्यम् वायुत्वात्' इति व्यभिचारिहेतुः। ध्वंसप्रागभावाधिकरणे अत्यन्ताभावमभ्युपगच्छतां नवीनानां मते हेत्वधिकरणे वायौ पृथिवीवृत्तिद्वित्वसंयोगादिगुणात्यन्ताभावस्य उत्पत्तिकालावच्छेदेन सत्त्वात् वायुत्वं सद्धेतुरेव। तत्र लक्षणसत्त्वं न दोषावहम् इत्यतः सत्तान्यपृथिवीवृत्तिशून्यत्वरूपसाध्यान्तरानुसरणम् इति भावः। तथा च हेतुमति वायौ सत्तान्यस्य पृथिवीवृत्तिद्रव्यत्वस्य सत्त्वात् सत्तान्यपृथिवीवृत्तिशून्यत्वरूपं साध्यं नास्तीति वायुत्वहेतुः व्यभिचारी।

अत्र कूटघटितलक्षणस्य अतिव्याप्तिः उच्यते दीधितौ। तथा हि—सत्तान्यत्वविशिष्ट-पृथिवीसमवेतत्वावच्छिन्नाभावः साध्यः। साध्याभावः सत्तान्यपृथिवीसमवेताभावाभावः सत्तान्यपृथिवीसमवेतस्वरूपः। सत्तान्यपृथिवीसमवेतं च द्रव्यत्वपृथिवीत्वादिकम्। पृथिव्यन्तर्भावेण तेषाम् ऐकाधिकरण्यसंभवात्। तथा च पृथिवीत्वादिघटिततादृशसाध्याभावसमुदायाधिकरणं पृथिव्यादिकमेव। तद्वृत्तित्वाभावः वायुत्वेऽस्तीति अतिव्याप्तिः। साध्ये सत्तान्यत्वानिवेशे पृथिवीसमवेत-सत्ताघटित-सत्ताद्रव्यत्वादिसमुदायः साध्याभावसमुदायपदेन गृहीत्वा तद्वद्वायुवृत्तित्वस्यैव वायुत्वे सत्त्वात् अतिव्याप्तिर्न संभवतीति अतिव्याप्तिसंघटनाय सत्तान्यत्वनिवेशः। तन्निवेशे सत्तान्यपृथिवीसमवेतपदेन द्रव्यत्वपृथिवीत्वसमुदायः गृह्यते। तद्वत्पृथिवीवृत्तित्वाभावस्य वायुत्वे सत्त्वात् अतिव्याप्तिः संभवतीति भावः।

साध्ये पृथिवीपदस्य प्रयोजनमाह—**वायुत्वादेरपीति** [पृ. 678]। पृथिवीपदानुपादाने सत्तान्यसमवेतशून्यत्वं साध्यम्। साध्याभावः सत्तान्यसमवेतशून्यत्वाभावः सत्तान्यसमवेतस्वरूपः। सत्तान्यसमवेतं च वायुत्वमपीति तद्घटित-कूटाधिकरणवायुवृत्तित्वात् हेतोः तद्वृत्तित्वाभावः नास्तीति अतिव्याप्तेः अप्रसक्त्या

साध्ये पृथिवीपदोपादानम् । तथा च साध्याभावः सत्तान्यपृथिवीसमवेताभावाभावः सत्तान्यपृथिवीसमवेतस्वरूपः । वायुत्वं तु पृथिवीसमवेतं न भवतीति साध्याभावपदेन ग्रहीतुं न शक्यते । किन्तु पृथिवीत्वद्रव्यत्वादिकमेव साध्याभावः । तत्कूटाधिकरणपृथिवीवृत्तित्वाभावस्य वायुत्वे सत्त्वात् अतिव्याप्तिरिति भावः ।

अत्र पृथिवीपदमिति [पृ. 678] । द्वितीयसाध्ये पृथिवीपदं पृथिवीसामान्यपरम् । न तु एतत्पृथिवीपरम् ।

न च—पृथिवीसामान्यपरत्वे सत्तान्यपृथिवीसमवेतपदेन घटतद्वायुद्वित्व-पटतद्वायुद्वित्वादिकं गृहीत्वा तत्कूटाधिकरणवायुवृत्तित्वस्यैव हेतोः सत्त्वेन कथमतिव्याप्तिप्रसक्तिः इति—वाच्यम् ।

ध्वंसप्रागभावाधिकरणे अत्यन्ताभावाङ्गीकर्तृनवीनमतानुसारेण एतत्साध्यानुसरणात् घटतद्वायुद्वित्वादेः उत्पत्तिकालावच्छेदेन स्वसमानाधिकरणः यःअत्यन्ताभावः तत्प्रतियोगित्वेन स्वसमावाधिकरणात्यन्ताभावाप्रतियोगित्वरूपव्याप्यवृत्तित्वविरहेण लक्षणाघटकत्वात् ।

ननु रूपादेरपि स्वसमावाधिकरणात्यन्ताभावप्रतियोगित्वेन व्याप्यवृत्तित्वविरहात् कथं लक्षणघटकत्वम् इत्याशङ्क्य प्राचीनमतानुसारेण तस्य व्याप्यवृत्तित्वात प्राचीनमतानुसारिपूर्वसाध्यकस्थले तस्य लक्षणघटकत्वम्, न तु सत्तान्यपृथिवीसमवेतशून्यत्वसाध्यकस्थले इत्याह—**रूपादिघटितत्वेनेत्यत्र** [पृ. 678] इति ।

वायुत्वादिति हेतुं परित्यज्य **रूपवदन्यत्वाद्वा** इति हेत्वन्तरानुसरणं किमर्थमित्यत्र आह - **हेताविति** [पृ.678] । अस्मिन् कूटघटितलक्षणे हेतौ साध्यसामानाधिकरण्यं विशेषणं देयमिति वक्ष्यति । वायुत्वहेतौ तु साध्यसामानाधिकरण्यं नास्ति । वायौ पूर्वोक्तरीत्या साध्यस्याभावात् । तथा च अतिव्याप्तिः न संभवति

इत्यालोच्य अतिव्याप्तिसंपादनार्थं हेत्वन्तरानुसरणम् । रूपवदन्यत्वस्य हेतुत्वे स हेतुः गुणादावपि वर्तते । तत्र च सत्तान्यपृथिवीसमवेतशून्यत्वरूपसाध्यमप्यस्ति । गुणादौ सत्तान्यस्य पृथिवीसमवेतस्य कस्याप्यभावात् । अतः रूपवदन्यत्वस्य गुणाद्यन्तर्भावेण साध्यसामानाधिकरण्यमस्ति । पूर्वोक्तरीत्या साध्याभावकूटाधिकरणवृत्तित्वाभावोऽप्यस्ति इति अतिव्याप्तेः प्रसक्तिरिति भावः ।

दीधितिः

वस्तुतो निखिलानामेव रूपाणां तादृशाभावसहस्रसमानाधिकरणत्वात् समानाधिकरणयावदभावाधिकरणप्रसिद्धिः दुर्वारैवेति ।

गादाधरी

[यावतामेकाधिकरणं संभवतीति विवक्षायामपि
'रूपाभाववान् वायुत्वात्' इत्यत्र अव्याप्तिः इत्युपपादनम्]

ननु समनियताभावैक्यमते सत्तान्यपृथिवीसमवेतत्वावच्छिन्नाभावस्य सत्तान्यद्रव्यसमवेतत्वावच्छिन्नाभावाभिन्नतया विभुसमवेतपृथिवीसमवेतत्वावच्छिन्नाभावस्य च विभुसमवेतस्पर्शवत्समवेतत्वावच्छिन्नाभावाभिन्नतया वायुत्वादिरपि तदभाव इति न तादृशाभावसाध्यके अतिव्याप्तिः संभवतीति पूर्वोक्तायाः 'रूपाभाववान् वायुत्वात्' इत्यत्र अव्याप्तेरेव उक्तविवक्षायां दुर्वारतामाह—वस्तुत इति [पृ. 690] ।

विवरणम्

वस्तुतः इति दीधितिमवतारयति—ननु समनियताभावैक्यमते इत्यादिना [पृ. 690] । 'सत्तान्यपृथिवीसमवेतशून्यम् वायुत्वात्' इत्यत्र अतिव्याप्तिः न संभवति । तथा हि—अत्र साध्यं सत्तान्यपृथिवीसमवेतत्वावच्छिन्नाभावः । स च सत्तान्यद्रव्यसमवेतत्वावच्छिन्नाभावाभिन्नः । गुणादावेव सत्तान्यपृथिवीसमवेतसामान्याभावस्य सत्वात् तत्र सत्तान्यद्रव्यसमवेतसामान्याभाव-

स्यापि सत्त्वेन उभयोरप्यभावयोः समनियतत्वात् । तथा च सत्तान्यपृथिवीसमवेतसामान्याभावस्य सत्तान्यपृथिवीसमवेतं यथा प्रतियोगि तथा सत्तान्यद्रव्यसमवेतमपि प्रतियोगि । अतश्च सत्तान्यपृथिवीसमवेतसामान्याभावाभावः सत्तान्यपृथिवीसमवेतस्वरूप इव सत्तान्यद्रव्यसमवेतस्वरूपोऽपि । द्वितीयाभावस्य प्रथमाभावप्रतियोगिस्वरूपत्वात् । एवञ्च प्रकृतसाध्याभावः सत्तान्यद्रव्यसमवेतस्वरूपोऽपि इति फलितम् । वायुत्वं च सत्तान्यत् वायुरूपद्रव्यसमवेतं च इति वायुत्वमपि साध्याभावः । तद्घटितकूटाधिकरणवायुवृत्तित्वस्यैव वायुत्वे सत्त्वात् कथम् अतिव्याप्तिरित्याशङ्क्य ईदृशातिव्याप्तिं परित्यज्य 'रूपसामान्याभाववान् वायुत्वात्' इत्यत्र पूर्वोक्तामेव अव्याप्तिं यावतामैकाधिकरण्यं संभवति तावता समुदाये विवक्षितेऽपि समर्थयितुं वस्तुतः इत्यादि दीधितिग्रन्थः प्रवृत्त इति भावः ।

ननु 'सत्तान्यपृथिवीसमवेतशून्यं वायुत्वात्' इत्यत्र अतिव्याप्तिवारणसंभवेऽपि 'विभ्वसमवेतपृथिवीसमवेतशून्यम्, वायुत्वात्' इत्यत्र अतिव्याप्तिर्दुवारा । वायुत्वस्य विभ्वसमवेतत्वेऽपि पृथिवीसमवेतत्वविरहेण साध्याभावपदेन ग्रहीतुमशक्यत्वात् मूर्तत्वपृथिवीत्वादेरेव विभ्वसमवेतत्वात् पृथिवीसमवेतत्वाच्च मूर्तत्वपृथिवीत्वघटितसाध्याभावसमुदायाधिकरणपृथिवीवृत्तित्वाभावस्य वायुत्वे सत्त्वात् इत्याशङ्कां निराकरोति-विभ्वसमवेतेति [पृ.690] । तथा च विभ्वसमवेतपृथिवीसमवेतत्वावच्छिन्नाभावः यत्रास्ति आकाशादिचतुष्टये, तत्रैव विभ्वसमवेतस्पर्शवत्समवेतत्वावच्छिन्नाभावोऽपि अस्ति । तथा च उभयोरपि अभावयोः ऐक्यात् विभ्वसमवेतस्पर्शवत्समवेतमपि तत्र साध्याभावः । वायुत्वमपि विभ्वसमवेतं स्पर्शवत्समवेतं चेति साध्याभावपदेन ग्रहीतुं शक्यते । तद्घटितकूटाधिकरणवायुवृत्तित्वाभावस्य वायुत्वेऽभावात् तत्रापि अतिव्याप्तिः न संभवतीति भावः ।

गादाधरी

अत्रायमाशयः - यावतामैकाधिकरण्यं तावत्समुदायाधिकरणमित्यस्य यत्किंचिदधिकरणवृत्तिसकलसाध्याभावाधिकरणत्वं यत्किंचिदधिकरणवृत्तिसाध्याभावत्वव्यापकाधेयताकत्वपर्यवसितमर्थः। साध्याभावाधिकरणाधिकरणक सकलसाध्याभावाधिकरणत्वं साध्याभावसमानाधिकरणसाध्याभावत्व व्यापकाधेयत्वकत्वपर्यवसितं वा ।

आद्ये व्यभिचारिमात्रेऽतिव्याप्तिः । जगत एव साध्यवद्यत्किंचिदधिकरणवृत्तिसकलसाध्याभाववत्त्वादिति समुदायोपादानस्य अकिंचित्करतया तद्विवक्षणासंभवः ।

द्वितीये च—साध्याभावसमानाधिकरणसाध्याभावत्वमुक्तस्थले निखिलरूपाणामेव अक्षतमिति तादृशसाध्याभावत्वव्यापिका न केनाप्यधिकरणेन निरूपिताधेयता इति तादृशाधिकरणाप्रसिद्धिः तदवस्थैवेति ।

विवरणम्

अत्रायमाशय [पृ. 692] इत्यादिना । यावतामैकाधिकरण्यं संभवति तावतां समुदाये विवक्षितेऽपि 'रूपसामान्याभाववान् वायुत्वात्' इत्यत्र साध्याभावसमुदायाधिकरणाप्रसिद्धिनिबन्धना अव्याप्तिः उपपाद्यते । यावताम् ऐकाधिकरण्यं तावत्समुदायाधिकरणम् इत्यस्य आद्योऽर्थः यत्किञ्चिदधिकरणवृत्तिसकलसाध्याभावाधिकरणत्वम् यत्किञ्चिदधिकरणवृत्तिसाध्याभावत्वव्यापकाधेयतानिरूपकत्वपर्यवसितम् । यत्किचिदधिकरणवृत्तित्वविशिष्टसाध्याभावत्वं यत्र यत्र अस्ति, तत्र विद्यमाना यदधिकरणनिरूपिताधेयता तदेव अधिकरणं सम्भवदैकाधिकरण्यकसाध्याभावसमुदायाधिकरणम् इत्यादिना विवक्षितम् इति फलितम् । अस्मिन् पक्षे सर्वत्र व्यभिचारिणि अतिव्याप्तिः प्रसजति ।

'धूमवान् वह्नेः' इत्यादौ यत्किञ्चिदधिकरणम् महानसम् तद्वृत्तित्वविशिष्टसाध्याभावत्वं व्यधिकरणधर्मावच्छिन्नसाध्याभावेषु घटत्वपटत्वादिना धूमाभावेष्वेव वर्तते। तत्र च सकलजगन्निरूपिताधेयत्वमस्तीति यत्किञ्चिदधिकरणवृत्तिसाध्याभावत्वव्यापकाधेयतानिरूपकाधिकरणं जगदेव भवति। तद्वृत्तित्वाभावश्च घटत्वादिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिरिति तद्वत्त्वस्य हेतौ वह्नौ सत्त्वात् अतिव्याप्तिरिति समुदायपदोपादानम् अकिंचित्करं स्यात्। व्यभिचारिणि अतिव्याप्तिवारणाय हि तदुपादानम्। अतः यावतामैकाधिकरण्यम् इत्यस्य उक्तार्थविवक्षा न संभवति।

साध्याभावाधिकरणाधिकरणकसकलसाध्याभावाधिकरणत्वम् [पृ. 692] साध्याभावाधिकरणवृत्तिसाध्याभावत्वव्यापकाधेयतानिरूपकत्वपर्यवसितम् यावतामैकाधिकरण्यं तावत्समुदायाधिकरणम् इत्यस्य द्वितीयोऽर्थः।

अस्मिन्नर्थे 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि यद्यपि अतिव्याप्तिः वारयितुं शक्यते—

तथा हि—साध्याभावः घटत्वेन धूमाभावः। तदधिकरणायोगोलकवृत्तित्वविशिष्टसाध्याभावत्वं घटत्वेन धूमाभावे धूमत्वेन धूमाभावे च वर्तते। तत्र उभयत्र धूमवन्महानसादिनिरूपिताधेयत्वं नास्तीति निर्धूमनिरूपिताधेयत्वमेव साध्याभावसमानाधिकरणसाध्याभावत्वव्यापकम्। तन्निरूपिताधिकरणं निर्धूममेव। तन्निरूपितवृत्तित्वत्वावच्छिन्नाभावः वृत्तिमद्वृत्तिः वह्नौ नास्तीति नातिव्याप्तिः।

तथापि 'रूपसामान्याभाववान् वायुत्वात्' इत्यत्र अव्याप्तिः। तत्र साध्याभावः व्यधिकरणधर्मावच्छिन्नसाध्याभावः - घटत्वेन रूपसामान्याभावाभावः। तदधिकरणवृत्तित्वविशिष्टसाध्याभावत्वं

व्यधिकरणधर्मावच्छिन्नसाध्याभावे निखिलरूपात्मके समानाधिकरणधर्मावच्छिन्नसाध्याभावे चास्ति । सर्वेषामेव रूपाणां प्रत्येकं व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वात् । एवं च साध्याभावसमानाधिकरणसाध्याभावत्वस्य निखिलरूपेषु सत्त्वात् तेषु येन केनाप्यधिकरणेन निरूपिता आधेयता नास्ति । निखिलरूपाणाम् एकाधिकरणे अवृत्तेः इति साध्याभावसमानाधिकरणसाध्याभावत्वव्यापकाधेयतानिरूपकाधिकरणाप्रसिद्ध्या अव्याप्तिः तदवस्थैव इति ।

दीधितिः

किञ्च हेतुतावच्छेदकसंबन्धेन साध्याभाववति या वृत्तिः तदभावो वक्तव्यः ।

गादाधरी

'यावतामेकाधिकरण्यं संभवति' इत्यस्य परिष्कारपूर्वकं 'किञ्च' इत्यस्य ग्रन्थस्य अवतारणम् ।

ननु स्ववृत्तिसाध्याभावत्वव्यापकं यद्यदधिकरणवृत्तित्वं तत्तदधिकरणवृत्तिसाध्याभावत्वव्यापकस्ववृत्तिताकाधिकरणमेव अधिकरणान्तरार्थः । 'धूमवान् वह्नेः' इत्यादौ महानसादिकं न तथा । अयोगोलकवृत्तितायाः तद्वृत्तिसाध्याभावत्वव्यापकत्वात् अयोगोलकवृत्तिसाध्याभावत्वस्य च समानाधिकरणधर्मावच्छिन्नसाध्याभावसाधारणतया तद्वृत्तित्वाव्याप्यत्वात् इति अयोगोलकाद्येव तादृशं स्वम् इति नातिव्याप्तिः । तादृशयत्किंचिदधिकरणह्रदादिवृत्तित्वाभावस्य वह्न्यादौ सत्त्वेऽपि न क्षतिः । तादृशं यद्यत्स्वं तावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशात् । अन्यतमत्वं च तत्तदवृत्तिशून्यत्वम् । न तु तत्तदन्यान्यत्वम् । अतो न केवलान्वयिसाध्यके अप्रसिद्धिः । तादृशं स्वं यद्यत् तत्तदधिकरणवृत्तित्वाभावकूटवत्त्वनिवेशेऽपि केवलान्वयिसाध्यकेऽव्याप्तिः; हेतुमतोऽपि तथात्वात् इति तदुपेक्षितम् । 'रूपसा-

मान्याभाववान् वायुत्वात्' इत्यादौ च सकलरूपवतामेव तथात्वम्, स्ववृत्तिताया एव तत्तद्घटादिवृत्तिसाध्याभावत्वव्यापकत्वात् । अतो नाव्याप्तिः ।

विवरणम्

किञ्च इत्यादि दीधितिग्रन्थम् अवतारयति - ननु स्ववृत्तिसाध्याभावत्वव्यापकम् इत्यादिना [पृ. 694] । यावतामेकाधिकरण्यं सम्भवति तावत्समुदायाधिकरणत्वस्य निखिलसाध्याभावसमानाधिकरणनिखिलसाध्याभावाधिकरणम् इत्यर्थः । 'वस्तुतो निखिलानामेव रूपाणां तादृशाभावसहस्रसमानाधिकरणत्वात्' इति दीधितिस्वारस्यात् । तस्य च एवं परिष्कृतोऽर्थः-स्ववृत्तिसाध्याभावत्वव्यापकं यद्यदधिकरणवृत्तित्वं तत्तदधिकरणवृत्तिसाध्याभावत्वव्यापकस्ववृत्तिताकाधिकरणम् ।

'धूमवान् वह्नेः' इत्यादौ स्वपदेन महानसादिकं ग्रहीतुं न शक्यते । महानसवृत्तिसाध्याभावत्वस्य व्यधिकरणधर्मावच्छिन्नधूमाभावे एव सत्त्वात् तत्र च अयोगोलकवृत्तित्वमप्यस्तीति तादृशायोगोलकवृत्तित्वविशिष्टसाध्याभावत्वस्य समानाधिकरणधर्मावच्छिन्नधूमाभावेऽपि सत्त्वेन तत्र स्वपदग्राह्यमहानसनिरूपितवृत्तित्वविरहात् । अतः धूमशून्यम् अयोगोलकादिकमेव स्वपदार्थः । निर्धूमवृत्तिसाध्याभावत्वव्यापकं निर्धूमवृत्तित्वम् । पुनः तद्वृत्तिसाध्याभावत्वव्यापकं निर्धूमवृत्तित्वमेव । तन्निरूपकाधिकरणं निर्धूमायोगोलकादिकम् । तद्वृत्तित्वाभावस्य हेतौ वह्नौ विरहात् नातिव्याप्तिः ।

अत्र यद्यदधिकरणवृत्तित्वम् [पृ. 694] इत्यत्र यद्यत् इति वीप्साया अनिवेशे स्वपदेन पर्वतमादाय तद्वृत्तिव्यधिकरणधर्मावच्छिन्नसाध्याभावत्वव्यापकं महानसवृत्तित्वं भवति । तद्वृत्तिसाध्याभावत्वव्यापकं पर्वतवृत्तित्वम् इति पर्वतस्य स्वपदार्थत्ववत्

सर्वस्यापि तादृशतया जगत एव साध्याभावकूटवत्त्वात् 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिः स्यात् । अतः वीप्साया निवेशः ।

स्ववृत्तिसाध्याभावत्वव्यापकम् [पृ. 694] इत्यस्य स्थाने स्ववृत्तिसाध्याभावत्वसमानाधिकरणम् इत्युक्तौ 'रूपाभाववान् वायुत्वात्' इत्यत्र अव्याप्तिः । स्वपदेन तद्घटस्य ग्रहणे तद्घट-वृत्तित्वविशिष्टसाध्याभावत्वं तद्घटवृत्तिरूपे यथा अस्ति, तथा घटान्तरवृत्तिरूपेऽप्यस्ति । सर्वेषामेव रूपाणां साध्याभावत्वात् । एवञ्च तद्घटवृत्तित्वविशिष्टसाध्याभावत्वसमानाधिकरणं घटा-न्तरवृत्तित्वमपि । तद्वृत्तित्वविशिष्टसाध्याभावत्वव्यापकत्वं स्ववृत्तित्वे नास्ति । घटान्तरवृत्तिरूपे स्वपदग्राह्यतद्घटवृत्तित्व-विरहात् इति तादृशाधिकरणाप्रसिद्ध्या अव्याप्तिः । अतः स्ववृत्ति-साध्याभावत्वव्यापकमित्युक्तम् । घटान्तरवृत्तित्वे तद्घटवृत्ति-साध्याभावत्वव्यापकत्वविरहात् न दोषः ।

एवमुत्तरत्र **तत्तदधिकरणवृत्तिसाध्याभावत्वव्यापके** [पृ. 694] त्यस्य स्थाने तत्तदधिकरणवृत्तिसाध्याभावत्वसमा-नाधिकरणेति निवेशे 'धूमवान् वह्नेः' इत्यादौ अतिव्याप्तिः । स्वपदग्राह्यमहानसवृत्तिव्यधिकरणधर्मावच्छिन्नसाध्याभावत्वव्या-पकं यद्यदधिकरणवृत्तित्वम्—अयोगोलकवृत्तित्वं तद्वृत्तिसाध्या-भावत्वसमानाधिकरणत्वं स्ववृत्तितायां - महानसवृत्तितायाम् अस्ति । अयोगोलकवृत्तिव्यधिकरणधर्मावच्छिन्नधूमाभावे स्ववृत्तित्वसत्त्वात् । तथा च सर्वस्यापि जगतः साध्याभाव-कूटवत्त्वेन तद्वृत्तित्वाभावस्य वृत्तिमद्वृत्तेः हेतौ सत्त्वात् अतिव्याप्तिः । अतः व्यापकत्वनिवेशः । तन्निवेशे अयोगोलक-वृत्तिसाध्याभावत्वस्य धूमत्वावच्छिन्नधूमाभावेऽपि सत्त्वात् तत्र महानसवृत्तित्वविरहात् महानसवृत्तितायाम् अयोगोलकवृत्ति-साध्याभावत्वव्यापकत्वं नास्तीति स्वपदेन महानसादेः ग्रहीतुम् अशक्यतया अयोगोलकादिकमेव तादृशं स्वमिति नातिव्याप्तिः ।

'रूपसामान्याभाववान् वायुत्वात्' इत्यादौ इत्थं परिष्कृतेऽर्थे स्वीकृते न अप्रसिद्धिनिबन्धना अव्याप्तिः। स्वपदेव रूपवतः तत्तद्घटादेरेव ग्रहीतुं शक्यत्वात्। तद्घटवृत्तिसाध्याभावत्वव्यापकं तद्घटवृत्तित्वम्। पुनः तद्वृत्तिसाध्याभावत्वव्यापकं तद्घटवृत्तित्वम्। तन्निरूपकाधिकरणं तद्घटः। तद्वृत्तित्वाभावः वायुत्वेऽस्तीति नाव्याप्तिरिति भावः।

ननु एवं विवक्षायामपि 'धूमवान् वह्नेः' इत्यत्र स्वपदेन ह्रदं गृहीत्वा तद्वृत्तित्वाभावस्य वह्नौ सत्वात् अतिव्याप्तिरित्याशङ्क्य आह—तादृशयत्किंचिदधिकरणेति [पृ. 694]। तथा च स्ववृत्तिसाध्याभावत्वव्यापकं यद्यदधिकरणवृत्तित्वं तत्तदधिकरणवृत्तिसाध्याभावत्वव्यापकस्ववृत्तितानिरूपकं यद्यत्स्वं तावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकाः यावन्तोऽभावाः वृत्तिमद्वृत्तयः तद्वत्त्वं व्याप्तिरिति लक्षणं विवक्षितम्। यद्यत्स्वम् इत्यनेव अयोगोलकस्यापि ग्रहीतुं शक्यतया अयोगोलकह्रदादिवृत्तित्वत्वसमनियतप्रतियोगिताकस्य निर्धूमवृत्तित्वसामान्याभावस्य वह्नौ अभावात् नातिव्याप्तिरिति भावः।

ननु तावदन्यतमेत्यस्य तावदन्यान्येत्यर्थः। तथा सति केवलान्वयिसाध्यकस्थले सर्वस्यापि जगतः तावत्पदग्राह्यतया तदन्यस्य अप्रसिद्ध्या तदन्यान्यत्वरूपम् अन्यतमत्वम् अप्रसिद्धमित्याशङ्क्य अत्र तावत् अन्यतमत्वं तत्तदधिकरणवृत्तिशून्यत्वम्, न तु तत्तदन्यान्यत्वम्। अतः नाप्रसिद्धिरित्याह—अन्यतमत्वं चेति [पृ. 694]।

ननु अन्यतमत्वमनिवेश्य तादृशं यद्यत्स्वं तत्तदधिकरणवृत्तित्वाभावकूटवत्त्वं व्याप्तिरित्येव निवेश्यताम् इत्याशङ्क्य तथा सति केवलान्वयिसाध्यकस्थले जगत एव यद्यत्पदार्थतया प्रत्येकं तत्तदधिकरणवृत्तित्वाभावाः तत्तदधिकरणावृत्तौ प्रसिद्धाः तत्कूट-

वत्त्वं हेतौ नास्तीति अव्याप्तिः । अतः तदुपेक्षितम् इत्याह—
तादृशं स्वं यद्यदिति [पृ. 694] ।

गादाधरी

अथ वा **स्ववृत्तिसकलसाध्याभावसमानाधिकरणसाध्याभावत्वावच्छेदेन** यदधिकरणवृत्तित्वं तादृशयत्किञ्चिदधिकरणवृत्तिसकलसाध्याभाववत्त्वमेव **यावताम्** इत्यादेरर्थः । **'धूमवान् वह्नेः' इत्यादौ** तादृशयत्किञ्चिदधिकरणं न साध्यवत् । तद्वृत्तिसकलसाध्याभावसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य तद्वृत्तित्वाभावात् । किन्तु अयोगोलकाद्येव इति तद्वृत्तिसकलसाध्याभाववत्त्वं साध्यशून्यस्यैवेति जगतः अतथात्वान्नातिव्याप्तिः । **'रूपाभाववान् वायुत्वात्'** इत्यादौ च तादृशाधिकरणं तत्तद्घटादिरेव । व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव तद्वृत्तिसकलसाध्याभावसमानाधिकरणत्वात् तस्य च तद्वृत्तित्वनियमादिति नाव्याप्त्यवकाशः । **शेषं पूर्ववत्** ।

विवरणम्

ननु 'रूपसामान्याभाववान् वायुत्वात्' इत्यादौ स्वपदेन तत्तद्घटादेरेव उपादेयतया यद्यदर्थाप्रसिद्धिः । तत्साध्यकस्थले यद्यदिति वीप्सायाः अनुपादाने तत्साध्यके व्यभिचारिणि 'रूपाभाववान् द्रव्यत्वात्' इत्यादौ अतिव्याप्तिः । स्वपदेन गुणं गृहीत्वा तद्वृत्तित्वाभावस्य द्रव्यत्वरूपहेतौ सत्त्वेन अतिव्याप्तेः वक्तुं शक्यत्वात् इत्यतः प्रकारान्तरेण परिष्करोति - **अथ वा स्ववृत्तीति** [पृ. 698] । स्ववृत्तिसाध्याभावत्वव्यापकाश्रयतानिरूपकाधिकरणवृत्तिसाध्याभावत्वव्यापकस्ववृत्तिताकाधिकरणवृत्तिसकलसाध्याभाववत्त्वमेव यावतामैकाधिकरण्यं तावत्साध्याभावसमुदायाधिकरणेत्यनेन विवक्षितम् ।

'धूमवान् वन्हेः' इत्यादौ स्वपदेन महानसादिकं ग्रहीतुं न शक्यते । तथा सति महानसवृत्तिसकलसाध्याभावपदेन व्यधि-

करणधर्मावच्छिन्नसाध्याभावस्यैव ग्राह्यतया तदधिकरणायोगोलकवृत्तिसाध्याभावत्वस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावे सत्त्वात् तत्र महानसवृत्तित्वविरहात् । किन्तु अयोगोलकाद्येव स्वपदेन ग्राह्यम् । तद्वृत्तिसकलसाध्याभाववत् अयोगोलकादिकमेव । तद्वृत्तित्वाभावस्य वन्हौ अभावात् नातिव्याप्तिः ।

'रूपाभाववान् वायुत्वात्' इत्यत्र स्वपदेन तद्घटो ग्राह्यः । तद्वृत्तिः सकलसाध्याभावः तद्घटवृत्तिरूपं व्यधिकरणधर्मावच्छिन्नसाध्याभावश्च । तदधिकरणतद्घटवृत्तिसाध्याभावत्वावच्छेदेन तद्घटवृत्तित्वमस्ति । तादृशतद्घटवृत्तिसकलसाध्याभाववान् तद्घट एव । तद्वृत्तित्वाभावस्य वायुत्वे सत्त्वात् नाव्याप्तिः ।

अत्र तादृशयत्किंचिदधिकरणवृत्तिसाध्याभाववत्त्वमेव यावतामित्यादेरर्थ इति पाठः दृश्यते । स च अधिकः अनावश्यकश्च इति भाति । स्ववृत्तिसकलसाध्याभावसमानाधिकरणसाध्याभावत्वव्यापकं यदधिकरणवृत्तित्वं तदेव अधिकरणं साध्याभावसमुदायाधिकरणम् इत्यनेन विवक्षितमित्युक्तावेव सामञ्जस्यात् ततोऽधिकस्य तादृशयत्किञ्चिदधिकरणेत्यादेः अधिकतया अनावश्यकत्वात् ।

साध्याभावत्वावच्छेदेन [पृ. 698] इत्यस्य प्रयोजनमाह— 'धूमवान् वह्नेः' इत्यादाविति [पृ. 698] । सकलपदप्रयोजनमाह— **रूपाभाववान्** इति [पृ. 698] । अन्यथा तत्र तादृशाधिकरणाप्रसिद्धिरिति भावः ।

शेषं पूर्ववदिति [पृ. 698] । तादृशह्रदवृत्तित्वाभावमादाय अतिव्याप्तिवारणाय तादृशं यद्यत् स्व तावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकत्वविवक्षणं इत्यर्थः ।

गादाधरी

अथ वा व्यासज्यवृत्तिसाध्याभावमात्रवृत्तिधर्मावच्छिन्नाधिकरणत्वमेव साध्याभावकूटाधिकरणत्वम् । जगत एव साध्याभावत्वावच्छिन्नाधिकरणतया व्यभिचारिण्यतिव्याप्तिवारणाय व्यासज्यवृत्तित्वं धर्मविशेषणम् । तथा सत्यपि च जगत एव व्यधिकरणधर्मावच्छिन्नसाध्याभावमात्रवृत्तितथाविधधर्मावच्छिन्नाधिकरणत्वात् स एव दोष इति आधेयतावच्छेदकतादृशधर्मन्यूनवृत्तितद्व्याप्यं यद्यत् तदन्यत्वेन धर्मो विशेषणीयः । न्यूनवृत्तित्वं च तत्समानाधिकरणाभावप्रतियोगित्वमात्रम् । उक्तस्थले तद्रूपव्यधिकरणधर्मावच्छिन्नसाध्याभावोभयत्वादिरेव तादृशो धर्मः । तस्य रूपान्तरसाधारणत्रित्वादिन्यूनवृत्तित्वेऽपि तादृशत्रित्वाद्यवच्छिन्नस्य क्वचिदप्यवृत्तेः तस्य आधेयतानवच्छेदकतया आधेयतावच्छेदकीभूततादृशधर्मन्यूनवृत्तिताविरहात् ।

न च—सर्वनियताभावविषये व्यधिकरणधर्मावच्छिन्नाभावमात्रवृत्तिव्यासज्यवृत्तिधर्माप्रसिद्ध्या केवलान्वयिसाध्यकेऽव्याप्तिरिति—वाच्यम् । तथा सति व्यासज्यवृत्तिस्थले अव्यासज्यवृत्त्यनेकवृत्तिधर्मभिन्नत्वस्य निवेशनीयत्वात् केवलान्वयिसाध्यके साध्याभावत्वस्यैव तथात्वात् इत्यतः दोषान्तरदासाय वृत्तौ हेतुतावच्छेदकसंबन्धं निवेशयति—किं चेति [पृ. 694] ।

विवरणम्

यद्यत्त्वम् इति निवेशे असर्वज्ञदुर्ज्ञेयता गौरवं चेत्यतः यावतामभावानाम् ऐकाधिकरण्यं इत्यादिकम् अविवक्षित्वा प्रकारान्तरेण परिष्करोति—अथ वा व्यासज्यवृत्तीति [पृ. 700] । व्यासज्यवृत्तिः साध्याभावमात्रवृत्तिः यो धर्मः तदवच्छिन्नाधेयतानिरूपकाधिकरणत्वं साध्याभावकूटाधिकरणत्वम् । 'वह्निमान् धूमात्' इत्यादौ व्यासज्यवृत्तिः साध्याभावमात्रवृत्तिः धर्मः व्यधि-

करणधर्मावच्छिन्नसाध्याभाव - समानाधिकरणधर्मावच्छिन्नसाध्याभावोभयत्वम् । तदवच्छिन्नाधेयतानिरूपकाधिकरणं निर्वह्निः । तद्वृत्तित्वाभावस्य धूमे सत्त्वात् लक्षणसमन्वयः ।

अत्र धर्मे व्यासज्यवृत्तित्वानिवेशे 'धूमवान् वह्नेः' इत्यादौ साध्याभावमात्रवृत्तिः यो धर्मः व्यधिकरणधर्मावच्छिन्नसाध्याभावत्वरूपः तदवच्छिन्नाधेयतानिरूपकाधिकरणं जगदेव भवति । तद्वृत्तित्वाभावः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिरिति तस्य हेतौ सत्त्वात् अतिव्याप्तिः । व्यासज्यवृत्तित्वनिवेशे तु व्यधिकरणधर्मावच्छिन्नसाध्याभाव-समानाधिकरणधर्मावच्छिन्नसाध्याभावोभयत्वावच्छिन्नाधेयतानिरूपकाधिकरणं निर्धूममेव । तद्वृत्तित्वाभावः वह्नौ नास्तीति नातिव्याप्तिः ।

यद्यपि घटत्वेन धूमाभाव - पटत्वेन धूमाभाव - एतदुभयत्वं गृहीत्वा तदवच्छिन्नाधेयतानिरूपकाधिकरणं जगदेव भवतीति 'धूमवान् वह्नेः' इत्यादौ व्यासज्यवृत्तित्वनिवेशेऽपि अतिव्याप्तिर्भवति । तथापि साध्याभावमात्रवृत्तिधर्मे आधेयतावच्छेदकतादृशधर्मन्यूनवृत्तितद्व्याप्यं यद्यत् तत्तदन्यत्वमपि विशेषणं देयम् । तथा च आधेयतावच्छेदकः साध्याभावमात्रवृत्तिव्यासज्यवृत्तिः यो धर्मः तन्न्यूनवृत्तितद्व्याप्यं यत् तदन्यो यः साध्याभावमात्रवृत्तिव्यासज्यवृत्तिधर्मः तदवच्छिन्नाधेयतानिरूपकाधिकरणवृत्तित्वाभाववत्त्वं व्याप्तिरिति निष्कर्षः ।

'धूमवान् वह्नेः' इत्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभावद्वयवृत्तिद्वित्वस्य आधेयतावच्छेदकसाध्याभावमात्रवृत्तिव्यासज्यवृत्तिः यो धर्मः समानाधिकरणधर्मावच्छिन्नसाध्याभाव - व्यधिकरणधर्मावच्छिन्नसाध्याभाव - एतदुभयत्वरूपः तन्न्यूनवृत्तित्वात् तदन्यत्वविरहेण तादृशधर्मावच्छिन्नाधेयतामादाय नातिव्याप्तिः ।

'रूपाभाववान् वायुत्वात्' इत्यत्र साध्याभावमात्रवृत्ति-व्यासज्यवृत्तिधर्मः तद्रूप-व्यधिकरणधर्मावच्छिन्नसाध्याभाव - एतदुभयत्वम् । तदवच्छिन्नाधेयतानिरूपकाधिकरणं तद्घटः । तद्वृत्तित्वाभावस्य वायुत्वे सत्त्वात् नाव्याप्तिः ।

अत्र आधेयतावच्छेदकेत्यनुक्तौ तद्रूप-एतद्रूपव्यधिकरणधर्मावच्छिन्नसाध्याभाव - एतत्त्रित्वरूपव्यासज्यवृत्तिधर्मन्यूनवृत्तित्वात् तदन्यः धर्मः तद्रूप - व्यधिकरणधर्मावच्छिन्नसाध्याभाव - एतद्द्वित्वं न भवतीति तदवच्छिन्नाधेयतामादाय 'रूपाभाववान् वायुत्वात्' इत्यत्र लक्षणसमन्वयः न स्यात् । आधेयतावच्छेदकत्वनिवेशे उक्तत्रित्वं न आधेयतावच्छेदकम् । तद्रूप - एतद्रूप-व्यधिकरणधर्मावच्छिन्नसाध्याभावानां त्रयाणां कुत्राप्यवृत्तेः ।

न च - समनियताभावानाम् ऐक्यमिति मते केवलान्वयिसाध्यकस्थले व्यधिकरणधर्मावच्छिन्नसाध्याभावानामेव साध्याभावपदेन ग्राह्यतया तेषां च अभिन्नतया साध्याभावमात्रवृत्तिद्वित्वादिरूपः व्यासज्यवृत्तिधर्मः तत्राप्रसिद्ध इति अव्याप्तिरितिवाच्यम् ।

'व्यासज्यवृत्ति' इत्यस्य स्थाने अव्यासज्यवृत्ति-अनेकवृत्तिधर्मभिन्नत्वस्य निवेशनीयत्वात् । केवलान्वयिसाध्यकस्थले अव्यासज्यवृत्त्यनेकवृत्तिधर्मभिन्नः साध्याभावमात्रवृत्तिः धर्मः साध्याभावत्वमेव प्रसिद्ध्यति । अतो न दोष इति भावः ।

अत्र अत्यन्तोपयुक्तत्वात् न्यायरत्नरीत्या दलानां प्रयोजनमुच्यते ।

प्रतियोगितावच्छेदककोटौ मात्रपदानुपादाने व्यधिकरणधर्मावच्छिन्नसाध्याभावमात्रवृत्तिसमुदायत्वे तादृशाभावोदासीनसाधारणसमुदायत्वन्यूनवृत्तित्वव्याप्यत्वयोः सत्त्वेन वह्निमत्साध्या-

भावमात्रवृत्तिव्यासज्यवृत्तिधर्माप्रसिद्ध्या वाच्यत्वसाध्यकेऽव्याप्तिः, अतः तन्निवेशः। व्यासज्यवृत्तित्वानिवेशे रूपाभावसाध्यके एक-रूपव्यधिकरणधर्मावच्छिन्नसाध्याभाववृत्तिसमुदायत्वस्य सकल-रूपव्यधिकरणधर्मावच्छिन्नसाध्याभावसाधारणः यः साध्याभाव-त्वरूपो धर्मः तन्न्यूनवृत्तितया तद्व्याप्यतया च तद्भिन्नतादृशधर्मा-प्रसिद्धिः। अतः तन्निवेशः। आधेयतावच्छेदकत्वविशेषणप्रयोजनं ग्रन्थकृद्दर्शितं ज्ञेयम्। घटत्वाद्युदासीनधर्माणां भेदनिवेशे गौरवम्। अतो व्याप्यत्वनिवेशः। स्वस्यापि स्वव्याप्यत्वात् तद्भिन्नतादृश-धर्माप्रसिद्धिः। अतः न्यूनवृत्तित्वनिवेशः। अनुयोगिकोटौ मात्र-पदानुपादाने वाच्यत्वसाध्यके व्यधिकरणधर्मावच्छिन्नसाध्याभाव-घटाधिकरणत्वैतद्द्वित्वरूपतादृशधर्मावच्छिन्नाधिकरणे हेतोर्वृत्त्या अव्याप्तिः। अतः तन्निवेशः।

व्यभिचारिणि तादृशसाध्याभावत्वरूपधर्ममादाय तदवच्छि-न्नाधिकरणत्वं जगत एव स्यात्। अतः व्यासज्यवृत्तीति। समनि-यताभावैक्यमते तादृशधर्मन्यूनवृत्तितादृशधर्मव्याप्यधर्माप्रसिद्ध्या तद्भिन्नतादृशधर्माप्रसिद्धिः तन्न्यूनवृत्तित्वतद्व्याप्यत्वोभयाभावं निवेश्य वारणीया।

दीधितिः

अन्यथा **धूमादौ** अव्याप्तेः। **साध्यतावच्छेदकसंबन्धेन** साध्याभाववति कालादौ वृत्तिमन्मात्रस्यैव वृत्तेः व्यभिचारिण्यति-व्याप्तिप्रसङ्गो वा। तथा च सत्तादिसाध्यके संयोगेन समवायेन वा हेतावव्याप्तिः। साध्याभाववति तेन संबन्धेन वृत्तेरप्रसिद्धेः।

गादाधरी

हेतुतावच्छेदकसंबन्धेन साध्याभाववद्वृत्तित्वनिवेशस्य प्रयोजनकथनम्। तथा निवेशे सत्तावान् जातेः इत्यादौ अव्याप्तिप्रसञ्जनम्।

धूमादावव्याप्तेरिति [पृ. 703]। वन्हिमन्मात्रसमवेत-घटादौ वर्तमानस्य निर्वन्हिसमवेतत्वाभावस्य तत्रासत्त्वादिति भावः।

एतच्च यत्किंचित्संबन्धावच्छिन्नतादृशवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशाभिप्रायेण । अन्यथा निर्वह्निसंयुक्तत्वादिसाधारणतादृशवृत्तित्ववत्त्वं प्रति तथाविधाभावप्रतियोगिताया अव्यापकत्वात् तस्य लक्षणाघटकतया वृत्तिमन्मात्रस्यैव साध्याभावाधिकरणकालादौ वृत्तेः निर्वह्निवृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वात् अव्याप्त्यसंगतेः । अत एव संबन्धमनिवेश्य तादृशाधिकरणवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशपक्षे दूषणान्तरमाह **साध्यतावच्छेदकसंबन्धेनेति** [पृ. 703] । एतच्च **कालिकसंबन्धावच्छिन्नसाध्याभावस्य** कालादावसत्त्वेऽपि तस्य यथाविवक्षितसाध्याभावसमुदायवत्त्वमक्षतमेवेति सूचनाय । **कालादौ** [पृ. 703] इति 'आदि'-पदात् विषयितासंबन्धेन वस्तुमात्रसंबन्धिनः ईश्वरज्ञानादेः परिग्रहः । **व्यभिचारिणीति** [पृ. 703] । यत्साध्यके वृत्तिमन्मात्राधिकरणस्य कालादेः विवक्षितसाध्याभावकूटवत्त्वं **तादृशव्यभिचारिहेतावित्यर्थः** ।

विवरणम्

किंच हेतुतावच्छेदकसंबन्धेनेत्यादि [पृ. 694] । साध्याभाववन्निरूपितवृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा यत्किंचित्संबन्धावच्छिन्नत्वनिवेशे 'वह्निमान् धूमात्' इत्यादौ साध्याभावसमुदायवन्निर्वन्हिनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वत्वसमनियतप्रतियोगिताकस्य निर्वह्निसमवेतत्वं नास्ति इति प्रतीतिसिद्धस्य अभावस्य वन्हिमन्मात्रकपालारब्धे पर्वतसंयुक्तघटादौ वर्तमानस्य धूमेऽभावात् अव्याप्तिः । धूमे निर्वह्नि-धूमावयव-समवेतत्वस्यैव सत्त्वात् ।

यदि तु साध्याभाववन्निरूपितवृत्तित्वे यत्किंचित्संबन्धावच्छिन्नत्वमपि अनिवेश्य साध्याभाववन्निरूपितवृत्तित्वत्वसमनिय-

तप्रतियोगिताकः इत्येतावन्मात्रं विवेश्यते, तदा निर्वन्हिसमवेतत्वाभावः न लक्षणघटकः। निर्वह्निसंयुक्तत्वेऽपि निर्वन्हिवृत्तित्वत्वस्य सत्त्वेन अत्र निर्वह्निसमवेतत्वाभावीयप्रतियोगितायाः असत्त्वेन तस्या साध्याभाववद्वृत्तित्वत्वाव्यापकत्वात्। किन्तु निर्वन्हिवृत्तित्वत्वसामान्याभाव एव साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः। स तु वृत्तिमद्वृत्तिर्न भवति। वृत्तिमतः सर्वस्यापि निर्वन्हौ काले कालिकसंबन्धेन वृत्तित्वात्। अतः घटत्वेन निर्वह्निवृत्तित्वाभाव एव लक्षणघटकः। स तु हेतौ नास्ति इति नाव्याप्तिरित्युच्यते, तदा तुल्यन्यायेन 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि घटत्वेन निर्धूमवृत्तित्वाभावस्यैव लक्षणघटकतया तस्य हेतौ सत्त्वात् अतिव्याप्तिः प्रसजति। तद्वारणाय साध्याभाववन्निरूपितवृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्।

'वन्हिमान् धूमात्' इत्यादौ निर्वह्निसंयुक्तत्वत्वावच्छिन्नाभावमादाय लक्षणसमन्वयः कार्यः। 'धूमवान् वह्नेः' इत्यादौ निर्धूमसंयुक्तत्वत्वावच्छिन्नाभावस्यापि लक्षणघटकतया तस्य वह्नौ अभावात् नातिव्याप्तिः। वह्नेः निर्धूमायोगोलकसंयुक्तत्वात्। एवं च साध्याभाववन्निरूपितवृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे सति 'सत्तावान् संयोगसंबन्धेन धूमात्' इत्यत्र वा 'सत्तावान् समवायसंबन्धेन जातेः' इत्यत्र वा अव्याप्तिः। साध्याभावसमवायवति सामान्यादौ संयोगेन समवायेन वा वृत्तेः अप्रसिद्धेः इति दीधितिग्रन्थस्य भावः।

गादाधर्यां एतच्च कालिकसंबन्धावच्छिन्नसाध्याभावस्य इत्यादि [पृ. 704]। कालादौ कालिकसंबन्धेन धूमसत्त्वात् कथं कालादेः साध्याभाववत्त्वम् इति शङ्कायां साध्यतावच्छेदकसमनियत - साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावस्यैव साध्याभावपदेन विवक्षितत्वात् संयोगसंबन्धावच्छिन्नधूमाभाववत्त्व

वति सर्वस्मिन् द्रव्ये द्रव्यत्व-पृथिवीत्वान्यतरसत्त्वात् । किन्तु द्रव्यत्वपृथिवीत्वोभयाभाव एव साधनसमानाधिकरणः साध्याभावः । तद्घटितकूटाधिकरणं जलादिकम् । तद्वृत्तित्वस्य हेतौ सत्त्वात् नातिव्याप्तिः ।

एवं 'रूपाभाववान् वायुत्वात्' इत्यत्र रूपात्मकं साध्याभावं गृहीत्वा तत्कूटाधिकरणाप्रसिद्ध्या या अव्याप्तिरुक्ता सापि न भवति । रूपात्मकस्य अभावस्य वायुत्वरूपसाधनसमानाधिकरणत्वविरहात् । वायौ रूपस्य असत्त्वात् । किन्तु व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव साधनसमानाधिकरणः । अतो नाव्याप्तिः ।

'सत्तावान् जातेः' इत्यत्र सत्तात्वावच्छिन्नाभावस्य जातिमद्वृत्तित्वविरहात् लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नाभाव एव तत्रापि साध्याभावपदेन ग्राह्य इति नाव्याप्तिः इति शङ्कितुः आशयः । तदाह गादाधर्याम् - द्रव्यत्वसाधनके [पृ. 706] इत्यादिना । शुद्धद्रव्यत्वाभावयोरिति [पृ. 706] । 'इदं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इति स्वाभिप्रायेण उक्तम् । उक्तस्थलेषु इति [पृ. 706] । 'द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वात्,' 'पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्,' 'रूपाभाववान् वायुत्वात्,' 'सत्तावान् संयोगसंबन्धेन धूमात्, समवायसंबन्धेन जातेर्वा' इत्यादिस्थलेषु इत्यर्थः ।

ननु साध्याभावे साधनसमानाधिकरणत्वविशेषणे दत्ते साधनसमानाधिकरणत्वविशिष्टसाध्याभावसमुदायाधिकरणवृत्तित्वाभावः यावन्तः वृत्तिमद्वृत्तयः तद्वत्त्वं व्याप्तिरिति लक्षणं पर्यवस्यति । तथा सति 'वन्हिमान् धूमात्' इत्यादावव्याप्तिः । साधनाधिकरणपर्वतमहानसादिवृत्तित्वविशिष्टसाध्याभावसमुदायाधिकरणं साधनाधिकरणं पर्वतमहानसादिकमेव भवति । तद्धर्मिवृत्तित्वविशिष्टनिरूपिताधिकरणतायाः तद्धर्मिवृत्तित्वमिति निय-

मात् । पर्वतमहानसादिसाधनाधिकरणवृत्तित्वत्वावच्छिन्नाभावस्तु साधनाधिकरणपर्वताद्यवृत्तौ वृत्तिमति प्रसिद्धः । स तु हेतौ धूमे नास्ति । धूमस्य पर्वतादिवृत्तित्वात् इत्याशङ्क्याह—**साधनसामानाधिकरण्योपलक्षितेति** [पृ. 706] । तथा च साधनाधिकरणपर्वतादिवृत्तित्वोपलक्षितः यः व्यधिकरणधर्मावच्छिन्नसाध्याभावः तत्कूटाधिकरणं जगदेव भवति इति जगद्वृत्तित्वाभावः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिरिति तद्वत्त्वस्य हेतौ सत्त्वात् नाव्याप्तिरिति भावः ।

व्यतिरेकिणि हेताविति [पृ. 706] । 'वन्हिमान् धूमात्' इत्यादावित्यर्थः । **तद्विशिष्टाधिकरणवृत्तित्वाभावस्येति** [पृ. 706] । साधनसामानाधिकरण्यविशिष्टसाध्याभावसमुदायाधिकरणवृत्तित्वत्वावच्छिन्नाभावस्य इत्यर्थः ।

अथ साधनसमानाधिकरणत्वं परिष्करोति—**साधनतावच्छेदकसंबन्धेनेति** [पृ. 706] । साधनतावच्छेदकसंबन्धेन साधनतावच्छेदकविशिष्टवद्वृत्तित्वं साधनसमानाधिकरणत्वम् । साधनतावच्छेदकसंबन्धेनेत्यनुक्तौ 'द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वात्' इत्यत्र अतिव्याप्तिः । द्रव्यत्वपृथिवीत्वान्यतराभावस्यापि साधनस्य द्रव्यत्वस्य कालिकसंबन्धेन अधिकरणे स्पन्दादौ वर्तमानतया साध्याभावपदेन ग्रहीतुं शक्यतया तदधिकरणगुणादिवृत्तित्वाभावस्य द्रव्यत्वे सत्त्वात् अतिव्याप्तिः । साधनतावच्छेदकसंबन्धेनेत्युक्तौ साधनतावच्छेदकसमवायसंबन्धेन द्रव्यत्वाधिकरणं स्पन्दादिकं न भवति । किन्तु पृथिव्यादिकमेव । तद्वृत्तित्वं द्रव्यत्वपृथिवीत्वान्यतराभावे नास्तीति तस्य लक्षणाघटकतया द्रव्यत्वपृथिवीत्वोभयाभावस्यैव लक्षणघटकतया नातिव्याप्तिः ।

साधनतावच्छेदकविशिष्टेत्यनुक्तौ 'द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यवृत्तित्वविशिष्टसत्त्वात्' इत्यत्र अतिव्याप्तिः । द्रव्यत्व-

पृथिवीत्वोभयाभाववति जलादौ द्रव्यवृत्तित्वविशिष्टसत्तायाः सत्त्वात् अयं हेतुः व्यभिचारी ।

अत्र साधनपदेन विशिष्टशुद्धयोरनतिरेकात् शुद्धसत्तापि ग्रहीतुं शक्यते । तदधिकरणं गुणादि । तद्वृत्तिः साध्याभावः द्रव्यत्वपृथिवीत्वान्यतराभावोऽपि । तद्घटितकूटाधिकरणं गुणादिकमेव । तद्वृत्तित्वाभावस्य द्रव्यवृत्तित्वविशिष्टसत्त्वे विद्यमानत्वात् अतिव्याप्तिः । तद्वारणाय साधनतावच्छेदकविशिष्टसाधनवत् इत्युक्तम् । तथा सति साधनतावच्छेदकं द्रव्यवृत्तित्वविशिष्टसत्तात्वम् । तदवच्छिन्नसाधनाधिकरणं न गुणादिकम्, किन्तु जलादिकमेव । तद्वृत्तिः न द्रव्यत्वपृथिवीत्वान्यतराभावः इति स न लक्षणघटकः । किन्तु द्रव्यत्वपृथिवीत्वोभयाभाव एव लक्षणघटकः इति नातिव्याप्तिः ।

ननु साधनतावच्छेदकावच्छिन्नत्वानिवेशेऽपि न अतिव्याप्तिः संभवति । द्रव्यत्वपृथिवीत्वान्यतरत्वावच्छिन्नाभावस्य लक्षणघटकत्वेऽपि तत्कूटाधिकरणं यद्गुणादि तद्वृत्तित्वस्य सत्तायां सत्त्वात् द्रव्यवृत्तित्वविशिष्टसत्तायामपि गुणादि वृत्तित्वं अस्तीत्येव वक्तव्यम् । न तु गुणादिवृत्तित्वाभावः । विशेष्यवृत्तिधर्मप्रतियोगिकस्य विशिष्टानुयोगिकस्य अभावस्यानङ्गीकारात् इत्याशङ्कते—**न च सत्तायामिति** [पृ. 707] ।

समाधत्ते—साधनतावच्छेदकावच्छिन्नत्वानिवेशे इति [पृ. 707] । 'इदं द्रव्यम् द्रव्यवृत्तित्वविशिष्टसत्त्वात्' इत्यत्र सद्धेतौ द्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावस्य साधनसमानाधिकरणतया तदधिकरणगुणादिवृत्तित्वस्य उक्तरीत्या विशिष्टसत्त्वे सत्त्वेन तदभावविरहात् अव्याप्तिः स्यात् । तद्वारणाय विशेष्यवृत्तिधर्मिप्रतियोगिकः विशिष्टानुयोगिकः अभावः अङ्गीकरणीयः । तथा च सत्तायां गुणवृत्तित्वसत्त्वेऽपि विशिष्टसत्तायां वृत्तित्वाभावस्य

सत्त्वात् नाव्याप्तिः । एवञ्च 'द्रव्यत्वपृथिवीत्वोभयवान् विशिष्टसत्त्वात्' इत्यत्र व्यभिचारिणि साध्याभावकूटाधिकरणगुणादिवृत्तित्वाभावसत्त्वात् अतिव्याप्तिः प्रसजति । तद्वारणाय साधनतावच्छेदकावच्छिन्नसाधनवद्वृत्तित्वं अवश्यं निवेशनीयमेवेति भावः ।

साधनतावच्छेदकावच्छिन्नसाधनवन्निरूपितवृत्तित्वे अनवच्छिन्नत्वरूपं विशेषणमपि देयम् इत्याह - संयोगे साध्ये इत्यादिना- [पृ. 707] । 'संयोगी सत्त्वात्' इत्यादौ व्यभिचारिणि संयोगाभावरूपसाध्याभावकूटाधिकरणं जगदेव भवति । संयोगस्य अव्याप्यवृत्तित्वात् । जगद्वृत्तित्वाभावश्च घटत्वादिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तितया लक्षणघटकः । तद्वत्त्वं सत्तारूपहेतावस्तीति अतिव्याप्तिः । तद्वारणाय व्याप्यवृत्तित्वविशिष्टसाध्याभावसमुदायाधिकरणत्वं लक्षणे निवेशनीयम् । तथा सति व्याप्यवृत्तित्वविशिष्टः यः संयोगाभावः तदधिकरणं गुणादिकमेव न तु द्रव्यम् । द्रव्ये संयोगाभावस्य अव्याप्यवृत्तित्वात् । गुणादिवृत्तित्वत्वावच्छिन्नाभावस्तु गुणाद्यवृत्तौ वृत्तिमति वर्तमानतया लक्षणघटकः । स सत्तायां नास्तीति नातिव्याप्तिः ।

एवं रीत्या प्रसक्ताया अव्याप्यवृत्तिसाध्यकव्यभिचारिणि अतिव्याप्तेर्वारणाय व्याप्यवृत्तित्वविशिष्टसाध्याभावाधिकरणत्वनिवेशे अव्याप्यवृत्तिसाध्यकसद्धेतौ 'संयोगवान् संयोगसंबन्धेन घटात्' इत्यादौ व्याप्यवृत्तित्वविशिष्टः यः साध्याभावः संयोगत्वावच्छिन्नः संयोगाभावः तदधिकरणं गुणादिकमेव । न तु साध्यवद्द्रव्यम् । तत्र उत्पत्तिकालावच्छेदेन संयोगाभावस्य सत्त्वात् तस्य कालिकाव्याप्यवृत्तित्वात् । एवं च व्याप्यवृत्तित्वविशिष्टसंयोगाभावाधिकरणं गुणादिकमेव । तन्निरूपकहेतुतावच्छेदकसंयोगसंबन्धावच्छिन्नवृत्तित्वस्य अप्रसिद्ध्या अव्याप्तिर्भवति । तद्वारणाय साधनवन्निरूपितवृत्तौ अनवच्छिन्नत्वं निवेशनीयम् । तन्निवेशे

संयोगसाध्यकसद्धेतौ साधनवति - संयोगसंबन्धेन घटवति भूतलादौ संयोगत्वावच्छिन्नसंयोगाभावस्यैव उत्पत्तिकालावच्छिन्ना वृत्तिरेव अस्ति इति साधनवन्निरूपितानवच्छिन्नवृत्तिकः अभावः न संयोगत्वावच्छिन्नसंयोगाभावः, किंतु व्यधिकरणघटत्वावच्छिन्नसंयोगाभावः। तदधिकरणं जगदेव भवतीति वन्निरूपितसंयोगसंबन्धावच्छिन्नवृत्तित्वस्य प्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नतदभावमादाय लक्षणसमन्वयात् न अव्याप्तिरिति भावः।'

गादाधरी

[साध्याभावे साधनसमानाधिकरणत्वविशेषणे सत्तावान् जातेरित्यत्र अव्याप्तिवारणमशक्यमित्याक्षेपः]

अथ साधनसमानाधिकरणत्वेन साध्याभावे विशेषितेऽपि 'सत्तावान् जातेः' इत्यादौ अव्याप्तिवारणमशक्यमेव। प्रत्येकं साधनसमानाधिकरणाभ्यां द्रव्यत्वविशिष्टसत्ताभाव-द्रव्यान्यत्वविशिष्टसत्ताभावाभ्यां घटिताभावसमुदायस्य सामान्यादावेव सत्त्वात् तत्र च हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्धेः।

यत्तु—द्रव्यत्वादिविशिष्टसत्ताभावप्रतियोगितावच्छेदककोटौ सत्तात्वं न निवेश्यते। द्रव्यत्वादिवैशिष्ट्यमात्रस्यैव तत्प्रतियोगितावच्छेदकत्वसंभवादिति द्रव्यत्वादिसाधारणद्रव्यत्वादिवैशिष्ट्यावच्छिन्नाभावप्रतियोगितायाः सत्तात्वसमनैयत्यविरहात् न तादृशाभावस्य लक्षणघटकता इति समाधानम्, तदपि तुच्छम्।

'द्रव्यत्वविशिष्टसत्तावान् जातेः' इत्यादावपि ईदृशयुक्त्या साध्यतावच्छेदकतादृशविशिष्टसत्तात्वस्य अभावप्रतियोगितानवच्छेदकत्वात् द्रव्यत्वादि वैशिष्ट्यावच्छिन्नाभावस्य च साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावात् व्यधिकरणधर्मावच्छिन्नाभावमादाय अतिव्याप्तेर्दुर्वारतया एतल्लक्षणवादिना गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वमतस्य अवलम्बनीयत्वात्।

द्रव्यत्वविशिष्टसत्तात्वादेः प्रतियोगितानवच्छेदकत्वेऽपि 'समवेतवान् जातेः' इत्यादौ समवायेन एतद्रूपान्यत्वविशिष्टाभाव-तद्रूपान्यत्वविशिष्टाभावादीनां समवेतत्वसमनियत-प्रतियोगिताकतया प्रत्येकं साधनसमानाधिकरणतया च तद्घटितकूटाधिकरणे सामान्यादौ हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्धया अव्याप्तिवारणासंभवात् ।

एवं विशिष्टस्य अतिरिक्ततामतावलम्बनात् दर्शितविशिष्टाभावानां साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहोपपादनेन समाधानमपि हेयम् । उक्तस्थल एव द्रव्यत्वतदन्यसमवेतोभय - गुणत्वतदन्यसमवेतोभय - कर्मत्वतदन्यसमवेतोभयाभावानां साध्यतावच्छेदकसमवेतत्वसमनियतप्रतियोगिताकानां प्रत्येकं साधनसमानाधिकरणानां समुदायवति सामान्यादौ समवायेन वृत्तेरप्रसिद्धया अव्याप्तेः तावतापि वारणासंभवात् ।

न च - यादृशसाध्याभावस्तोमाधिकरणं साधनाधिकरणं तादृशस्तोमाधिकरणवृत्तित्वाभावस्य विवक्षितत्वात् उक्ताभावसमुदायाधिकरणतायाः साधनवति असंभवात् न तत्समुदायस्य लक्षणघटकता इति नाप्रसिद्धिरिति - वाच्यम् ।

एवं सत्यपि तादृशविशिष्टाभावाद्येकतरव्यधिकरणधर्मावच्छिन्नसाध्याभावस्तोमस्य तादृशस्य अधिकरणे केषांचित् वृत्तिमतामवृत्तेः साधनस्य च वृत्तेः अव्याप्तितादवस्थ्यात् ।

एतादृशविवक्षानुसरणे 'भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वात्' इत्यत्र भूतत्वमूर्तत्वोभयघटितसाध्याभावकूटवति हेतोरवृत्तितया वक्ष्यमाणातिव्याप्तेः असङ्गतिप्रसङ्गाच्च । साधनवतो निस्स्पर्शस्य कस्यचिदपि तादृशोभयघटितस्तोमाधिकरणत्वविरहेण तादृशस्तोमस्य लक्षणाघटकत्वात् प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणवैयर्थ्यापत्तेश्च । 'पृथिवी द्रव्यत्व-

प्रकारकप्रमाविषयत्वात्' इत्यादौ जलावृत्तित्वतेजोऽवृत्तित्वाव-च्छिन्नाभावघटितकूटवत्त्वस्य कस्यचिदपि साधनवति असत्त्वेन तादृशकूटस्य लक्षणाघटकत्वात् यादृशकूटवत्त्वं साधनवतः तद्वद-वृत्तित्वाभावस्य साधनेऽसंभावितत्वात् अतिव्याप्त्यनवकाशात् इति चेत्—

विवरणम्

'सत्तावान् जातेः' इत्यादौ साध्याभाववति हेतुतावच्छेदक-संबन्धेन वृत्तेः अप्रसिद्धया आपादितायाः अव्याप्तेः साधनसमा-नाधिकरणत्वेन साध्याभावे विशेषिते वारणं संभवति इति आशयेन दीधितौ साधनसमानाधिकरणत्वेन साध्याभावाः विशेषणीया इति आशङ्कितम्। इयमाशङ्का न सङ्गच्छत इति आक्षिपति अथ इत्यादिना चेत् इत्यन्तेन।

'सत्तावान् जातेः' इत्यत्र साधनस्य जातेः अधिकरणे गुणे द्रव्यत्वविशिष्टसत्ताभावः वर्तते। एवं जातेः अधिकरणे द्रव्ये द्रव्यान्यत्वविशिष्टसत्ताभावः वर्तते। एतौ च अभावौ सत्तात्व-रूपसाध्यतावच्छेदकसमनियतप्रतियोगिताकौ। तथा च साधन-समानाधिकरणसाध्याभावपदेन द्रव्यत्वविशिष्टसत्ताभाव-द्रव्यान्य-त्वविशिष्टसत्ताभावौ ग्रहीतुं शक्येते। तत्समुदायाधिकरणं द्रव्यादित्रयं न भवति। द्रव्ये द्रव्यत्वविशिष्टसत्तायाः गुणकर्मणोः द्रव्यान्यत्वविशिष्टसत्तायाः सद्भावात् तदभावस्य असंभवात् अतः सामान्यादिकमेव साधनसमानाधिकरणसाध्याभावसमुदायाधि-करणम्। सामान्यादिनिरूपितहेतुतावच्छेदकसमवायसंबन्धा-वच्छिन्नवृत्तित्वाप्रसिद्धया अव्याप्तिः साधनसमानाधिकरणत्वेन साध्याभावे विशेषितेऽपि दुर्वारा इति आक्षेपः।

एतम् आक्षेपं समादधताम् मतमनूद्य दूषयति—यत्तु इत्यादिना [पृ. 712]। द्रव्यत्वविशिष्टसत्ताभावस्य प्रतियोगिता-

वच्छेदकं द्रव्यत्ववैशिष्ट्यमात्रम् । न तु द्रव्यत्वविशिष्टसत्तात्वम् । द्रव्यत्ववैशिष्ट्यापेक्षया द्रव्यत्वविशिष्टसत्तात्वस्य गुरुत्वेन प्रतियोगितानवच्छेदकत्वात् । तथा च द्रव्यत्ववैशिष्ट्यावच्छिन्ना या द्रव्यत्वविशिष्टसत्ताभावीयप्रतियोगिता सा सत्तात्वरूप-साध्यतावच्छेदकसमनियता न भवति । सत्तात्वशून्ये द्रव्यत्वेऽपि तादृशप्रतियोगितायाः सत्त्वात् । द्रव्यत्वस्यापि द्रव्यत्वविशिष्टतया द्रव्यत्ववैशिष्ट्यावच्छिन्नप्रतियोगितायाः द्रव्यत्वविशिष्टनिष्ठायाः द्रव्यत्वविशिष्टद्रव्यत्वनिष्ठत्वावश्यकत्वात् । द्रव्यत्ववैशिष्ट्यस्य द्रव्यत्वसामानाधिकरण्यरूपत्वात् । तथा च सत्तात्वव्याप्यत्वविरहात् द्रव्यत्वविशिष्टसत्ताभावः न सत्तात्वसमनियतप्रतियोगिताक इति तस्य लक्षणाघटकतया तादृशाभावमादाय अव्याप्तिप्रसञ्जनं न सङ्गच्छते इति यत्तुकारैः यदुक्तं तत् तुच्छम् ।

एतल्लक्षणवादिना गुरुधर्मस्यापि अभावप्रतियोगितावच्छेदकत्वम् अवश्यमङ्गीकरणीयम् । अन्यथा 'द्रव्यत्वविशिष्टसत्तावान् जातेः' इत्यादौ अतिव्याप्त्यापत्तेः । तथा हि - द्रव्यत्वविशिष्टसत्ताभाववति गुणे जातेः सत्त्वात् अयं हेतुः व्यभिचारी । अत्र साध्याभावपदेन द्रव्यत्वविशिष्टसत्ताभावं गृहीत्वैव तत्समुदायाधिकरणगुणवृत्तित्वमेव जातावस्तीति अतिव्याप्तिः वारणीया । भवदुक्तरीत्या द्रव्यत्ववैशिष्ट्यापेक्षया द्रव्यत्वविशिष्टसत्तात्वस्य गुरुत्वेन अभावप्रतियोगितानवच्छेदकतया अयमभावः द्रव्यत्ववैशिष्ट्यावच्छिन्नप्रतियोगिताक इति वक्तव्यम् । द्रव्यत्ववैशिष्ट्यावच्छिन्नप्रतियोगिता च साध्यतावच्छेदकसत्तात्वव्याप्या न भवति । सत्तात्वशून्ये द्रव्यत्वेऽपि तादृशप्रतियोगितायाः सद्भावात् । तथा च द्रव्यत्ववैशिष्ट्यावच्छिन्नाभावस्य सत्तात्वसमनियतप्रतियोगिताकत्वविरहेण लक्षणाघटकतया घटत्वेन सत्ताभाव एव लक्षणघटकः । तत्कूटाधिकरणजगद्वृत्तित्वाभावस्य वृत्तिमद्वृत्तेः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य हेतावपि सत्त्वात् अति-

व्याप्तिः प्रसजति । तदर्थं गुरुधर्मस्यापि अभावप्रतियोगितावच्छेदकत्वं स्वीकृत्य द्रव्यत्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगिताकाभावस्य लक्षणघटकत्वं संपाद्य 'द्रव्यत्वविशिष्टसत्तावान् जातेः' इत्यादौ अतिव्याप्तिर्वारणीया । तुल्यन्यायेन 'सत्तावान् जातेः' इत्यादावपि द्रव्यत्वविशिष्टसत्ताभाव-द्रव्यान्यत्वविशिष्टसत्ताभावयोः गुरुधर्मावच्छिन्नप्रतियोगिताकयोरपि लक्षणघटकतया तत्समुदायाधिकरणसामान्यादिनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या अव्याप्तिर्दुर्वारैव इति आक्षेपः तदवस्थ इति भावः ।

गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वेऽपि स्थलान्तर अव्याप्तिर्दुर्वारा इत्याह—**द्रव्यत्वादिविशिष्टसत्तात्वादेरित्यादिना** [पृ. 713] । तथा च साध्याभावे साधनसमानाधिकरणत्वविशेषणे दत्तेऽपि 'समवेतवान् जातेः' इत्यत्र अव्याप्तिः । तथा हि - साध्यतावच्छेदकत्वं समवेतत्वम् । तत्समनियतप्रतियोगिताकः अभावः एतद्रूपान्यत्वविशिष्टाभावः तद्रूपान्यत्वविशिष्टाभावश्च । एतद्रूपान्यत्वविशिष्टत्वं नाम स्वरूपसंबन्धेन एतद्रूपान्यत्वाधिकरणे समवायसंबन्धेन वृत्तित्वम् । स्वरूप-समवायोभयघटितम् एतद्रूपान्यत्वसामानाधिकरण्यमिति यावत् । तादृशं च सामानाधिकरण्यं एतद्रूपेऽप्यस्ति । स्वरूपसंबन्धेन एतद्रूपान्यत्वाधिकरणे एतद्घटे समवायसंबन्धेन एतद्रूपस्य सत्त्वात् । एवं च एतद्रूपान्यत्ववैशिष्ट्यावच्छिन्ना प्रतियोगिता समवेतमात्रनिष्ठा भवति । अतः एतद्रूपान्यत्वविशिष्टनिष्ठसमवायसंबन्धावच्छिन्नप्रतियोगिताकः अभावः समवेतत्वसमनियतप्रतियोगिताकः । अयं च साधनवति एतद्रूपे एतद्रूपान्यत्वरूपविशेषणाभावेन विद्यमानतया साधनसमानाधिकरणः ।

एवं तद्रूपान्यत्वविशिष्टस्य समवायसंबन्धावच्छिन्नाभावोऽपि साधनवति तद्रूपे विद्यमानतया समवेतत्वसमनियतप्रतियोगिताक-

तथा च लक्षणघटकः। तत्कूटाधिकरणं सामान्यादिकमेव। तत्र एतद्रूपान्यत्वविशिष्टस्य कस्यापि समवायसंबन्धेन अभावात्। तथा च साध्याभावकूटाधिकरणे सामान्यादौ हेतुतावच्छेदकसमवायसंबन्धेन वृत्तेरप्रसिद्ध्या अव्याप्तिर्दुर्वारा इति भावः। एतमाक्षेपं प्रकारान्तरेण परिहरतां मतमनूद्य दूषयति—**एवं विशिष्टस्य अतिरिक्ततामतावलम्बनादिति** [पृ. 713]। विशिष्टं शुद्धादतिरिक्तम्। तथा च 'सत्तावान् जातेः' इत्यत्र द्रव्यत्वविशिष्टसत्ताभावः सत्तात्वसमनियतप्रतियोगिताको न भवति। विशिष्टसत्ताभावीयप्रतियोगितायाः विशिष्टसत्तायामेव सत्त्वात् सत्तात्वस्य च शुद्धसत्तायां सद्भावात् उभयोरतिरिक्तत्वात्। अतः द्रव्यत्वविशिष्टसत्ताभावस्य लक्षणाघटकतया घटत्वादिना सत्ताभाव एव साधनसमानधिकरणः साध्यतावच्छेदकसमनियतप्रतियोगिताकः अभावः। तत्कूटाधिकरणं जगदेव भवति। तत्र समवायेन वृत्तेः प्रसिद्ध्या नाव्याप्तिरिति केषांचित्समाधानमपि न युक्तम्।

'समवेतवान् जातेः' इत्यादौ द्रव्यत्व-तदन्यसमवेतोभयाभावः, गुणत्व-तदन्यसमवेतोभयाभावः, कर्मत्व-तदन्यसमवेतोभयाभावः इति एते त्रयः अभावाः साध्यतावच्छेदकसमवेतत्वसमनियतप्रतियोगिताकाः। द्रव्यत्वं तदन्यसमवेतं चेति समवेतं द्विविधम्। समवेतत्वं द्रव्यत्वे तदन्यस्मिन् समवेते च वर्तते। द्रव्यत्व-तदन्यसमवेतोभयाभावीयप्रतियोगितापि तत्रैव वर्तत इति तादृशोभयाभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वम्। साधनवति गुणे द्रव्यत्वविरहेण द्रव्यत्वतदन्यसमवेतोभयाभावः वर्तत इति तस्य साधनसमानाधिकरणत्वम्।

एवंरीत्या इतरयोरभावयोरपि साध्यतावच्छेदकसमनियतत्वं साधनसमानाधिकरणत्वं च अस्ति। तथा च साधनसमानाधिकरणानां साध्यतावच्छेदकसमनियतप्रतियोगिताकानां पूर्वोक्तानां

त्रयाणाम् उभयाभावानां समुदायस्य अधिकरणं सामान्यादिकमेव । तन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धया अव्याप्तेः दुर्वारत्वात् इति भावः ।

न च यादृशसाध्याभावस्तोमाधिकरणमिति [पृ. 713] । प्रत्येकं साधनसमानाधिकरणाः ये ये साध्याभावाः तत्तत्समुदायाधिकरणवृत्तित्वाभावः न लक्षणघटकतया विवक्षितः । किन्तु यादृशसाध्याभावसमुदायाधिकरणं साधनाधिकरणं भवति तादृशसाध्याभावसमुदायाधिकरणवृत्तित्वाभाव एव विवक्षितः ।

'समवेतवान् जातेः' इत्यादौ साधनाधिकरणपदेन गुणस्य ग्रहणे तत्र द्रव्यत्व-तदन्यसमवेतोभयाभावसत्त्वेऽपि गुणत्व - तदन्यसमवेतोभयाभावः न संभवति । गुणे गुणत्वस्य तदन्यसमवेतसत्तायाश्च सत्त्वात् । तथा च अभावत्रयस्य अधिकरणं साधनाधिकरणं न भवतीति अभावत्रितयात्मकसमुदायाधिकरणं सामान्यादिकमादाय तत्र समवायेन वृत्तेरप्रसिद्धया प्रसञ्जितायाः अव्याप्तेः न प्रसक्तिरिति भावः ।

एवं सत्यपीति [पृ. 713] । यादृशसाध्याभावस्तोमाधिकरणं साधनाधिकरणमित्यादि विवक्षायामपि 'समवेतवान् जातेः' इत्यत्र जात्यधिकरणे गुणे द्रव्यत्व - तदन्यसमवेतोभयाभावसंयुक्तत्वादिरूपव्यधिकरणधर्मावच्छिन्नसमवेतसामान्याभाव - एतत्समुदायाधिकरणत्वसद्भावात् तादृशसमुदायाधिकरणगुणनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वत्वावच्छिन्नाभावस्य गुणासमवेते वृत्तिमति द्रव्यत्वादौ प्रसिद्धस्य हेतौ जातौ अभावात् अव्याप्तिः तदवस्था इति भावः ।

केषाञ्चिद्वृत्तिमतामवृत्तेरिति [पृ. 713] वृत्तिमद्वृत्तित्वसंपादनार्थम् एतदुक्तम् । **साधनस्य च वृत्तेरिति** [पृ. 713] । गुणादिवृत्तित्वाभावः साधने नास्ति इति सूचनाय एवमुक्तम् ।

दोषान्तरमाह - एतादृशविवक्षानुसरणे इति [पृ. 713]। यादृशसाध्याभावसमुदायाधिकरणं साधनाधिकरणं तादृशसाध्याभावसमुदायाधिकरणवृत्तित्वाभावस्य विवक्षायां 'भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वात्' इत्यत्र कूटघटितलक्षणोपरि दीधितिकारवक्ष्यमाणा अतिव्याप्तिः न संगच्छते। तत्र हि साध्याभावः भूतत्वमूर्तत्वान्यतराभावाभावः भूतत्वमूर्तत्वान्यतरस्वरूपः। तत्समुदायाधिकरणं भूतत्वमूर्तत्वोभयाधिकरणं पृथिव्यादिचतुष्टयम्। तद्वृत्तित्वाभावः स्पर्शवदन्यत्वे वर्तते। पृथिव्यादिचतुष्टयस्य स्पर्शवत्त्वात्। स्पर्शवदन्यत्वे पृथिव्यादिचतुष्टयवृत्तित्वाभावसत्त्वात् इति अतिव्याप्तिः वक्ष्यते। पूर्वोक्तविवक्षानुसरणे तु स्पर्शवदन्यत्वरूपसाधनाधिकरणस्य आकाशस्य मनसो वा भूतत्वमूर्तत्वोभयघटितसमुदायाधिकरणत्वं नास्तीति भूतत्वमूर्तत्वोभयघटितसमुदायस्य लक्षणाघटकत्वात् भूतत्व-व्यधिकरणधर्मावच्छिन्नसाध्याभाव-एतत्समुदायस्य एवं मूर्तत्व-व्यधिकरणधर्मावच्छिन्नसाध्याभाव-एतत्समुदायस्य च अधिकरणं साधनाधिकरणं आकाशं मनश्च भवतीति तादृशस्य एकैकस्य समुदायस्यैव लक्षणघटकतया तदधिकरणे आकाशे मनसि च स्पर्शवदन्यत्वस्य वर्तमानतया तदधिकरणवृत्तित्वाभावः स्पर्शवदन्यत्वरूपहेतौ नास्तीति अतिव्याप्तेरप्रसक्त्या वक्ष्यमाणा अतिव्याप्तिः न सङ्गच्छते। अतः एवं विवक्षा न कार्या। एतादृशविवक्षायाः अकरणे पूर्वोक्तरीत्या 'समवेतवान् जातेः' इत्यत्र अव्याप्तिर्दुर्वारा इत्याशयः।

एतादृशविवक्षानुसरणे दोषान्तरमप्याह—प्रतियोगितायामिति [पृ. 713]। साध्याभावपदेन साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावो विवक्षितः। तत्र प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणानुपादाने 'पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्यादौ पृथिवीत्वस्वरूपसाध्यतावच्छेदकव्यापकप्रति-

योगिताकाभावः जलावृत्तित्वावच्छिन्नसमवायसंबन्धावच्छिन्नाभावः तेजोऽवृत्तित्वावच्छिन्नसमवायसंबन्धावच्छिन्नाभावश्च तत्कूटाधिकरणं सामान्यादिकम् । तद्वृत्तित्वाभावस्य द्रव्यत्वप्रकारकप्रमाविषयत्वे सत्त्वात् अतिव्याप्तिः । तद्वारणाय प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणमिति पूर्वमुक्तम् ।

यदि तु यादृशसाध्याभावसमुदायाधिकरणं साधनवाधिकरणं तादृशसमुदायाधिकरणवृत्तित्वाभावः विवक्ष्यते, तदा साधनवतः कस्यापि द्रव्यस्य जलावृत्तित्वावच्छिन्नाभाव-तेजोऽवृत्तित्वावच्छिन्नाभाव - उभयघटितसमुदायाधिकरणत्वं न संभवति । जले जलावृत्त्यभावस्य सत्त्वेऽपि तेजोऽवृत्त्यभावस्य असत्त्वात् । तेजोऽवृत्तेः जलत्वस्य तत्र सद्भावात् । एवं तेजसि तेजोऽवृत्त्यभावस्य सत्त्वेऽपि जलावृत्त्यभावः नास्ति । तथा च साधनवाधिकरणे द्रव्ये उक्ताभावद्वयात्मकसमुदायाधिकरणत्वं न संभवतीति एकैकाभावघटितसमुदाय एव लक्षणघटकः तदधिकरणं जलं तेजश्च । तद्वृत्तित्वमेव द्रव्यत्वप्रकारकप्रमाविषयत्वेऽस्तीति अतिव्याप्तेः अप्रसक्त्या तद्वारणफलकस्य प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणस्य वैयर्थ्यमिति भावः ।

गादाधरी

[तादृशाक्षेपसमाधानम्]

अत्राहुः—

साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वेन साध्याभावविशेषणात् **उपदर्शितविशिष्टाभावनिरासः ।**

'गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः' इत्यादौ विशिष्टसत्तात्वाद्यवच्छिन्नसत्ताद्यभावस्य संग्रहाय अवच्छिन्नान्तम् । **वृत्तिः निरवच्छिन्ना ग्राह्या ।** अन्यथा 'संयोगी सत्त्वात्' इत्यादौ

संयोगत्वावच्छिन्नसंयोगाद्यभावस्य साध्यवद्वृत्तितया व्यधिकरण-धर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वेन अतिव्याप्त्यापत्तेः ।

सद्धेतौ साधनसमानाधिकरणस्य साध्यवद्वृत्त्यन्यस्य अप्रसिद्धेः समानाधिकरणधर्मावच्छिन्नेति । तथा च व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव **विशिष्टभेदप्रसिद्धिः** ।

न च - एवं साध्यतावच्छेदकव्यापकत्वं प्रतियोगिताविशेषणं व्यर्थम् । 'अभाववान् मेयत्वात्' इत्यादौ घटत्वादिरूपाभावस्य उक्तविशेषणेनैव व्यावर्तनात् इति - **वाच्यम्** ।

प्रमेयसाध्यकस्थले घटत्वपटत्वोभयाद्यवच्छिन्नप्रमेयसामान्याभावस्य गगनत्वाद्यवच्छिन्नगगनाभावाभिन्नस्य संग्रहाय साध्यतावच्छेदकव्यापकत्वेन समानाधिकरणधर्मस्य अवश्यं निवेशनीयतया घटत्वादिरूपाभावप्रतियोगितावच्छेदकघटत्वाभावत्वादेश्च अभावत्वाव्यापकत्वेन घटत्वादौ **विशिष्टभेदस्य** अक्षतत्वात् एतद्विशेषणेन तद्व्यावृत्तेः ।

विवरणम्

'अथ' इत्यादिना कृतस्य आक्षेपस्य मतान्तरेण समाधानमाह—**अत्राहुः** इत्यादिना [पृ. 720] । साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिः यः समानाधिकरणधर्मावच्छिन्नाभावः तद्भिन्नत्वमपि साध्याभावस्य विशेषणम् । 'सत्तावान् जातेः' इत्यादौ द्रव्यत्वविशिष्टसत्ताभावस्य द्रव्यान्यत्वविशिष्टसत्ताभावस्य च उक्तविशेषणं नास्ति । साध्यतावच्छेदकसत्तात्वविशिष्टसाध्यवति गुणे वर्तमानः द्रव्यत्वविशिष्टसत्ताभावः । एवं सत्तात्वविशिष्टवति द्रव्ये वर्तमानः द्रव्यान्यत्वविशिष्टसत्ताभावः । स च समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकः इति द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावयोः साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्ति समानाधि-

करणधर्मावच्छिन्नाभावभिन्नत्वं नास्तीति तयोरभावयोः साध्याभावपदेन ग्रहीतुमशक्यतया तत्समुदायमादाय 'सत्तावान् जातेः' इत्यत्र अव्याप्तिरिति यः आक्षेपः कृतः सः एवंरीत्या विलक्षणे समाहितो भवतीति आशयः ।

उपदर्शितविशिष्टाभावनिरास इति [पृ. 720] । द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावयोः लक्षणघटकत्वनिरास इत्यर्थः ।

साध्यतावच्छेदकावच्छिन्नेति विशेषणस्य प्रयोजनमाह—**गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरिति** [पृ. 720] । साध्यवद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वेन साध्याभावे विशेषिते 'गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः' इत्यत्र व्यभिचारिणि गुणकर्मान्यत्वविशिष्टसत्ताभावस्य लक्षणघटकत्वं न स्यात् । विशिष्टशुद्धयोः अनतिरेकात् सत्तारूपसाध्यवति गुणे कर्मणि च गुणकर्मान्यत्वविशिष्टसत्ताभावस्य वृत्तेः विशिष्टसत्तात्वरूपसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाच्च साध्यवद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वं विशिष्टसत्ताभावे नास्तीति तस्य लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नसाध्याभावमादाय अतिव्याप्तिः स्यात् । तद्वारणाय साध्यतावच्छेदकावच्छिन्नेत्युक्तम् ।

गुणकर्मान्यत्वविशिष्टसत्तात्वरूपसाध्यतावच्छेदकावच्छिन्नसाध्यवति द्रव्ये गुणकर्मान्यत्वविशिष्टसत्ताया एव सत्त्वेन तदभावः न वर्तत इति विशिष्टसाध्यवद्वृत्तिः अन्य एव अभावः तद्भिन्नः गुणकर्मान्यत्वविशिष्टसत्ताभावो भवतीति तस्य लक्षणघटकतया तद्वति गुणादौ हेतोः वृत्त्या नातिव्याप्तिः ।

वृत्तिः निरवच्छिन्ना ग्राह्या इति [पृ. 720] । साध्यवद्वृत्तीत्यत्र वृत्तौ निरवच्छिन्नत्वं विशेषणं देयम् । अन्यथा

'संयोगी सत्त्वात्' इत्यत्र संयोगत्वावच्छिन्नसंयोगाभावस्य अव्याप्यवृत्तितया संयोगत्वावच्छिन्नसंयोगवद्वृत्तित्वं समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं चास्तीति साध्यवद्वृत्त्यभावभिन्नः संयोगत्वावच्छिन्नसंयोगाभावः न भवतीति तस्य लक्षणाघटकतया घटत्वादिव्यधिकरणधर्मावच्छिन्नसंयोगाभावस्यैव लक्षणघटकतया अतिव्याप्तिः स्यात् । साध्यवन्निरूपितवृत्तौ निरवच्छिन्नत्वनिवेशे च संयोगवति विद्यमानः संयोगाभावः सावच्छिन्नवृत्तिक इति साध्यवति निरवच्छिन्नवृत्तिकः घटाद्यभाव एव । तद्भिन्नत्वं संयोगाभावेऽस्तीति तस्य लक्षणघटकतया तद्वति गुणादौ हेतोर्वृत्त्या नातिव्याप्तिः ।

समानाधिकरणधर्मावच्छिन्नेति विशेषणस्य प्रयोजनमाह—सद्धेताविति [पृ. 721] । तथा च साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिः यः अभावः तद्भिन्नत्वं यदि साध्याभावस्य विशेषणं स्यात्, तदा 'वह्निमान् धूमात्' इत्यादौ सद्धेतौ साधनसमानाधिकरणः साध्यवद्वृत्त्यभावभिन्नश्च साध्याभावः अप्रसिद्धः । तत्र हि समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य साधनसमानाधिकरणत्वविरहात् व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव ग्राह्यः । स च साध्यवद्वृत्तिः अभावः इति साध्यवद्वृत्त्यभावभिन्नत्वरूपविशेषणाक्रान्तो न भवति । समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य साध्यवद्वृत्त्यभावभिन्नत्वरूपविशेषणाक्रान्तत्वेऽपि साधनसमानाधिकरणत्वरूपविशेषणाक्रान्तता न भवति । तथा च विशेषणद्वयविशिष्टस्य साध्याभावस्य अप्रसिद्ध्या अव्याप्तिः । तद्वारणाय समानाधिकरणधर्मावच्छिन्नेत्युक्तम् । तथा च 'वह्निमान् धूमात्' इत्यादौ व्यधिकरणघटत्वावच्छिन्नवह्न्यभावः साध्यवद्वृत्तिरपि समानाधिकरणधर्मावच्छिन्नाभावः न भवतीति साध्यवद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावभिन्न एव सः । एवं साधनसमानाधिकरणश्चेति न विशेषणद्वयविशिष्टसाध्याभावाप्रसिद्धिरिति भावः ।

विशिष्टभेदप्रसिद्धिरिति [पृ. 721] । समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टाभावभिन्नत्वप्रसिद्धिरित्यर्थः ।

न च एवमिति [पृ. 721] । साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्ति-समानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वं यदि साध्याभावविशेषणं स्यात्, तदा प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविशेषणं व्यर्थम् । 'अभाववान् मेयत्वात्' इत्यादौ अभावत्वव्याप्यप्रतियोगिताकानां घटत्वाभावाभावपटत्वाभावाभावादीनां घटत्वपटत्वादिरूपाणां समुदायस्य अधिकरणमप्रसिद्धमिति अव्याप्तिवारणाय हि साध्यतावच्छेदकव्यापकत्वरूपं विशेषणं दत्तम् । घटत्वपटत्वादिरूपस्य अभावत्वव्याप्यप्रतियोगिताकस्य अभावस्य अभावत्वरूपसाध्यतावच्छेदकविशिष्टाभाववति घटे पटे च वर्तमानतया घटत्वाभावत्व-पटत्वाभावत्वादिरूप समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकतया च साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्ति समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावभिन्नत्वरूपविशेषणविरहात् लक्षणाघटकतया तत्समुदायाधिकरणाप्रसिद्धिनिबन्धनाव्याप्तेरप्रसक्तेरिति भावः ।

समाधत्ते—प्रमेयसाध्यकस्थले इति [पृ. 721] । प्रमेयसाध्यकस्थले घटत्वपटत्वोभयावच्छिन्नप्रमेय-सामान्याभावः साध्याभावपदेन ग्राह्य इति पूर्वमुक्तम् । स च अभावः गगनत्वावच्छिन्नगगनाभावसमनियततया तदभिन्नः । गगनत्वावच्छिन्नगगनाभावश्च प्रमेयत्वावच्छिन्नप्रमेयवद्वृत्तिः, गगनत्वरूपसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकश्च भवति । तद्भिन्नत्वं गगनत्वावच्छिन्नगगनाभावे नास्तीति तदभिन्ने घटत्वपटत्वोभयावच्छिन्नप्रमेयसामान्याभावेऽपि तद्भिन्नत्वरूपविशेषणविरहात् तस्य लक्षणघटकत्वं न स्यात् । अतः तस्य लक्षणघटकतासंपादनाय समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वं विशेषणं देयम् । तथा च

साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिः साध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकश्च यः अभावः तद्भिन्नत्वं साध्याभावस्य विशेषणम् इति पर्यवसितम् ।

गगनत्वं तु साध्यतावच्छेदकप्रमेयत्वव्यापकं न भवतीति तदवच्छिन्नाभावाभिन्नत्वमादाय लक्षणाघटकत्वशङ्कायाः नावकाशः । एवञ्च 'अभाववान् मेयत्वात्' इत्यत्र घटत्वाभावाभावस्य घटत्वाभावत्वरूपसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेऽपि घटत्वाभावत्वरूपो धर्मः अभावत्वरूपसाध्यतावच्छेदकव्यापको न भवतीति साध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वं घटत्वाभावाभावेऽस्तीति घटत्वादिरूपस्य अभावस्य लक्षणघटकतया तत्समुदायाधिकरणाप्रसिद्ध्या अव्याप्तेर्वारणाय साध्यतावच्छेदकव्यापकत्वं प्रतियोगिताविशेषणं देयमेव इति भावः ।

प्रमेयसाध्यके अभावसाध्यके च साध्यवद्वृत्तिः साध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नाभावः संयोगादिसंबन्धावच्छिन्नप्रमेयत्वावच्छिन्नाभावः संयोगादिसंबन्धावच्छिन्नाभावत्वावच्छिन्नाभावश्च इति अवधेयम् ।

एवं च साधनसमानाधिकरणाः साध्यतावच्छेदकावच्छिन्नसाध्यवन्निरूपित-निरवच्छिन्नवृत्तिकसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावभिन्नाश्च ये साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावाः तत्समुदायाधिकरणवृत्तित्वाभावाः यावन्तः वृत्तिमद्वृत्तयः तद्वत्त्वं व्याप्तिरिति पर्यवसितम् ।

विशिष्टभेदस्य इति [पृ. 721] । साध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टाभावभेदस्य इत्यर्थः ।

गादाधरी

न च - वाच्यत्वादिसाध्यकस्थले घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावस्य संयोगादिव्यधिकरणसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नवाच्यत्वाद्यभावाभिन्नतया साध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम् अक्षतमिति तत्संग्रहाय समानाधिकरणसंबन्धावच्छिन्नत्वस्यापि समानाधिकरणधर्मावच्छिन्नाभावप्रतियोगित्वविशेषणताया आवश्यकत्वात् प्रमेयसाध्यकस्थलीयोक्ताभावस्य व्यधिकरणसंबन्धावच्छिन्नगगनाद्यभावाभिन्नत्वेऽपि प्रतियोगितावच्छेदकधर्मे साध्यतावच्छेदकव्यापकत्वविशेषणमन्तरेणैव विशिष्टभिन्नत्वम् अव्याहतमेवेति - वाच्यम् ।

एवमपि गगनत्वादिना प्रमेयसामान्याभावस्य समानाधिकरणधर्मतादृशसंबन्धावच्छिन्नप्रतियोगिताकतया उक्ताभावस्य तदभिन्नत्वेन तत्र विशिष्टभेदनिर्वाहाय तादृशविशेषणस्य आवश्यकत्वात् । समानाधिकरण-संबन्धावच्छिन्नत्वविशेषणं परित्यज्य साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं प्रतियोगितायां निवेश्य तत्कार्यस्य साध्यतावच्छेदकव्यापकत्वरूपप्रतियोगितावच्छेदकविशेषणसार्थकत्वस्य च उपपादनसंभवाच्च । साध्यवद्वृत्तिः तादृशाभावश्च उभयत्वादिना साध्याभाव एव प्रसिद्ध इति न काचिदनुपपत्तिरिति ।

विवरणम्

न च वाच्यत्वादि साध्यकस्थले इति [पृ. 726] । 'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र घटत्वादिना वाच्यत्वाभाव एव साध्याभावपदेन ग्राह्यः । स च पूर्वोक्तविशेषणाक्रान्तो न भवति । घटत्वेन वाच्यत्वाभावस्य संयोगरूपव्यधिकरणसंबन्धावच्छिन्नवाच्यत्वत्वरूपसमानाधिकरणधर्मावच्छिन्नवाच्यत्वाभावसमनियतत्वेन तदभिन्नतया साध्यतावच्छेदकव्यापकः यः समा-

नाधिकरणधर्मः वाच्यत्वस्वरूपः तदवच्छिन्नप्रतियोगिताकत्वम् अक्षतमिति साध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावभिन्नत्वविरहात्। तथा च घटत्वावच्छिन्नवाच्यत्वाभावस्य संग्रहाय समानाधिकरणधर्मावच्छिन्नप्रतियोगितायां समानाधिकरणसंबन्धावच्छिन्नत्वमपि निवेशनीयम्। तथा च साध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्न-समानाधिकरणसंबन्धावच्छिन्नप्रतियोगिताकाभावभिन्नत्वं साध्याभावस्य विशेषणम्। घटत्वावच्छिन्नवाच्यत्वाभावस्य संयोगसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नवाच्यत्वाभावाभिन्नत्वेऽपि व्यधिकरणसंबन्धावच्छिन्नसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमेव अस्ति। न तु समानाधिकरण-संबन्धावच्छिन्नसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमिति तादृशप्रतियोगिताकाभावभिन्नत्वम् अक्षतमिति तस्य लक्षणघटकत्वोपपत्तिः।

एवं च प्रमेयसामान्यसाध्यकस्थले घटत्वपटत्वोभयावच्छिन्नप्रमेयसामान्याभावस्य गगनत्वावच्छिन्नगगनाभावाभिन्नत्वेऽपि गगनस्य अवृत्तिपदार्थतया सर्वोऽपि संबन्धः तस्य व्यधिकरणसंबन्ध एवेति गगनत्वावच्छिन्नगगनाभावः व्यधिकरणसंबन्धावच्छिन्नगगनत्वरूपसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकः, न तु समानाधिकरणसंबन्धावच्छिन्न - प्रतियोगिताकः। अतः तदभिन्नस्य प्रमेयसामान्याभावस्य समानाधिकरणधर्मसंबन्धावच्छिन्नप्रतियोगिताकाभावभिन्नत्वं प्रतियोगितावच्छेदकधर्मे साध्यतावच्छेदकव्यापकत्वविशेषणं विनैव सुघटमिति तद्विशेषणं व्यर्थमिति 'अभाववान् मेयत्वात्' इत्यत्र घटत्वादिरूपस्य अभावस्य समानाधिकरणधर्मसंबन्धावच्छिन्नप्रतियोगिताकाभावरूपतया तद्भिन्नत्वविरहादेव वारणसंभवेन प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविशेषणं व्यर्थमिति शङ्कितुराशयः।

समाधत्ते—एवमपि गगनत्वादिना [पृ. 726] इत्यादिना। गगनत्वावच्छिन्नगगनाभावस्य व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकत्वेऽपि गगनत्वेन प्रमेयसामान्याभावः संयोगादिसमानाधिकरणसंबन्धावच्छिन्नप्रतियोगिताकः भवितुमर्हति। गगनत्वं च गगनरूपप्रमेयवृत्तितया प्रतियोगितासमानाधिकरणो धर्मः। एवं च गगनत्वेन प्रमेयसामान्याभावः समानाधिकरणधर्म-समानाधिकरणसंबन्धावच्छिन्नप्रतियोगिताकः केवलान्वयी च। घटत्वपटत्वाभ्यां प्रमेयसामान्याभावश्च गगनत्वेन प्रमेयसामान्याभावाभिन्न इति तस्यापि समानाधिकरणधर्मसंबन्धावच्छिन्नप्रतियोगिताकाभावरूपतया तद्भिन्नत्वविरहात् तस्य लक्षणघटकत्वं न स्यात्। तत्संपादनाय च समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वविशेषणं आवश्यकमेव। गगनत्वं तु न प्रमेयत्वरूपसाध्यतावच्छेदकव्यापकमिति तदवच्छिन्नाभावाभिन्नत्वेऽपि न क्षतिः।

एवं च 'अभाववान् मेयत्वात्' इत्यत्र घटत्वादिरूपाभावानामपि लक्षणघटकतया तत्समुदायाधिकरणाप्रसिद्ध्या अव्याप्तेर्वारणाय प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविशेषणम् आवश्यकमिति भावः।

उक्ताभावस्येति [पृ. 726]। घटत्वपटत्वाभ्यां प्रमेयसामान्याभावस्येत्यर्थः। **तदभिन्नत्वेनेति** [पृ. 726] गगनत्वावच्छिन्नप्रमेयसामान्याभावाभिन्नत्वेनेत्यर्थः। **तत्रेति** [पृ. 726]। घटत्वपटत्वाभ्यां प्रमेयसामान्याभावे इत्यर्थः। **विशिष्टभेदनिर्वाहायेति**। [पृ. 726] समानाधिकरणधर्म-संबन्धावच्छिन्नप्रतियोगिताकत्वविशिष्टाभावभिन्नत्वनिर्वाहायेत्यर्थः। **तादृशविशेषणस्येति** [पृ. 276]। समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वविशेषणस्येत्यर्थः।

ननु समानाधिकरणधर्मसंबन्धावच्छिन्नाभावनिवेशे साध्यतावच्छेदकसमनियतप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य न व्यावृत्तिसंभवः। तथा हि—समवायेन वह्नौ साध्ये संयोगेन धूमहेतौ संयोगसंबन्धावच्छिन्नवह्न्यभावः न समानाधिकरणसंबन्धावछिन्नाभावभिन्नः। किन्तु समवायावच्छिन्नवह्न्यभाव एव तादृश इति तद्वति पर्वतादौ धूमस्य वृत्तेः अतिव्याप्त्यसत्त्वात्। अतः समानाधिकरणसंबन्धावच्छिन्नत्वं परित्यज्य साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशयति **समानाधिकरणेति** [पृ. 726]।

तत्कार्यस्येति [पृ. 726]। समानाधिकरणसंबन्धावच्छिन्नत्वनिवेशस्य यत्कार्यं वाच्यत्वादिसाध्यकस्थले घटत्वावच्छिन्नवाच्यत्वाभावस्य संयोगादिव्यधिकरणसंबन्धावच्छिन्न-वाच्यत्वत्वावच्छिन्नवाच्यत्वाभावाभिन्नत्वेऽपि समानाधिकरणसंबन्धावच्छिन्नाभावभिन्नतया संग्रहरूपं कार्यं तस्य उपपादनसंभवात् इत्यर्थः।

'इदं वाच्यं ज्ञेयत्वात्' इत्यत्र हि साध्यतावच्छेदकसंबन्धः स्वरूपसंबन्धः। स्वरूपसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकाभावस्तु अप्रसिद्धः। अतः साध्यतावच्छेदकस्वरूपसंबन्धावच्छिन्नसमानाधिकरणधर्मावच्छिन्नाभावपदेन स्वरूपसंबन्धावच्छिन्नघटाभावत्वाद्यवच्छिन्नाभाव एव ग्राह्यः। तद्भिन्नत्वं घटत्वावच्छिन्नवाच्यत्वाभावे अक्षतमिति भावः। **साध्यतावच्छेदकव्यापकत्वरूपेति** [पृ. 726] प्रमेयसाध्यकस्थले साध्यतावच्छेदकसंबन्धः भावाभावसाधारणदैशिकविशेषणतासंबन्धः। तदवच्छिन्नसमानाधिकरणधर्मावच्छिन्नाभावः गगनत्वेन प्रमेयसामान्याभावोऽपि। तद्भिन्नत्वं घटत्वपटत्वोभयावच्छिन्नप्रमेयसामान्याभावे नास्तीति तस्य सङ्ग्रहः न स्यात्। तत्संग्रहार्थं च समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वरूपविशेषणमपि सार्थकमिति भावः।

ननु एतावता साध्यवद्वृत्तिसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावभिन्नत्वं साध्याभावविशेषणमिति पर्यवसितम् । एवं सति प्रमेयसाध्यकस्थले भेदप्रतियोगिभूतः अभावः अप्रसिद्धः इत्याशङ्क्य आह - **साध्यवद्वृत्तिः तादृशाभावश्चेति** [पृ. 726] । घटत्वप्रकारकप्रमाविशेष्यतदन्योभयत्वेन प्रमेयसामान्याभावः भेदप्रतियोगी अभावः प्रसिद्ध इति भावः ।

गादाधरी

[साधनसमानाधिकरणत्वविशेषणे स्थलान्तरयोरपि अव्याप्त्यतिव्याप्त्योरभाव इति निरूपणम्]

एतेन 'नीलरूपघटत्वोभयाभाववान् नीलघटान्यत्वात्' इत्यादौ साधनसमानाधिकरणं पटीयनीलरूपं घटत्वं च न घट इति तादृशनीलरूपघटत्वात्मकसाध्याभावघटितकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरित्यपि निरस्तम् । तादृशाभावे उक्तभेदासत्त्वेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् ।

एवं घटवृत्तित्वविशिष्टाकाशाभावादेरभावे साध्ये मेयत्वादिहेतौ साध्याभावस्य विशिष्टाकाशाभावादेः आकाशाभावानतिरिक्ततया जगत एव साध्याभावकूटाधिकरणतापत्त्या अतिव्याप्तिरिति साध्याभावत्वविशिष्टाधिकरणत्वमेव विवक्षणीयम् । तथा च पटे घटवृत्तित्वविशिष्टाकाशाभावाभावो नास्तीत्यादिप्रत्ययाभावात् पटादेः न तादृशविशिष्टाभावाधिकरणत्वमिति न दोषः ।

एवं च साधनाधिकरणेऽपि साध्याभावत्वेन वृत्तिर्विवक्षणीया । अन्यथा जातिमदन्यत्वविशिष्टाकाशाभावस्य अभावे साध्ये समवायेन हेतौ साधनसमानाधिकरणाकाशाभावस्य साध्याभावत्वविशिष्टस्य अधिकरणे सामान्यादौ समवायेन वृत्तेरप्रसिद्धत्वात् अव्याप्त्यापत्तेः तादृशविवक्षयाप्युक्तोभयाभावसाध्यकस्थले अव्याप्तिवारणं संभवति । प्रत्येकाधिकरणे उभयाभावाभावत्वेन अवृत्तेः ।

विवरणम्

एतेनेति [पृ. 730]। 'अत्राहुः' [पृ. 720] इत्यादिना उक्तस्य साध्याभावे विशेषणस्य अनुसरणेनेत्यर्थः। तादृशविशेषणाभावे साधनसमानाधिकरणसाध्याभावसमुदायाधिकरणवृत्तित्वाभाववत्त्वमिति यथाश्रुतलक्षणे 'नीलरूपघटत्वोभयाभाववान् नीलघटान्यत्वात्' इत्यत्र अव्याप्तिः। नीलघटान्यत्ववति नीलपटे रक्तघटे च नीलरूपघटत्वोभयाभावः वर्तते इत्ययं सद्धेतुः। अत्र साध्याभावः नीलरूपघटत्वोभयाभावाभावः - नीलरूपघटत्वोभयस्वरूपः। उभयस्य प्रत्येकानतिरेकात् नीलरूपात्मकः घटत्वात्मकश्च साध्याभावः भवति। उभयमपि प्रत्येकं साधनसमानाधिकरणम्। साधनवति नीलपटे पटीयनीलरूपस्य साधनवति रक्तघटे घटत्वस्य च सत्त्वात्। एवं च साधनसमानाधिकरणः साध्याभावः इत्यनेन पटीयनीलरूपं घटत्वं च ग्रहीतुं शक्येते। तत्समुदायाधिकरणं च अप्रसिद्धम्। नीलपटे पटीयनीलरूपसत्त्वेऽपि घटत्वविरहात्, रक्तघटे घटत्वसत्त्वेऽपि पटीयनीलरूपविरहात्। एवं च पटीयनीलरूपघटत्वोभयात्मकसाध्याभावसमुदायाधिकरणाप्रसिद्ध्या अव्याप्तिः प्रसक्ता। सा च साध्याभावे साध्यवदवृत्तिसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वविशेषणदानेन वारिता भवति। साध्यवति नीलपटे पटीयनीलरूपम् अस्ति। साध्यवति रक्तघटे घटत्वमस्ति। पटीयनीलरूपं घटत्वं च समानाधिकरणधर्मावच्छिन्नसाध्याभावरूपम्। अतः उभयोरपि साध्यवदवृत्तिसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वं नास्तीति न लक्षणघटकत्वम्। किन्तु व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव लक्षणघटकः। स च घटत्वादिना नीलरूपघटत्वोभयाभावो नास्ति' इति प्रतीतिसिद्धाभावः। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकतया समानाधिकरणधर्मावच्छिन्नाभावभिन्नः। तद्घटितकूटाधिकरणं जगदेव। तद्वृत्तित्वाभावस्य वृत्तिमद्वृत्तेः हेतौ सत्त्वेन नाव्याप्तिरिति भावः।

अत्राहुः [पृ. 720] इत्यादिना उक्तस्य विशेषणस्य अननुसरणेऽपि 'नीलरूपघटत्वोभयाभाववान्, नीलघटान्यत्वात्' इत्यत्र साध्याभावत्वविशिष्टाधिकरणतानिवेशादपि अव्याप्तिवारणं संभवतीत्याह - एवं घटवृत्तित्वविशिष्टेत्यादिना [पृ. 730]। साध्याभावसमुदायाधिकरणमित्यनेन साध्याभावत्वविशिष्टाधिकरणमेव विवक्षणीयम्। अन्यथा 'घटवृत्तित्वविशिष्टाकाशाभावाभाववान् मेयत्वात्' इत्यत्र अतिव्याप्तेः। अयं हेतुः घटान्तर्भावेण व्यभिचारी। अत्र साध्याभावः घटवृत्तित्वविशिष्टाकाशाभावाभावाभावः। घटवृत्तित्वविशिष्टाकाशाभावस्वरूपः। विशिष्टशुद्धयोरनतिरेकात् शुद्धः यः आकाशाभावः तत्स्वरूपश्च। तत्कूटाधिकरणं जगदेव भवति। आकाशाभावस्य केवलान्वयित्वात्। जगद्वृत्तित्वाभावश्च व्यधिकरण धर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिः इति तद्वत्त्वस्य हेतौ सत्त्वात् अतिव्याप्तिः भवति। तद्वारणाय साध्याभावत्वविशिष्टनिरूपिताधिकरणत्वं विवक्षणीयम्। तथा विवक्षणे घट एव साध्याभावत्वविशिष्टनिरूपिताधिकरणतावान्। घटे घटवृत्तित्वविशिष्टाकाशाभावाभावो नास्तीति प्रत्ययसद्भावात्। पटादिकं तु साध्याभावत्वविशिष्टाधिकरणं न भवति। पटे 'घटवृत्तित्वविशिष्टाकाशाभावाभावो नास्ति' इति प्रतीतिविरहात्। तथा च साध्याभावत्वविशिष्टाधिकरणं सकलं जगत् न भवति। किन्तु घट एव। घटवृत्तित्वत्वावच्छिन्नाभावस्तु यावदन्तर्गतः प्रमेयत्वे नास्तीति नातिव्याप्तिः।

इत्थं साध्याभावत्वविशिष्टनिरूपिताधिकरणत्वविवक्षणे सति 'जातिमदन्यत्वविशिष्टाकाशाभावाभाववान् समवायसंबन्धेन जातेः' इत्यत्र सद्धेतौ अव्याप्तिः। जातिमदन्यत्वविशिष्टाकाशाभावाभावाभावत्वरूपं यत् साध्याभावत्वं तद्विशिष्टाधिकरणं सामान्यादिकमेव। जातिमत्सु द्रव्यगुणकर्मसु जातिमदन्यत्व-

विशिष्टाकाशाभावाभावस्यैव सत्त्वात्। सामान्यादिनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वमप्रसिद्धमिति अव्याप्तिः। तद्वारणाय साधनसमानाधिकरणत्वशरीरे साधनाधिकरणनिरूपितसाध्याभावत्वावच्छिन्नवृत्तिः निवेशनीया। तथा सति साधनस्य जातेः अधिकरणे द्रव्यादौ साध्याभावस्य आकाशाभावत्वेन रूपेण वृत्तावपि साध्याभावत्वेन रूपेण वृत्तिर्नास्ति। द्रव्यादौ जातिमदन्यत्वविशिष्टाकाशाभावाभावो नास्तीति प्रतीतिविरहात्। अतः साध्याभावपदेन व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव ग्राह्य इति नाव्याप्तिः। इत्थं च विशिष्टाधिकरणत्वविवक्षणेनैव 'नीलरूपघटत्वोभयाभाववान् नीलघटान्यत्वात्' इत्यत्रापि अव्याप्तिवारणं संभवति। तत्र साध्याभावात्मकस्य पटीयनीलरूपस्य घटत्वस्य च साधनवति नीलपटे रक्तघटे च पटीयनीलरूपत्वेन घटत्वत्वेन च वृत्तावपि साध्याभावत्वेन - नीलरूपघटत्वोभयाभावाभावत्वेन अवृत्तेः। नीलपटे रक्तघटे च नीलरूपघटत्वोभयाभावो नास्तीति प्रतीतिविरहात्। तादृशोभयाभावस्यैव तत्र सत्त्वात्। एवं च पटीयनीलरूपघटत्वयोः लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव लक्षणघटक इति नाव्याप्तिरिति भावः।

उक्तोभयाभावसाध्यकस्थले इति [पृ. 730]। 'नीलरूपघटत्वोभयाभाववान् नीलघटान्यत्वात्' इत्यत्र इत्यर्थः।

गादाधरी

वस्तुतः घटवृत्तित्वविशिष्टाकाशाभावाद्यभावः घटत्वाद्यभावसमनियततया तदभिन्न इति घटत्वादिरपि तदभावः। इत्थं च तद्घटितकूटाधिकरणता न जगत इति दर्शितातिव्याप्त्यनवकाशात् साध्याभावत्वविशिष्टाधिकरणत्वविवक्षणमफलम्। साध्याभावत्वेन साधनवदवृत्तित्वं तु साध्याभावत्वविशिष्टाधिकरणत्वाविवक्षणेऽपि 'घटान्यत्वविशिष्टद्रव्यत्वाभाववान् घटत्वात्' इत्यत्र

साध्याभावस्य द्रव्यत्वस्य द्रव्यत्वत्वादिना साधनसमानाधिकरण-तया द्रव्यस्यैव तद्घटितकूटाधिकरणत्वेन अव्याप्तेर्वारणाय निवेश्यमेव ।

न च - एवमपि पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यादौ साध्यतावच्छेदकविशिष्टवदवृत्त्योः प्रत्येकं साधनसमा-नाधिकरणयोः घटान्यत्वविशिष्टद्रव्यत्वाभाव-घटेतरपृथिव्यन्यत्व-विशिष्टद्रव्यत्वाभावयोः अधिकरणं गुणाद्येव इति अतिव्याप्तिः दुर्वारैव इति—वाच्यम् । विशिष्टस्य अतिरिक्ततापक्षमवलम्ब्यैव तादृशातिप्रसङ्गस्य समाधातुं शक्यत्वात् इति ।

विवरणम्

वस्तुतः इत्यादि । [पृ. 733] 'घटवृत्तित्वविशिष्टाकाशा-भावाभाववान् मेयत्वात्' इत्यत्र अतिव्याप्तिवारणाय साध्याभाव-त्वविशिष्टाधिकरणत्वं निवेशनीयम् इति पूर्वमुक्तम् । तत् न निवेशनीयमिति इदानीमुच्यते । तदनिवेशे उक्तस्थले अतिव्याप्ति-वारणं कथमिति चेत् - उच्यते—घटवृत्तित्वविशिष्टाकाशाभावा-भावः न केवलम् आकाशाभावस्वरूपः । किन्तु घटत्वस्वरूपोऽपि । घटवृत्तित्वविशिष्टाकाशाभावाभावस्य घटभिन्ने एव सत्त्वेन तत्र घटत्वाभावस्य नियमेन सत्त्वात् घटवृत्तित्वविशिष्टाकाशाभावाभावः घटत्वाभावश्च समनियततया अभिन्न इति घटवृत्तित्वविशिष्टा-काशाभावाभावः घटत्वाभावाभावस्वरूपः । तथा च उक्तस्थले साध्याभावः घटत्वस्वरूप इति फलितम् । घटत्वात्मकसाध्याभाव-घटितसमुदायाधिकरणं न सर्वं जगत् । किन्तु घटः । घटवृत्तित्व-त्वावच्छिन्नाभावश्च मेयत्वे नास्तीति अतिव्याप्तेरप्रसक्त्या साध्याभावत्वविशिष्टाधिकरणत्वविवक्षणमनावश्यकम् । परन्तु साध्याभावत्वेन रूपेण साधनवद्वृत्तित्वं तु विवक्षणीयमेव । अन्यथा साध्याभावत्वविशिष्टाधिकरणत्वाविवक्षणेन पूर्वोक्ते

'जातिमदन्यत्वविशिष्टाकाशाभावाभाववान् जातेः' इति स्थले अव्याप्तेः अप्रसक्तावपि, 'घटान्यत्वविशिष्टद्रव्यत्वाभाववान् घटत्वात्' इत्यत्र अव्याप्तिः स्यात्। तथा हि - हेतुमति घटे घटान्यत्वविशिष्टस्य द्रव्यत्वस्य अभावः अस्तीति अयं सद्धेतुः। अत्र साध्याभावः घटान्यत्वविशिष्टद्रव्यत्वाभावाभावः घटान्यत्वविशिष्टद्रव्यत्वस्वरूपः। विशिष्टशुद्धयोरनतिरेकात् शुद्धद्रव्यत्वस्वरूपश्च। अतः अत्र साध्याभावस्य द्रव्यत्वस्य द्रव्यत्वत्वेन रूपेण साधनवद्घटवृत्तित्वमस्तीति लक्षणघटकतया द्रव्यत्वघटितसमुदायाधिकरणं द्रव्यं सर्वं भवति। द्रव्यवृत्तित्वत्वावच्छिन्नाभावः घटत्वे नास्तीति अव्याप्तिः। साध्याभावत्वेन साधनवद्वृत्तित्वनिवेशे तु घटान्यत्वविशिष्टद्रव्यत्वाभावाभावत्वेन साध्याभावस्य साधनवद्वृत्तित्वं नास्ति। 'घटे घटान्यत्वविशिष्टद्रव्यत्वाभावो नास्ति' इति प्रतीतिविरहात्। अतः व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव लक्षणघटकतया नाव्याप्तिः इति भावः।

न च एवमपीति [पृ. 734]। साध्याभावत्वेन रूपेण साधनवद्वृत्तित्वनिवेशेऽपि 'पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यत्र अतिव्याप्तिः। तत्र साध्यतावच्छेदकसमनियतप्रतियोगिताकः अभावः घटान्यत्वविशिष्टद्रव्यत्वाभावः घटेतरपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावश्च। घटान्यत्व-घटेतरपृथिव्यन्यत्वयोः पृथिव्यन्यत्वरूपत्वात्। तत्र घटान्यत्वविशिष्टद्रव्यत्वाभावः साधनवति द्रव्यत्ववति घटे वर्तते। घटेतरपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावः साधनवति घटेतरपटादौ वर्तते। अतः उभौ अभावौ प्रत्येकं साधनसमानाधिकरणौ। एवं साध्यतावच्छेदकविशिष्टसाध्यवद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावभिन्नौ च। पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वावच्छिन्नद्रव्यत्ववति जलादौ घटान्यत्वविशिष्टद्रव्यत्वस्य घटेतरपृथिव्यन्यत्वविशिष्टद्रव्यत्वस्य च सत्त्वेन

तदभावयोरवृत्तेः । तथा च तत्र निरुक्तसाध्याभावघटितकूटाधिकरणं गुणादिकमेव । पृथिव्याम् एकैकस्य अभावस्य सत्त्वेऽपि अभावद्वयस्यासत्त्वात्, जलादौ तु घटान्यत्वविशिष्टद्रव्यत्वस्यैव सत्त्वेन तदभावस्य असत्त्वात् । अतः साध्याभावकूटाधिकरणं गुणादिकमेव । तद्वृत्तित्वाभावः द्रव्यत्वरूपहेतावस्तीति अतिव्याप्तिरिति शङ्का ।

समाधानं तु - विशिष्टमतिरिक्तमिति पक्षमवलम्ब्य अतिव्याप्तिर्वारणीया इति । तथा हि - पृथिव्यन्यत्वविशिष्टद्रव्यत्वं घटान्यत्वविशिष्टद्रव्यत्वापेक्षया |घटेतरपृथिव्यन्यत्वविशिष्टद्रव्यत्वापेक्षया च अन्यत् । एवं च साध्यतावच्छेदकं पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वं यत्र वर्तते, तत्र घटान्यत्वविशिष्टद्रव्यत्वाभावीयप्रतियोगिता नास्तीति उक्तविशिष्टाभावयोः साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहेण लक्षणाघटकतया पृथिव्यन्यत्वविशिष्टद्रव्यत्वाभाव एव लक्षणघटकः । तत्समुदायाधिकरणं पृथिवी । तद्वृत्तित्वाभावः द्रव्यत्वे नास्तीति नातिव्याप्तिरिति ।

दीधितिः

तथापि भूतत्वमूर्तत्वयोः अन्यतरत्वेन अभावे साध्ये स्पर्शवदन्यत्वादौ अतिव्याप्तिः, तादृशसाध्याभावसमुदायवति पृथिव्यादौ तस्य अवृत्तेः ।

गादाधरी

[साधनसमानाधिकरणत्वनविशेषणेऽपि स्थलविशेषे अतिव्याप्त्या लक्षणस्य दुष्टतोपपादनम्]

भूतत्वमूर्तत्वयोरिति [पृ. 736] । उभयत्वावच्छिन्नाभावस्य साध्यत्वे हेतोः व्यभिचारित्वाभावात् अन्यतरत्वावच्छिन्नाभावस्य साध्यतानुसरणम् । पृथिव्यादाविति [पृ. 736] । आकाशे भूतत्वस्य मनसि च मूर्तत्वस्य साधनसमानाधिकरणतया आका-

शस्य, मनसः, प्रत्येकं तदुभयानधिकरणत्वेन साध्याभावसमुदाया-नधिकरणत्वात् इति भावः । आदिशब्दात् 'भूतभेदमूर्तभेदान्यतरा-भाववान् भूतमूर्तान्यतरत्वात्' इत्यादौ भूतभेदमूर्तभेदात्मकसाध्या-भावघटितसमुदायवति कालदिगादौ हेतोरवृत्त्या अतिव्याप्तेः परिग्रहः ।

विवरणम्

साध्याभावे साधनसमानाधिकरणत्वविशेषणे दत्तेऽपि कूटघटितलक्षणस्य स्थलान्तरे अतिव्याप्तिः इत्युच्यते दीधितौ – **तथापीत्यादिना** [पृ. 736] । 'भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वात्' इत्यत्र अतिव्याप्तिः । भूतत्वमूर्तत्वान्यतराभावा-भाववति आकाशे मनसि च स्पर्शवदन्यत्वरूपहेतुसत्त्वात् अयं हेतुः व्यभिचारी । अत्र साध्याभावः भूतत्वस्वरूपः मूर्तत्वस्वरूपश्च । तदुभयसमुदायाधिकरणं पृथिव्यादिचतुष्टयमेव, न तु आकाशं मनो वा । तत्र भूतत्वमूर्तत्वोभयविरहात् । पृथिव्यादिचतुष्टयवृत्ति-त्वाभावश्च स्पर्शवदन्यत्वेऽस्तीति कूटघटितलक्षणस्य अतिव्याप्ति-रिति भावः । भूतत्वमूर्तत्वोभयाभावस्य साध्यत्वम् उपेक्ष्य अन्यतराभावस्य साध्यत्वानुसरणं कुत इत्यत्राह गादाधर्याम् – **उभयत्वावच्छिन्नाभावस्येति** [पृ. 736] । भूतत्वमूर्तत्वोभयत्वा-वच्छिन्नाभावस्य साध्यत्वे स्पर्शवदन्यत्वं सद्धेतुरेव स्यात् । हेतुमति आकाशे मनसि च भूतत्वमूर्तत्वोभयाभावस्य सत्त्वात् । तथा च सद्धेतौ लक्षणगमनं न दोषाय इत्यतः स्पर्शवदन्यत्वस्य असद्धेतुत्व-संपादनाय भूतत्वमूर्तत्वान्यतराभावस्य साध्यत्वानुसरणम् । आकाशे मनसि च भूतत्वमूर्तत्वयोः अन्यतरस्य भूतत्वस्य मूर्तत्वस्य च सद्भावात् तदन्यतरत्वावच्छिन्नाभावरूपं साध्यं नास्तीति साध्याभाववति तत्र हेतुसत्त्वात् अयं हेतुः व्यभिचारी । तत्र लक्षणसत्त्वम् अतिव्याप्त्यापादकमिति भावः ।

आदिशब्दादिति [पृ. 737] । 'भूतभेद-मूर्तभेदान्यतराभाववान् भूतमूर्तान्यतरत्वात्' इत्ययं हेतुः व्यभिचारी । अत्र साध्याभावः भूतभेदमूर्तभेदान्यतरात्मकः । तद्वति मनसि आकाशे च भूतमूर्तान्यतरत्वसत्त्वात् अयं हेतुः व्यभिचारी । अत्र भूतभेद-मूर्तभेदयोः साध्याभावरूपयोः समुदायस्याधिकरणं कालदिगादिकम् । तद्वृत्तित्वाभावः भूतमूर्तान्यतरत्वेऽस्तीति कूटघटितलक्षणस्य अतिव्याप्तिरिति भावः ।

दीधितिः

किञ्च महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणताविशेषेण हेतौ अतिव्याप्तिः । तादृशसाध्याभावसमुदायवति महाकाले तेन संबन्धेन वृत्तिमन्मात्रस्यैव वृत्तेः ।

गादाधरी

[पूर्वोक्तसकलदोषवारकपरिष्कारप्रदर्शनपूर्वकं 'किञ्च' इत्यादिदीधित्यवतरणम्]

ननु साधनाधिकरणे येषां परस्परमैकाधिकरण्यं तत्समुदायस्य विवक्षितत्वात् नायं दोषः । भूतत्वमूर्तत्वाद्योः प्रत्येकं साधनसमानाधिकरणत्वेऽपि साधनवति परस्परमैकाधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणाघटकत्वात् तदेकतरघटितकूटस्यैव तथात्वात् तद्वति च हेतोः वृत्तेः प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं त्याज्यमेव ।

एवं च विशिष्टस्य अनतिरिक्तत्वेऽपि 'पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वात्' इत्यादौ न उक्तरीत्या अतिव्याप्तिसंभवः । उक्तविशिष्टाभावानां साधनवति द्रव्यादौ ऐकाधिकरण्याभावात् ।

एवं तादृशकूटाधिकरणपृथिव्यादिवृत्तित्वस्य द्रव्यवृत्तित्वत्वादिना योऽभावः, तस्यापि तादृशवृत्तित्वत्वव्यापकप्रतियोगि-

ताकयावदभावान्तर्गततया तद्वत्वविरहादपि उक्तहेतौ नाति-व्याप्तिसंभवः ।

विवरणम्

किञ्च [पृ. 738] इत्यादिदीधितिग्रन्थमवतारयति—ननु साधनाधिकरणे इत्यादिना [पृ. 738] । साधनाधिकरणे यावतां साध्याभावानां परस्परं सामानाधिकरण्यं संभवति, तावतां समुदायः साध्याभावसमुदायपदेन विवक्षितः । एवं सति 'भूतत्व-मूर्तत्वान्यतराभाववान् मूर्तत्वात्' इत्यत्र भूतत्वमूर्तत्वयोः साध्याभावरूपयोः प्रत्येकं साधनवद्वृत्तित्वेऽपि साधनवति आकाशे मनसि च तयोः द्वयोः सामानाधिकरण्यविरहात् तदुभयघटितसमुदायः न लक्षणघटकः । किन्तु एकतरघटितसमुदाय एव लक्षणघटकः । अर्थात् भूतत्वव्यधिकरणधर्मावच्छिन्नसाध्याभाव - एतत्समुदायः, मूर्तत्वव्यधिकरणधर्मावच्छिन्नसाध्याभावसमुदायः लक्षणघटकः । तदधिकरणम् आकाशं मनश्च । तद्वृत्तित्वमेव स्पर्शवदन्यत्वे अस्तीति नातिव्याप्तिरिति भावः ।

ननु एवं विवक्षायां प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं व्यर्थम् । 'पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्यत्र साध्यतावच्छेदकपृथिवीत्वत्वव्यापकप्रतियोगिताकानां जलावृत्तित्वावच्छिन्नाभाव-तेजोऽवृत्तित्वावच्छिन्नाभावादीनां समुदायस्य अधिकरणमप्रसिद्धमिति प्रसक्तायाः अव्याप्तेः वारणाय हि प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणमुपात्तम् । साधनवति यावतामैकाधिकरण्यं संभवति तावतां समुदायस्य विवक्षणे साधनवति तेजसि जले वा तेजोऽवृत्यभावस्य जलावृत्त्यभावस्य च एकैकस्य सत्त्वेऽपि उभयोरभावात् उभयोः अभावयोः साधनाधिकरणे सामानाधिकरण्यविरहात् अभावद्वयसमुदायस्य लक्षणाघटकतया एकैकाभावघटितसमुदाय एव लक्षणघटकः । तदधि-

करणतेजःप्रभृतिवृत्तित्वस्यैव द्रव्यत्वप्रकारकप्रमाविषयत्वे सत्त्वेन अतिव्याप्त्यनवकाशात् तद्वारणफलकं साध्यतावच्छेदकव्याप्यत्व-विशेषणं व्यर्थमित्याशङ्क्य इष्टापत्त्या परिहरति—**प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं त्याज्यमेवेति** [पृ. 738]।

एवं चेति [पृ. 738]। साधनाधिकरणे येषां परस्परसे-काधिकरण्यं तत्समुदायविवक्षायां 'पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यत्र घटान्यत्वविशिष्टद्रव्यत्वाभाव-घटेतरपृथिव्यन्य-त्वविशिष्टद्रव्यत्वाभावयोः साधनाधिकरणे सामानाधिकरण्यविर-हात् तत्समुदायस्य लक्षणाघटकतया तदधिकरणगुणादिवृत्तित्वा-भावमादाय पूर्वोक्तातिव्याप्तेरपि अनवकाशात् तद्वारणार्थं विशिष्टस्य अतिरिक्ततापक्षावलम्बनमपि अनावश्यकम् इति भावः।

प्रकारान्तरेणापि 'पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यत्र अतिव्याप्तिं वारयति - **एवमिति** [पृ. 738]। पृथिव्यन्य-त्वविशिष्टद्रव्यत्वाभावघटितकूटाधिकरणं पृथिवी। तद्वृत्तित्वत्व-व्यापकप्रतियोगिताकः अभावः द्रव्यवृत्तित्वत्वावच्छिन्नाभावोऽपि। द्रव्यवृत्तित्वत्वावच्छिन्नाभावश्च द्रव्यत्वरूपहेतौ नास्ति इति नाति-व्याप्तिरिति भावः।

गादाधरी

न च - द्रव्यवृत्तित्वत्वावच्छिन्नाभावप्रतियोगिताया आका-शादिवृत्तित्वसाधारणतया तादृशवृत्तित्वत्वाव्याप्यत्वात् न तादृशा-भावो लक्षणघटक इति-वाच्यम्।

साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापक्षे प्रति-योगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणव्यावृत्त्यभावेन तादृश-विशेषणस्य परित्याज्यत्वात्। 'वह्निमान् धूमात्' इत्यत्र आलो-काद्यवृत्तित्वरूपेण विवह्निवृत्तित्वाभावस्य प्रतियोगिताया आलो-

कादिनिष्ठपर्वतादिवृत्तिसाधारणं साधनसमानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्वत्वं प्रति अव्यापकतयैव तादृशाभावव्यावर्तनात्। साधनाधिकरणे साध्याभावत्वेन वृत्तेः विवक्षितत्वादेव भूतत्वमूर्तत्वयोः उभयत्वेन अभावे साध्ये स्पर्शवदन्यत्वादौ द्रव्यवृत्तित्वाभावमादाय न दोषः।

व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताविशेषणात् पर्वतसंयुक्तत्व-पर्वतान्यसंयुक्तत्वोभयत्वाद्यवच्छिन्नाभावस्य पर्वतासंयुक्तघटादौ वर्तमानस्य धूमादावसत्त्वेऽपि न क्षतिः। प्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणेऽपि तादृशाभावमादाय अव्याप्तेः आवश्यकतया एतद्विशेषणस्य तद्विशेषणसत्त्वेऽपि आवश्यकत्वात्।

विवरणम्

ननु साध्याभावसमुदायाधिकरणवृत्तित्वत्वसमनियतप्रतियोगिताकाभावस्यैव विवक्षितत्वात् द्रव्यवृत्तित्वत्वावच्छिन्नाभावस्य पृथिवीवृत्तित्वत्वव्यापकप्रतियोगिताकत्वेऽपि पृथिवीवृत्तित्वत्वव्याप्यप्रतियोगिताकत्वं नास्ति। पृथिवीवृत्तित्वत्वशून्ये जलादिवृत्तित्वेऽपि द्रव्यवृत्तित्वत्वावच्छिन्नाभावीयप्रतियोगितायाः सत्त्वात् इति कथमसौ लक्षणघटकः, कथं च तमादाय अतिव्याप्तिवारणम् इति आशङ्कते—न च द्रव्यवृत्तित्वत्वावच्छिन्नाभावेति [पृ. 740]।

समाधत्ते—साधनसमानाधिकरणत्वस्येति [पृ. 740]। साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वपक्षे साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वमात्रं प्रतियोगितायां विशेषणम्, न तु तादृशवृत्तित्वत्वव्याप्यत्वमपि, प्रयोजनविरहात्। 'वह्निमान् धूमात्' इत्यादौ साध्याभावसमुदायाधिकरण-निर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताकं आलोकावृत्तित्वावच्छिन्नाभावमादाय अव्याप्तिवारणार्थं हि तादृशवृत्तित्वत्वव्याप्यत्वं विशेषणमिति

पूर्वमुक्तम् । साध्याभावे साधनसमानाधिकरणत्वविशेषणपक्षे समानाधिकरणवन्हित्वावच्छिन्नवन्ह्यभावस्य साधनधूमसमानाधिकरणत्वविरहेण लक्षणाघटकतया व्यधिकरणघटत्वाद्यवच्छिन्नवन्ह्यभावानामेव लक्षणघटकतया तत्समुदायाधिकरणजगद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वविरहादेव आलोकावृत्तित्वावच्छिन्नाभावस्य ग्रहीतुमशक्यतया तमादाय अव्याप्तेरप्रसक्तेः । जगद्वृत्तित्वत्वं हि पर्वतादिवृत्तित्वेऽप्यस्ति । तत्र आलोकावृत्त्यभावीयप्रतियोगिता नास्ति । पर्वतादिवृत्तित्वस्य आलोकवृत्तित्वात् ।

एवं च साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्याप्यत्वविशेषणस्य अस्यां विवक्षायां प्रयोजनविरहेण परित्याज्यतया द्रव्यवृत्तित्वत्वावच्छिन्नाभावं साध्याभावसमुदायाधिकरणपृथिवीवृत्तित्वत्वव्यापकप्रतियोगिताकम् आदाय 'पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यत्र अतिव्याप्तिवारणं संभवतीति भावः ।

एवं 'भूतत्वमूर्तत्वोभयाभाववान्, स्पर्शवदन्यत्वात्' इत्यत्र सद्धेतौ साध्याभावरूपभूतत्वमूर्तत्वोभयघटितसमुदायाधिकरणपृथिव्यादिचतुष्टयवृत्तित्वत्वव्यापकप्रतियोगिताकस्य यावदन्तर्गतस्य द्रव्यवृत्तित्वत्वावच्छिन्नद्रव्यवृत्तित्वाभावस्य स्पर्शवदन्यत्वरूपहेतौ अभावादव्याप्तिः । स्पर्शवदन्यत्वे आकाश-मनोरूपद्रव्यवृत्तित्वस्यैव सत्त्वात् इत्याशङ्क्य साधनाधिकरणे साध्याभावत्वेन वृत्तेरेव साधनसमानाधिकरणपदेन विवक्षितत्वात् भूतत्वमूर्तत्वयोः भूतत्वत्वमूर्तत्वत्वाभ्यां साधनवद्वृत्तित्वेऽपि भूतत्वमूर्तत्वोभयाभावाभावत्वेन साधनवद्वृत्तित्वं नास्ति । साधनवति आकाशे मनसि च भूतत्वमूर्तत्वोभयाभावो नास्ति इति प्रतीतिविरहात् । अतः भूतत्वमूर्तत्वयोः लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव लक्षणघटकतया तदधिकरणजगद्वृत्तित्वत्वव्यापकप्रतियोगिताकाभावः न द्रव्यवृत्तित्वाभावः, किन्तु घटत्वेन जगद्वृत्तित्वाभाव

एव । तद्वत्त्वं हेतावस्तीति नाव्याप्तिरिति समाधत्ते—**साधनाधिकरणे** इति [पृ. 741] ।

नन्वेवमपि 'वन्हिमान् धूमात्' इत्यादौ साधनसमानाधिकरणव्यधिकरणधर्मावच्छिन्नसाध्याभावसमुदायाधिकरणजगद्वृत्तित्वत्वव्यापकप्रतियोगिताकः पर्वतसंयुक्तत्व - पर्वतान्यसंयुक्तत्व-उभयत्वावच्छिन्नाभावोऽपि । जगत्संयुक्तत्वत्वरूपस्य जगद्वृत्तित्वत्वस्य पर्वतसंयुक्तत्व-पर्वतान्यसंयुक्तत्वयोरेव सत्त्वात् तत्रैव उभयाभावीयप्रतियोगिताया अपि सत्त्वात् । स तु उभयाभावः हेतौ धूमे नास्ति । धूमे पर्वतसंयुक्तत्वस्य पर्वतान्यमहानससंयुक्तत्वस्य च उभयस्यैव सत्त्वात् इत्यव्याप्तिरिति आशङ्क्य वृत्तित्वत्वव्यापकप्रतियोगितायां व्यासज्यवृत्तिधर्मानवच्छिन्नत्वम् अवश्यं व्याप्यत्वविशेषणे सत्यपि उक्तोभयाभावमादाय अव्याप्तिवारणाय निवेशनीयमेव । अतः न दोष इति समाधत्ते—**व्यासज्यवृत्तीति** [पृ. 741] ।

एतद्विशेषणस्येति [पृ. 741] । व्यासज्यवृत्तिधर्मानवच्छिन्नत्वविशेषणस्येत्यर्थः । **तद्विशेषणसत्त्वेऽपीति** [पृ. 741] । साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्याप्यत्वविशेषणसत्त्वेऽपीत्यर्थः ।

गादाधरी

चरमाभावप्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणत्यागे **यत्किञ्चित्साधनाधिकरणवृत्तिसाध्याभावसमुदायाविवक्षणेऽपि प्रथमाभावप्रतियोगितायां** साध्यतावच्छेदकव्याप्यत्वविशेषणं परित्याज्यमेव । 'पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्यादौ जलाद्यसमवेतत्वावच्छिन्नाभावकूटवत्त्वस्य साधनवति असत्त्वेऽपि तादृशाभावकूटवत्सामान्यादिवृत्तित्वत्वव्यापकप्रतियोगिताकयावदभावान्तर्गतानां पृथिव्यन्यवृत्तित्वत्वावच्छिन्नाभावानामेव वृत्तिमद्वृत्तीनां हेतौ मसत्त्वेन अतिव्याप्त्यनवकाशात् ।

विवरणम्

एतावता साधनाधिकरणे येषां परस्परं ऐकाधिकरण्यं तत्समुदायस्य विवक्षणे प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्व-विशेषणं परित्याज्यमिति कथितम् ।

अथ तथा अविवक्षणेऽपि साध्यतावच्छेदकव्याप्यत्वविशेषणं परित्याज्यमिति निरूप्यते—**चरमाभावप्रतियोगितायाम्** इत्यादिना [पृ. 743] । साध्याभाववदवृत्तित्वाभावीयप्रतियोगितायां साध्या-भाववद्वृत्तित्वत्वव्याप्यत्वविशेषणं परित्याज्यमिति पूर्वमुपपादित-त्वात् साधनाधिकरणे येषां सामानाधिकरण्यम् इति अविवक्षणेऽपि 'पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्यत्र साध्यतावच्छेदक-व्यापकप्रतियोगिताकानां जलासमवेतत्वावच्छिन्नाभाव-तेजोऽसमवे-तत्वावच्छिन्नाभावादीनां समुदायस्य अधिकरणं सामान्यादिकमेव । तद्वृत्तित्वत्वव्यापकप्रतियोगिताकयावदभावान्तर्गतः पृथिव्यन्य-वृत्तित्वत्वावच्छिन्नाभावोऽपि । सामान्यादिवृत्तित्वे पृथिव्यन्य-वृत्तित्वरूपे पृथिव्यन्यवृत्तित्वत्वावच्छिन्नाभावीयप्रतियोगितायाः सत्त्वात् । स च अभावः हेतौ द्रव्यत्वप्रकारकप्रमाविषयत्वे नास्ति । तस्य पृथिव्यन्यजलादिवृत्तित्वात् इति नातिव्याप्तिः । अतः तद्वारणफलकं साध्याभावीयप्रतियोगितायां साध्यतावच्छेद-कव्याप्यत्वविशेषणं व्यर्थम् ।

चरमाभावप्रतियोगितायां साध्याभावसमुदायाधिकरणवृत्ति-त्वत्वव्याप्यत्वविशेषणे सति पृथिव्यन्यवृत्तित्वत्वावच्छिन्नाभावः सामान्यवृत्तित्वत्वव्याप्यप्रतियोगिताकः न भवति । सामान्यवृत्ति-त्वत्वशून्ये जलादिवृत्तित्वेऽपि पृथिव्यन्यवृत्तित्वाभावीयप्रतियोगि-तायाः सत्त्वात् । अतः तस्य लक्षणाघटकतया तमादाय अति-व्याप्तिवारणं न संभवतीति साध्याभावप्रतियोगितायां साध्यता-वच्छेदकव्याप्यत्वविशेषणं साधनाधिकरणे येषां सामानाधिकरण्यं

इति अविवक्षणे आवश्यकं भवेत् । चरमाभावप्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणस्य त्यागे सति पृथिव्यन्यवृत्तित्वत्वावच्छिन्नाभावस्यापि लक्षणघटकतया तमादाय अतिव्याप्तिवारणसंभवात् प्रथमाभावप्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं परित्याज्यमेवेति भावः ।

चरमाभावप्रतियोगितायामिति [पृ. 743] । साध्याभावसमुदायाधिकरणवृत्तित्वाभावीयप्रतियोगितायाम् इत्यर्थः । **यत्किञ्चित्साधनाधिकरणेति** [पृ. 743] । साधनाधिकरणे कुत्रचित् येषां साध्याभावानां समुदायः वर्तते, तादृशसमुदायाविवक्षणेऽपीत्यर्थः । साधनाधिकरणे येषां साध्याभावानां सामानाधिकरण्यं तत्समुदायाविवक्षणेऽपीति यावत् । 'अपि' शब्देन तादृशसमुदायविवक्षणे पूर्वोक्तं प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणस्य परित्याज्यत्वं समुच्चीयते ।

प्रथमाभावप्रतियोगितायाम् इति [पृ. 743] । साध्याभावप्रतियोगितायाम् इत्यर्थः ।

गादाधरी

एवं 'सत्तावान् जातेः' इत्यादौ विशिष्टसत्तात्वावच्छिन्नाभावघटितकूटाधिकरणसमवेतत्वाप्रसिद्धिनिबन्धनाव्याप्तिवारणायोपात्तसाध्यवद्वृत्तिसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वरूपसाध्याभावविशेषणस्थले साध्याभावप्रतियोगितायां साध्यवद्वृत्त्यभावीयसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नत्वं निवेश्य व्यधिकरणधर्मावच्छिन्नाभावीयगगनादिनिष्ठप्रतियोगिताभिन्नव्यधिकरणधर्मावच्छिन्नप्रतियोगितामादायैव व्यधिकरणधर्मावच्छिन्नसाध्याभावसंग्रहे समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वस्य अनिवेशनीयतया अभावसाध्यकस्थले साध्यतावच्छेदकन्यूनवृत्तिघटत्वाभावत्वाद्यवच्छिन्नप्रतियोगितायां

साध्यवद्वृत्त्यभावीयसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नत्वाभावेन घटत्वाद्यात्मकाभावव्यावर्तनात् साध्याभावप्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविशेषणमपि परित्यजनीयम् । उक्तरीत्यापि 'पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वात्' इत्यादौ घटान्यत्वविशिष्टद्रव्यत्वाद्यभावकूटस्य हेतुमति असत्त्वेऽपि घटान्यवृत्तित्वत्वादिना गुणादिवृत्तित्वाद्यभावमादाय अतिव्याप्तिः वारणीया इत्यतो दोषान्तरमाह—किंचेति [पृ. 738] ।

विवरणम्

इतः परं साध्यतावच्छेदकव्यापकत्वविशेषणमपि परित्याज्यमित्याह - एवं सत्तावान् जातेरित्यादावित्यादिना [पृ. 745] । 'अभाववान् मेयत्वात्' इत्यादौ घटत्वपटत्वादिरूपाणां घटत्वाभावाभाव - पटत्वाभावाभावादीनां समुदायाधिकरणाप्रसिद्ध्या अव्याप्तिवारणार्थं खलु साध्यतावच्छेदकव्यापकत्वविशेषणं दत्तम् । तदनावश्यकम् । तथा हि-

'सत्तावान् जातेः' इत्यादौ द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावाभ्यां घटितसमुदायस्य अधिकरणं सामान्यादिकमेव । तत्र हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्ध्या प्रसक्तायाः अव्याप्तेर्वारणाय अत्राहुः [पृ. 720] इत्यादिना साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वेन साध्याभावो विशेषणीय इत्युक्तम् । तत्र साध्याभावे साध्यवद्वृत्तिसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वरूपविशेषणस्थाने साध्याभावीयप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्त्यभावीयसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नत्वं निवेश्यते । समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वं न निवेश्यते ।

न च - तदनिवेशे प्रमेयसाध्यकस्थले घटत्वपटत्वोभयावच्छिन्नप्रमेयसामान्याभावस्य गगनत्वावच्छिन्नगगनाभावाभिन्नस्य कथं सङ्ग्रह इति - वाच्यम् । तयोरभावयोरभिन्नत्वेऽपि तदीयप्रतियोगितयोः अवच्छेदकभेदेन भिन्नत्वात् साध्यवद्वृत्तिः यः गगनत्वावच्छिन्नगगनाभावः तदीयगगनत्वरूपसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नत्वं घटत्वपटत्वोभयावच्छिन्नप्रमेयसामान्यनिष्ठप्रतियोगितायामस्तीति तन्निरूपकाभावस्य समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वविशेषणाभावेऽपि संग्रहात् ।

एवं च 'अभाववान् मेयत्वात्' इत्यत्र घटत्वाभावाभावीयप्रतियोगितायां केवलान्वय्यभावरूपसाध्यवद्वृत्तिः यः घटत्वाभावत्वावच्छिन्नाभावः तदीयघटत्वाभावत्वरूपसमानाधिकरणधर्मावच्छिन्नप्रतियोगितारूपायां तादृशप्रतियोगिताभिन्नत्वाभावेन तन्निरूपकस्य घटत्वाभावाभावादेः घटत्वाद्यात्मकस्य लक्षणाघटकतया तत्समुदायाधिकरणाप्रसिद्धिनिबन्धनाव्याप्तेरनवकाशात् । व्यधिकरणधर्मावच्छिन्नसाध्याभावसमुदायमादायैव लक्षणसमन्वयसंभवात् साध्याभावीयप्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविशेषणमपि परित्याज्यमिति भावः ।

एवं च साधनसमानाधिकरणाः साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्त्यभावीयसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नसाध्यनिष्ठप्रतियोगिताकाः ये अभावाः तत्समुदायाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकाः यावन्तः वृत्तिमद्वृत्तयः अभावाः तद्वत्त्वं व्याप्तिरिति पर्यवसितम् ।

उक्तरीत्यापीति [पृ॰ 746] । साध्याभाववद्वृत्तित्वत्वव्याप्यत्वाविशेषितप्रतियोगिताकाभावघटितेनापि लक्षणेनापि इत्यर्थः । 'पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यत्र घटान्यत्वविशिष्टद्रव्यत्वाभाव - घटेतरपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभाव-

घटितकूटाधिकरणं गुणादिकमेव । तद्वृत्तित्वाभावः द्रव्यत्वेऽस्तीति अतिव्याप्तिमाशङ्क्य विशिष्टातिरिक्ततापक्षमवलम्ब्य अतिव्याप्तिः समाहिता। इदानीं वृत्तित्वाभावीयप्रतियोगितायां व्याप्यत्वविशेषण-विरहात् उक्तस्थले घटान्यवृत्तित्वत्वावच्छिन्नाभावोऽपि याव-दन्तर्गतः । तस्यापि साध्याभावसमुदायाधिकरणगुणवृत्तित्वत्वव्या-पकप्रतियोगिताकत्वात् । गुणवृत्तित्वत्वाधिकरणे गुणवृत्तित्वे घटान्यवृत्तित्वरूपे घटान्यवृत्तित्वाभावीयप्रतियोगितायाः सत्त्वात् । घटान्यवृत्तित्वाभावस्तु द्रव्यत्वरूपहेतौ नास्ति । तस्य घटान्य-पटादिवृत्तित्वात् इति नातिव्याप्तिरिति भावः ।

अत्र विशिष्टातिरिक्तत्वमतानवलम्बनेऽपि साधनाधिकरणे येषां सामानाधिकरण्यमिति अविवक्षणेऽपि गुणस्यैव साध्याभाव-समुदायाधिकरणत्वेऽपि नातिव्याप्तिः इति सूचनाय उक्तरीत्यापि [पृ. 746] इत्यत्र 'अपि' शब्दः ।

गादाधरी

[मतान्तरेण 'किंच' इत्यादिदीधितिग्रन्थावतरणम्]

केचित्तु - ननु स्ववृत्तिसाधनसमानाधिकरणसाध्याभाव-समुदायाधिकरणं यद्यत्साधनाधिकरणं तद्वृत्तिसाध्याभावसमुदाया-धिकरणं यद्यत्स्वं तदेव 'साध्याभावसमुदायधिकरणे' त्यनेन विवक्षितम् । सद्धेतौ तादृशं स्वं जगदेव । वन्ह्यधिकरणमहानसादि-निष्ठानां निर्वन्हिह्रदादिनिष्ठानां च धूमादिसमानाधिकरणसाध्या-भावानां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानां समुदायवत् यद्यत् साधनाधिकरणं तद्वृत्तितादृशसमुदायवत्त्वस्य महानसादौ साध्यवति साध्यशून्ये च ह्रदादौ सत्त्वात् । अतो लक्षणसमन्वयः । 'भूतत्व-मूर्तत्वान्यतराभाववान्, स्पर्शवदन्यत्वात्' इत्यादौ तादृशं स्वं-गगनं मनश्च । गगनवृत्तिभूतत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य गगनरूपसाधनाधिकरण एव मनोवृत्तिमूर्तत्वघटितसाध्याभावस-

मुदायाधिकरणत्वस्य मनस्येव सत्त्वेन निरुक्तसाधनाधिकरणवृत्ति-साध्याभावसमुदायाधिकरणत्वस्य तत्र तत्र सत्त्वात् ।

विवरणम्

'भूतत्वमूर्तत्वान्यतराभाववान्, स्पर्शवदन्यत्वात्' इत्यत्र अतिव्याप्तिरूपः यः दोषः अनुपदमुक्तः तस्य परिष्कारान्तरेण वारणं कुर्वतां मतमनुसृत्य किं च [पृ. 738] इति ग्रन्थमवतारयति—केचित्तु इत्यादिना [पृ. 748] । स्ववृत्तिसाधनसमानाधिकरणेत्यादि [पृ. 748] । स्ववृत्तीनां साधनसमानाधिकरणानां साध्याभावानां समुदायस्य अधिकरणं यद्यत् साधनाधिकरणं तद्वृत्तीनां साध्याभावानां समुदायस्य अधिकरणं यद्यत् स्वं तदेव साध्याभावसमुदायाधिकरणेत्यनेन विवक्षितम् । तद्वृत्तित्वाभाववत्त्वं व्याप्तिः ।

'वन्हिमान् धूमात्' इत्यादौ जगदेव स्वपदेन धर्तुं शक्यते । तथा हि - साधनसमानाधिकरणः साध्याभावः घटत्वपटत्वादिव्यधिकरणधर्मावच्छिन्नवह्न्यभाव एव । स तु वन्हिमति महानसादावप्यस्ति । वन्हिशून्ये ह्रदादौ च अस्ति । अतः स्वं-वन्हिमत् तच्छून्यं च जगत् । तद्वृत्तयः ये साधनसमानाधिकरणाः साध्याभावाः घटत्वपटत्वाद्यवच्छिन्नवन्ह्यभावाः । तत्समुदायाधिकरणं यद्यत्साधनाधिकरणं पर्वतमहानसादिकं तद्वृत्तिव्यधिकरणधर्मावच्छिन्नसाध्याभावसमुदायाधिकरणं यद्यत्स्वं जगदेव । तद्वृत्तित्वाभावः घटत्वेन जगद्वृत्तित्वाभावः धूमेऽस्तीति लक्षणसमन्वयः ।

'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि स्वपदेन जगत्सर्वं ग्रहीतुं न शक्यते । तत्र साधनसमानाधिकरणसाध्याभावपदेन समानाधिकरणधर्मावच्छिन्नसाध्याभावस्यापि - धूमत्वावच्छिन्नधूमाभावस्यापि ग्रहीतुं शक्यतया तस्य जगद्वृत्तित्वविरहात् ।

किन्तु निर्धूममेव स्वपदेन ग्राह्यम् । निर्धूमवृत्तित्वाभावस्तु वह्नौ वास्तीति नातिव्याप्तिः ।

'भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वात्' इत्यत्र स्वपदेन गगनं मनश्च ग्रहीतुं शक्यते । तत्र स्पर्शवदन्यत्वरूप-साधनसमानाधिकरणः साध्याभावः भूतत्वं मूर्तत्वं च । तच्च प्रत्येकं गगने मनसि च वर्तते । भूतत्वघटितसाध्याभावसमुदा-याधिकरणं साधनाधिकरणम् आकाशम् । तद्वृत्तिभूतत्वघटित-साध्याभावसमुदायाधिकरणम् आकाशम् । एवं मनोवृत्तिमूर्तत्व-घटितसाध्याभावसमुदायाधिकरणं साधनाधिकरणं मनः । तद्वृत्ति-साध्याभावसमुदायाधिकरणं मनः । तथा च स्वपदग्राह्याकाश-वृत्तित्वाभावः स्वपदग्राह्यमनोवृत्तित्वाभावश्च स्पर्शवदन्यत्वरूपहेतौ नास्ति इति नातिव्याप्तिः ।

गादाधरी

स्ववृत्तिसाध्याभावे साधनसमानाधिकरणत्वविशेषणानुपादाने वन्ह्यादिशून्यह्रदादिनिष्ठसमानाधिकरणधर्मावच्छिन्नसाध्याभाव-समुदायाधिकरणत्वस्य साधनाधिकरणेऽसत्त्वात् साध्यवदेव तादृशं स्वम् । तद्वृत्तित्वाभावस्य वृत्तिमद्वृत्तेः हेतौ असत्त्वात् अव्या-प्तिः । अतः तत्र तद्विशेषणप्रवेशः ।

विवरणम्

अथ एतत्परिष्कारघटकदलानां प्रयोजनं वक्तुम् आरभते — स्ववृत्तिसाध्याभावे [पृ. 750] इत्यादिना । स्ववृत्तिसाध्याभावे साधनसमानाधिकरणत्वविशेषणानुपादाने 'स्ववृत्तिसाध्याभाव-समुदायाधिकरणं यद्यत्साधनाधिकरणम्' इत्यादिरीत्या विवक्षणे 'वन्हिमान् धूमात्' इत्यादौ अव्याप्तिः । तथा हि-स्वपदेन ह्रदादिकं वन्हिशून्यं ग्रहीतुं न शक्यते । तद्वृत्तिसमानाधिकरणधर्मावच्छिन्न-वन्ह्यभावघटितसमुदायाधिकरणत्वस्य साधनाधिकरणे पर्वतादौ

असत्त्वात् । किन्तु स्वपदेन साध्यवत् पर्वतादिकमेव ग्राह्यम् । तद्वृत्तिः यः साध्याभावः व्यधिकरणधर्मावच्छिन्नवन्ह्यभावः । तत्समुदायाधिकरणत्वस्य साधनवति पर्वतादौ सत्त्वात् । तथा च स्वपदग्राह्यपर्वतादिवृत्तित्वत्वावच्छिन्नाभावः हेतौ धूमे नास्तीति अव्याप्तिः स्यात् । स्ववृत्तिसाध्याभावे साधनसमानाधिकरणत्व-विशेषणे दत्ते तु स्वपदेन वन्हिशून्यं ह्रदादिकमपि ग्रहीतुं शक्यते । ह्रदादिवृत्तिः यः धूमसमानाधिकरणः साध्याभावः घटत्वादिना वन्ह्यभावः । तत्समुदायाधिकरणत्वस्य साधनाधिकरणे पर्वतादौ सत्त्वात् । ह्रदादिवृत्तित्वाभावस्तु धूमे नास्ति इति नातिव्याप्तिः ।

गाधाधरी

प्रथमसमुदायपदादाने 'भूतत्वमूर्तत्वान्यतराभाववान्, स्पर्शवदन्यत्वात्' इत्यादौ गगनं मनश्च न तादृशं स्वम् । तद्वृत्तिव्यधिकरणधर्मावच्छिन्नाभावाधिकरणमनोगगननिष्ठभूतत्वमूर्तत्वघटित-साध्याभावसमुदायाधिकरणत्वस्य गगनमनसोः प्रत्येकमसत्त्वात् । किन्तु पृथिव्यादिचतुष्कमेव तथाविधं स्वम् । तद्वृत्तित्वाभावस्य हेतौ सत्त्वात् अतिव्याप्तिः । अतः तदुपादानम् ।

विवरणम्

प्रथमसमुदायपदादाने इति । तथा च स्ववृत्तिसाधनसमानाधिकरणसाध्याभावाधिकरणं यद्यत् साधनाधिकरणं इति निवेशे 'भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वात्' इत्यत्र गगनं मनश्च स्वपदेन ग्रहीतुं न शक्यते । तद्वृत्तिः यः साध्याभावः व्यधिकरणधर्मावच्छिन्नसाध्याभावः । तदधिकरणं यद्यत् साधनाधिकरणं गगनं मनश्च । तद्वृत्तिभूतत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य मनसि असत्त्वात् तद्वृत्तिमूर्तत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य गगनेऽसत्त्वाच्च । किन्तु पृथिव्यादिचतुष्टयमेव स्वपदेन ग्राह्यम् । तत्र उभयघटितसमुदायाधिकरण-

तायाः सत्त्वात् । पृथिव्यादिचतुष्टयवृत्तित्वाभावश्च स्पर्शवदन्यत्वेऽस्तीति नातिव्याप्तिः ।

प्रथमसमुदायपदोपादाने तु गगनं मनश्च स्वपदेन ग्रहीतुं शक्येते । गगननिष्ठभूतत्वघटितसाध्याभावसमुदायाधिकरणतायाः गगने एव सत्त्वात् मनोवृत्तिमूर्तत्वघटितसमुदायाधिकरणतायाः मनस्येव सत्त्वाच्च । तत्तद्वृत्तिसाध्याभावसमुदायाधिकरणतायाः तत्र तत्र सत्त्वात् मनोवृत्तित्वाभावस्य गगनवृत्तित्वाभावस्य च हेतौ असत्त्वात् नातिव्याप्तिः । तद्वृत्तिव्यधिकरणधर्मावच्छिन्नेति [पृ॰ 751] । मनोवृत्तिः यः व्यधिकरणधर्मावच्छिन्नसाध्याभावः तदधिकरणं यत् गगनं तन्निष्ठभूतत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य मनसि असत्त्वात् । गगननिष्ठः यः व्यधिकरणधर्मावच्छिन्नसाध्याभावः तदधिकरणं यत् मनः तन्निष्ठमूर्तत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य गगनेऽसत्त्वात् इत्यर्थः ।

गादाधरी

'धूमवान् वन्हेः' इत्यादावपि पर्वतादेः स्ववृत्तिसाध्याभावकूटाधिकरणमहानसादिरूपसाधनाधिकरणवृत्तिसाध्याभावकूटाधिकरणतया जगदेव तादृशं स्वं स्यात् । अतो यद्यदिति । तथा च पर्वतादिवृत्तिसाध्याभावाधिकरणं यद्यत्साधनवदयोगोलकादेरपि तदन्तर्गततया तद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावघटितसाध्याभावकूटस्य पर्वतादावसत्त्वात् तादृशं स्वं धूमादिशून्यमेवेति नातिव्याप्तिः ।

विवरणम् ।

यद्यदिति वीप्सायाः प्रयोजनमाह - धूमवान् वन्हेरित्यादावपीत्यादिना । 'धूमवान् वह्नेः' इत्यादौ स्वपदेन साध्यवत्पर्वतादिकमपि ग्रहीतुं शक्यते । तद्वृत्तिः यः साधनसमानाधिकरणः साध्याभावः घटत्वाद्यवच्छिन्नधूमाभावः तत्समुदायाधिकरणं यत्

साधनाधिकरणं पर्वतादि । तद्वृत्तिसाध्याभावसमुदायाधिकरणतायाः पर्वतादावपि सत्त्वात् । तथा च जगत एव स्वपदेन ग्रहीतुं शक्यतया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य वृत्तिमद्वृत्तेः जगद्वृत्तित्वाभावस्य वन्हौ सत्त्वात् अतिव्याप्तिः । अतः यद्यत्साधनाधिकरणमिति वीप्सायाः निवेशः । तन्निवेशे साधनाधिकरणस्य अयोगोलकस्यापि पर्वतादिवृत्तिसाध्याभावसमुदायाधिकरणयद्यदन्तर्गतत्वात् अयोगोलकवृत्तिसमानाधिकरणधूमत्वावच्छिन्नधूमाभावसमुदायाधिकरणतायाः पर्वतादौ अभावात् पर्वतादिकं स्वपदग्राह्यं न भवतीति निर्धूमायोगोलकादिकमेव स्वपदग्राह्यम् । तद्वृत्तित्वाभावश्च वह्नौ नास्तीति नातिव्याप्तिरिति भावः ।

गादाधरी

'यद्यत्साधनाधिकरणम्' इत्यनुक्त्वा 'यद्यधिकरणम्' इत्येतावदुक्तौ 'भूतत्वमूर्तत्वान्यतराभाववान्, स्पर्शवदन्यत्वात्' इत्यादौ गगनादिवृत्तिसाध्याभावकूटाधिकरणं यद्यत् पृथिव्यादेरपि तदन्तर्गततया तद्वृत्तिमूर्तत्वादिघटितकूटस्य गगनादावसत्त्वात् तादृशं स्वं न गगनादिकं भवेत् । अपि तु पृथिव्यादिकमेव इति अतिव्याप्तिः । अतः साधनाधिकरणत्वनिवेशः । पृथिव्यादेः तत्र साधनानधिकरणत्वात् न दोषः ।

विवरणम्

'यद्यदधिकरणम्' इत्यनुक्त्वा 'साधनाधिकरणम्' इत्युक्तेः प्रयोजनमाह—यद्यत्साधनाधिकरणमित्यादिना [पृ. 753] । साधनपदमनुपादाय 'यद्यदधिकरणम्' इत्येतावन्मात्रोक्तौ 'भूतत्वमूर्तत्वान्यतराभाववान्, स्पर्शवदन्यत्वात्' इत्यत्र स्वपदग्राह्यगगनवृत्तिभूतत्वरूपसाध्याभावघटितकूटाधिकरणं यद्यदधिकरणं पृथिव्यादिकमपि । तद्वृत्तिमूर्तत्वरूपसाध्याभावघटितसमुदायाधिकरणत्वं गगने नास्तीति गगनादिकं स्वपदग्राह्यं न भवेत् । किन्तु पृथि-

व्यादिकमेव । पृथिव्यादिवृत्तित्वाभावश्च स्पर्शवदन्यत्वेऽस्तीति अतिव्याप्तिः । तद्वारणाय **यद्यत्साधनाधिकरणम्** इत्युक्तम् । पृथिव्यादेः स्पर्शवदन्यत्वरूपसाधनाधिकरणत्वविरहात् 'यद्यत्' इत्यनेन पृथिव्यादिकं ग्रहीतुं न शक्यत इति नातिव्याप्तिरिति भावः ।

गादाधरी

'धूमवान् वह्नेः' इत्यादौ अयोगोलकादिनिष्ठव्यधिकरण-धर्मावच्छिन्नसाध्याभावाधिकरणत्वस्य पर्वतादौ सत्त्वात् जगदेव तादृशं स्वं स्यादिति चरमसमुदायपदोपादानम् । पूर्ववत् तादृशं यद्यत्स्वं तावदन्यतमवृत्तित्वत्वव्यापकप्रतियोगिताकाभावो विवक्षणीयः । अतो नातिव्याप्तिः असम्भवो वा इत्यतो दोषान्तरमाह—**किञ्चेति** इत्याहुः ।

विवरणम्

अन्तिमस्य समुदायपदस्य प्रयोजनमाह—'**धूमवान् वन्हेः**' **इत्यादौ** इत्यादिना । तथा च अन्तिमं समुदायपदमनिवेश्य स्ववृत्ति-साधनसमानाधिकरणसाध्याभावसमुदायाधिकरणं यद्यत् साधनाधिकरणं तद्वृत्तिसाध्याभावाधिकरणं यद्यत्स्वं इत्युक्तौ 'धूमवान् वह्नेः' इत्यादौ जगदेव तादृशं स्वं स्यात् । पर्वतादिजगद्वृत्ति-साधनसमानाधिकरणव्यधिकरणधर्मावच्छिन्नसाध्याभावसमुदायाधिकरणं यद्यत्साधनाधिकरणं इत्यनेन अयोगोलकस्य ग्रहणेऽपि तद्वृत्तिव्यधिकरणधर्मावच्छिन्नधूमाभावाधिकरणतायाः पर्वतादि-जगत्यपि सत्त्वात् । तथा च स्वपदेन जगतः ग्रहणं व्यधिकरण-धर्मावच्छिन्नजगद्वृत्तित्वाभावस्यैव ग्राह्यतया तस्य वह्नौ सत्त्वात् अतिव्याप्तिः । अतः द्वितीयसमुदायपदोपादानम् । तदुपादाने अयोगोलकवृत्ति समानाधिकरणधर्मावच्छिन्नधूमाभावघटितसमुदायाधिकरणतायाः पर्वतादि जगति असत्त्वात् धूमशून्यस्यैव स्वपदेन ग्राह्यतया नातिव्याप्तिरिति भावः ।

ननु तादृशं यत्त्वं तद्वृत्तित्वाभावः इत्युक्तौ 'धूमवान् वह्नेः' इत्यादौ स्वपदेन ह्रदादिकं गृहीत्वा तद्वृत्तित्वाभावस्य वह्नौ सत्त्वात् अतिव्याप्तिः। तादृशं यद्यत्त्वं तद्वृत्तित्वाभावः इत्युक्तौ च असंभवः। पर्वतवृत्तित्वाभावादेरपि तादृशत्वात् तस्य धूमेऽसत्त्वात् इत्यत आह—पूर्ववत् तादृशं यद्यत्त्वम् इत्यादि [पृ. 754]।

गादाधरी

['महाकालान्यः घटात्' इत्यत्र अतिव्याप्त्युपपादनम्]

महाकालेति [पृ. 738]। कालान्यत्वसाध्यके कालिकविशेषणताविशेषेण हेतौ साध्यसामानाधिकरण्यविशेषणेन अतिव्याप्तिवारणसम्भवात् महाकालभेदसाध्यकानुसरणम्।

यद्यपि महाकालत्वसाध्के अतिव्याप्तिः संभवति। वृत्तिमन्मात्र एव महाकालातिरिक्तकालवृत्तित्वस्यापि सत्त्वात्। तथापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितवक्ष्यमाणलक्षणे तत्तत्कालमात्रवृत्तितत्तत्कालावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्ध्या नातिव्याप्तिः।

साधनाधिकरणे सम्भवदेकाधिकरण्यकसाध्याभावसमुदायाधिकरणत्वस्य प्रयोजनान्तरानुरोधेन निवेशे तादृशाप्रसिद्धिविरहेऽपि साधनाधिकरणीभूतखण्डकालव्यक्तिविशेषावृत्तित्वावच्छिन्नाभावघटिततादृशकूटाधिकरणतत्कालवृत्तित्वाभावस्य तत्कालावृत्तौ वृत्तिमति वर्तमानस्य साधने अभावात् नातिव्याप्तिरिति अग्रिमस्य 'एतेन' इत्यादेः असङ्गतिरिति एकमात्रविपक्षकानुसरणम्।

आदिपदात् महाकालत्वाभावादिपरिग्रहः। अवृत्तिहेतौ साध्यसामानाधिकरण्यविशेषणेन अतिव्याप्तिवारणसंभवात् व्यभि-

चारिणि [पृ. 738] इति । वृत्तिमत्त्वमात्रमत्र विवक्षितम् । तन्मात्रस्यैव व्यावर्तकत्वात् ।

विवरणम्

किंच [पृ. 738] इत्यादिना दीधितौ 'महाकालान्यः कालिकसंबन्धेन घटात्' इत्यत्र अतिव्याप्तिः उच्यते । महाकालान्यत्वरूपसाध्याभाववति महाकाले कालिकसंबन्धेन घटस्य सत्त्वात् अयं हेतुः व्यभिचारी । अत्र साध्याभावपदेन महाकालान्यत्वत्वावच्छिन्नाभावघटत्वाद्यवच्छिन्नमहाकालान्यत्वाभावयोः ग्राह्यतया तत्समुदायाधिकरणं महाकाल एव भवति । महाकालनिरूपितहेतुतावच्छेदककालिकसंबन्धावच्छिन्नवृत्तित्वत्वावच्छिन्नाभावस्तु वृत्तिमद्वृत्तिर्न भवति । वृत्तिमतां सर्वेषां कालिकसंबन्धेन महाकालवृत्तित्वात् । अतः व्यधिकरणघटत्वादिना महाकालवृत्तित्वाभाव एव वृत्तिमद्वृत्तिः । तद्वत्त्वं च हेतावस्तीति अतिव्याप्तिः ।

गादाधर्यां कालान्यत्वमुपेक्ष्य महाकालान्यत्वस्य साध्यत्वानुसरणे निमित्तमाह - कालान्यत्वसाध्यके इति [पृ. 755] । कालान्यत्वस्य साध्यत्वे हेतौ साध्यसामानाधिकरण्यमिति विशेषणेनापि अतिव्याप्तिर्वारयितुं शक्यते । कालान्यत्ववति नित्यपदार्थे कालिकसंबन्धेन घटस्य अवृत्तेः । जन्यमात्रस्य कालोपाधितया कालान्यत्वं नित्यपदार्थे एव स्यात् । तत्र तु कालिकसंबन्धेन घटो नास्ति । नित्येषु कालिकायोगात् । महाकालान्यत्वस्य साध्यत्वे तु महाकालान्यत्वरूपसाध्यवति खण्डकाले कालिकसंबन्धेन घटस्य सत्त्वात् हेतौ साध्यसामानधिकरण्यविशेषणेऽपि अतिव्याप्तिः दुर्वारा इति भावः ।

यद्यपि महाकालत्वसाध्यके इति [पृ. 755] । महाकालत्वसाध्यके 'महाकालः कालिकसंबन्धेन घटात्' इत्यत्र साध्या-

भावः - 'महाकालत्वाभावः तद्घटितकूटाधिकरणं महाकालातिरिक्तपदार्थ एव । तद्वृत्तित्वत्वावच्छिन्नाभावश्च वृत्तिमद्वृत्तिर्व भवति । सर्वेषामेव वृत्तिमतो कालिकसंबन्धेन महाकालातिरिक्तखण्डकालवृत्तित्वात् । अतः व्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावस्यैव वृत्तिमद्वृत्तितया तद्वत्त्वस्य हेतौ सत्त्वात् अतिव्याप्तिः संभवति । तथा च महाकालान्यत्वसाध्यकानुसरणं किमर्थमिति शङ्का ।

समाधानं तु तथापीत्यादिना [पृ. 755] । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितवक्ष्यमाणपुच्छलक्षणे महाकालत्वसाध्यके अतिव्याप्तिर्न संभवति । अतिव्याप्तिस्तु अवश्यं संपादनीया । 'किञ्च' [पृ. 738] इत्यादिना उच्यमानायाः अतिव्याप्तेरेव 'एतेन' इति तत्राप्यतिदेशात् । महाकालस्य साध्यत्वे हि महाकालत्वत्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावाः तत्तत्कालावृत्तित्वत्वावच्छिन्नाभावा अपि । महाकालत्वस्य खण्डकालरूपतत्तत्कालावृत्तित्वात् । ते च अभावाः प्रत्येकं तत्तत्कालमात्रवृत्तयः । तेषां समुदायस्य अधिकरणं तु एकोऽपि कालः न भवतीति समुदायाधिकरणाप्रसिद्ध्यैव वक्ष्यमाणलक्षणे महाकालत्वसाध्यके अतिव्याप्तिर्न संभवति ।

न च - साधनाधिकरणे यावताम् अभावानां ऐकाधिकरण्यं न संभवति, तावतां समुदायाधिकरणमिति विवक्षायां एकैकाभावघटितकूटस्यैव ग्राह्यतया तदधिकरणत्वं एकैककालस्य संभवतीति न अप्रसिद्धिरिति - वाच्यम् । अथापि हेत्वधिकरणतत्कालविशेषावृत्तित्वावच्छिन्नाभावघटितसमुदायाधिकरणं यः तत्कालविशेषः तद्वृत्तित्वत्वावच्छिन्नाभावस्य तत्कालावृत्तौ वृत्तिमति पदार्थे वर्तमानस्य हेतावभावात् अतिव्याप्तिः न संभवति । तथा च

एतेन इत्यादि अतिदेशस्य असङ्गतिः इत्यालोच्य महाकालान्यत्व-साध्यकस्थलानुधावनम् ।

अत्र हि महाकालः एक एव साध्याभावसमुदायाधिकरणम् । तत्तत्कालावृत्तित्वावच्छिन्नाभावानां साध्यतावच्छेदकेत्यादि विशेषणानाक्रान्तत्वात् । महाकालान्यत्वत्वावच्छिन्नाभावस्यैव साध्याभावपदेन ग्राह्यत्वात् । महाकालवृत्तित्वाभावस्तु व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिरिति तद्वत्त्वस्य हेतौ सत्त्वात् वक्ष्यमाणलक्षणे अतिव्याप्तिः संभवतीति भावः ।

तत्तत्कालमात्रवृत्तीति [पृ. 755] । तत्तत्कालमात्रवृत्तिः यः तत्तत्कालावृत्तित्वावच्छिन्नाभावः तत्कूटाधिकरणाप्रसिद्ध्या इत्यर्थः। **प्रयोजनान्तरानुरोधेनेति** [पृ. 755] । 'पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यादौ घटान्यत्वविशिष्टद्रव्यत्वाभाव - घटेतर-पृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावघटितकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्त्वात् अतिव्याप्तेर्वारणाय 'भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वात्' इत्यत्र भूतत्वमूर्तत्वोभयघटितकूटवति पृथिव्यादिचतुष्टये हेतोरवृत्तेः अतिव्याप्तेर्वारणाय च साधनाधिकरणे संभवदेकाधिकरण्यकसाध्याभावसमुदायाधिकरणत्वं निवेशनीयम् इति भावः ।

अवृत्तिहेताविति [पृ. 755] । दीधितौ व्यभिचारिणि इत्यनुक्त्वा महाकालान्यत्वसाध्यके कालिकविशेषणतया हेतौ अतिव्याप्तिरित्युच्यमाने साध्याभावसमुदायाधिकरणमहाकालवृत्तित्वनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया महाकालान्यत्वसाध्यके कालिकसंबन्धेन अवृत्तौ गगनहेतौ अतिव्याप्तिसंभवेऽपि हेतौ साध्यसामानाधिकरण्यविशेषणेन अतिव्याप्तिवारणसंभवात् कालिकसंबन्धेन हेतुत्वावच्छेदेन अतिव्या-

ष्टितरूपविशेषान्वयानुपपत्तिः इत्यालोच्य वृत्तिमति इत्यर्थकं व्यभिचारिणि इति पदमुपात्तम् । तथा च कालिकसंबन्धावच्छिन्न-वृत्तिमत्त्वावच्छेदेन अतिव्याप्तिरित्यर्थो लभ्यते । वृत्तिमतस्तु हेतोः साध्यसामानाधिकरण्यमस्तीति अतिव्याप्तिः संगच्छत इति भावः ।

तन्मात्रस्यैव व्यावर्तकत्वात् [पृ. 892] इति । वृत्तिमत्त्व-मात्रस्यैव अवृत्तिहेतुव्यावर्तकत्वात् साध्याभाववन्निरूपितत्वांशः न विवक्षित इति भावः ।

गादाधरी

समवायादिना द्रव्यत्वहेतुके तादृशसंबन्धेन महाकालवृत्ति-त्वत्वावच्छिन्नाभावस्य वृत्तिमति घटत्वादौ वृत्तेः हेतौ अवृत्तेः नातिव्याप्तिसंभव इति कालिकसंबन्धावच्छिन्नहेतुताकानुसरणम् ।

इदमुपलक्षणम् । ईश्वरज्ञानान्यत्वादिसाध्यके विषयिता-संबन्धेन हेतुमात्रे साध्याभावसमुदायवति ईश्वरज्ञानादौ तेन संबन्धेन वस्तुमात्रस्यैव वृत्तेः अतिव्याप्तिर्द्रष्टव्या ।

एतेन वृत्तिमद्वृत्तित्वविशेषणस्थले वृत्तिमद्वृत्तित्ववृत्तित्व-त्वव्यापकप्रतियोगिताकत्वोभयाभावस्य वृत्तिमद्वृत्तित्वसाध्यवद्-वृत्तित्वप्रतियोगिकत्वोभयाभावस्य वा निवेशे महाकालवृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावे चरमदलाभावेन उभयाभाव-सत्त्वेऽपि न निस्तारः ।

एवं यथाश्रुते घटत्वादिसाध्यके व्यभिचारिणि संयोगेन हेतौ साध्याभाववति संयुक्तमात्रस्यैव संयुक्तत्वात् एतद्रूपत्वादि-साध्यके व्यभिचारिणि समवायेन हेतौ समवेतमात्रस्यैव एतद्रू-पातिरिक्तसमवेतत्वात् अतिव्याप्तिरित्यपि द्रष्टव्यम् ।

॥ इति कूटघटितलक्षणम् ॥

विवरणम्

कालिकसंबन्धेन हेतुत्वानुसरणे प्रयोजनमाह—**समवायादिना द्रव्यत्वहेतुके** इति [पृ. 760]। 'महाकालान्यः समवायसंबन्धेन द्रव्यत्वात्' इत्यत्र व्यभिचारिणि साध्याभावसमुदायाधिकरणमहाकालनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वत्वावच्छिन्नाभावस्य समवायसंबन्धेन वृत्तिमति महाकालासमवेते घटत्वादौ वर्तमानस्य द्रव्यत्वे विरहात् न अतिव्याप्तिः संभवति। द्रव्यत्वस्य महाकालसमवेतत्वात् इत्यालोच्य कालिकसंबन्धावच्छिन्नहेतुताकस्थलानुधावनम् इति भावः।

इदमुपलक्षणमित्यादि [पृ. 760]। 'इदम् ईश्वरज्ञानान्यत्, विषयितासंबन्धेन घटात्' इत्यत्र ईश्वरज्ञानान्तर्भावेण व्यभिचारिणि ईश्वरज्ञानान्यत्वरूपसाध्याभावसमुदायाधिकरणईश्वरज्ञाननिरूपितविषयिता संबन्धावच्छिन्नवृत्तित्वत्वावच्छिन्नाभावः वृत्तिमद्वृत्तिर्न भवति। वृत्तिमतां सर्वेषामेव पदार्थानाम् ईश्वरज्ञाने विषयितासंबन्धेन वृत्तेः। अतः घटत्वादिता ईश्वरज्ञानवृत्तित्वाभाव एव वृत्तिमद्वृत्तिः। तद्वत्वं हेतावस्तीति अतिव्याप्तिरिति भावः।

एतेनेति [पृ. 760]। ईश्वरज्ञानान्यत्वसाध्यके अतिव्याप्तिदानेन इत्यर्थः।

वृत्तिमद्वृत्तित्वविशेषणस्य स्थाने वृत्तिमदवृत्तित्ववृत्तित्वत्वव्यापकप्रतियोगिताकत्वोभयाभाववत्त्वम्, वृत्तिमदवृत्तित्व-साध्यवद्वृत्तित्वप्रतियोगिताकत्वोभयाभाववत्त्वं वा निवेश्यते। 'महाकालान्यो घटात्' इत्यत्र महाकालवृत्तित्वत्वरूपसमानाधिकरणधर्मावच्छिन्नाभावे उक्तोभयाभावरूपं विशेषणम् अस्ति। महाकालवृत्तित्वाभावस्य वृत्तिमदवृत्तित्वेऽपि वृत्तित्वत्वव्यापक-

प्रतियोगिताकत्वविरहात् । वृत्तित्वत्ववति घटादिवृत्तित्वे महाकालवृत्तित्वाभावीयप्रतियोगिताया: अभावात् तस्या: वृत्तित्वत्वव्यापकत्वाभावात् । एवं च यावदन्तर्गतस्य महाकालवृत्तित्वत्वावच्छिन्नाभावस्य हेतौ असत्त्वात् नातिव्याप्ति: । अत: ईश्वरज्ञानान्यत्वसाध्यके अतिव्याप्तिरुक्ता । ईश्वरज्ञानान्यत्वसाध्यकस्थले तु ईश्वरज्ञानवृत्तित्वत्वरूपसमानाधिकरणधर्मावच्छिन्नाभाव एव अप्रसिद्ध: । अवृत्तिगगनादीनामपि विषयितासंबन्धेन ईश्वरज्ञानसंबद्धत्वात् । अत: व्यधिकरणधर्मावच्छिन्न-ईश्वरज्ञानवृत्तित्वाभावस्यैव ग्राह्यतया अतिव्याप्ति: सङ्गच्छत इति भाव: ।

उभयाभावमनिवेश्य हेतुतावच्छेदकसंबन्धावच्छिन्नशुद्धवृत्तित्वत्वव्यापकप्रतियोगिताकत्वाभाववन्त: यावन्तो वृत्तित्वाभावा इत्युक्तौ, सद्धेतौ व्यधिकरणधर्मावच्छिन्नाभावमात्रस्य हेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वत्वव्यापकप्रतियोगिताकतया असंभव: स्यात्, अत: वृत्तिमद्वृत्तित्वनिवेश: । वृत्तिमदवृत्तित्वाभावनिवेशे च महाकालान्यत्वसाध्यके अतिव्याप्ति: इति उभयाभावोपादानम् ।

एवं केवलान्वयिनि स्वरूपसंबन्धावच्छिन्नवृत्तित्वसामान्याभावस्य संयोगावच्छिन्नवृत्तित्वादिसाधारणवृत्तित्वत्वव्यापकप्रतियोगिताकत्वाभावात् अव्याप्ति: । अत: हेतुतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशनम् । महाकालवृत्तित्वाभावस्य वृत्तिमदवृत्ते: वृत्तित्वप्रतियोगिकत्वात् अतिव्याप्त्युद्धारो न स्यात्, अत: वृत्तित्वत्वव्यापकत्वोपादानम् । लाघवेन साध्यवद्वृत्तित्वप्रतियोगिकत्वनिवेशनम् । साध्यवद्वृत्तित्वप्रतियोगिताकाभावमात्रनिवेशने सद्धेतौ व्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावमात्रस्य साध्यवद्वृत्तित्वप्रतियोगिकत्वात् असंभव इति उभयाभावनिवेश: । महाकालनिरूपित-

वृत्तित्वाभावीयप्रतियोगितायां खण्डकालवृत्तित्वसाधारणवृत्तित्वत्वाव्यापकत्वप्रयुक्तोभयाभाववत्साध्यवत्खण्डकालवृत्तित्वप्रतियोगिताकत्वं नास्ति इति द्वितीयोभयाभावस्य महाकालवृत्तित्वाभावेऽक्षततया द्वितीयमपि रमणीयमेवेति ।

एवं यथाश्रुते इति [पृ. 759]। उभयाभावानिवेशे इत्यर्थः। 'अयं घटः संयोगसंबन्धेन पटात्' इत्यत्र व्यभिचारिणि साध्याभावसमुदायाधिकरणं घटातिरिक्तजगत्। तन्निरूपितहेतुतावच्छेदकसंयोगसंबन्धावच्छिन्नवृत्तित्वाभावः घटातिरिक्तजगत्संयुक्तत्वत्वावच्छिन्नाभावः वृत्तिमद्वृत्तिः न संभवति। संयोगसंबन्धेन वृत्तिमतः सर्वस्यापि घटातिरिक्तगगनादिसंयुक्तत्वात्। तथा च व्यधिकरणधर्मावच्छिन्नसंयुक्तत्वाभावस्यैव लक्षणघटकतया अतिव्याप्तिः।

एवं 'एतद्रूपवान् समवायसंबन्धेन जातेः' इत्यत्र साध्याभावसमुदायाधिकरणं एतद्रूपातिरिक्तं जगत्। तन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वत्वावच्छिन्नाभावः वृत्तिमद्वृत्तिः न भवति। समवेतस्य सर्वस्यापि एतद्रूपातिरिक्तसमवेतत्वात्। अतः व्यधिकरणधर्मावच्छिन्नाभावमादाय अतिव्याप्तिः।

वृत्तित्वपदस्य यथाश्रुतार्थकत्वे गगने संयुक्तानां पदार्थानां गगनवृत्तित्वं न संभवति, गगनसंयोगस्य वृत्त्यनियामकत्वात्। तथा च समानाधिकरणधर्मावच्छिन्नाभावस्यापि लक्षणघटकतया घटत्वसाध्यके अतिव्याप्तिवारणं संभवतीति आलोच्य एतद्रूपत्वादिसाध्यकस्थलानुसरणम्।

॥ इति कूटघटितलक्षणम् ॥

।। पुच्छलक्षणम् ।।

दीधितिः

एतेन—साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्तिस्वसमानाधिकरणयावदभावाधिकरणवृत्तित्वाभावाः यावन्तः वृत्तिमद्वृत्तयः तद्वत्त्वं व्याप्तिः। केवलान्वयिनः संयोगाद्यभावस्य अभावाः संयोगादयः न व्याप्यवृत्तयः। एवं साध्यस्य गुणसामान्यस्य अभावः द्रव्यत्वाधिकरणे उत्पत्तिकालावच्छेदेन वर्तमानोऽपि न व्याप्यवृत्तिः। उक्तरूपावच्छिन्नप्रतियोगिताकाः क्वचिदप्रसिद्ध्यादि संपादकाः पुनरभावाः न हेतुत्वाभिमतसमानाधिकरणाः। उक्तसमुदायाधिकरणवृत्तित्वतदभाववृत्तिमद्वृत्तित्वानि पूर्वोक्तरीत्या प्रत्येतव्यानि—इत्यादिकम् अपास्तम्।

गादाधरी

[पुच्छलक्षणावतरणम्]

साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावकूटाधिकरणत्वस्य नानाविपक्षकस्थले अप्रसिद्धावपि साधनसमानाधिकरणतादृशाभावकूटाधिकरणत्वस्य नाप्रसिद्धिरिति साधनसमानाधिकरणत्वविशेषणपक्षे तादृशाभावकूटाधिकरणतागर्भमेव लक्षणं सम्यक्। साध्यतावच्छेदकव्यापकतापेक्षया साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वस्य गुरुत्वेऽपि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावघटितलक्षणे 'सत्तावान् जातेः' इत्यादौ विशिष्टसत्ताभावादिवारकोक्तविशेषणनिवेशे महागौरवात्।

विशिष्टस्य अनतिरिक्तत्वे 'पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वात्' इत्यादौ घटान्यत्वविशिष्टद्रव्यत्वाभावादेरपि साध्यतावच्छेदका-

वच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया उक्त-दिशा अतिव्याप्तिवारणाय तादृशाभावघटितलक्षणेऽपि साधनवति सम्भवदेकाधिकरण्यकतादृशाभावसमुदायस्य अवश्यं विवक्षणीय-तया 'पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्यादौ समवाय-संबन्धावच्छिन्न-जलासमवेतत्वाद्यवच्छिन्नाभावघटितकूटाधिकरण-सामान्यादिवृत्तित्वाभाववत्त्वेऽपि अतिव्याप्तेरनवकाशात् ।

साधनवति सम्भवदैकाधिकरण्यविवक्षामन्तरेणैव 'पृथिव्य-न्यद्रव्यत्ववत् द्रव्यत्वात्' इत्यादौ घटान्यवृत्तित्वत्वावच्छिन्नाभाव-मादाय अतिव्याप्तिवारणे उक्तस्थलेऽपि तादृशाभावमादाय अति-व्याप्तिवारणसंभवात् प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्व-विशेषणं नोपादेयम् ।

यद्यपि साधनवति सम्भवदैकाधिकरण्यककूटनिवेशे द्रव्यत्व-विशिष्टसत्ताभाव-द्रव्यान्यत्वविशिष्टसत्ताभावघटितकूटस्य 'सत्तावान् जातेः' इत्यादौ न लक्षणघटकताप्रसक्तिः, तथापि साध्य-तावच्छेदकव्यापकप्रतियोगिताकाभावविशेषे तादृशाभावैकतर-व्यधिकरणधर्मावच्छिन्नाभावघटितकूटस्य तथात्वात् अव्याप्तिरिति तदुपेक्षा इति रीत्या सार्वभौमलक्षणपरिष्कारमपि हेतुतावच्छेदक-संबन्धेन वृत्तिमद्यावदधिकरणमहाकालादिमात्रविपक्षकव्यभि-चारिणि अतिव्याप्त्यापत्त्या निराकुरुते—एतनेति [पृ. 763] ।

विवरणम्

एतेन [पृ.763] इत्यादि पुच्छलक्षणमवतारयति साध्यताव-च्छेदकावच्छिन्नेत्यादिना [पृ.763] । पूर्वं कूटघटितलक्षणे साध्या-भावपदेन तत्तद्वह्न्यभावमादाय 'वह्निमान् धूमात्' इत्यादौ अव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-रूपावच्छिन्नप्रतियोगिताकाभावविवक्षणे तत्रैव तत्तद्विपक्षावृत्ति-त्वावच्छिन्नाभावमादाय तत्कूटाधिकरणाप्रसिद्ध्या अव्याप्तिर्भ-

वति । अतः साध्यतावच्छेदकसमनियतप्रतियोगिताकाभाव एव साध्याभावपदेन विवक्षणीयः । तथा सति बहवो दोषाः दीधितिकारैः आपादिताः । यदा तु साध्याभावे साधनसमानाधिकरणत्वं विशेषणं दीयते, तदा साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभाव एव विवक्षितुं शक्यते । तत्तद्ह्रदावृत्त्यभावानां धूमसमानाधिकरणत्वाभावेन लक्षणाघटकत्वात् । तथा च साधनसमानाधिकरणत्वविशेषणपक्षे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्न-प्रतियोगिताकाभावकूटाधिकरणत्वघटितं लक्षणमेव सम्यक् ।

यद्यपि प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविशेषणापेक्षया साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नत्वनिवेशे गौरवम्, तथापि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे 'सत्तावान् जातेः' इत्यादौ द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावयोरपि लक्षणघटकतया तत्कूटाधिकरणसामान्यादिनिरूपित समवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या अव्याप्तेर्वारणाय साध्यतावच्छेदकविशिष्टसाध्यवद्वृत्ति समानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वमपि अधिकं विशेषणं देयमिति महागौरवमिति । तदपेक्षया प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नत्वनिवेशनमेव लघु । तावतैव 'सत्तावान् जातेः' इत्यादौ द्रव्यत्वविशिष्टसत्तात्व-द्रव्यान्यत्वविशिष्टसत्तात्वयोः साध्यतावच्छेदकसत्तात्वावच्छिन्नव्यापकतावच्छेदकत्वविरहेण तदवच्छिन्नप्रतियोगिताकाभावयोः लक्षणाघटकतया पूर्वोक्ताव्याप्तेः वारणसंभवात् ।

ननु एवं निवेशेऽपि 'पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्यादौ पृथिवीत्वत्वावच्छिन्नव्यापकतावच्छेदक-जलासमवेतत्व-तेजोऽसमवेतत्वाद्यवच्छिन्नसमवायसंबन्धावच्छिन्नप्रतियोगिताका -

भावघटितकूटाधिकरण सामान्यादिवृत्तित्वाभावस्य द्रव्यत्वप्रकारकप्रमाविषयत्वे सत्त्वात् अतिव्याप्तिः । तद्वारणाय प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वमपि निवेशनीयमिति गौरवम् - इत्याशङ्क्य साधनवति संभवदेकाधिकरण्यकत्वं अस्मिन् लक्षणेऽपि साध्याभावे विशेषणं देयम् । तथा च जलासमवेतत्वावच्छिन्नाभाव-तेजोऽसमवेतत्वावच्छिन्नाभावादीनां साधनवति सामानाधिकरण्यासंभवात् एकैकाभाव एव ग्राह्यः । तत्कूटाधिकरणं जलं तेजश्च । तद्वृत्तित्वाभावः द्रव्यत्वप्रकारकप्रमाविषयत्वे नास्ति इति नातिव्याप्तिः । अतः साध्यतावच्छेदकव्याप्यत्वं प्रतियोगितायां न देयम् ।

किमर्थं साध्याभावे विशेषणं देयम् इति चेत् - उच्यते— 'पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वात्' इत्यत्र घटान्यत्वविशिष्टद्रव्यत्वाभाव - घटेतरपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावयोरपि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेन लक्षणघटकतया तद्घटितकूटाधिकरणगुणादिवृत्तित्वाभावस्य द्रव्यत्वे सत्त्वात् अतिव्याप्तिः । तद्वारणाय साधनाधिकरणे यावतामभावानां सामानाधिकरण्यं संभवति, तावतां समुदायः अवश्यं निवेशनीयः । तथा सति एकैकाभावघटितसमुदायस्यैव लक्षणघटकतया तदधिकरणघटादिवृत्तित्वत्वस्यैव द्रव्यत्वे सत्त्वात् नातिव्याप्तिः इत्याशयेन समाधत्ते—विशिष्टस्य अनतिरिक्तत्वे इत्यादिना [पृ. 763] । तादृशाभावघटितलक्षणेऽपि [पृ. 764]— साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावघटितलक्षणेऽपि इत्यर्थः ।

ननु साध्याभावे साधनवति संभवदेकाधिकरण्यकत्वविशेषणं विनापि 'पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वात्' इत्यादौ साध्याभावसमुदायाधिकरणम् इत्यनेन गुणादेर्ग्रहणेऽपि तद्वृत्तित्व-

त्वव्यापकप्रतियोगिताकः अभावः घटान्यवृत्तित्वत्वावच्छिन्नाभावोऽपि । स तु द्रव्यत्वरूपहेतौ नास्तीति नातिव्याप्तिः इत्याशङ्क्य 'पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वात्' इत्यादावपि जलासमवेतत्व - तेजोऽसमवेतत्वाद्यवच्छिन्नाभावघटित - कूटाधिकरणम् इत्यनेन सामान्यादेः ग्रहणेऽपि तद्वृत्तित्वत्वव्यापकप्रतियगिताकाभाव इत्यनेन घटान्यवृत्तित्वत्वावच्छिन्नाभावं गृहीत्वा तद्वत्त्वस्य द्रव्यत्वप्रकारकप्रमाविषयत्वे असत्त्वात् नातिव्याप्तिः इति समाधत्ते - साधनवति इत्यादिना [पृ. 764]

ननु साधनवति संभवदैकाधिकरण्यकत्वनिवेशपक्षे 'सत्तावान् जातेः' इत्यादौ द्रव्यत्वविशिष्टसत्ताभाव-द्रव्यान्यत्वविशिष्टसत्ताभावयोः तादृशविशेषणविरहेण लक्षणाघटकतया तद्घटितकूटमादाय अव्याप्तेरप्रसक्त्या तद्वारकस्य साध्यतावच्छेदकविशिष्ट साध्यवद्वृत्तोत्यादिविशेषणस्य अनावश्यकतया न पूर्वोक्तकूटघटितलक्षणे गौरवम् इत्याशङ्क्य तथापि 'सत्तावान् जातेः' इत्यादौ तादृशाभावयोः एकतराभावघटितकूटमादाय तदधिकरणगुणादिवृत्तित्वस्यैव जातौ सत्त्वात् अव्याप्तिरिति पूर्वोक्तकूटघटितं लक्षणमुपेक्ष्य प्रकारान्तरेण कूटघटितलक्षणम् आदरणीयम् इति समाधत्ते - यद्यपि इत्यादिना [पृ. 764]

'सत्तावान् जातेः' इत्यादौ अव्याप्तवारणेऽपि 'महाकालान्यो घटात्' इत्यत्र पुच्छलक्षणस्य अतिव्याप्तिः दुर्वारा । अतः पुच्छलक्षणमपि अयुक्तमिति दीधितिकाराशय इत्याह - हेतुतावच्छेदकसंबन्धेन [पृ. 764] इति ।

'वन्हिमान् धूमात्' इत्यादौ वन्हित्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाः व्याप्यवृत्तयः स्वसमानाधिकरणाः—हेतुसमावाधिकरणाः यावन्तोऽभावाः इत्युक्ते व्यधिकरणवन्हित्वाद्यवच्छिन्नघटाद्यभावा एव भवन्ति । समानाधिकरण-

धर्मावच्छिन्नवह्न्याद्यभावस्य हेतुसमानाधिकरणत्वविरहात्। तादृशयावदभावाधिकरणं जगदेव भवति। तद्वृत्तित्वाभावाः वृत्तिमद्वृत्तयः यावन्तोऽभावाः घटत्वपटत्वादिना जगद्वृत्तित्वाभावाः। तद्वत्त्वं धूमेऽस्तीति लक्षणसमन्वयः।

'धूमवान् वन्हेः' इत्यादौ धूमत्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाः व्याप्यवृत्तयः हेतुसमानाधिकरणाः यावन्तोऽभावाः धूमत्वेन धूमाभावाः, धूमत्वेन घटपटाद्यभावाश्च। तत्कूटाधिकरणं निर्धूमजगत्। तद्वृत्तित्वत्वावच्छिन्नाभावः वह्नौ नास्तीति नातिव्याप्तिः।

गादाधरी

[साध्यतावच्छेदकेत्यादि विशेषणप्रयोजनम्]

अत्र प्रतियोगितायां अवच्छिन्नान्तविशेषणव्यावृत्तिः 'अभाववान् मेयत्वात्' इत्यत्रेव 'वन्हिमान् धूमात्' इत्यत्रापि बोध्या। यादृशसाध्याभावकूटाधिकरणं साधनवत् तार्णतार्णदहनोभयाभावादिघटितकूटस्यापि तथाविधकूटतया तथाविधोभयादिमद्वृत्तिपदार्थे वर्तमानस्य तादृशकूटाधिकरणवृत्तित्वाभावस्य हेतावसत्त्वात्।

अत्र साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेनापि प्रतियोगिता विशेषणीया। अन्यथा 'वन्हिमान् पर्वतवह्न्यवयवसंयोगात्' इत्यत्र संयोगसंबन्धावच्छिन्नवह्न्यभावसमवायसंबन्धावच्छिन्नवह्न्यभावयोः संभवदैकाधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणाघटकत्वात् अतिव्याप्तिविरहेपि 'वन्हिमान् धूमात्' इत्यादौ साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नाभावकूटस्य उक्तक्रमेण लक्षणघटकतया तद्वति वह्न्यवयवाद्यतिरिक्ते हेतोर्वृत्तेरसम्भवापत्तेः।

व्यापकतापि साध्यतावच्छेदकसंबन्धेन। अन्यथा समवायेन वन्हिसंयोगे साध्ये संयोगेन साध्यव्यापकस्य वह्नेः समवायसंबन्धावच्छिन्नाभावादिघटितकूटाधिकरणवह्न्यवयवातिरिक्तवृत्तौ सद्धेतौ अव्याप्त्यापत्तेः।

इत्थं च संयोगेन संबन्धेन व्यापकताप्रसिद्ध्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणस्य आवश्यकतया व्याप्यवृत्तिपदसार्थक्यमिति केचित्।

विवरणम्

अथ दलानां प्रयोजनमाह—अत्र प्रतियोगितायाम् [पृ. 768] इत्यादिना। साध्यनिष्ठप्रतियोगिताकाभावमात्रनिवेशे 'अभाववान् मेयत्वात्' इत्यत्र अभावनिष्ठप्रतियोगिताकाभावाः घटत्वाभावपटत्वाभावाद्यभावाः घटत्वपटत्वादिरूपाः तत्कूटाधिकरणाप्रसिद्ध्या अव्याप्तिः।

एवं 'वन्हिमान् धूमात्' इत्यादावपि वन्हिनिष्ठप्रतियोगिताकयावदभावान्तर्गतः तार्णतार्णदहनोभयाभावोऽपि। तद्घटितकूटाधिकरणपर्वतादिवृत्तित्वाभावः धूमे नास्ति इति अव्याप्तिः। तद्वारणाय साध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नत्वनिवेशः। घटत्वाभावत्वपटत्वाभावत्वादीनां अभावत्वावच्छिन्नव्यापकतावच्छेदकत्वविरहात् तार्णतार्णदहनोभयत्वस्य वन्हित्वावच्छिन्नव्यापकतावच्छेदकत्वविरहाच्च। तदवच्छिन्नाभावानां लक्षणाघटकतया नाव्याप्तिरिति भावः। साधनाधिकरणे संभवदैकाधिकरण्यकत्वविवक्षायां च घटत्वव्यधिकरणधर्मावच्छिन्नसाध्याभावकूटाधिकरणघटवृत्तित्वाभावस्य हेतौ सत्त्वात् 'अभाववान् मेयत्वात्' इत्यत्र अव्याप्तिः वक्तव्या।

तार्णातार्णेति [पृ. 768] । अस्मिन् लक्षणे पूर्वं 'अत्राहुः' इत्यादिना उक्तस्य विशेषणस्य अभावात् अयमभावः लक्षणघटकः इति भावः ।

ननु अस्मिन् लक्षणे साध्यव्यापकतावच्छेदकत्वं साध्यवन्निष्ठाभावप्रतियोगितायां सामानाधिकरण्येन अनवच्छेदकत्वम् । अत्र निष्प्रयोजनकं प्रतियोगिवैयधिकरण्यं निवेश्य साध्याभावे व्याप्यवृत्तित्वनिवेशनं 'प्रक्षालनाद्धि' इतिन्यायग्रस्तं इत्याशङ्कायां केषांचित् समाधानमाह - अत्र साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेनापि इत्यादिना । साध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा 'वन्हिमान् पर्वतवन्ह्यवयवसंयोगात्' इत्यत्र संयोगसंबन्धावच्छिन्नवन्ह्यभाव - समवायसंबन्धावच्छिन्नवन्ह्यभावयोः साधनाधिकरणे ऐकाधिकरण्याभावेन तदुभयघटितस्य कूटस्य लक्षणाघटकतया एकैकसंबन्धावच्छिन्नवन्ह्यभावकूटस्यैव लक्षणघटकतया तदधिकरणे पर्वते वन्ह्यवयवे च पर्वतवन्ह्यवयवसंयोगस्य वृत्तित्वात् अतिव्याप्तेः अभावेऽपि 'वन्हिमान् धूमात्' इत्यादौ साध्यतावच्छेदकसंयोगसंबन्धातिरिक्तसमवायसंबन्धावच्छिन्नवन्ह्यभावव्यधिकरणधर्मावच्छिन्नाभावयोः धूमाधिकरणे सामानाधिकरण्यसंभवात् तद्घटितकूटस्य लक्षणघटकतया तदधिकरणवन्ह्यवयवातिरिक्तजगद्वृत्तित्वाभावस्य धूमेऽसत्त्वात् अव्याप्तिः । धूमस्य वन्ह्यवयवातिरिक्तपर्वतादिवृत्तित्वात् । प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु समवायसंबन्धावच्छिन्नवन्ह्यभावस्य संयोगसंबन्धावच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकतया व्यधिकरणवन्हित्वावच्छिन्नघटाद्यभावस्यैव लक्षणघटकतया नाव्याप्तिः ।

एवं साध्यतावच्छेदकावच्छिन्नव्यापकतायामपि साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा 'समवायसंबन्धेन वन्हिसंयोगवान्, धूमात्' इत्यत्र सद्धेतौ साध्यं वन्हिसंयोगं प्रति

वन्हेः संयोगसंबन्धेन व्यापकतया संयोगसंबन्धघटितसाध्यव्यापकतावच्छेदकवन्हित्वावच्छिन्नसाध्यतावच्छेदकसमवायसंबन्धावच्छिन्नप्रतियोगिताकाभावघटितकूटाधिकरणं वह्न्यवयवातिरिक्तं जगत्। तदवृत्तित्वस्यैव धूमे सत्त्वात् अव्याप्तिः। व्यापकतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु वन्हिसंयोगं प्रति वन्हेः समवायसंबन्धेन व्यापकत्वविरहात् समवायसंबन्धघटितसाध्यव्यापकतावच्छेदकं वन्हिसंयोगत्वादिकमेव। तदवच्छिन्नसमवायसंबन्धावच्छिन्नप्रतियोगिताकाभावः वन्हिसंयोगत्वेन वन्हिसंयोगाभावः न संभवति। तस्य साधनसामानाधिकरण्यविरहात्। किन्तु वन्हिसंयोगत्वाविना घटाद्यभाव एव। तत्कूटाधिकरणजगद्वृत्तित्वाभावोऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव एव वृत्तिमद्वृत्तिरिति तस्य हेतौ सत्त्वात् नाव्याप्तिः।

एवं सति संयोगसंबन्धेन वन्ह्यादिसाध्यकस्थके संयोगेन वह्न्यादेरपि अव्याप्यवृत्तित्वमिति पक्षे संयोगेन वन्हिमति संयोगसंबन्धावच्छिन्नवह्न्यभावस्य सत्त्वात् वह्न्यादेः संयोगसंबन्धेन व्यापकत्वं न प्रसिद्ध्यति इति अप्रसिद्धिनिबन्धनाव्याप्तेवारणाय व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यं निवेशनीयम्।

एवं च 'संयोगाभाववान् मेयत्वात्' इत्यत्र संयोगाभावाभावोऽपि साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकः। संयोगाभाववति संयोगाभावाभावस्य सत्त्वेऽपि तस्य प्रतियोगिसमानाधिकरणत्वात् प्रतियोगिव्यधिकरणम् अभावान्तरमादाय तत्प्रतियोगितानवच्छेदकं संयोगाभावत्वं भवतीति तदवच्छिन्नप्रतियोगिताकस्य संयोगात्मकाभावस्य साध्याभावपदेन धर्तुं शक्यत्वात् तद्घटितकूटाधिकरणद्रव्यवृत्तित्वस्यैव मेयत्वे सत्त्वात् अव्याप्तिः। तद्वारणाय साध्याभावे व्याप्यवृत्तित्वनिवेशः। तन्निवेशे संयोगात्मकाभावस्य अव्याप्यवृत्तित्वेन व्याप्यवृत्तिः

अभाव: संयोगाभावत्वादिना घटाद्यभाव एव । तत्कूटाधिकरणं जगदेव भवतीति नाव्याप्तिः ।

एवं च व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषण-सत्त्वे एव संयोगात्मकाभावस्य लक्षणघटकतया अव्याप्तिः प्रसजति । तद्वारणाय व्याप्यवृत्तित्वं साध्याभावे निवेशनीयं भवति । व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यासत्त्वे तु संयोगात्मकाभावस्य लक्षणाघटकतया अव्याप्तेरप्रसक्त्या व्याप्य-वृत्तित्वपदस्य न सार्थक्यम् । व्यापकतायां साध्यतावच्छेदक-संबन्धावच्छिन्नत्वसत्त्वे एव प्रतियोगिवैयधिकरण्यस्य सार्थक्यम् । प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वसत्त्वे एव व्याप-कतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य सार्थक्यमिति एतावान् प्रयासः आदृतः ।

उक्तक्रमेणेति [पृ. 768] । यादृशसाध्याभावस्तोमाधिकरणं साधनाधिकरणम् इति रीत्या इत्यर्थः ।

गादाधरी

व्याप्यवृत्तित्वविशेषणप्रयोजनविचारः

वस्तुतस्तु - येन संबन्धेन व्यापकता तेनैव अभावो ग्राह्यः । साध्यतावच्छेदकसंबन्धस्य विशिष्य निवेशे अवच्छिन्नवृत्तिकान्य-त्वरूपव्याप्यवृत्तित्वनिवेशे संयोगेन धूमादिसाध्यके तत्संबन्धा-वच्छिन्नधूमत्वाद्यवच्छिन्नाभावस्य धूमवति अवच्छिन्नवृत्तिकतया व्यधिकरणधर्मावच्छिन्नाभावमात्रस्य व्याप्यवृत्तित्वेन अतिव्या-प्त्यापत्त्या अनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वस्यैव निवेशनीय-तया 'एवम्' इत्यादि पङ्क्त्यसङ्गतेः वक्ष्यमाणत्वात्, अन्योन्या-भावघटितव्यापकतानिवेशाच्च व्याप्यवृत्तिपदसार्थक्यम् ।

संयोगाभावसाध्यकस्थले संयोगघटितकूटाधिकरणताया द्रव्यमात्रे सत्त्वात् तद्वृत्तिहेतौ अव्याप्तिवारणरूपं सत्प्रयोजनमाह -

केवलान्वयिन [पृ. 763] इति । एतेन तत्साध्यके द्रव्यवृत्तेः सद्धेतुत्वमक्षतमिति सूचितम् ।

विवरणम्

व्याप्यवृत्तित्वपदस्य सार्थक्यं स्वमतेन आह-वस्तुतस्तु [पृ. 772] इत्यादिना । येन संबन्धेन साध्यव्यापकत्वं तदवच्छेदकरूपावच्छिन्नतत्संबन्धावच्छिन्नप्रतियोगिताकाभाव एव साध्याभावपदेन विवक्षणीयः । न तु साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकः । तथा सति व्याप्यवृत्तित्वविशेषणे दत्तेऽपि यदि व्याप्यवृत्तित्वम् अवच्छिन्नवृत्तिकान्यत्वरूपं तदा 'धूमवान् वह्नेः' इत्यादौ संयोगसंबन्धावच्छिन्नधूमत्वावच्छिन्नधूमाभावस्य धूमवति पर्वतादौ अवच्छिन्नवृत्तिकतया तदन्यत्वरूपविशेषणविरहात् व्यधिकरणधर्मावच्छिन्नाभावस्यैव अवच्छिन्नवृत्तिकान्यत्वेन लक्षणघटकतया अतिव्याप्त्यापत्तेः व्याप्यवृत्तित्वम् अनवच्छिन्नवृत्तिकत्वरूपं विवक्षणीयम् । धूमत्वावच्छिन्नधूमाभावस्य गुणादौ अनवच्छिन्नवृत्तिकत्वेन लक्षणघटकतया नातिव्याप्तिः । इत्थं च 'एवं साध्यस्य गुणसामान्यस्य अभावः न व्याप्यवृत्तिः' इति वक्ष्यमाणदीधितिग्रन्थस्य असाङ्गत्यापत्तिः । गुणसामान्याभावस्यापि गुणे निरवच्छिन्नवृत्तिकत्वेन व्याप्यवृत्तित्वात् । साध्यनिष्ठप्रतियोगितायां व्यापकताघटकसंबन्धावच्छिन्नत्वनिवेशे तु 'धूमवान् वह्नेः' इत्यादौ अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वनिवेशे धूमत्वावच्छिन्नधूमाभावस्य लक्षणाघटकत्वेऽपि स्वरूपसंबन्धघटितधूमव्यापकतावच्छेदकायोगोलकान्यत्वत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य लक्षणघटकतया तमादाय अतिव्याप्तिवारणसंभवात् । अवच्छिन्नवृत्तिकान्यत्वरूपस्य व्याप्यवृत्तित्वस्यैव निवेशेन गुणसामान्याभावस्य द्रव्ये उत्पत्तिकालावच्छिन्नवृत्तिकत्वेन अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वविरहात् वक्ष्यमाणदीधितिग्रन्थस्यापि सङ्गतिः इति भावः ।

ननु साध्यतावच्छेदकसंबन्धेन व्यापकतानिवेशे एव व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यनिवेशस्य आवश्यकतया संयोगाभावसाध्यकप्रमेयत्वादौ संयोगाभावत्वस्य प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकतया तदभावमादाय अव्याप्तिवारणाय व्याप्यवृत्तित्वविशेषणसार्थक्यम् । येन संबन्धेन व्यापकता तेन संबन्धेन अभावनिवेशकत्वे च 'धूमवान् वह्नेः' इत्यादौ अयोगोलकान्यत्वाभावमादाय अतिव्याप्तिवारणसंभवेन प्रतियोगिवैयधिकरण्यस्य निष्प्रयोजनतया अनिवेशात् । संयोगाभावत्वस्य तदघटितव्यापकतावच्छेदकत्वासंभवेऽपि वाच्यत्वत्वेन घटाद्यभावमादाय संयोगाभावसाध्यकसद्धेतौ अव्याप्तिवारणसंभवात् व्याप्यवृत्तित्वविशेषणं व्यर्थं स्यात् । 'वन्हिमान् धूमात्' इत्यादौ संयोगसंबन्धेन व्यापकत्वाप्रसिद्धावपि वाच्यत्वत्वेन घटाद्यभावमादायैव लक्षणसमन्वयसंभवात् इत्यत आह - **अन्योन्याभावघटितेति** [पृ. 772] ।

अन्योन्याभावस्य व्याप्यवृत्तित्वात् संयोगाभावसाध्यकस्थले साध्यवन्निष्ठः अन्योन्याभावः संयोगाभाववद्भेदः न भवति । किन्तु अन्यः भेदः । तत्प्रतियोगितावच्छेदकतानवच्छेदकत्वरूपं व्यापकतावच्छेदकत्व संयोगाभावत्वेऽस्ति इति तदवच्छिन्नप्रतियोगिताकसंयोगात्मकमभावमादाय अव्याप्तिवारणाय व्याप्यवृत्तित्वविशेषणम् इति भावः । एतदेव **संयोगाभावसाध्यकस्थले** [पृ. 772] इति अनन्तरग्रन्थेनापि स्पष्टीकृतम् ।

गादाधरी

'गुणवान् द्रव्यत्वात्' इत्यादौ गुणादौ अनवच्छिन्नवृत्तिकगुणाद्यभाववति नित्यद्रव्यातिरिक्ते हेतोः वृत्या अव्याप्तिवारणरूपम् अनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वविशिष्टाभावनिरूपिताधिकरणतानिवेशनफलमाह - **एवम्** [पृ. 763] इति । साध्याभावे

उत्पत्तिकालावच्छेदेन द्रव्यवृत्तित्वकथनं द्रव्यत्वे तद्वद्वृत्तित्वाभावासत्त्वेन अव्याप्तिप्रसङ्गसूचनाय ।

विवरणम्

एवम् [पृ. 763] इति दीधितिग्रन्थं केषाञ्चिन्मतेन अवतार्य दूषयति - **गुणवान् द्रव्यत्वात्** इत्यादिना । साध्याभावे व्याप्यवृत्तित्वविशेषणे दत्तेऽपि 'गुणवान् द्रव्यत्वात्' इत्यत्र अव्याप्तिः । तथा हि - तत्र साध्याभावः गुणत्वावच्छिन्नगुणाभावः । स च गुणादौ अनवच्छिन्नवृत्तिकतया व्याप्यवृत्तिः । तथा च व्याप्यवृत्तिगुणसामान्याभावाधिकरणं नित्यद्रव्यातिरिक्तं सर्वमपि भवति । जन्यद्रव्येषु उत्पत्तिकालावच्छेदेन गुणसामान्याभावस्य सत्त्वात् । नित्यद्रव्यातिरिक्त - वृत्तित्वत्वावच्छिन्नाभावः नित्यद्रव्यमात्रवृत्तौ पदार्थे प्रसिद्धः । द्रव्यत्वरूपहेतौ नास्ति । तस्य नित्यद्रव्यातिरिक्तजन्यद्रव्यवृत्तित्वात् इत्यव्याप्तिः । तद्वारणाय अनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वविशिष्टसाध्याभावनिरूपिताधिकरणत्वमेव विवक्षणीयम् । जन्यद्रव्ये उक्तव्याप्यवृत्तित्वविशिष्टाभावाधिकरणताविरहात् द्रव्यातिरिक्तमेव साध्याभावसमुदायाधिकरणपदेन ग्राह्यम् । द्रव्यातिरिक्तवृत्तित्वाभावस्तु द्रव्यत्वेऽस्तीति नाव्याप्तिः इत्याशयेन एवम् [पृ. 763] इत्यादिदीधितिग्रन्थः प्रवृत्तः । दीधितौ गुणसामान्याभावस्य द्रव्ये उत्पत्तिकालावच्छेदेन वर्तमानत्वकथनं नित्यद्रव्यातिरिक्तं जन्यद्रव्यमपि साध्याभावसमुदायाधिकरणम् । तद्वृत्तित्वाभावस्य हेतौ विरहात् अव्याप्तिः इति सूचनाय ।

गादाधरी

न व्याप्यवृत्तिरित्यत्र द्रव्यत्वाधिकरण इत्यनुषज्यते इति व्याख्यानमसत् । अनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वनिवेशे 'संयोगी घटात्' इत्यत्र उक्तरीत्या अव्याप्तेर्वारणाय साधनवति व्याप्यवृत्तित्वस्य अवश्यनिवेशनीयतया तत एव अव्याप्त्यप्रसक्तेः ।

विवरणम्

न व्याप्यवृत्तिः [पृ. 775] इति कथनं व्याप्यवृत्तित्वविशिष्टसाध्याभावनिरूपिताधिकरणतावत् द्रव्यातिरिक्तमेव । तद्वृत्तित्वाभावः हेतावस्तीति विशिष्टाधिकरणत्वनिवेशानन्तरं वाव्याप्तिः इति सूचनाय इति कैश्चित् कृतं व्याख्यानं न समीचीनम् । अनवच्छिन्नवृत्तिकत्वरूपस्य व्याप्यवृत्तित्वस्य निवेशे सति 'संयोगी संयोगसंबन्धेन घटात्' इत्यत्र सद्धेतौ अनवच्छिन्नवृत्तिकत्वविशिष्टसंयोगाभावाधिकरणगुणादौ हेतुतावच्छेदकसंयोगसंबन्धेन वृत्तेः अप्रसिद्धया अव्याप्तेः वारणाय साधनाधिकरणे व्याप्यवृत्तित्वं विवक्षणीयम् । संयोगत्वावच्छिन्नसंयोगाभावस्य संयोगसंबन्धेन घटवति व्याप्यवृत्तित्वविरहेण लक्षणाघटकतया संयोगत्वाद्यवच्छिन्नघटाद्यभावमादाय 'संयोगी घटात्' इत्यत्र अव्याप्तिः वारणीया । एवं च 'गुणवान् द्रव्यत्वात्' इत्यादावपि गुणत्वावच्छिन्नगुणाभावस्य गुणादौ अनवच्छिन्नवृत्तिकत्वेऽपि साधनवति द्रव्ये अनवच्छिन्नवृत्तिकत्वविरहेण लक्षणाघटकतया गुणत्वावच्छिन्नघटाद्यभावमादाय लक्षणसमन्वयेन अव्याप्तेरप्रसक्तया व्याप्यवृत्तित्वविशिष्टाभावनिरूपिताधिकरणतानिवेशस्य अनावश्यकत्वात् तन्निवेशपरतया एतद्ग्रन्थव्याख्यानस्य अयुक्तत्वात् इति भावः । नित्यद्रव्ये गुणस्य सत्त्वात् कालिकसंबन्धेनापि गुणाभावः न संभवति इति नित्यद्रव्यातिरिक्तेत्युक्तम् ।

गादाधरी

साधनवति व्याप्यवृत्तित्वपर्यन्तनिवेशनप्रयोजनपरतया एतत्पङ्क्तिव्याख्या न साधीयसी । व्याप्यवृत्तित्वविशिष्टाधिकरणत्वाप्रवेशे 'संयोगी सत्त्वात्' इत्यत्र गुणादौ व्याप्यवृत्तेः संयोगाभावस्येव द्रव्यत्वाद्यभावस्यापि लक्षणघटकतया जगतः साध्याभावकूटानधिकरणतया अतिव्याप्त्यनवकाशेऽपि 'धूमवान् वह्नेः' इत्यादौ

साध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नप्रतियोगिताकव्यापकतावच्छेदकावच्छिन्नाभावकूटाधिकरणतया विश्वस्मिन् सत्त्वात् अतिव्याप्तेर्दुर्वारतया तत्प्रवेशनस्य आवश्यकतया तावतापि उक्ताव्याप्तिवारणसंभवात् ।

विवरणम्

ननु साधनवति व्याप्यवृत्तित्वनिवेशस्य प्रयोजनपरतया 'एवम्' इति दीधितिव्याख्यानं भवतु । 'साधनवति' इति अनिवेशे गुणादौ व्याप्यवृत्तिः यः गुणसामान्याभावः तद्वति वित्यद्रव्यातिरिक्ते हेतोः वृत्त्या 'गुणवान् द्रव्यत्वात्' इत्यत्र अव्याप्तिः । साधनवति व्याप्यवृत्तित्वनिवेशे साधनवति द्रव्ये गुणसामान्याभावस्य व्याप्यवृत्तित्वविरहेण लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वयात् नाव्याप्तिः इति व्याख्यानसंभवात् इति आशङ्क्याह - साधनवति व्याप्यवृत्तित्वपर्यन्तेति [पृ॰ 776] । एवं व्याख्याने सति व्याप्यवृत्तित्वविशिष्टनिरूपिताधिकरणत्वं न निवेश्यत इति लभ्यते । तथा सति साधनवति व्याप्यवृत्तिः यः साध्याभावः तत्समुदायाधिकरणवृत्तित्वाभावः लक्षणघटकः । तथा सति 'संयोगी सत्त्वात्' इत्यत्र व्यभिचारिणि अतिव्याप्तिः । साधनवति गुणे व्याप्यवृत्तिः यः संयोगत्वावच्छिन्नसंयोगाभावः तत्कूटाधिकरणं जगदेव भवति । संयोगवति द्रव्येऽपि किञ्चिदवच्छेदेन संयोगाभावस्य सत्त्वात् । घटत्वादिना जगद्वृत्तित्वाभावस्तु हेतावस्तीति अतिव्याप्तिः ।

न च 'संयोगी सत्त्वात्' इत्यत्र संयोगाभाववत् द्रव्यत्वाभावोऽपि लक्षणघटकः । द्रव्यत्वस्य संयोगव्यापकत्वात् । द्रव्यत्वाभावस्य साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वात् । साधनवति गुणे व्याप्यवृत्तित्वाच्च । तद्घटितकूटाधिकरणं सर्वं जगत् न भवति । जगदन्तर्गतस्य द्रव्यस्य द्रव्यत्वाभावा-

धिकरणत्वविरहात् । किन्तु द्रव्यातिरिक्तं जगदेव । तद्वृत्तित्व-त्वावच्छिन्नाभावः द्रव्यत्वावृत्तौ वृत्तिमति प्रसिद्धिः । सत्तारूपहेतौ नास्ति । सत्तायाः द्रव्यातिरिक्तगुणवृत्तित्वात् इति नातिव्याप्तिरिति वाच्यम् । एवमपि 'धूमवान् वह्नेः' इत्यादौ संयोगसंबन्धावच्छिन्न-धूमत्वावच्छिन्नधूमाभावस्य हेतुमति अयोगोलके व्याप्यवृत्तेः अधिकरणं जगदेव भवति । धूमस्य अव्याप्यवृत्तित्वेन धूमवत्यपि तदभावसत्वात् । जगद्वृत्तित्वाभावस्तु व्यधिकरणधर्मावच्छिन्न-प्रतियोगिताक एव वृत्तिमद्वृत्तिरिति तद्वत्वस्य वह्नौ सत्वात् अतिव्याप्तिः प्रसजति । तद्वारणाय साधनवति व्याप्यवृत्तित्वनि-वेशेऽपि व्याप्यवृत्तित्वविशिष्टसाध्याभावनिरूपिताधिकरणत्वं निवेशनीयमेव । तथा सति व्याप्यवृत्तित्वविशिष्टधूमाभावाधिकरणं धूमशून्यमयोगोलकादिकमेव । तद्वृत्तित्वाभावः वह्नौ नास्तीति नातिव्याप्तिः ।

एवं च 'गुणवान् द्रव्यत्वात्' इत्यत्र व्याप्यवृत्तित्वविशिष्ट-गुणसामान्याभावाधिकरणं गुणादिकमेव । तद्वृत्तित्वाभावः द्रव्य-त्वेऽस्तीति विशिष्टाधिकरणत्वनिवेशनेन अव्याप्तिवारणसंभवात् तत्र अव्याप्तिवारणरूपं यत् साधनवति व्याप्यवृत्तित्वनिवेशस्य प्रयोजनं तत्परतया एवमित्यादि पङ्क्तिव्याख्यानस्य असङ्गत्वात् ।

तत्प्रवेशनस्येति [पृ. 777] । व्याप्यवृत्तित्वविशिष्टाधिकरण-त्वप्रवेशनस्येत्यर्थः । उक्ताऽव्याप्तिवारणसंभवादिति [पृ. 777] । 'गुणवान् द्रव्यत्वात्' इत्यत्र अव्याप्तिवारणसंभवात् इत्यर्थः ।

गादाधरी

तस्माद्व्याप्यवृत्तित्वम् अवच्छिन्नवृत्तिकान्यत्वमत्राभिमतम् । अतोऽपि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावोपेक्षा । तन्निवेशे साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकत्वस्यैव निवेशनीय-तया संयोगेन साध्यतायां व्यभिचारिणि व्यधिकरणधर्मावच्छिन्न-

प्रतियोगिताकस्यैव लक्षणघट तथा संयोगेन द्रव्याभावस्यावच्छिन्नवृत्तिकतया अतिव्याप्तेः, तन्निवेशस्यैव दैशिककालिकाव्याप्यवृत्तिसाध्यकभेदेन स्थलद्वये व्यावृत्तिरभिहितेति सारम् ।

विवरणम्

तर्हि 'एवम्' [पृ. 763] इत्यादि दीधितिग्रन्थः किमभिप्रायेण प्रवृत्तः इत्याशङ्कायामाह - तस्मात् व्याप्यवृत्तित्वमित्यादिना [पृ. 778]।

अस्मिन् पुच्छलक्षणे अवच्छिन्नवृत्तिकान्यत्वमेव व्याप्यवृत्तित्वम् साध्याभावे विशेषणम् । एतादृशविशेषणसत्त्वादपि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावः उपेक्षितः । तादृशाभावनिवेशे 'धूमवान् वह्नेः' इत्यत्र संयोगसंबन्धावच्छिन्नधूमाभावस्य द्रव्ये अवच्छिन्नवृत्तिकत्वेन अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वविरहेण लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य धूमत्वादिना घटाद्यभावस्यैव लक्षणघटकतया अतिव्याप्त्यापत्तेः ।

'साध्यतावच्छेदकावच्छिन्ने'त्यादि विशेषणे दत्ते तु येन संबन्धेन व्यापकता तत्सम्बन्धावच्छिन्नाभावस्यैव लक्षणघटकतया स्वरूपसंबन्धघटितधूमव्यापकतावच्छेदकायोगोलकान्यत्वत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावघटितकूटाधिकरणायोगोलकवृत्तित्वस्यैव वह्नौ सत्वात् नातिव्याप्तिः ।

एतादृशस्य अवच्छिन्नवृत्तिकान्यत्वरूपस्य व्याप्यवृत्तित्वस्यैव 'संयोगाभाववान मेयत्वात्' इत्यत्र 'गुणवान् द्रव्यत्वात्' इत्यत्र च स्थलद्वये अव्याप्तिवारणरूपं प्रयोजनं दीधितौ उच्यते । आद्यस्थले साध्याभावः संयोगः देशविशेषावच्छिन्नवृत्तिकतया दैशिकाव्याप्यवृत्तिः । तदधिकरणद्रव्यवृत्तित्वात् हेतोः अव्याप्तिः । द्वितीयस्थले साध्याभावः गुणसामान्याभावः कालिकाव्याप्यवृत्तिः, द्रव्ये उत्पत्ति

कालावच्छेदेन गुणसामान्याभावस्य सत्वात् । तथा च तदधिकरण-द्रव्यवृत्तित्वात् हेतोः अव्याप्तिः । एवं स्थलद्वयेऽपि प्रसक्तायाः अव्याप्तेर्वारणाय साध्याभावे व्याप्यवृत्तित्वविशेषणम् । स्थल-द्वयेऽपि समानाधिकरणधर्मावच्छिन्नसाध्याभावस्य अवच्छिन्न-वृत्तिकतया अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वविरहात् व्यधि-करणधर्मावच्छिन्नाभाव एव लक्षणघटक इति न अव्याप्तिः इति तात्पर्यम् ।

तदाह - तन्निवेशस्यैवेति [पृ. 779] । अवच्छिन्नवृत्तिका-न्यत्वरूपव्याप्यवृत्तित्वनिवेशस्यैवेत्यर्थः । 'एव' कारेण व्याप्यवृत्ति-त्वविशिष्टाभावनिरूपिताधिकरणताविशेषस्य साक्षदपि व्याप्य-वृत्तित्वनिवेशस्य च व्यावृत्तिः ।

गादाधरी

स्वसमानाधिकरणत्वनिवेशप्रयोजनविचारः ।

स्वसमानाधिकरणत्वनिवेशनप्रयोजनमाह—उक्तरूपेति [पृ. 763] । **साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपेत्यर्थः।** **अप्रसिद्ध्यादीति** [पृ. 763] 'सत्तावान् जाते'रित्यादौ सत्तात्वा-वच्छिन्नाभावकूटाधिकरणे हेतुतावच्छेदकसंबन्धेन वृत्त्यप्रसिद्धि-सम्पादकाः, रूपाभावादिसाध्यके रूपाद्यात्मकाभावकूटाधिकरणा-प्रसिद्धिसम्पादकाः । सम्भवदैकाधिकरण्यापन्नसाध्याभावस्तोमाधि-करणत्वविवक्षणे 'सत्तान्यपृथिवीसमवेतशून्यं वायुत्वादि'त्यादौ आदिपदग्राह्याया अतिव्याप्तेः सम्पादका बोध्याः ।

विवरणम्

स्वसमानाधिकरणनिवेशनप्रयोजनमाहेति [पृ. 780] । साध्याभावे हेतुसमानाधिकरणत्वविशेषणानुपादाने "सत्तावान् जातेः" इत्यादौ सत्तात्वावच्छिन्नसत्ताभावघटितकूटाधिकरणसा-मान्यादौ हेतुतावच्छेदकसंबन्धेन वृत्तेः अप्रसिद्ध्या अव्याप्तिः ।

"रूपाभाववान् वायुत्वात्" इत्यत्र रूपात्मकसाध्याभावसमुदायाधिकरणाप्रसिद्ध्या अव्याप्तिः। तद्वारणाय हेतुसमानाधिकरणत्वनिवेशः। तन्निवेशे सत्तात्वावच्छिन्नसत्ताभावस्य जातिसामानाधिकरण्यविरहात् रूपात्मकाभावस्य वायुत्वसामानाधिकरण्यविरहात् लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नसाध्याभावसमुदायस्यैव लक्षणघटकतया नाव्याप्तिः।

यद्यपि यावतामेकाधिकरण्यं संभवति तावतां समुदायविवक्षायां "रूपाभाववान् वायुत्वात्" इत्यत्र अव्याप्तिर्वारयितुं शक्यते। तथापि 'सत्तान्यपृथिवीसमवेतशून्यं वायुत्वात्' इत्यादौ पूर्वोक्तरीत्या अतिव्याप्तिः। अतः साध्याभावे हेतुसमानाधिकरणत्वविशेषणमेव आवश्यकं इति भावः।

गादाधरी

समुदायाधिकरणवृत्तित्वादिप्रयोजनम्।

पूर्वोक्तरीत्येति [पृ. 763]। **समुदायाधिकरणवृत्तित्वं** हेतुतावच्छेदकसंबन्धेन 'तदभावः तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकः; हेतुतावच्छेदकसंबन्धेन वृत्तिमत्त्वं लक्षणघटकं बोध्यमित्यर्थः। **अपास्तमिति** [पृ. 763]। **न च** सार्वभौममते सामानाधिकरण्यस्य अव्याप्यवृत्तितया साध्याभावकूटवन्महाकालवृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावोऽपि सामानाधिकरण्यानिरूपकखण्डकालाद्यवच्छेदेन घटादिरूपवृत्तिमति वर्तत एवेति महाकालान्यत्वसाध्यके नातिव्याप्तिसंभव इति वाच्यम्। तथा सति वह्न्यादावपि स्वावयवाद्यवच्छेदेन निर्धूमसंयुक्तत्वाद्यभावसत्त्वेन 'धूमवान् वह्ने'रित्यादौ अतिव्याप्तेरुक्तस्थलेऽतिव्याप्तिवारणस्य सुदूरपराहतत्वात्।

विवरणम्

समुदायाधिकरणवृत्तित्वम् इत्यादि [पृ. 781] साध्याभाव-समुदायाधिकरणनिरूपितवृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम्। अन्यथा 'वह्निमान् धूमात्' इत्यादौ वह्निमन्मात्र-समवेतघटादौ वर्तमानस्य निर्वह्निसमवेतत्वाभावस्य धूमे असत्वात् अव्याप्तिः। 'धूमवान् वह्नेः' इत्यादौ वृत्तिमन्मात्रस्यैव निर्धूम-कालवृत्तित्वेन व्यधिकरणधर्मावच्छिन्ननिर्धूमवृत्तित्वाभावस्यैव लक्षणघटकतया अतिव्याप्तिर्वा स्यात्। एवं साध्याभाववद्वृत्ति-त्वाभावः साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकप्रतियोगि-ताकः ग्राह्यः। अन्यथा "इदं वाच्यं ज्ञेयत्वात्" इत्यादौ घटवृत्तित्वत्वावच्छिन्नाभावमादाय अव्याप्तिः स्यात्। वृत्तिमद्वृत्तयः इत्यत्र वृत्तिमत्वं हेतुतावच्छेदकसंबन्धेन वाच्यम्। अन्यथा 'वह्निमान् धूमात्' इत्यादौ निर्वह्निसंयुक्तत्वत्वावच्छिन्नाभाव-मादाय अव्याप्तिरिति भावः।

न च सार्वभौममते इत्यादि [पृ. 781]। कूटघटितलक्षणं सार्वभौमकृतं लक्षणम्। पुच्छलक्षणमपि तदेव विशेषणान्तर-घटितम्। अनयोः उभयोः लक्षणयोः 'महाकालान्यो घटात्' इत्यत्र अतिव्याप्तिः दोषः इति दीधितिकारणामाशयः। इयं च अतिव्याप्तिः न संभवति। सार्वभौममते सामानाधिकरण्यस्य अव्याप्यवृत्तित्वात्, साध्याभावकूटवन्महाकालवृत्तित्वस्य यः समानाधिकरणधर्मावच्छिन्नाभावः सः साध्याभावकूटसामानाधि-करण्याभावरूपतया अव्याप्यवृत्तिः। एवं च कालिकसंबन्धेन वृत्तिमति घटादौ महाकालावच्छेदेन महाकालान्यत्वाभावकूट-सामानाधिकरण्यसत्वेऽपि, तादृशसामानाधिकरण्यानिरूपकखण्ड-कालावच्छेदेन महाकालान्यत्वाभाव सामानाधिकरण्याभावः अस्त्ये-वेति समानाधिकरणधर्मावच्छिन्नवृत्तित्वाभावस्यापि लक्षणघटकतया अस्य हेतावभावादेव नातिव्याप्तिरिति आशङ्का।

सामानाधिकरण्यस्य अव्याप्यवृत्तित्वमवलम्ब्य हि वृत्तिमद्वृत्तित्वं उपपादितम् । तत एव हेतावपि तादृशवृत्तित्वाभावस्य सत्वात् उक्तस्थले अतिव्याप्तिः दुर्वारा इत्याशयं मनसि निधाय सामानाधिकरण्यस्य अव्याप्यवृत्तित्वावलम्बने कूटघटितलक्षणस्य पुच्छलक्षणस्य च व्यभिचारिसामान्ये एव अतिव्याप्तिः संभवतीति समाधत्ते - तथा सति वह्न्यादावपीत्यादिना [पृ.781] । 'धूमवान् वह्नेः' इत्यादावपि वह्नौ अयोगोलकावच्छेदेन निर्धूमसंयुक्तत्वसत्वेऽपि स्वावयवावच्छेदेन निर्धूमसंयुक्तत्वाभावः अस्तीति अतिव्याप्तिः स्यात् इति भावः ।

गादाधरी

यत्तु—हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणसामान्यावच्छेदेन तद्वत्त्वस्य विवक्षितत्वान्नातिव्याप्तिः; व्यभिचारनिरूपकाधिकरणावच्छेदेन हेतौ तद्वत्त्वविरहादिति—तन्न । एवं सति स्वावयवावच्छेदेन घटादिवृत्तेः समानाधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाद्यभावस्य पर्वताद्यवच्छेदेन धूमादावसत्वात् असंभवापत्तेः । वृत्तिमद्वृत्तिपदेन हेतुतावच्छेदकसंबन्धेन यस्य यदधिकरणं तदवच्छेदेन तद्वृत्तित्वविवक्षायामपि व्याप्यवृत्तेरवच्छेदकानभ्युपगमे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभावकूटाधिकरणवृत्तित्वाभावस्य अधिकरणानवच्छिन्नतया असंभवस्य दुर्वारत्वात् ।

विवरणम्

यत्तु इत्यादि [पृ. 783] । वृत्तिमद्वृत्तयः यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावाः हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणसामान्यावच्छेदेन तद्वत्वं व्याप्तिः । "महाकालान्यो घटात्" इत्यत्र महाकालवृत्तित्वाभाववत्वं घटे खण्डकालावच्छेदेन यद्यपि वर्तते, तथापि कालिकसंबन्धेन हेत्वधिकरणसामान्यान्तर्गतमहाकालावच्छेदेन नास्तीति नातिव्याप्तिः । "धूमवान् वह्नेः" इत्यादौ

निर्धूमसंयुक्तत्वाभावस्य वन्हौ वह्न्यवयवावच्छेदेन सत्वेऽपि संयोगसंबन्धेन हेत्वधिकरणसामान्यान्तर्गतायोगोलकावच्छेदेन नास्तीति नाव्याप्तिः इति भावः ।

तत्र इत्यादि [पृ.783] । एवं विवक्षायां "वह्निमान् धूमात्" इत्यादौ साधनसमानाधिकरणसाध्याभावसमुदायाधिकरणजगत्संयुक्तत्वत्वावच्छिन्नाभावस्य घटावयवावच्छेदेन वृत्तिमद्घटवृत्तेः । संयोगसंबन्धेन हेत्वधिकरणसामान्यान्तर्गतपर्वतावच्छेदेन धूमरूपहेतावसत्वात् लक्षणस्य असंभवः स्यात् इति भावः ।

वृत्तिमद्वृत्तिपदेन इत्यादि [पृ. 783] । वृत्तिमद्वृत्तिपदेन हेतुतावच्छेदकसंबन्धेन यस्य यत् अधिकरणं तदवच्छेदेन तद्वृत्तित्वं विवक्षितम् । "वह्निमान् धूमात्" इत्यादौ संयोगसंबन्धेन घटस्य अधिकरणं भूतलम् । तदवच्छेदेन घटे जगत्संयुक्तत्वाभावो नास्ति । भूतलावच्छेदेन घटस्य भूतलरूपजगत्संयुक्तत्वात् । अतः व्यधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाभाव एव लक्षणघटक इति नासंभव इति वक्तुं न शक्यते । व्यधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाभावस्य व्याप्यवृत्तितया किञ्चिदधिकरणावच्छेदेन वृत्तित्वं नास्तीति तस्यापि लक्षणाघटकतया तादृशवृत्तित्वाभावाप्रसिद्धया असंभवस्य दुर्वारत्वात् इति भावः ।

गादाधरी

यदि च वृत्तिमत्यनवच्छिन्नवृत्तयो यावन्तः तादृशाभावकूटाधिकरणवृत्तित्वाभावा अनवच्छिन्नतद्वत्त्वं व्याप्तिरित्युच्यते; तदा सामानाधिकरण्यस्याव्याप्यवृत्तितापक्षेऽपि न दर्शितदोषनिरासः सम्भवति । समानाधिकरणधर्मावच्छिन्नमहाकालवृत्तित्वाभावस्य वृत्तिमत्यनवच्छिन्नवृत्तिकत्वविरहेण लक्षणाघटकत्वात् ।

विवरणम्

यदिचेत्यादि [पृ. 784] । वृत्तिमति अनवच्छिन्नवृत्तिकाः यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावाः अनवच्छिन्न-

तद्वत्त्वं व्याप्तिः इत्युक्ते सद्धेतौ व्यधिकरणधर्मावच्छिन्नजगद्वृत्तित्वाभावस्य वृत्तिमति अनवच्छिन्नवृत्तिकतया हेतौ च अनवच्छिन्नतद्वत्वसत्वात् असंभव यद्यपि वारयितुं शक्यते, तथापि 'महाकालान्यो घटात्' इत्यत्र अतिव्याप्तिः न वारयितुं शक्यते। सामानाधिकरण्यस्य अव्याप्यवृत्तितापक्षे समानाधिकरणधर्मावच्छिन्नमहाकालवृत्तित्वाभावस्य साध्याभावसामानाधिकरण्याभावरूपस्य अवच्छिन्नवृत्तिकत्वेन वृत्तिमति अनवच्छिन्नवृत्तिकत्वविरहेण लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नमहाकालवृत्तित्वाभावस्यैव लक्षणघटकतया अनवच्छिन्नत्वस्य हेतौ सत्वात्।

गादाधरी

हेतुतावच्छेदकसंबन्धेन यस्य यदधिकरणं तदवच्छेदेन तदवृत्तित्वकिंचिदवच्छिन्नत्वोभयाभाववन्तो यावन्तःतादृशाभावकूटवद्वृत्तित्वाभावा अनवच्छिन्नतद्वत्वं व्याप्तिरित्युक्तौ न कश्चिद् दोषः। समानाधिकरणधर्मावच्छिन्नमहाकालवृत्तित्वाभावे किंचिदवच्छिन्नत्वसत्त्वेऽपि कालिकसंबन्धेन घटाधिकरणखण्डकालावच्छेदेन घटाद्यवृत्तित्वासत्त्वेन उभयाभाववत्ताया अक्षततया महाकालान्यत्वसाध्यके व्यभिचारिणि तादृशाभावस्य लक्षणघटकत्वेनातिव्याप्तिविरहात्। समानाधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाद्यभावस्य घटादौ कपालाद्यवच्छेदेन वृत्तेः संयोगादिना यद्घटाधिकरणं तदवच्छेदेन घटादावृत्तेः निरुक्तोभयाभाववत्त्वविरहात् 'वह्निमान् धूमात्' इत्यादौ न लक्षणघटकता, अपि तु अवच्छिन्नत्वविरहेणोभयाभाववतो व्यधिकरणधर्मावच्छिन्नतदभावस्यैवेत्यव्याप्त्यनवकाशादिति ध्येयम्।

विवरणम्

स्वयं वृत्तिमद्वृत्तित्वपरिष्कारपूर्वकं कूटघटितलक्षणे पुच्छलक्षणं च परिष्कृत्य दीधित्युक्तदोषं उद्धृत्य अनयोः लक्षणयोः

निर्दोषत्वं निरूपयति हेतुतावच्छेदकसंबन्धेनेत्यादिना [पृ. 785]। हेतुतावच्छेदकसंबन्धेन यस्य यत् अधिकरणं तदवच्छेदेन तद्वृत्तित्व-किञ्चिदवच्छिन्नत्व-उभयाभाववन्तः यावन्तःसाधनसमानाधिकरण-साध्याभावसमुदायाधिकरणवृत्तित्वाभावाः अनवच्छिन्नतद्वत्वं व्याप्तिः इत्युक्तौ न कोऽपि दोषः। तथा हि-"महाकालान्यो घटात्" इत्यत्र महाकालवृत्तित्वत्वावच्छिन्नमहाकालवृत्तित्वा-भावोऽपि लक्षणघटकः। तत्र किञ्चिदवच्छिन्नत्वसत्वेऽपि कालिक-संबन्धेन घटाधिकरणखण्डकालावच्छेदेन घटावृत्तित्वविरहात् तदभावप्रयुक्तस्य उभयाभावस्य सत्वात् अनवच्छिन्नतद्वत्वं हेतौ नास्ति। घटे खण्डकालावच्छिन्नस्यैव महाकालवृत्तित्वाभाव-वत्वस्य सत्वात् इति नातिव्याप्तिः।

'वह्निमान् धूमात्' इत्यादौ जगत्संयुक्तत्वत्वावच्छिन्न-जगत्संयुक्तत्वाभावे घटादौ स्वावयवावच्छेदेन वर्तमाने किञ्चि-दवच्छिन्नत्वं, हेतुतावच्छेदकसंयोगसंबन्धेन घटस्य यदधिकरणं भूतलादिकं तदवच्छेदेन घटावृत्तित्वं चेति उभयस्य सत्वेन उभयाभाववत्वविरहात् जगत्संयुक्तत्वत्वावच्छिन्नजगत्संयुक्त-त्वाभावस्य लक्षणाघटकतया व्यधिकरणधर्मावच्छिन्नजगत्संयुक्त-त्वाभावस्यैव व्याप्यवृत्तितया किञ्चिदवच्छिन्नत्वविरहप्रयुक्तो-भयाभाववत्वेन लक्षणघटकतया अनवच्छिन्नतद्वत्वं धूमस्य हेतावस्तीति नाव्याप्तिः।

एवं च एवंरीत्या परिष्कारे न कोऽपि दोष इत्याशयेन ध्येयम् इत्युक्तम्।

गादाधरी

सामानाधिकरण्यस्य व्याप्यवृत्तित्वमते पुच्छलक्षणपरिष्कारः

सामानाधिकरण्यस्य व्याप्यवृत्तित्वे हेतुतावच्छेदकसंबन्धेन किञ्चित्पदार्थाधिकरणवृत्तयो यावन्तःतादृशाभावकूटाधिकरण-वृत्तित्वनिरूपकत्वाभावाः यदधिकरणत्वावच्छेदेन वर्तन्ते तत्वमिति

वक्तव्यम् । महाकालवृत्तित्वनिरूपकत्वस्य समानाधिकरणधर्मावच्छिन्नाभावः खण्डकालवृत्तिः साधनाधिकरणमहाकाले नास्तीति नोक्तातिव्याप्त्यवकाशः। सद्धेतौ तादृशाभावकूटाधिकरणजगद्वृत्तित्वनिरूपकत्वस्य व्यधिकरणधर्मावच्छिन्नाभाव एव हेतुतावच्छेदकसंबन्धेन किंचिदधिकरणवृत्तिः । स च हेत्वधिकरणसामान्य एव वर्तत इति लक्षणसमन्वय इति कृतं पल्लवितेन ।

इति चतुर्दशलक्षण्यां पुच्छलक्षणम्

विवरणम्

एतावता सामानाधिकरण्यस्य अव्याप्यवृत्तिताकत्वे दीधितिकारोक्तदूषणं उद्धृत्य सामानाधिकरण्यस्य व्याप्यवृत्तिताकल्पेऽपि तदुक्तदूषणमुद्धरति - **सामानाधिकरण्यस्य व्याप्यवृत्तित्वे** [पृ. 786] इत्यादिना । **हेतुतावच्छेदकसंबन्धेन किञ्चित्पदार्थाधिकरणवृत्तयः यावन्तः साधनसमानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्वनिरूपकत्वाभावाः यदधिकरणत्वावच्छेदेन वर्तन्ते तत्वं व्याप्तिः ।**

'पर्वतो वह्निमान् धूमात्' इत्यादौ साध्याभावकूटाधिकरणजगद्वृत्तित्वनिरूपकत्वस्य समानाधिकरणधर्मावच्छिन्नाभावः - जगद्वृत्तित्वनिरूपकत्वत्वेन जगद्वृत्तित्वनिरूपकत्वाभावः संयोगसंबन्धेन किञ्चित्पदार्थाधिकरणवृत्तिः न भवति । संयोगसंबन्धेन घटाधिकरणभूतलादेः जगत्संयुक्तत्वरूपजगद्वृत्तित्वनिरुपकत्वात् । किन्तु व्यधिकरणधर्मावच्छिन्ननिरूपकत्वाभावः घटत्वेन जगद्वृत्तित्वनिरूपकत्वाभाव एव लक्षणघटकः । स च यत्पदग्राह्यधूमाधिकरणसामान्ये पर्वतादौ सर्वत्र वर्तत इति तत्वस्य धूमे सत्वात् लक्षणसमन्वयः । अतः न अव्याप्तिः असंभवोऽपि ।

"महाकाशान्यो घटात्" इत्यत्र व्यभिचारिणि साध्याभाव-कूटाधिकरण-महाकालवृत्तित्वनिरूपकत्वस्य यः समानाधिकरण-धर्मावच्छिन्नाभावः महाकालवृत्तित्वनिरूपकत्वत्वेन महाकाल-वृत्तित्वनिरूपकत्वाभावः सोऽपि कालिकसंबन्धेन घटाधिकरण-खण्डकालवृत्तितया लक्षणघटकः। खण्डकाले महाकालवृत्तित्वनिरूपकत्वाभावात्। स च महाकालवृत्तित्वनिरूपकत्वाभावः यत्पदग्राह्यघटाधिकरणसामान्यान्तर्गतमहाकाले नास्ति; महाकाशस्य महाकालवृत्तित्वनिरूपकत्वात्। अतः नाव्याप्तिः इति भावः।

॥ इति पुच्छलक्षणम् ॥

व्यधिकरणधर्मावच्छिन्नाभावखण्डनम्

तत्त्वचिन्तामणिः

प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः; तद्विशिष्ट-ज्ञानस्याभावधीहेतुत्वात् । अन्यथा तन्निर्विकल्पकादपि घटो नास्तीति बुद्ध्यापत्तेः । गवि शशशृङ्गं नास्तीति प्रतीतेरसिद्धेः । शशशृङ्गं नास्तीति च शशे शृङ्गाभाव इत्यर्थः ।।

। इति तत्त्वचिन्तामणौ व्यधिकरणधर्मावच्छिन्नाभावविचारः ।

गादाधरी

'प्रतियोग्यवृत्तिश्च' इत्यादिमणिग्रन्थलभ्यानुमानशोधनम् ।

मूले—**प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक** इति व्यधिकरणधर्मावच्छिन्नाभावनिराकर्तुः प्रतिज्ञावाक्यम् । तत्र धर्मत्वमनुपादेयम्; अवृत्तेरपि प्रतियोगितावच्छेदकत्वस्य निराकर्तव्यत्वात् । **तत्त्वे साधकाभावादिति** हेतुरूह्यः । पक्षतावच्छेदके साध्यतावच्छेदके च सामान्यतः प्रतियोगिप्रतियोगित्वयोर्न प्रवेशः; सर्वेषामेव किंचिदभावप्रतियोगिनि सम्बद्धतया किंचिदभावप्रतियोगितावच्छेदकतया च विशिष्टपक्षाद्यप्रसिद्धेः; किन्तु विशिष्य वाच्यत्वत्वादिना । तथा च वाच्यत्वाद्यवृत्तित्वावच्छिन्ने वाच्यत्वादिनिष्ठप्रतियोगितानवच्छेदकत्वं साधनीयम् । समूहालम्बनानुमितिरुद्देश्या ।

तत्तदभावीयप्रतियोग्यवृत्तित्वावच्छिन्ने तत्तदभावप्रतियोगितानवच्छेदकत्वसाधनं न सम्यक् । समनियताभावैक्यमते समवायित्वादिना वाच्यत्वाद्यभावस्य घटत्वाद्यवच्छिन्नपटाद्यभावाभिन्नतया समवायिपटादीनामपि तथाविधवाच्यत्वाद्यभावप्रतियोगितया तद्वृत्तिसमवायित्वादेः वाच्यत्वाद्यभावीयप्रतियोग्यवृत्तितायाः दुर्घटत्वात् । प्रतियोगिताः विशिष्योपादाय तत्तत्प्रति-

योगितावदवृत्तित्वावच्छिन्ने तत्तत्प्रतियोगितावच्छेदकत्वाभावसाधनमपि हेयम्। वाच्यत्वादिनिष्ठायाः प्रसिद्धसमानाधिकरणद्वित्वाद्यवच्छिन्नाभावप्रतियोगिताया उपादाने सिद्धसाधनात्। सौन्दलोपाध्यायैरपि व्यधिकरणसमवायित्वादिधर्मस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकत्वानङ्गीकारात्। व्यधिकरणधर्मावच्छिन्नायाश्च प्रतियोगिताया उभयवाद्यसिद्धतया विशिष्योपादानासंभवात्।

विवरणम्

मूले **प्रतियोग्यवृत्तिश्चेत्यादि** [पृ. 789]। **प्रतियोग्यवृत्तिश्च धर्मः न प्रतियोगितावच्छेदकः** [पृ. 789] इति मूलं व्यधिकरणधर्मावच्छिन्नाभावनिराकर्तुः प्रतिज्ञावाक्यम्। प्रतियोग्यवृत्तिः धर्मः इति पक्षनिर्देशः। न प्रतियोगितावच्छेदकः इति साध्यनिर्देशः। पक्षे धर्मत्वम् अनुपादेयम्। प्रतियोग्यवृत्तेः अवृत्तिपदार्थस्यापि प्रतियोगितावच्छेदकत्वाभावस्य साधनीयत्वात्। **तत्वे साधकाभावादिति** हेतुः पूरणीयः। **तत्वे साधकाभावात्** [पृ. 789] इत्यस्य प्रतियोगितावच्छेदकत्वप्रकारकत्वविशिष्टप्रमित्यभावात् तादृशप्रमित्यविशेष्यत्वाद्वा इत्यर्थः। तादृशप्रमितेरपि प्रतियोगितावच्छेदकतासाधकत्वेनैव हेतुघटकता। साधकत्वं च अप्रमाण्यज्ञानाभावविशिष्टतन्निश्चयजनकत्वम्। तथा च अप्रामाण्यज्ञानाभावविशिष्टप्रतियोगितावच्छेदकत्वप्रकारकनिश्चयजनक प्रतियोगितावच्छेदकत्वप्रकारकत्वविशिष्टप्रमित्यभावात् इति हेतुः संपन्नः।

पक्षे प्रतियोगिपदेन प्रतियोगित्वेन सामान्यरूपेण प्रतियोगिनः साध्ये प्रतियोगितापदेन प्रतियोगितात्वेन सामान्यरूपेण प्रतियोगितायाश्च न विवक्षा। प्रतियोगित्वस्य केवलान्वयित्वेन सर्वेषामेव धर्माणाम् किञ्चिदभावप्रतियोगिनि संबद्धतया किञ्चिदभावप्रतियोगितावच्छेदकतया च प्रतियोग्यवृत्तित्वविशिष्टस्य पक्षस्य

प्रतियोगितावच्छेदकत्वाभावरूपसाध्यस्य च अप्रसिद्ध्यापत्तेः। किन्तु विशिष्य वाच्यत्वत्वादिनैव निवेशः कर्तव्यः। तथा च वाच्यत्वावृत्तिः वाच्यत्वनिष्ठप्रतियोगितावच्छेदकत्वाभाववान् इत्येवं विशिष्यैव साधनीयम्। यादृशप्रतियोग्यवृत्तिधर्मे यादृशः प्रतियोगितानवच्छेदकत्वं सिषाधयिषितं, तादृशप्रतियोग्यवृत्तित्वं पक्षतावच्छेदकम्। विशिष्य तन्निष्ठप्रतियोगितानवच्छेदकत्वं साध्यम्। समूहालम्बनानुमितिः उद्देश्या इति भावः।

मतान्तरं खण्डयति—**तत्तदभावीयेति**। [पृ. 790]। घटाभावीयप्रतियोग्यवृत्तिः घटाभावीयप्रतियोगितानवच्छेदकः इति पक्षसाध्यनिर्देशः न युक्तः। समनियताभावानां ऐक्यमिति मते समवायित्वेन वाच्यत्वाभावस्य घटत्वेन पटाभावस्य च अभिन्नतया समवायितया वाच्यत्वाभावीयप्रतियोगी पटोऽपि। तदवृत्तित्वं समवायित्वे नास्ति इति समवायित्वस्य पक्षत्वानापत्तेः। पूर्वमते प्रतियोगिनः विशिष्योपादानम्। अत्र मते अभावस्य विशिष्योपादानम् इति भेदः।

समवायिपटादीनमिति। [पृ. 791]। पटस्य समवायित्वकथनं समवायित्वस्य प्रतियोगिवृत्तितया तदवृत्तित्वं नास्ति इति सूचनार्थम्। अथ प्रतियोगिताः विशिष्योपादाय पक्षसाध्यनिर्देशोऽपि न युक्त इत्याह—**प्रतियोगिताः विशिष्य इत्यादिना** [पृ. 790]। 'तत्तत्प्रतियोगितावदवृत्तिः तत्तत्प्रतियोगितावच्छेदकत्वाभाववान्, तत्तत्प्रतियोगितावच्छेदकत्वे साधकाभावात्' इत्यपि न युक्तम्। वाच्यत्वनिष्ठा या वाच्यत्वघटोभयत्वरूपसमानाधिकरणधर्मावच्छिन्ना प्रसिद्धा प्रतियोगिता तस्याः उपादाने तदाश्रयावृत्तिसमवायित्वे तत्प्रतियोगितानवच्छेदकत्वस्य व्यधिकरणधर्मावच्छिन्नाभाववादिनोऽपि सिद्धतया सिद्धसाधनम्। सौन्दलोपाध्यायैरपि व्यधिकरणसमवायित्वादिधर्मस्य समानाधिकरणोभयत्वाद्यवच्छिन्न-

प्रतियोगितावच्छेदकतायाः अनङ्गीकारात् । तत्तत्प्रतियोगितापदेन समवायित्वरूपव्याधिकरणधर्मावच्छिन्ना वाच्यत्वनिष्ठा प्रतियोगिता तु ग्रहीतुं न शक्यते । तस्य उभयवाद्यसिद्धत्वात् ।

गादाधरी

केचित्तु—विशिष्य समवायित्वत्वादिकं पक्षतावच्छेदकीकृत्य वाच्यत्वादिनिष्ठप्रतियोगितानवच्छेदकत्वं साधनीयम्; तादृशप्रतियोगितावदवृत्तित्वमेव हेतुः; यो यदवृत्तिः स तन्निष्ठप्रतियोगितानवच्छेदक इति सामान्यतो व्याप्तिप्रदर्शकः प्रतियोग्यवृत्तिश्चेति ग्रन्थः । वीप्साद्यभावेऽपि प्राथम्येन व्याप्तेर्लाभसंभवात् । वाच्यत्वाद्यवृत्तिधर्ममात्रस्यैव व्यधिकरणतया वाच्यत्वादिनिष्ठप्रतियोगितायां तन्मतेऽवच्छेदकतया यद्यप्यत्रान्वयदृष्टान्तदुर्भिक्षम् तथापि व्यतिरेकेण, वाच्यत्वादिनिष्ठोभयत्वादिकमेव दृष्टान्तः सम्भवतीत्यदोषः ।

अथवा यो यद्वदवृत्तिः स तदनवच्छेदक इति सामान्यव्याप्तौ कारणत्वादिव्यधिकरणः कारणत्वाद्यनवच्छेदक एवान्वयेन दृष्टान्तः। प्रतियोगितावच्छेदकत्वविषयतावच्छेदकत्वोभयसाधारणावच्छेदकतात्वस्यैक्ये भ्रमविषयताव्यधिकरणतदवच्छेदकरजतत्वादौ उक्तसामान्यव्याप्तेर्भङ्गवारणाय विषयतान्यत्वेन यत्पदार्थो विशेषणीय इत्याहुः ।

विवरणम्

मतान्तरमाह - केचित्तु इत्यादिना [पृ. 792] । येषां धर्माणां प्रतियोगितानवच्छेदकत्वं सिषाधयिषितं तेषामेव धर्माणां विशिष्य पक्षत्वम् । तथा च 'समवायित्वं वाच्यत्वनिष्ठप्रतियोगितावच्छेदकम्; वाच्यत्वनिष्ठप्रतियोगितावदवृत्तित्वात् । यो यदवृत्तिः सः तन्निष्ठप्रतियोगितानवच्छेदकः' इति सामान्यतो व्याप्तिं प्रदर्शयन् उदाहरणवाक्यरूपः प्रतियोग्यवृत्तिश्चेति ग्रन्थः ।

प्रतिज्ञाहेतू ऊह्योयो ।। वीप्साद्यभावेन तद्ग्रन्थस्य कथम् उदाहरणरूपत्वं इत्यत आह – **वीप्साद्यभावेऽपीति** । [पृ.792] । **प्राथम्येनेति** [पृ. 792] । 'न प्रतियोगितावच्छेदकः' इत्यतःपूर्वं 'प्रतियोग्यवृत्तिश्च' इत्यस्य उच्चरितत्वेन इत्यर्थः । 'व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्' इति न्यायात् प्रथमोच्चरितस्यैव उद्देश्यतावच्छेदकतया तद्वाक्यात् उद्देश्यविधेयभावमहिम्ना उद्देश्यतावच्छेदकीभूतप्रतियोग्यवृत्तित्वव्यापकत्वस्य प्रतियोगितानवच्छेदकत्वे बोधनात् प्रतियोग्यवृत्तित्वप्रतियोगितानवच्छेदकत्वयोः व्याप्तिबोधकत्वात् अस्य ग्रन्थस्य उदाहरणरूपत्वं अक्षतमिति भावः ।

ननु सौन्दलमते वाच्यत्वावृत्तिधर्मस्य सर्वस्यापि वाच्यत्वनिष्ठप्रतियोगितायां व्यधिकरणतया अवच्छेदकतया यत्र वाच्यत्वावृत्तित्वं तत्र वाच्यत्वनिष्ठप्रतियोगितानवच्छेदकत्वम् इति अन्वयव्याप्तेःदृष्टान्तः दुर्लभः इत्याशङ्क्य वाच्यत्वनिष्ठघटपटोभयत्वादिकं व्यतिरेकदृष्टान्तः इत्याशयेन समाधत्ते – **वाच्यत्वाद्यवृत्तिधर्ममात्रस्यैव** [पृ. 792] **इत्यादिना** । यत्र वाच्यत्वनिष्ठप्रतियोगितानवच्छेदकत्वरूपं साध्यं नास्ति तत्र वाच्यत्वावृत्तित्वरूपहेतुर्नास्ति इति व्यतिरेकः । वाच्यत्वनिष्ठं वाच्यत्वघटोभयत्वं दृष्टान्तः इति भावः ।

अथ वेति [पृ. 792] । 'यो यद्वदवृत्तिः सः तदनवच्छेदकः' इति सामान्यमुखी व्याप्तिः । घटकारणत्ववदवृत्तिः घटकारणतानवच्छेदकः तन्तुत्वादिः अन्वयव्याप्तेः दृष्टान्तः । ननु 'यो यद्वदवृत्तिः सः तदनवच्छेदकः' इति सामान्यतः व्याप्तिर्न संभवति । 'इदं रजतम्' इति भ्रमविषयतावच्छेदकत्ववृत्तौ रजतत्वे भ्रमविषयतावच्छेदकत्वसत्त्वेन तदनवच्छेदकत्वरूपसाध्याभावात् इत्याशङ्क्य यत्पदार्थे विषयतान्यत्वं विशेषणं देयम् । तथा च यः विषयतान्ययद्वदवृत्तिः

सः तदनवच्छेदक इति व्याप्तिरिति न दोष इति समाधत्ते— प्रतियोगितावच्छेदकत्वेत्यादिना [पृ. 792] । प्रतियोगितावच्छेदकत्वं विषयतानात्मकं स्वरूपसंबन्धविशेषः । विषयतावच्छेदकत्वं तु तदात्मकं स इति भेदपक्ष विषयतावच्छेदकतायां अवच्छेदकतात्वानुपगमात् भ्रमीयविषयताश्रयावृत्ति स्वत्वादौ विषयतानवच्छेदकत्वसंभवात् वोक्तसामान्यव्याप्तिभङ्ग इत्यत उक्तम्— प्रतियोगितावच्छेदकत्वविषयतावच्छेदकत्वोभयसाधारणावच्छेदकतात्वस्य ऐक्ये [पृ. 792] इति ।

आहुः [पृ. 792] इत्यस्वरसोद्भावनम् । तद्बीजं तु प्रतियोगितायाः विशिष्य द्वित्वावच्छिन्नायाः उपादाने व्यधिकरणधर्मावच्छिन्नाभावस्य न निराकरणसिद्धिः । व्यधिकरणधर्मावच्छिन्नप्रतियोगिता च असिद्धा इति दोषाद्यसंभवः इत्यादि ।

गादाधरी

अथ कालिकादिसंबन्धेन पटादिवृत्तिघटत्वादेः समवायादिना पटादिनिष्ठप्रतियोगितावच्छेदकत्वखण्डनाय तत्तत्संबन्धेन प्रतियोग्यवृत्तित्वं तत्तत्संबन्धेन प्रतियोगितावच्छेदकत्वाभावसाधने पक्षतावच्छेदकतया हेतुतया वा विवक्षणीयम् । तथा च समवायादिसंबन्धेन वाच्यत्वादिवृत्तित्वाप्रसिद्ध्या उक्तरीत्या समवायसंबन्धावच्छिन्नघटत्वावच्छिन्नवाच्यत्वाद्यभावखण्डनानुपपत्तिः ।

न च प्रतियोग्यवृत्तित्वमित्यनेन प्रतियोगिनिष्ठावच्छेदकतात्मकसंबन्धावच्छिन्नाभावप्रतियोगित्वमेव विवक्षणीयम् । तथा च घटत्वादेरेव वाच्यत्वादिनिष्ठसमवायसंबन्धावच्छिन्नाभावप्रतियोगितया नाप्रसिद्धिरिति वाच्यम् । अव्याप्यवृत्तेः संयोग्यभावप्रतियोगितावच्छेदकस्य प्रतियोगिनिष्ठाभावप्रतियोगितयोक्तधर्मस्य पक्षतावच्छेदकत्वे बाधस्य, हेतुत्वे च व्यभिचारस्य, दुर्वारत्वात् । प्रतियोगिनिष्ठभेदप्रतियोगितायामवच्छेदकताघटकसंबन्धतावच्छेदकत्वस्य विवक्षणे व्यधिकरणसंयोगादिसंबन्धेन घट-

त्वाद्यवच्छिन्नवाच्यत्वाद्यभावनिराकरणानुपपत्तिः । तेन संबन्धेन घटत्वादेः भेदप्रतियोगिताया अवच्छेदकत्वस्य वादिनोरननुमतत्वात् । एवं घटत्वादौ समवायादिसंबन्धेन वाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकत्वस्याभावः प्रतियोग्यप्रसिद्ध्या साधयितुमशक्यः ।

मैवम्—स्वप्रतियोगिकत्व-यदनुयोगिकत्वोभयाभाववद्यादृशसंबन्धसामान्यको यः स स्वनिष्ठत्व-तत्संबन्धावच्छिन्नत्वोभयाभाववत्तन्निष्ठप्रतियोगितावच्छेदकतासामान्यक इत्यर्थविवक्षायामेव सामञ्जस्यात् । संयोगादिसंबन्धसामान्ये घटत्वादिप्रतियोगिकत्ववाच्यत्वाद्यनुयोगिकत्वोभयाभावसत्त्वात् प्रथमस्वपदेन घटत्वाद्युपादानस्य मतद्वय एव संभवात् तत्र स्वनिष्ठत्वसंयोगादिसंबन्धावच्छिन्नत्वोभयाभाववद्वाच्यत्वादिवृत्तिप्रतियोगितावच्छेदकतासामान्यकत्वसाधनेनोद्देश्यसिद्धिः ।

विवरणम्

अथ कालिकसंबन्धेनेति [पृ. 794] । पटावृत्तिघटत्वं समवायसंबन्धेन पटनिष्ठप्रतियोगितानवच्छेदकम् इति साधनीयम् । तत्र घटत्वस्य कालिकसंबन्धेन पटवृत्तितया पटावृत्तित्वं न संभवतीति तत्संबन्धेन पटावृत्तिः तत्संबन्धावच्छिन्नतन्निष्ठप्रतियोगितानिरूपितावच्छेदकत्वाभाववान् इति पक्षसाध्ययोः विशिष्यसंबन्धनिर्देशः कर्तव्यः । तथा सति समवायसंबन्धेन पटावृत्तिघटत्वे पटनिष्ठप्रतियोगितानिरूपितसमवायसंबन्धावच्छिन्नावच्छेदकत्वाभावरूपस्य साध्यस्य उपपत्तिः । एवं सति समवायसंबन्धावच्छिन्नघटत्वनिष्ठावच्छेदकताकवाच्यत्वनिष्ठप्रतियोगिताकाभावस्य खण्डनमस्मात् ग्रन्थात् न लभ्येत । समवायसम्बन्धेन वाच्यत्ववृत्तित्वस्याप्रसिद्ध्या तदवृत्तेः दुर्लभत्वात् इति प्रश्नः ।

समवायसंबन्धावच्छिन्नघटत्वावच्छिन्नेति । [पृ. 794]
समवायसंबन्धावच्छिन्ना या घटत्वनिष्ठावच्छेदकता तन्निष्ठवाच्यत्वनिष्ठप्रतियोगिताकाभावस्य खण्डनानुपपत्तिरित्यर्थः । अयमप्य-

भावः व्यधिकरणधर्मावच्छिन्नाभाव एव । किन्तु व्यधिकरणधर्मनिष्ठा अवच्छेदकता समानाधिकरणसंबन्धावच्छिन्नेति विशेषः ।

अस्मिन् प्रश्ने समाधानमाशङ्कते - न च प्रतियोग्यवृत्तित्वमित्यनेनेति [पृ.794] । प्रतियोग्यवृत्तित्वमित्यस्य प्रतियोगिनिष्ठाभावप्रतियोगित्वमित्यर्थः । प्रतियोगिनिष्ठः यः प्रतियोगितावच्छेदकतावच्छेदकत्वेन अभिमतसंबन्धावच्छिन्नप्रतियोगिताकः अभावः तत्प्रतियोगी पक्षः । प्रतियोगितानवच्छेदकत्वं साध्यम् । प्रतियोगिवाच्यत्वनिष्ठः यः समवायसंबन्धावच्छिन्नघटत्वनिष्ठप्रतियोगिताकाभावः तत्प्रतियोगिनि घटत्वे वाच्यत्वनिष्ठप्रतियोगितानिरूपितावच्छेदकत्वाभावसत्त्वात् नानुपपत्तिः इति न च वाच्यम् । एवमपि संयोगाभावप्रतियोगिसंयोगिनिष्ठाभावप्रतियोगिनि संयोगे संयोगिनिष्ठप्रतियोगितावच्छेदकत्वमेवास्ति, न तु तन्निष्ठप्रतियोगितानवच्छेदकत्वरूपं साध्यम् इति बाधः । यदा तु प्रतियोग्यवृत्तित्वं हेतुः तदा प्रतियोगिनिष्ठाभावप्रतियोगित्वरूपप्रतियोग्यवृत्तित्वात्मकहेतुमति संयोगे संयोगिनिष्ठप्रतियोगितानवच्छेदकत्वरूपसाध्याभावात् व्यभिचारो वा प्रसजति इति भावः ।

ननु प्रतियोग्यवृत्तीत्यनेन प्रतियोगिनिष्ठभेदप्रतियोगितायां अवच्छेदकताघटकसंबन्धेन अवच्छेदकं विवक्षितम् । समवायसंबन्धावच्छिन्नघटत्वावच्छिन्नवाच्यत्वाभावस्य प्रतियोगि यत् वाच्यत्वं तन्निष्ठः यः भेदः समवायसंबन्धेन घटत्ववद्भेदः तत्प्रतियोगितायां समवायसंबन्धेन अवच्छेदकं घटत्वं भवतीति तत्र वाच्यत्वनिष्ठप्रतियोगितानवच्छेदकत्वं साधयितुं शक्यते । तथा च प्रतियोग्यवृत्तित्वस्य पक्षतावच्छेदकत्वे प्रतियोगिनिष्ठभेदप्रतियोगितानिरूपिताभावप्रतियोगितावच्छेदकतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताश्रयः तन्निष्ठप्रतियोगितानवच्छेदकः इति

प्रतिज्ञा । तत्वे साधकाभावादिति हेतुः । प्रतियोग्यवृत्तित्वस्य हेतुत्वे, घटत्वं वाच्यत्वनिष्ठप्रतियोगितानिरूपितसमवायसंबन्धावच्छिन्नावच्छेदकत्वाभाववत् वाच्यत्वनिष्ठभेदप्रतियोगितानिरूपितसमवायसंबन्धावच्छिन्नावच्छेदकत्वात् इति प्रयोगः ।

एवं विवक्षायामपि व्यधिकरणसंयोगसंबन्धेन घटत्वावच्छिन्नवाच्यत्वाभावस्य निराकरणानुपपत्तिः । व्यधिकरणसंबन्धेन घटत्वादेः भेदप्रतियोगितावच्छेदकत्वस्य सौन्दलाचार्याणामपि असंमतत्वात् । एवं वाच्यत्वनिष्ठप्रतियोगितानिरूपितसमवायसंबन्धावच्छिन्नावच्छेदकत्वस्य अप्रसिद्ध्या तदभावः घटत्वादौ साधयितुमशक्यः इति आक्षेपः ।

तत्समाधानमाह - नैवमित्यादिना [पृ- 795] । स्वप्रतियोगित्व - यदनुयोगिकत्वोभयाभाववत् यादृशसंबन्धसामान्यको यः सः स्वनिष्ठत्वतत्संबन्धावच्छिन्नत्वोभयाभाववत् तन्निष्ठप्रतियोगितावच्छेदकतासामान्यकः इत्यर्थः 'प्रतियोग्यवृत्तिश्चे'त्यादिना विवक्षितः । संयोगसंबन्धावच्छिन्नघटत्वनिष्ठावच्छेदकताकवाच्यत्वनिष्ठप्रतियोगिताकाभावस्य निराकरणमपि एवं पक्षसाध्यनिर्देशे लभ्यते । अत्र स्वपदेन प्रतियोगितावच्छेदकधर्मः ग्राह्यः । संयोगसंबन्धे घटत्वप्रतियोगिकत्व - वाच्यत्वानुयोगिकत्वोभयाभावः वर्तते । अतः तादृशोभयाभाववत्संयोगसामान्यकः यः धर्मः घटत्वं तत्र 'स्वनिष्ठत्वे'त्यादि साध्यमपि वर्तते । घटत्वनिष्ठायां वाच्यत्वाभावप्रतियोगितावच्छेदकतायां स्वनिष्ठत्वसत्त्वेऽपि संयोगसंबन्धावच्छिन्नत्वाभावात् तदभावप्रयुक्तोभयाभावसत्वेन उभयाभाववत् तन्निष्ठप्रतियोगितावच्छेदकतासामान्यकत्वस्य साधनेन इष्टसिद्धिः । एवं समवायसंबन्धेन घटत्वेन वाच्यत्वं नास्ति इति प्रतीतिसिद्धस्य समवायसंबन्धावच्छिन्नघटत्वनिष्ठावच्छेदकताकवाच्यत्वनिष्ठः प्रतियोगिताकाभावस्यापि निराकरणं लभ्यते ।

समवायसंबन्धे घटत्वप्रतियोगिकत्वसत्त्वेऽपि वाच्यत्वानुयोगिकत्वविरहेण उभयाभावसत्त्वात् घटत्वस्य पक्षता । तत्र स्वनिष्ठत्वसमवायसंबन्धावच्छिन्नत्वोभयाभाववत्प्रतियोगितावच्छेदकताकत्वं साध्यते तच्च साध्यम् : प्रतियोगितावच्छेदकतायां घटत्वनिष्ठत्वाभावादेव पर्यवस्यतीति ।

गादाधरी

प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावज्ञानं प्रति हेतुत्वव्यवस्थापनम् ।

ननु 'समवायितया वाच्यत्वं नास्ति' इत्याकारकः समवायित्वादेः वाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकत्वावगाहिप्रत्यय एव मानमित्युक्तहेतोः असिद्ध्याशङ्कायामाह—तद्विशिष्टज्ञानस्येति [पृ. 789] ।

अत्र च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य अभावलौकिकप्रत्यक्षत्वावच्छिन्नहेतुत्वादित्यर्थः ।

यद्यपि अन्यथा घटनिर्विकल्पकानन्तरं घटाभावप्रत्यक्षापत्तेरिति मूलदर्शितयुक्त्या वाच्यत्वं न समवायीति विशेषदर्शनप्रतिबध्यवाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानपर्यन्तापेक्षा समवायित्वावच्छिन्नवाच्यत्वाभावप्रत्यक्षे नायाति ।

तथापि स्वतन्त्रमहानसीयत्ववह्नित्वप्रकारकज्ञानात् महानसीयवह्निर्नास्तीति बुद्ध्यनुदयात् महानसीयवह्निर्नास्तीत्याद्यभावबुद्धौ महानसीयत्वाद्यवच्छिन्नत्वेन वह्न्यादिनिष्ठप्रतियोगितावगाहिन्यां यथा महानसीयत्वप्रकारेण वह्नित्वाद्यवच्छिन्नविषयकं ज्ञानं हेतुः, तथा समवायितया वाच्यत्वं नास्तीत्यादिबुद्धेः वाच्यत्वादिनिष्ठप्रतियोगितायां समवायित्वाद्यवच्छिन्नत्वाद्यवगाहित्वे समवायित्वादिना वाच्यत्वत्वाद्यवच्छिन्नधर्मिकज्ञानं हेतुतया अपेक्ष्यते । तथा च वाच्यत्वं न समवायीति विशेषदर्शनदशायामप्यनुभूयमाना तदाकारा प्रतीतिः कथमुपपद्यताम् । तत्र तस्या वाच्य-

नास्ति इति बुद्ध्यापत्तेः' [पृ. 789] इति मणिग्रन्थात् प्रतीयते । तेन सप्रकारकं प्रतियोगिज्ञानं अभावबुद्धि प्रति हेतुः इत्येतावन्मात्रमेव लभ्यते । तच्च ज्ञानं 'समवायि' इत्याकारकं 'वाच्यत्वं' इत्याकारकमपि भवितुमर्हति । उभयोरपि सप्रकारकत्वात् । तच्च ज्ञानद्वयं 'वाच्यत्वं न समवायि' इति विशेषदर्शनकालेऽपि भवितुमर्हति । 'वाच्यत्वं समवायि' इत्याकारक-वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानं प्रत्येव वाच्यत्वं न समवायि इति विशेषदर्शनस्य प्रतिबन्धकत्वात् । तथा च विशेषदर्शनकालेऽपि तत्प्रतिबध्यं यत् 'समवायि' इत्याकारकं 'वाच्यत्वम्' इत्याकारकं वा सप्रकारकं प्रतियोगिज्ञानं तत एव 'समवायित्वेन वाच्यत्वं नास्ति' इत्याकारकप्रतीतेः संभवात् सा प्रतीतिः समवायित्वस्य वाच्यत्वनिष्ठप्रतियोगितावच्छेदकत्वसाधिका भविष्यति । अतः साधकाभावरूपहेतुः असिद्धः इति आशङ्का ।

समाधत्ते - तथापीत्यादिना [पृ. 798] । 'महानसीयः' इत्याकारकात् महानसीयत्वप्रकारकात् ज्ञानात् 'वह्निः' इत्याकारकात् वह्नित्वप्रकारकात् ज्ञानाच्च महानसीयवह्निर्नास्तीति बुद्धिर्नोदेति । अतः 'महानसीयवह्निर्नास्ति' इति बुद्धि प्रति सामान्यतः सप्रकारकप्रतियोगिज्ञानं कारणं इति वक्तुं न शक्यते । किन्तु महानसीयत्वावच्छिन्नत्वेन वह्निनिष्ठप्रतियोगितावगाहिन्यां 'महानसीयवह्निर्नास्ति' इत्याकारकाभावबुद्धौ वह्नित्वावच्छिन्नविशेष्यकमहानसीयत्वप्रकारकं 'वह्निमहानसीय' इत्याकारकं एकं ज्ञानं हेतुः । स्वतन्त्रयोः महानसीयत्ववह्नित्वप्रकारकज्ञानयोः वह्नित्वावच्छिन्नविशेषकमहानसीयत्व - प्रकारकत्वविरहात् तादृशज्ञानाभ्यां महानसीयवह्निर्नास्ति इति बुद्धिर्न भवति । एवमेव 'समवायित्वेन वाच्यत्वं नास्ति' इत्याकारिकायां समवायित्वावच्छिन्नत्वेन वाच्यत्वनिष्ठप्रतियोगितावगाहिन्यां

त्वाद्यनुयोगिकसमवायित्वाभावादसम्बद्धत्वोपगमे सर्वत्रैव तथात्व-मुपेयतामिति गते व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वेनेत्य-भिप्राय इति मिश्रानुसारिव्याख्यानम् ।

विवरणम्

तद्विशिष्टज्ञानस्य [पृ. 798] इति ग्रन्थमवतारयति - ननु समवायितया वाच्यत्वमिति [पृ. 798] । 'प्रतियोग्यवृत्तिश्च धर्मः न प्रतियोगितावच्छेदकः' इति प्रतिज्ञावाक्यम् । तत्र 'तत्त्वे साधकाभावात्' इति हेतुः पूरणीय इति पूर्वमुक्तम् । तेन प्रति-योग्यवृत्तिधर्मे प्रतियोगितानवच्छेदकत्वसिद्धौ प्रतियोगितावच्छेद-कत्वे साधकाभावः हेतुरिति लभ्यते । अयं च हेतुरसिद्धः । 'समवायितया वाच्यत्वं नास्ति' इत्याकारकः तृतीयया समवायि-त्वस्य वाच्यत्वनिष्ठप्रतियोगितावच्छेदकत्वावगाही प्रत्यय एव प्रतियोगितावच्छेदकत्वे साधकः । अतः साधकाभावरूपहेतुः असिद्ध इत्याशङ्कायां तद्विशिष्टज्ञानस्य अभावधीहेतुत्वात् इति मणिग्रन्थः [पृ. 789] प्रवृत्तः । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य अभावप्रत्ययं प्रति हेतुत्वात् वाच्यत्वं न समवायीति विशेषदर्शन-दशायां 'वाच्यत्वं समवायी'ति प्रतियोगितावच्छेदकविशिष्टप्रति-योगिज्ञानं न भवितुमर्हति । अतः कारणाभावात् 'समवायितया वाच्यत्वं नास्ति' इत्याकारकः प्रत्यय एव न संभवतीति स कथं प्रतियोगितावच्छेदकत्वसाधकः । अतः साधकाभावरूपहेतुः सिद्ध एवेति तात्पर्यम् ।

तद्विशिष्टज्ञानस्येति [पृ. 798] मणिग्रन्थस्य मिश्रानुसारि-व्याख्यानम् अनुवदति - अत्र चेत्यादिना [पृ. 798] । यद्यपीत्यादि [पृ. 798] । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य अभा-वधीहेतुत्वानुपगमे प्रतियोगिविषयकनिर्विकल्पकादपि 'घटो नास्ति' इति अभावबुद्ध्यापत्तिः इति 'अन्यथा तन्निर्विकल्पकादपि घटो

बुद्धौ वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानं 'वाच्यत्वं समवायि' इत्याकारकं हेतुः । तच्च ज्ञानं 'वाच्यत्वं न समवायि' इति विशेषदर्शनदशायां न भवितुमर्हति । वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकबुद्धिं प्रति वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वाभावप्रकारकज्ञानस्य प्रतिबन्धकत्वात् । अतः 'समवायित्वेन वाच्यत्वं नास्ति' इति साधकप्रतीतेः अभावात्' इति सुष्टूक्तमिति भावः ।

ननु 'समवायितया वाच्यत्वं नास्ति' इति प्रतीतिः वाच्यत्वे समवायित्वाभावम् अवगाहते । अतः ईदृशी प्रतीतिः विशेषदर्शनदशायामपि भवितुमर्हतीत्याशङ्क्य तथा सति व्यधिकरणधर्मस्य अवच्छेदकत्वं न सिद्ध्येत् इत्याह—तत्र तस्या [पृ. 798] इत्यादिना ।

गादाधरी

मिश्रानुसारिव्याख्याने अनुपपत्तिशङ्का

अत्रेयमनुपपत्तिरवतरति—तद्धर्मावच्छिन्नतन्निष्ठप्रतियोगिताकाभावबुद्धौ तद्धर्मप्रकारकतज्ज्ञानत्वेन हेतुत्वासंभवः । घटत्वेन यत्किंचिद्घटज्ञानादपि यावद्घटप्रतियोगिकसामान्याभावबुद्ध्युत्पत्त्या व्यभिचारात् । संभवेऽपि वा दर्शितविशेषदर्शनकाले निर्धर्मितावच्छेदककवाच्यत्वादिधर्मिकसमवायित्वादिभ्रमसंभवेन व्यधिकरणधर्मावच्छिन्नाभावप्रतीतिनिर्वाहात् तादृशकारणताया अकिंचित्करत्वम् ।

न च वह्नित्वधर्मितावच्छेदककमहानसीयत्वप्रकारकबुद्धिं विना विशृङ्खलमहानसीयत्वप्रकारकज्ञानसत्त्वेऽपि महानसीयवह्नित्वाद्यवच्छिन्नाभावप्रत्यक्षानुत्पत्त्या तद्धर्मसमानाधिकरणतद्धर्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तद्धर्मावच्छिन्नधर्मिकतद्धर्मप्रकारकज्ञानत्वेन हेतुता वाच्येति वाच्यत्वत्वावच्छिन्नधर्मिकसम-

वायित्वप्रकारकज्ञानं विना न समवायित्वावच्छिन्नवाच्यत्वत्वसमा-नाधिकरणप्रतियोगिताकाभावभानसंभव इति वाच्यम् ।

महानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगितायां द्रव्यत्वादेरपि सामानाधिकरण्यादुक्तकार्यकारणभावोपगमे द्रव्यत्वाद्यवच्छिन्न-धर्मिकमहानसीयत्वप्रकारकज्ञानस्यापि तादृशप्रतियोगिताकाभाव-बुद्धावपेक्षणीयत्वापत्तेः ।

विवरणम्

अस्मिन् मिश्रव्याख्याने अनुपपत्तिमुद्भाव्य तत्र समाधानं वक्ष्यन् आदौ विस्तरेण अनुपपत्तिमनुवदति - अत्र इयमनुपपत्ति-रवतरति [पृ. 801] इत्यादिना । तद्धर्मावच्छिन्नतन्निष्ठप्रतियोगि-ताकाभावबुद्धिं प्रति तद्धर्मप्रकारकतद्विशेष्यकज्ञानं हेतुरिति कार्य-कारणभावः न संभवति । घटत्वप्रकारेण यत्किञ्चिद्घटज्ञानादपि 'घटो नास्ति' इत्याकारकयावद्घटाभावविषयकबुद्धेरुत्पत्त्या घटत्वप्रकारकयावद्घटज्ञानस्याहेतुत्वभावेन व्यतिरेकव्यभिचारात् । उक्तकार्यकारणभावस्य संभवेऽपि 'वाच्यत्वं न समवायि' इति विशेषदर्शनकाले किञ्चिद्धर्मानवच्छिन्नवाच्यत्वनिष्ठविशेष्यता-निरूपितसमवायित्वनिष्ठप्रकारताशालिभ्रमस्य संभवेन तद्बलात् 'समवायितया वाच्यत्वं नास्ति' इति प्रतीतेः संभवात् । तादृश-कार्यकारणभावस्य अकिञ्चित्करत्वात् ।

न च वह्नित्वधर्मितावच्छेदककेति [पृ. 801] । निर्धर्मिताव-च्छेदककमहानसीयत्वप्रकारकज्ञानात् 'महानसीयवह्निर्नास्ति' इति बुद्धेरनुत्पत्त्या तद्धर्मसमानाधिकरण - तद्धर्मावच्छिन्नप्रतियोगिताका-भावबुद्धिं प्रति तद्धर्मावच्छिन्नधर्मिकतद्धर्मप्रकारकज्ञानं कारणमिति वक्तव्यम् । वह्नित्वसमानाधिकरणमहानसीयत्वावच्छिन्नप्रतियोगि-ताकाभावबुद्धौ वह्नित्वावच्छिन्नविशेष्यक - महानसीयत्व-प्रकारक-ज्ञानस्य हेतुत्वात् 'वह्निर्महानसीयः' इत्याकारकज्ञानं विना

विशृंखलात् 'महानसीय' इति ज्ञानात् 'महानसीयवह्निर्नास्ति' इति बुद्धेः नापत्तिः। एवं च वाच्यत्वत्वसमानाधिकरणा समवायित्वावच्छिन्ना या प्रतियोगिता तन्निरूपकाभावबुद्धिं प्रति वाच्यत्वत्वावच्छिन्न - धर्मिक - समवायित्वप्रकारकज्ञानस्य अपेक्षितत्वात् विशेषदर्शनदशायां तादृशज्ञानस्य असंभवात् कथं समवायितया वाच्यत्वं नास्तीति बुद्धिर्भवितुमर्हति इति भावः।

विशृंखलेति [पृ. 801]। निर्धर्मितावच्छेदककेत्यर्थः। **तद्धर्मसमानाधिकरणेति** [पृ. 801] **प्रतियोगितायाम्** [पृ. 801] अन्वेति। तद्धर्मसमानाधिकरणा तद्धर्मावच्छिन्ना या प्रतियोगिता तन्निरूपकाभावबुद्धौ इत्यर्थः।

समाधत्ते—**महानसीयवह्नित्वावच्छिन्नेति** [पृ. 802]। उक्तकार्यकारणभावोऽपि न संभवति। महानसीयवह्निर्नास्तीति या बुद्धिः सा महानसीयत्वावच्छिन्नप्रतियोगिताकाभावं विषयीकरोति। तस्यां च प्रतियोगितायां वह्नित्वसमानाधिकरणत्ववत् द्रव्यत्वसमानाधिकरणत्वमपि वर्तते। अतः सा बुद्धिः द्रव्यत्वसमानाधिकरणमहानसीयत्वावच्छिन्नप्रतियोगिताकाभावविषयिणी इति द्रव्यत्वावच्छिन्नधर्मिकमहानसीयत्वप्रकारकज्ञानमपि तादृशबुद्धौ अपेक्षणीयं स्यात्। तथा च तद्धर्मसमानाधिकरणतद्धर्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तद्धर्मावच्छिन्नधर्मिकतद्धर्मप्रकारकज्ञानं कारणमिति कार्यकारणभावः न संभवति। किन्तु पूर्वोक्तरीत्यैव कार्यकारणभावः। तत्र च अनुपपत्तिः अस्त्येवेति भावः।

गादाधरी

अथ तद्धर्मवद्वृत्तित्वेन भासमानप्रतियोगित्वे तद्धर्मावच्छिन्नत्वावगाहिन्यामभावबुद्धौ तद्धर्मावच्छिन्नधर्मिकतद्धर्मप्रकारकज्ञानत्वेन हेतुता। महानसीयवह्निर्नास्तीत्यत्र च वह्नित्वावच्छिन्ननिष्ठत्वेन संसर्गघटकतया भासमानप्रतियोगित्वे महानसीयत्वा-

वच्छिन्नत्वं भासते, स्वावच्छिन्नवह्निवृत्तिप्रतियोगिताकत्वस्या-भावांशे प्रतियोगिविशेषणतापन्नमहानसीयत्वस्य संबन्धघटकत्वा-दिति तत्र वह्नित्वावच्छिन्नधर्मिकमहानसीयत्वप्रकारकज्ञानस्या-पेक्षा; न तु धर्मान्तरावच्छिन्नधर्मिकस्य । धर्मान्तरविशेषितवह्नि-वृत्तित्वेन तत्र प्रतियोगिताया अभानादिति चेत्—

तर्हि प्रतियोगितावच्छेदकप्रकारकज्ञानमन्तरेणापि अभाव-प्रत्यक्षसामान्यापत्तिः, प्रत्यक्षविशेष एव तद्धेतुतायाः स्वीकृतत्वात् । एवमपि अनतिप्रसङ्गेन प्रतियोगिविशेषिताभावबुद्धौ विशेषणता-वच्छेदकप्रकारकज्ञानमुद्रया प्रतियोगितावच्छेदकप्रकारकज्ञानस्य हेतुत्वादेव निर्वाहेण स्वतन्त्रतद्धेतुताया निर्बीजत्वापाताच्च ।

अस्तु वा एतादृशरीत्यैव हेतुहेतुमद्भावः । तथापि समवायि-तया वाच्यत्वं नास्तीत्यत्र वाच्यत्वत्वसामानाधिकरण्याविशेषि-तत्वावच्छिन्नप्रतियोगिताया एव समवायित्वसंसर्गघटकतया भानो-पगमसंभवेन वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानस्य तत्रानपेक्षणीयत्वमुपपद्यत इति ।

विवरणम्

पुनःशङ्कते अथ तद्धर्मवद्वृत्तित्वेनेति [पृ. 803] । तद्धर्मवद्-वृत्तित्वेन भासमानायां प्रतियोगितायां तद्धर्मावच्छिन्नत्वावगाहिनी या अभावबुद्धिः तां प्रति तद्धर्मावच्छिन्नधर्मिक-तद्धर्मप्रकारकज्ञानं हेतुरिति कार्यकारणभावः । 'महानसीयवह्निर्नास्ति' इत्यत्र प्रतियोगिविशेषणतापन्नस्य महानसीयत्वस्य स्वावच्छिन्नवन्हि-वृत्तिप्रतियोगिताकत्वसंबन्धेन नञर्थाभावेऽन्वयात् वन्हित्ववद्वृत्ति-त्वेन संसर्गघटकतया भासमानायां प्रतियोगितायां महानसीयत्वा-वच्छिन्नत्वं अवगाहते इयं बुद्धिः । न तु द्रव्यत्ववद्वृत्तित्वेन भासमानप्रतियोगितायाम् । संसर्गघटकप्रतियोगितायां द्रव्यत्व-वद्वृत्तित्वस्य अभानात् । तथा च 'महानसीयवह्निर्नास्ति'

इति बुद्धौ वह्नित्वावच्छिन्नधर्मिकमहानसीयत्वप्रकारकज्ञानमेवापेक्षितम्। न तु द्रव्यत्वावच्छिन्नधर्मिकमहानसीयत्वप्रकारकज्ञानम्। अतो न पूर्वोक्ता अनुपपत्तिः। 'समवायितया वाच्यत्वं नास्ति' इति बुद्धौ तृतीयार्थस्य अवच्छिन्नत्वस्य वाच्यत्वत्ववद्वृत्तित्वेन भासमानायां प्रतियोगितायामेव भानात् वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानमपेक्षितमिति भावः।

धर्मान्तरविशेषितेति [पृ. 804]। द्रव्यत्वविशेषितेत्यर्थः। **तर्हि इत्यादि**। [पृ. 804] 'तद्धर्मवद्वृत्तित्वेन' इत्यादिना प्रदर्शितं बुद्धिविशेषं प्रत्येव तादृशज्ञानस्य कारणत्वात् अभावप्रत्यक्षसामान्यं प्रति तस्य अकारणत्वात् प्रतियोगितावच्छेदकप्रकारकज्ञानं विनापि अभावप्रत्यक्षसामान्यापत्तिः इति दोषः। किंच प्रतियोगिविशिष्टाभावबुद्धिं प्रति प्रतियोगितावच्छेदकप्रकारकज्ञानस्य न स्वातन्त्र्येण कारणत्वम्, किंतु विशिष्टबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकज्ञानविधयैव कारणत्वम्।

अस्तु वा इत्यादि [पृ. 804]। 'महानसीयवह्निर्नास्ति' इति बुद्धौ प्रतियोगित्वे वह्नित्वसामानाधिकरण्यं भासते इति तदनुरोधेन तद्धर्मवद्वृत्तित्वेन भासमानप्रतियोगित्वे तद्धर्मावच्छिन्नावगाहिबुद्धिं प्रति तद्धर्मधर्मितावच्छेदककतद्धर्मप्रकारकज्ञानं हेतुः इति कार्यकारणभावः अस्तु नाम। 'समवायित्वेन वाच्यत्वं नास्ति' इत्यत्र तु सः कार्यकारणभावः न कल्प्यते। संबन्धघटकतया भासमाने प्रतियोगित्वे वाच्यत्वत्ववद्वृत्तित्वस्य भानं नास्ति इति वक्तुं शक्यत्वात् इति भावः। **स्वावच्छिन्नप्रतियोगितायाः इति** [पृ. 804]। समवायित्वावच्छिन्नप्रतियोगितायाः इत्यर्थः।

गादाधरी

मिश्रानुसारिव्याख्याने अनुपपत्तिशङ्कायाः समाधानम्

अत्रेदं समाधानमवधेयम्—तदुभयधर्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तदुभयैकतरधर्मावच्छिन्नधर्मिकतदितरप्रकारकज्ञान-

त्वेन हेतुता। समवायितया वाच्यत्वाभावस्य व्यधिकरणस-मानाधिकरणयोः समवायित्ववाच्यत्वत्वयोरुभयोरेव प्रतियोगिता-वच्छेदकत्वपर्याप्तिरवश्यमङ्गीकार्या। समवायित्वमात्रस्य प्रतियो-गितावच्छेदकत्वे वाच्यत्वत्वप्रकारकज्ञानमन्तरेणापि तादृशाभाव-प्रतीत्यापत्तेः। अत्र समवायितया वाच्यत्वं नास्तीति प्रतीत्या समवायित्ववाच्यत्वत्वोभयपर्याप्तप्रतियोगितावच्छेदकत्वानवगाहने तस्याः समवायिवाच्यत्ववदिदमिति भ्रमविरोधित्वानुपपत्तेश्च। तं प्रति समवायितया प्रमेयत्ववाच्यत्वोभयं नास्तीत्यादिनिश्चयव्या-वृत्तेन तदुभयांशे प्रतियोगितावच्छेदकतापर्याप्त्यवगाहिनिश्चयत्वे-नैव प्रतिबन्धकत्वात्।

न च विलक्षणवाच्यत्वप्रकारताविशेषेणैव दर्शितनिश्चयव्या-वृत्तिसंभवे तदुभयांशेऽवच्छेदकत्वपर्याप्त्यवगाहित्वमप्रयोजकमिति वाच्यम्। यतस्तद्धर्मेऽभावप्रतियोगितावच्छेदकत्वपर्याप्तिः तद-वच्छिन्नस्याभावविरोधित्वप्रयोजिका तत्र तदवगाहित्वमेवाभावबुद्धेः तदवच्छिन्नविशिष्टज्ञानप्रतिबन्धकतायां तन्त्रम्। समवायितया वाच्यत्वप्रमेयत्वोभयं नास्तीति बुद्धेः समवायित्ववाच्यत्वत्वोभय-विशिष्टवत्ताबुद्ध्यप्रतिबन्धकत्वे उभयांशे प्रतियोगितावच्छेदक-तापर्याप्त्यनवगाहित्वमेव बीजम्। तस्य च समवायितया वाच्यत्वं नास्तीति धीसाधारण्ये तस्यास्तादृशधीप्रतिबन्धकत्वम्; न तु उक्तोभयाभावबुद्धेरिति विशेष एव नोपपद्यते। यदि चैतस्याः प्रतीतेः प्रतिबन्धकत्वम्, नान्यस्या इत्यत्र विषयतावैचित्र्यमात्रं बीजमास्थीयते, तदा समानाधिकरणधर्मावच्छिन्नाभावविषयिण्या घटो नास्तीत्यादिबुद्धेरपि प्रतियोगितावच्छेदकत्वावगाहित्वं विलीयताम्। न हि तत्र घटत्वादिविशिष्टधीप्रतिबन्धकत्वानुरोध-मन्तरेण युक्त्यन्तरं परिस्फुरति; स च भवतामकिंचित्कर एव; कपालसमवेतद्रव्यं नास्ति, नीलघटो नास्ति, इत्यादिप्रतीतिव्या-वृत्तप्रकारताविशेषस्यैव तादृशधीप्रतिबन्धकताबीजत्वसंभवात्।

तथा च तत्रैव समवायितया वाच्यत्वं नास्तीत्यादिव्यधिकरणधर्मावच्छिन्नाभावबुद्धावपि वाच्यत्वत्वांशे प्रतियोगितावच्छेदकत्वावगाहनमशक्यापह्नवमेवेति वाच्यत्वत्वाद्यवच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानमन्तरेण न तत्संभवः ।

विवरणम्

अत्रेदं समाधानमवधेयमिति [पृ. 805]। तदुभयधर्मावच्छिन्नप्रतियोगिताकाभावबुद्धिं प्रति तदुभयैकतरधर्मावच्छिन्नविशेष्यकतदितरप्रकारकज्ञानं कारणम् । यथा महानसीयवन्हिः नास्ति' इत्याकारिकायां महानसीयत्ववन्हित्वोभयावच्छिन्नप्रतियोगिताकाभावबुद्धौ तदेकतरवह्नित्वावच्छिन्नविशेष्यकतदितरमहानसीयत्वप्रकारकज्ञानं कारणम् । अतः विशृङ्खलमहानसीयत्वप्रकारकज्ञानात् 'महानसीयवह्निर्नास्ति' इति बुद्धेः नापत्तिः । 'समवायितया वाच्यत्वं नास्ति' इति प्रतीतौ व्यधिकरणे समवायित्वे समानाधिकरणे वाच्यत्वत्वे च उभयत्र प्रतियोगितावच्छेदकत्वं पर्याप्तमिति वक्तव्यम् । यदि समवायित्वमात्रं प्रतियोगितावच्छेदकं स्यात्, वाच्यत्वत्वप्रकारकज्ञानं विनापि 'समवायितया वाच्यत्वं नास्ति' इति प्रतीत्यापत्तिः ।

किंच अत्र 'समवायितया वाच्यत्वं नास्ति' इति प्रतीतेः 'समवायिवाच्यत्ववदिदम्' इत्याकारकभ्रमात्मकज्ञानं प्रति प्रतिबन्धकत्वमिष्टम् । तच्च समवायित्व - वाच्यत्वत्व - उभयोः प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहने एव उपपद्यते । केवलं समवायित्वनिष्ठप्रतियोगितावच्छेदकताकाभावबुद्धेः तादृशभ्रमप्रतिबन्धकत्वे 'समवायितया प्रमेयत्ववाच्यत्वोभयं नास्ति' इति निश्चयस्यापि प्रतिबन्धकत्वप्रसङ्गात् । एवं च 'समवायितया वाच्यत्वं नास्ति' इति समवायित्व-वाच्यत्वत्व-उभयावच्छिन्नप्रतियोगिताकाभावबुद्धौ वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानस्य हेतुत्वेन

'वाच्यत्वं न समवायि' इति विशेषदर्शनदशायां तादृशज्ञानरूप-कारणाभावात् 'समवायितया वाच्यत्वं नास्ति' इति प्रतीतेर-संभवात् सा प्रतीतिः कथं व्यधिकरणधर्मस्य प्रतियोगितावच्छेद-कत्वसाधिका स्यात् इति भावः।

न च विलक्षणवाच्यत्वप्रकारतेति [पृ. 806]। प्रकारताया एव पर्याप्तिः अङ्गीक्रियते लाघवात्। न तु प्रतियोगिविशेषणे अवच्छेदकतापि। तत्संबन्धस्वीकारे गौरवात्। एवं च 'समवायि वाच्यत्ववदिदं' इति बुद्धिं प्रति वाच्यत्वपर्याप्तप्रकारतानिरूपक-समवायित्वनिष्ठावच्छेदकताकाभावबुद्धिः प्रतिबन्धिका। 'समवा-यितया प्रमेयत्व-वाच्यत्व-उभयं नास्ति' इति प्रतीतौ अभावांशे प्रमेयत्व-वाच्यत्वयोः उभयोः प्रकारत्वात् वाच्यत्वपर्याप्तप्रकारता-कत्वं तादृशप्रतीतेः नास्तीति न तस्याः समवायिवाच्यत्ववदिदमिति भ्रमप्रतिबन्धकत्वं इति न च वाच्यम्। यतः तद्धर्मे अभावप्रतियो-गितावच्छेदकत्वपर्याप्तिः तदवच्छिन्नस्य अभावविरोधित्वप्रयो-जिका। अतः तद्धर्मे अभावप्रतियोगितावच्छेदकत्वावगाहित्वमेव अभावबुद्धेः तदवच्छिन्नविशिष्टज्ञानं प्रति प्रतिबन्धकतायां तन्त्रम्। यथा महानसीयत्ववह्नित्वयोः अभावप्रतियोगितावच्छेदकत्वावगा-हित्वात् 'महानसीयवह्निर्नास्ति' इति प्रतीतेः सा महानसीयत्व-वन्हित्व - उभयविशिष्टवत्ताज्ञानं प्रति प्रतिबन्धिका भवति। 'समवायितया वाच्यत्वं नास्ति' इति प्रतीतिः समवायित्वमात्रे प्रतियोगितावच्छेदकत्वम् अवगाहते। न तु वाच्यत्वत्वेऽपि इत्युक्तौ 'समवायितया वाच्यत्व-प्रमेयत्व-उभयं नास्ति' इति प्रतीतेः 'समवायितया वाच्यत्वं नास्ति' इति प्रतीतेश्च विशेषाभावात् 'समवायितया वाच्यत्वं नास्ति' इति प्रतीतिरेव 'समवायिवाच्य-त्ववदिदम्' इति बुद्धिप्रतिबन्धिका। न तु 'समवायितया वाच्यत्व-प्रमेयत्वोभयं नास्ति' इति प्रतीतिरिति कथं वक्तुं शक्यते। केवलं प्रकारताख्यविषयतावैचित्र्यात् इति तु न युक्तम्। तथा

सति समानाधिकरणधर्मावच्छिन्नाभावविषयिण्याः 'घटो नास्ति' इत्यादिबुद्धेरपि घटत्वांशे प्रतियोगितावच्छेदकावगाहित्वं विलीयेत। तादृशबुद्धेः घटत्वविशिष्टवत्ताबुद्धिप्रतिबन्धकत्वानुरोधादेव प्रतियोगितावच्छेदकतावगाहित्वम्। प्रकारताविशेषस्य प्रतिबन्धकताबीजत्वे सति 'कपालसमवेतद्रव्यं नास्ति,' 'नीलघटो नास्ति' इत्यादिप्रतीतिव्यावृत्तः यः घटत्वविशिष्ट-घटनिष्ठप्रकारताविशेषः तस्यैव घटत्वविशिष्टवत्ताबुद्धिप्रतिबन्धकताप्रयोजकत्वसंभवेन घटत्वस्य प्रतियोगितावच्छेदकत्वं अप्रयोजकमिति 'घटो नास्ति' इति प्रतीतेः घटत्वे प्रतियोगितावच्छेदकत्वावगाहित्वं न स्यात्। एवं च 'घटो नास्ति' इति बुद्धेः प्रतिबन्धकत्वानुसारेण घटत्वे प्रतियोगितावच्छेदकत्वावगाहित्ववत् 'समवायितया वाच्यत्वं नास्ति' इति बुद्धेरपि 'समवायिवाच्यत्ववदिदम्' इति बुद्धिप्रतिबन्धकत्वानुसारेण वाच्यत्वत्वांशे प्रतियोगितावच्छेदकत्वावगाहित्वं आवश्यकमिति 'समवायितया वाच्यत्वं नास्ति' इति बुद्धेः समवायित्व - वाच्यत्वत्व - उभयावच्छिन्नप्रतियोगिताकाभावविषयकतया तादृशबुद्धि प्रति वाच्यत्वत्वावच्छिन्नधर्मिक-समवायित्वप्रकारकज्ञानस्य अपेक्षिततया विशेषदर्शनकाले तादृशज्ञानासंभवेन 'समवायितया वाच्यत्वं नास्ति' इति बुद्धिरपि न संभवति इति भावः।

गादाधरी

प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमिति निरूपणम्

अथ यत्वतत्त्वाननुगमेन प्रतियोगितावच्छेदकभेदेन तत्प्रकारकज्ञानहेतुताभेदस्यावश्यकतया महानसीयत्ववह्नित्वादिरूपसमानाधिकरणधर्मावच्छिन्नाभावप्रत्यक्षं प्रति एकधर्मावच्छिन्नविशेष्यकापरधर्मप्रकारकज्ञानत्वेन हेतुता वाच्या; न तु व्यधिकरणसमवायित्वसमानाधिकरणवाच्यत्वत्वाद्युभयधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षे। समवायित्वाद्यवच्छिन्नप्रतियोगिताकाभाव-

प्रत्यक्षत्वावच्छिन्नं प्रति समवायित्वादिप्रकारकज्ञानत्वेन क्लृप्त-कारणतयैव तन्निर्वाहान्न तत्र वाच्यत्वत्वावच्छिन्नधर्मिकसमवायि-त्वप्रकारकज्ञानापेक्षेति चेन्न ।

प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमभाव-प्रतीत्या अवगाह्यते, न तु स्वातन्त्र्येणेति नियमेन, 'समवायि-वाच्यत्वं नास्ति' इत्याद्याकारिकाया एव व्यधिकरणधर्मा-वच्छिन्नाभावप्रतीतेरुपगन्तव्यतया समवायित्वविशिष्टवाच्यत्वत्वा-वच्छिन्नवैशिष्ट्यावगाहिन्यां तादृशबुद्धौ च 'वाच्यत्वं समवायि' इति विशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्यापेक्षितत्वेन विश-कलितसमवायित्वादिप्रकारकज्ञानदशायां तादृशाभावप्रत्यक्षस्य अनुत्पत्त्या तदानीं तदापत्तिवारणाय तादृशाभावप्रत्यक्षेऽपि वाच्य-त्वत्वाद्यवच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानस्य हेतुताया आवश्यकत्वादिति ।

विवरणम्

अथ यत्त्वतत्त्वाननुगमेनेत्यादि । यत्तच्छब्दघटितकार्यकारण-भावस्थले यत्तच्छब्दार्थयोः व्यक्तिविशेषविश्रान्तत्वेन सर्वसाधा-रण्येन कार्यकारणभावो न संभवतीति प्रतियोगितावच्छेदकभेदेन प्रतियोगितावच्छेदकप्रकारकज्ञानस्य भिन्नभिन्नैव कार्यकारणभावः वक्तव्यः । तथा च महानसीयत्ववह्नित्व-उभयरूपसमानाधिकरण-धर्मावच्छिन्नप्रतियोगिताकाभावविषयकप्रत्यक्षं प्रत्येव वह्नित्वा-वच्छिन्नविशेष्यक - महानसीयत्वप्रकारकज्ञानत्वेन कारणत्वम् । व्यधिकरणसमवायित्वसमानाधिकरण वाच्यत्वत्व - उभयावच्छिन्न-प्रतियोगिताकाभावबुद्धिं प्रति तु वाच्यत्वत्वावच्छिन्नधर्मिकसम-वायित्वप्रकारकज्ञानत्वेन कारणत्वं न कल्प्यते । 'समवायी नास्ति' इति प्रतीतिसिद्धसमवायित्वावच्छिन्नप्रतियोगिताका-भावप्रत्यक्षत्वावच्छिन्नं प्रति क्लृप्तं यत् समवायित्वप्रकारकज्ञान-त्वेन कारणत्वम् तेनैव 'समवायितया वाच्यत्वं नास्ति' इति

प्रत्यक्षस्यापि उपपत्तेः वाच्यत्वत्वावच्छिन्नविशेष्यकसमवायित्व-प्रकारकज्ञानस्य अपेक्षा नास्तीति प्रश्नः ।

समाधानं तु—प्रतियोगिविशेषणतापन्नस्य धर्मस्यैव प्रतियोगितावच्छेदकत्वं अभावप्रतीत्या विषयीक्रियते । न तु स्वातन्त्र्येण भासमानस्य धर्मस्य इति नियमेन व्यधिकरणधर्मावच्छिन्नाभाव-प्रतीतिरपि 'समवायिवाच्यत्वं नास्ति' इत्याकारिकैव - इति वक्तव्यम् । तस्याश्च प्रतीतेः समवायित्वविशिष्टवाच्यत्ववैशिष्ट्या-वगाहितया विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदक-प्रकारकविशेषणविशेष्यकज्ञानस्यैव कारणत्वेन विशेषणतावच्छेद-कसमवायित्व-वाच्यत्वत्व-प्रकारकाभ्यां विशकलितज्ञानाभ्यां 'समवायि वाच्यत्वं नास्ति' इत्याकारिकायाः समवायित्व-विशिष्टवाच्यत्वत्वावच्छिन्नवैशिष्ट्यावगाहिबुद्धेःअनुपपत्त्या तदानीं तादृशबुद्ध्यापत्तिवारणाय 'समवायिवाच्यत्वं नास्ति' इति प्रत्यक्षं प्रत्यपि वाच्यत्वत्वावच्छिन्नधर्मिक-समवायित्वप्रकारकज्ञानस्य हेतुतायाः आवश्यकत्वात् विशेषदर्शनदशायां तादृशहेतुविरहेण 'समवायिवाच्यत्वं नास्ति' इति प्रतीतेरसंभवात् सा प्रतीतिः व्यधिकरणधर्मस्य न प्रतियोगितावच्छेदकत्वसाधिका इति भावः ।

दीधितिः

तद्विशिष्टेति [पृ. 789] विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात् ।

अभावप्रत्ययो हि घटत्वादिविशिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्यापि घटत्वादेः तदवच्छेदकत्वमवगाहते, न स्वातन्त्र्येण; घटो नास्तीत्येव प्रतीतेः । तदिह अभावप्रत्ययो यदि व्यधिकरणधर्मेणावच्छिन्नं प्रतियोगिनं नावगाहते, नावगाहत एव तदा तस्यापि प्रतियोगितावच्छेदकत्वम् । अथावगाहते तर्हि भ्रम एव; न च ततोऽर्थसिद्धिरिति भावः ।

गादाधरी

विशेषणतावच्छेदकप्रकारकज्ञानस्य विशिष्टवैशिष्ट्यधीहेतुत्वनिरूपणम्

अत्र च विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकधीहेतुत्वमनङ्गीकुर्वतां घटत्वादिनिर्विकल्पकाद् घटो नास्तीत्यादिप्रत्ययस्येव निर्धर्मितावच्छेदककसमवायित्वादिप्रकारकज्ञानादपि समवायित्वावच्छिन्नवाच्यत्वाद्यभावविषयकस्य समवायिवाच्यत्वं नास्तीत्यादिप्रत्ययस्योपगमसंभवात् वाच्यत्वत्वाद्यवच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानत्वेन प्रतियोगिज्ञानस्याभावप्रत्यक्षहेतुता न सिद्ध्यतीति विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानहेतुतामतमाश्रित्यैवोक्तरीत्या अभावलौकिकत्वावच्छिन्नहेतुभूतप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूपकारणबाधपरतया मूलं व्याख्येयम् । तच्चानुचितम् । उक्तविशेषकारणताकल्पनोपजीव्यविशिष्टवैशिष्ट्यबोधसामान्यहेतुताश्रयविशेषणतावच्छेदकविशिष्टज्ञानाभावस्यैव दर्शयितुमुचितत्वात् । अतो मूले हेतुत्वादित्यस्यापेक्षणीयत्वादित्यर्थ इत्याशयेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावधिया अपेक्षणे विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकविशिष्टविशेषणज्ञानहेतुत्वमेव हेतुत्वेनाभिमतम् । तथा च जन्यताया अभावविषयकत्वावच्छिन्नत्वमविवक्षितम् । विशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्य विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नाभावधीनिष्ठजन्यताप्रतियोगिभूतस्याभावेन समवायितया वाच्यत्वं नास्तीत्यादिप्रतीतेः व्यधिकरणधर्मावच्छिन्नाभावावगाहित्वासंभव इत्यर्थपरतया तद्व्याख्यानमेवोचितम्, न तु विशिष्टवैशिष्ट्यबोधहेतुतामुपजीव्य कल्प्यहेतुत्वान्तरपरतया इत्याशयेनाह—दीधितौ विशेषणतावच्छेदकेति [पृ. 811] ।

विवरणम्

तद्विशिष्टज्ञानस्य अभावधीहेतुत्वात् [पृ. 789] इति मणिग्रन्थस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य अभावप्रत्ययहेतुत्वात् इत्येव यथाश्रुतार्थः। तं परित्यज्य 'विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात्' इति दोधितिकृतां व्याख्यानं अनुचितम् इत्याशङ्क्य तथा व्याख्यानस्य औचित्यं प्रदर्शयति—**अत्र चेत्यादिना**। विशिष्टवैशिष्ट्यावगाहिबोधं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वं ये नाङ्गीकुर्वन्ति, तेषां मते घटत्वप्रकारकज्ञानं विनापि घटत्वनिर्विकल्पकात् 'घटो नास्ति' इति प्रतीतिः यथा भवति, तथा निर्धर्मितावच्छेदकसमवायित्वप्रकारक 'समवायि' इत्यादि ज्ञानादपि समवायित्वावच्छिन्न-वाच्यत्वाभावविषयकः 'समवायि वाच्यत्वं नास्ति' इति प्रत्ययः भवितुमर्हति। अतः वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानत्वेन प्रतियोगिज्ञानस्य अभावप्रत्यक्षहेतुत्वं न सिद्ध्यतीति विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वं अङ्गीकुर्वतां मतं अवलम्ब्यैव मणिग्रन्थः प्रवृत्तः। तदनुसारेण अभावलौकिकप्रत्यक्षं प्रति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य कारणत्वात् तादृशकारणविरहपरतयैव मूलग्रन्थो व्याख्यातव्यः। तथा व्याख्यानमपि अभावप्रत्यक्षत्वावच्छिन्नं प्रति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिताज्ञानं कारणं इति विशेषकार्यकारणभावस्य उपजीव्यः यः विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकविशिष्टज्ञानं कारणमिति सामान्यकार्यकारणभावः तद्बाधप्रदर्शनेनैव निर्वहति। अतः 'अभावधीहेतुत्वात्' इत्यस्य अभावधिया अपेक्षणीयत्वात् इत्यर्थः। तथा च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य अभावधिया अपेक्षणे विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्य हेतुत्वमेव हेतुः इत्यत-

शयेन दीधितौ विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात् इत्युक्तम् । अत्र कार्यतावच्छदेककोटौ अभावविषयकत्वं अविवक्षितम् । अभावधीविष्ठा या विशिष्टवैशिष्ट्यबोधत्वावच्छिन्ना जन्यता तन्निरूपितजनकताश्रयस्य विशेषणतावच्छेदकप्रकारकज्ञानस्याभावात् 'समवायितया वाच्यत्वं नास्ति' इति प्रतीतेः व्यधिकरणधर्मावच्छिन्नाभावावगाहित्वं न संभवतीति मूलग्रन्थस्य तात्पर्यम् । न तु विशिष्टवैशिष्ट्यबोधनिरूपितहेतुत्वं उपजीव्य कल्पनीयः यः अभावबुद्धिप्रतियोगिज्ञानयोः कार्यकारणभावः तत्परतया मूलव्याख्यानं उचितमिति दीधितिकाराशयः ।

इदमत्राकूतम्—'तद्विशिष्टज्ञानस्य' इत्यादि मणिग्रन्थात् अभावविषयकबुद्धित्वावच्छिन्नं प्रति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिविषयकज्ञानत्वेन पृथक् कार्यकारणभावः अस्तीति प्रतीयते, तत्तु न युक्तम् । विशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकज्ञानत्वेन सामान्यकार्यकारणभावस्य आवश्यकत्वात् तद्बलादेव प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानशून्यकाले अभावबुद्धेः वारणसंभवात् । अतः मणिग्रन्थस्यापि सामान्यकार्यकारणभावे एव तात्पर्यम् । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य विशेषणतावच्छेदकविशिष्टविशेषणज्ञानत्वेनैव कारणत्वम् । अभावधीहेतुत्वात् [पृ. 789] इति प्रकृते प्रकृताभिप्रायम् । न तु अभावविषयकत्वस्य कार्यतावच्छेदकत्वाभिप्रायम् इति ।

गादाधरी

अयं भावः—'वाच्यत्वं समवायि' इति ज्ञानमन्तरेण समवायिवाच्यत्ववानयमिति विशिष्टवैशिष्ट्यबोधानुत्पत्त्या वाच्यत्वत्वावच्छिन्ननिरूपितत्वेन भासमानवैशिष्ट्ये समवायित्वावच्छिन्ननिरूपितत्वावगाहिनि ज्ञाने वाच्यत्वत्वावच्छिन्नधर्मिकसमवायि-

त्वादिप्रकारकज्ञानत्वेन हेतुताकल्पनमावश्यकम् । समवायिवाच्यत्वं नास्तीति व्यधिकरणधर्मावच्छिन्नबुद्धेरपि वाच्यत्वत्वावच्छिन्नीयत्वेन भासमानेऽनुयोगितारूपवैशिष्ट्ये समवायित्वावच्छिन्नीयत्वावगाहितया तत्र तादृशज्ञानमवश्यापेक्षणीयमिति ।

विवरणम्

भवतु प्रतियोगितावच्छेदकविशिष्टज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानत्वेनैव अभावधीहेतुत्वम् । तावता 'समवायि वाच्यत्वं नास्ति' इति व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ 'समवायिवाच्यत्वं' इति ज्ञानस्य कारणत्वं कथं सिद्ध्यतीति शङ्कायामाह— अयं भाव इति । [पृ. 814] वाच्यत्वं समवायि इति ज्ञानं विना 'समवायि वाच्यत्ववान् अयम्' इति समवायित्वविशिष्टवाच्यत्ववैशिष्ट्यावगाहिज्ञानं नोत्पद्यते । तदनुसारेण वाच्यत्वत्वविशिष्टनिरूपितत्वेन भासमाने वैशिष्ट्ये समवायित्वावच्छिन्ननिरूपितत्वावगाहिज्ञानं प्रति वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानं कारणम् इति कार्यकारणभावो वक्तव्यः। 'समवायिवाच्यत्ववान् अयम्' इति ज्ञाने वाच्यत्वत्वविशिष्टनिरूपितत्वं मतुबर्थे वैशिष्ट्ये भासते । अत्रैव समवायित्वविशिष्टनिरूपितत्वमपि भासते । अतः तत्र 'वाच्यत्वं समवायि' इत्याकारकज्ञानस्य अपेक्षा। तथैव 'समवायि वाच्यत्वं नास्ति' इति बुद्धौ अभावनिष्ठे अनुयोगितारूपे वैशिष्ट्ये वाच्यत्वत्वविशिष्टनिरूपितत्वेन भासमाने समवायित्वविशिष्टनिरूपितत्वावगाहिन्यां बुद्धावपि 'वाच्यत्वं समवायि' इत्याकारकं ज्ञानं अवश्यमपेक्षितम् । तादृशज्ञानविरहात् 'समवायि वाच्यत्वं नास्ति' इति बुद्धिरपि नोत्पत्तुमर्हति इति ।

गादाधरी

अभाववद्धे विशिष्टवैशिष्ट्यावगाहित्वसमर्थनम्

ननु वैशिष्ट्यांशे वाच्यत्वत्वनिष्ठधर्मितावच्छेदकतानिरूपकविशेषणतापन्नसमवायित्वावच्छिन्नप्रतियोगिताकत्वावगाहिबुद्धावेव तदवच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानं हेतुः। व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ च वाच्यत्वत्वावच्छिन्ने समवायित्वस्य विशेषणत्वं नोपेयते; अपि तु तद्विशेषणतानापन्नस्यैव। तस्य स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनाभावांशे विशेषणत्वमुपेयते। वाच्यत्वसंसर्गतावच्छेदकतयैव वा तथाविधतदवच्छिन्नत्वस्य प्रतियोगितांशे भानमुपेयते। तथा च तत्र नोपदर्शितज्ञानापेक्षेत्याशङ्कां परिजिहीर्षुर्भावं व्याचष्टे—अभावप्रत्ययो हीति [पृ. 811]। विशेषणस्य—प्रतियोगिघटादिनिरूपितविशेषणतापन्नस्य घटत्वादेः। प्रतियोगितावच्छेदकत्वमवगाहते—प्रतियोगितया भासमानघटादिनिरूपितविशेषणतावच्छिन्ना या स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धावच्छिन्ना घटत्वादिनिष्ठप्रकारता तच्छाली भवतीति यावत्। न तु स्वातन्त्र्येण - प्रतियोग्यविशेषणत्वेन घटत्वादेः प्रतियोगितावच्छेदकत्वमवगाहते इत्यनुषङ्गेणान्वयः। तादृशसंबन्धावच्छिन्नघटत्वादिनिष्ठप्रकारता प्रतियोगिनिरूपितप्रकारतानवच्छिन्ना न भवतीत्यर्थः। घटो नास्तीत्येवेति [पृ. 811]। अभावांशे स्वातन्त्र्येण घटत्वादिवैशिष्ट्योल्लेखरहिताया एवेत्यर्थः। प्रतीतेः - अनुभवादिति शेषः। एतावता किमायातमित्यत आह - तदिहेति। अवच्छिन्नम् - विशेषितम्। तस्यापि प्रतियोगितावच्छेदकत्वम् तस्य प्रतियोगितावच्छेदकत्वमपि। तथा च मानाभावेन व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वासिद्धिरिति भावः।

विवरणम्

'वैशिष्ट्यांशे' इत्यस्य समवायित्वावच्छिन्नप्रतियोगिताकत्वेऽन्वयः। 'समवायिवाच्यत्वंनास्ति' इति यदि व्यधिकरण-

धर्मावच्छिन्नाभावावगाहि बुद्धिः स्यात्, तदा तादृशबुद्धौ वाच्यत्वत्वस्य समवायित्वधर्मितावच्छेदकतया भानात्, वाच्यत्वत्वावच्छिन्ने विशेषणतया समवायित्वभानात् वाच्यत्वत्वनिष्ठा या धर्मितावच्छेदकता तन्निरूपके वाच्यत्वे विशेषणतापन्नं यत् समवायित्वं तदवच्छिन्नप्रतियोगिताकत्वस्य अनुयोगितारूपवैशिष्ट्ये भानात् तादृशबुद्धिं प्रति वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानस्य अपेक्षा स्यात्। अस्माभिस्तु व्यधिकरणधर्मावच्छिन्नाभावबुद्धिः 'समवायित्वेन वाच्यत्वं नास्ति' इत्याकारिकैव स्वीक्रियते। अस्यां बुद्धौ वाच्यत्वत्वावच्छिन्ने समवायित्वं विशेषणतया न भासते; किन्तु तद्विशेषणतानापन्नमेव समवायित्वं स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन अभावे विशेषणतया भासते इत्यङ्गीक्रियते।

अथवा वाच्यत्वस्य अभावांशे संसर्गरूपायां प्रतियोगितायां समवायित्वावच्छिन्नत्वं भासते। अतः कीदृशबुद्धेः समवायित्वविशिष्टवाच्यत्ववैशिष्ट्यावगाहित्वाभावात् एतादृशबुद्धिं प्रति 'वाच्यत्वं समवायि' इति ज्ञानं नापेक्षितम् इति आशङ्कायां अभावप्रत्ययो हि [पृ. 811] इति दीधितिग्रन्थः प्रवृत्त इति भावः।

अभावप्रत्ययः सर्वोऽपि प्रतियोगिविशेषणतापन्नस्यैव धर्मस्य प्रतियोगितावच्छेदकत्वं अवगाहते। न तु प्रतियोगिविशेषणतानापन्नस्य। 'घटो नास्ति' इत्येव प्रतीतेः। 'घटत्वेन घटो नास्ति' इति स्वातन्त्र्येण अभावांशे घटत्ववैशिष्ट्योल्लेखरहिततया एव प्रतीतेः इति यावत्।

एवं च स्वातन्त्र्येण समवायित्ववैशिष्ट्योल्लेखवती 'समवायितया वाच्यत्वं नास्ति' इति अभावप्रतीतिः नास्त्येव। यदि स्यात् सा व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वं साधयेत्।

'समवायिवाच्यत्वं नास्ति' इति प्रतीतिस्तु 'वाच्यत्वं समवायि' इति ज्ञानं विना न भवितुमर्हति । अतः साधकाभावात् व्यधिकरण-धर्मस्य अभावप्रतियोगितावच्छेदकत्वं नास्तीति तात्पर्यम् ।

गादाधरी

अथ व्यधिकरणधर्मस्य प्रतियोगिविशेषणतयैव व्यधिकरण-धर्मावच्छिन्नाभावबुद्धौ भानमुपेयते । न चैवं तादृशबुद्धेः समवायि-त्वादिरूपविशेषणतावच्छेदकप्रकारकवाच्यत्वादिज्ञानजन्यताव-च्छेदकाक्रान्ततया तादृशज्ञानं विना व्यधिकरणधर्मावच्छिन्ना-भावबुद्ध्यनुपपत्तिरिति वाच्यम् । भ्रमात्मकतादृशज्ञानदशायामेव तद्बुद्ध्युपगमात् । विशेषदर्शनदशायामपि आहार्यतत्प्रकारक-ज्ञानादेव तद्बुद्धिसंभवात् । अनाहार्यस्यैव विशेषणतावच्छेदक-प्रकारकज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वे विशेषदर्शनकाली-नायाः समवायि(तया)वाच्यत्वं नास्तीत्यादिबुद्धेरगत्या वाच्यत्वा-द्यधिकरणकसमवायित्वाद्यभावावगाहित्वमुपेयते । वाच्यत्वं सम-वायीत्यादिभ्रमानन्तरं समवायिवाच्यत्वं नास्तीत्याकारकप्रत्यय एव व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वे मानमास्ताम् । तस्य तदवगाहितायाः सर्वानुभवसिद्धत्वेनापह्नोतुमशक्यत्वात् । तादृश-प्रतीतेर्बाच्यत्वे समवायित्वाभावावगाहित्वोपगमे तत्पूर्वं वाच्यत्वं समवायीति भ्रमापेक्षानुपपत्तेरित्याशयेनाशङ्कते—अथावगाहत [पृ. 811] इति ।

समाधत्ते—तर्हि भ्रम एवेति [पृ. 811] । व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वांशे भ्रम एवेत्यर्थः । वैशिष्ट्यभान एवा-वच्छेदकताया भानादवच्छेदकताया वैशिष्ट्यनियततया तद्बाधे तस्या अपि बाधादिति भावः ।

विवरणम्

अथ व्यधिकरणधर्मस्येत्यादि [पृ. 811] । व्यधिकरणधर्मा-वच्छिन्नाभावबुद्धावपि व्यधिकरणधर्मस्य प्रतियोगिविशेषणतयैव

भानम् ..ोक्रियते, न तु स्वातन्त्र्येण । न च तथा सति तादृशबुद्धेः समवायित्वरूप - व्यधिकरणधर्मविशिष्ट-वाच्यत्ववैशिष्ट्यावगाहितया तां प्रति विशेषणतावच्छेदकसमवायित्वप्रकारकवाच्यत्व-विशेषणज्ञानस्य कारणत्वात् तादृशज्ञानं विना कथं व्यधिकरण-धर्मावच्छिन्नबुद्धिः इति वाच्यम् । प्रमात्मकस्य 'वाच्यत्वं समवायि' इत्याकारकस्य विशेषणतावच्छेदकप्रकारकस्य ज्ञानस्य संभवात् तद्दशायामेव व्यधिकरणधर्मावच्छिन्नबुद्धेः अङ्गीकारात् ।

न च—'वाच्यत्वं न समवायि' इति विशेषदर्शनकाले 'वाच्यत्वं समवायि' इति भ्रमः कथं भवितुमर्हति । विशेष-दर्शनस्य तादृशभ्रमप्रतिबन्धकत्वात् - इति वाच्यम् । बाधके विशेषदर्शने सत्यपि आहार्यस्य भ्रमस्य संभवात् । न च अनाहार्यमेव विशेषणतावच्छेदकप्रकारकज्ञानं विशिष्टवैशिष्ट्य-प्रत्यये हेतुः । अतः आहार्यविशेषणतावच्छेदकप्रकारकभ्रमात् कथं व्यधिकरणधर्मावच्छिन्नाभावबुद्धिः भवितुमर्हतीति वाच्यम् । तर्हि विशेषदर्शनकालीनायाः 'समवायि वाच्यत्वं नास्ति' इति बुद्धेः वाच्यत्वाधिकरणकसमवायित्वाभावावगाहित्वम् उपगम्यते । विशेषदर्शनशून्यकालीनायाः 'वाच्यत्वं समवायि' इति भ्रम-जन्यायाः 'समवायि वाच्यत्वं नास्ति' इति प्रतीतिरेव समवायि-त्वस्य प्रतियोगितावच्छेदकत्वे प्रमाणम् । अस्याः प्रतीतेः विशिष्टवैशिष्ट्यावगाहितया विशेषणे समवायित्वे प्रतियोगिता-वच्छेदकत्वावगाहितायाः सर्वसंमतत्वात् ।

न च - इयमपि प्रतीतिः वाच्यत्वे समवायित्वाभावम् अवगाहते । न तु समवायित्वावच्छिन्नवाच्यत्वाभावम् इति - वाच्यम् । तथा सति ततः पूर्वं 'वाच्यत्वं समवायि' इति भ्रमस्य अनावश्यकत्वात् इत्याशङ्क्य अथ अवगाहते, तर्हि भ्रम एव [पृ. 811] इति दीधितौ उक्तम् ।

.. वास्तविकं प्रतियोगिविशेषणतापन्नधर्मवैशिष्ट्यं यस्याम् अभावबुद्धौ भासते, सैव बुद्धिः प्रमात्मकतया प्रतियोगिविशेषणतापन्ने धर्मे प्रतियोगितावच्छेदकत्वं साधयेत् । 'समवायि वाच्यत्वं नास्ति' इति बुद्धौ तु प्रतियोगिनि अविद्यमानस्य समवायित्वस्य अविद्यमानं वैशिष्ट्यम् अवगाहते इति भ्रमरूपतया न समवायित्वस्य अवच्छेदकत्वसाधिका ।

एवं च तन्निष्ठ - प्रतियोगितावच्छेदकतायाः तदनुयोगिकवैशिष्ट्यप्रतियोगिताकव्याप्यत्वात् वाच्यत्वानुयोगिकवैशिष्ट्यप्रतियोगिताशून्यस्य समवायित्वस्य वाच्यत्वनिष्ठप्रतियोगितावच्छेदकत्वं न संभवतीति भावः ।

गादाधरी

न चैवं 'गवि शशशृङ्गं नास्तीति प्रतीतेरसिद्धेः' इति मूलासङ्गतिः । तादृशप्रतीतेः शृङ्गांशे शशीयत्वावगाहित्वानभ्युपगमे शशीयत्वे शृङ्गनिष्ठप्रतियोगितावच्छेदकत्वावगाहनासंभवः । तदवगाहित्वे भ्रमत्वमित्युभयथापि व्यधिकरणधर्मावच्छिन्नाभावासाधकत्वात् तादृशप्रतीतिनिराकरणस्यानुपयुक्तत्वादिति वाच्यम् । अभ्रान्तानामपि 'गवि शशशृङ्गं नास्ति' इति व्यवहारमूलप्रतीतिसत्त्वेन उक्तनियमस्यैवासिद्ध्या व्यधिकरणधर्मावच्छिन्नाभावसिद्धिः निष्प्रत्यूहैव । तादृशप्रतीतेः शृङ्गाधिकरणकशशीयत्वाभावावगाहित्वोपगमे तस्याः गवाधिकरणकाभावावगाहितानुभवविरोध इत्याशङ्कामुत्थाप्याभ्रान्तपुरुषीयगवाधिकरणकाभावावगाहितादृशभावप्रतीतिनिराकरणपरतया तद्ग्रन्थस्यावतरणीयत्वात् । नन्वभ्रान्तानां गवि शशशृङ्गं नास्तीति प्रतीतिर्मा भूत्; शशशृङ्गं नास्तीति प्रतीतिर्नापह्नोतुं शक्यते । सर्वेषामेव तथाविधव्यवहारदर्शनादित्याशङ्कायां 'शशशृङ्गं नास्ति' इत्यादिमूलावतारो बोध्यः ।

यद्यपि 'शशशृङ्गं नास्ति' इति शब्देन शशे शृङ्गाभाव इत्याकारकः शाब्दबोधो न शक्यते जनयितुम् । अनुयोगिवाचक-

पदोत्तरं सप्तमीविरहेण निराकाङ्क्षत्वात्: तथापि पदार्थोपस्थित्यादिमूलकतादृशमानसबोधजननेच्छया व्युत्पन्नानां तथा प्रयोग इत्याशयः ।

विवरणम्

न चैवं गवि शशशृङ्गं नास्तीत्यादि [पृ. 820] । व्यधिकरणधर्मस्य अभावप्रतियोगितानवच्छेदकत्वे 'गवि शशशृङ्गं नास्ति' इति प्रतीतेरसिद्धिः कथम् उपयोगिनी? तादृशप्रतीतिः शृङ्गांशे शशीयत्वं अवगाहते वा न वा? यद्यवगाहते तदभाव-शशीयत्वाभाववति शृङ्गे शशीयत्वप्रकारकतया भ्रमरूपैव सा प्रतीतिः । तस्याश्च विषयासाधकतया शशीयत्वावच्छिन्नशृङ्गाभावासाधकत्वात् तादृशप्रतीतिनिराकरणं प्रकृतोपयोगि न भवति । यदि शृङ्गांशे शशीयत्वं न अवगाहते, तदा शृङ्गनिष्ठ-प्रतियोगितावच्छेदकमपि शशीयत्वं न अवगाहते । प्रतियोगि-विशेषणतापन्ने धर्मे एव अभावप्रतियोगितावच्छेदकत्वावगाहन-संभवात् । उभयथापि 'गवि शशशृङ्गं नास्ति' इति प्रतीतेर-सिद्धिरिति मूलग्रन्थः असङ्गत इति शङ्का ।

समाधानं तु—अभ्रान्ता अपि 'गवि शशशृङ्गं नास्ति' इति प्रयुञ्जते । शब्दप्रयोगस्तु अर्थज्ञानं विना न संभवति । "अर्थं बुद्ध्वा शब्दरचना" इति न्यायात् । तथा च 'गवि शशशृङ्गं नास्ति' इति शब्दस्य मूलभूतं यत् ज्ञानं तदेव शशीयत्वावच्छिन्न-शृङ्गाभावावगाहितया व्यधिकरणधर्मावच्छिन्नाभावसाधकम् । 'गवि शशशृङ्गं नास्ति' इति प्रतीतः गोशृङ्गाधिकरणकशशीयत्वाभावावगाहित्वावगमे तस्याः गवाधिकरणकाभावावगाहित्वानुभवविरोध इत्याशङ्कां उत्थाप्य तादृशप्रतीतिरेव अभ्रान्तानां नास्ति । शृङ्गे शशीयत्वावगाहित्वेन भ्रमत्वावश्यकत्वात् ।

ननु अभ्रान्तानां 'गवि शशशृङ्गं नास्ति' इति प्रतीतिः मा भूत्, 'शशशृङ्गं नास्ति' इति प्रतीतिस्तु भवितुमर्हति । अस्याः गवाधिकरणकत्वाभावात् । सर्वेषामेव पुरुषाणां 'शशशृङ्गं नास्ति' इति प्रयोगस्य दर्शनात् इत्याशङ्कायां 'शशशृङ्गं नास्ति' इति प्रयोगस्य दर्शनात् इत्याशङ्कायां "शशशृङ्गं नास्ति इति च शशे शृङ्गाभाव" इत्यर्थः इति मणिग्रन्थः प्रवृत्तः । तथा च 'शशशृङ्गं नास्ति' इति प्रतीतिः शृङ्गे शशीयत्वाभावमवगाहते, न तु शशीयत्व-रूपव्यधिकरणधर्मावच्छिन्नशृङ्गनिष्ठप्रतियोगितकाभावम् । अतः सा प्रतीतिरपि न व्यधिकरणधर्मावच्छिन्नाभावसाधिका इति भावः ।

ननु 'शशशृङ्गं नास्ति' इति शब्देन शृङ्गानुयोगिकशशी-यत्वप्रतियोगिकाभावं कथं बोधयितुं शक्यते । अनुयोगिवाचक-शृङ्गपदोत्तरं सप्तमीविभक्तिविरहेण आकाङ्क्षाविरहात् । सप्त-म्यन्तपदसमभिव्याहृतनञ एव सप्तम्यन्तार्थानुयोगिकाभावबोध-कत्वात् इति शङ्कते – यद्यपीति [पृ. 820]

समाधत्ते – तथापीति [पृ. 821] 'शशशृङ्गं नास्ति' इति वाक्यघटकपदैः तत्तत्पदार्थानामुपस्थितौ सत्यां मानस एव शृङ्गाधिकरणकशशीयत्वाभावविषयकः बोधः जायते । न तु शाब्दबोध इत्याशयः ।

गादाधरी

प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमीरिति नियमखण्डनम्

ननु घटत्वेन घटो नास्तीत्याकारकस्याभावप्रत्ययस्यानुभा-विकतया प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेतकत्वम-भावप्रत्ययोऽवगाहते इति न नियमः । तादृशप्रतीत्या स्वातन्त्र्येण भासमाने घटत्वादौ प्रतियोगितावच्छेदकत्वावगाहनात् । अन्यथा 'घटत्वेन' इत्याकारकतानुपपत्तेः । तथा च घटत्वेन पटो नास्ती-त्यादावपि घटत्वादौ पटादिनिष्ठप्रतियोगितावच्छेदकत्वावगाहनं

निराबाधमेवेति व्यधिकरणधर्मावच्छिन्नाभावसिद्धिर्निष्प्रत्यूहैव । न च तत्र व्यधिकरणधर्मस्यावच्छेदकत्वावगाहनसंभवेऽपि अतिरिक्ताभावकल्पनागौरवभयेन तादृशप्रतीतेः पटाद्यधिकरणकघटत्वाद्यभावावगाहित्वमेव स्वीक्रियत इति वाच्यम् । असति बाधके तच्छब्दोल्लेखिप्रतीतेः तच्छब्दप्रतिपाद्यार्थविषयकत्वापरित्यागात् पटाद्यधिकरणकघटत्वाद्यभावस्य च घटत्वेन पटो नास्तीत्यादिशब्दात्कथमप्यप्रतीतेः प्रतीतिबलात्पदार्थान्तरसिद्धौ तत्पदार्थकल्पनागौरवस्य फलमुखत्वेनाबाधकत्वात् । न च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूपकारणबाधेन तादृशप्रतीतेर्व्यधिकरणधर्मावच्छिन्नाभावावगाहिता न संभवतीति युक्तम् । पटत्वावच्छिन्नधर्मिकघटत्वादिप्रकारकज्ञानत्वेन प्रतियोगिज्ञानहेतुतायां मानाभावात् । तादृशज्ञानं विनैव पटो नास्तीत्याकारकस्य घटत्वादिविशिष्टपटाद्यवैशिष्ट्यानवगाहिनोऽभावप्रत्यक्षस्य स्वीकारात् ।

विवरणम्

यदि पुनः आनुमानिकः इति दीधितिग्रन्थं अवतारयति—ननु घटत्वेन घटो नास्तीत्यादिना [पृ. 822] । पूर्वं प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वं अभावप्रत्ययः अवगाहते इति नियममवलम्ब्य व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वं निराकृतम् । अथ तादृशनियम एव नास्ति इत्याक्षिप्य समाधत्ते — यदि पुनः इत्यादिना । तथाहि-समानाधिकरणधर्मावच्छिन्नाभावावगाही प्रत्ययः यथा 'घटो नास्ति' इत्याकारकः तथा 'घटत्वेन घटो नास्ति' इत्याकारकोऽपि अनुभवसिद्धः । तेन प्रत्ययेन प्रतियोगिविशेषणतानापन्ने तृतीयोल्लिखिते घटत्वेऽपि प्रतियोगितावच्छेदकत्वं विषयीक्रियते । तथैव 'समवायितया वाच्यत्वं नास्ति', 'घटत्वेन पटो नास्ति' इत्यादि प्रत्ययोऽपि प्रतियोगिविशेषणतानापन्ने समवायित्वघट-

त्वादिरूपे व्यधिकरणधर्मे प्रतियोगितावच्छेदकत्वम् अवगाहते । तथा च तादृशप्रतीत्या व्यधिकरणधर्मावच्छिन्नाभावः सिद्धयति ।

न च 'घटत्वेन पटो नास्ति' इति प्रतीतेः घटत्वावच्छिन्नपटाभावावगाहित्वे व्यधिकरणधर्मावच्छिन्नाभावः अतिरिक्तः कल्पनीय इति गौरवं स्यात् । तद्भयात् 'घटत्वेन पटो नास्ति' इति प्रत्ययः पटाधिकरणकं घटत्वाभावम् अवगाहते इति वाच्यम् । असति बाधके तच्छब्दोल्लेखिनी प्रतीतिः तच्छब्दप्रतिपाद्यार्थविषयिणीति नियमात् 'घटत्वेन पटो नास्ति' इति शब्देनोल्लिख्यमाना प्रतीतिः तादृशशब्दप्रतिपाद्यं अर्थमेव विषयीकुर्यात् । पटाधिकरणकघटत्वाभावस्तु तादृशशब्देन कथमपि प्रतिपादयितुं न शक्यते । अनुयोगिवाचकपदोत्तरं सप्तम्याः प्रतियोगिवाचकपदोत्तरं प्रथमायाश्च विरहात् । किन्तु घटत्वावच्छिन्नपटनिष्ठप्रतियोगिताकाभावमेव 'घटत्वेन पटो नास्ति' इति शब्दः प्रतिपादयितुं शक्नोति । तदुल्लिखिता प्रतीतिरपि तमेव अभावं बोधयेत् । नतु पटाधिकरणकघटत्वाभावमिति ।

न च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूपकारणविरहात् 'घटत्वेन पटो नास्ति' इति प्रतीतिः कथं स्यादिति वाच्यम् । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिवैशिष्टयम् अभावेऽवगाहमानायां बुद्धावेव प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं कारणम् । 'घटत्वेन पटो नास्ति' इति बुद्धिः न घटत्वविशिष्टपटवैशिष्टयम् अवगाहते । घटत्वावच्छिन्नत्वस्य स्वातन्त्र्येण प्रतियोगितायां अन्वयात् । तथा च पटत्वावच्छिन्नविशेष्यकघटत्वप्रकारकज्ञानं विनैव 'घटत्वेन पटो नास्ति' इत्याकारकस्य अभावप्रत्यक्षस्य संभवात् तादृशप्रत्यक्षमेव व्यधिकरणधर्मावच्छिन्नाभावसाधकमिति भावः ।

गादाधरी

प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावधीहेतुत्वखण्डनपूर्वकं व्यधिकरणधर्मावच्छिन्नाभावसाधनम्

वस्तुतस्तु—कुत्राप्यभावबुद्धौ स्वातन्त्र्येण प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य न हेतुतास्ति। न च तदकल्पने प्रतियोगिज्ञानशून्यकाले नास्तीत्याकारकप्रतियोग्यविषयकाभावप्रत्यक्षस्य, घटत्वादिनिर्विकल्पकानन्तरं विशेष्ये विशेषणमिति रीत्या घटाभावप्रत्यक्षस्य चापत्तिरिति वाच्यम्। प्रतियोगिज्ञानहेतुतामतेऽपि घटाभावे प्रतियोगितया घटादिरूपप्रतियोगिज्ञानविरोधिबाधाविग्रहसत्त्वे प्रतियोग्यविषयकाभावग्रहापत्तेर्दुर्वारत्वात्। यदि च निर्धर्मितावच्छेदकप्रतियोगिभाने बाधकाभावात् प्रतियोग्यविषयकाभावप्रत्ययो नापादयितुं शक्यते; तदापि तादृशबाधदशायां प्रतियोगिधर्मितावच्छेदकतानापन्नाभावत्वप्रकारकस्य स्वातन्त्र्येण प्रतियोगिविषयकस्य 'नास्ति, घटीयश्च' इत्याद्याकारकसमूहालम्बनप्रत्यक्षस्यापत्तिः।

विवरणम्

वस्तुतस्तु कुत्राप्यभावबुद्धावित्यादि [पृ. 825]। कुत्राप्यभावबुद्धौ प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य स्वातन्त्र्येण हेतुत्वं नास्ति। न च - तस्य अहेतुत्वे प्रतियोगिज्ञानशून्यकाले 'नास्ति' इत्याकारकं प्रतियोग्यविषयकं अभावप्रत्यक्षं स्यात्। एवं घटत्वनिर्विकल्पकानन्तरं 'विशेष्ये विशेषणम्' इति रीत्या घटाभावप्रत्यक्षं स्यात्। तस्य हेतुत्वे तु तदानीम् प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानविरहादेव न आपत्तिरिति

वाच्यम् । 'प्रतियोगिज्ञानं हेतुः' इति स्वीकारेऽपि अभावे प्रतियोगितासंबन्धेन घटरूपप्रतियोगिभानस्य प्रतिबन्धकं यत् 'अभावः प्रतियोगितासंबन्धेन घटाभाववान्' इत्याकारकं बाधज्ञानं तत्काले प्रतियोग्यविषयकं अभावज्ञानं स्यात् । यद्यपि तदानीं अभावत्वावच्छिन्ने घटरूपप्रतियोगिविषयकज्ञानं न भवितुमर्हति, तथापि निर्धर्मितावच्छेदकप्रतियोगिप्रकारकज्ञानं भवितुमर्हति । तथा च प्रतियोग्यविषयकः अभावप्रत्ययः न आपादयितुं शक्यते । तथापि पूर्वोक्तबाधज्ञानदशायां प्रतियोगिधर्मितावच्छेदकतानापन्नं यत् अभावत्वं, तत्प्रकारकस्य स्वातन्त्र्येण प्रतियोगिविषयकस्य च 'नास्ति, घटीयश्च' इत्याकारकस्य समूहालम्बनप्रत्यक्षस्य आपत्तिः । अभावत्वावच्छिन्नधर्मिकप्रतियोग्यभावप्रकारकबाधज्ञानस्य तदवच्छिन्नधर्मिकप्रतियोगिप्रकारकबुद्धिं प्रत्येव प्रतिबन्धकत्वात् इति भावः ।

गादाधरी

एवं घटत्वावच्छिन्नप्रतियोगिताकाभावस्य यदा भानं तदा निर्विकल्पकोपस्थितद्रव्यत्वादेः विशेष्ये विशेषणमिति रीत्या घटाद्यंशे भानापत्तिः कारणबाधेन न शक्यते वारयितुम् । तादृशाभावस्य द्रव्यत्वावच्छिन्नप्रतियोगिताकत्वविरहेण तद्भाने द्रव्यत्वादिप्रकारकज्ञानस्यानपेक्षणात् । यदि च यादृशप्रकारतावच्छिन्नधर्मे स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धावच्छिन्नधर्म्यन्तरनिरूपितप्रकारता तदन्यप्रकारतानिरूपितविशेष्यतापन्नविशेषणविषयतानिरूपितसंसर्गतासंबन्धेन भानं प्रति अभावीयानुयोगिताविशेषभेदस्य कारणतां कल्पयित्वा ईदृशापत्तिः, प्रतियोगि-

प्रकारतानिरूपितधर्मितावच्छेदकतापन्नावृत्तिप्रकारताविशेषसंबन्धेन लौकिकप्रत्यक्षं प्रत्यभावत्वभेदस्य कारणतां कल्पयित्वा च पूर्वापत्तिश्च वार्यते, तदा तावतैव सकलापत्तिवारणादलं प्रतियोगिज्ञानहेतुतया ।

विवरणम्

एवं घटत्वावच्छिन्नप्रतियोगिताकाभावस्येत्यादि [पृ. 826]। प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य अभावबुद्धिं प्रति हेतुत्वस्वीकारेऽपि यदा घटत्वावच्छिन्नप्रतियोगिताकाभावः अभावप्रत्यक्षे भासते, तदानीं निर्विकल्पकज्ञानविषयीकृतस्य द्रव्यत्वस्य विशेष्ये विशेषणं तत्रापि विशेषणान्तरमिति रीत्या घटांशे भानप्रसङ्गः ।

न च द्रव्यत्वप्रकारकज्ञानं विना कथं घटांशे द्रव्यत्वभानं इति वाच्यम् । द्रव्यत्वावच्छिन्नप्रतियोगिताकाभावविषयकप्रत्यक्षे एव द्रव्यत्वप्रकारकज्ञानस्य अपेक्षितत्वात् । घटत्वावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षे द्रव्यत्वप्रकारकज्ञानस्य अनपेक्षितत्वात् । तथा च घटत्वावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षे निर्विकल्पकोपस्थितद्रव्यत्वस्य घटांशे भानापत्तिः दुर्वारा । तत्र घटत्वरूपप्रतियोगितावच्छेदकविशिष्टघटरूपप्रतियोगिज्ञानस्य कारणस्य सत्वेन कारणाभावात् नापत्तिः इति वक्तुं न शक्यते इति भावः ।

एतादृशापत्तिद्वयं वारयितुं शङ्कते — **यदि च यादृशेत्यादिना** [पृ. 826] । 'घटो नास्ति' इति बुद्धौ अभावांशे घटः प्रकारः घटांशे घटत्वं प्रकारः । घटत्वनिष्ठा या घटनिरूपिता

प्रकारता तदवच्छिन्नः य धर्मः घटत्वम् । तत्र स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धावच्छिन्ना स्वावच्छिन्नप्रतियोगितानिरूपितानुयोगितासंबन्धावच्छिन्ना अभावरूपधर्म्यन्तरनिरूपिता प्रकारता अस्ति, तदन्या या प्रकारता द्रव्यत्वनिष्ठा प्रकारता तन्निरूपितविशेष्यतापन्नं विशेषणं घटः तन्निष्ठविषयतानिरूपितसंसर्गतासंबन्धेन घटत्वावच्छिन्नप्रतियोगितानिरूपितानुयोगितायाः भानं प्रति अभावनिष्ठा अनुयोगिताभेदः कारणम् । अनेन इदं फलितम् अभावभिन्ने यत् विशेषणं तत्रैव विशेष्ये यत विशेषणं तत्रापि विशेषणान्तरमितिरीत्या द्रव्यत्वादिधर्मान्तरस्य भानं भवितुमर्हतीति । अतः अभावविशेषणे घटे घटत्वातिरिक्तस्य द्रव्यत्वादेर्भानं नापादयितुं शक्यते ।

एवं प्रतियोगिनिष्ठप्रकारतानिरूपितधर्मितावच्छेदकतापन्नावृत्तिप्रकारताविशेषसंबन्धेन लौकिकप्रत्यक्षं प्रति अभावत्वभेदः कारणम् । तेन प्रतियोगिज्ञानशून्यकाले प्रतियोग्यविषयकस्य 'नास्ति' इत्याकारकस्य अभावत्वप्रकारकप्रत्यक्षस्य नापत्तिः । तादृशप्रत्यक्षनिरूपिता या प्रकारता सा प्रतियोगिघटादिनिष्ठप्रकारतानिरूपितधर्मितावच्छेदकतानापन्ने अभावत्वे वर्तत इति धर्मितावच्छेदकतापन्नावृत्तिरेव । अभावत्वे च अभावत्वभेदो नास्तीति तादृशप्रकारतासंबन्धेन प्रत्यक्षं नापादयितुं शक्यत इति । एवं चाभावत्वान्यधर्म एव किञ्चिन्निष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतानापन्नः सन् प्रकारतया भासितुमर्हति, यथा 'समवायि' इत्याद्याकारकप्रत्यये समवायित्वादिकमिति भावः । समाधत्ते—तथा तावतैवेति [पृ. 827]।

गादाधरी

न चैवमपि प्रतियोग्यविषयकस्य अभावत्वाप्रकारकप्रत्यक्षस्यापत्तिर्विना प्रतियोगिज्ञानहेतुतां न शक्यते वारयितुमिति वाच्यम् । प्रतियोगिज्ञानं विना प्रतियोग्यविषयकस्य इदंत्वादिना अभावप्रत्यक्षस्य इदंत्वादिरूपतादृशविशेषणज्ञानासत्त्वे च तादृशाभावनिर्विकल्पकस्येष्टत्वात् । अभावनिर्विकल्पकानभ्युपगमे प्रतियोगिज्ञानहेतुतयापि तद्वारणासंभवात् । इदंत्वादिना अभावप्रत्यक्षे व्यभिचारवारणायाभावत्वप्रकारकाभावप्रत्यक्षं प्रत्येव प्रतियोगिज्ञानस्य हेतुताया वाच्यत्वात् विशेषणानवच्छिन्नविषयतासंबन्धेन प्रत्यक्षं प्रति अभावभेदस्य हेतुतां स्वीकृत्य तद्वारणे च मयापि तस्य तथैव वारणीयत्वात् ।

विवरणम्

नचैवमित्यादि [पृ. 829]। प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य अभावप्रत्यक्षं प्रति हेतुत्वानङ्गीकारे प्रतियोगिज्ञानं विनापि प्रतियोग्यविषयकं अभावत्वाप्रकारकं 'इदम्' इत्याद्याकारकं अभावप्रत्यक्षं स्यात् इति न च वाच्यम् । प्रतियोगिज्ञानं विना इदंत्वरूपविशेषणज्ञानसत्त्वे प्रतियोग्यविषयकं इदन्त्वप्रकारकं अभावविशेष्यकं प्रत्यक्षम् इष्टमेव । इदंत्वरूपविशेषणज्ञानासत्त्वे अभावविषयकस्य निर्विकल्पकस्य इष्टत्वात् न कोऽपि दोषः ।

निष्प्रकारकं अभावनिर्विकल्पकं यदि नाङ्गीक्रियते, तदा प्रतियोगिज्ञानं हेतुरिति स्वीकारेऽपि इदन्त्वप्रकारकाभावप्रत्यक्षं प्रसजति । न च अभावत्वप्रकारकप्रत्यक्षं प्रत्येव प्रतियोगिज्ञानं

हेतुः। तदनुसारेण विशेषणानवच्छिन्नविषयतासंबन्धेन प्रत्यक्षं प्रति अभावभेदः हेतुरिति स्वीक्रियते। अतः अभावनिर्विकल्पकम् आपादयितुं न शक्यते — इति वाच्यम्। तथा सति मयापि तादृशहेतुतास्वीकारेण अभावनिर्विकल्पकस्य वारणीयत्वात्।

गादाधरी

वस्तुतस्तु — अपाद्याप्रसिद्ध्यैव तादृशफलापत्त्यनवकाशः। प्रसिद्धाया घटो नास्तीत्यादिबुद्धेर्घटत्वादिविशिष्टवैशिष्ट्यावगाहितया तत्र प्रतियोगितावच्छेदकघटत्वादिप्रकारकज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानविधया हेतुतायाः क्लृप्तत्वात् तादृशकारणविरहादेव न तच्छन्यकाले तदापत्तिः।

विवरणम्

प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य कुत्राप्यभावबुद्धौ स्वातन्त्र्येण हेतुता नास्ति इति प्रकारान्तरेण साधयति—वस्तुतस्तु इत्यादिना [पृ.830]। प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य स्वातन्त्र्येण अभावप्रत्यक्षं प्रति हेतुत्वाकल्पने प्रतियोगिज्ञानशून्यकाले 'नास्ति' इत्याकारकप्रतियोग्यविषयकप्रत्यक्षस्यापत्तिः पूर्वमाशङ्किता। इदानीं आपाद्यस्य प्रत्यक्षस्य कुत्राप्यप्रसिद्ध्यैव आपत्तिः कर्तुं न शक्यते।

प्रसिद्धायाः घटो नास्तीति बुद्धेः घटत्वविशिष्टवैशिष्ट्यावगाहिन्याः प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानशून्यकाले तादृशज्ञानस्य अहेतुत्वे आपत्तिः इत्यपि वक्तुं न शक्यते। विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकप्रकारक-

ज्ञानस्य हेतुतया प्रतियोगितावच्छेदकघटत्वप्रकारकज्ञानशून्यकाले विशेषणतावच्छेदकघटत्वप्रकारकज्ञानस्य कारणस्य विरहात् ।

एवं च 'घटत्वेन घटो नास्ति' इति प्रत्ययवत् 'घटत्वेन पटो नास्ति' इति प्रत्ययोऽपि स्वातन्त्र्येण घटत्वस्य प्रतियोगितावच्छेदकत्वं साधयितुं शक्नोतीति व्यधिकरणधर्मावच्छिन्नाभावसिद्धिः निष्प्रत्यूहैवेति आक्षेपः स्थितः ।

दीधितिः

यदि पुनरानुभाविको लोकानां स्वरसवाही 'घटत्वेन पटो नास्ति' इत्यादिप्रत्ययः, तदा तादृशाभाववारणं गीर्वाणगुरूणामप्यशक्यमिति मन्तव्यम् ॥

इति श्रीमद्रघुनाथभट्टाचार्यशिरोमणिविरचितायां तत्त्वचिन्तामणिव्याख्यायां दीधित्यपराख्यायां व्यधिकरणधर्मावच्छिन्नाभावविचारः समाप्तः ॥

गादाधरी

मिश्रोक्तव्यधिकरणधर्मावच्छिन्नाभावनिराकरणप्रकारस्य खण्डनपूर्वकं तादृशाभावस्थापनम्

यस्तु—अनाहार्यप्रतियोगितावच्छेदकविशिष्टप्रकारकोपलम्भविरहो विशेष्यीभूतधर्मिप्रत्यासन्नोऽभावग्रहे हेतुः । तथा च यस्य पुंसः समवायित्वादिविशिष्टवाच्यत्वादिप्रकारकोऽनाहार्यभ्रमोऽप्रसिद्धः, तदीयः 'समवायितया वाच्यत्वं नास्ति' इत्याकारकप्रत्ययो न व्यधिकरणधर्मावच्छिन्नाभावमवगाहितुमीष्टे । तदीयतादृशप्रतियोग्युपलम्भविरहरूपतदीयाभावप्रत्यक्षकारणस्याप्रसिद्धेरिति तत्पुरुषीयतादृशप्रत्ययस्य वाच्यत्वाद्यनुयोगिकसमवायित्वाद्यभाव-

विषयकत्वावश्यकत्वे सर्वत्रैव तद्विषयकत्वमुचितम् । एकाकारप्रतीतेः पुरुषभेदेन विषयतावैचित्र्यविरहादिति मिश्रोक्तो व्यधिकरणधर्मावच्छिन्नाभावनिराकरणस्य पन्थाः—सोऽपि न साधीयान् । अभावबुद्धौ स्वप्रतियोगितावच्छेदकविशिष्टस्वप्रतियोग्युपलम्भाभावत्वेन एककारणतायाः स्वत्वाननुगमेन दुर्वचतया विशिष्य कारणताकल्पनस्यावश्यकत्वे, यत्र तादृशोपलम्भः प्रसिद्धः तत्रैव तादृशोपलम्भानन्तरमभावप्रत्ययवारणाय तदभावहेतुत्वोपगमात् व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ क्वचिदप्रसिद्ध्या तदभावहेतुत्वासंभवेऽपि सन्निकर्षादिघटितसामग्रीतः तदुत्पत्तौ बाधकाभाव इत्यत आह—यदि पुनरिति [पृ. 831]। — स्वरसवाही विवादशून्यः । घटत्वेन घटो नास्तीति पाठः; घटत्वेन पटो नास्तीति पाठो न साधुः; तादृशप्रतीतेः पटाद्यनुयोगिकघटत्वाद्यभावावगाहिताया एव व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगन्तृभिरुपगमात् प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वं भासत इति नियमस्य तदाकारप्रतीतिबलेनाशक्यवारणत्वात् । 'आनुभाविक' इत्यस्य व्यधिकरणधर्मस्यावच्छेदकत्वावगाहितया अनुभवसिद्ध इत्यर्थकतया वा कथंचित् सङ्गमनीयः। गीर्वाणगुरूणामपि न शक्यमित्यनेन प्रतीतिकारणबाधेन तादृशाभावनिराकरणनिर्भरा मिश्रादय आक्षिप्ताः । यदि तदा इत्यनेन तादृशप्रतीतेरानुभाविकत्वे विवादं प्रदर्श्य तादृशाभावस्यापारमार्थिकत्वं सूचितम् ॥

इति महामहोपाध्यायगदाधरभट्टाचार्यचक्रवर्तिविरचिते तत्त्वचिन्तामणिदीधितिव्याख्याने व्यधिकरणधर्मावच्छिन्नाभावखण्डनम् ॥

॥ चतुर्दशलक्षणी समाप्ता ॥

विवरणम्

व्यधिकरणधर्मावच्छिन्नाभावनिराकरणपरं मार्गान्तरमपि अनूद्य दूषयति - **यस्तु इत्यादिना ।**

विशेष्यतासंबन्धेन अभावप्रतीतिं प्रति अनाहार्यप्रतियोगितावच्छेदकविशिष्टप्रतियोगिप्रकारकोपलम्भनिष्ठविशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकाभावो हेतुः । यथा 'भूतलं घटाभाववत्' इत्याकारकप्रतीतिः विशेष्यतासंबन्धेन भूतले जायते । तत्र ततः पूर्वं 'भूतलं घटवत्' इत्याकारकः प्रतियोगितावच्छेदकघटत्वविशिष्टघटप्रकारकोपलम्भः अनाहार्यः विशेष्यतासंबन्धेन नास्ति । प्रकृते यस्य पुरुषस्य समवायित्वविशिष्टवाच्यत्वप्रकारकः "समवायि वाच्यत्ववदिदम्" इत्याकारकः अनाहार्यभ्रमः अप्रसिद्धः, तस्य पुरुषस्य यः 'समवायितया वाच्यत्वं नास्ति' इत्याकारकः प्रत्ययः सः न व्यधिकरणसमवायित्वावच्छिन्नवाच्यत्वाभावं अवगाहितुं शक्नोति । तत्र विशेष्यतासंबन्धेन समवायित्वविशिष्टवाच्यत्वप्रकारकोपलंभरूपस्य प्रतियोगिनः अप्रसिद्धया तदभावरूपस्य अभावप्रत्यक्षकारणस्य अप्रसिद्धेः । तथा च तत्पुरुषीयः 'समवायितया वाच्यत्वं नास्ति' इत्याकारकः प्रत्ययः वाच्यत्वानुयोगिकसमवायित्वाभावमेव अवगाहते । न तु समवायित्वावच्छिन्नवाच्यत्वाभावमिति अवश्यं वक्तव्यम् ।

एवं सति सर्वेषामपि पुरुषाणां समवायितया जायमानः 'समवायितया वाच्यत्वं नास्ति' इति प्रत्ययः वाच्यत्वानुयोगिकसमवायित्वाभावमेव विषयीकरोति इति स्वीक्रियताम् । एकाकार-

प्रतीतेः पुरुषभेदेन अभावभेदविषयकतायाः अनुचितत्वात् । अतः व्यधिकरणधर्मावच्छिन्नाभावः निष्प्रमाणकः इति मिश्रोक्तः व्यधिकरणधर्मावच्छिन्नाभावनिराकरणमार्गः सोऽपि न युक्तः। अभावबुद्धौ स्वप्रतियोगितावच्छेदकविशिष्टस्वप्रतियोगिप्रकारकोपलम्भाभावः कारणमिति एककार्यकारणभावः वक्तुं न शक्यते । स्वत्वस्य अननुगतत्वात् । अतः विशिष्येव अननुगतकार्यकारणभावः कल्पनीयः । एवं च यत्र अनाहार्यप्रतियोगितावच्छेदकविशिष्टप्रतियोग्युपलम्भः प्रसिद्धः, तत्र तादृशोपलम्भानन्तरं अभावप्रत्ययस्य वारणाय तादृशोपलम्भाभावः अभावप्रत्ययहेतुः इति उपगम्यते । तादृशोपलम्भस्य अप्रसिद्धिस्थले तु तदभावस्य कारणत्वमपि नाङ्गीक्रियते । एवञ्च यस्य पुरुषस्य समवायित्वविशिष्टवाच्यत्वप्रकारकः अनाहार्यभ्रमः प्रसिद्धः तस्य पुरुषस्य तादृशभ्रमाभावदशायां जायमानः 'समवायितया वाच्यत्वं नास्ति' इति प्रत्ययः समवायित्वावच्छिन्नवाच्यत्वाभावम् अवगाहितुमीष्टे इति स एव प्रत्ययः व्यधिकरणधर्मावच्छिन्नभावसाधकः इत्याशङ्क्य स्वातन्त्र्येण अवच्छेदकत्वावगाही प्रत्ययः आनुभाविकश्चेत् तत्सिद्धं व्यधिरणधर्मावच्छिन्नाभावं गीर्वाणगुरुरपि वारयितुं न शक्नोति इति दीधितावुक्तम् ।

'यदि' 'तदा' 'स्वरसवाही' इत्यादि शब्दैः स्वातन्त्र्येण घटत्वादौ प्रतियोगितावच्छेदकत्वावगाहिप्रतीतेः आनुभविकत्वे विवादं प्रदर्शयद्भिः व्यधिकरणधर्मावछिन्नाभावः प्रमाणविरहात् अपारमार्थिकः इति दीधितिकारैः सूचितम् । तदाह — यदि तदेत्यनेनेति [पृ. 831] ।

चतुर्दशानामपि लक्षणानां
व्याप्तेः कृता या खलु सुप्रसिद्धा ।
गदाधरेणातिगभीरटीका
रामानुजस्तां व्यवृणोद् गुरुस्तथा ॥

गदाधरकृता व्याख्या दीधितेः सुगमा भवेत् ।
जिज्ञासूनां हि सर्वेषामित्युद्देश्यं कृतेर्मम ॥

विवरणमेतद्विततं यदपूर्यताल्पके काले ।
कारणमत्र गुरूणामनिमित्तकं हि कारुण्यम् ॥

इति पण्डितराजस्य श्रीशैलवंशजलधिकौस्तुभस्य श्रीकृष्णताताचार्यस्य तनयेन
तर्कवाचस्पति-पण्डितरत्न-दर्शनसार्वभौम-चतुश्शास्त्रप्रवीणादि-
बिरुदालंकृतेन महामहोपाध्यायेन

रामानुजताताचार्येण

विरचितं चतुर्दशलक्षणीगादाधरीविवरणं सम्पूर्णम् ।